श्रीराधाकृष्णाभ्यां नमः

# श्रीमद्भागवतमाहात्म्यसन्दोहः

## पाद्मस्कान्दमाहात्म्ये, भागवतभूषणम् , आद्यपद्यव्याख्याशतकञ्च




सम्पादकः

श्रीदलसुखरामात्मजः कृष्णशङ्करः शास्त्री

'अभिनवशुकः' वेदान्ताचार्यः साहित्यतीर्थः श्रीभागवतसुधानिधिः ।



S
294.182 1
Sh 24 B



प्रकाशकाः

कृष्णशङ्करः शास्त्री

कृष्णराजभाई ठाकरसी

जयराजभाई द्वारकादासः

( श्रीविद्याहितनिधिसदस्याः )

मूल्यं पञ्चरूप्यकम्

ई. सन् १९६५ ]

[ वि. सं. २०२२

श्रीराधाकृष्णाभ्यां नमः

# श्रीमद्भागवतमाहात्म्यसन्दोहः

## पाद्मस्कान्दमाहात्म्ये, भागवतभूषणम् , आद्यपद्यव्याख्याशतकञ्च




सम्पादकः

श्रीदलसुखरामात्मजः कृष्णशङ्करः शास्त्री

'अभिनवशुकः' वेदान्ताचार्यः साहित्यतीर्थः श्रीभागवतसुधानिधिः ।



प्रकाशकाः

कृष्णशङ्करः शास्त्री

कृष्णराजभाई ठाकरसी

जयराजभाई द्वारकादासः

( श्रीविद्याहितनिधिसदस्याः )

ई. सन् १९६५ ] [ वि. सं. २०२२



MUNSHI RAM MANOHAR LAL
Oriental & Foreign Book-Sellers
P.B. 1165, Nai Sarak, DELHI-6.

प्रकाशकाः

**कृष्णशङ्करः शास्त्री**

**कृष्णराजभाई ठाकरसी**

**जयराजभाई द्वारकादासः**

**( श्रीविद्याहितनिधिसदस्याः )**

29933
7.4.69

Library IIAS, Shimla
S 294.182 1 Sh 24 B
00029933

( सर्वेऽधिकाराः प्रकाशकाधीनाः )

प्राप्तिस्थानानि

**कृष्णशङ्करशास्त्री**
आतिथेयम्, कालेजरोड
नडियाद, जि० खेड़ा, गुजरात

**कृष्णराजभाई ठाकरसी**
१६, एपोलोस्ट्रीट, फोर्ट
बम्बई-१

**प्राणलाल आचार्यः**
श्रीगुर्जर छात्र सहायक समिति
कर्णघंटा, वाराणसी ( उ० प्र० )

मुद्रकः
**बलदेवदासः**
संसार प्रेस, 'संसार' लिमिटेड
काशीपुरा, वाराणसी

# किञ्चिद् वक्तव्यम्

को वै नैतकण्ठथमावहेच्छ्रीनन्दनयनानन्द-यशोदानन्दकन्दुक-गोगोपगोपिकागोप-राधानाथ-कथाकर्णने ! भगवल्लीला-ललितं भक्तानामभयप्रदं तदिदं श्रीमद्भागवतं विविधटीकाविराजितं प्राकाश्यमानीयते साम्प्रतम् । बहुलटीकास्तु-श्रीधरस्वामि-विरचित-भावार्थदीपिका, श्रीवंशीधरकृत-भावार्थदीपिकाप्रकाशः, श्रीराधारमणदासगोस्वामिप्रणीत-दीपिनी, श्रीमद्वीर-राघवाचार्यभावित-भागवतचन्द्रिका, श्रीमद्विजयध्वजतीर्थरचित-पदरत्नावली, श्रीमज्जीवगोस्वामिनिष्पादित-क्रमसन्दर्भः, श्रीमद्विश्वनाथचक्रवर्तिसाधित-सारार्थदर्शिनी, श्रीमच्छुकदेवनिर्वर्तित-सिद्धान्तप्रदीपः, श्रीमद्वल्लभाचार्यनिर्मित-सुबोधिनी, श्रीपुरुषोत्तमचरणगोस्वामिरचित-सुबोधिनीप्रकाशः, गोस्वामिश्रीगिरिधरलालविहित-बालप्रबोधिनीति, मूलभाषानुवादश्च ।

तत्रादौ परमोपकारकं श्रीमद्भागवतमाहात्म्यं हितम् । यथा—

असारे संसारे विषयविषसङ्गाकुलधियः क्षणार्धं क्षेमार्थं पिबत शुकगाथाऽतुलसुधाम् ।<br>
किमर्थं व्यर्थं भो व्रजत कुपथे कुत्सितकथे परीक्षित्साक्षी यच्छ्रवणगतमुक्त्येककथने ॥

पद्मपुराणीयभागवतमाहा० १०४ ।

इत्थं पद्मपुराणोक्तं माहात्म्यं स्कन्दपुराणोक्तं माहात्म्यं श्रीमद्भागवतभूषणं चेति माहात्म्यत्रयी, आद्यपद्यव्याख्याशतकं च सर्वजनसुलभं कथं स्यातामिति विभाव्य पार्थक्येन तत्संपादनपरोऽयमायासः । आशासे, श्रीमद्भागवतमाहात्म्यसंदोहः ( आद्यपद्य-व्याख्याशतकसमेतः ) विदुषां मोदकरो भवेदिति—

भाद्रपदशुक्लतृतीया }
२०२२ }

विदुषामाश्रवः
संपादकः

# श्रीमद्भागवतमाहात्म्यादिग्रन्थानामनुक्रमणिका


## १—पद्मपुराणान्तर्गतं भागवतमाहात्म्यम्

| अध्याये | विषयाः | पृष्ठाङ्काः |
|---|---|---|
| १ | नारदसनकादिसमागमः, नारदकर्तृकं भक्तिज्ञानवैराग्यवृत्तान्तनिवेदनं च। | १– ८ |
| २ | भक्तेः क्लेशनिवृत्तये नारदस्योद्योगः। | ९–१५ |
| ३ | सनकादिमुखाच्छ्रीमद्भागवतश्रवणेन भक्तेस्तुष्टिर्ज्ञानवैराग्ययोः पुष्टिश्च। | १६–२३ |
| ४ | सप्ताहकथायां भगवतः प्रादुर्भावः, गोकर्णोपाख्यानारम्भश्च। | २४–३१ |
| ५ | धुन्धुकारिणो दुर्मृत्युनिमित्तकप्रेतत्वप्राप्तिवर्णनं ततो गोकर्णानुग्रहेणोद्धारश्च। | ३२–४० |
| ६ | श्रीमद्भागवतसप्ताहपारायणविधिः। | ४१–५३ |

## २—स्कान्दं भागवतमाहात्म्यम्

अध्यायाः १—४ .... ... .... ५५–८०

## ३—श्रीमद्भागवतभूषणम्

अध्याया १—४ ( उल्लासाः ) .... ... ८१–९३

## ४—श्रीमद्भागवताद्यपद्यव्याख्याशतकम् ... ... ९५–१९४

# श्लोकव्याख्या


| क्रमांकः | विषयः | पृष्ठाङ्कः |
|---|---|---|
| | **प्रथमश्लोकव्याख्या** | |
| | मंगलाचरणम् | ९५ |
| | उपोद्घातः | ९५ |
| १ | गणेशपक्षः | ९६ |
| २ | स्वरस्वतीपक्षः | ९७ |
| ३ | सूर्यपक्षः | ६८ |
| ४ | शिवपक्षः | ९८ |
| ५ | गुरुपक्षः | ९९ |
| ६ | ब्राह्मणपक्षः | १०० |
| ७ | कर्मपक्षः | १०१ |
| ८ | सत्संगपक्षः | १०२ |
| ९ | गंगाप्रवाहपक्षः | १०३ |
| १० | तपःपक्षः | १०४ |
| ११ | ॐकारपक्षः | १०४ |
| १२ | नारदपक्षः | १०५ |
| १३ | रामचन्द्रपक्षः | १०५ |
| १४ | कृष्णचन्द्रपक्षः | १०६ |
| १५ | धन्वन्तरिपक्षः | १०७ |
| १६ | नृसिंहपक्षः | १०७ |
| १७ | मत्स्यावतारपक्षः | १०७ |
| १८ | कूर्मावतारपक्षः | १०८ |
| १९ | वामनपक्षः | १०८ |
| २० | वराहपक्षः | १०८ |
| २१ | परशुरामपक्षः | १०९ |
| २२ | संकर्षणपक्षः | १०९ |
| २३ | बुद्धपक्षः | ११० |
| २४ | कल्किपक्षः | १११ |
| २५ | हयग्रीवपक्षः | १११ |
| २६ | दत्तात्रेयपक्षः | ११२ |
| २७ | कपिलपक्षः | ११२ |
| २८ | सनकादिपक्षः | ११२ |
| २९ | गोवर्द्धनपक्षः | ११३ |
| ३० | श्रीराधापक्षः | ११३ |
| ३१ | वृन्दावनपक्षः | ११४ |
| ३२ | हरिनामपक्षः | ११५ |
| ३३ | वायुपक्षः | ११६ |
| ३४ | इन्द्रपक्षः | ११६ |
| ३५ | वरुणपक्षः | ११६ |
| ३६ | धर्मराजपक्षः | ११७ |
| ३७ | कुबेरपक्षः | ११८ |
| ३८ | अग्निपक्षः | ११८ |
| ३९ | विष्णुशिवाभेदपक्षः | ११९ |
| ४० | दुर्गापक्षः | १२० |
| ४१ | श्रीभागवतपक्षः | १२० |
| ४२ | व्यासपक्षः | १३४ |
| ४३ | शुकपक्षः | १३५ |
| ४४ | ऋषभदेवपक्षः | १३५ |
| ४५ | पृथुपक्षः | १३६ |
| ४६ | ध्रुवपक्षः | १३६ |
| ४७ | नरनारायणपक्षः | १३६ |
| ४८ | हंसावतारपक्षः | १३७ |
| ४९ | यमुनाप्रवाहपक्षः | १३७ |
| ५० | पुष्करतीर्थपक्षः | १३७ |
| ५१ | प्रयागराजपक्षः | १३७ |
| ५२ | कुरुक्षेत्रपक्षः | १३८ |
| ५३ | मायाक्षेत्रपक्षः | १३८ |
| ५४ | अयोध्याक्षेत्रपक्षः | १३८ |
| ५५ | काशीक्षेत्रपक्षः | १३९ |
| ५६ | द्वारकाक्षेत्रपक्षः | १४० |
| ५७ | गोपीचन्दनपक्षः | १४१ |
| ५८ | ऊर्ध्वपुंड्रपक्षः | १४२ |
| ५९ | काञ्चीक्षेत्रपक्षः | १४२ |
| ६० | अवन्तिकापक्षः | १४२ |
| ६१ | पुरुषोत्तमक्षेत्रपक्षः | १४३ |
| ६२ | भगवन्नैवेद्यपक्षः | १४३ |
| ६३ | विष्णुचरणामृतपक्षः | १४४ |
| ६४ | तुलसीतरुपक्षः | १४४ |
| ६५ | शालग्रामपक्षः | १४७ |
| ६६ | केदाराभिन्नबदरिकाक्षेत्रपक्षः | १४८ |
| ६७ | सेतुपक्षः | १४९ |
| ६८ | समुद्रपक्षः | १४९ |
| ६९ | काश्मीरमण्डलपक्षः | १४९ |

| क्रमांकः | विषयः | पृष्ठाङ्कः |
|---|---|---|
| ७० | भारतखण्डपक्षः | १५० |
| ७१ | कालपक्षः | १५० |
| ७२ | नःस्थैर्यपक्षः | १५१ |
| ७३ | हिरण्यगर्भपक्षः | १५१ |
| ७४ | कार्तिकेयपक्षः | १५२ |
| ७५ | जननीजनकपक्षः | १५२ |
| ७६ | प्रद्युम्नपक्षः | १५३ |
| ७७ | अनिरुद्धपक्षः | १५३ |
| ७८ | अर्जुनपक्षः | १५४ |
| ७९ | उद्धवपक्षः | १५४ |
| ८० | हनूमत्पक्षः | १५४ |
| ८१ | गरुडपक्षः | १५५ |
| ८२ | सुदर्शनपक्षः | १५६ |
| ८३ | श्रीलक्ष्मीपक्षः | १५६ |
| ८४ | अष्टादशाक्षरश्रीगोपालमनुपक्षः | १५७ |
| ८५ | श्रीगीतापक्षः | १५८ |
| ८६ | वेदपक्षः | १५८ |
| ८७ | गायत्रीपक्षः | १५९ |
| ८८ | गवां कुलस्य पक्षः | १६१ |
| ८९ | रुद्राक्षपक्षः | १६२ |
| ९० | पंचाक्षरमंत्रपक्षः | १६३ |
| ९१ | शिवलिंगपक्षः | १६४ |
| ९२ | विभूतिधारणपक्षः | १६५ |
| ९३ | बिल्ववृक्षपक्षः | १६६ |
| ९४ | स्वयंपाकपक्षः | १६७ |
| ९५ | नवग्रहपक्षः | १६८ |
| ९६ | एकादशीतिथिपक्षः | १७० |
| ९७ | तर्कशास्त्रपक्षः | १७३ |
| ९८ | पुष्यनक्षत्रपक्षः | १७९ |
| ९९ | कलियुगपक्षः | १८० |
| १०० | संन्यासाश्रमपक्षः | १८१ |


इति प्रथमश्लोकव्याख्याशतकम्

द्वितीयश्लोकव्याख्या


| | | |
|---|---|---|
| १ | ब्राह्मणपक्षः | १८६ |
| २ | भक्तियोगपक्षः | १८६ |


तृतीयश्लोकव्याख्या १८८

इत्यनुक्रमणिका समाप्ता ।

# श्रीमद्भागवतभूमिका

अतिविशाले मनसापि सर्वांशेनावितर्क्ये जगति मानवः सुखप्राप्त्यर्थं सर्वाणि कार्याणि समारभते परन्तु तैः कार्यैः दुःखं विहायाल्पांशेनापि वास्तविकस्य नित्यस्य सुखस्य न प्राप्तिर्भवति। यच्च किञ्चित्सुखमुपलभ्यत इवाभाति, तत्त्वनित्यतया दुःखमिश्रितया च दुःखवदुपलभ्यमानं त्याज्यमेव भासते विदुषां यतो यैर्विषयैस्तदुपलभ्यते मानवैस्ते सर्वथा नश्वरा अतस्तज्जन्यं सुखमपि विनाशीत्यनुभूयते, तदा मानवः स्वान्ते विचारयति, किमहं केवलं दुखमनुभवितुमेवं मृत्योर्वशो भवितुमेवोत्पन्नोऽस्मि ? किमहं शरीरेणैतेन सह म्रियेऽथवा विनष्टेऽपि शरीरे किमपि सर्वथा नित्यं तत्त्वमवशिष्यते[1] ? इति। यदा मानवोऽतिविशालां मनसाप्यवितर्क्यां पृथ्वीं पश्यन् विचारयति इयं कुतः समागता, को वेमां धारयति, इदं को वा सम्यक्तया विजानाति,[2] अस्माद् दृश्यमानात्पूर्वं किमपि तत्त्वमस्ति न वा ? यदि स्यात् तर्हि तत् सदसद्वा भवेत्[3] ? इमाः सर्वाः प्रजाः कुत उत्पन्नाः[4] ? वयं कुतो जाताः ? कथं वा जीवामः ? तथान्तेऽस्माकं किं वा भविष्यति[5] ? इत्यादीननेकान् प्रश्नान् सृष्टेः प्रारम्भत एव विचारशीलो मानवः स्वहृदये समालोचयति स्म। अस्यामवस्थायां स विचारको यथाशक्ति स्वीयया बुद्ध्या सर्वत्राज्ञातस्थलेषु किमपि कार्यकारणभावं कल्पयित्वा समाधातुं चेष्टते। तथा किमपि कारणजातं कल्पयित्वापि यदा समाधानं न प्राप्नोति तदा पदार्थजातमीदृशस्वभावमेवेति न तत्र तर्कावसरः इति[6] कथञ्चन संतुष्यति।

परन्तु सात्त्विकान्तःकरणो विचारशीलो मनुष्यो न केवलमनेन प्रकारेण संतुष्यति, यतो जगत्यनेकानि कार्याणि वारंवारं विचारयितुं मनुजं हठात्प्रेरयन्त्येव, यथा क्रमागता ऋतवः, अकस्मात्प्रवृत्तो झञ्झावातः भूकम्पः, प्राणिनां जन्ममरणे इत्यादिकं विचार्य विचार्य सोऽस्य जगतोऽभ्यन्तरे प्रारम्भे च सर्वशक्ति सर्वसमर्थं किञ्चनापूर्वमनिर्वचनीयं च तत्त्वं विराजते, तदेव स्वेच्छामनुसृत्य कञ्चन नियमं चाश्रित्य सर्वमिदमनेकप्रकारेण घटयति, संस्थापयति, संहरति चेति निश्चिनोति।

प्राचीनाः सत्त्वशीला ऋषय इत्थं निश्चित्य तस्यानिर्वचनीयं तत्त्वमार्गमन्वेष्टुं प्रवृत्ताः सन्तः शीघ्रमेवान्वभवन् यद् विषयानुपभोक्तुं प्रवृत्तानीमानीन्द्रियाणि तत्तदवितर्क्यं तत्त्वं ज्ञातुं न प्रभवेयुः, प्रत्युत सर्वेषां चित्तप्रभृतीनां तेजः क्षीयेत, नाभीप्सितं ज्ञानं च भवेत्[7] इत्थं विचार्य ते प्राचीनः, परमश्रेष्ठा ऋषयः अन्तःकरणशोधनेन ध्यानयोगेन च परमात्मानं जगत्कारणमनन्तशक्तिसंपन्नं साक्षात्कर्तुं प्राभवन्[8], जगतीतले नास्ति कश्चन धर्मः, यत्रेश्वरस्य सत्ता केनापि प्रकारेण नाङ्गीकृता। जगत्कार्यं कञ्चन नियममाश्रित्य स्वेच्छया कर्तुं प्रवृत्ता शक्तिः काचन विद्यत इति बलात्स्वीकरणीयमेवापतति।

अतिप्रसिद्धेन तार्किकशिरोमणिनोदयाचार्येणातिप्रबलाभिर्युक्तिभिरीश्वरसिद्धिः प्रदर्शिता। तत्रत्यानां कासांचन युक्तीनामत्र प्रदर्शनमुचितं प्रतिभाति। तथाहि–कार्यभूतपृथिवीप्रभृतिपदार्थजातं समालोचयतो मनुजस्य मनसि विचार इत्थं जागर्ति, अस्य

---

१. येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके ( कठ० १,१,२४ )

२. को अद्धा वेद क इह प्रवोचत्। कुत आजाता कुत इयं विसृष्टिः''अथाको वेद यत आबभूव ( तैत्तिरी० ब्रा० २,६ )

३. नासदासीन्नो सदासीत्तदानीम् ( तैत्ति० ब्रा० २,१ )

४. भगवन् कुतो ह वा इमाः प्रजाः प्रजायन्ते ( प्रश्न० उ० १,३ )

५. किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च संप्रतिष्ठाः ( श्वेताश्व०उ० १ )

६. अचिन्त्याः खलु वै भावा न तांस्तर्केषु योजयेत् ( विष्णु० पु० )

७. श्वोभावा मर्त्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयन्ति तेजः ( कठ० १,१,२६ )
तथा—न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् ( कठ० १,२,६ )

८. ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम् ( श्वे० उ० १ )
तथा—कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ( कठ० २,१,१ )

९. प्राचीना ऋषयो मन्त्रद्रष्टारः स्फुटमुद्घोषयन्ति—
"द्यावाभूमी जनयन् देव एकः" ( ऋ० )
तथा—स दाधार पृथिवीं द्यामुतेमाम् ( यजुः १३,४ )
तथा—सत्येनोत्तभिता भूमिः ( अथर्व० १४,१,१ )
तथा—अनड्वान् दाधार पृथिवीमुत द्यामनड्वान् दाधारोर्वन्तरिक्षम् ( अथर्व० ४,११,१ )

कर्ता केनचनावश्यं भाव्यमेव, यतः प्रतिकार्यं कर्तृसत्ता सर्वत्र दृश्यते यः सत्तावान् पदार्थो नाशशीलो दृश्यते स निश्चितं केनचित्कर्त्रा निर्मित एव यथा प्रत्यहं प्रतिगृहं दृश्यमानं घटपटप्रभृति पदार्थजातम्। अत्र केषांचन मनसि शङ्केत्थं समुदेति–पृथ्वी, जलं वह्निर्वायुर्वा परमाणुद्वयणुकादिद्वारा स्वयमुत्पद्यते, स्वभाव एवायं तस्य, तत्र कस्यचन कर्तुर्नास्त्येवापेक्षेति। अस्याः शङ्काया इत्थमिदमुत्तरं समुचितं प्रतिभाति–द्वयणुकानां समुत्पादिका परमाणुनिष्ठक्रिया कदाचिदुत्पद्यमाना विना कर्तारं नोत्पत्तुमर्हति, यदा विना कर्तारं समुत्पद्येत तदा कार्येण सर्वदैकप्रकारेण भाव्यं न कदाचन समुत्पत्तिः, कदाचन विनाशश्च भवितुमर्हति। परन्तु लोके सर्वथा वस्तुजातमेकरूपं नावलोक्यते। अतः सृष्टेः प्राक्काले कश्चन कर्तावश्यं स्यादेव, स एवेश्वर इति सात्त्विकाः कथयन्ति। किञ्चाकाशे पक्षिभिर्धृतं काष्ठमिव पृथ्वी स्थिरोपलभ्यते न कदाचित्पतति, अत्र कारणे समालोच्यमाने पक्षिवदस्या धारकः स्थिरत्वसंपादकश्च कश्चन चेतनो विद्यते स एवेश्वर इति।

किञ्च भूचाले प्रवृत्ते पर्वतादीनां विनाशो भवति, स च कर्तारमनुमापयति, यतो यत्र नाशो जायते तत्र तत्र कर्तारं पश्यामोऽतः पर्वतवृक्षादीनां भूकम्पे संजाते नाशस्य कर्ता कश्चनावश्यं स्यादेव, तमेवेश्वररूपेणास्तिकाः परिगणयन्ति। यद्यपि भूकम्पमेवास्यामवस्थायां नाशस्य कारणं प्रतिपादयितुं शक्नुवन्ति, तथापि भूकम्पस्याकस्मिकस्य कार्यरूपस्य कर्ता विनेश्वरात्को भवितुमर्हति[1] ?

किञ्च संसारे शब्दव्यवहारं कुर्वाणा मानवा घटशब्दाद् घटं कम्बुग्रीवादिमन्तमर्थं जानन्ति पितृपैतामहपरम्परया, परन्तु परम्पराया अस्याः प्राथमिकः कर्ता क इति विचिकित्सायामीश्वर एव प्रथमतो व्यवहारं विरचय्य तं कंचन प्रबोध्य प्रवर्तयतीति कल्पनोचिता प्रतिभाति[2]।

किञ्च वेदो वाक्यसमुदायरूपोऽचिन्त्यालौकिकप्रामाणिकपदार्थबोधको विना कस्माच्चन सर्वज्ञ-सर्वसमर्थ-पुरुषात्प्रवृत्तः (प्रकाशितः) न भवतीति तस्य यः प्रकाशकः स एवेश्वर[3] इत्यादिकम्।

एवं परमेश्वरं केनचित्प्रकारेण कयाचिद्युक्त्या च सर्वधर्मप्रवर्तकाः सर्वदेशस्थाः स्वीकुर्वन्ति, तस्य सर्वैरवश्यं स्वीकृतस्येश्वरस्य स्वरूपं कथं भवेत्, कथं च तं सर्वथा समुचितेन साधनेन विद्म इति जिज्ञासा समुदेति। प्राचीनाः सात्त्विका जिज्ञासवः ऋषयो निरचिन्वन् न विषयसक्तो मानवो विषयासक्तैरिन्द्रियैरन्धोऽन्यमन्धमिव परमेश्वरतत्त्वं प्रबोधयितुं प्रभवति[4]। इत्थं सर्वथा सम्यग् विचिन्त्येन्द्रियाणि बाह्यान्याभ्यन्तराणि च वशानि कृत्वा शुद्धेन सात्त्विकेन चेतसा परमेश्वरमतिसूक्ष्मं सर्वथा जगतो मूलभूतमचिन्त्यशक्तिं साक्षादकुर्वन्[5]—ईश्वरस्वरूपानुभवं महर्षयो यथाऽकुर्वन् तदनुभवस्वरूपवर्णनं वेदादिमन्त्रादिव्यव्याप्यातिष्ठ्त। स परमात्मा व्यापकः शुद्धः, सूक्ष्मस्थूलकारणशरीररहितः, धर्माधर्मादिवर्जितः, सर्वद्रष्टा, सर्वज्ञः, सर्वत उत्कृष्टः सनातनश्चास्ति[7], एवं सत्यानन्दज्ञानरूपश्च विद्यते[8] इत्याद्यनेकरूपेण परमेश्वरवर्णनमनेकत्रोपलभ्यते, दार्शनिकैरपि श्रुतिसम्मतं

---

१. यत् प्रयन्त्यभिसंविशन्तीति ( तै० ३,१,१ )
त्वमेव केवलं कर्तासि⋯त्वमेव केवलं हर्तासि⋯( गणेशोपनि० २-१ )

२. इत्थं सर्वमनुभूय ऋषयः स्वानुभवमनेन प्रकारेण प्रकाशितवन्तः–
यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ( श्वे० उ० ६,१८ )

३. अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः⋯( बृ० उ० २,४,१० )

४ अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः।
दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः॥ ( कठ० १,२,५ )
तथा—न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् ( कठ० १,२,६ )

५. ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम्।
यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः॥ ( श्वेत० १,३ )

६. सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठत्० ( ऋ० ८,४,१७ )

७. स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्। कविर्मनीषी परिभूः स्वयंभूः। ( यजुः० ४०।८ )

८. सत्यं ज्ञानमनन्तं ब्रह्म ( तै० २।१।१ ) आनन्दो ब्रह्मेति व्यजानात् ( तै० ३।६।१ )

स्वाभिप्रेतं परमेश्वरस्वरूपमुपवर्णितम् । श्रीरामनुजाचार्यैरित्थं स्वरूपं प्रोक्तम् । तत्किञ्चित्प्रदर्श्यते । तथाहि–परमेश्वरो जीवान्नियमति जीवाद्यन्तर्यामी सर्वथा जीवादिभ्यो भिन्नोऽस्ति, जीवजडतत्त्वानि तस्य शरीरं, जीवानां कर्मणां फलदाता, स्वयं ज्ञानस्वरूपोऽपि ज्ञानाश्रयोऽस्ति । स जगतो निमित्तोपादानसहकारिकारणरूपो विद्यत इति ।

अत्र नैयायिका अभिप्रयन्ति—ईश्वरो जगतः केवलं निमित्तकारणमास्ते, जगति उत्पन्नानां जीवादीनां कर्मफलस्य दाता तथा जीवादिभ्यो भिन्नोऽस्ति । एतत्तुल्यमेव प्रायो मतं वैशेषिकमाध्वयोः केषाञ्चन माहेश्वराणाञ्च । श्रीशङ्कराचार्या इत्थमभिप्रयन्ति स निर्विशेष-निर्लेप-निर्गुणाद्वितीयः, सर्वथा सत्यश्च वर्तते, मायामवलम्ब्य जगतो निमित्तकारणमुपादानकारणं च भवति, जगतः पारमार्थिकसत्ता नास्ति किन्तु व्यावहारिका सत्ता विद्यते, मायोपाधिकः स ईश्वरः कथ्यते । एवमीश्वरस्वरूपमनेकधा स्वाभिप्रेतं दार्शनिकास्तां तां श्रुतिमाश्रित्य भिन्दन्ति । तत्सर्वथा सर्वस्वरूपे तस्मिन् सत्यमेवास्ति ।

अत्र केषाञ्चन हृदये शङ्कैषा समुदेति । ईश्वरो यदि विद्यते तर्हि तस्यानुभवः सर्वैरेकरूपणैव कर्तव्यः, कुतोऽनुभवो भिद्यते ? अनुभवभेदाच्च सर्वथा स नास्त्येव, येन यथा दृष्टं स तथैव कल्पत इति कुतो न कल्पनीयमिति ।

परंतु सर्वथा नैतदुचितं प्रतिभाति, ते ऋषयः सर्वथा ध्यानयोगेन परमेश्वरतत्त्वं ज्ञातमिति स्पष्टं प्रतिपादयन्ति, परन्तु यथा यथा चित्तं निर्मलं भवति तथा तथा तदचिन्त्यमवितर्क्यं तत्सर्वथा सर्वरूपेण ज्ञातुं शक्यते, तावत्पर्यन्तं अन्धदृष्टहस्तिन्यायेन दर्शनभेदेन वर्णनभेदेऽपि तद्वर्णनं भिन्नमपि सर्वथा तस्मिन् परमेश्वरे संघटत एव ।

अत्र प्रसङ्गतोऽयं विचारोऽपि मनसि समायाति, परमेश्वरः कुतो जगन्निर्माति, किमर्थं वा ? स्वयं च तत्र किमर्थमवतरति ? इति । अत्र विचारे वेदादिपुराणपर्यन्तग्रन्थावलोकने, केषांचन मतेन जगद्वस्तुतो नोत्पन्नं, नास्ति । केषांचन मतेन तस्य परमेश्वरस्य लीलाकरणार्थं जगन्निर्माणमिति, परंतु तस्यावतरणेऽनेककारणानि ग्रन्थेषु समुपलभ्यन्ते, तथाहि—

श्रीमद्भगवद्गीतायां लिखितम्, यदा धर्मस्य ह्रासोऽधर्मस्य चाभ्युन्नतिर्भवति तदा परमेश्वरोऽवतरति, तथा साधूनां संरक्षणं दुष्टानां च विनाशकरणपूर्वकधर्मसंस्थापनार्थं परमेश्वरोऽवतीर्य तत्कार्यं संपादयति[1] । श्रीमद्भागवते परमेश्वरो भक्तानां शमिच्छन्नवतारं गृह्णाति । यदि परमात्मा सगुणरूपं न धारयेत्तर्हि भक्तः कथं तं जानीयात्कथं वा तं पूजयेदिति[2] । केचनान्यदवतारकारणं कथयन्ति-परमेश्वरावतरणाभावे श्रवणीय-स्मरणीयचरितानि भक्तानां कथं प्रादुर्भवेयुरिति[3] । श्रुतिषु तु परमेश्वरावतारकारणं तस्येक्षणमेव, तच्चैकस्य बहुरूपभवनं नाम[4] । अन्यत्र श्रुतौ तु तस्य परमात्मनो रमणेच्छैवावतरणकारणं, यतः एकाकी रन्तुं न कल्पते स द्वितीयमभिप्रैति[5] । अन्ये कथयन्ति परमेश्वरस्यावतरणे स्वकीया तादृक्स्वभावा शक्तिरेव मुख्यं कारणम् । गीतासूक्तम्-अजोऽव्ययः भूतानामीश्वरश्च परमात्मा प्रकृतिमधिष्ठायावतरतीति[6] ।

एतेषां सम्पूर्णानां कारणानामनुगमकमेकं कारणं प्रतिभाति, तच्च तस्य परमेश्वरस्य स्वकीयाचिन्त्या स्वेच्छैवावतारकारणमिति सुनिश्चयं प्रतिभाति । "परास्य शक्तिर्विविधैव श्रूयते" अस्याः श्रुतौ परमात्मनः शक्तिरनेकरूपा प्रोक्ता, तत्र मुख्यतया ज्ञानशक्तिः, इच्छाशक्तिः, क्रियाशक्तिश्चेति त्रिविधा विद्यते । तत्रेच्छाशक्तिरवतारकारणमास्ते । तत्रेच्छायाः कश्चन विषयोऽवश्यमस्ति । निर्विषयाया इच्छाया असम्भवादतः कदाचित्तस्या विषयो 'रमणम्' अस्ति । तस्य रमणं नाम जगत उत्पत्ति-स्थिति-संहरणरूपमनेकविधमास्ते । एवं रमणेच्छया जगदुत्पादयितुमीक्षणं तपश्चरत एव । तस्येक्षणमपि रमणविशेष एव । उत्पन्नस्य जगतोऽनन्तरं जगद्रक्षणरूपं रमणं कदा कदा दुष्टविनाशपूर्वकसाधुसंरक्षणरूपं भवति । कदा कदा धर्मसंस्थापनरूपं, कदाचिद्भक्तानां कल्याणं विधातुं नैकविधलीलाकरणरूपं च भवति । ऋषिप्रदत्तशापरूपमवतारकारणमपि तस्य रमणेच्छयैव भवति एवं च रमण एव सर्वेषामन्तर्भावो भवति ।

---

१. द्रष्टव्यम् गीता ४।७,८ । भाग० ८।२४।५; १०।२।२९; १०।१४।१०
२. भाग० १०।२।३४; १।८।३५ ।
३. भाग० १।८।३५
४. "स ऐक्षत बहु स्यां प्रजायेय" इति । "स ऐक्षत लोकान्नु सृजा इति"
५. "स वै नैव रेमे, तस्मादेकाकी न रमते, स द्वितीयमैच्छत्" इति ।
६. अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥ ४।६ इति ।

लिङ्गपुराणे स्पष्टतयोक्तं सर्वेष्ववतारेषु परमात्मन इच्छैवावतरणे कारणमिति। ऋषिप्रदत्तशापेनावतरति भगवानिति स्वीकारेऽपि कर्तुमकर्तुमन्यथाकर्तुं समर्थस्याचिन्त्यशक्तिसंपन्नस्य तस्येच्छां विना न किञ्चिदपि ऋषिशापः कर्तुं समर्थो भवति। अत एव विष्णुपुराणे प्रोक्तम्—

लीला जगत्पतेस्तस्यच्छन्दतः संप्रवर्तते। इति।

एवं भोजराजेनापि परमेश्वरोऽवतीर्य रमणरूपं पञ्चविधकृत्यं सृष्टि–स्थिति–संहारनिरोधतिरोभावरूपं संपादयतीत्युक्तम्—पञ्चविधं तत्कृत्यं सृष्टिस्थितिसंहारनिरोधतिरोभावः इति ( सर्वद०सं०शै. द० ) यद्यपि परमेश्वरः स्वतन्त्रस्वतन्त्रोऽस्ति स्वेच्छयैवावतरति, तथापि कचित्तस्यावतरणे भक्तानामिच्छापि सहकारिकारणरूपेण वर्तते, इमं विषयमग्रे विवेचयामः।

अत्रेश्वरावतरणप्रसङ्गेऽन्यैका शङ्कोदेति यदि परमेश्वर आकाशवद् व्यापकस्तर्हि कथं परिच्छिन्नरूपेण प्रादुर्भवति, न ह्यपरिच्छिन्नं सर्वदैकरूपं वस्तु कदापि परिच्छिन्नं भवितुमर्हति, तथात्वे तस्यापरिच्छिन्नरूपस्य विनाशः स्यादिति।

अत्रायं विचारः पुरस्फुरति–ईश्वरस्य वर्णनं कुर्वद्भिः "दृशिस्वरूपं गगनोपमं परम्" इत्यादिषु तस्याकाशरूपोपमया वर्णनं कृतं दृश्यते, तथापि सर्वेष्वंशेष्वीश्वर आकाशतुल्य इति नैव वर्णयतामभिप्रायः, उपमानोपमेययोः किञ्चित्सादृश्यमवलम्ब्यैव प्रवर्तते, यदि सर्वांशेन समानत्वमभिप्रेतं स्यात्तर्हि उपमालङ्कारस्वरूपमेव विनश्येदिति साहित्यविदां समयः। यदि प्रकृते स्थले कश्चिद्वास्तविकमाकाशरूपत्वं सर्वांशेनाभिप्रेयात्तर्हि तस्य परमेश्वरस्य स्वीकरणमेव व्यर्थमापद्येत। यतः सृष्ट्यादि सत्कार्यं सर्वथा चेतनकर्तारं विनानुपपन्नं सच्चेतनं कर्तारमनुमापयति। यदि त्वाकाशवदीश्वरो जडः पृथिव्यादेरनुत्पादकः स्यात्तर्हि तस्य कल्पनं व्यर्थं भवेदतः परमेश्वर आकाशवद् व्यापक इत्यंश एव उपमायाश्चारिताार्थ्यम्। आकाशवद्व्यापकोपीश्वरो भक्तेच्छया परिच्छिन्नः भवति, यतः स चेतनो विद्यते। अत ऋषयस्तं ध्यानयोगेन यथापश्येयुस्तथैव तस्य स्वरूपमस्तीति ज्ञातुं योग्यम्। ऋषयस्तं यथावालोकयन् तथैव तैरनेकत्र तस्य वर्णनं प्रदर्शितम्—

"अणोरणीयान् महतो महीयान्। नमो–ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च" (यजु० सं० १६।३)

अतः सर्वव्यापकः सच्चिदानन्दघनः परमात्मा कुत्रचिद्भक्तकार्यसंपादनार्थं परमेश्वरः स्वदिव्यं रूपं प्रकटयन्नपि अन्यत्र सर्वव्यापकरूपेण स्थितो भवति। श्रुतिरपि वक्ति"पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" (ऋ ८। ८४)

यथा सर्वत्रावस्थितो वायुरेकत्र झञ्झावातरूपेणान्यत्र वात्यारूपेण वहन्नपि तत्रैव स आस्ते नान्यत्रेति कल्पयितुं न शक्यते यतोऽन्यत्र प्राणिनां जीवनमुपलब्धेः।

भागवते परमेश्वरस्यैकत्र स्थितत्वेऽपि भिन्नस्थले तस्य दर्शनं कृतमित्यादिवर्णनमनेकत्रोपलभ्यते, यथा श्रीकृष्णचन्द्रेण रथे सगुणरूपेण तिष्ठतापि भक्ताक्रूरस्य कृते जले स्वदिव्यरूपं प्रदर्शितम्[2]। गोपीनां कृते रासलीलायां प्रतिगोपिकं स्वकीयं रूपं निर्मितम्[3]। ब्रह्मणः कृतेऽनेकविधाकाररूपं प्रदर्शितम्[4]। भौमासुरस्य गृहेऽवरुद्धानामनेककन्यकानां विवाहार्थमेकस्मिन् समयेऽनेकानि रूपाणि सर्वथा समानि विधायानेकत्र स्थानेषु तासां पाणिग्रहणं संपादितम्[6]। यशोदायाः कृते श्रीकृष्णेन स्वमुखे संपूर्णं जगच्च प्रदर्शितम्[5]। आस्ताम्। एवञ्च जगतः सृष्ट्यादिकार्यजातं निर्वोढुं कश्चन सर्वज्ञं सर्वशक्ति तत्त्वमवश्यमङ्गीकरणीयमेव बुद्धिमत्तामापतति। अतः ऋषिभिरेकाग्रचेतसा तस्य तत्त्वस्य यथा स्वरूपं दृष्टं तत्तथैवास्त इत्यङ्गीकरणं वरं भाति। एवं च तत्तत्त्वं सर्वशक्ति सर्वज्ञमेकत्र सर्वस्वरूपस्थितमपि सर्वशक्तिमत्वात्स्वेच्छया अन्यत्रानेकरूपेणावतरतीति स्वीकारे न काचिदनुपपत्तिरिति पश्यामः।

अत्र प्रसङ्गतः केषाञ्चिदैतिहासिकानां श्रीकृष्णचन्द्रावतारस्य सत्यत्वविषये मतमपि समालोचयामः। ते च कथयन्ति श्रीमद्भागवतादिग्रन्थेषु समुपवर्णितं कृष्णचरित्रं केवलं रूपकमेव, श्रीकृष्णो नाम कश्चनैतिहासिकः पुरुषो न जात एवेति।

१. सर्वावतारेषु वै विष्णोर्जननं स्वेच्छयैव तु।
नरकाग्न्यच्छलेनैव स्वेच्छया गमनं हरेः।
द्विजशापच्छलेनैवमवतीर्णोऽपि लीलया।

२. भाग० १०।३९।४१

३. भाग० १०।३३।३

४. भाग० १०।१३।१७

५. भाग० १०।८।३९

६. भाग० १०।[illegible]

अत्रेदमपि विवेचयामः, बहवः श्रीकृष्णचरित्रमादृत्यानेकप्रकारमाधिभौतिकमाध्यात्मिकं चार्थजातमपि प्रकाशयन्ति । तत्तु वास्तविकं कृष्णचरित्रं न विपरिणमति, वक्तॄणां भक्तानां दार्शनिकानाञ्च तत्स्वबुद्धेर्विलसनमात्रमेवेति विद्मः ।

श्रीकृष्णो यदि सर्वथा काल्पनिकः स्यात्तर्हि गीतोपदेशस्यार्जुनं प्रति वक्ता कः ? यद्यर्जुनोऽपि मनोरूपकेण रूप्यते, गीता च स्वयं व्यासेन विरचय्य काल्पनिकं कृष्णमर्जुनं च निर्माय गीता प्रवर्तितेति कल्प्यते तर्हि मथुरा-वृन्दावन-गोकुल-गोवर्धन-यमुनानदी-प्रभृति श्रीकृष्णचरितविषयभूतं वस्तुजातमुपलभ्यते तच्च कथं व्यवस्थापयितुं शक्यते । यदि काल्पनिकः श्रीकृष्णः स्यात्तर्हि तस्य मन्दिराणि यात्राद्युत्सवादिकं च कथं संभवेत् ? न हि काल्पनिकव्यक्तेर्मन्दिराणि यात्रोत्सवाद्युपलभ्यन्ते । यदा श्रीकृष्णवंशीया यादवादिवंशीयाश्च संप्रति विद्यन्ते लोकास्तर्हि कथमेतत्कथनमुचितं स्याद्यत्तन्मूलभूताः श्रीकृष्णप्रभृतयः पुरुषाः काल्पनिका इति । परीक्षित्पुत्रस्य जनमेजयस्य समुल्लेखोऽत्यन्तप्राचीन ऐतरेयब्राह्मण ऐतिहासिकपुरुषत्वेन समुपलभ्यते, एवं केषांचन मन्त्राणां पारीक्षितऋक्त्वेनोपलब्धिर्वैदिकवाङ्मयेऽप्यस्ति[1] । वासुदेवस्य तथार्जुनस्य नामनी पाणिनीयसूत्रे समुपलभ्येते[2], तत्रार्जुनसाहचर्येण वासुदेवपदं श्रीकृष्णस्यैव बोधकं विद्यते । एवं स्थिते श्रीकृष्णादयः काल्पनिका इति कथनमतिसाहसमात्रम् । इयं कल्पनैव प्रामाणिकत्वेन यद्यङ्गीक्रियेत तर्हि संप्रति विद्यमानकुलानां सर्वेऽपि मूलपुरुषाः काल्पनिकाः संभवेयुः । अतः श्रीकृष्णो बलरामः कंसोऽर्जुनः अस्मदादिवत् सर्वेऽपि एकदा अस्यां पृथिव्यां विराजमानाः सन्तः कार्याणि संपादयन्ति स्म । अतो न सर्वथा ते काल्पनिकाः संभवेयुः ।

एवं भागवतस्य कृष्णवर्णनं न सत्यम् , भागवतस्य रचयिता न विशिष्टो ज्ञानी, भागवतं तु बोपदेवेन रचितमित्यपि केषाञ्चन कथनं न प्रामाणिकम् । यतः श्रीकृष्णस्य वर्णनमनेकासु ऋक्षु समुपलभ्यते, एतन्मतमत्र भागवतग्रन्थे सम्यग्रीत्या प्रतिपादितम्[3] । अनेकासूपनिषत्स्वप्येतादृग् वर्णनमुपलभ्यते[4] । एवमनेकपुराणादिषु देवक्याः पुत्रेषु कृष्णोऽष्टमः, तस्य जन्म मथुरायां कंसस्य कारागृहे जातम् , इत्यादि सर्वं कृष्णचरित्रं न्यूनाधिकभावेन समुपलभ्यते[5] । अस्यां स्थितौ भागवतेऽपि तथाविधमुपलभ्यमानं वर्णनमसत्यमिति कथं वक्तुं शक्यते । तत्त्वनेकग्रन्थस्थितत्वेन सर्वथा परमप्रामाणिकमित्येव स्वीकर्तुं योग्यम् । सकलप्रामाणिकैः प्रामाणिकतया स्वीकृते महाभारतेऽपि संक्षेपेण भागवतवर्णितं कृष्णचरित्रं संदृश्यते[6] । केचन भारतस्थं कृष्णबाल्यकालक्रीडावर्णनं प्रक्षिप्तमिति वदन्ति, परन्तु प्रक्षिप्तमिति कथयितृभिः कथनातिरिक्तं नान्यत्किञ्चित् प्रबलं प्रमाणं प्रदर्शितम् । यच्च भगवतो व्यासस्य विषये विशिष्टज्ञानी नासीद् भागवतनिर्मातेति कथनं तदपि न शोभततराम् । यतः भागवतस्थानेकप्रमाणैर्व्यासः व्रती, वेदाग्निसेवकः, वेदार्थबोधकः, भारतस्य रचयिता, कर्मकाण्डादिकस्य प्रवर्तयिता, ब्रह्मसूत्रनिर्माता, ईश्वरभक्तः, योगविदिति ज्ञायते[7] । यच्च बोपदेवेन भागवतं विरचितमिति कथनं तत्त्वज्ञानमूलकमेव । श्रीमता दयानन्दसरस्वतीमहोदयेनैतत् सत्यार्थ-प्रकाशे लिखितम् । एवं कोलब्रुकादिपाश्चात्यपण्डिता अपीत्थं कथयन्ति । त्रयोदशशताब्द्यां वर्तमानेन देवगिरिस्थेन बोपदेवेन श्रीमद्भागवतमालम्ब्य "मुक्ताफलं", "भागवतानुक्रमणिका" भागवतसारबोधकौ "मुकुटनामकौ" ग्रन्थः इति त्रयं विरचितं संप्रत्युपलभ्यते । यदि भागवतमपि बोपदेवेन विरचितं स्यात्तर्हि स्वकर्तृकत्वमपि भागवते तेनोल्लेखनीयं भवेत् । परं तु भागवते प्रथमस्कन्धे तस्य व्यासकर्तृकत्वं व्यासाच्च शुकेनाधीतमिति स्पष्टं प्रतिपादितम्[8] । एवं बोपदेवस्याश्रयप्रदाता हेमाद्रिः स्वरचिते "चतुर्वर्गचिन्तामणौ" भागवतस्थानि वचनानि समुद्धरति, तथा दानखण्डेऽनेकपुराणदानप्रसङ्गे भागवतपुराणदानवाक्यान्य-भ्युद्धरति[9] । यदि हेमाद्रिसमये रचितं भागवतं स्यात्तर्हि प्राचीनानां महापुराणानामन्येषां दानवद् तदात्वे जातस्य भागवतस्य

---

१. द्रष्टव्यमैतरेयब्रा० ६।३२ साङ्ख्यायनब्रा० ३०।५ तथा गोपथब्रा० २।६।१२

२. 'वासुदेवार्जुनाभ्यां वुन्' ( अष्टा० ४।३।९८ )

३. "जज्ञान एव व्यबाधत स्पृधः०" "कृष्णं तम एव रुशतः०" ( ऋ० ३।३१।७ ) "सद्यो जातस्य ददृशानः" ( ऋ० ३।४।१ ) ऋतस्य हि धेनवो वावशानाः" ( ऋ० १।७३।६ ) "यस्मिन् विश्वानि काव्या चक्रे" ( ऋ० १०।१३५।१ ) एतेषां मन्त्राणां भाष्यं द्रष्टव्यम् ।

४. महानारायणोपनिषत् ( ४।५ ) वासुदेव० २ गोपी उ० ५, कृष्णोप० ८, मुक्तिकोपनि० १।३९ इत्यादि ।

५. विष्णु० ( ४।१५।५।३ ) ब्रह्मवै० ( ४।७।७४ ) गरुड० ( १।१३९ ) कूर्म० ( १।२४ ) अग्नि० ( १२।७ ) हरिवं० ( १।३५।२।४ ) ब्रह्माण्ड० ( ३।७१।२०६ ) वायु० ( २।३४।२०१ २।३४।२७३।१७८ ) देवीभा० ( ४।२४।१।५ )

६. सभाप० शिशुपालभाषणम् । द्रौपदीवस्त्रहरणप्रसङ्गे द्रौपदीकृतकृष्णाह्वानम् ।

७. ( भाग० १।४।१७; १।४।२७; १।७।३,४,६ ) (भूमिकान्ते च सर्वोपलब्धं व्यासचरित्रं संक्षिप्य प्रदर्शयामः )

८. भाग० ( १।३।४०–४१ ) ।

९. दानखण्ड ( प्र० ७ ) ।

दानं स न लिखेत्। श्रीमध्वाचार्यैस्तु भागवततात्पर्यनिर्णयग्रन्थे स्पष्टतया व्यलेखि, श्रीशङ्कराचार्यचित्सुखाचार्यप्रभृतिभिर्भागवते टीकाः कृता आसन्निति[1]। पद्मपुराणस्य वासुदेवसहस्रनामभाष्ये श्रीशङ्कराचार्यैर्भागवतस्थश्लोकस्य स्पष्टतयानिर्देशः कृतः[2], एवं "पश्यन्त्यदोरूपमदभ्रचक्षुषा" इति श्लोक उद्धृतः। श्रीशङ्कराचार्याणां परमगुरुगुरुभिः श्रीगौडपादाचार्यैः पञ्चीकरणटीकायामुत्तरगीताटीकायां च भागवतस्यसमुल्लेखः कृतः[3]। तथा जैमिनीयाश्वमेधपर्वणि,[4] शौनककृतऋग्विधाने[5]। गर्गसंहितायां च भागवतस्य समुल्लेखो विद्यते। श्रीशङ्कराचार्याणां श्रीगौडपादाचार्याणां च समयः द्वादशशताब्दीसमुत्पन्नस्य वोपदेवस्य कालादतिप्राचीनः काल इत्यत्र न संशयलेशोऽपि। अतो वोपदेवात्परमप्राचीनैः शौनकगौडपादाचार्यशंकराचार्यप्रभृतिभिः कृतेन भागवतस्य समुल्लेखेन वोपदेवरचितमिति कथनं केवलं स्वाज्ञानप्रदर्शनमात्रमिति। अत एव भागवततात्पर्यनिर्णयकारेण लिखितम्—

वोपदेवकृतत्वे च वोपदेवपुराभवैः।
कथं टीकाः कृताः संस्युर्हनुमच्चित्सुखादिभिः॥ इति।

संप्रति शङ्का प्रायः सर्वत्र श्रूयते भागवतस्य कर्ता, ब्रह्मसूत्राणां च कर्ता व्यासो भिन्न इति, अत्रेत्थं सत्यं व्यासा अनेके समजायन्त इति। यतो विष्णु-वायु-स्कन्द-देवीभागवत-लिङ्गपुराणेषु अनेकेषां व्यासानां समुपलब्धिर्भवति। मिलित्वा व्यासानां अष्टाविंशतिसंख्याका सत्तोपलभ्यते। व्यासशब्दार्थो महाभारतादिपर्वणि ( अ० ६४।१३० )

विव्यास वेदान् यस्मात्स तस्माद् व्यास इति स्मृतः। इति विद्यते। तेषां व्यासानां समुत्पत्तिकालः, नामानि, कार्याणि च विष्णुपुराणे समुपलिखितानि दृश्यन्ते[6]। परन्त्वित्थं तु निश्चितमास्ते भागवतस्य कर्ता व्यासः, यः कोऽपि भवतु, स वेदानां विभागकर्ताऽवश्यं भवत्येव। परन्तु, ब्रह्मसूत्राणां, भारतस्य, गीतायाः, भागवतस्य च कर्ता एक एव व्यासः, एवं स सत्यवत्यां पराशरादुत्पन्नः कृष्णद्वैपायन एवेति कथनं विनिर्णयमर्हतीति। अत्रातिसंक्षेपेण वयं विनिर्णयामः, यतोऽयं विषयो विषयान्तरमिव प्रतिभायात्।

भगवद्गीतायां त्रयोदशाध्याये—

ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः॥

अस्य श्लोकार्धस्य व्याख्याने ब्रह्मसूत्रपदैश्चेत्यस्य हेतुमद्भिः, विनिश्चितैरिति विशेषणद्वयमस्ति। एतद्विशेषणद्वयं तदैव चरितार्थं भवेद्यदा ब्रह्मसूत्रपदैश्चेत्यस्यार्थो व्यासरचितवेदान्तोपनिषत्प्रतिपाद्यबोधकब्रह्मसूत्ररूपं क्रियेत, ब्रह्मप्रतिपादकोपनिषद्वाक्यमित्यर्थस्वीकरणे विशेषणद्वयं व्यर्थं भवति। ब्रह्मसूत्ररूपार्थस्वीकारे तु सर्वेषु ब्रह्मसूत्रेषु हेतुमन्ति विनिश्चितार्थवन्ति च सूत्राणि गृह्यन्ते न सर्वाणीति वक्तुं शक्यते। किञ्च ब्रह्मसूत्रपदैरित्यत्र सूत्रपदं तथार्थकरणे व्यर्थं भवति। किञ्च तादृशोऽर्थो रामानुजाचार्य-मध्वाचार्यप्रभृतिभिः कृत एव। तथा ब्रह्मसूत्रेष्वपि गीताया उल्लेखः "स्मृतेश्च" ( १।२।६ ) "अपि च स्मर्यते" ( २।३।४५ ) इत्यादिस्थलेषु श्रीशङ्कराचार्यप्रमुखाचार्यैः स्मृतिपदेन गीताया एव ग्रहणं कृतम्। एवं ब्रह्मसूत्रेषु गीताया उल्लेखः, गीतायां ब्रह्मसूत्रपदस्योल्लेखः, उभयोर्ग्रन्थयोरेककालिकत्वमेककर्तृकत्वं च ज्ञापयति। गीताया महाभारतस्य च कर्त्रैक्यं समस्त्येव उभयोः शब्दसादृश्यमर्थसादृश्यं च अनेकत्रोपलभ्यत एव[7]। भागवतगीतयोः शब्दसादृश्यं यद्यपि बहुशो नोपलभ्यते तथाप्यर्थसादृश्यं त्वनेकत्रोपलभ्यत एव। प्राचीनानां समेषां ग्रन्थकाराणां उभयोरेककर्तृकत्वं सर्वथा मान्यमेव।

---

१. पुराणनिरीक्षणम् ( प्र० २ पृ० ७९ )

२. "स आश्रयः परं ब्रह्म परमात्मा परात्परः इति भागवते" इति

३. "जगृहे पौरुषं रूपमिति" तथा "तदुक्तं भागवते श्रेयः सृतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये···" एवं भागवतभूषणमपि द्रष्टव्यम्।

४. अ० ( ५८।९५ )

५. अस्य नाम्ना ऋतं जप्त्वा त्रिरात्रं त्रिषु मन्दिरे।
फलं भागवतं तस्य लभते नात्र संशयः॥

६. विष्णु० ( ३।३।१९-२० )

७. गीतारहस्यं ( श्रीलोकमान्यतिलककृतम् ) गीता तथा महाभारतप्रकरणम्।

अथ श्रीमद्भागवतस्थं श्रीकृष्णस्य चरितमुद्दिश्य बहवो बहुप्रकारं संशेरते, तत्र केचन कथयन्ति ईश्वरो यदि अवतीर्य मनुष्यवद् व्यवहरति तदेश्वरमनुष्ययोर्मध्ये को भेदः, ईश्वरवन्मनुष्यस्य कुतो न पूजास्तुत्यादि क्रियते ? इति

अत्रेत्थं समुचितं प्रत्युत्तरं प्रतिभाति । ईश्वरोऽवतीर्य जीववद्व्यवहृत्यापि न सर्वांशेन व्यवहरति । किञ्चिदंशेन समानेऽपि परमात्मनोऽवतरणे जीवापेक्षयास्ति महद् वैलक्षण्यम् । यथा कृष्णजन्मसमये श्रीकृष्णः किरीटकुण्डलादिचतुर्भुजमूर्तिरूपेण दर्शनं दत्तवान्[1] देवकीगर्भगतश्रीकृष्णतेजसा देवक्यपि विशिष्टतेजोयुक्ता बभूव[2] । बाल्ये कृष्णस्य चरितं महावैलक्षण्ययुक्तमासीत्तेन जीवचरितेन सह कथमपि तस्य साम्यं न भवत्येव । अस्माकं पादचलनं, हस्तेन क्रियाकरणमित्यादिसाम्येऽपि जीवापेक्षया परमेश्वरस्य प्रतिकृत्यं विलक्षणश्रैष्ठ्यमासीदेव । एवं पूतनास्तनपानेन तत्प्राणहरणाद्यद्भुतकार्यमपि विचारणीयम्[3] । एकमन्यदपि ज्ञातव्यम्—परमेश्वरः स्वयमानन्दरूपो विद्यते, अतः तत्सान्निध्येन जीवेष्वपि महत आनन्दस्य प्रादुर्भावो भवति । श्रुतिभिरपि तस्य परमेश्वरस्यानन्दस्य वर्णनं कृतं, जीवेषु य आनन्दो दृश्यते स आनन्दस्वरूपपरमेश्वरस्याल्पीयान् लेशोऽस्ति[4] । एवं परमेश्वरस्य सगुणावतारेऽयमानन्दस्य विशेषो दृश्यते नान्यत्र । सगुणावतारेणानन्दे प्रकाशिते वृक्षपशुपाषाणादयोऽपि आनन्दसागरे निमज्जन्ति तदा मानवजातस्य विषये तु किं वक्तव्यम् । एतद्वैशिष्ट्यं जीवस्य कस्मिन्नपि कार्ये न दृश्यते । श्रीमद्भागवतस्य दशमस्कन्धस्यैकविंशाध्यायेऽस्य माधुर्यरसस्य माहात्म्यं वर्णितम्[4] अतो मोक्षार्थं स्तुतिः परमेश्वरस्य क्रियते न तु कदापि जीवस्य ।

अत्र प्रसङ्गतोऽन्यस्याः शङ्काया अपि विचारः क्रियते,–यत्परमेश्वरेण मनुष्येतरेषूत्पद्य किं जीवकल्याणं साधितमिति । भागवतादिग्रन्थावलोकनेन परमेश्वरेण मत्स्य-कच्छ-वराहाद्यवतारान् धृत्वा भक्तानां रक्षणादि कार्यं संपादितम् । परमेश्वरस्यावतरणे तस्याचिन्त्यशक्तिरेव मुख्यं कारणम् । भक्तानां प्रार्थना-समय-देशादि तु सहकारिकारणं विद्यते । मत्स्यवराहाद्यवतारास्तदा जाता यदा सृष्टेः पूर्णरूपेण स्थितिर्नासीत् । तस्मिन् समये विद्यमानानां भक्तानां केवलमियमिच्छासीदस्माकं केवलं रक्षणं भवतु, न तु परमेश्वरस्य लावण्यमयरूपं लीला वा द्रष्टव्या इति । अतः केवलं तत्र भक्तरक्षणकार्यं दृश्यते ननूपदेशादिकम् । एतत्तु मत्स्यकच्छवराहाद्यवतारचरितं दृष्ट्वा स्फुटीभवति[5] ।

राजा परीक्षिदपीत्थं कदाचिच्छङ्कां कुर्यादिति विचार्य शुकाचार्यः प्रत्युत्तरं दत्तवान् परमेश्वरः गोब्राह्मणदेवतासाध्वादिरक्षां कर्तुमनेकरूपाणि धारयति परन्तु कस्मिन्नपि प्राणिरूपेऽवतरणेऽपि नास्य महत्वं घटते यतः स तत्वतो निर्गुणोऽस्ति[6] ।

इदं तु निश्चप्रचम्—यत्परमेश्वरस्य पश्वाद्यवतारेषु या लीला संजायते, तत्रावश्यमद्भुतताऽधिकास्तीति । यां श्रुत्वा भक्तानां श्रोतॄणां हृदयेऽवताररूपे विषये परमेश्वरभावना दृढा भवति । परमेश्वरो यदा मनुष्यरूपं धृत्वा मनुष्यवल्लीलां कुरुते तदा तु परमेश्वरस्य परमेश्वरभावो निगूढो भवति, कदाचित् समयविशेषे प्रादुर्भवन्स विलक्षणमाधुर्यं प्रकाशयति । इदं माधुर्यं प्रकाशयितुं परमेश्वरस्येदमित्थं तात्पर्यमस्ति मनुष्यो तत्स्वरूपं दृष्ट्वा परमेश्वरभक्तः सन् संसारसागरादुत्तीर्णो भवत्विति । अस्य माधुर्यादिरसस्य बोधकं मुख्यं भागवतं महापुराणं विद्यते आस्ताम् । अत्र प्रसङ्गत इदमपि विचार्यते—अष्टादशमहापुराणेषु श्रीमद्वैष्णवभागवतस्य श्रीदेवीभागवतस्य वाऽन्तर्भावो भवतीति । यतः—

अष्टादशपुराणानां कर्ता सत्यवतीसुतः । अनेन वचनेनाष्टादशमहापुराणकर्ता सत्यवतीपुत्रो व्यासोऽस्तीति ज्ञायते भागवतपुराणन्तु अष्टादशं महापुराणानां भारतस्यानन्तरं व्यासदेवेन गुरोर्नारदोपदेशान्निर्मितमिति श्रीमद्भागवतस्थवर्णनेनैव स्पष्टं प्रतीयते[7] । अत इत्थं चेतसि शङ्का प्रादुर्भवति–अष्टादशमहापुराणानि कृत्वा ततो भारतं च कृत्वा चित्ततोषाय निर्मितं नारदोपदेशाद्भागवतं न महापुराणेष्वन्तर्भवति किन्तु केनचित्तान्निर्माय व्यासस्य नाम्ना प्रवर्तितमिति ।

---

१. भाग० ( १०।३।९-१० )

२. भाग० ( १०।२।२० )

३. भाग० ( १०।६।१० )

४. भाग० ( १०।२१,१३,१४,१९,२१ )

५. भागवतस्तुतिसंग्रहस्यास्मल्लिखिता भूमिका द्रष्टव्या ( पृ० २५ २६ )

६. भागवत० ( १।४।२९,-१।५,३ )

७. अष्टादश पुराणानि कृत्वा सत्यवतीसुतः । भारताख्यानमखिलं चक्रे तदुपबृंहितम् ( मत्स्य० ५३ )
यथा – अष्टादश पुराणानि अष्टौ व्याकरणानि च । ज्ञात्वा सत्यवती सूनुश्चक्रे भारतसंहिताम् ( शान्ति० १ )

अत्र भागवतं, भगवद्गीता, भारतं चैककर्तृकम्; स च कर्ता व्यास इति तु पूर्वं प्रतिपादितमेव। संप्रति तु भागवतस्य व्यासकर्तृकत्वेऽपि तन्महापुराणेषु नान्तर्भवतीति भिन्नया रीत्या शङ्क्यते, अत्र भागवतं व्यासेन न कृतमिति न शङ्काया मुख्योंऽशः, किन्तु भागवतमष्टादशमहापुराणेष्वन्तर्भवितुं नार्हति किन्तु महापुराणबहिर्भूतं महापुराणभारतादेरनन्तरं भागवतस्य जनित्वादिति मुख्योंऽशः।

अत्र प्राचीनैः श्रीधरस्वामिप्रभृतिभिर्बहु विवेचितं तत्त्वग्रे समालोचयामः अस्माकं त्वित्थं प्रतिभाति श्रीमद्भागवते व्यासेन स्वचेतसोऽसमाहितत्वस्य यत्कारणं प्रोक्तम्—

किं वा भागवता धर्मा न प्रायेण निरूपिताः।
प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः॥ (१,४,३१)इति

अनेन वचनेनेत्थं प्रतीयते प्रथमतो व्यासेन भागवतधर्माणां वर्णनं संक्षेपेण कृतमिति श्लोकस्थप्रायेण पदेन ज्ञायते, पुनश्चेतसोऽसंतोषान्नारदकथनानुसारं पूर्वरचितभागवते धर्मा नूतनाः संयोजिताः। अत एवाग्रे प्रथमस्कन्धस्य सप्तमाध्याये लिखितम्—

स संहितां सात्वतीं कृत्वाऽनुक्रम्य चात्मजम्।
शुकमध्यापयामास निवृत्तिनिरतं मुनिम्॥ इति।

अस्मिन् श्लोके 'अनुक्रम्य' इति पदमुपात्तमस्ति, अनुक्रम्य नाम क्रममनुयोज्य, अनुक्रमार्थस्तदैव संगतो भवति, यदा ग्रन्थे नूतनांशयोजनया कश्चन क्रमभङ्गो विपर्ययश्च भवति। पूर्वं पुराणानि लोमहर्षणः पाठायामास, ततः पूर्वरचितभागवते सात्वतसंहिता· नाम्नि भगवतस्य श्रीकृष्णचरित्रादिका धर्मा लिखिताः। तान् ततो योग्यमधिकारिणं शुकमपाठयत्। तदनन्तरं तस्य ग्रन्थस्य भागवत-संहिताथवा सात्वतसंहिता नाम प्रवृत्तम्। प्रथमतश्चैतत्पुराणं सामान्यमितरपुराणवदासीत्ततः श्रुतितुल्यत्वात्सात्वतीश्रुतिशब्देनापि व्यवह्रियते स्म[1]। पूर्वं तस्य संख्या प्रायो द्वादशसहस्रश्लोका आसन्[2]। एवं भारतरचनातः पूर्वं द्वादशसहस्रश्लोकात्मकं भागवत-पुराणमासीत्ततो भारतनिर्माणं ततो नारदोपदेशाद्भागवते धर्मयोजनातोऽष्टादशसहस्रात्मिका सात्वतसंहिता समजायत। अर्थात् पूर्वद्वादशसहस्रश्लोकेषु अधिका षट्सहस्रश्लोकाः संयोजिताः; येन संप्रति समुपलभ्यमानो भागवतग्रन्थो विराजते। शुको यदा परीक्षितं भागवतं श्रावयामास तदात्वे पुनरपूर्वमिमं सात्वतसंहिताग्रन्थं सूतः पुनः शुकमुखाच्छ्रुतवानित्याकारककल्पनाकरणे सर्वथा संगतिर्भवति।

केचनेत्थं शङ्काया अस्याः समाधानं कुर्वन्ति, तद्यथा व्यासो भागवतात्पूर्वं यद्भारतं रचयामास तदाख्यानविरहितं चतुर्विंशतिश्लोकात्मकमासीत् ततो भागवतनिर्माणं तदाऽनेकाख्यानसहितमहाभारतनिर्माणम्। अत एव "भारताख्यानमखिलम्" अस्मिन् श्लोके स्थितमखिलं पदं संगच्छते। यद्येकप्रकारकमेव भारतं स्यात्तदा 'अखिलं' इति विशेषणं व्यर्थमेव भवेत्। किञ्च भागवतपुराणविषये याऽऽपत्तिः प्रदर्श्यते सा मार्कण्डेयपुराणाग्निपुराणयोरपि प्रदर्शयितुं शक्या। तथाहि मार्कण्डेयपुराणप्रथमाध्याये व्यासेन यद्भारतं कथितं तत् तत्त्वतो ज्ञातुमहं भवतः शरणं समागत इति लिखितम्। अत्रेदं विचारणीयम्। यद्यष्टादश-पुराणलेखनानन्तरं भारतलेखने सति मार्कण्डेयपुराणस्थं वर्णनं कथं संगच्छते। एवमग्निपुराणेऽपि "गीतासारं प्रवक्ष्यामि" "कृष्णोऽयमर्जुनायाह" इदमुपक्रम्य" "दैवी ह्येषा गुणमयी" "यस्यां जाग्रन्ति भूतानि" इत्यादयः केचन श्लोकाः प्रोक्ताः। यद्याख्यान-सहितभारतात्पूर्वमग्निपुराणं निर्मितं स्यात्तर्हि आख्यानसहितभारतस्थगीतावचनानामसंगतिर्दुर्वारैव। अतश्चतुर्विंशतिसहस्र-श्लोकात्मकं भारतं पुराणेभ्यः पूर्वं निर्मितं पुराणेभ्योऽनंतरं चाख्यानसहितं महाभारतमित्येव योजना समीचीना प्रतिभातीति। अत्रेदं शङ्कान्तरं जनाः कुर्वन्ति महापुराणेषु वैष्णवभागवतं समायाति नवेति। मत्स्यपुराण-नारदपुराण-पद्मपुराणदृष्ट्या श्रीमद्भागवतं महापुराणेष्वन्तर्भवति।[1] शिवपुराण-देवीयामलादिग्रन्थालोचने महापुराणेषु देवीभागवतस्यान्तर्भावोऽस्तीति ज्ञायते[2], परन्तु स्वयं देवीभागवतमेव महापुराणेषु आत्मानमन्तर्भाव्योपपुराणेष्वन्यद् भागवतमस्तीति कथयति तत्रेदं देवी-भागवतदृष्ट्यैव निश्चीयते यद्देवीभागवतनिर्माणतः पूर्वं भागवतं नाम प्रसिद्धं पुराणं स्थितं, यतः तस्य सत्ता देवीभागवतेनापि नाङ्गीकर्तुं सहसा शक्यते, अतस्तस्य परिगणनमुपपुराणेषु कृत्वा तत्स्थानं स्वेन देवीपुराणेन गृहीत्वा स्वीया गणना महापुराणेषु कृतेति। तथा देवीभागवतेन सप्तदशपुराणसंख्यां प्रदर्श्य स्वेनाष्टादशपुराणसंख्या पूरितेति निष्पक्षपातदृशा वक्तुं शक्यते। श्रीमद्भागवते तु महापुराणानि नामतो निर्दिष्टानि—

१. पद्मपु० (१३०।२५) नत्र प्रथम स्कन्धे……। व्यासस्य चरितं पुण्यम्……। (नारद० मत्स्य०) यत्राधिकृत्य गायत्री वर्ण्यते धर्मविस्तरः।

२. भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते। तत्तु भागवतं प्रोक्तं न तु देवीपुराणकम्। (शि० उ०)
तथा श्रीमद्भागवतं नाम पुराणं वेदसंमितम्।……यत्र देव्यावतारश्च बहवः प्रतिपादिताः। (देवीभाग०)
तथा माहेश्वरं भागवतं वासिष्ठं च सविस्तरम्। (देवीभाग० स्कं० १ अ० ३)

नामतो निर्दिष्टानि। एवं श्रीमद्भागवते स्थितानां पुराणवर्णनश्लोकानां दर्शनेन देवीभागवतस्य तत्र आभासोऽपि न लभ्यते।[1] अतस्तस्मिन् समयेऽर्थाद्देवीभागवतनिर्माणात्पूर्वं भागवतपुराणनाम्ना श्रीमद्भागवतमेव प्रसिद्धमासीदिति वक्तुमुचितम्। तत इदमत्र निष्पद्यते देवीभागवतात्पूर्वं यद्भागवतमासीत्तदेव महापुराणान्तर्गतं तच्च वैष्णवभागवतमेवेति निश्चितम्।

केचनेत्थं प्रतिपादयन्ति युगभेदेन यथा स्मृतिविषये व्यवस्था "कलौ पाराशरस्मृतिः" इति दृश्यतेऽत्रान्यमन्वादिस्मृतीनां प्रामाण्ये विद्यमानेऽपि केषांचन विषयाणां निर्णयः पराशरस्मृतिं मुख्यतया स्वीकृत्य क्रियते, तथात्रापि देवीभागवतस्य शिवपुराण-देवीपुराणादिदृष्ट्या महापुराणत्वेऽपि युगभेदेनात्रापि व्यवस्थापयितुं शक्यते—

कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह।
कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः॥ (१।३।४४)

इति भागवतस्थं पद्यं प्रमाणीकृत्यान्ययुगेषु देवीभागवतस्य महापुराणान्तर्गतत्वं कलौ तु श्रीमद्भागवतस्यैव महापुराणत्वमिति युगभेदेन व्यवस्था करणीयेति। अपरे तु ईश्वरतच्छक्त्योरैक्येन तद्वर्णनपरश्रीमद्भागवतदेवीभागवतयोरैक्यमभिप्रेत्य मिलित्वोभयपुराणस्य महापुराणान्तर्गतत्वम्। यदा शक्तेः प्राधान्यमपेक्ष्यते तदा देवीभागवतं प्रधानम्, यदा च परमेश्वरस्य प्राधान्यं विवक्ष्यते तदा श्रीमद्भागवतस्य च प्राधान्यं महापुराणान्तर्गतत्वं चेति विवक्षाभेदेन व्यवस्थामभिप्रयन्ति। इतरे च केचन

"अष्टादशपुराणानां कर्ता सत्यवतीसुतः।" अथवा
अष्टादशपुराणानि कृत्वा सत्यवतीसुतः।
भारताख्यानमखिलं चक्रे तदुपबृंहितम्॥

इति स्कन्दपुराणोक्तवचनेऽष्टादशमहापुराणानि कृत्वेति नार्थः। किन्त्वष्टादशपुराणानि कृत्वा भारतं च निर्माय नारदोपदेशेन स्वचित्तशान्तकरणसमर्थं भागवतधर्मकीर्तनपरं श्रीमद्भागवतं निर्माय ततोऽपराणि महापुराणानि निर्मितवानित्यर्थः। एवं च नासङ्गतिरिति निर्णयन्ति। अतो महापुराणान्तर्गतं श्रीमद्वैष्णवभागवतमेव, देवीभागवतं तु शिवपुराणादिदृष्ट्या महापुराणं सदपि, वस्तुत उपपुराणमेव। अत एव देवीभागवते भागवतस्य पूर्वं स्थितस्यैकस्य वर्णनमेव श्रीमद्भागवतस्य महापुराणत्वं सूचयतीति प्रथममते स्फुटं प्रतिपादितमेव।

संप्रत्यतिसंक्षिप्तं श्रीमद्भागवतस्य माहात्म्यकथनमुचितं प्रतिभाति, श्रीमद्भागवतं सम्पूर्णवेदान्तस्य सारभूतमर्थाद् वेदान्तपठनेऽसमर्थैर्भागवतमेव विशेषतः पठनीयम्। पद्मपुराणे भागवतमाहात्म्यमतिविस्तृतरूपेण वर्णितम्। तत्सारांशोऽयं भागवतकथा मनुजेन सदा सेवनीया, कथाश्रवणेन मानवहृदयं परमेश्वरः स्वयं प्रविशति। अस्य सेवनेनान्यश्रवणेऽभिलाषो हृदये नोदेति[2]। पुराणेषु श्रीमद्भागवतमतीव श्रेष्ठम्, यतस्तत्र प्रतिपदं विष्णुगाथा गीता विद्यते। श्रीमद्भागवतपुराणं ब्रह्मसूत्राणामेवं भारतस्यार्थस्य निर्णायकं विद्यते। श्रीमद्भागवतं गायत्र्या भाष्यरूपं तथा वेदार्थयुक्तं विद्यते।[3] पुनश्च पद्मपुराणे लिखितम्—श्रीमद्भागवतं साक्षात्कृष्णस्य मूर्तिर्विद्यते। श्रीकृष्णेन स्वतेजो भागवते स्थापितमिति[4]। अस्तु।

एवं भागवतसम्बन्धिनः केचन बहिर्भूता विषयाः समाहिताः। संप्रति श्रीकृष्णतत्त्वस्यैवं भागवतग्रन्थान्तर्गतस्तुतिचरित्रादेर्विषये संभाव्यशङ्कानां विनिर्णयकरणं समुचितं प्रतिभाति। विद्वांसो भक्ता मत्स्याद्यनेकावताराणां मुख्यं कारणभूतं परमानन्ददायकं वैकुण्ठादिलोकेषु नित्यक्रीडारतं तत्त्वमस्तीत्यामनन्ति। श्रीकृष्णस्य क्रीडारहितं यत्स्वरूपं तदेव वेदान्तिनां मते परब्रह्मास्ति। तदेव योगिनः सहस्रशीर्षा नारायण इति वदन्ति। एवं तदेव सात्वताः भगवान् इति ब्रुवते। तथा तदेव ह्लादिन्याद्यनेकशक्तीनामाधारभूतं विद्यते। सर्वेषु देवेषु कृष्ण एव परमदेवः तस्मान्मृत्युरपि बिभेति।[5] स एव गोलोकादिस्थानेषु स्वभक्तैः सह सर्वदा नित्यक्रीडां कुर्वन्ननेकब्रह्माण्डानि बिभर्ति। स एकः सर्वं चराचरं स्वाधीनं कुर्वन् सर्वव्यापकोऽप्यस्ति[6]। श्रीकृष्णतत्त्वमेकं सदपि अनेकप्रकारेण भासते। तद्विज्ञानरूपमानन्दरूपं कर्मफलदातृ रसरूपमचिन्त्ययोगमायासम्पन्नं परमात्मरूपं समास्ते।[7]

१. भाग० १२।७।१० २२
२. भागव० १२।१३।१५
३. भाग० १२।१३।१५
४. पद्मपु० अ० ३
५. गो० पू० उ० १
६. गो० पू० उ० १
७. विज्ञानमानन्दं ब्रह्म (बृ० उ० ३।९।२८) गतिदातुः परायणम् (सिद्धान्तरत्न) आनन्दो ब्रह्मेति व्यजानात् (तै० ३।६) रसो वै सः (तै० २।७)

नित्यसुखज्ञानस्वरूपपरमात्मनि तुच्छमिदं जगन्मायात उत्पद्य सदिव भाति ।[1] परमात्मा श्रीकृष्ण एकः पुराणपुरुषः स्वयंज्योतिरनन्तो नित्यो नाशरहितो निरन्तरसुखयुक्तः पूर्णः सर्वोपाधिरहितः सर्वेषामात्मनामात्मभूतः सर्वजगद्धितायारूपः सन्नपि मायिकं रूपं धारयति, सम्पूर्णचराचरपदार्थेषु तस्यैव स्वरूपं विराजते । येन श्रीकृष्णचन्द्रचरणकमलं शरणं कृतं तं स संसारसागरात्तरयति ।[2] गोकुल-परमव्योम-वैकुण्ठादिस्थानेषु श्रीकृष्णो रूपत्रयेण विलसति ।[3]तथा विलास-स्वांशभेदेन तस्य तदेकात्मरूपं द्विविधमास्ते ।[4] संक्षेपत इत्थं वक्तुं शक्यते अचिन्त्यानन्तशक्त्या पूर्णं कारणानां कारणं नित्यक्रीडारतं तत्त्वमेव श्रीकृष्णतत्त्वमस्ति इति ।

श्रीकृष्णस्यावतारविषये केचन शङ्कन्ते न स पूर्णावतार इति । अत्रेत्थं वदामः स श्रीकृष्णः पूर्णावतार एव, न त्वंशावतार इति । यद्यपि भागवतादिग्रन्थेषु उभयथा वर्णनमुपलभ्यते यथा "तत्रांशेनावतीर्णस्य" (भाग० १०।१-२) इत्यत्रांशवतारत्वं "एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" इत्यत्र पूर्णावतारस्वरूपत्वं वर्णितम् । एवमन्यत्र । तत्र सर्वाणि वचनानि समालोच्य श्रीधरस्वामिना सुबोधिनीकारेण च श्रीकृष्णस्य पूर्णावतारत्वं संसाधितम् । वस्तुतः परमात्मनोऽवतारे कश्चिदपि अंशावतारः कलावतारो वा नास्ति । यतः परमात्मभावदृष्ट्या तस्य सर्वेऽवताराः पूर्णावतारा एव । परन्तु कार्यदृष्ट्या विचारे पूर्णावतार-अंशावतारकल्पना कर्तुं शक्यते । योऽवतारः स्वल्पं कार्यमुद्दिश्य प्रभवति, तदुद्देश्यपूर्तिं सम्पाद्य च तिरोभवति, सोंऽशावतारः कलावतारो वा कथ्यते । यथा मत्स्य-कच्छ-वराहाद्यवतारा अंशावताराः । श्रीरामचन्द्रकृष्णचन्द्रादयोऽवताराः पूर्णावताराः सन्ति । परमात्मनो मत्स्याद्यंशाद्यवताराः प्रलयादिकालेषु मन्वादिरक्षणं प्रसङ्गतः प्राप्तहिरण्याक्षादिराक्षसहननादिकार्यं सम्पाद्य तिरोहिताः सन्ति । पूर्णावतारेषु रामचन्द्रादिरूपेषु परमात्मा मनुष्यवदनेककष्टानि सोढ्वा वेदादिशास्त्रीयाचरणं स्वयं सम्पादयति, यथा रामावतारे भ्रातृ-ब्रह्मचर्य-सत्यव्रत-राज-शरणागतपालन-पुत्रकर्तव्याद्यनेकानि विशिष्टानि कार्याणि कुर्वन्ननेकलीलाः समपादयत् । अतः श्रीरामचन्द्रो मर्यादापुरुषोत्तम इति गीयते ।

श्रीकृष्णावतारे तु बहुशो बहुप्रकारिकाश्च लीलाः समजायन्त । ताः सर्वाः समालोच्य श्रीधरस्वामिकृतामेवं सुबोधिनीकारनिरूपितां व्यवस्थां च दृष्ट्वा श्रीकृष्णस्य पूर्णावतारांशावतारविषये तेषामभिप्रायोऽत्र प्रदर्श्यते—एकस्मिन् ग्रन्थे यदानेकवचनानि परस्परविरुद्धतया भासमानार्थबोधकान्युपलभ्यन्ते तदा एकार्थप्रकरणे यद्वचनं सर्वथा व्यर्थं भवति, तन्मुख्यमिति स्वीक्रियते । भिन्नप्रकरणे समागतानि सम्बन्धिवचनानि विरुद्धतया भासमानान्यपि संकुचितार्थपरत्वेनाप्युपपद्यन्ते तानि गौणार्थबोधकानीति शास्त्रीया मर्यादा । प्रकृते विषये "एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" इदं वचनं चतुर्विंशत्यवतारवर्णनानन्तरमागतमस्ति । अस्माद्वचनात्पूर्वं ऋषीन् प्रत्यंशावतार-कलावतारान् बोधयित्वा अनेन वचनेन श्रीकृष्णस्य पूर्णावतारत्वमुक्तम् । अत्रेदमपि समालोचनीयम्—व्यासः श्रीकृष्णावतारस्य पूर्णत्वादिविषये किं निश्चितवानिति । व्यासोऽनेकावताराणामंशाद्यवतारत्वकथनानन्तरं श्रीकृष्णविषये श्लोकेनानेन निर्णयं कृत्वा कृष्णस्य पूर्णावतारत्वं स्पष्टयति[5] अत एव भिन्नभिन्नप्रकरणेषु समागतानां श्रीकृष्णस्यांशवतारबोधकवचनानां गौणार्थपरत्वमवश्यमङ्गीकर्तव्यं भवति । अतः "तत्रांशेनावतीर्णस्य" अस्य वचनास्यायमर्थः—अंशेन नाम बलरामेण सहावतीर्णस्य इति प्रामाणिकैः कृतः । एवमन्यत्र गौणतयार्थः श्रीधराचार्यप्रभृतिभिः कृतः स तत्र तत्र द्रष्टव्यः । अत्र केचनांशावतारपूर्णावतारविषय इत्थं वदन्ति योऽवतारो ज्ञानेच्छाक्रियावैराग्यादिभिर्गुणैः पूर्णोऽस्ति स पूर्णावतारः[6] यथा भगवच्छब्दस्यार्थः विष्णुपुराणादौ [7]कृतः । यश्च ज्ञानादिगुणानामंशैर्युज्यते सोंऽशाद्यवतार इति ।[8] अवतारविषये पूर्ण-कला-अंश-विभूत्याद्यवतारशब्दार्थः सात्वततन्त्रे द्रष्टव्यः ।

श्रीकृष्णचरित्रे वर्णितं कात्यायनीव्रतं गोपिकाभिराचरितं तद्विषयकं कृष्णचरित्रमनेके आक्षिपन्ति, आस्ताम् । गोपकन्यावस्त्रहरणव्यवहारः श्रीकृष्णस्य नोचित इति । परन्त्वत्र पुराणकारव्यासेनानेकशैलया चरित्रं प्रदर्शितं दृश्यते इत्यपि ध्येयम् । तत्र रूपकेण क्वचिदध्यात्मविषयस्य वर्णनप्रसङ्गेऽध्यात्मभावान् मानवरूपेण रूपयित्वा वर्णनं, क्वचिच्चातिशयोक्तिद्वारा वर्णनं, क्वचित्स्वात्मस्वरूपप्राप्त्यै मध्ये विघ्नभूतान् लज्जालोभादिकान् भावान् वर्जनीयतया रूपकेण प्रदर्श्य मुख्यस्य भक्त्यादेः

१. भाग० ११।१४।२२-२३
२. भाग० १०।१४।५५।५८
३. लघुभागवतामृत ११
४. लघुभागवतामृत १४
५. भाग० १।२४।२२; १०।१।३
६. सात्वत तं० प० ३
७. ऐश्वर्यस्य समग्रस्य शौर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरिणान् ।
८. सात्वत तन्त्र ३।९

परमसाधनस्य सर्वापेक्षया श्रेष्ठत्वप्रतिपादनमिति। कात्यायनीव्रतं सत्यभूतमाश्रित्य तद्द्वारा परमतत्त्वप्राप्त्यै अव्यभिचारिणी भक्तिराश्रयणीया, तद्भक्तिप्राप्तौ कामक्रोधलज्जासांसारिकविषयप्रेमादीन् त्यक्त्वा मनुष्यो यदा निर्वासनचित्तो भवति तदा तस्य परमतत्त्वप्राप्तिर्भवतीति मुख्यं प्रतिपाद्यं व्यासस्यासीत् तच्च कात्यायनीव्रतमिषेण बोधितम्। तथाहि—जले नग्नस्नानं समाचरन्तीनां गोपकन्यानां तटे स्थापितवस्त्राणि गृहीत्वा कदम्बवृक्षं समारुह्य नग्नयावस्थया ग्राहयितुं वा गोपकन्यका हठाद् भगवता प्रवर्तिता इत्यंशं शास्त्रकारा इत्थं विवेचयन्ति—परमात्मनोऽवतरणे भक्तानामिच्छा सहकारिकारणं भवतीति प्राग् निवेदितमेव. एवं च परमात्माऽवतीर्य यत् चरित्रं संपादयति तत्र ये घटकाः भक्तास्ते अस्मत्सदृशशरीरधारिणोऽपि तेषां सूक्ष्मशरीरस्यान्तरात्मनोऽस्त्येवास्मदपेक्षयातीव श्रेष्ठत्वम्। दिव्याचिन्त्यशक्तियुतः परमात्मा स्वात्मांशरूपधारिभिः सहैव नानाप्रकारं क्रीडति। यथा सर्वे स्वहस्तपादाद्यवयवैरनेकप्रकारेण व्यवहरन्तोऽपि नाल्पीयांसमपि दोषमुत्प्रेक्षन्ते, एवं परमात्मा लीलाकरणार्थं स्वीयाचिन्त्यशक्त्या अनेकानि रूपाणि निर्माय क्रीडति, तत्र निन्दाविषयस्य वस्तुतो नास्त्येवावसरः। यथा मार्कण्डेयपुराणस्थितसप्तशत्यामेकस्मिन् प्रसङ्गे शुम्भेन दुर्गां प्रत्युक्तमन्यासां शक्तीनां बलमाश्रित्य त्वं युध्यसे तदा दुर्गयोक्तं ममैवेमाः शक्तयः मया प्रकटिता मयि एव लीना भवन्ति, एवं तथैव तत्र प्रदर्शितमपि। भागवतेऽपि गुहायां गोगोपानां ब्रह्मणा निह्नवे कृतेऽपि बहिः पुनस्तथाविधगोगोपदर्शनं कृत्वा श्रीकृष्णस्यैवाद्भुतं सामर्थ्यमिति ब्रह्मणा ज्ञातम्।[1] श्रुतिभिरपि परमेश्वरस्य स्वशक्त्यानेकरूपत्वं वर्णितम्।[2] सात्वततन्त्रे सुस्पष्टं प्रतिपादितं सर्वे परमेश्वरस्यावतारा इति।[3] एवं च कात्यायनीव्रतस्था गोपकन्यकाः परमेश्वरस्य श्रीकृष्णस्याचिन्त्यशक्त्या प्रादुर्भूताः परमेश्वरस्यांशभूताः, अतस्ताभिः सह क्रीडाकरणे अस्माभिः प्राकृतैरवलम्बितानां नियमानां पालनं कर्तव्यमित्याग्रहो व्यर्थः प्रतिभाति। परमेश्वरचरित्रतोऽस्माभिर्लोकानुकूलो धर्मानुकूलश्चैवोपदेशो ग्राह्यः। अत्र महाभागवतपरीक्षितस्याक्षेपस्तत्र परमभक्तमहाभागवतशुकाचार्यस्योत्तरमवश्यं सर्वैर्मननीयमेव[4]। तथाहि—

संस्थापनाय धर्मस्य प्रशमायेतरस्य च।
स कथं धर्मसेतूनां वक्ता कर्ताभिरक्षिता॥
प्रतीपमाचरद् ब्रह्मन् परदाराभिमर्शनम्।
किमभिप्राय एतं नः संशयं छिन्धि सुव्रत॥

अस्याः शङ्कायाः समाधानं शुकदेवेनेत्थं कृतम्—

धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम्।
तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा॥
नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः।
विनश्यत्याचरन् मौढ्याद्यथा रुद्रोऽब्धिजं विषम्॥
ईश्वराणां वचः सत्यं तथैवाचरणं क्वचित्।
तेषां यत्स्ववचोयुक्तं बुद्धिमाँस्तत्समाचरेत्॥ इति।

अत्रेश्वराणां वचनं सत्यमस्ति समाचरणं तु क्वचित्सत्यमस्तीति कथनेन सत्यं नाम सामान्यप्राकृतजनानां हितं भवत्वितीच्छया सुविचार्य प्रोक्तमत एव सर्वदा सर्वदेशे काले च तत्परमं सत्यम्। आचरणं तु क्वचित्सत्यं नाम स्वीयाचिन्त्यालौकिकशक्त्या स्वोत्पादितस्वांशभूतैः सह क्रीडादिकरणं प्राकृतजनैर्ज्ञातुमपि दुष्करत्वादसत्यं नामासत्यवदिति, तथा ये पुण्यात्मानो विशिष्टा ऐकान्तिका भक्ता नित्यलीलायां घटकतया भवितुमर्हन्ति तेषां दृष्ट्या सत्यमतः क्वचिदित्युक्तम्। परमेश्वरस्तु ये भक्ता अनेककामनया अनेकजन्मसु कठिनं तपः समाचरन्ति, तेषां तपःपूतात्मनां कृते तत्तत्कामनानुरूपं रूपं धृत्वानेकलीलया तेषां मनोरथं प्रपूर्य तानुद्धरति। यथा नन्देन पूर्वजन्मनि कठिनं तपः समाचरता परमेश्वरे पुत्रभावना कृता, परमात्मनापि परजन्मनि स्वयं पुत्ररूपं धृत्वानेकाः लीलाः प्रदर्शिताः।[5] अस्तु। कात्यायनीव्रतचरितमिषेण परमेश्वरेणेदं बोधितं परमात्मप्राप्तौ संसारपदार्थप्रेमत्यागवल्लौकिकव्यवहारस्थलज्जादिभावत्यागोऽप्यावश्यकः, नो चेत्परमतत्त्वप्राप्तिरतिदुर्लभा। गोपकन्यकाभिः कात्यायनीं देवीं पूजयित्वा श्रीकृष्णोऽस्माकं पतिर्भवत्विति प्रार्थितम्।[6] व्रतनाशक-

१. भाग० १०।१३।४६
२. त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्र० ( ग० अ० शी० २ ) एकं सद्विप्रा बहुधा वदन्ति ऋ० २।३।२२
३. सात्वततं० १३
४. भाग० १०।३३।२७–३१
५. भाग० १०।९।५०–५१
६. भाग० १०।२२।४

नग्नस्नानरूपदोषं प्रदर्शयितुं तद्द्वारा च परमेश्वरप्राप्तौ लज्जादिसर्वमानसिकभावत्यागोऽप्यावश्यक इति प्रदर्शयितुं श्रीकृष्णः हठं कृत्वा प्राणत्यागापेक्षयापि कठिनत्यागां लज्जां परित्याज्य नग्नाभिस्ताभिर्वस्त्रं ग्राहितवान्। इदं रूपकमेव। इयमेव सर्वात्मनिवेदनरूपा नवमी भक्तिः, सर्वभक्तिषु चरमा श्रेष्ठा च। अस्यां भक्तौ सिद्धायां श्रीकृष्णस्तासां पतिरूपेण वरण-प्रार्थनां स्वीकृतवान्।[1] अत्र कात्यायनीव्रतचरित्रे लौकिकजनदृष्ट्यापि श्रीकृष्णं पतित्वेन कामयमानाभिः गोपकन्याभिः साकं श्रीकृष्णस्य लीलायां नास्ति विशिष्टो दोषः। किञ्च परमात्मविषये पतिभावनया प्रवृत्तानां गोपकन्यकानां कामः कामाय न भवति, किन्तु परमेश्वरप्राप्त्यै[2] इत्यपि भागवतस्थं कथनं ध्येयम्। वस्तुतस्ताः परमात्मनः कृष्णेनोत्पादिता स्वांशरूपशक्तय एव गोपकन्यका आसन्निति पूर्वं प्रदर्शितमेव। किञ्चैषा रूपककथास्ति 'ईश्वराणां वचः सत्यं तथैवाचरणं क्वचित्' इति न्यायेन अचिन्त्यानेक-शक्तिमतः परमेश्वरस्य स्वाचिन्त्यशक्तिभिः सह नित्यलीलायाः भक्तजनानां ज्ञानं भवत्वितीच्छया ताः शक्तीः गोपकन्यकारूपेण, स्वयं च परमात्माऽऽत्मानं कृष्णरूपेण रूपयित्वा लीलाः कृतवानित्यपि पूर्वं सूचितमेव। इदमेव कात्यायनीव्रतविषयककृष्णलीलाया रहस्यभूतं तात्पर्यम्। अत्र विषये यज्ञकर्तृविप्रस्त्रीभ्यः श्रीकृष्णेन दत्त उपदेशोऽपि विचारकोटिमर्हति, तथाहि—यज्ञकर्तृब्राह्मण-स्त्रियो रामकृष्णदर्शनेच्छया महत्योत्कण्ठया पतीनामाज्ञां तिरस्कृत्यान्नादिकमादाय समागच्छन्। श्रीकृष्णस्तासां स्वागतं कृत्वा कथयामास, दर्शनार्थं समागता भवत्यः, यूयं परावर्तध्वम्। युष्माकं पतयो युष्माभिः सह यज्ञं संपादयिष्यन्ति। यदा ताभिरुक्तं पतीनामाज्ञां तिरस्कृत्य वयं समागताः स्मः, यदि तत्र पुनः गमिष्यामस्तर्हि ते पतयोऽस्मान् न ग्रहीष्यन्ति। तदा परमात्मना तासां पत्युर्भीतिरूपं भावं ज्ञात्वा पत्युर्भयं न भविष्यतीत्युक्त्वा मत्प्राप्त्यै स्मरणकीर्तनादिद्वारा मयि भक्तिं वर्धयध्वमित्युक्त्वा ता यज्ञकर्तृ-ब्राह्मणस्त्रियः विसर्जिताः।[3]

एवं रासपञ्चाध्यायीस्थवर्णितकृष्णचरित्रविषयं सम्यक्तयाऽज्ञात्वा तत्र बहवो भ्रान्त्याऽऽक्षिपन्ति तद्विषये प्राचीन-भक्तैर्विद्वद्भिर्वर्णितं रहस्यं प्रकाशयामः। परमात्मा यदा गोपकन्यका गोपीश्च गृहं गन्तुमादिष्टवान्, तदा ता अतिदुःखिताः सत्यः सर्वविषयासक्तिं परित्यज्य केवलं त्वय्येव भावं समर्प्य वयं समागताः स्मः। सांसारिकपुत्रपतिसम्बन्धिषु नास्माकं चित्तं गच्छति, व्रजं गत्वा किं कुर्मः त्वं यद्यस्मान् न स्वीकरिष्यसि तदात्रैव त्वां ध्यायन्त्यो म्रियामहे।[4] इति तासामैकान्तिकमव्यभि-चारिणमत्युत्कटं च भावं वीक्ष्यात्मारामोपि भक्तवत्सलः परमात्मा स्वशक्त्यंशभूताभिः परमभक्ताभिस्ताभिः सहानेकरूपाणि स्वीया-चिन्त्यशक्त्या निर्माय स्वर्गस्थदेवतानामपि द्रष्टुं दुर्लभां विलक्षणमधुररसपरिप्लुतां रासक्रीडां कृतवान्। रासलीलावर्णनप्रसङ्गे श्रीशुकदेवेन श्रीकृष्णचन्द्रस्य कृते "आत्मारामः" "योगेश्वरः" इदं विशेषणद्वयं ज्ञात्वैव योजितम्। तेन च रासलीलायाः स्वरूपं सर्वथा निर्दुष्टं सिध्यति। गोपीनां मनःस्थितिरपि प्रसङ्गेऽस्मिन् अवश्यं विचारणीया। तासां हृदये परमात्मनः परमलीलादर्शन-व्यतिरिक्तः सांसारिकः काममानादिको वा भावो नासीदेव। यदा रासलीलायां तादृशो भावो तासां हृदय उदितः तदा परमात्मा श्रीकृष्णः ता गोपिकाः परित्यज्यान्तर्हितो बभूव।[5]

अत्र प्रकरणे इदं विचारणीयम्—गोप्यः श्रीकृष्णस्य समीपे कदाचित् प्राकृतकामेच्छयागताः स्युरित्यङ्गीकारेऽप्यनन्त-रं तासां तादृशीच्छा श्रीकृष्णकृतपरमोदारकृपाकटाक्षपातेन न स्थिता। तदा श्रीकृष्णचन्द्रेऽत्युत्कटप्रेमांशे पूर्वं स्थितः प्राकृत-कामांशः विनष्टः, शुद्धात्युत्कटप्रेमैवावशिष्टम्। तदेव तु परमभक्तेः स्वरूपम्। उक्तं च शाण्डिल्येन "सा तु परानुरक्तिरीश्वरे" इति। गोप्यः श्रीकृष्णस्यालौकिकसुन्दररूपं प्रत्यहं पश्यन्त्यः सत्यः शनैः शनैस्तासां चेतोवृत्तयः कृष्णाकारेण परिणताः। गोप्यः पूर्वमारुरुक्षवस्थायां श्रीकृष्णसम्बन्धनेकदर्शन-स्मरण-नामोच्चारणादिकार्याणि संपादयन्ति स्म। तस्यामवस्थायां तासां संसारोऽपि प्राचलत्। श्रीकृष्णस्वरूपमलौकिकं दृष्ट्वा पतिरूपेण तस्य प्राप्तीच्छा तासां हृदये स्वभावत उत्पन्ना, अतस्ताभिः कौमार्ये कात्यायनी-व्रतमप्याचरितम्, तथा श्रीकृष्णेन ताभ्यो वरोऽपि दत्तः। ततो रात्रौ श्रीकृष्णस्य वंशीध्वनिं श्रुत्वा वने तास्तं द्रष्टुमगच्छन्। तत्स्थितौ तासामारुरुक्षवस्था किञ्चिदंशेनासीत्, योगारूढावस्था च किञ्चिदंशेन प्रादुरभवत्। ततः श्रीकृष्णकृतदयौदार्या-वलोकनेन तच्चरणस्पर्शेन च अल्पांशेनावशिष्टाऽपि योगारुरुक्षावस्था विनष्टा, संपूर्णा योगारूढा चोत्पन्ना। अतस्ताः कृष्णकृत-त्यागसंभावनया प्राणानपि त्यक्तुं प्रवृत्ताः। तासां तामात्यन्तिकीमवस्थामात्मसमर्पणभावमात्यन्तिकमनुरागं च दृष्ट्वाऽऽत्मारामो योगेश्वरोपि भगवान् कृष्णस्ताभिः सह दिव्यान्यलौकिकरूपाणि निर्माय रासलीलां चकार। गोपीनामेतामवस्थामवलम्ब्यैवोद्धव-वचनं 'वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः।' इति प्रवृत्तम्। गोपीनां परमात्मनि श्रीकृष्णेऽत्युत्कटप्रेम्णो वर्णनं श्रीकृष्णो यदा

१. भाग० १०।२२।२५।२७
२. भाग० १०।२२।२६
३. भाग० १०।२३।१८।३२
४. भाग० १०।२९।२९।४१
५. भाग० १०।२९।४७।४८

गोपीनां हृदये उत्पन्नमभिमानं ज्ञात्वाऽन्तर्हितोऽभवत्तदा श्रीशुकदेवेन कृतं वर्णनं गोप्यः श्रीकृष्णमन्वेषयन्त्यो यदा नापुस्तं तदा संसारं स्वात्मानं च विस्मृत्य श्रीकृष्णैकमनसो भूत्वा श्रीकृष्णं विनैकक्षणमपि पृथक् स्थातुमसहमाना उच्चै रुरुदुः। तदा व्यापकेन परमात्मना कृष्णेन तासां विशुद्धं सर्वोत्कृष्टं च प्रेम दृष्ट्वा ताभ्यो दर्शनं दत्तमिति। ततः शुकाचार्येण गोपीनां परमात्मना सह यः प्रश्नपूर्वकः संवादो भक्तिपूर्णोऽपि किञ्चित् वक्रः जातः तस्य वर्णनमित्थं कृतम्—

भजतोऽनुभजन्त्येके एक एतद्विपर्ययम्।
नोभयांश्च भजन्त्येक एतन्नो ब्रूहि साधु भोः॥ १०,३२,१६ इति

परमेश्वरेणात्युत्कटैकान्तिकप्रेमप्रधानतयोद्दिश्योक्तम्—मदर्थं यैर्वैदिकलौकिकस्वार्थः परित्यक्तस्ते मां प्राप्नुवन्ति।[1] एवं च परमात्मनैकान्तिकाव्यभिचारिपरमानुराग एव मुख्यतया परमेश्वरप्राप्तेः साधनरूपेण निर्दिष्टः।[1] एवं सर्वथा गोप्यः सांसारिक-मोह-दम्भ-क्रोध-मानादिरहिताः केवलं परमात्मैकप्राप्तिभावयुता योगारूढावस्थाः संजातास्तदा ताभिः सह श्रीकृष्णो रासं चक्रे। तत्र सर्वथा वर्णनातीतोऽलौकिको रसप्रकर्षः प्रकटितः, यतः साक्षाद्रसरूपः परमात्मा तदनुकूलाश्च शुद्धानुरागरूपा गोप्यः। देवैरपि तादृशानन्दस्यानुभवः कदापि न कृतः। लौकिकेन केनाप्यानन्ददायकेन पदार्थेन तस्य तुलना कर्तुं न शक्यते। तस्मिन् रासे लौकिककामसंबन्धलेशोऽपि नासीत्, किन्तु दिव्यानुरागो दिव्यश्च परमानन्दः, एतद् बोधयितुमेव शुकदेवेन मध्ये मध्ये "योगेश्वरेण कृष्णेन" "आत्मारामोऽपि लीलया" "सिषेव आत्मन्यवरुद्धसौरतः" इत्यादिवाक्यानि योजितानि। यदा तादृशो रासः प्रवृत्तस्तदा देवताभी रासं द्रष्टुं समागताभिः आकाशतः पुष्पवर्षणं कृतम्।[2] अस्यां स्थितौ परमात्मनि श्रीकृष्णे गोपिकासु च ग्राम्यकामविषयकोऽत्यल्पोऽपि लेशो नासीदेव। परमात्मनः आनन्दस्वरूपमनुभवन्त्यो गोप्यः सांसारिककार्यं संपादयन्त्योऽपि चेतसा तमेव स्मरन्त्यः सर्वत्र तमेव श्रीकृष्णमन्वभवन्। यतस्तासां योगारुरुक्षुभावः पूर्वमेव विलीनः, योगारूढावस्था एवोपजाता। मथुरास्थेन परमात्मना गोपिकानामान्यतिकीं भक्तिं ज्ञातुं स्वभक्त उद्धवः प्रेषितः। स च गोपिका मिलित्वा तासामखण्डकृष्णैकभावं दृष्ट्वा ता अस्तौत्।[3] ताभ्यो ज्ञानमयं कृष्णसंदेशं चाश्रावयत् तथाहि या गोप्यः पतिद्वारा बद्धा रासक्रीडां गन्तुमसमर्थाः श्रीकृष्णं चिन्तयन्त्य एवं श्रीकृष्णं प्राप्ताः।[4] अतो भवत्योऽपि संपूर्णवृत्तिभिर्मत्स्मरणं नित्यं कुर्वन्त्यो मामवश्यं प्राप्नुयुः।[5] रासलीलायां गोपिकाभिर्यः परमानन्दो वर्णनातीत उपलब्धस्तस्य स्वरूपं कथञ्चिद् विविच्यते—परमात्मा स्वयमानन्दरूपोऽस्ति। तस्यानन्दस्यैकोंऽशो जीवैः संसारेऽनुभुज्यते[6] आनन्देनैव सर्वे जीवन्ति[7] परमात्मनस्तस्यानन्दस्य मीमांसा तैत्तिरीयशाखाया ब्रह्मवित्संज्ञकायामुपनिषदि विद्यते। तत्रेत्थं निर्णीतम्—जगति सर्वश्रेष्ठपुरुषेण य आनन्दो लभ्यते ततो गन्धर्वाणामानन्दः शतगुणैरधिकः। अनया रीत्या क्रमेण देवगन्धर्वादीनामानन्दस्य वर्णनं कृत्वा सर्वश्रेष्ठस्य प्रजापतेरानन्दः परमात्मन आनन्दस्यैकोंऽशोऽस्ति[8], एतादृशानन्दस्वरूपः सर्वाचिन्त्यशक्तिपरिपूर्णः परमात्मैव यत्र रसरूपः सन् प्रकटितः तत्रानन्दस्वरूपस्य वर्णनं सहस्रशीर्षा परमात्मसन्निकृष्टः शेषोऽपि न कर्तुं शक्नोति। तां मनोहारिणीं परमात्मनो मूर्तिं दृष्ट्वा जडवृक्षादीनामपि रोमाञ्चः प्रादुर्भवेत्तत्र गोपीनां विषये किमु वक्तव्यम्। अल्पमपि ज्ञानस्वरूपपरमेश्वरानन्दमनुभूय मनुष्यः तदेकमना भूत्वा नर्तितुं गातुं प्रवर्तेत इति वृत्तं भृगूपनिषदि स्पष्टं ज्ञायते।[9] रासलीलायामनन्दकन्दो रसराजः श्रीकृष्ण एव नृत्यति स्म तत्रानन्दसागरः प्रवहति स्मेति नाश्चर्यम्। परमात्मा यत्रैकाकी आसीत् तत्र पाषाणवृक्षजलादिकमानन्दमनुभूय तस्तम्भ। वंशीध्वनिं श्रुत्वा देवस्त्रियोऽपि स्वात्मानं विसस्मरुः। यदैतादृशः परमात्मा रासलीलायां स्वयमनेकरूपाणि बभार तथा तस्य परमात्मन आनन्दस्य वर्धका वेद-देवता-ऋषिरूपा गोप्यः प्राकटन्, परमात्मा ताभिः साकं नृत्यं तालस्वरयुतमकरोत्, तदा ब्रह्माण्डस्थः प्रत्येकं परमाणुरानन्दसागरे निमज्जत्युन्मज्जति स्मेति किमु वक्तव्यम्। अस्यानन्दस्य वर्णनं कर्तुं शब्दशक्तिरपि कुण्ठिता भवति। यतः परमात्मनः सामान्यरूपं वर्णयितुं वागप्य-

१. भाग० १०।३२।१६।२१
२. भाग० १०।३३।२४
३. भाग० १०।४७।२५
४. भाग० १०।४७।३०
५. भाग. १०।४७।३६
६. बृहदारण्यक ४।३।३२
७. तैत्तरीय ३।६
८. तैत्तरीय २।७
९. तैत्तरीय भृगूप० एतत्सामगायन्नास्ते इति।

समर्थो भवति ।[1] यत्र परमात्मा स्वीयाचिन्त्यशक्त्यानेकानि रूपाणि धृत्वा लीलां कर्तुं प्रयत्नशीलस्तमानन्दमुपभोक्तुं विना गोपीः कः समर्थः, देवताभिरपि कदाप्यानन्दस्यास्यानुभवो न कृतः । तदा लीलासमये आकाशे देवविमानानां संमर्दः समजायत, देवता दिव्यपुष्पाणां वर्षणमकुर्वन्, दुन्दुभिं वादयामासुः गन्धर्वाः स्वस्त्रीभिः समं ननर्तुः । अस्मिन्नानन्दसागरे परमात्मना सह क्रीडन्तीनां गोपिकानां पादधूलिं सहस्रवर्षाणि तपः कृत्वापि ब्रह्मा न प्राप[2] उद्धवस्तु अकथयत् —

"आसामहं चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनाम् । (१०।४७।६१) अत एव प्राचीनाचार्याः" पुराणेषु भागवतं तत्र दशमस्कन्धं तत्र च रासपञ्चाध्यायीं सर्वश्रेष्ठामिति प्रतिपादयन्ति । तत्सर्वथोचितमेव ।

आस्ताम्, संप्रति श्रीमद्भागवतस्थानामनेकभक्तिमाहात्म्यबोधकवचनानां समालोचने पाठकश्रोतृणां प्रायो निश्चितवन्मतं भवति, परमात्मनः प्राप्तौ विद्यमानानामनेकसाधनानां मध्ये भक्तिरेव सरलं साधनमिति, अतः महत्त्वपूर्णस्य सरलस्य सर्वैः कर्तुं सुयोगस्य भक्तिरूपसाधनस्य सर्वाङ्गपरिपूर्णः विचारः कर्तुमुचित एव ।

भक्तिं केचन भावरूपेणान्ये रसरूपेण वर्णयन्ति । भावगुणक्रियादिषु परिगणयन्ति । रसो नाम अन्तःकरणे प्रतिबिम्बितः परमात्मवस्त्वाकाररूपः स्थायिभावो एव यदा विभावादिभिः साहाय्यकैः प्रकटितो भवति[3] तदा स रसरूपः संपद्यते । भक्तिं गुणादिरूपेण वर्णयतां मते परमात्मन आराध्यरूपेण ज्ञानमथवा श्रोत्रादीन्द्रियद्वारा परमात्मविषयकविशेषज्ञानं किं वा छान्दोग्यबृहदारण्यकाद्युपनिषत्सु प्रोक्ता[4] विविधोपासनाऽथवा परमेश्वरविषयकेच्छाविशेषो भक्तिरित्यायाति । अस्यां स्थितौ ज्ञानविशेषस्येच्छाविशेषस्य वा क्षणिकस्वभावतया मनसोऽणुरूपत्वेन चान्तःकरणपरिणामरूपः स्थायीभाव एव न सिद्ध्यति । भक्तिं क्रियारूपेण वर्णयतां मते कीर्तननामोच्चारणादिकं तु इन्द्रियाणां क्रियारूपत्वेनान्तःकरणपरिणामरूपभक्तिर्न संपद्यते ।

केचन भक्तिं स्नेहत्वेन वर्णयन्ति, परन्तु स्नेहो नामेच्छाविशेष एव न भिन्नतया प्रसिद्धः । एवमन्ये भक्तिं रसरूपत्वेन स्वीकृत्यापि न स्वतन्त्ररसरूपत्वेनाभिप्रयन्ति, किन्तु शृङ्गाररसे तस्या अन्तर्भावं कृत्वा लौकिकवस्तुविषयकः शृङ्गाररसः सा इति कथयन्ति । अतः सर्वेषामेषां मतानां समालोचनपूर्वकं भक्तिं रसरूपत्वेनाङ्गीकृतवतां मतं प्रदर्शयामः ।

सर्वथा सर्वफलानां त्यागपूर्वकं परमात्मनि मनसः स्थिरा स्थितिरिति भक्तिशब्दार्थो गोपालतापनीयोपनिषदि प्रदर्शितः[5] एवमेव नारदपञ्चरात्रे स्नेहशब्देन सा लक्षिता ।[6] शाण्डिल्येन भक्तिसूत्रकारेणास्य परानुरक्तिशब्देन बोधनं कृतम् ।[7] स्नेहस्य पर्यायवाचिशब्देषु प्रेम-अनुरागादिशब्दा उपलभ्यन्ते । एवं नारदपञ्चरात्रदृष्ट्या स्नेहशब्देनेच्छाविशेषो न गृह्यते किन्तु परमेश्वरमाहात्म्यज्ञानपूर्विका परमेश्वरे मनसो दृढा स्थितिर्ग्राह्या, उचितं चैतन्मृते पुत्रे स्नेहस्त्वस्त्येव, परन्त्विच्छा नास्ति, यतस्तस्य प्राप्तिर्भवितुमशक्यैव "मृतं पुत्रं स्निह्यामि न त्विच्छामि तस्य प्राप्तेरशक्यत्वात्" इति लौकिकानां जनानामनुभवः ।

केषांचन नैयायिकादीनां दार्शनिकानां मतं वर्जयित्वा प्रायः चित्तं देहपरिमाणानुरूपमामनन्ति, अतश्चेतसः स्थायी-परिणामो भवितुं समर्हति । अस्यैव स्थायिभावस्य द्रुतस्य रसग्रन्थेष्वनेकशब्दैर्व्यवहारो दृश्यते ।[8] भक्तिर्ज्ञानविशेषरूपमिति कथनमपि "अधुना मृतं पुत्रं साक्षान्न जानामि किन्तु तं स्निह्यामि" इत्याद्यनुभवानुसारेणानुचितं प्रतिभाति । एवं भक्तेः प्राकृतशृङ्गाररसरूपत्वकथनमपि न समुचितम् । यतः शृङ्गारः प्राकृतस्त्रीपुरुषसम्बन्धेन भवति । तस्यालम्बनं नायको नायिका वा भवति, परन्त्वत्र वैधभक्तिवर्णने गोपीकानामिव कंसशिशुपालादिकानामपि वर्णनमुपलभ्यते ।[9] अतश्चित्तद्रुत्यवस्थायां प्रति-बिम्बितवस्तुनः आकारः स्थायीभावस्तथा विभावादिभिस्तस्य प्रकटनं रस इत्येव रसशास्त्रीयकथनं शोभतेतराम् । अयं रसो नवरसेभ्यो भिन्नतेऽथवा परमात्मविषयका नव रसाः प्रत्येकं भक्तिं किंवा नवरसमिलितो विशिष्टो रसो भक्तिरिति रसाचार्या वर्णयन्ति ।"[10]

---

१. यतो वाचो निवर्तन्ते ( तै० उ० २।९ )

२. बृहद्वामनपुराणे उत्तरखिलम् ।

३. भगवद्भक्तिरसायनम् १।९

४. बृ० उ० २।४।७ तथा छान्दोग्योप० ७।२५।२

५. भक्तिरस्य भजनम्, एतदिहामुत्रोपाधिनैराश्येनामुष्मिन्मनःकल्पनम्

६. माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः ।
स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा ॥

७. सा परानुरक्तिरीश्वरे ( शाण्डि० भक्ति सू० २ )

८. द्रुते चित्ते विनिक्षिप्तः स्वाकारो यस्तु वस्तुना ( भक्तिर० १।६ ) इति ।

९. भागवत० ( ७।१।३० )

१०. भक्तिरसायनं ( २।१ ) तथा मुक्ताफलैकादशाध्यायटीका द्रष्टव्या ।

यद्यपि शास्त्रीयग्रन्थेषु यथा पुराणादिषु कीर्तनादीनां कृते भक्तिशब्दो व्यवहृतो दृश्यते परन्तु स गौणः। अथवा भक्ति-शब्दस्य वाच्यार्थे द्वयम् भज्येत सेव्यत इति भक्तिः भज्यते—सेव्यत इति भक्तिरिति। एवं च प्रथमव्युत्पत्त्या सिद्धो भक्ति-शब्दः प्रधानभक्तेर्वाचकः द्वितीयव्युत्पत्त्या कीर्तनादिर्गौणभक्तिवाचकः।

रसशब्देन रसशास्त्रकाराणां मते परमात्मैव विवक्षितः यतस्तैत्तिरीयश्रुत्या "रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति"[2] इति स्पष्टतया रसशब्देन परमात्मैव बोधितः। अस्य रसरूपपरमेश्वरस्यानुभवः किञ्चिन्मात्रो लीलासु चेतसो द्रुति-रूपस्य सात्त्विकवृत्तावुदितायां तथा मायाकृतावरणभङ्गे सति प्रत्यक्षो भवति। एवमागमेन तथानुमानेनापि तस्य ज्ञानं भवति।[3] तं भक्तिरसं केचन कार्यं, ज्ञाप्यं, भोग्यं वा समामनन्ति। गोपालपूर्वतापनीयोपनिषदि, शाण्डिल्यसूत्रेषु वा पूर्वप्रदर्शितभक्तेर्लक्षणस्य परिष्कृतं रूपं मधुसूदनकृतभक्तिरसायने समुपलभ्यते। तत्रोक्तं

द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता।
सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते॥ १।३ इति।

श्रीमता भगवता व्यासदेवेन श्रीमद्भागवते कपिलदेवमुखद्वाराऽस्या एव भक्तेर्लक्षणं सुन्दरदृष्टान्तद्वारा प्रकाशितम्। तद्यथा—

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्॥ भाग० ३।२९।११

एतादृश्येव भक्तिः परमेश्वरमाकर्षयति। एकादशस्कन्धे परमेश्वरेण श्रीकृष्णेनोद्धवं प्रत्युक्तम् भो उद्धव! साङ्ख्यम्, योगः, धर्मः स्वाध्यायः, तपः, तथा त्यागो मां नाकर्षयन्ति यथा केवला निर्गुणा भक्तिराकर्षति।[4] भक्तिः साधारणतया द्विविधा विद्यते। यद्यपि स्वभावगुणक्रियादिभिरस्या भक्तेर्बहुधा भेदो प्रामाणिकग्रन्थेषु दृश्यते।[5] भक्तेरेको भेदः साध्यभक्तिरपरः साधनभक्तिरिति। अनयोरेव भेदयोरनेकग्रन्थेषु विविधा भेदाः समुपलभ्यन्ते, तेषां समेषां किञ्चित्स्वरूपं प्रदर्श्य मुख्यतया साध्यसाधनभक्त्योर्भेदान् प्रदर्शयामः।

हरिभक्तिरसामृतसिन्धौ साधन-भाव-प्रेमरूपेण त्रयो भेदास्तथाऽन्येऽपि बहवो भेदाः समुपलभ्यन्ते।[6] कुत्रचिदधिकारि-भेदेन भक्तेर्ज्ञानकर्ममिश्रा, कर्ममिश्रा, ज्ञानमिश्रा, शुद्धेति चत्वारो भेदा उपलभ्यन्ते। तत्र प्रथमभेदाधिकारी वानप्रस्थः, द्वितीय-भेदाधिकारी गृहस्थः, तृतीयभेदाधिकारी भिक्षुः, चतुर्थभेदाधिकारिणः सर्वे। तत्र कर्ममिश्रायां भक्तौ परमात्मनः प्रियकरेषु दास-त्वादिभावेषु स्वसंस्कारानुरूपं कञ्चन भावमाश्रित्य श्रवणादिकानामनुष्ठानं क्रियते। अन्यासु भक्तिषु यथाशक्ति उभयोरनुष्ठानं क्रियते।

श्रीवोपदेवेन स्वकीये मुक्ताफलग्रन्थे विहिताविहितभेदेन भक्तेर्द्वैविध्यं प्रतिपादितम्। विहितभक्तेः कर्ममिश्रादिभेदान् प्रदर्श्य सात्त्विकादिभेदेन चतुर्दशभेदाः प्रदर्शिताः। एवमविहितभक्तेः काम-भय-द्वेष-स्नेहरूपकारणेन चतुर्धा भेदः कृतः[7]। नारदेन स्वसूत्रेषु "गुणमाहात्म्यसक्तिः" इत्यादिरूपेणैकादशभेदाः प्रदर्शिताः।[8] आस्तामिदम्।

साध्यभक्तेः स्वरूपं नारदेनेत्थं प्रादर्शि—"सात्वस्मिन् परमप्रेमस्वरूपा"। अर्थात् परमेश्वरे परमप्रेमैव भक्तिरिति। इयं भक्तिर्येन भक्तेन प्राप्यते तस्य किमपि कर्तव्यं नावशिष्यते। स न कञ्चन द्वेष्टि, न विषयभोगं स्निह्यति, न क्रीडति, केवलं मत्तः, स्तब्धः, आत्मारामः, सिद्धः, अमृतस्तथा तृप्तो भवति।[9] स सर्वं परित्यज्य परमात्मनः शरणं गतः देव-ऋषि-भूत-मनुष्य-पितृणामृणी न भवति।[10]

१. भक्तिरसायनम् पृ० ६।
२. तै० उ० २।७
३. भक्तिरसायनम् तथा तट्टीका।
४. भागवत ११।१४।२०
५. भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते।
स्वभावगुणमार्गेण पुंसां भावो हि भिद्यते॥ भाग० ३।२९।७
६. द्रष्टव्या पूर्वभागे प्रथमा लहरिः।
७. मुक्ताफले चतुर्थाध्यायो द्रष्टव्यः।
८. नार० भक्तिसू० ८२
९. नार० भक्तिसू० ४-५
१०. भाग० ११।५।४१

एतादृशो भक्तः क्वचित्परमेश्वरचिन्तया रुदति, आनन्दाश्रूणि प्रवाहयति, क्वचिद्धसति, आनन्दति, सर्वथा लौकिकव्यवहाराद् बहिर्भूतो भवति। सर्वदा स परमेश्वरं गायति, एवं सर्वदा परमात्मानमनुशीलयति, एवमन्तेऽत्यन्तसुखसम्पन्नः सन् तूष्णींभवति।[1]

अथ साधनभक्तेर्भेदान् संक्षेपतो विवेचयामः। भक्तिरसामृतसिन्धौ लक्षणमित्थं दृश्यते[2]—

कृतिसाध्या भवेत् साध्यभावा सा साधनाभिधा।

अस्यायमभिप्रायः—यस्या भक्तेः प्रेमादिरूपो भावः साध्यस्तथा येन्द्रियादिद्वारा स्वयं साध्यास्तीति। अस्याः भक्तेर्विष्णुपुराणे श्रवणादिका नव भेदाः समुपलभ्यन्ते।[3] भिन्नभिन्नग्रन्थेषु श्रवणादिकानां लक्षणान्यनेकप्रकारकाण्युपलभ्यन्ते। परन्तु विचारे कृते सर्वाणि तानि न भिन्नार्थबोधकानि, सर्वेषां तात्पर्यमेकरूपमेव, अतस्तात्पर्यमादाय श्रवणादिकानां स्वरूपं विवेचयामः। सगुणस्य निर्गुणस्य वा परमात्मनः नाम-स्वरूप-पराक्रमबोधकशब्दानां परकृतोच्चारणस्यार्थानुसन्धानपूर्वकं श्रवणं श्रवणभक्तिपदवाच्यं विद्यते। भागवते बहुत्रेदं लक्षितम् दृश्यते।[4] तत्र भक्तानां मुखान्निष्क्रान्तानां नामादिकानां श्रवणं तु परमश्रेयसे भवत्यतो भागवतेऽनेकत्र "सन्मुखरितां भवदीयवार्ताम्" "महत्तमान्त हृदयान्मुखच्युतः" "स उत्तमश्लोकमहन्मुखच्युत" इत्यादिषु महत्-सदित्यादिविशेषणानि सङ्गतानि सन्ति।

कीर्तनशब्देन परमात्मनः स्वरूप-चरित्रबोधकशब्दानां नाम्नां चोच्चैरुच्चारणमभिप्रेतमास्ते। तदेव कीर्तनं सवाद्यवादनमनेकजनमिलितं सताललयं संकीर्तनं कथ्यते। अत एव श्रीमद्भागवते संकीर्तनशब्दस्यानेकत्र प्रयोगो दृश्यते। यथा—"श्रुतः संकीर्तितो ध्यातः" "यत्र संकीर्तनेनैव" "यज्ञैः संकीर्तनप्रायैः" इत्यादिषु। कीर्तनमुच्चैः कृतमेव भवति, उपांशुतया करणे जपो भवति। एतदभिप्रेत्य "गायन् विलज्जः" "विलज्ज उद्गायति" "नामान्यनन्तस्य हतत्रपः पठन्" इत्यादिस्थलेषु विलज्जादिविशेषणं कीर्तनकर्तुर्योजितम्। कीर्तनेन मनुष्यः कृतार्थो भवति। पुराणेषु सुस्पष्टमिदमुक्तम्[5]। कीर्तनेनैव शुकनारदप्रभृतयः कृतार्था अजायन्त। अस्मिन् कीर्तनविचारे परमात्मनाम्नोऽप्युच्चारणं समास्ते, अतः अतिसंक्षेपतो नामतत्त्वविचारकरणं प्रसङ्गत उचितं प्रतिभाति।

"आत्मैवेदं सर्वम्" इत्यादिश्रुतिभिर्जगति विद्यमानाः सर्वे पदार्थाः परमात्मरूपा इति प्रतिपाद्यते। तत्र पदार्थानां द्विविधो भेदो विद्यते वाच्यरूपोऽर्थादर्थरूपः, वाचकरूपः।

अर्थात् शब्दरूपः। सर्वे शब्दा अन्ततोगत्वा साक्षात्परम्परया वा परमात्मन एव वाचकाः। यतः सर्वपदार्थरूपेण परमात्मैव सर्वत्र विलसति। एतेनाभिप्रायेण यजुर्वेदेऽप्युक्तम् "सर्वे वेदा यत्पदमामनन्ति" इति। अतो यन्नाममाहात्म्यबोधकग्रन्थेषु नाम परमात्मनः स्वरूपमित्युक्तम्, तत्कथनं सर्वथा समुचितमेव। यथा परमात्मा जगत्यनेकपदार्थरूपेण विराजते तथा स नामरूपेण-शब्दरूपेणापि शोभत एव। नाममाहात्म्यबोधकानां वचनानां विचारे क्रियमाणे स्पष्टमिदं प्रतिभाति। नामापि परमेश्वरस्यैकोऽवतार इति। यतो जगतो रक्षाकरणादिसमस्तकार्यं नामैव सम्पादयति।[6] परमेश्वरस्यावताराणां तथावतारस्वरूपाणामियत्ता नास्ति। भक्तानां कल्याणकरणार्थं योग्यावतारस्वरूपं निर्माय स परमेश्वरो भक्तरक्षणं करोति। द्रौपद्या लज्जारक्षणार्थं वस्त्ररूपमवतारं दधार, समुद्रमथनसमये जले मज्जन्तं मन्दराचलं धारयितुं कच्छपरूपं स्वीचकार, जलात्पृथिव्या उद्धरणार्थं वराहरूपं दधौ। एवमनेकभक्तोद्धारार्थं नामरूपेणावततार। तस्योच्चारणमपि संसारसागराद् भक्तान् तारयति, नामनामयुतयोरभेदेन नामिनः सम्पूर्णकार्यं नाम सम्पादयति। व्यवहारेऽपि नामोद्दिश्य यदि स्तौति निन्दति वा तदा नामिनो सुखं दुःखं वा भवतीति प्रत्यहमनुभूयते। एतेनैवाभिप्रायेण।

---

१. भागव० ११।३।३२

२. पूर्वभागे द्वितीया लहरिः।

३. विष्णुपु० नं० ३।

४. भाग० १।१७।१०; ३।३; १।१९।१५; १२।६।२

५. तस्माद् गोविन्दमाहात्म्यमानन्दरससुन्दरम्।
श्रृणुयात्कीर्तयेन्नित्यं स कृतार्थो न संशयः॥
तथा—एतन्निर्विद्यमानानामिच्छतामकुतोभयम्।
योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम्॥ भाग० २।१।११
तथा भाग० ३।५।३३; ५।२५।११; ११।१३।४८; १२।१२।५० इत्यादिस्थलानि द्रष्टव्यानि।

६. नारदपाञ्चरात्रं तथा पद्मपुराणम्।

रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः ।। इति

रामनाम्नो माहात्म्यं प्रतिपाद्यते। श्रीजीवगोस्वामिना तु नाम्न एव वाच्यवाचकभेदौ कथितौ। तयोरपि वाच्यपरमात्मापेक्षया नामैव परमकरुणमित्युक्तम्।[१] सात्वततन्त्रे परमेश्वरं प्रति कृतापराधान् नामैव नाशयति, परन्तु नाम्नोऽपराधान् दूरीकर्तुं परमेश्वरस्य सामर्थ्यं नास्ति, किन्तु नामजप एव सामर्थ्यमस्तीति सुस्पष्टं प्रतिपादितम्।[२] केवलं नामोच्चारणादेव पापस्य नाशः पुण्योत्पादनं च भवत्येवं वैराग्यं, भक्तिः, तत्त्वज्ञानं नामजापकस्य भवति तथा परमात्मरूपेण स्थितिर्भवतीत्यन्यत्र प्रतिपादितम्।[३] अस्तु।

परमात्मनो नाम-रूप-पराक्रमाणां भक्तानां चरितानां च स्मरणं स्मरणपदेन कथ्यते। अर्थात् सर्वविषयेभ्यो मन आकृष्य परमात्मनि तस्य स्थापनम्। श्रीमद्भागवते स्मरणस्यैवं रूपमुपलभ्यते।[४] रागानुरागिण्यां भक्तौ स्मरणमेव मुख्यतया गण्यते। स्मरणस्य फलं भागवतप्रोक्तम्—

अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि शमं तनोति च।
सत्त्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तम्।। १२।१२।५४

किञ्च स्मरणेन संपूर्णपातकनाशो भवति।[५] स्मरणभक्त्यैव प्रह्लादादयो भक्ता मोक्षं प्राप्नुवन्। पादसेवाशब्देन परमात्मनः प्रतिमादेरथवा परमात्मनो मन्दिरादिपवित्रस्थानानां किंवा परमात्मस्वरूपगुरोः सर्वप्रकारिका यथायोग्यं सेवा विवक्षिता। पादादिसेवया संपूर्णपापादिकानां नाशे आनन्दावाप्त्यादि भवतीदं पादसेवायाः फलमस्ति[६], पादसेवादिना लक्ष्मीप्रभृतयः कृतार्थाः समपद्यन्त।

अर्चनशब्देन विधिपूर्वकं प्रतिमादिषु आवाहनाद्यनेकोपचाराणां पूजापराधरहितं समर्पणं विवक्षितम्।[७] गृहस्थानां कृते पूजनं भगवत्प्राप्तेर्मुख्यं साधनमस्ति।[८] भक्तः परमेश्वरपूजया परमात्मन आनन्देनातितृप्तः सन् परमं पदं याति, यथा विष्णुधर्मोत्तरपुराणे—

श्रीविष्णोरर्चनं ये तु प्रकुर्वन्ति नरा भुवि।
ते यान्ति शाश्वतं विष्णोरानन्दं परमं पदम्।। इति।

पृथुना राज्ञा परमेश्वरप्राप्तिः पूजारूपभक्त्या संपादिता।

वन्दनशब्देनार्चनकालाद्भिन्ने काले गुरोः, शालिग्रामादिप्रतिमानां, यमुनादिनदीनां, मथुरादिक्षेत्राणां च साष्टाङ्गप्रणिपातो विवक्षितोऽस्ति। प्रणिपातेनामङ्गलनाशो मुक्तेश्च प्राप्तिर्भवति।[९] वन्दनभक्त्याऽक्रूरः कृतार्थः समभवत्।

दास्यशब्देनाहं सर्वथा परमेश्वरस्य दासोऽस्मि, मदीयं सर्वस्वं परमेश्वरायार्पितमस्ति। दास्यभक्त्या भक्तः सर्वाणि फलानि प्राप्नोति,[१०] परमेश्वरस्य दासो दुर्जयमायामपि जयति।[११] दास्यभक्त्या हनुमान् कृतकृत्यो जातः।

सख्यशब्देन विश्वासपूर्विका मित्रवृत्तिर्विवक्षितास्ति। परमात्मनि सख्यभक्तिं कुर्वतः परमेश्वरेण समाना परमैश्वर्यस्य प्राप्तिर्भवति। इदं सुदामचरित्रतः सुस्पष्टं भवति। ब्रह्मणापि गोपादीनां सख्यभक्तिं दृष्ट्वाऽस्तावि।[१२] अर्जुनादयः सख्यभक्त्या

---

१. वाच्यं वाचकमित्युदेति भवतो नाम स्वरूपद्वयं
पूर्वस्मात्परमेव हन्त करुणं तत्रापि जानीमहे ।। इति।

२. सात्वततं० पटल ७ श्लो० ४६–४७

३. विष्णोर्नामैव पुंसः शमलमपनुदत्पुण्यमुत्पादयच्च, ब्रह्मादिस्थानभोगाद्विरतिमथ गुरुश्रीपदद्वन्द्वभक्तिम्।
तत्त्वज्ञानं च विष्णोरिह मृतिजननभ्रान्तिबीजं च दग्ध्वा, पूर्णानन्दैकबोधे महति च पुरुषं स्थापयित्वा निवृत्तम् ।।
तथा सात्वततन्त्रसप्तमपटलश्लो० १४–१५

४. भाग० ११।१३।१४

५. अशेषसंक्लेशशमं विधत्ते गुणानुवादः स्मरणं मुरारेः।

६. भाग० ११।७१।६।१५

७. अर्चनं तूपचाराणां स्यान्मन्त्रेणोपपादनम् ( पाञ्चरात्रम् )

८. अयं स्वस्त्ययनः पन्थाः द्विजातेर्गृहमेधिनः।
यच्छ्रद्धया मवित्तेन शुक्लेनेज्येत पूरुषः। ( सिद्धान्तदर्पणे )

९. भाग० १०।१७।६

१०. भाग० ९।५।१६

११. भाग० ११।६।४६

१२. भाग० १०।१४।३२

कृतार्थाः समभवन्। आत्मनिवेदनशब्देन देहादेरात्मपर्यन्तानां सर्वप्रकारेण परमात्मनि समर्पणं विवक्षितम्। सर्वस्वे परमात्मनि समर्पिते देहादेः पालनस्य चिन्तापि नश्यति।[1] एवं सति देहादिनिमित्तकोऽहङ्कारोऽपि न भवति। आत्मनिवेदनं कुर्वन् भक्तः सर्वथा कृतार्थो भवति।[2] एवं प्रकारेण नवविधैषा भक्तिः साधनरूपा परमेश्वरविषयकमत्युत्कटं प्रेमरूपं साध्यभक्तेः स्वरूपं साधयति। नवविधसाधनभक्तीनां मध्ये कस्याप्येकस्यानुष्ठानं यथाशक्ति कृतं साध्यभक्तेः सिद्धये परमावश्यकमास्ते। एवं कृते मुक्तिरवश्यं सिध्यति।[3] श्रवणादेर्भक्तेः सिद्धये सत्सङ्गः परमावश्यकोऽस्ति। सत्सङ्गपदेन भगवद्भक्तानां सङ्गोऽपेक्षितो भवति। सोऽपि पूर्वसुकृतेन लभ्यते।[4] अस्तु।

परमात्मकृतलीलानां स्मरणेन श्रवणेन च मनुष्यहृदये परमेश्वरसत्ता चेतसि दृढा भवति दुष्टा वासना निवृत्ता जायते इतीदं मुख्यं[5] प्रयोजनम्। परमात्मनः कथां शृण्वतां रसज्ञानां प्रतिपदं माधुर्यरसप्राप्तिर्भवति।[6] अत्यन्तदुस्तरसंसारसागरं लङ्घयितुं परमात्मनः लीलाकथामृतश्रवणं विना नान्योऽस्त्युपायः।[7] लीलानां शृण्वतां एव मननकर्तॄणां चेतो विषयविमुखं सन् परमात्मनः संमुखं शनैः शनैर्गन्तुं प्रवर्तते। एवं तस्मिन् प्रवृत्ते मनसि सूक्ष्मवस्तुनो ज्ञानं साक्षाद्रूपेण प्रादुर्भवति।[8] यत्र यत्र चित्तं स्थाप्यते तत्र तत्र तदाकारं भवति। चेतस एतादृक् स्वभावत्वात् परमात्मनि प्रवृत्तं सत् तत्रैव लीनं भवति।[9] एवं परमात्मनो रसरूपस्य परमप्रेमरूपपरानन्दस्य प्राप्तिर्भवति। सर्वानुष्ठानधर्मादीनां मुख्यं फलं श्रीकृष्णे भक्तेर्भवनं यदि तन्न भवेच्चेत्तुषकण्डनवत्तद् वृथा भवेत्।[10] एवं प्रकारेण परमात्मनो लीलादेः श्रवणमननादीनां बहूनि फलानि ग्रन्थे चोक्तानि, अनुभवितारो भक्ता अपि वर्णयन्ति। परन्तु ये अपक्वकलुषा विद्यन्ते तेषां चेतसि प्रारम्भतोऽनेकाः कुशङ्काः प्रादुर्भवन्ति, यथा परमात्मनोऽनेकलीलाकरणे किं प्रयोजनम्? लीलानां यद्वर्णनमुपलभ्यते तद्वस्तुतः परमसत्यमस्ति। कालियमर्दने कालियनागपत्नीभिः कृता मनुष्यवाण्या स्तुतिः किं वास्तविकी! परमात्माऽतिश्रेष्ठो महान् प्राकृतगोपवत्किमर्थं गाश्चारयति स्म? परमात्मनोऽवतारे प्रायोऽसुरराक्षसादीनां नाशः कृतः उपलक्ष्यत इति असुरसृष्टेर्विनाशकरणमेव किं परमात्मनोऽवतरणे प्रयोजनम्? पृथ्वीमागत्य देवता भगवन्तं स्तुवन्ति स्म? देवताः कलिप्रारम्भपर्यन्तं भूमावागत्य स्तवादिकार्यं सम्पादयन्ति स्म, परन्त्वधुना देवतादीनामागमनं किमवरुद्धम्? पुराणस्य भूगोलादिवर्णनं तु सम्प्रति प्रत्यक्षविरुद्धमिति जानन्ति सर्वे, अतः कथं विश्वासः कर्तुं शक्यतेऽप्रत्यक्षालौकिकविषये? इत्यादयः। आसां शङ्कानां कश्चिद् विचारं प्रसङ्गेऽस्मिन् संपादयामस्तेनास्तिकानां भागवतश्रवणादौ प्रवृत्तिरनवरुद्धा भवेत्।

अनेकलीलाकरणे परमात्मनः प्रवृत्तेर्मुख्यं कारणं भक्ता अनेकविधवासनावन्तः सन्ति। तेषां संकटान्यप्यनेकरूपाणि सन्ति। अतो भक्तवासनाः संकटानि चावलम्ब्यानेकलीलाः संभवन्ति, कृतानां लीलानां स्वसंस्कारानुरूपं श्रवणादिकं भक्ताः संपाद्य स्वीयोद्धारं कुर्वन्त्वेतावदेव तात्पर्यं भिन्नलीलाकरणे परमात्मनः।[11] पूर्णावतारस्येदमेव स्वरूपं यदनेकविधलीलाकरणं नाम। परमात्मनः श्रीकृष्णस्य चरित्रं अनेकरसपरिपूर्णमास्ते, भक्ता अप्यनेकसंस्कारयुताः स्वाभीष्टं रसयुक्तं चरित्रमनुसेव्य परमात्मनि प्रेमस्वरूपे चित्तं सुदृढं संयोजयन्ति।[12] अचिन्त्यालौकिकसर्वशक्तिसंपन्नपरमात्मनो लीलासु किञ्चिज्ज्ञाशक्तानामस्माकं दृष्ट्या कदाचिदसंभवि वर्णनमुपलभ्यते तत् श्रुत्वा तदसत्यमिति कथने का युक्तिः? यदि परमेश्वरः साधारणमनुज इव व्यवहरेत्तर्हि तस्य चरित्रे किं महत्त्वम्? कथं वा तच्छ्रवणादिना चेतःसन्तोषो भक्तसमुद्धारश्च, अतो भक्तचेतसः समाकर्षणार्थं तेषां भक्तानां समुद्धारार्थं च परमात्मनो मनुष्यवल्लीलास्वपि मनुष्याणां दृष्ट्याऽद्भुतताऽसंभावनीयता चावश्यमपेक्ष्यत एव। ये भक्ताः परमेश्वरस्य

---

१. चिन्तां न कुर्याद्रक्षार्थे विक्रीतस्य यथा पशोः।
तथार्पयन् हरौ देहं विरमेदस्य रक्षणात्॥ (भक्तिविवेके)

२. भगवद्गीता ३।१७

३. शाण्डिल्यसू० ६३

४. अन्यथा भगवद्भक्तिर्भक्तसङ्गेन जायते।
सत्सङ्गः प्राप्यते पुंभिः सुकृतैः पूर्वसञ्चितैः॥ (नारदपञ्चरात्रे)

५. भाग० १।२।१७

६. भाग० १।१।१९

७. भाग० १२।८।४०

८. भाग० ११।१४।२६

९. भाग० ११।१४।२७

१०. भाग० ११।१४।८

११. भाग० (१।८।३५, ३६)

१२. द्रष्टव्यं बोपदेवविरचितं मुक्ताफलम् (अ० ११)

बाललीला एवाभिप्रयन्ति तासां श्रवणेनैव तेषां चित्तं परमात्मनि लीयते, तेषां भक्तानां कृते गोपबालकवल्लीलाकरणं तथा तत्प्रसङ्गतः प्राप्तराक्षसासुरवधकरणं समुचितमेव। सर्वव्यापकस्य सर्वस्वरूपस्य परमेश्वरस्य कृते गोचारणादि कृत्यं न तस्य महत्त्वं विघटयति। किञ्चास्माभिः पूर्वं निरूपितमेव परमेश्वरकृतलीलाकथा रूपकस्वरूपा अतिशयोक्त्यलङ्कारयुक्ताश्च क्वचित्सन्तीति। असुरराक्षसस्वरूपवर्णनमप्यतिशयोक्त्यलङ्कारयुक्तमेव। असुरा राक्षसा अपि दुष्टसंस्कारयुक्ता भक्तसाधुविनाशकरणप्रकृतयो मनुष्या एव, ते सर्वदा सर्वत्रोपलभ्यन्त एव। तेषां विनाशं कृत्वा साधुरक्षणं परमेश्वरस्यावतरणे मुख्यं प्रयोजनमस्त्येव।[1]

देवतास्तु सत्त्वगुणयुक्ताः सन्ति। तेषां स्वर्गादयो लोका अपि सत्त्वगुणनिर्मिताः सन्ति। मनुष्या यदा सत्त्वगुणा भवन्ति तदा तेषां लोके गमनं ताभिः साकं वार्तालापादिकं कर्तुं प्रभवन्त्येव।[2] मनुष्याः कर्म, योगं भक्तिमुपासनादिकं च कृत्वा सत्त्वगुणान् संपादयितुं प्रभवन्ति। भोगेन सत्त्वगुणविनाशः संपद्यते। सत्त्वगुणस्य नाम पुण्यस्य यदा भोगेन विनाशो भवति तदा पुना रजस्तमोबहुले मृत्युलोके देवताभूतमनुष्याणामागमनं संभवति।[3]

सत्त्वगुणविशिष्टा देवतास्तु सर्वदाऽस्मिन् मर्त्यलोके समागच्छन्त्येव तथा सत्त्वगुणमनुष्यैः सह व्यवहरन्ति च।[4] श्रीकृष्णचन्द्रो यदाऽस्मिन् भूतलेऽवतीर्णस्तदा तु सत्त्वगुणस्य शुद्धस्य महद् वैलक्षण्यमासीत्। व्रजमण्डलं तु परमेश्वरसान्निध्येन प्रेमसागरस्य मुख्यं स्थानमेवासीत्।[5] यतः श्रीकृष्णो विशुद्धसत्त्वगुणं स्वीकृत्यैवावतीर्णः[6] तस्य समीप आगत्य सत्त्वगुणविशिष्टदेवतानां स्तुतिकरणं न मिथ्या भवितुमर्हति।

परमेश्वरस्य सर्वज्ञत्वान्नागपत्नीभिः कृता स्तुतिर्नागभाषायामेव कृतेति सुस्पष्टम्। व्यासदेवेनास्मत्कृते संस्कृतभाषया सोपनिद्धेति संभवति। इयमपि रूपककथेति वक्तुं शक्यते भूगोलवर्णनं संप्रत्युपलब्धभूगोलादिना विरुध्यत इति शङ्काया विषयेऽयं विचारः पौराणिकप्रमाणज्यौतिषशास्त्रीयप्रमाणयोः कश्चन संकेतभेद उपलभ्यते। तेन परस्परं कश्चन विरोध इव दृश्यते। आधुनिकाः समुद्रान् परित्यज्य केवलं भूखण्डपरिमाणविचारेण प्राचीनपुराणादिषु निर्दिष्टभूखण्डविवरेण सह तुलनां कुर्वन्ति तदैव विरोध इव भवति। परन्तु पौराणिकसंकेतान् ज्ञात्वा तद्द्वारा यदि तुलनादि क्रियेत तदा तु विरोधो नश्यत्येव। अत्र विषये चतुर्धरनीलकण्ठस्य पौराणिकज्यौतिषभूगोलादिशङ्कापरिहारविषयको ग्रन्थोऽवश्यं समादरणीय आस्ते।[7] प्लक्षद्वीपादीनां इक्ष्वादिसागराणां च विषये पौराणिकैरेवोक्तमिमे द्वीपा अनेन शरीरेण गन्तुं न शक्या इति। अतस्तद्विषये कुतस्ते कथं गन्तव्या इति विचारकरणमेव व्यर्थमस्ति। अस्तु।

श्रीमद्भागवतस्य तात्पर्यं द्वैते अथवा अद्वैते किं वा विशिष्टाद्वैतेऽस्तीति विषये बहवो मतभेदाः समुपलभ्यन्ते, प्रायः सर्वैर्द्वैताद्वैतविशिष्टाद्वैतप्रभृतिभिः स्वमतबोधिकाः कृताष्टीका भागवतस्योपलभ्यन्ते, अतोऽत्र कश्चन कृतो निर्णयो न सर्वेभ्यो रोचेत इति निश्चितम्। पाठकानां सुखविचाराय कानिचिद् द्वैतपराणि तथाद्वैतपराणि स्थलानि संगृह्यन्ते—व्याससमाधिदृष्टपदार्था जीव-परमात्म-मायाप्रभृतयः सन्ति।[8] सनत्कुमारैर्नित्यवैकुण्ठे सगुणपरमात्मनो दर्शनं कृतम्।[9] अक्रूरेण परमात्मद्वारा परमात्मलोकदर्शनं कृतम्, तथा तेन परमात्मनः सगुणनित्यरूपस्य दर्शनं कृतम्।[10] एतानि स्थलानि द्वैतादिकं बोधयन्ति अद्वैतबोधकानि कानिचित्स्थलानि—परमात्मा स्वयं निर्गुण एकोऽपि मायया जगन्निर्माति (भाग० १।२।३०) निर्गुणपरमेश्वरस्य गुणान् गातुं ब्रह्मणा प्रेरितो नारदोऽनेकान् चरित्रं श्रावयति (भा० २।८।१) एवं (२।९।३१-३२ ३।५।२३) आदिस्थलानि द्रष्टव्यानि।

अस्यामवस्थितौ पाठका एव स्वस्वमतानुसारं निर्णेतुं प्रभवेयुः। परन्त्वत्र निश्चितमस्ति यद् मुक्तेर्भिन्नभिन्नस्वरूपत्वेऽपि तथा मुक्तेः साधनानां ज्ञानादीनामनेकत्वेऽपि श्रीमद्भागवतदृष्ट्या भक्तिरेव मुक्तेर्मुख्यं साधनमिति प्रतीयते। यतः ब्रह्मनारदसंवादेनैतन्निश्चीयते। तथाहि ब्रह्मणा नारदायोक्तम्—

यथा हरौ भगवति नृणां भक्तिर्भविष्यति। सर्वात्मन्यखिलाधारे इति संकल्प्य वर्णय॥ भाग० २।७।५२

१. भगवद्गीता (अ० ४।८)
२. पातं० योग सू० ३।५१
३. भगवद्गीता (९।२१)
४. द्रष्टव्यं भक्तमाल-भक्तविजय सन्तलीलामृतादिकम्।
५. भाग० १०।५।१८
६. भाग० १०।२।२४
७. अयं ग्रन्थः संस्कृतब्राह्मणसंमेलनमासिकपत्रिकायां मुद्रितोऽस्ति।
८. भाग० १।७।४-५
९. भाग० ३।१५।३७-४४
१०. भाग० १०।३९।४४-५५

अनेन निश्चीयते मुक्तिसाधनेष्वनेकेषु सत्स्वपि भागवतदृष्ट्या भक्तेर्मोक्षार्थं प्राधान्यमिति। एवं यस्य भक्तिः करणीया स परमात्मा नित्यानेकाचिन्त्यगुणविशिष्टोऽस्ति न तु निर्गुणः। निर्गुणस्य प्रथमतो भक्तिरेव न संभवति। भागवतमेव कराले कलिकाले परमात्मनि भक्तेर्वर्धकं तद्‌द्वारा जगति परमार्तानां च सुखमोक्षसाधनमिति निश्चीयते—

कलौ नष्टदृशामेषां पुराणार्कोऽधुनोदितः। भाग० ३।१

श्रीमद्‌भागवतस्य सूक्ष्मावलोकनं कुर्वतां प्राचीनपरम्परयाधीतभागवतरहस्यज्ञानाम् इदं कथनं विद्यते–श्रीमद्भागवते परमात्मनः सर्वस्वरूपभेदानां प्रतिपादनमुपलभ्यते, अतोऽधिकारी भक्तः स्वसंस्कार-बुद्धि-शक्ति-संप्रदाय-उपदेशादिकमनुसृत्य भक्त्या परमेश्वरे चित्तं प्रस्थाप्य स्वोद्धारं कुर्यादिति।

संप्रति प्रसङ्गतो व्यासदेवस्य सर्वत्रोपलब्धं चरित्रमेकत्र संकलय्य पाठकमनोविनोदाय लिख्यते। येन सर्वदा सर्वकाले सर्वजनानामुपकारो भवत्विति चित्रया परमभक्त्या श्रीकृष्णचरित्रलेखकस्य कृष्णद्वैपायनव्यासस्य जन्म पराशरऋषिद्वारा सत्यवत्यां यमुनाया अन्तर्गते द्वीपे जातम्।[1] अतो द्वैपायननाम्ना प्रसिद्धिं गतः। एष पराशर-पाराशर्य-बादरायण पुराणप्रवक्ता प्रभृति-नाम्नाऽपि प्रसिद्धः[2]।

अयं वैवस्वतमन्वन्तरे जातोऽष्टाविंशतिसङ्ख्याको व्यासोऽस्ति। एवं विष्णोरवतारोऽस्ति।[1] एष सरस्वत्यास्तटे शम्या-प्रासनामकाश्रमे वसति स्म। तस्मिन्नाश्रमे स्थित्वा नारदोपदेशात्सात्वतसंहितां (भागवतं) निर्मायात्मारामं निवृत्तिनिरतं शुक-मध्यापयामास।[2] सूतमप्ययं पुराणानि पाठयामास।[3] एवं जातुकर्ण्याद्धर्मं ज्ञात्वा भारतं अष्टादश पुराणानि च निर्ममे।[4] वेदानां शाखाविभजन-संक्षेपादिकरणाद् व्यासनाम्ना प्रसिद्धः। अयं यदा गृहस्थाश्रमं कर्तुमियेष तदा जाबालऋषेः कन्यां वटिकां नाम उदुवाह। ततः शुको नाम पुत्रो जातः।[5] वायुपुराणेऽरणीतः शुकोत्पत्तिर्लिखितास्ति।[6] अनेन ब्राह्मेन्द्रपाणिनीयरौद्रवायव्यवारुणसावित्र-वैष्णवरूपाणि व्याकरणानि निर्मितानि।[7] अस्य पुत्रः शुको ज्ञानी सदेहं स्वर्गं गतवान्। तदास्य शोकनिवारणार्थं शङ्करेणास्मै सर्वत्र शुकच्छायादर्शनरूपो वरो दत्तः।[8] स्वमातुः सत्यवत्या आज्ञया धृतराष्ट्रादीनुत्पादयामास।[9] एष महाभारतीययुद्धादनन्तरं धृतराष्ट्रप्रभृतीन् प्रति मृतपुत्रादीन् दर्शयामास।[10] अनेनोपनिषद्‌ज्ञानसमन्वयार्थं ब्रह्मसूत्राणि विरचितानि, तथा वाराणस्यां निवसता स्मृतिर्निर्मिता।[11]

अत्रैतिहासिकाः व्यासचरित्रमादाय विवदन्त इति जानीमः। परन्तु सर्वास्तिकजनमनस्तोषाय यत्र यत्र यथोपलब्धं व्यासदेवचरितं तत्संकलनाबुद्धयात्र संकलितमिति। एवं चापञ्चसहस्रवर्षं सर्वथाऽऽबाल्यात्सर्वथा सर्वप्रकारेण सर्वेषां सुख-प्राप्त्यै ज्ञानप्राप्त्यर्थं च सर्वदा यतमानस्य महर्षेर्व्यासदेवस्य धार्मिकं बौद्धिकं चैकाधिपत्यं साम्राज्यं सर्वत्र भारते जगति वा भाषा-संप्रदाय-प्रान्तजाति-देश-भेदरहितमद्य यावत्प्रचलति। अग्रे च निःशङ्कमप्रतिहतं च प्रचलिष्यतीति निश्चिनुमः। अत एव तद्विषये केनचित्परमसश्रद्धहृदयेन विदुषा सूरिणा यदुक्तम्—

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः। अभाललोचनः शम्भुर्भगवान् बादरायणः॥ इति तत्परमसत्यमित्यास्ताम्।

१. महाभार० आदि प० ६४,१२६
२. पद्मपुराण० ३।१,६०।११,२१
तथा विष्णुधर्मो० १।७४

१. मत्स्यपु० ४२।३।११ लिङ्गपु० १।२४
२. भाग० १।४।२६ १।७।२७
३. देवीभा० १।३ भारतआदि प० ६४।१३१
४. वायुपु० १।१ ब्रह्मपु० २६
५. स्कन्दपुराणनागरखं० १४७
६. २।१०।८९
७. भवि० पु० ब्रह्मप० १।६०
८. महाभा० शां० प० ३४१
९. महाभा० आदि प० ५३।५४
१० महाभा० आश्र० प० ३०
११. स्मृतिग्रामणो प्रकरणः।

अस्यां श्रीमद्भागवतभूमिकायां प्रसिद्धानां कासांचन समुत्पद्यमानानां शङ्कानां समाधाने प्रयत्नोऽकारि। विशेषस्तु जिज्ञासुभिरत्र मुद्रितासु श्रीधराचार्यप्रभृतिभिर्विरचितासु टीकासु अस्मद्लिखितभागवतस्तुतिसंग्रहभूमिकायां विस्तृतायां च तत्र तत्र द्रष्टव्यः।

इदमभूतपूर्वमनन्यसाधारणं द्वादशाधिकप्रसिद्धाप्रसिद्धटीकायुतं श्रीमद्भागवतमुद्रणरूपं कार्यं श्रीपरमेश्वरपरमभक्तैर्वेदान्ताचार्य-काव्यतीर्थ-भागवतभूषणप्रभृतिभिरनेकवास्तविकयथार्थसमुपाधिधारिभिः पाठकोपाह्वश्रीदलसुखरामात्मजैः श्रीकृष्णशङ्करशास्त्रिभिः संपाद्यत इत्यहोभाग्यमास्तिकजनानाम्।

अनेकलक्षरूप्यकद्रव्यव्ययसाध्यमद्य यावत्केनाप्यकृतं पृथग्-पृथग् मुद्रितानामुद्रितानां च टीकानामेकत्र संकलय्य सुन्दरशुद्धरूपेण मुद्रापणं कर्तुं श्रीकृष्णशङ्करशास्त्रिभिः श्रेष्ठिपरमेशभक्तठाकरसीकुलोत्पन्नश्रीकृष्णराजभाईमहोदयानामाध्यक्ष्ये "विद्याहितनिधि" नाम्नी काचनाभिनवा संस्था निर्मिता। इदमतिमहत् श्रीमद्भागवतमुद्रापणं कार्यं कुत्र प्रचलत्विति सुदीर्घं सुनिश्चितं च विचार्य श्री शिवप्रियायामस्यां वाराणस्यां भवति चेत्साधु स्यादित्यभिप्रेत्य तदर्थमाचार्यकुलोत्पन्नाः श्रीभाईशङ्करात्मजा एम्० ए० वेदान्ताचार्य-विशारदोपाधिपदभाजः श्रीप्राणलालशास्त्रिण इमं व्यवस्थाकार्यभारं निर्वोढुं नियुक्ताः।

अस्यानेकटीकायुतश्रीमद्भागवतग्रन्थस्यानेकाः खण्डाः संभवेयुः। प्रारम्भिके प्रास्ताविके खण्डे संप्रत्यतिदुर्लभाः भागवतभूषणम् श्रीमद्भागवतप्रथमस्कन्धप्रथमाध्यायप्रथमपद्यस्य "जन्माद्यस्य यत" इत्यस्य शताधिकार्थबोधिका टीका श्रीमद्भागवतमाहात्म्यद्वयमित्यादयो मुद्रिताः स्युरेवं चेदमपूर्वमद्भुतमनन्यसाधारणं कार्यं सफलयितुं सर्वेऽप्येते श्रीकृष्णशङ्करशास्त्रिकृष्णराजभाई ठाकरसीजयराजभाईप्रभृतयः विद्याहितनिधिसदस्याः सर्वशक्त्या, विपुलधनव्ययेन, सर्वसुन्दरं भवत्वितीच्छया, श्रीपरमेश्वरस्य, तोत्रवेत्रैकपाणेरार्तत्राणस्य, नीलमेघच्छवेः पीतपीताम्बरधारिणः पार्थरथकुटुम्बिनो भगवतः, सात्वतप्रियस्य, सर्वान्तर्गतस्य श्रीकृष्णस्यैकनिष्ठया भक्त्या च प्रवर्तन्त इति वृत्तं केषां विदुषां हृदयतोषकरमभिमानास्पदं सर्वथा समादरणीयं न भवेत्?

'कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः' इति वचनमाश्रित्य दूषकेऽतिकराले कलावस्मिन् श्रीभगीरथेन भारतभूमौ स्वर्गादानीय प्रवाहिता गङ्गेवेयं श्रीमद्भागवतीया श्रीपरीक्षिदुद्दिष्टेन श्रीशुकमुखान्निर्गलितैषा वाग्गङ्गा सर्वान् आर्तजनान् पावयितुं सुखाकर्तुं च संप्रति उपर्युक्तश्रीकृष्णशङ्करशास्त्रिप्रभृतिभिः प्रवाह्यत इति सर्वास्तिकजनानामिदं कार्यं परमसुखाकरमिति निश्चितम्।

"अनाहूतोऽध्वरं गच्छेत्" इति न्यायेन अस्य महतोऽनेकटीकासहित-श्रीमद्भागवतमुद्रणरूपमहामन्दिरनिर्माणकार्यस्य प्रारम्भे त्रुटितस्फुटितेष्टिकाप्रक्षेपणमिव यथाशक्ति यथाबुद्धिरनेकत्रुटिपूर्णं भूमिकालेखनकार्यं केवलं भक्तानां कृते श्रीभैरवरूपेण विराजमानवृन्दावनविहारिभक्तत्राणसर्वमोहनबालकृष्णकृपाप्राप्त्यर्थं वृत्तमिति सादरं सप्रश्रयं सप्रणामं च दयालून् हंसक्षीरन्यायव्रतान् विदुषो निवेदयते—

आषाढ व० ११।२०२२
वाराणसी

श्री अनन्तशास्त्री फड़के
व्याकरणाचार्य–मीमांसातीर्थ–वेदान्तकेशरी
भूतपूर्व अध्यक्षः पुराणेतिहासविभागे वाराणसेयसंस्कृतविश्वविद्यालयस्य

# पद्मपुराणीयश्रीमद्भागवतमाहात्म्यम्

( सटीकम् )

## प्रथमोऽध्यायः

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ।
यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ॥
पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥ १ ॥

नैमिषे सूतमासीनमभिवाद्य महामतिम् । कथामृतरसास्वादकुशलः शौनकोऽब्रवीत् ॥ २ ॥

श्रीगणेशाय नमः ॥

गोविन्दं प्रणमामि गीष्पतिसमं वित्तं भुवि प्राग्जयं स्वाभीष्टप्रदमंघ्रियुग्ममनिशं शाकंभरीयं मुदा ॥
यद्देवाः खलु पूजयन्ति सततं कायाऽकसंशान्तये श्रीमद्भागवताख्यकल्पकुरुहो माहात्म्यटीकाकृते ॥ १ ॥
सर्वज्ञस्य कथं ज्ञेयोऽभिप्रायोऽल्पज्ञतः स्फुटम् ॥ तथापि प्रेमवशतो व्याख्यां कुर्मो यथामति ॥ २ ॥
व्याख्यातं बहुधा पूर्वैर्ऋषिभिः सागरोपमैः ॥ राधाकृष्णप्रसादेन व्याख्यामः पल्वलोपमाः ॥ ३ ॥
पाद्मस्यमाहात्म्यटीकर्जू राधाकृष्णवरेण हि ॥ श्रीराधाकृष्णप्रीत्यर्थं यथामति वितन्यते ॥ ४ ॥
श्रीभागवतमाहात्म्यं पाद्मोक्तं वर्वृतीति हि ॥ प्रसिद्धं षड्भिरध्यायैस्तद्व्याख्यानं समारभे ॥ ५ ॥
ग्रन्थान्तरं हि ग्रन्थस्य टीकेति मुनयो जगुः ॥ तत्र विज्ञायते सर्वैर्मेच्छ्रमः सफलस्ततः ॥ ६ ॥

अथैतच्छास्त्रादौ पूर्वापरसंगतिमलभमानः शाण्डिल्यगोत्रो गौडधुरंधरो हरिद्वंशावतंसो शेखावाट्यंतर्गतविजयपुरनिवासी व्राजलाली रामप्रतापशर्मा बालबोधाय श्रीमद्भागवतमाहात्म्यस्य ऋजुनाम्नीं टीकां चिकीर्षुराचार्यैरुपन्यस्तां सूतोक्ति नमस्कारात्मक-मंगलनिरूपिणीं व्याख्याति ॥ यमिति–तमानतोस्मि तस्य शरणं गतोस्मि । कथंभूतं तम्–यं द्वैपायनः द्विर्गता आपो यस्मिंस्तत् द्वीपं, तदयनं स्थानं यस्य स तथा वेदव्यासो विरहकातरः पुत्रस्यात्मनश्च विरहात्कातरो विकल उद्विग्नचित्तः–हे पुत्र इति प्लुतेनाजुहावाहूतवान् । कथं तद्विरहो जात इति संशयमपनुदन् विशेषयति–प्रव्रजन्तमिति । संन्यस्य प्रयान्तम्, प्रपूर्वकस्य व्रजधातोः संन्यासोर्थः 'मातापित्रो रुदतोः प्रव्रजति पुत्रः' इत्यादौ तथा दर्शनात् । वैराग्यमन्तरा कथं प्रव्रजनम् "यदहरेव विरज्येत तदहरेव प्रव्रजेत्" इति श्रुतिगर्जनात् । तत्राह–अनुपेतं सर्वत्र लोकोपभोग्यवस्तुषु क्षयिष्णुत्वेन बन्धनहेतुतया चासक्त्या दोषदर्शनेन संजाततीव्रवैराग्यात् संगरहितम्, एतेन वैराग्यं सूचितम् । सदसद्विवेचनद्वारा कीदृक् संन्यासी भवति, किं तेन करणीयमित्यपेक्षायां निष्क्रियत्वात्तस्य कृत्यं नास्तीति दर्शयति–अपेतकृत्यमिति । अपेतं त्यक्तं कृत्यं कर्तव्यमात्रं येन स तथा तम्, मुनिं मननशीलमिति तन्मयतया शुकरूपया वाण्या तरवो वृक्षा अभिनेदुः उत्तरं ददुः । किं तदित्यपेक्षायामाह–अयमिति । अयं त्वदभिमतः पुत्ररूपोर्थः पुत्रपदार्थो वा । सर्वभूतहृत् ब्रह्मभावनया तथाभूतः । यद्वा–सर्वाणि भूतानि हरत्यात्मसात्करोतीति तथा सर्वरूपः 'स सर्वनामा स च सर्वरूपः' इत्युक्तेः । हरतिरत्र स्वीकारार्थः । यद्वा–सर्वेषां भूतानां हृत्, अन्तरात्मेत्यर्थः । यद्वा–ॐ तत्सदिति निर्देशात् तद् ब्रह्म स्वरूपमस्येति तन्मयो ब्रह्मरूपः शुकस्तस्य भावस्तत्ता तया ब्रह्मभावनयाऽयं सर्वभूतहृदित्युत्तरं वृक्षा ददुः । इदमत्राकूतम्–सृष्टिर्हि द्विविधा–स्थावरा जंगमा चेति । यथा स्थावरा वयम्–अयं मे पुत्रोहमस्य माता पितेति मोहशून्यास्तथा भवद्भिरपि भवितव्यमिति भावः । किञ्च–पुराणांगत्वादस्य तदीयमनुबंधचतुष्टयमत्राप्युन्नेयम् । तथाहि–"सर्ववेदेतिहासानां सारं सारं समुद्धृतम्" इति वचनात्, "इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत्" इत्युक्तेश्च जन्यजनकभावो बोध्यबोधकभावोऽङ्गाङ्गिभावो वा सम्बन्धः । परया भक्त्या ब्रह्मात्मैकत्वं विषयः । निःशेषानर्थनिवृत्त्या कैवल्याख्यं प्रयोजनम् । तज्जिज्ञासुरधिकारीत्यलं विस्तरेण ॥ १ ॥ "कः प्रष्टा कोत्र वक्ता च संवादः कुत्र चैतयोः । एतदुक्तं कथाख्यानं रचयत्यादरान्मुनिः ॥" इति भूमिकां निर्माय सूतशौनकसंवादं प्रकटयति–नैमिष इति । नैमिषे क्षेत्रे आसीनमासनोपर्यधिष्ठितं सूतं ज्ञात्वा, महामतिं महती मतिर्मनीषा यस्य स तथा तम्; अगाधबुद्धिमित्यर्थः । अभिवाद्य प्रणम्य कथास्वमृतमतिमधुरं तदेव रसस्तस्यास्वादोऽवलेहनं

शौनक उवाच—अज्ञानध्वांतविध्वंसकोटिसूर्यसमप्रभ ॥ सूताऽऽख्याहि कथासारं मम कर्णरसायनम् ॥ ३ ॥
भक्तिज्ञानविरागाप्तविवेको वर्धते कथम् । मायामोहनिरासश्च वैष्णवैः क्रियते कथम् ॥ ४ ॥
इह घोरे कलौ प्राप्ते जीवश्चासुरतां गतः । क्लेशाक्रान्तस्य तस्यैव शोधने किं परायणम् ॥ ५ ॥
श्रेयसां यद्भवेच्छ्रेयः पावनानां च पावनम् । कृष्णप्राप्तिकरं शश्वत्साधनं तद्वदाधुना ॥ ६ ॥
चिंतामणिर्लोकसुखं सुरेन्द्रः स्वर्गसंपदम् । प्रयच्छति गुरुः प्रीतो वैकुण्ठं योगिदुर्लभम् ॥ ७ ॥
सूत उवाच—प्रीतिः शौनक चित्ते ते यतो वच्मि विचार्य च । सर्वसिद्धान्तनिष्पन्नं संसारभयनाशनम् ॥ ८ ॥
भक्त्योघवर्धनं यच्च कृष्णसंतोषहेतुकम् । तदहं तेऽभिधास्यामि सावधानतया शृणु ॥ ९ ॥

तस्मिन् कुशलो निपुणः स तथा । कथैवामृतरसमिति वा । शौनकः शुनकस्यापत्यमब्रवीत् पृष्टवान् । एतेन सूतस्य वक्तृत्वं शौनकस्य च प्रष्टृत्वं सूचितं भवति ॥ २ ॥ शौनक उवाचेति न पुनरुक्तिदोषः, किन्तु पुराणशैलीयमिति विष्णुसहस्रनामभाष्यविवरणे आनन्दगिरिणापि निरूपितमस्ति । प्रश्नमाह–अज्ञानेति । हे सूत, अज्ञानमेव ध्वान्तं गाढान्धकारस्तस्य विध्वंसो नाशस्तदर्थं सूर्याणां कोटिरिति कोटिसूर्या तया समा तुल्या प्रभा दीप्तिर्यस्य स तथा तत्संबुद्धिरिति साम्प्रदायिकाः । नव्यास्तु–कोटिश्च सूर्याश्चेति कोटिसूर्यास्तैः समा समाना प्रभा कान्तिर्यस्य स तथा तत्सम्बोधनमिति व्याचख्युः । व्याख्यानद्वयमप्यसाधु, असंभवदोषात् । "संतापनं कोटिधनुर्धराणाम्" इत्यादौ संख्यावाचककोटिशब्दस्य पूर्वं पाठः । "द्राक् पूजितो ब्राह्मणकोटिगण्यः" इत्यत्राग्रगण्य इत्यर्थादुत्तरपदे कोटिशब्दोऽग्रभागवाचीति वेदार्णवे सनत्कुमारोक्तिस्ततः प्रमाद एवायमिति 'सूर्यकोटिसमप्रभ' इति पाठः साधुः । "आदित्यो वै यूपः" इतिवदर्थवादमात्रमेतदिति केचित् । गुरवस्तु–सूर्यस्य सूर्यकान्तमणेः कोटिरग्रभाग इति कोटिसूर्यस्तेन समा सदृशी प्रभा दीप्तिर्यस्य स तथा तत्संबोधनमित्याहुः । कथासारं त्वमाख्याहि कथय । "कथा बहुविधा लोके तासु सारो निगद्यताम्" इत्युक्तेः । मम कर्णयो रसायनं प्रियम् । 'यन्नः' इति पाठे नोऽस्माकं श्रोतृबाहुल्याभिप्रायेण बहुवचननिर्देशः । यद्यपि 'नृत्ये गीतं रसायनम्' इति कामशास्त्रे, तथापि तस्य प्रमादहेतुत्वेनानर्थसूचकत्वान्नात्रोपयोगः । ऋषीणां नोऽस्माकं कर्णरसायनमिति विशेषणबलेन तन्निरासाच्च ॥ ३ ॥ किञ्च–पूर्वोत्तरविभागाभ्यां प्रश्नद्वयं पुनः करोति–भक्तीति । "भक्तिज्ञानविरागाणां प्रवाहो वर्द्धते कथम्" इति पाठे तु सुगमोऽर्थः । यथाश्रुतपाठे तु भक्तिज्ञानविरागाणाम् आप्तो यथार्थो विवेक इत्यर्थे स्वारस्यम् । "का भक्तिर्वास्तवी ज्ञानं वास्तवं किं विरागकम्" इति फलितार्थात् । कथं वर्द्धते, जायत इत्यर्थः । "भक्तिज्ञानविरागाणां बलं च वर्द्धते कथम्" इति पाठो गुरुसंप्रदायतः साधुरिति द्वितीयः प्रश्नः । वैष्णवैः "विष्ण्वर्पिताखिलाचारास्ते हि वै वैष्णवाः स्मृताः" इत्युक्तलक्षणैः मायया मोहोऽविवेकः तस्य निरासो निवृत्तिः कथं क्रियते । मायासु मोह इति केचित् । इति तृतीयः प्रश्नः ॥ ४ ॥ किञ्च–इहेति–इह भरतखण्डे, युगव्यवहारस्यात्रैव परिचारादिति हनमदुक्तिर्भीमसेनं प्रति वनपर्वणि । घोरे भयंकरे कलौ कलियुगे प्राप्ते सति । 'प्रायः' इति पाठे इहास्मिन् घोरे कलौ कलियुगे जीवो देही प्रायो बाहुल्येनासुरतामसुरभावं गतोऽस्ति । असुरभावेन च बहुतरपापकरणान्नानाक्लेशाः संभवन्तीत्यतः क्लेशैर्दुःखैराक्रान्तस्य व्याप्तस्य तस्यैव जीवात्मनः शोधने परायणं साधनं किमिति चतुर्थः प्रश्नः ॥ ५ ॥ पुनरप्याह–श्रेयसामिति । श्रेयसां कल्याणानां मध्ये परं यत् श्रेयो भवेत् निर्धारणात् परत्वलाभः । पावनानां पवित्रं कुर्वतां शुद्धिहेतूनां मध्ये परमं पावनं भवेत्, यच्च कृष्णस्य प्राप्तिकरं भवेत्, तत्साधनं शश्वत् नैरन्तर्येणाधुनेदानीं त्वं वदेति सप्तमः प्रश्नः ॥ ६ ॥ "नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः" इति वचनात् तूष्णींभूते स्वसरलताप्रदर्शनपूर्वकं गुरुभावमाविष्कुर्वंस्तदुत्तरसामर्थ्यं सूचयति–चिन्तामणिरिति । "यस्य कान्तिलवस्पृष्टं कांस्यं ताम्रमयस्त्रपु । पाषाणादिकमन्यद्वा सर्वं भवति कांचनम् । चिन्तामणिः स विज्ञेयो मुनिभिः सिद्धिसाधनः ॥" इति ब्रह्मोत्तरखण्डे चिन्तामणिप्रभाव उक्तः । भाषायाम् 'पारस' इति । लोकस्य जनस्य सुखं लोके वा सुखं सम्पदादि प्रयच्छति ददाति । प्रपूर्वस्य दाणधातोर्दानार्थत्वात् । सुराणामिन्द्रः सुरेन्द्रः प्रीतः स्वर्गसम्पदं ददाति । गुरुः प्रीतः सन् ज्ञानोपदेशात् योगिभिरपि दुर्लभं दुष्प्रापं वैकुण्ठं निश्चलं सनातनं स्थानं ददाति । "आभूतसंप्लवं स्थानममृतं तं सनातनम्" इत्युक्तेः ॥ ७ ॥ अथ साधुभावनया पृष्टः सूत एकेनैव वस्तुना सर्वप्रश्नोत्तरं दातुं प्रतिजानीते–प्रीतिरिति सार्धैस्त्रिभिः । हे शौनक, ते तव चित्ते प्रीतिरस्त्यतोऽस्माद्धेतोर्विचार्य विचारं कृत्वा वच्मि अहं ब्रवीमि । च एवार्थे । सर्वेषु शास्त्रेषु ये सिद्धान्ताः, सर्वे च ते सिद्धान्ताश्चेति तथेत्येके । तेभ्यो निष्पन्नमुत्पन्नम् अर्थात् परमसिद्धान्तमिति प्रथमप्रश्नोत्तरम् । तत्र हेतुः–संसारभयनाशनमिति । संसारे जगति यद्भयं शत्रुराजग्रहापद्वाविभिस्तस्य नाशनमिति सगुणोपासकाः । निर्गुणोपासकास्तु–संसरन्ति जीवोऽनेनेति संसारो मूलाज्ञानं तस्य नाशनमित्याहुरिति तृतीयप्रश्नोत्तरम् ॥ ८ ॥ किञ्च–भक्तेरोघः पूरः प्रवाह इति यावत् । तस्य वर्द्धनं वृद्धिकरम्, उपलक्षणमेतज्ज्ञानवैराग्ययोरपि । एतेन द्वितीयप्रश्नाय दत्तोंजलिः । यच्च कृष्णस्य संतोषः संतुष्टिः संप्रीतिस्तस्य हेतुकं हेतुः इति कृष्णप्राप्तिकरणसाधनोत्तरम् । चकारात् परं श्रेयः परं पावनमपीदमेवेति

कालव्यालमुखग्रासत्रासनिर्णाशहेतवे । श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितम् ॥ १० ॥
एतस्मादपरं किंचिन्मनःशुद्ध्यै न विद्यते । जन्मान्तरे भवेत्पुण्यं तदा भागवतं लभेत् ॥ ११ ॥
परीक्षिते कथां वक्तुं सभायां संस्थिते शुके । सुधाकुम्भं गृहीत्वैव देवास्तत्र समागमन् ॥ १२ ॥
शुकं नत्वावदन्सर्वे स्वकार्यकुशलाः सुराः । कथासुधां प्रयच्छस्व गृहीत्वैव सुधामिमाम् ॥ १३ ॥
एवं विनिमये जाते सुधा राज्ञा प्रपीयताम् । प्रपास्यामो वयं सर्वे श्रीमद्भागवतामृतम् ॥ १४ ॥
क्व सुधा क्व कथा लोके क्व काचः क्व मणिर्महान् । ब्रह्मरातो विचार्येति तदा देवाञ्जहास ह ॥ १५ ॥
अभक्तांस्तांश्च विज्ञाय न ददौ स कथामृतम् । श्रीमद्भागवती वार्ता सुराणामपि दुर्लभा ॥ १६ ॥
राज्ञो मोक्षं तथा वीक्ष्य पुरा धातापि विस्मितः । सत्यलोके तुलां बद्ध्वाऽतोलयत्साधनान्यजः ॥ १७ ॥
लघून्यन्यानि जातानि गौरवेण इदं महत् । तदा ऋषिगणाः सर्वे विस्मयं परमं ययुः ॥ १८ ॥

ध्वनितम् । तत् ते तुभ्यमहमभिधास्यामि कथयिष्यामि । सावधानतया समाहितमनसा त्वं शृणु ॥ ९ ॥ किं तदित्यपेक्षायामाह—कालेति । श्रीमद्भागवतं शास्त्रं भवति कलौ अन्त्ययुगे नान्यदित्यर्थः । कृतादित्रिके ज्ञानवैराग्ययोः प्राबल्यात् । केनोक्तमिदं तत्राह—कीरेण शुकेन भाषितं कथितम् । किमर्थमित्यत आह—कालेति । काल एव व्यालः सर्पस्तस्य मुखे ग्रासो जगतो निगरणम् 'कालो जगद्भक्षकः' इत्युक्तेः । तस्मात्त्रास उद्वेगस्तस्य निर्णाशो निश्चयेन नाशः क्षयस्तस्य हेतवे तदर्थम् ॥ १० ॥ एतदेवोत्तमं सर्वत इत्याह—एतस्मादिति । एतस्माच्छ्रीमद्भागवताच्छास्त्रादपरमन्यत् किंचित् किमपि न विद्यते नास्ति, इदमेवेत्यर्थतः सिद्धम् । मनःशुद्ध्या इति—मनसः शुद्ध्यै शोधनाय । पूर्वपुण्यमंतरैतत्प्राप्तिर्नास्तीत्याह—जन्मांतर इति । यदा जन्मांतरे पुण्यं भवेत् । 'कृतम्' इति पाठः साधुः । तदा भागवतं लभेत् प्राप्नुयात् ॥ ११ ॥ उक्तार्थदृढीकरणायोत्तरप्रकरणारंभ इति भणति—परीक्षित इति । सभायां गंगातीरे ऋषीणां मुनीनां समाजे शुके संस्थिते उच्चासनोपरि निविष्टे सति । किमर्थम्—परीक्षिते परीक्षिदर्थं कथां वक्तुम् । सुधाया अमृतस्य कुंभं कलशं गृहीत्वा तत्र स्थाने देवाः समागमन् समायाता अभूवन् ॥ १२ ॥ लाभार्थं व्यवह्रियते' इति नीत्या स्वाभिप्रायं कथयंतीत्याह—शुकमिति । शुकं शुकदेवं नामैकदेशे नाममात्रस्य ग्रहणात्, नत्वा नमस्कृत्य स्वकार्ये कुशला निपुणाः सर्वेः समस्ताः सुरा देवा अवदन् अब्रुवन् । किमवदन्नित्यत आह—कथासुधामिति । सुधाममृतम्, इमां कलशे स्थितां गृहीत्वात्मसात्कृत्वा । एवकारेण निश्चयार्थेन कूटव्यवहारनिषेधः सूच्यते । कथासुधां कथैवामृतं प्रयच्छस्व देहि, अस्मभ्यमिति शेषः ॥ १३ ॥ सुधया किं भविष्यतीत्यत आह—एवमिति । राज्ञा द्विजकोपप्रयुक्ततक्षकमृत्युभीतेन परीक्षिता सुधाऽमृतं प्रपीयताम् । एतेन विषनिवृत्त्या जीवनलाभः सूचितः । श्रीमद्भागवतामृतं सर्वे वयं प्रपास्याम इति । एवममुना प्रकारेण स्ववस्तुदानेन परवस्त्वादानं विनिमयः । 'विनियमे' इति पाठो भ्रांत्या लेखकप्रमादाद्बोध्यस्तदर्थस्य भिन्नत्वात् । तस्मिञ्जाते सिद्धे सति ॥ १४ ॥ "धूर्त्ता इमे छलयितुमामायातास्तु कैतवात् । साधुवेषं समाश्रित्य बालवित्तहरा इव ॥ न सुज्ञः स्वधनं दत्ते निवर्त्स्यन्ति हतोद्यमाः ।" इति वचनान्महदंतरं विनिमये वस्तुनोर्बुद्ध्वाऽवहसतीत्याह—क्वेति । काचः क्व मणिः क्व, लोके द्वौ क्वशब्दौ महदंतरं सूचयतः । एतयोर्बह्वंतरं यथा लोके भवति तथैव सुधा क्व कथा क्वेति । सुधापायिनां देवानां पुण्यक्षये मर्त्यलोकागमनजन्ममरणादि भवति, हरिकथामृतपायिनां तु मोक्षानंदप्राप्त्या तदभाव इति महदंतरं विचार्य ब्रह्मरातः ब्रह्मणा दत्तः शुको देवान्प्रतारिणो जहास । तदा तस्मिन्समये । हेति स्फुटम् ॥ १५ ॥ किमुपहासेनेति देवानां धाष्ट्र्यं वीक्ष्य स्वार्थभ्रंशमाह—न केवलहास्यमात्रं प्रत्युत कार्यभ्रंशोपि जात इत्याह—अभक्तानिति । अभक्तान् तांश्च देवान् भक्तिहीनान् सुधापानाऽप्सरःसंभोगादिनोन्मत्तत्वेन हरेर्विस्मृतत्वात्, विज्ञाय ज्ञात्वा स शुकः कथामृतं देवेभ्यो न ददौ । अत इति ज्ञायते—श्रीमद्भागवती वार्त्ता देवानामपि दुर्लभा दुष्प्रापा, किमु मर्त्यानामिति कैमुतिकन्यायसिद्धम् ॥ १६ ॥ न त्वेतावन्मात्रेऽलम्बुद्धिः करणीया परमपदप्राप्तिहेतुरपीयमित्याह—राज्ञ इति । "विद्युच्चौराग्निशस्त्राहिगजसिंहादिभिर्त्तितः । विषादिभिर्हेतुभूतैर्मृतो न लभते गतिम् ॥" इति स्मृतेः । सर्पदंशेन मृतस्य परीक्षितो गतिरेव दुर्लभा किमुतेंद्रादिपदं कुतस्तरां ब्रह्मलोकः कुतस्तमां वैकुंठप्राप्तिर्मुक्तिश्च । अपीत्यत्यंतासंभावनायाम् । राज्ञो मोक्षं तथा श्रीमद्भागवतश्रवणेन वीक्ष्य दृष्ट्वा धाता ब्रह्मा विस्मितः कथमिदं वैपरीत्यं जातमिति व्यग्रोऽभूत् । ततः किं कृतवानित्यत आह—सत्यलोक इति । अजो ब्रह्मा सत्यलोके तुलां घटं बद्ध्वा साधनानि मोक्षोपयोगीनि षट् शास्त्राणि सांगान्येकत्र भागे न्यस्य श्रीमद्भागवतं चान्यत्र अतोलयत् ॥ १७ ॥ कथमयं विभागो ज्ञात इत्यत आह—लघूनीति । अन्यानि सर्वाणि लघूनि न्यूनानि जातानि, गौरवेण हेतुनेदं भागवतं महज्जातं तेन महापुराणमिदमिति प्रसिद्धम् । तदा तस्मिन् काले सर्वे

मेनिरे भगवद्रूपं शास्त्रं भागवतं क्षितौ। पठनाच्छ्रवणात्सद्यो वैकुण्ठफलदायकम् ॥ १९ ॥
सप्ताहश्रवणेनैव सर्वथा मुक्तिदायकम्। सनकाद्यैः पुरा प्रोक्तं नारदाय दयापरैः ॥ २० ॥
यद्यपि ब्रह्मसंबन्धाच्छ्रुतमेतत्सुरर्षिणा। सप्ताहश्रवणविधिः कुमारैस्तस्य भाषितः ॥ २१ ॥
शौनक उवाच—लोकविग्रहयुक्तस्य नारदस्यास्थिरस्य च। विधिश्रवे कुतः प्रीतिः संयोगः कुत्र तैः सह ॥ २२ ॥
सूत उवाच—अत्र ते कीर्तयिष्यामि भक्तिपुष्टं कथानकम्। शुकेन मम यत्प्रोक्तं रहःशिष्यं विचार्य च ॥ २३ ॥
एकदा तु विशालायां चत्वारो ऋषयोऽमलाः। सत्संगार्थं समायाता ददृशुस्तत्र नारदम् ॥ २४॥
कुमारा ऊचुः[1]—कथं ब्रह्मन्दीनमुखः कुतश्चिंतापरो भवान्। त्वरितं गम्यते कुत्र कुतश्चागमनं तव ॥ २५ ॥
इदानीं शून्यचित्तोऽसि गतवित्तो यथा जनः। तवेदं मुक्तसंगस्य नोचितं वद कारणम् ॥ २६ ॥
नारद उवाच—अहं तु पृथिवीं यातो ज्ञात्वा सर्वोत्तमामिति। पुष्करं च प्रयागं च काशीं गोदावरीं तथा ॥ २७ ॥

ऋषिगणाः परमं विस्मयं ययुः प्रापुः ॥ १८ ॥ ततः किं, तत्राह—मेनिर इति। भागवतं शास्त्रं क्षितौ पृथिव्यां भगवतो विष्णो रूपं मूर्तिं मेनिरे। तदुक्तं पुराणांतरे। तथाहि—

"पादौ तु प्रथमस्कंधो द्वितीयो जानुनी स्मृतः। तृतीयः सक्थिनी ज्ञेयश्चतुर्थः कटिरुच्यते ॥ १ ॥
नाभिं तु पंचमं विद्याद्धृदयं षष्ठ ईरितः। सप्तमस्तु उरः प्रोक्तमष्टमः कंठ उच्यते ॥ २ ॥
स्कन्धौ तु नवमः स्कंधो दशमो मुखमीरितम्। कर्णाक्षिनासिकायुक्तं सर्वार्थपरिपूरितम् ॥ ३ ॥
एकादशस्तूत्तमांगं द्वादशो ब्रह्मरंध्रकम् ॥ एवं भागवतं शास्त्रं विष्णुमूर्तिः प्रकीर्त्तितम् ॥ ४ ॥

इति। पाद्मे तु किंचिद्वैलक्षण्येनोक्तमिति तत्फलमाह—पठनादिति। पठनाच्छ्रवणाच्च सद्यस्तत्काले वैकुंठफलदायकं भवति ॥ १९ ॥ तत्रापि विशेषमाह—सप्ताहेति। सप्ताहे सप्तदिने श्रवणेन सर्वथा सर्वप्रकारेणापि वा मुक्तिदायकं दयापरैः कृपालुभिः सनकाद्यैर्ब्रह्मपुत्रैर्नारदाय प्रोक्तं, भागवतम् इति शेषः ॥ २० ॥ ततः पूर्वं नारदेनेदं पुराणं न श्रुतमिति चेन्नेत्याह—यद्यपीति ब्रह्मणः पितुः संबंधाद्यद्यपि एतत् पुराणं सुरर्षिणा नारदेन श्रुतं तथापि सप्ताहे सप्तदिने श्रवणस्य विधिर्विधानं तस्य तस्मै नारदाय कुमारैः सनकाद्यैर्भाषितः कथितः ॥ २१ ॥ उक्तसंबंधं दुर्घटं मत्वा शौनकः पृच्छति—शौनक उवाचेति। कथमुक्तः संबंधो दुर्घट इति जिज्ञासायामाह—लोकेति। लोकानां जनानां विग्रहो विरोधस्तस्मिन् युक्तो दैवेन नियुक्तस्तस्याऽत एवाऽस्थिरस्य एकत्र स्थातुमशक्तस्य नित्यं भ्रममाणस्य नारदस्य विधिश्रवे विधिः विधितः श्रवः श्रवणम् तस्मिन्। (अकारांतः श्रवशब्दोत्र छांदस इत्येके)। प्रीतिः प्रेम कुतः कस्माद्धेतोर्जाता। कुत्र स्थाने तैः कुमारैः सह संयोगः जात इति शेषः ॥ २२ ॥ तत्संवादमवतारयितुं सूत उवाचेति सूतोक्तिः। तथाहि—अत्रेति। अत्रास्मिन्संवादे शुकेन मम मह्यं यत् प्रोक्तं रहः एकांते शिष्यं शुश्रूषां करोतीति शिष्योयमिति विचार्य विचारं कृत्वाऽऽलोच्य वा। तत्ते तुभ्यं कीर्त्तयिष्यामि कथयिष्यामि। किं तत्तत्राह—कथानकम् आख्यानम्। कीदृशम्—भक्तिपुष्टं भक्तेः पुष्टं, पोषणहेतुरिति पुष्टं तत् ॥ २३ ॥ एतदेव विशदीकरोतीत्याह—एकदेति। एकदा एकस्मिन् काले विशालायां पुर्याम्। सामीप्यार्थे सप्तमीयम्। तेन विशालासमीपे बदर्याश्रमे इत्यर्थो बोध्योऽन्यथा पुर्यां जनसमुदायकोलाहलत्वेन सत्संगो दुर्घटः। वेदसंमितत्वादस्य पुराणस्य फलातिशयार्थमेतत्पाठस्य साधुत्वमिति संदर्भः। अमलाः शुद्धाः, वीतरागत्वात्। सत्संगार्थं समायातास्तत्रैवाश्रमे नारदं ददृशुः। तुशब्दोऽजितेंद्रियदुर्जनव्यावृत्त्यर्थः ॥ २४ ॥ औदासीन्येन शंकिताः पप्रच्छुः। कुमारा ऊचुरिति स्पष्टार्थः। किमित्यपेक्षायामाह—कथमिति द्वाभ्याम्। हे ब्रह्मन कथं केन प्रकारेण भवान् दीनमुखो मलिनास्यः, अस्तीति शेषः। क्रियान्तराऽभावे प्रथमपुरुषपरावस्तिभवती अध्याह्रियेते, न हि क्रियाविनिर्मुक्तं वाक्यमस्तीति शिष्टोक्तेः। कुतः कस्मात्कारणात्। चिंतातुरः चिंतयाऽऽतुरो दुःखी। कुतः स्थानात्तवाऽऽगमनम्, जातमिति शेषः। त्वरितं शीघ्रं कुत्र स्थाने त्वया गम्यते ॥ २५ ॥ इदानीमिति पूर्वान्वयि पदम्। किञ्च—शून्यचित्तः शून्यं कर्त्तव्यहीनं चित्तं यस्य स तथा। तत्र दृष्टांतः—गतवित्तो गतं वित्तं धनं यस्य स तथा। 'धनहीनः श्वसन्मृतः' इत्युक्तेः। जनः पुंविशेषो यथा शून्यचित्तस्तद्वदिदं पूर्वोक्तं मुखम्लान्यादि मुक्तसंगस्य मुक्तस्त्यक्तः संगो गृहजनधनादीनां येन स तथा तस्य तव नोचितं न योग्यमस्ति। कारणमनुचितस्योत्पत्तौ हेतुं वद ब्रूहि ॥ २६ ॥ इति पृष्टे उत्तरं ददातीत्यार्थिकसंगत्या लभ्यते।

---

१. "कुमारा ऊचुरित्यत्र व्यवस्था प्रोच्यते बुधैः। एकदा भाषणं युक्तं सर्वेषां नेति संशयात् ॥
एकैकस्य द्विरुक्तिर्हि क्रमेण परिकल्प्यते। समूहवचनस्यायं गूढोऽभिप्राय ईरितः ॥"
इति गुरुसंप्रदायात् कुमारा ऊचुरिति। अन्यथा वेदस्मृत्यागमे 'अपि चक्रुः प्रवचनमेकं शुश्रूषवो परे' इतिवद्वचनमुपलभ्येत।

हरिक्षेत्रं कुरुक्षेत्रं श्रीरंगं सेतुबन्धनम् । एवमादिषु तीर्थेषु भ्रममाण इतस्ततः ॥ २८ ॥
नापश्यं कुत्रचिच्छर्म मनःसंतोषकारकम् । कलिनाऽधर्ममित्रेण धरेयं बाधिताऽधुना ॥ २९ ॥
सत्यं नास्ति तपः शौचं दया दानं न विद्यते । उदरंभरिणो जीवा वराकाः कूटभाषिणः ॥ ३० ॥
मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः । पाखण्डनिरताः सन्तो विरक्ताः सपरिग्रहाः ॥ ३१ ॥
तरुणीप्रभुता गेहे श्यालको बुद्धिदायकः । कन्याया विक्रयो लोभाद्दंपतीनां च कल्कनम् ॥ ३२ ॥
आश्रमा यवनै रुद्धास्तीर्थानि सरितस्तथा । देवतायतनान्यत्र दुष्टैर्नष्टानि भूरिशः ॥ ३३ ॥
न योगी नैव सिद्धो वा न ज्ञानी सत्क्रियो नरः । कलिदावानलेनाद्य साधनं भस्मतां गतम् ॥३४॥
अट्टशूला जनपदाः शिवशूला द्विजातयः । कामिन्यः केशशूलिन्यः संभवंति कलाविह ॥ ३५ ॥
एवं पश्यन्कलेर्दोषान्पर्यटन्नवनीमहम् । यामुनं तटमापन्नो यत्र लीला हरेरभूत् ॥ ३६ ॥
तत्राश्चर्यं मया दृष्टं श्रूयतां तन्मुनीश्वराः । एका तु तरुणी तत्र निषण्णा खिन्नमानसा ॥ ३७ ॥
द्वौ वृद्धौ पतितौ पार्श्वे निःश्वसन्तावचेतनौ । शुश्रूषन्ती प्रबोधन्ती रुदन्ती च तयोः पुरः ॥ ३८ ॥

एवमुत्तरत्रापीदं यथायथं योज्यम् । तेन नारद उवाचेत्युपन्यस्तं भगवता व्यासेन । स्ववृत्तांतमुपोद्घातत्वेन नारदो वर्णयति—अहमित्यारभ्य "तपश्चरामि चात्रेति तदर्थं कृतनिश्चयः" इत्यन्तग्रंथेन ॥ २७ ॥ किमित्यत आह—एवमिति । इत्यादिषु तीर्थेषु । इतस्ततो यत्र तत्र भ्रममाणो भ्रमन् ॥ २८ ॥ मनःसंतोषकारकं मनसः संतोषः संतुष्टिस्तस्य कारकं कर्तृ शर्म सुखं कुत्रचित्क्वापि नापश्यमहं न दृष्टवान् । तत्र कारणमाह—कलिनेति । अधर्ममित्रेण अधर्मः पापं मित्रं यस्य स तथा तेन कलिना कलियुगेन इयं धरा कर्मभूर्बाधिता धर्मकार्याद्युच्छेदेन हिंसिता ॥ २९ ॥ तत्प्रकारं दर्शयति—सत्यमित्यादिभिः षड्भिः । सत्यं नास्ति । तपआदिषु इयमेव क्रिया । तेन तपो नास्ति, शौचं नास्तीत्यर्थः । दानं न विद्यते । जीवाः प्राणिनः उदरंभरिण उदरं भर्तुं शीलं येषां ते तथा, उदरभरणतत्परा इत्यर्थः । वराका अतितुच्छा अत एव कूटभाषिणो मिथ्यावादिनः ॥ ३० ॥ मंदा बुद्धिहीना मूर्खाः । सुमंदमतयः सुमंदा शतकृत्वः पाठनेऽपि श्लोकपादावधारणाऽसमर्था मतिर्येषां ते तथा, पाठकानुकूल्येऽप्यालस्यादिना तत्समीपे वासाभावात् कुवासनया तदुक्तानवधारणाच्च । मंदभाग्या राजाद्याश्रयत्वेऽपि निर्द्धना वृथोद्यमत्वात्, कृतोद्यमस्य वैफल्याच्च । उपद्रुताः जातेऽपि गुर्वादिसंबंधे विघ्नरोगादिग्रस्ताः । हि निश्चयेन । संतः सज्जनाः पाखंडनिरताः वेदबाह्यकर्मरक्ताः । विरक्ताः संन्यासिनः सपरिग्रहाः स्त्रीधनादिसंग्रहकारिणः ॥ ३१ ॥ गेहे तरुणीप्रभुता स्त्रीप्राधान्यम् । श्यालको भार्याभ्राता बुद्धिदायको मंत्री । लोभात् कन्याया विक्रयः धनेन सुताविक्रयणं, दानमित्यर्थः । दंपतीनां स्त्रीपुरुषाणां कल्कनं कलहः । च एवार्थे, पुनरर्थे वा ॥ ३२ ॥ आश्रमा ब्रह्मचर्यादिस्थानानि यवनैर्म्लेच्छै रुद्धा व्याप्ताः । अत्र भरतखंडे देवतायतनानि देवतानां श्रीरामकृष्णादीनामायतनानि स्थानानि मंदिराणि भूरिशो दुष्टैर्धर्मनाशकैर्विवर्णैर्नीचैर्नष्टानि स्पर्शस्नानादिभिर्मूर्तीनां, भ्रष्टानि—कृतानीति शेषः ॥ ३३ ॥ न योगी योगसाधकः न नास्ति । सर्वत्रास्तिक्रियान्वयः कर्त्तव्यः । सिद्धो रसायनपुत्रादिदाता न । ज्ञानी वेदोपनिषज्ज्ञानवान् न । सत्क्रियः सती श्रेष्ठा भक्तिप्रीतिसंपन्ना क्रिया पूजादिरूपा यस्य स तथा एवंभूतो नरो न । तत्र हेतुमाह–कलीति । कलिदावानलेन कलिः कलियुगः स एव दावानलोऽग्निस्तेनाद्य इदानीं साधनं भस्मीभूतम् । एतेनेदानीं लोके योग्यादयः सर्वे दंभिनो लोकवंचका एवेति फलितोऽर्थः ॥ ३४ ॥ जनपदा देशा अट्टशूला अन्नविक्रयिणः । द्विजातयो ब्राह्मणाः शिवशूला वेदविक्रयिणः । कामिन्यः स्त्रियः केशशूलिन्यो भगविक्रयिण्यः । इह लोके कलौ कलियुगे संभवंति । तदुक्तम्–"अट्टमन्नमिति प्रोक्तं शिवो वेदः प्रकीर्तितः । केशो भग इति ज्ञेयः शूलो विक्रय उच्यते ॥" इति ॥ ३५ ॥ ततः परं किं जातमित्यत आह–एवमिति । एवममुना प्रकारेण कलेर्दोषान् पश्यन्नीक्षमाण इमां महीं भूमिं पर्यटन् परिभ्रमन्सन् अहं नारदः यामुनं यमुनाया इदं तथा तटं तीरम् आपन्नोऽस्मि । यत्र यमुनातीरे हरेः श्रीकृष्णस्य लीला गोपीभिः सह रासमंडले क्रीडाकौतुकमभूत् ॥ ३६ ॥ तत्र कौतूहलं दृष्टमित्याह–तत्रेति त्रिभिः । तत्र तस्मिन् स्थाने आश्चर्यमद्भुतं मया दृष्टं, हे मुनीश्वराः तत् श्रूयताम्, भवद्भिरिति कर्तृशेषः । तथाहि–एका तरुणी युवतिस्तत्र तटे निषण्णा निविष्टा खिन्नमानसा खिन्नमुद्विग्नं मानसं मनो यस्याः सा तथा । तुना वैलक्षण्यार्थेनान्यासां तत्सहचरीणां स्वास्थ्यं सूच्यते ॥ ३७ ॥ पार्श्वे तस्या वामभागे द्वौ वृद्धौ जराग्रस्तौ पतितौ निःश्वसंतौ निश्वासं मुंचंतौ अचेतनौ जडप्रायौ चेष्टारहितत्वात् । चात्सा स्त्री चकारस्योक्तसमुच्चयार्थत्वात्, तयोर्वृद्धयोः पुरोऽग्रे रुदती रोदनं कुर्वती शुश्रूषंती सेवामाचरंती

दशदिक्षु निरीक्षन्ती रक्षितारं निजं वपुः । वीज्यमाना शतस्त्रीभिर्बोध्यमाना मुहुर्मुहुः ॥ ३९ ॥
दृष्ट्वा दूरादतः सोऽहं कौतुकेन तदन्तिकम् । मां दृष्ट्वा चोत्थिता बाला विह्वला चाब्रवीद्वचः ॥ ४० ॥
बालोवाच—भो भो साधो क्षणं तिष्ठ मच्चिन्तामपि नाशय । दर्शनं तव लोकस्य सर्वथाऽघहरं परम् ॥ ४१ ॥
बहुधा तव वाक्येन दुःखशान्तिर्भविष्यति । यदा भाग्यं भवेद् भूरि भवतो दर्शनं तदा ॥ ४२ ॥
नारद उवाच—काऽसि त्वं काविमौ चेमा नार्यः काः पद्मलोचनाः । वद देवि सविस्तारं स्वस्य दुःखस्य कारणम् ॥४३॥
बालोवाच—अहं भक्तिरिति ख्याता इमौ मे तनयौ मतौ । ज्ञानवैराग्यनामानौ कालयोगेन जर्जरौ ॥ ४४ ॥
गंगाद्याः सरितश्चेमा मत्सेवार्थं समागताः । तथापि न च मे श्रेयः सेवितायाः सुरैरपि ॥ ४५ ॥
इदानीं शृणु मद्वार्तां सचिन्तस्त्वं तपोधन । वार्ता मे विततास्त्यस्ति तां श्रुत्वा सुखमावह ॥ ४६ ॥
उत्पन्ना द्रविडे साऽहं वृद्धिं कर्णाटके गता । क्वचित्क्वचिन्महाराष्ट्रे गुर्जरे जीर्णतां गता ॥ ४७ ॥
तत्र घोरकलेर्योगात्पाखण्डैः खंडितांगका । दुर्बलाऽहं चिरं जाता पुत्राभ्यां सह मन्दताम् ॥४८॥
वृंदावनं पुनः प्राप्य नवीनेव सुरूपिणी । जाताहं युवती सम्यक्प्रेष्ठरूपा तु सांप्रतम् ॥ ४९ ॥
इमौ तु शयितावत्र सुतौ मे क्लिश्यतः श्रमात् । इदं स्थानं परित्यज्य विदेशं गम्यते मया ॥ ५० ॥

प्रबोधंती उद्बोधनं कुर्वती ॥ ३८ ॥ निजं वपुः रक्षितारम् । शीले तृन् । दशदिक्षु सर्वासु दिशासु निरीक्षन्ती निरीक्षणमाणा । अनुदात्तेत्त्वलक्षणस्यात्मनेपदस्याऽनित्यत्वात् । शतस्त्रीभिरत्र शतशब्दोऽनंतवाची, तेनासंख्यातनारीभिः सेव्यमानोपास्यमाना मुहुर्मुहुर्वारं वारं बोध्यमाना धैर्यं कुरु सर्वं शुभं भविष्यति हरिकृपयेत्याश्वास्यमाना ॥ ३९ ॥ ततस्तत्समीपं गतवानित्याह दृष्ट्वेति । एकामित्यादिविशेष्यविशेषणवाचकानि पदानि, दृष्ट्वेतिपदसांनिध्यादिति संदर्भः । तामित्यध्याहार इति केचित् । तथा च-तद्दृष्ट्वा दूरात् वीक्ष्य सोऽहं प्रसिद्धो नारदः कौतुकेन कुतूहलेन तदंतिकं तन्निकटं गतः । मां दृष्ट्वा । चोऽप्यर्थे, मामपि वीक्ष्य बाला षोडशवार्षिकी स्त्री विह्वला व्याकुला सत्यंतस्तापात्, चान्माम्, उक्तपरामर्शार्थत्वात्, वचो वचनमब्रवीदत् ॥ ४० ॥ बालोवाचेति स्पष्टम् । स्वसुखार्थं प्रार्थयति-भो भो साधो इति । हे साधो क्षणं क्षणमात्रं तिष्ठ त्वं स्थितिं कुरु, मच्चिंतां मम शोकं संतापमपि निश्चयेन नाशय दूरीकुरु । तव साधोर्दर्शनं सर्वथा सर्वप्रकारेण लोकस्य जनस्याघहरं पापनाशनमत एव परमुत्कृष्टम् ॥ ४१ ॥ असकृन्मां बोधयेत्याह-बहुधेति । बहुधा बहुभिः प्रकारैः तव वाक्येन दुःखशांतिर्दुःखनाशो भविष्यति । यदा भूरि भाग्यं महद्भाग्यं स्यात्तदा भवतो दर्शनं भवेत् ॥ ४२ ॥ काऽसि त्वमिति प्रश्नचतुष्टयं करोति नारदः-त्वं काऽसि । इमौ च कौ । पुनः पद्मलोचनाः कमलनेत्रा इमा नार्यः काः । हे देवि, सविस्तारं विस्तारेण सहितं स्वस्य दुःखस्य कारणं त्वं वद ॥ ४३ ॥ बालाऽऽह-अहमिति । अहं भक्तिरिति ख्याता नामतः प्रसिद्धा माता चानयोरिति प्रथमप्रश्नोत्तरम् । कथमिदं ज्ञातम् । अग्रिमपदसांनिध्यात् । तथाहि—इमौ पार्श्वस्थौ पुरुषौ मे मम तनयौ पुत्रौ मतौ । ज्ञानवैराग्यनामानौ ज्ञानं च वैराग्यं चेति तथा ते नामनी ययोस्तौ । तथा कालयोगेन कालस्य संवत्सरादिरूपेण परिभ्रममाणस्य संयोगेन जर्जरौ जीर्णाविति द्वितीयप्रश्नोत्तरम् ॥ ४४ ॥ इमा नार्यो गंगाद्याः सरितो नद्यः संतीति तृतीयप्रश्नोत्तरम् । एतासामागमनं कथमत्र संभूतं तत्राह—मत्सेवार्थं समागताः । स्पष्टोऽर्थः । एतेन यमुनायाः प्राचीनत्वं गंगादिभिर्निरुक्तं, सुसेव्यत्वेन ताभिर्महत्त्वं चेति । तथा च सुरैर्देवैरपि सेविताया मे मम श्रेयः कल्याणं सुखं च नास्ति ॥ ४५ ॥ चतुर्थप्रश्नोत्तरमाह—इदानीमित्यष्टभिः । हे तपोधन सचिंतः चिंतया सहितो मद्वृत्तांते दत्तचित्त इत्यर्थः । इदानीमधुना मद्वार्तां त्वं शृणु । मे मम वार्ता वितता विख्याताऽस्ति तां वार्तां श्रुत्वा सुखमावह कुरु ॥ ४६ ॥ द्रविडे देशेऽहमुत्पन्ना जातास्मि । द्रविडो मे जन्मभूमिरिति भावार्थः । कर्णाटके देशे वृद्धिं गता प्राप्ता । महाराष्ट्रे देशे क्वचित्क्वचित्क्वापि क्वापि स्थाने । गुर्जरे देशे जीर्णतां गता ॥ ४७ ॥ तत्कारणमाह—तत्रेति । तत्र तस्मिन्देशे पाखंडैर्धर्मविरुद्धै-र्दंभाचरितैः खंडितांगका खंडितानि त्रोटितानि अंगानि प्रेमगीतनृत्यहरिदर्शनतुलस्यारोपणादीनि यस्याः सा तथा । कुत इत्यत आह—कलेर्योगादिति, स्पष्टम् । दुर्बला बलहीना चिरं बहुकालं पुत्राभ्यां ज्ञानवैराग्याभ्यां सह मंदतां परिचयाभावाल्लघुतां याता प्राप्ताऽस्मि ॥ ४८ ॥ पुनर्मम तारुण्यं जातमित्याह—वृंदावनमिति । वृंदावनं प्राप्य पुनरहं नवीना नूतना युवतिः स्त्रीव सुरूपिणी सुष्ठुरूपवती, सम्यक्प्रष्ठरूपा प्रकर्षेणेष्टमीप्सितं रूपं यस्याः सा तथा सांप्रतं जातास्मि । त्वाश्चर्ये ॥४९॥ तदाह-इमाविति । अत्रास्मिन् वृन्दावने इमौ अंगुलिनिर्दिष्टौ सुतौ मत्पुत्रौ शयितौ सुप्तौ श्रमात् खेदात् क्लिश्यतः दुःख्यतः । अन्यत्र गंतुकामाऽहमित्याह-इदमिति ।

१. नलंकेति पद्मीनिभेः । २. एकेत्यादिपद्यं ( ३५ ) द्वितीयान्तपाठाभप्रायेणेदमिति भाति । ३. बालापीत्यर्थायाऽप्यर्थकचकार-
स्यात्रैवान्वयः शोभनः ।

जरठत्वं समायातौ तेन दुःखेन दुःखिता । साहं तु तरुणी कस्मात्सुतौ वृद्धाविमौ कुतः ॥ ५१ ॥
त्रयाणां सहचारित्वाद्वैपरीत्यं कुतः स्थितम् । घटते जरठा माता तरुणौ तनयाविति ॥ ५२ ॥
अतः शोचामि चात्मानं विस्मयाविष्टमानसा । वद योगनिधे धीमन्कारणं चात्र किं भवेत् ॥ ५३ ॥
नारद उवाच—ज्ञानेनात्मनि पश्यामि सर्वमेतत्तवानघे । न विषादस्त्वया कार्यो हरिः शं ते करिष्यति ॥ ५४ ॥
सूत उवाच—क्षणमात्रेण तज्ज्ञात्वा वाक्यमूचे मुनीश्वरः ।
नारद उवाच—शृणुष्वावहिता बाले युगोऽयं दारुणः कलिः ॥ ५५ ॥
तेन लुप्तः सदाचारो योगमार्गस्तपांसि च । जना अघासुरायन्ते शाठ्यदुष्कर्मकारिणः ॥ ५६ ॥
इह सन्तो विषीदन्ति प्रहृष्यन्ति ह्यसाधवः । धत्ते धैर्यं तु यो धीमान्स धीरः पण्डितोऽथवा ॥ ५७ ॥
अस्पृश्यानवलोक्येयं शेषभारकरी धरा । वर्षे वर्षे क्रमाज्जाता मंगलं नापि दृश्यते ॥ ५८ ॥
न त्वामपि सुतैः साकं कोऽपि पश्यति सांप्रतम् । उपेक्षिताऽनुरागान्धैर्जर्जरत्वेन संस्थिता ॥ ५९ ॥
वृन्दावनस्य संयोगात्पुनस्त्वं तरुणी नवा । धन्यं वृन्दावनं तेन भक्तिर्नृत्यति यत्र च ॥ ६० ॥
अत्रेमौ ग्राहकाभावान्न जरामपि मुञ्चतः । किंचिदात्मसुखेनेह प्रसुप्तिर्मन्यतेऽनयोः ॥ ६१ ॥
श्रीभक्तिरुवाच—कथं परीक्षिता राज्ञा स्थापितो ह्यशुचिः कलिः । प्रवृत्ते तु कलौ सर्वसारः कुत्र गतो महान् ॥ ६२ ॥

इदं स्थानं वृंदावनं परित्यज्य त्यक्त्वा विदेशं मया गम्यते, सुखार्थमिति शेषः ॥ ५० ॥ किञ्च—जरठत्वं वृद्धत्वं समायातौ सुतौ मत्पुत्रौ, तेन दुःखेन जरठत्वरूपेण दुःखेन दुःखिता । सा वृद्धाऽहं तु अपि तरुणी युवतिः कस्माद्धेतोः, इमौ वृद्धौ कुतः कस्मात्कारणात् ॥ ५१ ॥ अतिचित्रमाह—त्रयाणामिति । त्रयाणां भक्तिज्ञानविरागाणामस्माकं सहचारित्वाद् अपृथक्त्वाद् वैपरीत्यं वैषम्यं कुतो हेतोः स्थितम्, उत्पन्नं जातमित्यर्थः । तदाह—माता जरठा वृद्धा घटते संभवति, तनयौ पुत्रौ तरुणौ युवानाविति घटते ॥ ५२ ॥ अतो वैपरीत्याद्धेतोः विस्मयाविष्टमानसा विस्मयेन वैपरीत्येनाविष्टं व्याप्तं मानसं मनो यस्याः सा तथा आत्मानं शोचामि । हे धीमन् हे योगनिधे अत्रैतद्वैषम्योद्भूतौ किं कारणं भवेदिति त्वं वद ब्रूहि ॥ ५३ ॥ कारुण्येन स्वसाधुतामाविष्कुर्वन्नारदो वक्ति—ज्ञानेनेति । हे अनघे, ते तव दुर्बलत्वजरठत्ववैपरीत्यदुःखाद्येतत्सर्वं ज्ञानेनात्मनि मनसि पश्यामि चिंतयामि, त्वया विषादः शोकेन संतापो न कार्यः न कर्तव्यः, हरिः पापदुःखादिहर्ता स्वनामसाफल्यार्थं ते तव शं सुखं विधास्यति 'विपूर्वो धा करोत्यर्थे' इत्युक्तत्वात् ॥ ५४ ॥ सूतः शौनकं प्रत्याह—क्षणेति । क्षणमात्रेण तज्ज्ञात्वा मुनीश्वरो नारदो वाक्यमूचे । नारद उवाचेति पौराणिकी शैली, एवमन्यत्राप्यूहनीयम् । हे बाले अवहिता सावधाना त्वं शृणु—अयं युगो दारुणः भयंकरः । अयं युगो दारुणः क इत्यतस्तन्नाम निर्वक्ति-कलिरिति ॥ ५५ ॥ तत्प्रभावं वर्णयति—तेनेति । तेन कलियुगेन सदाचारः सद्धर्मो लुप्तो नष्टः, योगमार्गो लुप्त उच्छिन्नः, तपांसि च लुप्तानि, जनाः पुरुषा अद्य सांप्रतं असुरायंते असुरा इवाचरंति । तत्र हेतुः—शाठ्यदुष्कर्मकारिणः शाठ्यं शठभावश्च दुष्कर्म च शाठ्यदुष्कर्मणी ते कर्तुं शीलमेषां ते तथा ॥ ५६ ॥ इह कलियुगे संतः साधवो विषीदंति विषादं प्राप्नुवंति, असाधवो दुर्जना दुष्टाः प्रहृष्यंति तुष्यंति । हि युक्तेर्थे । तु विरलत्वं सूचयति । धैर्यं यः पुमान् धत्ते धारयति स धीरोऽथवा पंडितोस्ति । 'कृती', इति पाठेपि स एव कुशल इति नार्थभेदः ॥ ५७ ॥ धरा भूमिः शेषभारकरी अनंतस्य भारवर्द्धिनी वर्षे वर्षे प्रतिवर्षं क्रमाज्जाता, मंगलमपि न दृश्यते, इयमस्पृश्या स्प्रष्टुमयोग्या, अनवलोक्या च, न दर्शनार्हेत्यर्थः ॥ ५८ ॥ किंच—सुतैः साकं पुत्राभ्यां सह, बहुवचनं छंदोनुरोधतः "अपि माषं मषं कुर्याच्छंदोभंगं गिरं त्यजेत्"इत्युक्तेः । त्वामपि सांप्रतं कोपि न पश्यति कचिदपि नेक्षते । अपिशब्दाभ्यां कर्तृकर्मणोः मंदता निरूपिता भवति, न तु स्वरूपहानिः । वस्तुतस्तु 'सुताभ्यां सह नापि त्वाम्' इति पाठः । अनुरागांधैर्विषयासक्तैर्जनैरुपेक्षिता त्यक्ताऽतो जर्जरत्वेन संस्थिता वृद्धतया संस्थिता ॥ ५९ ॥ पुनराविर्भावकारणमाह—वृंदावनस्येति । वृंदावनसंयोगात् पुनर्भूयः नवा नवीना तरुणी युवतिस्त्वमसि तेन हेतुना वृंदावनं धन्यं श्लाघ्यं भवति । तदुक्तम्—"स्वर्गपदादगुरु सत्यं सत्यादपि गुरुतरं तु वैकुंठम् । वैकुंठादपि गुरुतरमवनौ धन्यं वृंदावनं मन्ये ॥" इति । यत्र वृंदावने भक्तिर्नृत्यति । एतेन भक्तेरेव प्राधान्यमत्रोक्तम् ॥ ६० ॥ त्वत्पुत्रयोर्जर्जरत्वहेतुमाह—अत्रेति । अत्र वृंदावनेऽपि इमौ ज्ञानवैराग्यौ जरां न मुंचतः न त्यजतः । तत्र हेतुः ग्राहकाभावात् अपेक्षितुरनुपलंभात् । किंचिल्लवमात्रमात्मसुखेनानयोः प्रसुप्तिर्मन्यते विद्यते, धातूनामनेकार्थत्वात् । इह वृंदावने ॥ ६१ ॥ स्वदुःखकारणं श्रुत्वा श्रीभक्तिरुवाचेत्यनेन भक्तिस्तर्कयति—कथमिति । परीक्षिता राज्ञाऽशुचिः मलिनः कलिः कथं स्थापितः, मलिनत्वेन हंतुं योग्यस्य रक्षणे को हेतुरिति फलितोऽर्थ इति प्रथमः प्रश्नः । तु तर्कांतरे । प्रवृत्ते कलौ कलौ प्रवृत्ते सति महान्पूज्यः सर्वसारः सर्वेषां वस्तूनां सारः फलं ( कुत्रेत्याधारस्योत्तरत्रादर्शनान्महत्त्वार्थस्याप्यनुपलंभाच्च 'कथमहो गतः' इति वक्तुं युक्त इति संदर्भः । पंचम्यर्थे वार्षः पाठ इति केचित् । तेन कुतो गतो भवतीत्यर्थः )

करुणापरेण हरिणाप्यधर्मः कथमीक्ष्यते । इमं मे संशयं छिन्धि त्वद्वाचा सुखितास्म्यहम् ॥ ६३ ॥

नारद उवाच—यदि पृष्टस्त्वया बाले प्रेमतः श्रवणं कुरु । सर्वं वक्ष्यामि ते भद्रे कश्मलं ते गमिष्यति ॥ ६४ ॥

यदा मुकुन्दो भगवान्क्ष्मां त्यक्त्वा स्वपदं गतः । तद्दिनात्कलिरायातः सर्वसाधनबाधकः ॥ ६५ ॥

दृष्टो दिग्विजये राज्ञा दीनवच्छरणं गतः । न मया मारणीयोऽयं सारङ्ग इव सारभुक् ॥ ६६ ॥

यत्फलं नास्ति तपसा न योगेन समाधिना । तत्फलं लभते सम्यक्कलौ केशवकीर्तनात् ॥ ६७ ॥

एकाकारं कलिं दृष्ट्वा सारवत्सारनीरसम् । विष्णुरातः स्थापितवान्कलिजानां सुखाय च ॥ ६८ ॥

कुकर्माचरणात्सारः सर्वतो निर्गतोऽधुना । पदार्थाः संस्थिता भूमौ बीजहीनास्तुषा यथा ॥ ६९ ॥

विप्रैर्भागवती वार्ता गेहे गेहे जने जने । कारिता कणलोभेन कथासारस्ततो गतः ॥ ७० ॥

अत्युग्रभूरिकर्माणो नास्तिका रौरवा जनाः । तेपि तिष्ठन्ति तीर्थेषु तीर्थसारस्ततो गतः ॥ ७१ ॥

कामक्रोधमहालोभतृष्णाव्याकुलचेतसः । तेऽपि तिष्ठन्ति तपसि तपःसारस्ततो गतः ॥ ७२ ॥

मनसश्चाजयाल्लोभाद्दम्भात्पाखण्डसंश्रयात् । शास्त्रानभ्यसनाच्चैव ध्यानयोगफलं गतम् ॥ ७३ ॥

पण्डितास्तु कलत्रेण रमन्ते महिषा इव । पुत्रस्योत्पादने दक्षा अदक्षा मुक्तिसाधने ॥ ७४ ॥

कुत्र गतोऽभूदिति द्वितीयः प्रश्नः ॥ ६२ ॥ किंच—करुणापरेण दयापरायणेन हरिणाऽधर्मः पापी कलिः पापं वा कथमीक्ष्यते दृश्यत इति तृतीयः प्रश्नः । इमं प्रश्नत्रयरूपं मे मम संशयं संदेहं त्वं छिंधि । त्वद्वाचा तव वाण्याहं सुखितास्मि ॥ ६३ ॥ नारदोक्तिः—यदि प्रेमतः प्रेम्णा त्वयाऽहं पृष्टस्तर्हि श्रवणं कुरु तस्मिन् कृते तव कश्मलं मनोग्लानिः गमिष्यति नंक्ष्यति । हे बाले ते तुभ्यं सर्वं वक्ष्यामि निरूपयिष्यामि । हे भद्रे मंगलरूपिणि ॥ ६४ ॥ सविस्तरं सर्वप्रश्नोत्तरं वर्णयति—यदेति द्वादशभिः । यदा यस्मिन्काले मुकुंदो भगवान् धरां पृथ्वीं त्यक्त्वा स्वपदं स्वस्थानं परं पदमिति यावत् । गंतुं यातुमुद्यत उद्योगं कृतवान्, तदा तस्मिन काले तद्दिनात्कलिरायातः आयातोऽभूत् । कीदृशः कलिरित्यत आह-सर्वसाधनबाधक इति । सर्वेषां साधनानां मोक्षोपायानां बाधको नाशकः ॥ ६५ ॥ राज्ञा परीक्षिता दिग्विजये दिशां विजये दृष्टोऽवलोकितः । कीदृगित्यत आह—दीनेति । दीनवदनानाथवत् । शरणं गतः प्राप्तः । ततः किं कृतवानित्यत आह—नेति । अयं कलिर्मया न मारणीयो न हंतव्यः । कुतस्तत्राह—सारंगेति । सारं भुनक्तीति तथा सारग्राही सारंगो भ्रमर इव । एतेन वध्यस्याप्यवध्यतायां हेतुरुक्तो भवति ॥ ६६ ॥ तथाहि—स्थापने कारणमुच्यते—यदिति । यत्फलं तपसा नास्ति, योगेन नास्ति, समाधिना नास्ति, देहलीदीपकन्यायेन नास्तीत्यस्योभयत्र संबंधः । तत्फलं कलौ सम्यक् हरिकीर्त्तनात् भक्तिश्रद्धादिना हर्युच्चारणाज्जनो लभत इति ॥ ६७ ॥ एक आकारो गुणो यस्मिन्स तथा तम् "कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः" इति प्रथमस्कंधे सूतोक्तेः । 'आकारस्तु गुणे मूर्त्तौ' इति कामकल्पतरौ शृंगारप्रस्तावे । यद्वा—"एको विष्णुर्महद्भूतम्" इतिवचनादेकस्य विष्णोर्व्यापकस्याकारः स्वकीर्त्तनकारिणां फलप्रदानरूपो यस्य स तथा तं कलिं दृष्ट्वा कलिजानां कलियुगोत्पन्नानां नराणां सुखाय सुखार्थं विष्णुरातः परीक्षित् सारवत्स्थापितवानिति प्रथमप्रश्नोत्तरमुक्तम् । केषां क इव—सारमिच्छतां कामयमानानां सारवत् सार इव । 'सारवत्सारनीरसम्' इत्येकपदपाठे सारवत्सु यः सारस्तस्य नीरसो विफलत्वं यस्मादिति स तथा तम् । साराणां नीरसो विरसत्वं यस्मात्स तथा तमिति कलिविशेषणं वा, 'धर्मसांकर्यं तीर्थवैषम्यम्' इतिवत् समासोऽत्र बोध्यः ॥ ६८ ॥ द्वितीयप्रश्नोत्तरमाह-कुकर्मेति । कुकर्माचरणात् कुत्सितकर्मणामाचरणात्सर्वतः सर्वेषां षष्ठ्यर्थे तसिल् प्रत्यय इति मंदाः, पूर्वापरवाक्यानामसंगतेः । तेन सर्वतः सर्वेभ्य इति पंचम्यर्थे तसिल्विधानं साधु । 'कथासारस्ततो गतः' (७०) इत्याद्युत्तरवाक्येषु तथोपलंभात् । सारोऽधुनेदानीं निर्गतः निःसृतोस्ति । ततः किं, तत्राह पदार्थाः कथादयः भूमौ भुवि । औपश्लेषिकाधारे सप्तमीयम् । बीजहीनाः कणहीनाः तुषाः स्थूलधान्यावरणा यथा तथा संस्थिताः संतीत्यर्थः ॥६९॥ एतदेव स्पष्टयति विप्रैरित्यादिसप्तभिः । विप्रैर्ब्राह्मणैः कणलोभेन गेहे गेहे जने जने भागवती वार्त्ता कारिता ततस्तस्माद्धेतोः कथासारो गतः ॥ ७० ॥ रौरवान् नरकान् आगता जनाः अत्युग्राणि पापबाहुल्यानि भूरीणि कर्माणि येषां ते तथा । नरकागतानां चिह्नमेतत् । तेपि त एव तीर्थेषु तिष्ठंति वर्त्तंते ततस्तीर्थसारो गतोस्ति ॥ ७१ ॥ कामश्च क्रोधश्च महालोभश्च तृष्णा च ताः कामक्रोधमहालोभतृष्णाः, अत्र तृष्णापदसामर्थ्यान्महालोभ इति पदस्थाने महामोह इति पाठ ऊहनीयः, ताभिर्व्याकुलं विक्षिप्तं चित्तं येषां ते तथा तेपि त एव तपसि तिष्ठंति ततः तपःसारो गतः ॥ ७२ ॥ मनसोऽजयात् अनिरोधात्, च पुनर्लोभात्, दंभात् लोकानुरंजनार्थकर्मकरणात्, पाखंडस्य संश्रयात्स्वीकरणात्, शास्त्राणामनभ्यसनात् अभ्यासः पुनः पुनः पठनपाठनरूपः तस्याभावात् । एव निश्चये । ध्यानयोगफलं गतम् ॥ ७३ ॥ पंडिताः कलत्रेण स्त्रिया सह रमंते क्रीडंति । के इव महिषा इव बाहद्विषंत इव । एतेन पशुसाम्यनिदर्शनेन पत्रंगु दिवापि स्त्रीसंगो ध्वनितः । नु वैलक्षण्ये-द्विपदचतुष्पदशृंगपुच्छमत्त्वासत्त्वरूपं वर्त्तते । एतदेव स्पष्टयति-पुत्रस्या-

न हि वैष्णवता कुत्र संप्रदायपुरःसरा । एवं प्रलयतां प्राप्तो वस्तुसारः स्थले स्थले ॥ ७५ ॥
अयं तु युगधर्मो हि वर्तते कस्य दूषणम् । अतस्तु पुण्डरीकाक्षः सहते निकटे स्थितः ॥ ७६ ॥
सूत उवाच—इति तद्वचनं श्रुत्वा विस्मयं परमं गता । भक्तिरूचे वचो भूयः श्रूयतां तच्च शौनक ॥ ७७ ॥
श्रीभक्तिरुवाच—सुरर्षे त्वं च धन्योऽसि मद्भाग्येन समागतः । साधूनां दर्शनं लोके सर्वसिद्धिकरं परम् ॥ ७८ ॥
जयति जयति मायां यस्य कायाधवस्ते वचनरचनमेकं केवलं चाकलय्य ।
ध्रुवपदमपि यातो यत्कृपातो ध्रुवोऽयं सकलकुशलपात्रं ब्रह्मपुत्रं नताऽस्मि ॥ ७९ ॥

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये भक्तिनारदसंगमो नाम प्रथमोऽध्यायः ॥ १ ॥

## अथ द्वितीयोऽध्यायः

नारद उवाच—वृथा खेदयसे बाले अहो चिन्तातुरा कथम् । श्रीकृष्णचरणाम्भोजं स्मर दुःखं गमिष्यति ॥ १ ॥
द्रौपदी च परित्राता येन कौरवकश्मलात् । पालिता गोपसुन्दर्यः स कृष्णः क्वापि नो गतः ॥ २ ॥
त्वं तु भक्ते प्रिया तस्य सततं प्राणतोऽधिका । त्वयाहूतस्तु भगवान्याति नीचगृहेष्वपि ॥ ३ ॥
सत्यादित्रियुगे बोधवैराग्यौ मुक्तिसाधकौ । कलौ तु केवलं भक्तिर्ब्रह्मसायुज्यकारिणी ॥ ४ ॥

त्पादने दक्षाः निपुणाः कृतप्रयत्नाः, मुक्तिसाधने शमदमादौ अदक्षाः ॥ ७४ ॥ कुत्र क्वापि स्थाने संप्रदायपुरस्सरा संप्रदायपूर्विका वैष्णवता न हि । एवममुना प्रकारेण वस्तुसारः स्थले स्थले प्रलयं गतः ॥ ७५ ॥ तृतीयप्रश्नोत्तरमाह–अयमिति । अयं युगधर्मो वर्त्तते । हि युक्तम् । दूषणं कस्य, न कस्याप्यस्तीति काकुः तुशब्दार्थः । अतो हेतोर्निकटे स्थितः । तु अप्यर्थे । पुंडरीकाक्षो हरिः सहते तत्कृतमपराधं क्षमते ॥ ७६ ॥ शौनकं प्रति सूतोक्तिः–इतीति । इत्येवं तस्य नारदस्य वचनं श्रुत्वा विस्मयेनाविष्टं व्याप्तं मानसं मनो यस्याः सा तथा भक्तिर्भूयः पुनःपुनर्वचनमूचे उवाच । तच्च वचनं हे शौनक त्वं शृणु ॥ ७७ ॥ हे सुरर्षे नारद त्वं धन्योसि साधुत्वात् । मद्भाग्येन समागतोसि सम्यक् आयातोसि । किमागमनेनेत्यत आह–लोके साधूनां दर्शनं सर्वसिद्धिकरं भवति । अत एव परं श्रेष्ठं कामनापूरकं वा ॥ ७८ ॥ तथाहि–जयतीति । यस्य ते तव केवलं पक्षपातरहितमेकं वचनरचनं रामनामोच्चारण-महिमात्मकम् आकलय्य विचार्य कायाधवः कयाधोरपत्यमिति स तथा प्रह्लादो जगति मायां ममेयं माता पितायमित्येवंरूपां मोहमयीं जयति जितवान् 'त्यजति' इति पाठे मायां संसारबीजभूतामविद्यां जहातीत्यर्थः । परां भक्तिमंतरेण तज्जयस्य दुर्घटत्वात् । किंच–यत् यस्य कृपातः कृपयाऽयं नेत्रवृत्तिगोचरो ध्रुव उत्तानपादपुत्रो ध्रुवपदं निश्चलस्थानं वैकुंठद्वारं यातः प्राप्तोस्ति । सकलकुशलपात्रं सकलानां सर्वेषां कुशलानां मंगलकर्मणां पात्रं भाजनम् आधारत्वात् 'योग्यभाजनयोः पात्रम्' इत्यमरोक्तः । ब्रह्मणः पुत्रं नारदं नतास्मि प्रणमामि ॥ ७९ ॥

इति श्रीशेखावाट्यंतर्गतविजयपुरनिवासिव्राजलालिपंडितरामप्रतापविरचितायां श्रीमद्भागवत
माहात्म्यटीकायामृजुनाम्न्यां प्रथमोऽध्यायः ॥ १ ॥

आश्वास्य भक्तिं तत्सून्वोर्बोधनाय कृतोद्यमः ॥ श्रुत्वाकाशगिरोक्तं सत्कर्म प्रष्टुं गतो मुनिः ॥ १ ॥

"न विषादस्त्वया कार्यो हरिः शं ते विधास्यति" इत्युपदेशकरणात् पूर्वाध्याये नास्य संगतिं योजयन्नारदो वदति–वृथेति । हे बाले त्वं वृथा खेदयसे मुधा खेदं करोषि । कथं केन प्रकारेण चिंतातुरासि । अहो आश्चर्यम् । श्रीकृष्णस्य चरणांभोजं पादपद्मं त्वं स्मर चिंतय । ततः दुःखं गमिष्यति प्रयास्यति ॥ १ ॥ ननु तच्चरणकमलस्मरणेन दुःखहानिः पूर्वं कस्य जातेत्यपेक्षायामाह–द्रौपदीति । येन श्रीकृष्णेन कौरवकश्मलात्कौरवाणां दुर्योधनदुःशासनसौबलादीनां कश्मलं सभायां केशाकर्षणचीरहरणादिदुःखप्रदानं तस्मात् । यद्वा–कौरवैर्यत्कश्मलं दुःखं तस्मादिति । द्रौपदी द्रुपदस्य सुता परित्राता रक्षिता । चात् ग्राहपाशाद्गजो रक्षितः । गोपसुंदर्यः गोपानां नार्यः, शंखचूडादिवधात् पालिताः । स कृष्णः क्वापि कुत्रापि नो गतो न प्रयातः व्यापकत्वात्तस्य गमनागमने यद्यपि न स्तस्तथापि भक्त्युद्रेकेणाविर्भावतिरोभावावुन्नेयाविति विवेकः ॥ २ ॥ प्रेयस्या दुःखहरणं सूचितं तद्वश्यत्वात्तस्येत्याह–त्वमिति । हे भक्ते तस्य कृष्णस्य प्राणतोऽधिका प्रिया त्वमसि । तुशब्दः पूर्वतो वैलक्षण्यद्योतकः । सततं निरन्तरम् । त्वयेति तदेवाह–त्वयाऽऽहूतः कृताऽऽह्वानो भगवान् षड्गुणपरिपूर्णो हरिर्नीचगृहेषु नीचानां धर्मव्याधशबरीविदुरादीनां गेहेषु याति गच्छति । हि युक्तमेतत् । अपिशब्दस्तु प्राणत इत्यनेनान्वेति ॥ ३ ॥ अथ युगानुसारेण स्थितिमाह–सत्यादीति । सत्यमादिर्यस्य तत् सत्यादि, तच्च त्रियुगं चेति सत्यादित्रियुगं तस्मिन् कृतत्रेताद्वापरयुगे बोधवैराग्यौ ज्ञानवैराग्यौ मुक्तिसाधकौ मुक्तेः सिद्धिकरौ । कलौ कलियुगे तु केवलं भक्तिरेव ब्रह्मसायुज्यकारिणी, ब्रह्मणः सायुज्यं संयोगं कर्तुं शीलं यस्याः सा तथा

१. भूतार्थं त्यज । २. स्मरणात् ।

इति निश्चित्य चिद्रूपः सरूपां त्वां ससर्ज ह । परमानन्दचिन्मूर्तिः सुन्दरीं कृष्णवल्लभाम् ॥ ५ ॥
बद्धाञ्जलिं त्वया पृष्टं किं करोमीति चैकदा । त्वां तदाज्ञापयत्कृष्णो मद्भक्तान्पोषयेति च ॥ ६ ॥
अंगीकृतं त्वया तद्वै प्रसन्नोऽभूद्धरिस्तदा । मुक्तिं दासीं ददौ तुभ्यं ज्ञानवैराग्यकाविमौ ॥ ७ ॥
पोषणं स्वेन रूपेण वैकुण्ठे त्वं करोषि च । भूमौ भक्तिविपोषाय च्छायारूपं त्वया कृतम् ॥ ८ ॥
मुक्तिं ज्ञानं विरक्तिं च सह कृत्वा गता भुवि । कृतादिद्वापरस्यान्तं महानन्देन संस्थिता ॥ ९ ॥
कलौ मुक्तिः क्षयं प्राप्ता पाखण्डामयपीडिता । त्वदाज्ञया गता शीघ्रं वैकुण्ठं पुनरेव सा ॥ १० ॥
स्मृता त्वयापि चात्रैव मुक्तिरायाति याति च । पुत्रीकृत्य त्वयेमौ च पार्श्वे स्वस्यैव रक्षितौ ॥ ११ ॥
उपेक्षातः कलौ मन्दौ वृद्धौ जातौ सुतौ तव । तथापि चिन्तां मुञ्च त्वमुपायं चिन्तयाम्यहम् ॥ १२ ॥
कलिना सदृशः कोपि युगो नास्ति वरानने । तस्मिंस्त्वां स्थापयिष्यामि गेहे गेहे जने जने ॥ १३ ॥
अन्यधर्मांस्तिरस्कृत्य पुरस्कृत्य महोत्सवान् । तदा नाहं हरेर्दासो लोके त्वां न प्रवर्तये ॥ १४ ॥
त्वदन्विताश्च ये जीवा भविष्यन्ति कलाविह । पापिनोऽपि गमिष्यंति निर्भयाः कृष्णमन्दिरम् ॥ १५ ॥
येषां चित्ते वसेद्भक्तिः सर्वदा प्रेमरूपिणी । न ते पश्यन्ति कीनाशं स्वप्नेऽप्यमलमूर्तयः ॥ १६ ॥

भवति ॥ ४ ॥ ततो निश्चयपूर्वकं कृत्यमाह–इतीति द्वाभ्याम् । इत्येवं निश्चित्य निश्चयं कृत्वा त्वां ससर्ज सृष्टवान् । चिद्रूपः
प्रशस्तचित्सर्वज्ञत्वादीश्वरः । कीदृशीं त्वां–सरूपाम् आत्मना समानरूपाम् । चिद्रूपिणीमिति विशिष्टाद्वैतवादिनस्तदविचारचारु,
दुःखाद्यनुपलंभात् । ततः सरूपां मूर्तिमिति गुरवः । तथात्वे त्रिक्रियादिसंभवात् । हेति स्फुटम् । सुन्दरीं कमनीयां कृष्णस्यात्मनः
वल्लभां प्रियाम् "विदुषां परिपाटीयं संतमाह परं यथा" इति सन्तं विद्यमानमित्यर्थः । एतेन 'ये च कंसमनुव्रताः' इति कंसं
प्रति नारदोक्तिः, "अनन्तदैवज्ञसुतः स रामो मुहूर्तचिन्तामणिमातनोति" इत्यादि च संगच्छते । परमयोत्कृष्टशोभया
आनन्दश्चासौ चिन्मूर्तिश्चेति स तथेति केचित् । तन्मन्दम् , परमशोभायाः सुषमेति नामतः 'सुषमा परमा शोभा' इत्यमरसिंहोक्तेः ।
वस्तुतस्तु–परमश्चासौ आनन्दश्चेति परमानन्दः, स चासौ चिन्मूर्तिश्चेति समासो युक्तः, शुद्धबुद्धमुक्तस्वभाव इतिवत् ॥ ५ ॥
एकदा एकस्मिन्काले अंजलिं बध्द्वा हस्तयोः संयोजनं कृत्वाऽऽहं किं करवाणीति त्वया यदा पृष्टं तदा त्वां कृष्ण आज्ञापयत्
आज्ञां दत्तवान् । तदाह–मद्भक्तान त्वं पोषय पुष्टान् कुर्विति । च एवार्थे ॥ ६ ॥ स्वाम्याज्ञास्वीकारे फलमाह–अंगीकृतमिति ।
तद्धरेः वचो यदा त्वयांगीकृतं करिष्यामीति स्वीकृतं तदा वै निश्चयेन हरिः प्रसन्नस्तुष्टोऽभूत् । तस्मिन्प्रसन्ने को लाभस्तत्राह–
तुभ्यं मुक्तिं दासीं ददौ । इमौ पुरः स्थितौ ज्ञानवैराग्यकौ ज्ञानं च वैराग्यं च ज्ञानवैराग्यौ अल्पौ ज्ञानवैराग्यावित्यल्पार्थे कन्प्रत्यये
तथा शिशुरूपावित्यर्थः । पुत्रत्वेन ददौ, एतेन वस्तुतस्त्वत्पुत्रौ नेति सूचितम् ॥ ७ ॥ त्वदुक्तं संपादितमित्याह–पोषणमिति ।
वैकुण्ठ लोके पोषणं भक्तानां पुष्टित्वेन रूपेण चिन्मूर्त्या त्वं करोषि । च एवार्थे । भूमौ पृथिव्यां भक्तविपोषाय भक्तानां
विशेषेण पोषणार्थं छायारूपं त्वया कृतमस्ति ॥ ८ ॥ मुक्त्यादित्रिकेण तवागमनं जातमित्याह—मुक्तिमिति । मुक्तिं मोक्षं ज्ञानं
तत्प्रदं, च पुनः विरक्तिं वैराग्यं तत्साधनं सह कृत्वा भुवि त्वमागतासि । कृतादिद्वापरस्यांतं सत्ययुगादिद्वपरस्यान्तमिति, नैरंतर्ये
द्वितीया । द्वापरसमाप्तिमिति यावत् । महानंदेन पूर्णसुखेन संस्थिता ॥ ९ ॥ कलिना मुक्तिनाशो जात इत्याह—कलाविति । कलौ
कलियुगे पाखंडामयपीडिता पाखंड एवामयो रोगस्तेन पीडिताऽऽक्रांता मुक्तिः क्षयं नाशं प्राप्ता । यद्वा—क्षयं वैकुंठस्थानं प्राप्ता ।
तदेव स्पष्टयति—त्वदाज्ञया तव प्रेरणया शीघ्रमेव सा वैकुंठं पुनर्गतास्ति ॥ १० ॥ किञ्च त्वया स्मृताऽऽहूता मुक्तिः अत्रैव
भूतले आयाति, च पुनः यात्यपि गच्छत्येव, इमौ ज्ञानवैराग्यौ पुत्रीकृत्य धात्रीवदात्मपुत्राविति कृत्वा स्वस्यात्मनः पार्श्वे रक्षितौ
त्वया संस्थापितौ ॥ ११ ॥ तयोर्वृद्धत्वं कारणमाह—उपेक्षात इति । किं ज्ञानवैराग्याभ्यामित्युपेक्षातोऽनिच्छया मंदौ परिचार-
रहितौ अत एव वृद्धौ चतुर्थीमवस्थां गतौ तव सुतौ जातौ स्तः । कलौ कलियुगे, यद्यप्येवं तथापि त्वं चिंता मुंच जहीहि, अहम्
उपायं सुखोपायं चिंतयामि विचारयामि ॥ १२ ॥ चिंतितमाह—कलिनेति । हे वरानने सुंदरमुखि कलिना सदृशस्तुल्यः कोपि
युगो नास्ति । तस्मिन् उक्तयुगे त्वां गेहे गेहे प्रतिगेहं, जने जने प्रतिजनं स्थापयिष्यामि प्रवर्तयिष्यामि ॥ १३ ॥ किं कृत्वा—अन्य-
धर्मान्वर्णाश्रमादिविहितशौचस्नानसंध्याग्निहोत्रयज्ञदानादिधर्मान् तिरस्कृत्याऽवज्ञाय महोत्सवान् हरिमंदिरमार्जनलेपनालं-
करणगीतनृत्यादीन पुरस्कृत्य अग्रे विधायेति पूर्वान्वयः । प्रतिश्रुतकरणं प्रतिजानीते—तदेति सार्द्धैः सप्तभिः । यदा लोके त्वां
न प्रवर्त्तये तदा हरेर्दासो नास्मीति ॥ १४ ॥ भक्तिप्रवर्त्तने फलमाह—इह लोके कलौ कलियुगे पापिनोऽपि
असत्कर्मकारिणो जीवा जंतवः प्राणिन इति यावत् त्वदन्विता त्वया भक्त्याऽन्विता युक्ता ये भविष्यंति ते निर्भया भयरहिताः
संतः कृष्णमंदिरं वैकुंठं परं पदं वा गमिष्यंति प्राप्स्यन्ति । च एवार्थे ॥ १५ ॥ येषां पुंसां चित्ते प्रेमरूपिणी आनंदाश्रुकला

न प्रेतो न पिशाचो वा राक्षसो वाऽसुरोऽपि वा । भक्तियुक्तमनस्कानां स्पर्शने न प्रभुर्भवेत् ॥ १७ ॥
न तपोभिर्न वेदैश्च न ज्ञानेनापि कर्मणा । हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपिकाः ॥ १८ ॥
नृणां जन्मसहस्रेण भक्तौ प्रीतिर्हि जायते । कलौ भक्तिः कलौ भक्तिर्भक्त्या कृष्णः पुरः स्थितः॥ १९ ॥
भक्तिद्रोहकरा ये च ते सीदन्ति जगत्रये । दुर्वासा दुःखमापन्नः पुरा भक्तिविनिन्दकः ॥ २० ॥
अलं व्रतैरलं तीर्थैरलं योगैरलं मखैः । अलं ज्ञानकथालापैर्भक्तिरेकैव मुक्तिदा ॥ २१ ॥

सूत उवाच—इति नारदनिर्णीतं स्वमाहात्म्यं निशम्य सा । सर्वांगपुष्टिसंयुक्ता नारदं वाक्यमब्रवीत् ॥ २२ ॥
श्रीभक्तिरुवाच—अहो नारद धन्योऽसि प्रीतिस्ते मयि निश्चला । न कदाचिद्विमुञ्चामि चित्ते स्थास्यामि सर्वदा ॥ २३ ॥
कृपालुना त्वया साधो मद्बाधा ध्वंसिता क्षणात् । पुत्रयोश्चेतना नास्ति ततो बोधय बोधय ॥ २४ ॥

सूत उवाच—तस्या वचः समाकर्ण्य कारुण्यं नारदो गतः । तयोर्बोधनमारेभे कराग्रेण विमर्दयन् ॥ २५ ॥
मुखं संयोज्य कर्णान्ते शब्दमुच्चैः समुच्चरन् । ज्ञान प्रबुध्यतां शीघ्रं रे वैराग्य प्रबुध्यताम् ॥ २६ ॥
वेदवेदान्तघोषैश्च गीतापाठैर्मुहुर्मुहुः । बोध्यमानौ तदा तेन कथञ्चिच्चोत्थितौ बलात् ॥ २७ ॥

हृदयार्द्रता वाग्गद्गदरूपा भक्तिर्वसेत् तिष्ठेत्, ते पुमांसोऽमलमूर्त्तयः शुद्धदेहाः स्वप्नेपि स्वप्नावस्थायामपि कीनाशं यमम् 'कीनाशो मृत्युरर्कजः' इत्यमरोक्तेः। न पश्यंति नेक्षन्ते, किमुत सांप्रतमिति कैमुतिकन्यायसिद्धम् ॥ १६ ॥ किञ्च-भक्तियुक्तमनस्कानां भक्त्या युक्तं मनो येषां पुंसामिति तथा तेषां स्पर्शने धर्षणे प्रेतः स्थूलदेहरहितो दुर्गतिकः प्रभुः समर्थो न भवेत्। एवं पिशाचः प्रभुर्न, राक्षसः प्रभुर्न, असुरो वापि प्रभुर्न ॥ १७ ॥ हरिः पापहंता भगवान् तपोभिः पंचाग्निरूपैर्न साध्यते। च पुनः। वेदैर्ऋग्यजुःसामाथर्वाख्यैर्न साध्यते, ज्ञानेनात्मानात्मविवेकादिसाधनजन्येन वेदांतप्रसिद्धेन न साध्यते, कर्मणापि श्रौतेन स्मार्तेन वापि न साध्यते। ननु सर्वसाधनानां निरासः कथं क्रियते, तत्राह-तत्र तपआदिसाधनानामकिंचित्करत्वे गोपिका गोप्यः। अत्रानुकंपायां कन्प्रत्ययः। प्रमाणमस्ति ॥ १८ ॥ एतद्दुर्लभमित्याह-नृणामिति। नृणां नराणां जन्मनां सहस्रेण भक्तौ नृत्यगीतादिरूपायां प्रीतिः प्रेम जायते उत्पद्यते। एतदेव स्थूणानिखननन्यायेन द्रढयति-कलौ भक्तिः कलौ भक्तिरिति वीप्सयाऽन्येषां निरासः। तथाहि-भक्त्या कृष्णः पुरः स्थितोऽग्रेचरोऽस्ति ॥ १९ ॥ विपक्षे दोषमाह-भक्तीति। ये च हिरण्यकशिप्वादयोजना भक्तिद्रोहकरा भक्त्यै द्रोहं कुर्वन्तीति तथा ते जगत्रये त्रैलोक्ये सीदंति दुःख्यंति। तथाहि-पुरा पूर्वसमये भक्तस्यांबरीषस्य विनिंदकः पैशुन्यकृत् दुर्वासाः शंकरांशो मुनिर्दुःखमापन्नो दुःखं प्राप्तोऽभूत्। यद्वा-भक्तस्य प्रह्लादस्य विनिंदको हिरण्यकशिपुः दुःखमापन्नः। यद्वा-भक्तस्य विभीषणस्य विनिंदको रावणो दुःखमापन्नः। यद्वा-भक्तस्य विदुरस्य, भक्तानां पांडवानां वा विनिंदको दुर्योधनो दुःखमापन्नः ॥ २० ॥ अथ व्रतादीनां न साक्षान्मुक्तिसाधनत्वमित्याह-अलमिति। व्रतैः कृच्छ्रचांद्रायणादिभिरलं पर्याप्तम्। तीर्थैः पुष्करादिभिरलम्। योगैः आसनाद्यष्टांगसंपन्नैरलम्। मखैरग्निहोत्राश्वमेधादिभिरलम्। ज्ञानकथानामालापैर्बहिर्मुखानाम् "केवलमयमात्मा ब्रह्म, अहं ब्रह्मास्मि, तत्त्वमसि" इति ज्ञानकथानामालापैराभाषणैः 'स्यादाभाषणमालापः' इत्यमरोक्तेः, अलम्। एका भक्तिरेव मुक्तिदा। अन्ययोगव्यवच्छेदार्थ एवकारः ॥ २१ ॥ अथ सूतोक्तिः शौनकं प्रति-इतीति। इत्येवंप्रकारेण नारदेन निर्णीतं सिद्धांतितं स्वमाहात्म्यं महते पूज्यते लोके इति महान्, अतति सातत्येन गच्छतीत्यात्मा, महांश्चासावात्मा च महात्मा, तस्य भावो माहात्म्यं स्वस्य माहात्म्यं स्वमाहात्म्यं निशम्य श्रुत्वा सा भक्तिः सर्वैरंगैः पुष्ट्या च संपन्ना संयुक्ता सती नारदं प्रति वाक्यं वचनमब्रवीत् ॥ २२ ॥ भक्तिरुवाचेति-नारदं श्लाघयंतीत्याह-अहो इति द्वाभ्याम्। अहो इत्याश्चर्यम्। हे नारद त्वं धन्योसि, मयि विषये सप्तमीयम्। ते तव निश्चला चलनरहिता प्रीतिरस्ति। कदापि कस्मिंश्चित् कालेऽपि अहं त्वां न विमुंचामि, अतः सर्वदा सर्वस्मिन्काले ते चित्ते हृदये स्थास्याम्यहं स्थितिं करिष्यामि, वत्स्यामीत्यर्थः ॥ २३ ॥ हे साधो कृपालुना दयावता त्वया क्षणात् क्षणमात्रेण मद्बाधा मत्पीडा ध्वंसिता नाशिता। इदानीमेतत् त्वया कर्त्तव्यमित्याह-पुत्रयोरिति। पुत्रयोर्ज्ञानवैराग्ययोः चेतना ज्ञप्तिर्नास्ति ततोऽचेतनाद्धेतोः बोधय बोधय। एताविति कर्माध्याहरणीयम्। एतयोश्चैतन्यं कुरु कुर्विति तात्पर्यार्थः ॥ २४ ॥ सूतः कारुण्यान्नारदोद्योगं प्रपंचयति-तस्या इति पंचभिः। तस्या भक्त्या वचो वचनं समाकर्ण्य सम्यक् श्रुत्वा नारदो नारं ज्ञानं ददातीति तथा सः, अमरकोशटीकायां रामाश्रमेणाप्येवमेवोक्तत्वात्। कारुण्यं करुणाया भाव इति तथा तत् गतः प्राप्तः तयोर्ज्ञानवैराग्ययोर्बोधनं जागरणोपायमारेभे आरब्धवान्। किं कुर्वन् सन्-कराग्रेण करयोर्हस्तयोरग्रेण जात्यभिप्रायेणैकवचननिर्देशः, तेन नखैरित्यर्थो बोध्यः। विमर्दयन् विशेषेणांगपरिवर्तनमाचरन् ॥ २५ ॥ कर्णांते कर्णस्य समीपे मुखमास्यं संयोज्य कृत्वा उच्चैः उदात्तस्वरेण शब्दं समुच्चरन् सम्यक्त्वेनोच्चारणं कुर्वन्। किं तत्-हे ज्ञान भवान्प्रबुद्ध्यतां जागृयात्, रे वैराग्य भवान् प्रबुद्ध्यतामिति पूर्ववत् कर्त्तरि प्रत्ययोत्र, शीघ्रमाशु ॥ २६ ॥ कृतमुद्योगं विफलं दृष्ट्वा

नेत्रैरनवलोकन्तौ जृम्भन्तौ सालसावुभौ । बकवत्पलितौ प्रायः शुष्ककाष्ठसमांगकौ ॥ २८ ॥
क्षुत्क्षामौ तौ निरीक्ष्यैव पुनः स्वापपरायणौ । ऋषिश्चिन्तापरो जातः किं विधेयं मयेति च ॥ २९ ॥
अहो निद्रा कथं याति वृद्धत्वं च महत्तरम् । चिन्तयन्निति गोविन्दं स्मारयामास भार्गव ॥ ३० ॥
व्योमवाणी तदैवाभून्मा ऋषे खिद्यतामिति । उद्यमः सफलस्ते तु भविष्यति न संशयः ॥ ३१ ॥
एतदर्थं तु सत्कर्म सुरर्षे त्वं समाचर । तत्ते कर्माभिधास्यन्ति साधवः साधुभूषणाः ॥ ३२ ॥
सत्कर्मणि कृते तस्मिन्सनिद्रा वृद्धताऽनयोः । गमिष्यति क्षणाद्भक्तिः सर्वतः प्रसरिष्यति ॥ ३३ ॥
इत्याकाशवचः स्पष्टं तत्सर्वैरपि विश्रुतम् । नारदो विस्मयं लेभे नेदं ज्ञातमिति ब्रुवन् ॥ ३४ ॥
नारद उवाच—अनयाकाशवाण्यापि गोप्यत्वेन निरूपितम् । किं वा तत्साधनं कार्यं येन कार्यं भवेत्तयोः ॥ ३५ ॥
क्व भविष्यंति संतस्ते कथं दास्यंति साधनम् । मयात्र किं प्रकर्तव्यं यदुक्तं व्योमभाषया ॥ ३६ ॥
सूत उवाच—तत्र तावपि संस्थाप्य निर्गतो नारदो मुनिः । तीर्थं तीर्थं विनिष्क्रम्य पृच्छन्मार्गे मुनीश्वरान् ॥ ३७ ॥
वृत्तांतः श्रूयते सर्वैः किंचिन्निश्चित्य नोच्यते । असाध्यं केचन प्रोचुर्दुर्ज्ञेयमिति चापरे ॥ ३८ ॥

महाप्रयत्नमकरोदिति तं दर्शयति—वेदवेदांतघोषैः वेदाः प्रसिद्धाः वेदांता उपनिषदस्तेषां घोषैः शब्दैः पठनैर्वा, गीतापाठैः च पुनः भगवद्गीतायाः पठनैर्मुहुर्मुहुः भूयोभूयस्तेन नारदेन यदा बोध्यमानौ चेतनां कार्यमाणौ तदा कथंचित् अशक्तत्वेपि बलाद्धेतोः उत्थितौ अभूताम् ॥ २७ ॥ नेत्रैरक्षिभिरनवलोकंतौ अपश्यंतौ जृंभंतौ मुखोत्फालनं कुर्वंतौ । अत एवोभौ द्वौ सालसौ आलस्येन सहितौ । बकवत्पलितौ धवलकेशौ 'पलितं जरया शौक्ल्यम्' इत्यमरोक्तेः । तत्र दृष्टांतः बकवदिति स्पष्टम् । प्रायो बाहुल्येन शुष्ककाष्ठसमांगकौ शुष्के नीरसे काष्ठे ताभ्यां समानि अंगानि ययोस्तौ तथा ॥ २८ ॥ क्षुत्क्षामौ क्षुधा क्षीणौ तौ ज्ञानवैराग्यौ पुनः भूयः आवां स्वपिव इति स्वापपरायणौ स्वापे तत्परौ दृष्ट्वा ऋषिर्नारदश्चिंतापरो जातः । मया किं विधेयमिति चिंतापरत्वम् ॥ २९ ॥ चिंताप्रकारमाह—अहो इति । अनयोर्निद्रा कथं याति अपगच्छति । अहो इत्याश्चर्ये । च पुनः वृद्धत्वं महत्तरम् अत्युत्कटं कथं याति इति हेतोः गोविन्दं स्वेष्टदेवं चिन्तयन्सन् चिंतां कुर्वन् सन्—हे भार्गव हे शौनक स्ववृत्तांतं स्मारयामास हरिं विज्ञापयांबभूव । गुरवस्तु—चौरादिकस्मृधातोः स्वार्थे णिच् प्रत्ययोऽत्रेत्याहुः । तेन गोविंदं सस्मारेत्यर्थः ॥ ३० ॥ तदा तस्मिन्समये व्योमवाणी आकाश-वाक् अभूत्-हे ऋषे नारद मा खिद्यतां खेदो मा क्रियतामिति । ते तव उद्यमः पुरुषार्थः सफलो भविष्यति न संशयः संशयो नास्ति । तु एवार्थे ॥ ३१ ॥ उत्पन्नस्य विषादस्य कथं निवृत्तिः स्यादिति चिंतयंतं प्रत्याह—एतदर्थमिति । 'स्वंताथादि न पूर्वभाक्' इत्यमरोक्तेः त्वर्थमाह—हे सुरर्षे एतदर्थम् एतयोर्ज्ञानवैराग्ययोरर्थाय बोधनहेतवे सत्कर्म त्वं समाचर संकुरु । किं सत्कर्मेति ध्यायन्तं प्रत्याह—तत्कर्म तुभ्यं साधुभूषणाः साध्वलंकाररूपाः । यद्वा—साधून् भूषयंति शोभयंतीति तथा ते साधवोऽभिधास्यंति कथयिष्यंति ॥ ३२ ॥ ततः किं तत्राह—सत्कर्मणीति । तस्मिन् गगनगिरोक्ते सत्कर्मणि कृते सति अनयोर्ज्ञानवैराग्ययोः सनिद्रा निद्रया सहिता वृद्धता वृद्धभावस्तत्क्षणादेव गमिष्यति प्रयास्यति । भक्तिः प्रेमानंदरूपिणी सर्वतः चतुर्दिक्षु प्रसरिष्यति फलिष्यति ॥ ३३ ॥ असंभावयति—इतीति । इत्येवं प्रकारेण तदाऽऽकाशवचः आकाशोत्पन्नः शब्दः स्पष्टं यथा स्यात्तथा सर्वैर्जनैः श्रुतः । इदं सत्कर्म मया न ज्ञातमिति ब्रुवन् वदन्सन् नारदो विस्मयं लेभे प्राप ॥ ३४ ॥ विस्मयमेवाह नारदः—अनयेति । नन्वाकाशवाण्या उत्पन्नविनाशित्वादनयेति कथनं दुर्घटं, तथापि तच्छब्दरूपा-यास्तस्या मूर्तेर्मद्बुद्धौ संस्थितत्वादिदंतया निर्देशो युक्तः, अनयाकाशवाण्या गोप्यत्वेन निरूपितं न तु स्पष्टत्वेनेत्यर्थः । किं वा तत्साधनं मया कार्यं कर्तव्यं, येन साधनेन तयोर्ज्ञानवैराग्ययोः कार्यं भवेत् ॥ ३५ ॥ "तत्ते कर्माभिधास्यंति साधवः साधुभूषणाः ( ३२ )" इत्यप्यसंगतं प्रतिभातीत्याह—क्वेति । ते पूर्वोक्ताः संतः साधवः क्व कुत्र स्थाने भविष्यंति तिष्ठंति । तत्समागमः कथं भविष्यतीति फलितोऽर्थः । जातेपि संगमे साधनप्राप्तिर्दुःसंभाव्येत्याह—कथं केन प्रकारेण साधनं दास्यं-तीति स्वचित्तवैक्लव्यम् । व्योमभाषया वियद्वाचाऽत्र यदुक्तं तत्र मया किमभिधेयमिति ॥ ३६ ॥ सूतोक्तिः शौनकं प्रति—तत्रेति । तत्र यमुनातटे तावपि ज्ञानवैराग्यौ एवं संस्थाप्य स्थापयित्वा नारदो मुनिः निर्गतस्तत्स्थानात् प्रचलितोऽभूत् । तथाहि तीर्थमिति । तीर्थं तीर्थं प्रतितीर्थं विनिष्क्रम्य संभ्रम्य मार्गे पथि मुनीश्वरान्—किं नाम सत्कर्मेति पृच्छन्सन् ॥ ३७ ॥ तत्प्रचयमाह—वृत्तांत इति । सत्कर्म किमिति वृत्तांतः सर्वैर्ऋष्यादिभिः श्रूयते, किंचित् किमपि तदेकदेशं निश्चित्य निश्चयं कृत्वा नोच्यते । समस्तार्थपरिज्ञानाभावेनोपहास्यभिया केचन ऋषयः 'असाध्यमेतदिति प्रोचुः । अपरे दुर्ज्ञेय-

१. न साधनार्हम् ।

मूकीभूतास्तथान्ये तु कियन्तस्तु पलायिताः । हाहाकारो महानासीत् त्रिलोकी विस्मयावहः ॥ ३९ ॥
वेदवेदान्तघोषैश्च गीतापाठैर्विबोधितम् । भक्तिज्ञानविरागाणां नोदतिष्ठत् त्रिकं यदा ॥ ४० ॥
उपायो नापरोऽस्तीति कर्णे कर्णेऽजपञ्जनाः । योगिना नारदेनापि स्वयं न ज्ञायते तु यत् ॥ ४१ ॥
तत्कथं शक्यते वक्तुमितरैरिह मानुषैः । एवं चर्षिगणैः पृष्टैर्निर्णीयोक्तं दुरासदम् ॥ ४२ ॥
ततश्चितातुरः सोऽथ बदरीवनमागतः । तपश्चरामि चात्रेति तदर्थं कृतनिश्चयः ॥ ४३ ॥
तावद्ददर्श पुरतः सनकादीन्मुनीश्वरान् । कोटिसूर्यसमाभासानुवाच मुनिसत्तमः ॥ ४४ ॥
नारद उवाच—इदानीं भूरिभाग्येन भवद्भिः संगमः स्थितः । कुमारा वदतां शीघ्रं कृपां कृत्वा ममोपरि ॥ ४५ ॥
भवंतो योगिनः सर्वे बुद्धिमन्तो बहुश्रुताः । पंचहायनसंयुक्ताः पूर्वेषामपि पूर्वजाः ॥ ४६ ॥
सदा वैकुंठनिलया हरिकीर्तनतत्पराः । लीलामृतरसोन्मत्ताः कथामात्रैकजीवनाः ॥ ४७ ॥
हरिः शरणमेवं हि नित्यं येषां मुखे वचः । अतः कालसमादिष्टा जरा युष्मान्न बाधते ॥ ४८ ॥
येषां भ्रूभंगमात्रेण द्वारपालौ हरेः पुरा । भूमौ निपतितौ सद्यो यत्कृपातः परं गतौ ॥ ४९ ॥

मिति प्रोचुः ॥ ३८ ॥ किंच—अन्ये निकृष्टास्तु तथा तेन प्रकारेण मूकीभूता वाग्व्यापाररहिता बभूवुः । कियंतस्तु कियंतो जना आगच्छंतं नारदं दृष्ट्वा दूरादेव पलायिताः, तन्मार्गमुत्सृज्य सव्यापसव्यभागे याताः । हाहाकारो महानासीत् महान्महत्तरो हाहाकारः कोलाहल आसीत् । स कीदृशोऽभूदिति तं विशिनष्टि—त्रिलोकीविस्मयावहः त्रयाणां लोकानां समाहारस्त्रिलोकी तस्या विस्मयावहः विस्मयकर्त्ता ॥ ३९ ॥ तमेव विशदयति—वेदेति । वेदवेदांतघोषैर्वेदवेदांतानां शब्दैः च पुनः गीतायाः पाठैश्च बोधितं सत् भक्तिज्ञानविरागाणां त्रिकं यदा नोदतिष्ठत् नोत्थितम् ॥ ४० ॥ अत्र कर्त्तव्यतां संभावयति—उपाय इति । योगिना योगवता नारदेनापि स्वयं यत् न ज्ञायते न बुद्ध्यते तत्रापरोऽन्यः उपायः कर्त्तव्यः विधिर्नास्ति इति कर्णे कर्णे जना अजपन् जल्पनमकुर्वन् ॥ ४१ ॥ अर्वाचीनैरेतदवाच्यमित्याह—तदिति । तत् नारदाज्ञातम् इतरैर्भक्तिहीनैरयोगिभिर्मानुषैः कथं केन प्रकारेण वक्तुं कथयितुं शक्यते, न कथमपीति काकुः । प्रश्नोत्तरं न लब्धमित्याह—एवमिति । एवममुना प्रकारेण पृष्टैर्ऋषीणां गणैः शाखाभेदभिन्नैर्निर्णीय निर्णयं कृत्वा दुरासदं दुष्प्रापमित्युक्तम् ॥ ४२ ॥ प्रश्नार्थमनुपलभमानो नारदश्चिताव्यग्रोऽभूदित्याह—ततः प्रष्टव्यार्थानुपलब्धेर्हेतोश्चितया आतुरः दुःखी स नारदः मदागमनं प्रतीक्षमाणां भक्तिं परावृत्य किमहं वक्ष्यामि । अकृतकृत्योहं तस्यै कथं मुखं प्रदर्शयिष्य इति लज्जार्थमथशब्दो मध्ये प्रक्षिप्तः । बदरीवनम् आगतः प्राप्तः । अत्र बदरीवने तदर्थं तस्यै, ताभ्यां वा, तेभ्यो वा, तपः शरीरशोषणम् अहं चरामि करिष्यामि इति कृतनिश्चयः कृतो निश्चयो येन स तथाभूत् ॥ ४३ ॥ तत्र सनकादिदर्शनं जातमित्याह—तावदिति । तावत् तपःसाधनसंपत्तेः प्राक् सनकाद्यान्मुनीश्वरान् पुरतोऽग्रभागे स नारदः ददर्श । कीदृशान्—कोटिसूर्यसमाभासान् ईश्वरावतारत्वात् बीजे वटप्ररोह इव एतत् संभाव्यते । अथानंतरमुवाच मुनीनां सत्तमः मुनिषु सत्तम इति वा ॥ ४४ ॥ "सर्वार्थसाधका यूयं कृपां कृत्वा ममोपरि । दीने कुरुत तत्सिद्धिं यदहं प्रष्टुमुद्यतः ॥" इति तन्माहात्म्यं प्रकटयति—इदानीमिति षड्भिः इदानीमधुना भूरिभाग्येन महाभाग्येन भवद्भिर्युष्माभिः सह संगमः समागमः स्थितो जातः । हे कुमाराः कुत्सितो मारः कामो येषां ते तथा निष्प्रियत्वात् परिग्रहशून्यत्वाद्वा, जितेंद्रियत्वेन, समाधिनिष्ठत्वाद्वा, प्रथमावस्थाविशिष्टत्वाद्वा, तथोक्तिः । असह्यं ममेदं दुःखमतः शीघ्रं क्षिप्रं ममोपरि कृपां कृत्वा कुमारा इति कर्तृपदमत्र योज्यम् । वदतामित्यार्षः प्रयोगः, वदंत्वित्यर्थः । गुरवस्तु 'गद्यताम्' इति पाठमाहुः । तत्र भवद्भिर्गद्यतामित्यन्वयः । भण्यतामित्यर्थः ॥ ४५ ॥ सर्वे चत्वारो भवन्तः योगिनः प्रशस्तो योगोस्त्येषामिति । प्राशस्त्येर्थे । मत्वर्थीयः । ते तथा बुद्धिमंतः मनीषिणः । बहुश्रुताः बहु भूरि श्रुतं येषां ते तथा । पंचहायनसंयुक्ताः पंच च तानि हायनानि वर्षाणि चेति पंचहायनानि तैः संयुक्ताः, पंचवर्षा इति यावत् । पूर्वेषामपि पूर्वजाः पूर्वं जाताः ॥ ४६ ॥ सदा सर्वस्मिन्काले वैकुण्ठनिलया वैकुंठं निलयः स्थानं येषां ते । तथा हरिकीर्त्तनतत्पराः हरेः कीर्त्तनं तस्मिन् तत्पराः परायणाः लीलामत्स्यकच्छपनृसिंहवराहरामकृष्णादीनां चरित्राणि तान्येवामृतरसाः तैरुन्मत्ता विवशाः कथामात्रैकजीवनाः—विशेष्यविशेषणवाचकपदानां सति विशेषणपदसमवधाने विशेष्यमात्रपरत्वम् । तेनात्र कथामात्रजीवना इत्यर्थो बोध्यः 'स कीचकैर्मारुतपूर्णरंध्रैः' इति रघुवंशे कालिदासोक्तिवत्, "जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः" इति दशमे व्यासोक्तिवच्च, "अयुतयोजनसाहस्रीं शातकौंभीमात्मयोनिपुरीं वदंति" इतिवच्च, कथमात्रमेवैकं जीवनं येषां ते तथा । यद्वा—कथा एव कथामात्रं तदेकं प्रति जीवितुं शीलं येषां ते इति ताच्छील्यार्थे णिनिप्रत्यये । जीविन इति पाठांतरं वा ॥ ४७ ॥ हरिर्हि एव येषां शरणमस्ति, येषां मुखे हरिरिति वचो नित्यमस्ति । यद्वा—'हरिः शरणम्' एवं वचः येषां मुखे नित्यमस्ति । अतः अस्मात्कारणात् हरेः शरणगत्या संततकीर्त्तनाद्धेतोः कालसमादिष्टा कालेनाज्ञप्ता जरावस्था युष्मान् भवतो ना बाधते, विकारं न करोतीत्यर्थः ॥ ४८ ॥ हरेर्द्वारपालौ जयविजयनामानौ

अहो भाग्यस्य योगेन दर्शनं भवतामिह । अनुग्रहस्तु कर्तव्यो मयि दीने दयापरैः ॥ ५० ॥
अशरीरगिरोक्तं यत्तत्किं साधनमुच्यताम् । अनुष्ठेयं कथं तावत्प्रब्रुवंतु सविस्तरम् ॥ ५१ ॥
भक्तिज्ञानविरागाणां सुखमुत्पद्यते कथम् । स्थापनं सर्ववर्णेषु प्रेमपूर्वं प्रयत्नतः ॥ ५२ ॥

कुमारा ऊचुः—मा चिन्तां कुरु देवर्षे हर्षं चित्ते समावह । उपायः सुखसाध्योऽत्र वर्तते पूर्व एव हि ॥ ५३ ॥
अहो नारद धन्योसि विरक्तानां शिरोमणिः । सदा श्रीकृष्णदासानामग्रणीर्योगभास्करः ॥ ५४ ॥
त्वयि चित्रं न मन्तव्यं भक्त्यर्थमनुवर्तिनि । घटते कृष्णदासस्य भक्तेः स्थापनता सदा ॥ ५५ ॥
ऋषिभिर्बहवो लोके पन्थानः प्रकटीकृताः । श्रमसाध्याश्च ते सर्वे प्रायः स्वर्गफलप्रदाः ॥ ५६ ॥
वैकुण्ठसाधकः पन्थाः स तु गोप्यो हि वर्तते । तस्योपदेष्टा पुरुषः प्रायो भाग्येन लभ्यते ॥ ५७ ॥
सत्कर्म तव निर्दिष्टं व्योमवाचा तु यत्पुरा । तदुच्यते शृणुष्वाद्य स्थिरचित्तः प्रसन्नधीः ॥ ५८ ॥
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे । स्वाध्यायज्ञानयज्ञाश्च ते तु कर्मविसूचकाः ॥ ५९ ॥
सत्कर्मसूचको नूनं ज्ञानयज्ञः स्मृतो बुधैः । श्रीमद्भागवतालापः स तु गीतः शुकादिभिः ॥ ६० ॥

पुरा पूर्वं येषां भ्रूभंगमात्रेण भ्रुकुटिपरिवर्त्तनेन सद्यः तत्क्षणमेव भूमौ पृथिव्यां निपतितौ येषां कृपातः कृपयैव परं वैकुण्ठस्थानं गतौ त्रिभिर्जन्मभिः प्राप्तावित्येतदाख्यानं श्रीमद्भागवततृतीयस्कंधे स्पष्टमस्ति ॥ ४९ ॥ भाग्यस्य प्रारब्धस्य योगेन भवताम् इह लोके दर्शनं जातम् । अहो इति आश्चर्यम् । इह बदरीस्थाने । दीने अनाथे मयि दयापरैः कृपापरैर्भवद्भिरनुग्रहः कर्त्तव्यः ॥ ५० ॥ किमर्थमस्मान्स्तौषीत्यत आह—अशरीरेति द्वाभ्याम् । अशरीरगिरा खवाचा यदुक्तं सत्कर्मेति तत्साधनं किम्? इत्युच्यताम् । तावत् प्रथमं कथं केन प्रकारेणानुष्ठेयम् अनुष्ठातुं योग्यम्, तदनुष्ठानं च किमिति फलितोर्थः । सविस्तरं यथा स्यात्तथा भवन्तः प्रब्रुवंतु प्रणिगदंतु ॥ ५१ ॥ भक्तिज्ञानविरागाणां कथं केन प्रकारेण सुखमुत्पद्यते जायते । सर्ववर्णेषु ब्राह्मणादिषु प्रेमपूर्वं प्रयत्नतस्तेषां स्थापनं कथमुत्पद्यते भवेत् ॥ ५२ ॥ कुमारकर्तृकनारदाऽऽश्वासनमाह—मा चिंतामिति । हे देवर्षे हे नारद चिंतां मा कुरु, चित्ते मनसि हर्षं प्रमोदं समावह त्वमाप्नुहि । अत्र अस्मिन् विषये पूर्वोऽनादिरुपायः सुखेन साध्यो वर्त्तते । हि युक्तम् ॥ ५३ ॥ त्वमपि धन्योऽसीत्याह—अहो इति । हे नारद त्वं धन्योसि विरक्तानां मध्ये शिरोमणिः चूडामणिरसि । श्रीकृष्णदासानां सदाऽग्रणीर्मुख्यः, अग्रेचरत्वात् । योगभास्करः योगस्य भास्करः सूर्य इव प्रकाशोऽसि ॥ ५४ ॥ किंच—भक्त्यर्थं भक्तेरर्थाय अनुवर्त्तिनि अनुवर्त्तनशीले त्वयि परदुःखेनात्मनो दुःखित्वमिति चित्रमाश्चर्यं न मंतव्यं न मननीयं, परोपकारित्वात्त्वया युक्तं कृतमित्याह—घटत इति । कृष्णदासस्य श्रीकृष्णभक्तस्य सदा सर्वस्मिन्नेव काले भक्तेः स्थापनता स्थापनत्वं घटते सम्पद्यते ॥ ५५ ॥ तथाहि—ऋषिभिर्विश्वामित्रादिमरीच्यादिभिर्वा लोके जगति बहवः पंथानो मार्गाः प्रकटीकृताः उत्पादिताः, ते सर्वे क्रियाया बाहुल्यात् श्रमसाध्याः खेदेन सिद्ध्यर्हाः, प्रायो बाहुल्येन स्वर्गफलप्रदाः स्वर्गमेव फलं स्वर्गफलं तत् प्रकर्षेण ददतीति तथा ॥ ५६ ॥ पूर्वतो वैलक्षण्यमाह—वैकुंठेति । "यच्छब्देन तु तच्छब्दो बोद्धव्यः सततं बुधैः" इति याज्ञवल्क्यवचनेन यत्तच्छब्दयोः परस्परं नित्यसापेक्षत्वादत्र 'स' इति तच्छब्दस्य प्रयुज्यमानत्वाद्यच्छब्दाध्याहारः कर्त्तव्यः । तथाच—यः पंथा मार्गो वैकुण्ठसाधकः वैकुण्ठस्य सिद्धिहेतुः स तु गोप्यो वर्त्तते गुप्तोऽस्ति । तस्य गुप्तस्य उपदेष्टा उपदेशकर्त्ता पुरुषो हरिभक्तः प्रायो बाहुल्येन भाग्येन लभ्यते ॥ ५७ ॥ 'उपायः सुखसाध्योऽत्र' इति प्रतिज्ञातं वर्णयति—सत्कर्मेति । व्योमवाचा विष्णुपदवाण्या यत्सत्कर्म तव निर्दिष्टं कथितम् । पुरा पूर्वम् । तु पादपूर्त्तौ । तन्मया उच्यते । अद्य इदानीम् । स्थिरं चित्तं यस्य स तथा एकाग्रमनाः, प्रसन्नधीः प्रसन्ना दोषरहिता शुद्धा धीर्यस्य स तथा एवंभूतस्त्वं शृणुष्व श्रवणं कुरु ॥ ५८ ॥ ऋष्युक्तं मार्गबाहुल्यं दर्शयति द्रव्येति—द्रव्ययज्ञा द्रव्यैश्चरुपुरोडाशादिभिः संपाद्या यज्ञा अग्निहोत्रादयः । तपोयज्ञाः कृच्छ्रातिकृच्छ्रपराकसांतपनचांद्रायणादिरूपाः । तथाऽपरे योगयज्ञाः योगः चित्तवृत्तिनिरोधः तेन साध्या यज्ञाः ध्यानसमाध्यादयः । स्वाध्यायः "स्वाध्यायोऽध्येतव्यः" इति वेदाभ्यासः, ज्ञानमात्मानिदर्शनम्, ताभ्यां संपाद्या यज्ञाः । तर्थेति चार्थः ते सर्वे कर्मविसूचकाः कर्माणि विसूचयंतीति तथा ते संति ॥ ५९ ॥ इष्टार्थमाह—सदिति । सत्कर्मसूचकः सत्कर्मणः सूचक उद्बोधको ज्ञानयज्ञो नूनं निश्चयेन बुधैर्विवेकिभिः स्मृत उक्तः । स्पष्टार्थं तं विशिनष्टि—श्रीमदिति । को हि ज्ञानयज्ञ इति संशयनिरासार्थं तद्विशेषणं—श्रीमद्भागवतालाप इति । श्रीमद्भागवतस्य शास्त्रस्य आलापः कथनमिति मन्दमतीनां देवीभागवतभाषणादिशंकां निरस्यति—स तु गीतः शुकादिभिरित्यनेन । स तु स एव श्रीमद्भागवतालापः शुकादिभिर्गीतः । एतेन इदमेव भागवतं शास्त्रमिति सिद्धांतितम् । तत्र प्रमाणमव्यभिचारि "परीक्षिच्छुकसंवादं विद्धि भागवतं हि तत्" इति ॥ ६० ॥

भक्तिज्ञानविरागाणां तद्घोषेण बलं महत् । व्रजिष्यति द्वयोः कष्टं सुखं भक्तेर्भविष्यति ॥ ६१ ॥
प्रलयं हि गमिष्यन्ति श्रीमद्भागवतध्वनेः । कलिदोषा इमे सर्वे सिंहशब्दाद्वृका इव ॥ ६२ ॥
ज्ञानवैराग्यसंयुक्ता भक्तिः प्रेमरसावहा । प्रतिगेहं प्रतिजनं ततः क्रीडां करिष्यति ॥ ६३ ॥
नारद उवाच—वेदवेदान्तघोषैश्च गीतापाठैः प्रबोधितम् । भक्तिज्ञानविरागाणां नोदतिष्ठत्त्रिकं तु यत् ॥ ६४ ॥
श्रीमद्भागवतालापात्तत्कथं बोधमेष्यति । तत्कथासु तु वेदार्थः श्लोके श्लोके पदे पदे ॥ ६५ ॥
छिन्दन्तु संशयं ह्येनं भवंतोऽमोघदर्शनाः । विलम्बो नात्र कर्तव्यः शरणागतवत्सलाः ॥ ६६ ॥
कुमारा ऊचुः—वेदोपनिषदां साराज्जाता भागवती कथा । अत्युत्तमा ततो भाति पृथग्भूता फलोन्नतिः ॥ ६७ ॥
आमूलाग्रं रसस्तिष्ठन्नास्ते न स्वदते यथा । संभूय स पृथग्भूतः फले विश्वमनोहरः ॥ ६८ ॥
यथा दुग्धे स्थितं सर्पिर्न स्वादायोपकल्पते । पृथग्भूतं हि तद्दिव्यं देवानां रसवर्धनम् ॥ ६९ ॥
इक्षूणामादिमध्यान्तं शर्करा व्याप्य तिष्ठति । पृथग्भूता च सा मिष्टा तथा भागवती कथा ॥ ७० ॥
इदं भागवतं नाम पुराणं ब्रह्मसंमितम् । भक्तिज्ञानविरागाणां स्थापनाय प्रकाशितम् ॥ ७१ ॥
वेदान्तवेदसुस्नाते गीताया अपि कर्तरि । परितापवति व्यासे मुह्यत्यज्ञानसागरे ॥ ७२ ॥
तदा त्वया पुरा प्रोक्तं चतुःश्लोकसमन्वितम् । तदीयश्रवणात्सद्यो निर्बाधो बादरायणः ॥ ७३ ॥

तेन त्वन्मनोरथं सेत्स्यतीत्याह—भक्तीति । तद्घोषेण श्रीमद्भागवतशास्त्रशब्देन भक्तिज्ञानविरागाणां भुवि महत् बलं सामर्थ्यं भविष्यति । द्वयोर्ज्ञानवैराग्ययोः कष्टं व्रजिष्यति गमिष्यति । भक्तेः सुखं भविष्यति ॥ ६१ ॥ एतद्ध्वनेरग्रे कलेर्दोषा न तिष्ठंतीत्याह—प्रलयमिति । श्रीमद्भागवतध्वनेः श्रीमद्भागवतस्य ध्वनेर्नादात् सर्वे इमे कलिदोषाः प्रलयं नाशं गमिष्यंति । हि निश्चये । कस्मात्के इव—सिंहशब्दात् वृका इव ॥ ६२ ॥ तन्नाशे फलमाह—ज्ञानेति । प्रेमरसावहा प्रेमैव रसस्तम् आवहतीति तथा । ज्ञानवैराग्याभ्यां संयुक्ता भक्तिः ततस्तदनंतरं प्रतिजनं क्रीडां करिष्यति । सर्वत्र प्रसरिष्यतीति भावार्थः ॥ ६३ ॥ तच श्रुत्वा संदिहानो नारदः स्वाभिप्रायं प्रकाशयन्नाह—वेदेति त्रिभिः । वेदानां वेदांतानां घोषैः शब्दैश्च पुनः गीतापाठैः प्रबोधितं भक्तिज्ञानविरागाणां यत् त्रिकं नोदतिष्ठन् नोत्थितमभूत् । तु पादपूरणे ॥ ६४ ॥ तत् त्रिकं श्रीमद्भागवतालापात् भाषणात् बोधं ज्ञानं कथमेष्यति प्राप्स्यति । एतदेव स्पष्टयति—तदिति । तत्कथासु श्रीमद्भागवतगाथासु वेदार्थः वेदानामर्थः । तु एव । श्लोके श्लोके प्रतिश्लोकं, पदे पदे प्रतिपदं भवति ॥ ६५ ॥ अमोघदर्शनाः न मोघं विफलं दर्शनं येषां ते तथा भवंतो हि एनं संशयं छिंदन्तु । शरणागतवत्सलाः शरणम् आगतस्तत्र वत्सलाः दयालवः, यत्र एवंभूता अतोऽत्र विलंबो न कर्त्तव्यः । भवद्भिरिति शेषः ॥ ६६ ॥ तदुत्तरदानार्थं कुमारोक्तिः नारदं प्रति—श्रीमद्भागवतं शास्त्रं किं वेदबाह्यम्, उत—वेदांतर्गतम् । नाद्यः, अप्रमाणत्वात् । न द्वितीयः, वेदपाठैस्तदनुत्थानादिति नात्र संदेहावसर इत्याह—वेदेति । वेदोपनिषदां वेदाः प्रसिद्धाः, उपनिषदोपि दश एव मुख्या बृहदारण्यच्छांदोग्यादयस्तेषां सारात् भागवती कथा जातोत्पन्ना । ततः तस्मात्कारणात् पृथग्भूता भिन्नाकृतितः फलोन्नतिरौन्नत्यं यस्याः सा, तथात्युत्तमा सर्वतः श्रेष्ठा भाति प्रकाशते ॥ ६७ ॥ फलमूलयोर्गुणतो भेदोस्तीति सूचयति—आमूलाग्रमिति त्रिभिः । आम्रादिवृक्षेषु सोमलतादिवल्लीषु च आमूलाग्रं मूलत आरभ्य अग्रभागपर्यंतं रसः तिष्ठन् वर्तमान आस्ते, यथा येन प्रकारेण न स्वदते नास्वाद्यते । स एव सर्वव्यापि रसः संभूय सारांशतः मिलित्वा पिंडाकारेण आम्रादिजे फले पृथक्कृतः जातः ( सन् ) विश्वमनोहरः विश्वस्य मनो हरतीति तथा भवति ॥ ६८ ॥ स्पष्टीकरणाय दृष्टांतः-दुग्धे स्थितं वर्त्तमानं सर्पिर्घृतं स्वादाय यथा नोपकल्पते न योग्यं भवति, पृथग्भूतं दध्याकारेण परिणामं प्राप्तात् दुग्धात् मंथनविलोडनतः पृथक् संजातं तत् ( घृतम् ) देवानां रसं वर्द्धयतीति तथा भवति । हि लोकप्रसिद्धमेतत् ॥ ६९ ॥ उक्तार्थदृढीकरणाय पुनर्दृष्टांतः—इक्षूणाम् आदिमध्यांतं सर्वांगं व्याप्य शर्करा यथा तिष्ठति, सा शर्करा पृथग्भूता इक्षुदण्डान्निष्पीड्य पृथक्कृता सती मिष्टा भवति, तथा तेनैव प्रकारेण भागवती कथा वेदवेदान्तेभ्योऽत्युत्तमा भवतीत्यर्थः ॥ ७० ॥ उक्तार्थे हेतुमाह—इदमिति । इदं भागवतम् । नामेति पादपूर्त्तावव्ययम् । यद्वा-नामेति प्रसिद्धौ प्रसिद्धं भागवतमित्यर्थः, पुराणम्—ब्रह्मसंमितम् ब्रह्मभिः चतुर्भिर्वेदैः संमितं तुल्यमस्ति । परं प्रयोजनमस्याह-भक्तीति । भक्तिज्ञानविरागाणां स्थापनाय स्थापनार्थं प्रकाशितं व्यासेन ॥ ७१ ॥ तत्रायमविवेको भ्रांत्या जात इति संस्मारयन् पूर्ववृत्तांतमाह—वेदांतेति त्रिभिः । वेदांतेषु वेदेषु च सुस्नाते निपुणे । गीताया इत्युपलक्षणम्, इतिहासपुराणानां सर्वशास्त्रमय्या गीताया अपि कर्त्तरि स्रष्टरि व्यासे परितापवति परितापो मानसं दुःखं तद्वति अज्ञानसागरे अविद्यासागरे मुह्यति सति मोहं प्राप्ते सति ॥ ७२ ॥ तदा तस्मिन्काले चतुःश्लोकसमन्वितं श्लोकचतुष्टयसम्पन्नं मूलं श्रीमद्भागवतं त्वया पुरा पूर्वं व्यासाय प्रोक्तम् । तदीयश्रवणात्

तत्र ते विस्मयः केन यतः प्रश्नकरो भवान् । श्रीमद्भागवतश्रावे शोकदुःखविनाशनम् ॥ ७४ ॥

नारद उवाच—यद्दर्शनं च विनिहन्त्यशुभानि सद्यः श्रेयस्तनोति भवदुःखदवार्दितानाम् ।
निःशेषशेषमुखगीतकथैकपानाः प्रेमप्रकाशकृतये शरणं गतोस्मि ॥ ७५ ॥
भाग्योदयेन बहुजन्मसमार्जितेन सत्संगमेव लभते पुरुषो यदा वै ।
अज्ञानहेतुकृतमोहमदान्धकारनाशं विधाय हि तदोदयते विवेकः ॥ ७६ ॥

इति श्रीपद्मपुराण उत्तरखण्डे श्रीभागवतमाहात्म्ये कुमारनारदसंवादो नाम द्वितीयोऽध्यायः ॥ २ ॥

## अथ तृतीयोऽध्यायः

नारद उवाच—ज्ञानयज्ञं करिष्यामि शुकशास्त्रकथोज्ज्वलम् । भक्तिज्ञानविरागाणां स्थापनार्थं प्रयत्नतः ॥ १ ॥
कुत्र कार्यो मया यज्ञः स्थलं तद्वाच्यतामिह । महिमा शुकशास्त्रस्य वक्तव्यो वेदपारगैः ॥ २ ॥
कियद्भिर्दिवसैः श्राव्या श्रीमद्भागवती कथा । को विधिस्तत्र कर्तव्यो ममेदं वदतामितः ॥ ३ ॥

कुमारा ऊचुः—शृणु नारद वक्ष्यामो विनम्राय विवेकिने । गंगाद्वारसमीपे तु तटमानन्दनामकम् ॥ ४ ॥
नानाऋषिगणैर्जुष्टं देवसिद्धनिषेवितम् । नानातरुलताकीर्णं नवकोमलवालुकम् ॥ ५ ॥
रम्यमेकांतदेशस्थं हेमपद्मसुशोभितम् । यत्समीपस्थजीवानां वैरं चेतसि न स्थितम् ॥ ६ ॥

तदीयानां पदार्थानां श्रवणात् बादरायणो व्यासः सद्यस्तत्कालं निर्बाधः बाधारहितो जातः, मनःसंतुष्टेः ॥ ७३ ॥ तत्र तस्मिन श्रीमद्भागवते शास्त्रे केन हेतुना ते तव वेदवेदांतगीतापाठैर्भक्त्यादित्रिकं नोत्थितं तत् श्रीमद्भागवतालापात्कथं बोधमेष्यतीति विस्मयोऽस्ति, यतो हेतोः भवान् प्रश्नकरो भवति । निश्चितमेतस्य फलमाह—श्रीमदिति । श्रीमद्भागवतस्य श्रावे श्रवणे शोकदुःखयोर्विनाशनमिति ॥ ७४ ॥ तदुपदेशेन विस्मृतमणिलाभजातानन्दो नारदो वक्ति-यदिति । भवदुःखदवार्दितानां भवे जन्मादिरूपे संसारे दुःखानि असंख्यातानि वसिष्ठसारादौ निदर्शितानि तान्येव दवोऽग्निस्तेनार्दितानां पीडितानां पुंसाम्, यद्दर्शनं येषां दर्शनं सद्यस्तत्क्षणे अशुभानि दुःखानि विनिहंति निःशेषतो नाशयति, च पुनः श्रेयो मंगलं तनोति विस्तारयति । हे निःशेषशेषमुखगीतकथैकपानाः निःशेषाणि समग्राणि सहस्रसंख्यापरिमितानि शेषस्य मुखानि तैः गीता याः कथाः तासामेकं पानं येषां ते तथा । अहं शरणं गतोस्मि प्राप्तोस्मि । भवतामिति शेषः । किमर्थं, तत्राह—प्रेमप्रकाशकृते प्रेम्णः प्रकाशकरणार्थम् ॥ ७५ ॥ सत्संगफलमाह—भाग्येति । बहुजन्मसमार्जितेन बहुषु जन्मसु समार्जितेन संपादितेन भाग्योदयेन यदा यस्मिन्काले पुरुषः सत्संगं लभते प्राप्नोति । एव निश्चये । तदा तस्मिन्काले विवेको ज्ञानमुदयते उत्पद्यते । किं कृत्वेत्यपेक्षायामाह—अज्ञानेति । अज्ञानमेव हेतुः कारणं तेन कृतो यो मोहः स एव महांधकारो गाढं तमस्तस्य नाशं विधाय कृत्वा । हि युक्तोऽयमर्थः ॥ ७६ ॥

इति श्रीशेखावाटथ्यंतर्गतविजयपुरनिवासिव्राजलालिपंडितरामप्रतापविरचितायां
श्रीमद्भागवतमाहात्म्यटीकायामृजुनाम्न्यां द्वितीयोऽध्यायः ॥ २ ॥

श्रद्धाय सनकाद्युक्तं ज्ञानयज्ञविधानकम् । संपृच्छ्य नारदश्चक्रे श्रवणं तन्मुखेन वै ॥ १ ॥

"सत्कर्मसूचको नूनं ज्ञानयज्ञः स्मृतो बुधैः" इति सनकादिवाक्यं श्रद्धाय तेनैवोत्तरग्रन्थस्य संगतिं सूचयन् ब्रवीति नारदः—ज्ञानमिति । भक्तिज्ञानविरागाणां स्थापनार्थं प्रयत्नतः प्रकृष्टेन यत्नेन ज्ञानयज्ञमहं करिष्यामि । वेदांतविचारनिरासाय कर्म विशिनष्टि—शुकेति । शुकस्य शास्त्रं श्रीमद्भागवतं तस्य कथा तयोज्ज्वलं प्रकाशितम् ॥ १ ॥ तद्विधानं पृच्छति—कुत्रेति द्वाभ्याम् । यज्ञो ज्ञानयज्ञः कुत्र कस्मिन्स्थाने मया कार्यः कर्त्तव्यः, तत्स्थलं स्थानं भवद्भिर्वाच्यताम् । निवृत्तप्रेषणत्वादुच्यतामित्यर्थः । इह लोके । किञ्च—वेदस्य पारगैः पारं गतैः शुकशास्त्रस्य श्रीमद्भागवतस्य महिमा माहात्म्यं वक्तव्यः ॥ २ ॥ श्रीमद्भागवती कथा कियद्भिः किंप्रमाणैर्दिवसैर्दिनैः श्राव्या श्रोतुं योग्या । अत्र 'सेव्या' इति पाठो युक्तः, प्रक्रमोपसंहारयोरैक्यात् । तत्र श्रवणे को विधिः किं विधानं कर्त्तव्यः, मम मह्यम् इतः एतस्मात्कारणात् इदं वदताम् उच्यताम्, संप्रसारणाभावश्चार्षः ॥ ३ ॥ कुमारा नारदं प्रति स्थलनिरूपणपूर्वकं ज्ञानयज्ञकरणं तत्फलं च निरूपयन्ति—शृण्वित्यादिषड्भिः । हे नारद पृष्टं स्थलादिकं त्वं शृणु, विनम्राय विशेषेण नम्रीभूताय विवेकिने विवेको विचारस्तद्वते तुभ्यं वयं वक्ष्यामः । तथाहि—गंगाद्वारस्य समीपे आनन्दनामकं तटमस्ति ॥ ४ ॥ तद्विशेषणानि—नानाऋषिगणैर्जुष्टं सेवितं देवैः सिद्धैश्च निषेवितं नाना बहुप्रकारास्तरवो वृक्षास्तेषां लताभिराकीर्णं व्याप्तं, नवा नूतना मृदुला वालुका यस्मिंस्तत्तथा ॥ ५ ॥ रम्यं रमणीयम् एकांतदेशस्थम् एकांतदेशे वर्तमानम् । हैमानि स्वर्णमयानि पद्मानि कमलानि तैः सुशोभितमतिसुन्दरम् ।

ज्ञानयज्ञस्त्वया तत्र कर्तव्यो ह्यप्रयत्नतः । अपूर्वा रसरूपा च कथा तत्र भविष्यति ॥ ७ ॥
पुरःस्थं निर्बलं चैव जराजीर्णकलेवरम् । तद्द्वयं च पुरस्कृत्य भक्तिस्तत्रागमिष्यति ॥ ८ ॥
यत्र भागवती वार्ता तत्र भक्त्यादिकं व्रजेत् । कथाशब्दं समाकर्ण्य तत्त्रिकं तरुणायते ॥ ९ ॥

सूत उवाच—एवमुक्त्वा कुमारास्ते नारदेन समं ततः । गंगातटं समाजग्मुः कथापानाय सत्वराः ॥ १० ॥
यदा यातास्तटं ते तु तदा कोलाहलोऽप्यभूत् । भूर्लोके देवलोके च ब्रह्मलोके तथैव च ॥ ११ ॥
श्रीभागवतपीयूषपानाय रसलम्पटाः । धावन्तोऽप्याययुः सर्वे प्रथमं ये च वैष्णवाः ॥ १२ ॥
भृगुर्वसिष्ठश्च्यवनश्च गौतमो मेधातिथिर्देवलदेवरातौ ।
रामस्तथा गाधिसुतश्च शाकलो मृकण्डपुत्रोऽत्रिजपिप्पलादाः ॥ १३ ॥
योगेश्वरो व्यासपराशरौ च च्छायाशुको जाजलिजह्नुमुख्याः ।
सर्वेऽप्यमी मुनिगणाः सहपुत्रशिष्याः स्वस्त्रीभिराययुरतिप्रणयेन युक्ताः ॥ १४ ॥
वेदान्तानि च वेदाश्च मन्त्रास्तन्त्राः समूर्तयः । दश सप्त पुराणानि षट् शास्त्राणि तथाऽऽययुः ॥ १५ ॥

तत्प्रभावमाह—यदिति । यस्य समीपे स्थितानां जीवानां चेतसि मनसि वैरं विरोधः न स्थितम्, न वर्त्तेत इत्यर्थः ॥ ६ ॥ तत्र तस्मिन्स्थाने ज्ञानयज्ञस्त्वया कार्यः, अप्रयत्नतः प्रयत्नं विनैवेति तन्महिमा । हि युक्तम् । तत्रोक्तस्थले अपूर्वा नवीना रसरूपा रसप्रधाना कथा भविष्यति प्रवर्त्तिष्यते ॥ ७ ॥ तत्रैव भक्तिरागमिष्यति । किं कृत्वा—तद्द्वयं तयोर्ज्ञानवैराग्ययोर्द्वयं पुरस्कृत्य अग्रे कृत्वा । कीदृशं तदित्यपेक्षायामाह—पुरःस्थमिति—स्वाग्रे स्थितम् । निर्बलं बलरहितम् । जराजीर्णकलेवरं जरया जीर्णे उत्थानाद्यसमर्थे कलेवरे शरीरे यस्य तत्तथा ॥ ८ ॥ "श्रीरामचरितोच्चारे वायुसूनोः समागमः । महाभारतसंश्रावे ह्यश्वत्थामागमस्तथा । विरामे निर्गमो वित्तः किंवदन्तीति निश्चितम् ।" तद्वदत्रापि भक्त्यादेरागमो मुनिभिः स्मृत इति लोकप्रसिद्धिं सूचयन्नाह—यत्रेति । यत्र स्थाने भागवती वार्त्ता भवेत्, तत्र स्थाने भक्त्यादिकं व्रजेदागच्छेत् । तत्त्रिकं भक्त्यादीनां त्रयं तरुणायते तरुण इवाचरति । किं कृत्वा—कथाशब्दं कथोच्चारं समाकर्ण्य संश्रुत्य ॥ ९ ॥ ततस्तेषामागमनमाह—एवमिति । एवं पूर्वोक्तप्रकारेणोक्त्वा ते प्रसिद्धाः कुमाराः सनकादयः नारदेन समं सह ततो बदरीस्थानात् सत्वराः त्वरया सहिताः शीघ्रगामिनो गंगातटं समाजग्मुः स्वर्नद्यास्तटं समायाताः । किमर्थमित्यपेक्षायामाह—कथेति । कथापानाय लोकानां कथारसपानार्थम्[१] । तादर्थ्ये[२] चतुर्थी । अत्र वर्णद्वयलोपविधिः शिक्षायां शौनकोक्तः । तद्वाक्यम्—"यथा वर्णस्य वर्णयोर्लोपो बहूनां वा कदाचन ।" विराटपर्वण्युत्तरं प्रति विराटोक्तिः—'अत्र मध्ये यथार्कस्य' इति तट्टीकायां सोदाहरणं नीलकंठेन निरूपितं द्रष्टव्यम् ॥ १० ॥ तद्वृत्तं सर्वत्र प्रविसृतमित्याह—यदेति । यदा यस्मिन्काले ते सनारदाः सनकादयस्तटम् । गंगाया इति शेषः । याताः प्राप्ताः, तदा तस्मिन्काले भूर्लोके पृथिव्याम् । च पुनः । देवलोके स्वर्गे । तथैव च तेनैव विधया ब्रह्मलोके सत्यलोके कोलाहलः कलकलध्वनिरप्येवाऽभूत् ॥ ११ ॥ तच्छ्रुत्वा श्रोतॄणामागमनं निरूपयति—श्रीभागवतेति त्रिभिः । प्रथममादौ रसलंपटाः रसास्वादिनो ये वैष्णवा जनाः ते सर्वे धावंतः शीघ्रतां कुर्वंतः तत्रानन्दनामाख्ये तटे ऽपि निश्चयेनाययुराजग्मुः । किमर्थम्—श्रीभागवतस्य पीयूषस्यामृतरूपस्य पानाय पानार्थम् ॥ १२ ॥ तान्नामभिर्निर्दिशति—भृग्वादयश्चत्वारः प्रसिद्धाः । मेधातिथिः बलिवैश्वदेवकर्मांते आगते—अतिथौ मेधा विष्णुरूपा बुद्धिर्यस्य स तथा । देवलः प्रसिद्धः, देवरातो याज्ञवल्क्यः । रामः परशुरामः । तथा तेनैव प्रकारेण गाधिसुतो विश्वामित्रः । शाकलो मुनिः । मृकण्डपुत्रो मार्कंडेयः । अत्रिजो दत्तात्रेयः । पिप्पलादाः, बहुत्वं गोत्राभिप्रायेण ॥ १३ ॥ योगेश्वरो वामदेवः । व्यासपराशरौ प्रसिद्धौ । छायाशुको व्यासमोहनिरासाय छायया रचितः । जाजलिर्जह्नुश्च मुख्यौ प्रधानौ येषां ते तथा । सर्वेऽप्येवामी पूर्वोक्ता मुनिगणा मुनीनां गणाः समूहाः सहपुत्रशिष्याः पुत्रैः शिष्यैश्च सहिताः स्वस्त्रीभिः समं स्वनारीभिः सहातिप्रणयेनातिप्रेम्णा युक्ताः सन्तः आययुः । स्त्रीपुत्रशिष्याणामानयनम् "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति सत्सम्प्रदायमार्गोपदेशार्थमिति बोध्यम् ॥ १४ ॥ श्रीमद्भागवतस्य सर्वतः श्रैष्ठ्यं निरूपयति—वेदेति सार्द्धाभ्यां द्वाभ्याम् । तदा तस्मिन्नेव काले वेदांतानि दशोपनिषदः, वेदा ऋगाद्याः, च पुनः मन्त्राः संजीवनादयः । तन्त्रा ब्रह्मयामलोक्ताः रावणादिकृतडामरोक्ता वेति केचित् । गुरवस्तु नारदपंचरात्रोक्ता इत्याहुः । ननु जडानां तेषां कथमागमनं घटतेत्यत्राह—समूर्त्तयः मूर्तिमंतः, तदधिष्ठातृदेवानां चेतनत्वात् । एवमग्रेपि । दश सप्त पुराणानि सप्तदशसंख्यानीत्यर्थः । षट् शास्त्राणि—

१. अथवा—"क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इत्यप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी । कथारसपानं कर्तुमित्यर्थः ।
२. वस्तुतस्तु कथापानार्थेऽत्र पानार्थः सप्रेमश्रवणरूपः । तत्र रसशब्दानयनाय विशेषाऽऽग्रहो नावश्यक इति ।

गंगाद्याः सरितस्तत्र पुष्करादिसरांसि च । क्षेत्राणि च दिशः सर्वा दण्डकादिवनानि च ॥ १६ ॥
नगादयो ययुस्तत्र देवगन्धर्वकिन्नराः । गुरुत्वात्तत्र नायातान्भृगुः संबोध्य चानयत् ॥ १७ ॥
दीक्षिता नारदेनाथ दत्तमासनमुत्तमम् । कुमारा वन्दिताः सर्वैर्निषेदुः कृष्णतत्पराः ॥ १८ ॥
वैष्णवाश्च विरक्ताश्च न्यासिनो ब्रह्मचारिणः । मुख्यभागे स्थितास्ते च तदग्रे नारदः स्थितः ॥ १९ ॥
एकभागे ऋषिगणास्तदन्यत्र दिवौकसः । वेदोपनिषदोऽन्यत्र तीर्थान्यत्र स्त्रियोऽन्यतः ॥ २० ॥
जयशब्दो नमःशब्दः शंखशब्दस्तथैव च । चूर्णलाजाप्रसूनानां निक्षेपः सुमहानभूत् ॥ २१ ॥
विमानानि समारुह्य कियंतो देवनायकाः । कल्प[1]वृक्षप्रसूनानां सर्वास्तत्र समाकिरन् ॥ २२ ॥

सूत उवाच—एवं तेष्वेकचित्तेषु श्रीमद्भागवतस्य च । माहात्म्यमूचिरे स्पष्टं नारदाय महात्मने ॥ २३ ॥
कुमारा ऊचुः—अथ ते संप्रवक्ष्यामो महिमा शुकशास्त्रतः । यस्य श्रवणमात्रेण मुक्तिः करतले स्थिता ॥ २४ ॥
सदा सेव्या सदा सेव्या श्रीमद्भागवती कथा । यस्याः श्रवणमात्रेण हरिश्चित्तं समाश्रयेत् ॥ २५ ॥

गौतम-कणाद-कपिल-पतञ्जलि-व्यास-जैमिनि-प्रणीतानि तस्मिन्नेवावसरे आगम्यः आजग्मः ॥ १५ ॥ गंगाद्याः गंगा आद्या प्रधाना यासां तास्तथा । अतद्गुणसंविज्ञानबहुव्रीहिणात्र यमुनाद्या बोध्याः, गंगायास्तत्रैव विद्यमानत्वात् । सरितो नद्यः । च पुनः । दशैव । पुष्करादिसरांसि, क्षेत्राणि कुरुक्षेत्रादीनि, दिशः पूर्वाद्याः, सर्वा चतस्रो वेति केचित् । दंडकादीनि वनानि । स्पष्टोऽर्थः ॥ १६ ॥ नगादयो मेर्वाद्या हिमालयाद्या वा तत्रोक्तस्थाने ययुः । देवाश्च गंधर्वाश्च किन्नराश्चेति ते तथा । गृहाद्यासक्तान पामरान भृगुरबोधयदित्याह—गुरुत्वादित्यर्द्धेन । तत्रोक्तस्थाने धनतृष्णया नायातान अनागतान भृगुरानयत् । किं कृत्वा—संबोध्य,—रे रे मंदाः किमर्थं नो व्रजथ अयं समागमो देवानामपि दुर्लभ इति विज्ञाप्य । ननु "प्रयोजनमनुद्दिश्य न मंदोऽपि प्रवर्त्तते" इति वचनाद्विनार्थं भृगुपरिश्रमो व्यर्थ इति चेदुच्यते—गुरुत्वादिति प्रसिद्ध्या शिष्योपदेशो युक्त इत्यर्थः ॥ १७ ॥ ततः परं किं जातमित्यत आह—दीक्षिता इति । दीक्षा संजाता येषां ते तथाभूताः कुमाराः सनकादयः पूर्वैरागतैः सर्वैर्वंदिताः नमस्कृताः कृष्णपरायणाः नारदेन दत्तमासनं निषेदुरधिष्ठिता बभूवुः । दीक्षितेति नारदविशेषणे आर्षोऽवर्णलोपः "विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे" इत्युक्तेः ॥ १८ ॥ इदानीं श्रोतृणामासनप्रकारमाह—वैष्णवा इति । वैष्णवा विष्णूपासकाः च पुनः विरक्ता वीतरागाः, च पुनः न्यासिनः संन्यासिनः, ब्रह्मचारिणोपि मुख्यभागे सर्वाग्रे स्थिता निषण्णाः । तदग्रे तेषामग्रे पुरो नारदः स्थितः, मुख्यश्रोतृत्वात्समागमसंपादकत्वाद्वा ॥ १९ ॥ अन्येषां स्थितिं पृथक्पृथगाह—एकभाग इति । ऋषीणां गणा एकभागे एकत्र, दिवौकसो देवाः तदन्यत्र ऋषिस्थानादन्यत्र, वेदोपनिषदोऽन्यत्र अन्यस्थाने, अन्यत्र भिन्नस्थाने तीर्थानि, तीर्थान्यन्यत्रेति वाच्ये वर्णलोप आर्षः, छन्दोऽनुरोधात् । स्त्रीयः अन्यतः—सप्तम्यर्थे तसिल्प्रत्ययादन्यत्रेत्यर्थः । स्थिता बभूवुरिति शेषः ॥ २० ॥ ततो मंगलध्वनिरभूदित्याह—जयेति । पूर्वार्द्धं स्पष्टम् । चूर्णानि कुङ्कुमतैललवंगकर्पूरादिसुगंधिद्रव्याणि, लाजा भर्जितास्तण्डुलाः 'खील' इति भाषायाम् । 'लाजा भृष्टयवे स्त्रियाम्' इत्यमरोक्तेः । अत्र यवशब्दोऽक्षतपरः 'अक्षतास्तु यवाः प्रोक्ता' इति वचनात् । प्रसूनानि पुष्पाणि, तेषां निक्षेपः पातनं सुमहान् भूयानभूत् ॥ २१ ॥ तत्राप्यौत्सुक्यमाह—विमानानीति । कियंतः कतिपयाः देवनायकाः देवप्रणेतारः विमानानि सप्तनवभूमिकानि स्थानानि विमानानीत्युच्यंते तानि समारुह्य समारोहणं कृत्वा कल्पवृक्षपुष्पैः । तृतीयार्थे षष्ठीयम् । "नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः" इतिवत् । तत्र स्थाने सर्वान् श्रोतुमागतान्समाकिरन् समाच्छादयन्, समावृण्वन्निति यावत् ॥ २२ ॥ सूतः शौनकं प्रति कथारंभमाह—एवमिति । एवमुक्तविधया तेषु श्रोतृषु एकचित्तेषु एकस्मिन्कथारसपाने चित्तं येषां ते तथा तेषु । यद्वा—एकम् एकाग्रं चित्तं येषां त इति वा, वर्णलोपोऽत्र छान्दसो विज्ञेयः । एवंभूतेषु सत्सु श्रीमद्भागवतस्य माहात्म्यं महिमानं स्पष्टं यथा स्यात्तथा महात्मने पूज्याय नारदाय सनकाद्या ऊचिरे वर्णयांचक्रुः ॥ २३ ॥ कुमारोक्तिः नारदं प्रति । तत्प्रकारमाह—अथेति । अथेति मंगलं प्रारंभे । शुकशास्त्रतः इत्यत्र षष्ठ्यर्थे तसिल्प्रत्ययः, तेन शुकशास्त्रस्येत्यर्थः । महिमा महिमानं ते तुभ्यं संप्रवक्ष्यामो वयं संवर्णयिष्यामः, यस्य श्रवणमात्रेण श्रवणादेव निष्कामानां मुक्तिः; सकामानां साधनसंपत् करतले स्थिता, हस्तगता भवेदित्यर्थः । अपरे तु 'महित्वं शुकशास्त्रजम्' इति पाठमाहुः । गुरवस्तु—'अथ ते वर्ण्यतेऽस्माभिः' इति सम्प्रदायानुसारेण वदंति; तत्क्रमम् ॥ २४ ॥ कियद्भिर्दिवसैः श्राव्येति दिननियममपाकुर्वन्नाह—सदेति । श्रीमद्भागवती कथा सदा सेव्या सदा सेव्येति वीप्सया यावज्जीवं सेवनीयेत्यर्थः । एतेन दिनानां नियमो नास्तीति ध्वनितम् । तत्फलमाह—यस्याः कथायाः श्रवणमात्रेण हरिश्चित्तं

---

1 प्रसूनानीति द्वितीयान्तपाठे तु समागतान् सर्वान्प्रति कल्पवृक्षप्रसूनानि समाकिरन्नित्यन्वयः ।

ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसंमितः । परीक्षिच्छुकसंवादः शृणु भागवतं च तत् ॥ २६ ॥
तावत्संसारचक्रेऽस्मिन्भ्रमतेऽज्ञानतः पुमान् । यावत्कर्णगता नास्ति शुकशास्त्रकथा क्षणम् ॥ २७ ॥
किं श्रुतैर्बहुभिः शास्त्रैः पुराणैश्च भ्रमावहैः । एकं भागवतं शास्त्रं मुक्तिदानेन गर्जति ॥ २८ ॥
कथा भागवतस्यापि नित्यं भवति यद्गृहे । तद्गृहं तीर्थरूपं हि वसतां पापनाशनम् ॥ २९ ॥
अश्वमेधसहस्राणि वाजपेयशतानि च । शुकशास्त्रकथायाश्च कलां नार्हन्ति षोडशीम् ॥ ३० ॥
तावत्पापानि देहेऽस्मिन्निवसन्ति तपोधनाः । यावन्न श्रूयते सम्यक्छ्रीमद्भागवतं नरैः ॥ ३१ ॥
न गंगा न गया काशी पुष्करं न प्रयागकम् । शुकशास्त्रकथायाश्च फलेन समतां नयेत् ॥ ३२ ॥
श्लोकार्द्धं श्लोकपादं वा नित्यं भागवतोद्भवम् । पठस्व स्वमुखेनैव यदीच्छसि परां गतिम् ॥ ३३ ॥
वेदादिर्वेदमाता च पौरुषं सूक्तमेव च । त्रयी भागवतं चैव द्वादशाक्षरमेव च ॥ ३४ ॥
द्वादशात्मा प्रयागश्च कालः संवत्सरात्मकः । ब्राह्मणाश्चाग्निहोत्रं च सुरभिर्द्वादशी तथा ॥ ३५ ॥
तुलसी च वसन्तश्च पुरुषोत्तम एव च । एतेषां तत्त्वतः प्राज्ञैर्न पृथग्भाव इष्यते ॥ ३६ ॥
यश्च भागवतं शास्त्रं वाचयेदर्थतोऽनिशम् । जन्मकोटिकृतं पापं नश्यते नात्र संशयः ॥ ३७ ॥
श्लोकार्द्धं श्लोकपादं वा पठेद्भागवतं च यः । नित्यं पुण्यमवाप्नोति राजसूयाश्वमेधयोः ॥ ३८ ॥

समाश्रयेत् मनः संयायात् ॥ २५ ॥ किंप्रमाणं भागवतं, कतिविभागास्तस्य, कियंतोऽध्याया इत्यपेक्षायामाह—ग्रंथ इति । ग्रंथः शास्त्रम् अष्टादशसाहस्रः अष्टादशसहस्रश्लोकात्मकः द्वादश स्कंधास्तैः संमितः प्रमितः, परीक्षिच्छुकसंवादः परीक्षिते शुकस्य संकथनं यस्मिन्नित्यर्थो बोध्यः, द्वंद्वे[1]दोषोत्पत्तेः । तत् भागवतं शास्त्रं त्वं शृणु ॥ २६ ॥ किं तच्छ्रवणेनेत्यत आह—तावदिति । अस्मिन्संसारचक्रेऽज्ञानतः पुमान् तावत् भ्रमते शुकशास्त्रस्य श्रीमद्भागवतस्य कथा क्षणं क्षणमात्रं कर्णगता श्रोत्रं प्राप्ता यावन्नास्तीति योजना ॥ २७ ॥ "विचित्रशास्त्रसंश्रुत्या जायते निश्चितं भ्रमः । सर्वशास्त्रफलाधिक्यान्मुक्त्यै भागवतं वरम् ॥" इत्याह षड्भिः—किं श्रुतैरित्यादिभिः । श्रुतैर्बहुभिः शास्त्रैः किं. पुराणैः किं, न किमपि, यतो भ्रमावहैः भ्रमप्रापिकैः । भागवतमेकं शास्त्रं श्रोतृभ्यो मुक्तिदानेन गर्जति शब्दं करोति ॥ २८ ॥ यद्गृहे यस्य गेहे श्रीमद्भागवतस्य कथा भवति, तद्गृहं तीर्थरूपम् । तीर्थसममिति मंदाः ; प्रशस्तं तीर्थमिति गुरवः । वसतां तद्गृहे वसतां निवासकर्तॄणां पुंसां पापनाशनं पापानां नाशकर्तृ । हि युक्तोऽयमर्थः ॥ २९ ॥ अश्वमेधाख्यस्य यज्ञस्य सहस्राणि. च पुनः वाजपेयाख्यस्य यज्ञस्य शतानि, शुकशास्त्रकथायाः श्रीमद्भागवतगाथायाः षोडशीं कलां नृपसंख्यासंमितं विभागं नार्हंति. षोडशकलातुल्यतां न प्राप्नुवन्तीत्यर्थः ॥ ३० ॥ हे तपोधनाः हे शौनकादयः ! नरैः पुंभिः श्रीमद्भागवतं न श्रूयते भागवतशास्त्रस्य श्रवणं न क्रियते यावत् तावदेवाऽस्मिन् शरीरे पापानि निवसंति तिष्ठंति ॥ ३१ ॥ च पुनः शुकशास्त्रकथायाः फलेन समतां तुल्यतां गंगा भागीरथी न नयेत् न प्राप्नुयात् । एवं गयादयोपि समतां न प्राप्नुयुरिति भावार्थः । खंडान्वये तु गंगावदन्वयः ॥३२॥ भागवतोद्भवं भागवतादुत्पन्नमिति व्याख्यानेऽन्यस्य प्रतीतिर्जायतेऽतः भागवते उद्भव उत्पत्तिः, वर्तमानतेति यावत् । यस्येति सप्तमीतत्पुरुषो युक्तः । श्लोकार्द्धं श्लोकस्यार्द्धं पादद्वयम् । श्लोकस्य पादं चतुर्थांशं वा नित्यं प्रतिदिनं नियमेन स्वमुखेन स्वकीयास्येन पठस्व त्वं पठनं कुरु इति नारदं प्रत्युक्तिः । यदि परां गतिमिच्छसि वांछसि तदा, एतेनैतत्पठनमेव मुक्तिहेतुरिति सूचितम् ॥ ३३ ॥ किंचान्येषामपि तद्वन्माहात्म्यमिति सूचयति–वेदेति त्रिभिः । वेदादिरोंकारः, च पुनः वेदमाता गायत्री, पौरुषं सूक्तम् "सहस्रशीर्षा" इति षोडशमंत्ररूपम् । एवं चेति निश्चितम् । त्रयी वेदत्रयी ऋग्यजुःसामात्मिका, भागवतमिदम् । चैवेति पूर्ववत्पादपूरणार्थं वा । द्वादशाक्षरम्—'ॐ नमो भगवते वासुदेवाय' इति मंत्रः ॥ ३४ ॥ द्वादशात्मा मासभेदेन द्वादशमूर्तिः श्रीसूर्यः, प्रयागस्तीर्थराजः, संवत्सरात्मकः कालः प्रसिद्धः, ब्राह्मणाः ब्रह्ममुखोद्भवा विप्राः, च पुनः । अग्निहोत्रम् "यावज्जीवमग्निहोत्रं जुहोति" इत्यभिहितम् । द्वितीयश्चकारः पादपूरणार्थः । सुरभिः कामधेनुः, द्वादशी तिथिः ॥ ३५ ॥ तुलसी प्रसिद्धा, च पुनः वसंतऋतुः, पुरुषोत्तमः श्रीनारायणः । एव चेत्युक्तवत् । एतेषामुक्तानां प्राज्ञैः पण्डितैः तत्त्वतः याथार्थ्येन पृथग्भावः भिन्नत्वं न इष्यते न वांछ्यते । मूढानां भेदव्यपदेश इति फलितोर्थः ॥ ३६ ॥ अर्थत एतद्वाचने फलमाह—यश्चेति । यश्च पुण्यात्मा महाभागो वाऽनिशमहोरात्रं प्रतिदिनं वा श्रीमद्भागवतं शास्त्रमर्थतो वाचयेत् तस्य जन्मकोटिकृतं जन्मनां कोटयस्ताकृत

१. परीक्षित्कर्तृककथनभ्रान्त्येत्यादिः । वस्तुतस्तु संवदतेः परस्परकथन एव शक्त्या प्रश्नविभागस्य परीक्षितोक्तत्वादपि द्वन्द्वेऽपि न दोष इति भाति ।

उक्तं भागवतं नित्यं कृतं च हरिचिन्तनम् । तुलसीपोषणं चैव धेनूनां सेवनं समम् ॥ ३९ ॥
अन्तकाले तु येनैव श्रूयते शुकशास्त्रवाक् । प्रीत्या तस्यैव वैकुण्ठं गोविन्दोऽपि प्रयच्छति ॥ ४० ॥
हेमसिंहयुतं चैतद्वैष्णवाय ददाति च । कृष्णेन सह सायुज्यं स पुमाल्लँभते ध्रुवम् ॥ ४१ ॥
आजन्ममात्रमपि येन शठेन किंचिच्चित्तं विधाय शुकशास्त्रकथा न पीता ।
चाण्डालवच्च खरवद्बत तेन नीतं मिथ्या स्वजन्म जननी जनिदुःखभाजा ॥ ४२ ॥
जीवञ्छवो निगदितः स तु पापकर्मा येन श्रुतं शुककथावचनं न किञ्चित् ।
धिक्तं नरं पशुसमं भुवि भाररूपमेवं वदन्ति दिवि देवसमाजमुख्याः ॥ ४३ ॥
दुर्लभैव कथा लोके श्रीमद्भागवतोद्भवा । कोटिजन्मसमुत्थेन पुण्येनैव तु लभ्यते ॥ ४४ ॥
तेन योगनिधे धीमञ्छ्रोतव्या सा प्रयत्नतः । दिनानां नियमो नास्ति सर्वदा श्रवणं मतम् ॥ ४५ ॥
सत्येन ब्रह्मचर्येण सर्वदा श्रवणं मतम् । अशक्यत्वात्कलौ बोध्यो विशेषोऽत्र शुकाज्ञया ॥ ४६ ॥
मनोवृत्तिजयं चैव नियमाचरणं तथा । दीक्षां कर्तुमशक्यत्वात्सप्ताहश्रवणं मतम् ॥ ४७ ॥

पापं नश्यते नष्टं भवति । अत्रार्थे संशयो नास्ति ॥ ३७ ॥ किंच—एतत्पठनस्य महत्पुण्यमित्याह श्लोकेति । भागवतं भागवतान्तर्गतम् । मंचाः क्रोशंतीतिवल्लक्षणया बोध्यम् । श्लोकार्धं श्लोकपादं वेति पूर्वं व्याख्यातमेव । यः सुकृती पठेत्, नित्यं सदा राजसूयाश्वमेधयोर्यज्ञयोः पुण्यं फलमवाप्नोति प्राप्नोति ॥ ३८ ॥ अन्येषामपि साम्यं निरूपयति—उक्तमिति । उक्तं कथितं भागवतं, नित्यं कृतं सम्पादितं हरिचिंतनं हरेर्ध्यानं, तुलसीपोषणं जलसेचनादिना पुष्टीकरणं, च पुनः एव निश्चितं धेनूनां सेवनं गवां सेवा तृणजलयवान्नादिभिस्तदुपकरणं, समम् । अर्थतस्तुल्यमेव ॥ ३९ ॥ मरणकालेऽप्येतन्मुक्तिप्रदमित्याह—अंतकाल इति । अंतकाले प्राणोत्क्रमणसमये येनैव पुण्यात्मना शुकशास्त्रवाक् श्रीमद्भागवतध्वनिः श्रूयते, तस्य तस्मै एव पुरुषाय गोविंदः श्रीहरिः प्रीत्या प्रेम्णा वैकुंठं लोकं प्रयच्छति प्रकर्षेण ददाति । अपि निश्चितम् ॥ ४० ॥ अथ श्रीमद्भागवतदानफलमाह—हेमेति । हेमसिंहयुतं हेम्नः सुवर्णस्य सिंहाः पट्टाभिषेकप्रकरणेऽभिहिता अष्टौ यस्मिंस्तद्धेमसिंहम् आसनं तेन युतम् । सिंहशब्दो लक्षणया सिंहासनपर इत्येके । नामैकदेशन्यायेन सिंहशब्दः सिंहासनपर इत्यपरे । एतच्छास्त्रं श्रीमद्भागवतं वैष्णवाय यः सुकृती धनी ददाति स पुमान् कृष्णेन सह सायुज्यं मुक्तिविशेषं लभते प्राप्नोति । पादपूर्तौ चकारः ॥ ४१ ॥ एतच्छ्रवणं विना धिग्जीवितमित्याह—आजन्मेति । येन शठेन आजन्ममात्रं जन्मत आरभ्यापि किंचित् अल्पमपि यथा स्यात्तथा शुकशास्त्रकथा न पीता न श्रुता, कथारसो न पीत इति भावार्थः । किं कृत्वा–चित्तं विधाय मनो लगयित्वा । धातूनामनेकार्थत्वाद्विपूर्वस्य धा–धातोः संलगनार्थता । तेन पुंसा स्वजन्माऽऽत्मोत्पत्तिः वृथा मिथ्या नीतम्, निष्फलं कृतमित्यर्थः । तत्र दृष्टान्तद्वयम्–चाण्डालवत् चाण्डालेन तुल्यम् १ । खरवत् रासभतुल्यम् २ । बतेति खेदे । जननी माता निजदुःखभाजा निजस्य स्वस्य दुःखं गर्भपीडाप्रसूतिक्लेशपालनादिरूपं भजतीति तथा[1], कृतेति शेषः । मिथ्यापदमत्रान्वेतीति गुरवः ॥ ४२ ॥ तदेव द्रढयति–जीवन्निति येन पुरुषेण किंचित्प्रकरणैकदेशमपि श्लोकैकदेशमपिशुककथावचनं न श्रुतं, स तु स एव पापकर्मा पापं कर्म यस्य स तथा जीवन् श्वसन् शवो मृतको निगदितः कथितः । स जीवन्नेव मृत इति भावार्थः । पशुसमं पशुभिस्तुल्यं भुवि पृथिव्यां, औपश्लेषिकाधारे सप्तमीयम् । भाररूपं तं नरं धिक् । एवमित्थं दिवि स्वर्गलोके देवसमाजमुख्या देवानां समाजः संगरूपस्तत्र मुख्या दिविषदो वदन्तीति गुरवः । क्वापि 'देवसरोजमुख्याः' इति पाठो बालिशैः प्रमादतो धृतोऽर्थासंगतेरित्युन्नेयम् ॥ ४३ ॥ महापुण्येनैतत्प्राप्यत इत्याह–दुर्लभेति । श्रीमद्भागवतोद्भवा श्रीमद्भागवतादुत्पन्ना कथा लोके दुर्लभा दुष्प्रापैव । कोटिजन्मसमुत्थेन कोटिजन्मोद्भवेन पुण्येन लभ्यते प्राप्यते । एवकारोऽन्यसाधननिवृत्त्यर्थः ॥ ४४ ॥ यावज्जीवमेतच्छ्रवणं कर्तव्यमित्याह–तेनेति । तेन पूर्वोक्तेन हेतुना योगनिधे हे नारद हे धीमन् सा पूर्वोक्ता कथा प्रयत्नतः कष्टाद्युपायतः श्रोतव्या श्रोतुं योग्या । दिनानां नियमो नास्तीति स्पष्टम् । सर्वदा सर्वस्मिन्काले श्रवणं मतं संमतम् ॥ ४५ ॥ विधितः श्रवणं दुष्करमतो विशेषमाह–सत्येनेति चतुर्भिः । सत्येन यथार्थभाषणेन ब्रह्मचर्येण युवतिसंसर्गपरित्यागपूर्वकभूमिशयनेन सर्वदा सदा श्रवणं मतम् । अशक्यत्वात् उक्तसाधनानि कर्तुमसामर्थ्यात्कलौ कलियुगेऽत्र श्रवणे शुकाज्ञया शुकस्य नियोगेन विशेषः भेदो बोध्यो ज्ञेयः ॥ ४६ ॥ तद्यथा–मनोवृत्तिजयं मनसो वृत्तिः चांचल्येन बहिरागमनरूपा तस्या जयो निरोधस्तम्, तथा तेनैव

[1] —"भजो ण्विः" इति ण्विप्रत्ययान्ताद्भागुरिमते टाप् । क्वचित्तु 'जननीजनदुःखभाजा' इति पाठः । तत्र दुःखं भाजयतीति दुःखभाक्, जननी एव जनः जननीजनः, तस्य दुःखभाक् तेनेति 'तेन' इत्यस्य विशेषणम् ।

श्रद्धातः श्रवणे नित्यं माघे तावद्धि यत्फलम् । तत्फलं शुकदेवेन सप्ताहश्रवणे कृतम् ॥ ४८ ॥
मनसश्चाजयाद्रोगात्पुंसां चैवायुषः क्षयात् । कलेर्दोषबहुत्वाच्च सप्ताहश्रवणं मतम् ॥ ४९ ॥
यत्फलं नास्ति तपसा न योगेन समाधिना । अनायासेन तत्सर्वं सप्ताहश्रवणे लभेत् ॥ ५० ॥
यज्ञाद्गर्जति सप्ताहः सप्ताहो गर्जति व्रतात् । तपसो गर्जति प्रोच्चैस्तीर्थान्नित्यं हि गर्जति ॥ ५१ ॥
योगाद्गर्जति सप्ताहो ध्यानाज्ज्ञानाच्च गर्जति । किं ब्रूमो गर्जनं तस्य रे रे गर्जति गर्जति ॥ ५२ ॥

शौनक उवाच—साश्चर्यमेतत्कथितं कथानकं ज्ञानादिधर्मान्विगणय्य सांप्रतम् ।
निश्रेयसे भागवतं पुराणं जातं कुतो योगविदादिसूचकम् ॥ ५३ ॥

सूत उवाच—यदा कृष्णो धरां त्यक्त्वा स्वपदं गन्तुमुद्यतः । एकादशं परिश्रुत्याऽप्युद्धवो वाक्यमब्रवीत् ॥ ५४ ॥
उद्धव उवाच—त्वं तु यास्यसि गोविन्द भक्तकार्यं विधाय च । मच्चित्ते महती चिन्ता तां श्रुत्वा सुखमावह ॥ ५५ ॥
आगतोऽयं कलिर्घोरो भविष्यन्ति पुनः खलाः । तत्संगेनैव सन्तोऽपि गमिष्यंत्युग्रतां यदा ॥ ५६ ॥
तदा भारवती भूमिर्गोरूपेयं कमाश्रयेत् । अन्यो न दृश्यते त्राता त्वत्तः कमललोचन ॥ ५७ ॥
अतः सत्सु दयां कृत्वा भक्तवत्सल मा व्रज । भक्तार्थं सगुणो जातो निराकारोऽपि चिन्मयः ॥ ५८ ॥

प्रकारेण नियमाचरणं नियमा षष्ठाध्याये वक्ष्यमाणास्तेषामाचरणं संपादनम्, दीक्षां विष्णुदीक्षां कर्त्तुमाचरितुमशक्यत्वादप्रभुत्वात् सप्ताहश्रवणं सप्तदिनमध्ये श्रवणं मतम् आज्ञप्तम्, ज्ञप्तौ श्रुतिकर्मोऽन्वयः कर्त्तव्यः ॥ ४७ ॥ तावत्साकल्येन माघे माघमासे श्रद्धातः श्रद्धया प्रातःस्नानदानादिना नित्यं श्रवणे यत्फलं भवति । केचन-'श्रावणे' इति पाठमुरीकृत्य श्रावणे श्रावणमासि, माघे च नित्यं श्रद्धया देवपूजन-प्रातःस्नानादिना तावद्यत्फलं भवति, तत्फलमित्यादिपूर्ववदिति व्याचक्षते । तदेव हि फलं शुकदेवेन सप्ताहश्रवणे कृतमस्तीति भावः । गुरवस्तु-यथाश्रुतपाठमंगीकृत्यैवं व्याचख्युः-नित्यं प्रतिदिनं नित्यकथायाः श्रवणे श्रद्धातो यत्फलं भवति, माघे माघमासे श्रवणे श्रीमद्भागवतश्रुतौ यत्फलं भवति तत्फलमित्युत्तरार्द्धं पूर्ववदित्याहुः ॥ ४८ ॥ मनसोऽजयादनिरोधात्, रोगात् ज्वराद्युत्पत्तेः, च पुनः पुंसां नराणामायुषः क्षयात् नाशात्, कलेर्युगस्य दोषबहुत्वाद्दोषबाहुल्याच्चेति चतुर्भिर्हेतुभिः सप्ताहश्रवणं मतम् ॥ ४९ ॥ सर्वत एतत्फलाधिक्यमाह-यदिति त्रिभिः । तपसा यत्फलं नास्ति, योगेन यत्फलं नास्ति, समाधिना यत्फलं नास्ति, तत्सर्वमनायासेन खेदमन्तरा सप्ताहश्रवणे लभेत् प्राप्नुयात् ॥ ५० ॥ सप्ताहः श्रीमद्भागवतपारायणारंभसमाप्तिरूपो यज्ञाद्राजसूयादेः गर्जति उत्कर्षं करोति, सप्ताहः व्रतात् एकादश्युपवासादेः गर्जति, तपसः पंचाग्नितापरूपात्स्वधर्माचरणाद्वा प्रोच्चैर्गर्जति अत्युत्कटं शब्दं करोति, तीर्थान्नित्यं गर्जति । हि एव ॥ ५१ ॥ सप्ताहः योगात् चित्तवृत्तिनिरोधात् गर्जति, ध्यानादीश्वरचिन्तनात्मकात् गर्जति, च पुनः ज्ञानात् ब्रह्मज्ञानात् गर्जति । तस्य सप्ताहरूपस्य गर्जनं किं ब्रूमो वयं किं वर्णयामः, रे रे मूढा गर्जति गर्जति वीप्सयाऽस्मादधिकं किमप्यन्यन्नास्तीति ध्वनितम् ॥ ५२ ॥ आश्चर्यं श्रुत्वा शौनकः पृच्छति-साश्चर्यमिति । एतत्कथानकं सनत्कुमारनारदसंवादपूर्वकशुकशास्त्रमहित्वं साश्चर्यम् आश्चर्येण सहितमिति तथा तत् त्वया कथितमुक्तम् । साम्प्रतमिदानीम् । किं कृत्वा-ज्ञानादिधर्मान् विगणय्य ज्ञानं शास्त्रीयम्, आदिना वैराग्यब्रह्मचर्यादिसंग्रहः, धर्मांश्चतुर्वर्णधर्मान् विगणय्य तिरस्कृत्य । योगविदादिसूचकं योगो मनोनिग्रहरूपः, विज्ज्ञानम् वेदनं विदिति व्युत्पत्तेः, आदिशब्देन वैराग्यादिसाधनानां संग्रहः, तेषां सूचकं निन्दकं, निःश्रेयसे कल्याणार्थं, निश्चितं श्रेयो मोक्षाख्यमिति तदर्थं वा, भागवतं पुराणं कुतः कस्माद्धेतोः जातमुत्पन्नम् ॥ ५३ ॥ सूतः शौनकं प्रति सकारणं तद्वृत्तमाह-यदेति । यदा धरां पृथिवीं त्यक्त्वा कृष्णो वासुदेवः स्वपदं स्वस्थानं वैकुण्ठाख्यं गन्तुं यातुमुद्यतः कृतप्रयत्नोऽभूत् तदा एकादशम् एकादशस्कन्धज्ञानं परिश्रुत्य सर्वतः श्रुत्वा उद्धवो वाक्यं वचनमब्रवीत् ॥ ५४ ॥ उद्धवः श्रीकृष्णं प्रति स्वसंदेहमाविष्करोति-त्वमिति पंचभिः । हे गोविन्द, त्वं तु त्वं हि यास्यसि स्वपदं गमिष्यसि । ननु कार्यार्थं कृतावतारस्य मम कथं गमनमित्यत आह-भक्तकार्यं भक्तानां कार्यं विधाय कृत्वा । मच्चित्ते मम मनसि महती बृहती चिंता जातेति शेषः । तां चिंता, श्रुत्वा । चस्योक्तं समुच्चयार्थत्वान्ममेति लभ्यते । सुखं मम कल्याणमावह कुरु ॥ ५५ ॥ तथाहि—अयं घोरो दारुणः कलियुग आगत आयातः, पुनर्भूयः खला दुष्टाः पापिनो जना भविष्यन्ति, तत्संगेन तेषां खलानां संगेन संगत्या मंतः साधवोऽपि यदा उग्रतां क्रूरतां गमिष्यन्ति प्राप्स्यंति । एव निश्चितम् ॥ ५६ ॥ तदा गोरूपा सूर्यजारूपा गोभूता इयं धरा भूमिः कमाश्रयेत् रक्षार्थं कं पालकं व्रजेत् । हे कमललोचन हे पद्मनेत्र त्वत्तो भवतोऽन्यो भिन्नो द्वितीयस्त्राता रक्षको न दृश्यते नावलोक्यते ॥ ५७ ॥ अतो हेतोः सत्सु महात्मसु । वैषयिकाऽऽधारे सप्तमीयम् । तेन साधूनां विषय इत्यर्थः । दयां कृपां कृत्वा हे भक्तवत्सल मा व्रज त्वं गमनं मा कुरु, न तत्करणमुचितम् । निराकार आकार-

त्वद्वियोगेन ते भक्ताः कथं स्थास्यन्ति भूतले । निर्गुणोपासने कष्टमतः किञ्चिद्विचारय ॥ ५९ ॥
इत्युद्धववचः श्रुत्वा प्रभासेऽचिन्तयद्धरिः । भक्तावलम्बनार्थाय किं विधेयं मयेति च ॥ ६० ॥
स्वकीयं यद्भवेत्तेजस्तच्च भागवतेऽदधात् । तिरोधाय प्रविष्टोऽयं श्रीमद्भागवतार्णवम् ॥ ६१ ॥
तेनेयं वाङ्मयी मूर्तिः प्रत्यक्षा वर्तते हरेः । सेवनाच्छ्रवणात्पाठाद्दर्शनात्पापनाशिनी ॥ ६२ ॥
सप्ताहश्रवणं तेन सर्वेभ्योऽप्यधिकं कृतम् । साधनानि तिरस्कृत्य कलौ धर्मोयमीरितः ॥ ६३ ॥
दुःखदारिद्र्यदौर्भाग्यपापप्रक्षालनाय च । कामक्रोधजयार्थं हि कलौ धर्मोऽयमीरितः ॥ ६४ ॥
अन्यथा वैष्णवी माया देवैरपि सुदुस्त्यजा । कथं त्याज्या भवेत्पुंभिः सप्ताहोऽतः प्रकीर्तितः ॥ ६५ ॥

सूत उवाच—एवं नगाहश्रवणोरुधर्मे प्रकाश्यमाने ऋषिभिः सभायाम् ।
आश्चर्यमेकं समभूत्तदानीं तदुच्यते संशृणु शौनक त्वम् ॥ ६६ ॥

भक्तिः सुतौ तौ तरुणौ गृहीत्वा प्रेमैकरूपा सहसाविरासीत् ।
श्रीकृष्ण गोविन्द हरे मुरारे नाथेति नामानि मुहुर्वदन्ती ॥ ६७ ॥

तां चागतां भागवतार्थभूषां सुचारुवेषां ददृशुः सदस्याः ।
कथं प्रविष्टा कथमागतेयं मध्ये मुनीनामिति तर्कयन्तः ॥ ६८ ॥

रहितः चिन्मयश्चिद्रूपोपि भक्तार्थं सगुणो जातः गुणैः सहित इति तथा, लीलाशरीरी जात इत्यर्थः ॥ ५८ ॥ त्वद्वियोगेन तव विरहेण ते तव भक्ताः सेवका भूतले कथं स्थास्यंति, स्वामिनं विना सेवकानां स्थितेर्दुःखहेतुत्वात् । निर्गुणोपासने "निष्कलं निष्क्रियं शांतम्" इति, "अव्रणमलोहितमच्छायम्" इति, "अस्थूलमनण्वदीर्घम्" इति वेदांतप्रसिद्धं निर्गुणं ब्रह्म, तस्योपासने सेवायां कष्टं दुःखम्, आलंबनमंतरा मनसः स्थितेर्दुर्घटत्वात्, अतोस्मात्कारणात् किंचित् किमपि भक्तार्थं विचारय त्वं चिंतय ॥ ५९ ॥ श्रुत्वैतद्धरिरचिंतयदित्याह—इतीति । इत्येवम् उद्धववचः उद्धववाक्यं श्रुत्वा प्रभासे प्रभासाख्ये तीर्थे हरिरचिंतयन् ध्यानमकरोत् । किं तदित्याह—भक्तावलंबनार्थाय भक्तानामाधारार्थं मया किं विधेयमिति ॥ ६० ॥ स्वज्योतिषः स्थापनं श्रीमद्भागवते कृतमित्याह—स्वकीयमिति । स्वकीयमात्मीयं यत्तेजः सर्वावभासकम् "यद्भासा भासते जगत्" इति श्रुतेः । तत्तेजो भागवतशास्त्रेऽदधात् धृतवान् । वा एव । तिरोधाय अन्तर्धाय अयं श्रीकृष्णचन्द्रः परमात्मा श्रीमद्भागवतार्णवं श्रीमद्भागवतमेवार्णवः समुद्रस्तं प्रविष्टः । गूढार्थत्वेन गांभीर्यत्वात्समुद्रसाम्यम् ॥ ६१ ॥ तन्मूर्त्तिरियमित्याह—तेनेति । तेन पूर्वोक्तेन हेतुना हरेः श्रीकृष्णस्य प्रत्यक्षा सांप्रतमियं वाङ्मयी मूर्त्तिर्वर्त्तते, सा किंफलेत्यत आह—सेवनाच्छ्रवणात्पाठाद्दर्शनादिति हेतुचतुष्टयं स्पष्टमतो न व्याख्यातम् । पापनाशिनी पापनाशकर्त्री ॥ ६२ ॥ तेन कारणेन सप्ताहश्रवणं सप्तदिनमध्ये श्रीमद्भागवतश्रवणं सर्वेभ्यः साधनेभ्योऽधिकं कृतं तदेवाह—साधनानि तिरस्कृत्य पराभूय कलौ कलियुगेऽयं सप्ताहयज्ञो धर्म ईरितः कथितः ॥ ६३ ॥ तदेव पुनर्द्रढयति—दुःखेति । दुःखं शरीरे व्याधिरूपं बद्धत्वेष्टवियोगजं वा, दारिद्र्यं धनाद्यभावः, दौर्भाग्यं कृतेप्युद्यमे फलाभावः, पापं कायवाङ्मनोभिः कृतं, तेषां प्रक्षालनाय दूरीकरणाय । च पुनः । कामक्रोधजयार्थम् कामः 'कामोभिलाषस्तर्षश्च' इत्यमरोक्त्याऽप्राप्तवस्तुरूपोऽत्र बोध्यः, क्रोध इष्टप्राप्तिविघातजः, तयोर्जयार्थम् । हि एव । 'कलौ धर्मोयमीरितः' इति तु प्राग्वत् ॥ ६४ ॥ एनमन्तरा वैष्णवी माया न निवर्त्तेत इत्याह—अन्यथेति । अन्यथा प्रकारांतरेण वैष्णवी विष्णोरियं माया देवैः इंद्रादिभिरपि सुदुस्त्यजा त्यक्तुमशक्या—पुंभिरभक्तैः कथं केन प्रकारेण त्याज्या त्यक्तुं योग्या भवेदिति "मामेव ये प्रपद्यंते मायामेतां तरन्ति ते" इति भगवद्वचनात् । अतः अस्मात्कारणात्सप्ताहः प्रकीर्त्तितः कथितः ॥ ६५ ॥ अथ सप्ताहयज्ञोत्कर्षवर्णने आश्चर्यमुत्पन्नमित्याह—एवमिति । एवममुना प्रकारेण नगाहश्रवणोरुधर्मे सप्ताहदिनमध्ये श्रवणमेवोरुर्महान्धर्मस्तस्मिन सभायां ऋषिभिः प्रकाश्यमाने सति एकमाश्चर्यं तदानीं तत्समये समभूत्संजातम्, हे शौनक तदेवाश्चर्यं मयोच्यते त्वं संशृणु सम्यक् श्रवणं कुरु ॥ ६६ ॥ ससुताया भक्तेस्तत्राविर्भावमाह—भक्तिरिति । "यत्र भागवती वार्त्ता तत्र भक्त्यादिकं व्रजेत्" इत्युक्त्या सप्ताहमहित्वसूचनारंभे भक्त्यादित्रिकस्यागमनं जातमिति प्रतीयते । तच्छ्रवणात् तयोर्वृद्धत्वग्लानिरासपूर्विका चेतनताभूदित्यभिप्रायेणाह—तरुणौ युवानौ तौ प्रसिद्धौ ज्ञानवैराग्यौ सुतौ गृहीत्वा संगृह्य भक्तिः सहसाऽकस्मात् आविरासीत् प्रकटाऽभूत्, हे श्रीकृष्ण, हे गोविंद, हे हरे, हे मुरारे, हे नाथ, इति नामानि मुहुर्वारं वारं वदंती उच्चारयंती ॥ ६७ ॥ सभ्यास्तां ददृशुरित्याह—तामिति । आगतामायातां भागवतार्थभूषां भागवता भक्तास्तेषामर्थभूषां

ऊचुः कुमाराः वचनं तदानीं कथार्थतो निष्पतिताऽधुनेयम् ।
एवं गिरः सा ससुता निशम्य सनत्कुमारं निजगाद नम्रा ॥ ६९ ॥

भक्तिरुवाच—भवद्भिरद्यैव कृतास्मि पुष्टा कलिप्रनष्टाऽपि कथारसेन ।
क्वाहं तु तिष्ठाम्यधुना ब्रुवन्तु ब्राह्मया इदं तां गिरमूचिरे ते ॥ ७० ॥

भक्तेषु गोविन्दसुरूपधर्त्री प्रेमैककर्त्री भवरोगहन्त्री ।
सा त्वं च तिष्ठस्व सुधैर्यसंश्रया निरन्तरं वैष्णवमानसानि ॥ ७१ ॥

ततोऽपि दोषाः कलिजा इमे त्वां द्रष्टुं न शक्ताः प्रभवोऽपि लोके ।
एवं तदाज्ञावसरेऽपि भक्तिस्तदा निषण्णा हरिदासचित्ते ॥ ७२ ॥

सकलभुवनमध्ये निर्धनास्तेऽपि धन्या निवसति हृदि येषां श्रीहरेर्भक्तिरेका ।
हरिरपि निजलोकं सर्वथातो विहाय प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धः ॥ ७३ ॥

ब्रूमोऽद्य ते किमधिकं महिमानमेवं ब्रह्मात्मकस्य भुवि भागवताभिधस्य ।
यत्संश्रयान्निगदनाल्लभते सुवक्ता श्रोतापि कृष्णसमतामलमन्यधर्मैः ॥ ७४ ॥

इति श्रीपद्मपुराण उत्तरखण्डे श्रीभागवतमाहात्म्ये भक्तिकष्टनिवर्तनं नाम तृतीयोऽध्यायः ॥ ३ ॥

द्रव्यालंकाररूपाम्, सुचारुवेषामतिसुन्दरवेषा तां सदस्याः सभापालका ददृशुः। किं कुर्वंतः—इयं कथमागता, मुनीनां मध्ये कथं प्रविष्टा, इत्येवं तर्कयंतः ॥ ६८ ॥ तदुत्तरमाह–ऊचुरित्यर्द्धेन। तदानीं तदा कुमारवचनम् ऊचुः। किमूचुः–इयम् अधुना कथार्थतः कथार्थं निष्पतिताऽऽविर्भूता। भक्तिः सनत्कुमारमाहेत्याह–एवमिति। एवंगिर इत्थंभूता वाणीः श्रुत्वाऽऽकर्ण्य ससुता पुत्राभ्यां सहिता सा भक्तिः नम्रा कृतप्रणामा सती सनत्कुमारं निजगाद ववाद ॥ ६९ ॥ तद्वाक्यं यथा–भवद्भिरिति। युष्माभिरद्य मद्यैवेदानीमेव पुष्टाऽप्यायितास्मि। केनेत्यत आह–कथारसेनेति। कथंभूताहं–कलिप्रनष्टा कलियुगेन प्रनष्टा, अपिशब्दात् खंडितांगा। इदानीं स्थानं निर्दिश्यतामित्याह–अहं क्व कुत्र तिष्ठामि, अधुना अद्येदं, ब्रुवंतु भवंतो गदंतु। तुशब्देन पुत्रयोरपि स्थानपृच्छा बोध्या। ब्राह्मया ब्रह्मपुत्राः ते तां भक्तिम् इमां वक्ष्यमाणां गिरं वाचमूचिरे जगदुः। ब्रूञो द्विकर्मत्वात् कर्मद्वयम ॥ ७० ॥ तत्प्रभावानुवर्णनपूर्वकं स्थानं निर्दिशति–भक्तेष्विति। भक्तेषु हरिदासेषु गोविंदस्य सुरूपं धरतीति तथा, प्रेमैककर्त्री प्रेम्णः संपादनकर्त्री, भवरोगहंत्री भवः संसारो जन्ममरणरूपः स एव रोगः तं हंतीति तथा, सुधैर्यसंश्रया सुष्ठु शोभनो धर्मो हरितोषणरूपस्तं संश्रयतीति तथा, सा लोके प्रसिद्धा त्वं निरंतरम् अन्तरं यथा न भवति तथा वैष्णवमानसानि भक्तचित्तानि तिष्ठस्व निवस। आत्मनेपदमार्षम् ॥ ७१ ॥ तत्र स्थितौ फलमाह–तत इति। तत तस्मात्कारणात्कलिजाः कलेर्जाताः पाखंडादय इमे दोषा लोके प्रभवोऽपि स्वप्रभावं प्रवर्त्तयितुं समर्था अपि त्वां द्रष्टुमवलोकयितुं न शक्ता न समर्थाः, भवेयुरिति शेषः। एवमित्थं तदाज्ञावसरं तेषां सनकादीनाम् आज्ञावसरे नियोजनसमये तदा तत्क्षणे हरिदासचित्ते स्थानविशेषे निषण्णा भक्तिः कृताश्रयाऽभूत् ॥ ७२ ॥ भक्तिवैभवमाह–सकलेति। सकलभुवनमध्ये सकलानि भुवनानि चतुर्दशसंख्यानि तेषां मध्ये निर्धनाः निस्वा ये पुरुषास्तेपि धन्याः अहो भाग्यवन्तः। ते के इत्यपेक्षायामाह–येषां हृदि हृदये मनसि वा 'स्वांतं हृन्मानसं मनः' इत्यमरोक्तेः। श्रीहरेर्लक्ष्मीपतेश्चैका मुख्या भक्तिर्निवसति निवासं करोतीति। अतोऽस्माद्धेतोः हरिरपि नारायणोपि निजलोकं वैकुंठं सर्वथा सर्वप्रकारेण विहाय त्यक्त्वा भक्तिसूत्रोपनद्धः भक्तिरेव सूत्रं रशनारूपं तेनोपनद्धो बद्धः तेषां हृदि स्वांते प्रविशति प्रवेशं करोति ॥ ७३ ॥ श्रीमद्भागवतोत्कर्षं वर्णयन्नध्यायं पूरयति–ब्रूम इति। भागवतमित्यभिधा नाम यस्येति तथा तस्य ब्रह्मात्मकस्य वेदरूपस्य अधिकं महिमानं वयं किं ब्रूमः वदामः। एवमित्थं भुवि भूमौ यत्संश्रयात् यस्य भागवतस्य संश्रयाच्छ्रवणात् निगदनात् नितरां कथनात्सुवक्ता शोभनव्याख्याता श्रोताऽपि कृष्णसमतां लभते–इति प्रत्येकमन्वेतव्यम्। अन्यधर्मैः अलं पर्याप्तम्। अन्यधर्मैः प्रयोजनं नास्तीति भावार्थः। 'यत्संश्रयान्निगदिते' इति पाठे यस्य संश्रयात्संबंधात् यस्मिन् भागवते निगदिते सति वाच्यमाने इत्यर्थः ॥ ७४ ॥

इति श्रीशेखावाटयंतर्गतविजयपुरनिवासिब्राजलालिपण्डितरामप्रतापविरचितायां श्रीमद्भागवतमाहात्म्यटीकायां मृजुनाम्न्यां तृतीयोऽध्यायः ॥ ३ ॥

# अथ चतुर्थोऽध्यायः

सूत उवाच—अथ वैष्णवचित्तेषु दृष्ट्वा भक्तिमलौकिकीम्। निजलोकं परित्यज्य भगवान्भक्तवत्सलः॥ १॥
वनमाली घनश्यामः पीतवासा मनोहरः। काञ्चीकलापरुचिरो लसन्मुकुटकुंडलः॥ २॥
त्रिभङ्गललितश्चारुकौस्तुभेन विराजितः। कोटिमन्मथलावण्यो हरिचन्दनचर्चितः॥ ३॥
परमानन्दचिन्मूर्तिर्मधुरो मुरलीधरः। आविवेश स्वभक्तानां हृदयान्यमलानि च॥ ४॥
वैकुण्ठवासिनो ये च वैष्णवा उद्धवादयः। तत्कथाश्रवणार्थं ते गूढरूपेण संस्थिताः॥ ५॥
तदा जयजयारावो रसपुष्टिरलौकिकी। चूर्णप्रसूनवृष्टिश्च मुहुः शंखरवोऽप्यभूत्॥ ६॥
तत्सभासंस्थितानां च देहगेहात्मविस्मृतिः। दृष्ट्वा च तन्मयावस्थां नारदो वाक्यमब्रवीत्॥ ७॥
अलौकिकोऽयं महिमा मुनीश्वराः सप्ताहजन्योऽद्य विलोकितो मया।
मूढाः शठा ये पशुपक्षिणोऽत्र सर्वेऽपि निष्पापतमा भवन्ति॥ ८॥
अतो नृलोके ननु नास्ति किञ्चिच्चित्तस्य शोधाय कलौ पवित्रम्।
अघौघविध्वंसकरं तथैव कथासमानं भुवि नास्ति चान्यत्॥ ९॥
के के विशुध्यन्ति वदन्तु मह्यं सप्ताहयज्ञेन कथामयेन।
कृपालुभिर्लोकहितं विचार्य प्रकाशितः कोऽपि नवीनमार्गः॥ १०॥

भक्तानां हृदये स्थानं भक्त्यै दत्तं महात्मभिः। दृष्ट्वा तामेव तत्रस्थां स्वलोकाद्धरिरायर्यौ॥ १॥

सूतोक्तिः शौनकं प्रति। पूर्वाध्यायांते 'तदा निषण्णा हरिदासचित्ते' इति भक्तेः स्थानं निगदितं, तदादायैवोत्तराध्यायः प्रारभ्यत इति संगतिं सूचयंस्ततः किं वृत्तमित्यत आह—अथेति। आनंतर्यार्थोऽथशब्दः। वैष्णवचित्तेषु भक्तमनस्सु अलौकिकीं लोकेऽलभ्यां भक्तिं दृष्ट्वा निजलोकं वैकुण्ठं परित्यज्य त्यक्त्वा भगवान् षड्गुणैश्वर्ययुक्तः, अमलानि शुद्धानि पापाद्यैः कामक्रोधादिसंप्रदैरसंस्पृष्टानि स्वभक्तानां हृदयानि आविवेश, इति चतुर्थेनान्वयः। तं विशिनष्टि पंचदशभिर्विशेषणैः—
भक्तवत्सलः भक्तेषु कृपालुः॥ १॥ वनमाली, वनमाला च—"आपादलंबिनी माला वनमाला प्रकीर्त्तिता" इत्युक्तलक्षणा, तद्वान्। घनश्यामः घन इव नीलमेघ इव श्याम इति तथा "उपमानानि सामान्यवचनैः" इति समासः। पीतवासाः पीते वाससी यस्य स तथा। मनोहरः पश्यतां नरनारीणां मनांसि हरतीति तथा। कांचीकलापरुचिरः कांची क्षुद्रघंटिका तस्याः कलापः कटिवेष्टनरूपस्तेन रुचिरः सुंदरः। लसन्मुकुटकुंडलः लसत् मणिप्रवेकैः शोभमानं मुकुटं कुंडले च यस्य स तथा। उल्लसदिति पाठांतरे समस्तमेकं पदम्॥ २॥ त्रिभंगललितः त्रयो भंगा उदरे रेखाविशेषास्तैर्ललितो मनोहरः। चारुः सुरूप इति पृथक् पदमित्येके। चारु शोभनः कौस्तुभो मणिस्तेन विराजितः प्रकाशित इत्येकं पदं वा। कोटिः (संख्याविशेषः) मन्मथा मनो मथ्नंतीति मन्मथा कामदेवास्तेषामिव लावण्यमतिसुंदरता रूपगुणविशेषो यस्य स तथा। हरिचंदनं श्रीखंडं तेन चर्चितः पूजितः॥ ३॥ परमः प्रकृष्टः सर्वोत्तम आनंदः, चित् चैतन्यं च मूर्त्तिः शरीरं यस्य स तथा। मधुरः प्रियः। मुरलीधरः मुरली वाद्यविशेषः 'वंशी' इति प्रसिद्धा तां धरतीति तथा॥ ४॥ श्रवणलोभेन उद्धवाद्या आगता इत्याह—वैकुंठेति। वैकुंठवासिनः वैकुण्ठे वस्तुं शीलं येषां ते तथा उद्धवादयो ये वैष्णवाः, ते च तत्कथाश्रवणार्थं भागवतगाथाश्रुतये गूढरूपेण गुप्तरूपेण संस्थिताः तत्रोपविष्टाः॥ ५॥ तदा परममंगलं जातमित्याह—तदेति। तदा तस्मिन्काले जयजयारावो जयजयशब्दः। अलौकिकी लोकेऽप्रसिद्धा रसपुष्टिः रसैः पोषणम्। चूर्णानि प्रसूनानि पूर्वं व्याख्यातानि तेषां वृष्टिर्वर्षणम्। च पुनः। मुहुः पुनः पुनः शंखरवः शंखध्वनिः अभूदिति क्रियापदं प्रतिपदमन्वेतव्यम्॥ ६॥ अतिचित्रमप्याह—तदिति। तत्सभासंस्थितानां सा चासौ सभा चेति तत्सभा तस्यां संस्थितानां देवर्षिसंघानां देहगेहात्मविस्मृतिः देहगेहे प्रसिद्धे, आत्मा सोहमिति प्रतीतिविषयस्तेषां विस्मृतिर्विस्मरणमभूत्। चात्पूर्वोक्तैव क्रिया बोध्या। तन्मयावस्थां तद्रूपावस्थां दृष्ट्वा नारदो मुनिर्वाक्यमब्रवीत्॥ ७॥ स्वानुभूतं वर्णयति—अलौकिक इति। हे मुनीश्वराः सनकादयः सप्ताहजन्यः सप्तभिरहोभिः साध्यो यज्ञविशेषः 'सप्ताह' इत्युच्यते तस्माज्जन्य उत्पद्यमानोऽलौकिको हरिलोकं विनाऽन्यलोकेष्वसंभवरूपो महिमा प्रभावोऽद्य मया विलोकितो दृष्टः। तमाह—मूढा अविवेकिनः, शठा देहाद्यहंबुद्धयः, पशुपक्षिणः प्रसिद्धाः, ते सर्वेपि निष्पापतमा अतिशयेन पापरहिता भवंति। 'निष्पापतया विभांति' इति पाठांतरम्॥ ८॥ एतत्कथातुल्यमन्यन्नास्तीत्याह—अत इति। अतो हेतोः नृलोके मर्त्यलोके। नन्विति निश्चये। चित्तस्य शोधाय मनसः शुद्ध्यै कलौ कलियुगे पवित्रं शुद्धिकरं नास्ति। तथैव तेन प्रकारेणैव। अघौघविध्वंसकरं पापौघविनाशनं नास्तीति। भुवि धरायां कथासमानं कथातुल्यमन्यन्नास्ति॥ ९॥ केषां केषां पापिनां शुद्धिर्भवतीति पृच्छन्नाह—के के इति। कथामयेन कथारूपेण सप्ताहयज्ञेन के के

कुमारा ऊचुः—ये मानवाः पापकृतस्तु सर्वदा सदा दुराचाररता विमार्गगाः।
क्रोधाग्निदग्धाः कुटिलाश्च कामिनः सप्ताहयज्ञेन कलौ पुनन्ति ते ॥ ११ ॥

सत्येन हीनाः पितृमातृदूषकास्तृष्णाकुलाश्चाश्रमधर्मवर्जिताः।
ये दाम्भिका मत्सरिणोऽपि हिंसकाः सप्ताहयज्ञेन कलौ पुनंति ते ॥ १२ ॥

पंचोग्रपापाश्छलछद्मकारिणः क्रूराः पिशाचा इव निर्दयाश्च ये।
ब्रह्मस्वपुष्टा व्यभिचारकारिणः सप्ताहयज्ञेन कलौ पुनन्ति ते ॥ १३ ॥

कायेन वाचा मनसापि पातकं नित्यं प्रकुर्वन्ति शठा हठेन ये।
परस्वपुष्टा मलिना दुराशयाः सप्ताहयज्ञेन कलौ पुनन्ति ते ॥ १४ ॥

अत्र ते कीर्तयिष्याम इतिहासं पुरातनम्। यस्य श्रवणमात्रेण पापहानिः प्रजायते ॥ १५ ॥
तुंगभद्रातटे पूर्वमभूत्पत्तनमुत्तमम्। यत्र वर्णाः स्वधर्मेण सत्यसत्कर्मतत्पराः ॥ १६ ॥
आत्मदेवः पुरे तस्मिन्सर्ववेदविशारदः। श्रौतस्मार्तेषु निष्णातो द्वितीय इव भास्करः ॥ १७ ॥
भिक्षुको वित्तवाँल्लोके तत्प्रिया धुन्धुली स्मृता। स्ववाक्यस्थापिका नित्यं सुन्दरी सुकुलोद्भवा ॥ १८ ॥
लोकवार्तारता क्रूरा प्रायशो बहुजल्पिका। शूरा च गृहकृत्येषु कृपणा कलहप्रिया ॥ १९ ॥

जना विशुद्ध्यंति शुद्धा भवंति इति भवंतो मह्यं ब्रुवंतु गदंतु। कृपालुभिर्दयालुभिः लोकहितं लोका जनास्तेषां हितं विचार्य कोऽप्यश्रुतपूर्वः नवीनमार्गो नूतनः पंथाः प्रकाशितः ॥ १० ॥ कुमारोक्तिः नारदं प्रति। शुद्धिहेतुसहितानि पापिनां नामान्याह—ये मानवा इति चतुर्भिः। सर्वदा सर्वस्मिन्काले पापकृतः। तु एव। सदा दुराचाररता आजीवं दुष्टाचारपरायणाः, विमार्गगाः कुपथचारिणः, क्रोधाग्निदग्धाः कोपानलेन ज्वलिताः, कुटिलाः वक्राः। च पुनः। कामिनः परदाराभिलाषिणो ये मानवाः संति ते सर्वे सप्ताहयज्ञेन कलौ पुनंति शुद्ध्यंति ॥ ११ ॥ किंच—सत्येन हीनाः मिथ्याभाषिणः, पितृमातृदूषकाः पित्रा सहिता माता पितृमाता तस्याः दूषका इति समासो न द्वंद्वः, द्वंद्वे "आनङ् ऋतो द्वन्द्वे" इति पूर्वपदस्याऽऽनङ् स्यात्। तृष्णाकुलाः—इदं मे स्यादिदं मे स्यादिति चिंताव्याप्ताः, च पुनः आश्रमधर्मवर्जिताः आश्रमा ब्रह्मचर्याद्यास्तेषां धर्माः स्मृतिप्रसिद्धास्तैर्वर्जिता रहिताः, दांभिका लोकानुरंजनार्थं विहितकर्मानुष्ठानं दंभस्तेन जीवंतीति तथा, मत्सरिणः परोत्कर्षाऽसहनं मत्सरः सोऽस्ति येषां ते तथा, हिंसकाः जीवघातका अपि ये ते सप्ताहयज्ञेन कलौ पुनंति पूता भवंति ॥ १२ ॥ पंचोग्रपापाः—"ब्रह्मघ्नश्चैव गोघ्नश्च स्वर्णस्तेयी च मद्यपः। तत्संसर्गी पंचमश्च ह्युग्रपापाः प्रकीर्त्तिताः ॥' इति वचनात्। पंच उग्राणि-गोहत्या ब्रह्महत्या-मद्यपान-सुवर्णचौर्य-तत्संसर्गरूपाणि पापानि येषां ते। छलछद्मकारिणः न्यूनाधिक्येन वस्तुप्रदर्शनं छलम्, अन्यथा प्रदर्शनमित्येके। छद्म कपटं ते कर्त्तुं शीलं येषां ते तथा। क्रूराः क्रूरस्वभावाः। पिशाचा राक्षसजातयः, तद्वन्निर्दयाः। तथा ब्रह्मस्वपुष्टाः ब्रह्मणो ब्राह्मणस्य स्वं धनं तेन पुष्टाः स्थूलाः। व्यभिचारकारिणः व्यभिचारोऽन्यस्त्रीसंसर्गरूपस्तं कर्त्तुं शीलं येषां ते। ये एवंभूताः ते सप्ताहयज्ञेन कलौ पुनंति शुद्धाः भवन्ति ॥ १३ ॥ कायेन शरीरेण, वाचा वाण्या, मनसा संकल्पविकल्पात्मकेन पातकं हठेन आग्रहेण ये शठा मूर्खाः नित्यं प्रकुर्वंति, परस्वपुष्टाः परधनेनाप्यायिताः मलिना मलं कुवासनात्मकं तदस्त्येषामिति ते तथा, दुराशयाः दुर्दुष्ट आशयोंतःकरणं येषां ते तथा, सप्ताहयज्ञेन कलौ पुनंति निष्पापा भवंतीत्यर्थः ॥ १४ ॥ उक्तार्थं द्रढयति—अत्रेति। अत्र सप्ताहयज्ञेन पापनिरासे ते तुभ्यं पुरातनं पुराभवमितिहासम्—इति एवं ह स्फुटम्, आस बभूवेति तथाभूतं कीर्त्तयिष्यामो वर्णयिष्यामः। व्यर्थं तदिति न शंकनीयम्, यस्येतिहासस्य श्रवणमात्रेण पापहानिः पापनाशः प्रजायते ॥ १५ ॥ तत्स्थानं निर्दिशति—तुंगभद्रेति। तुंगभद्रा नदी दक्षिणदेशे प्रसिद्धा तस्यास्तटे तटोपरि पूर्वं पुरा उत्तमं पत्तनं नगरमभूदासीत्। यत्र यस्मिन्नगरे वर्णाः ब्राह्मणाद्याः स्वधर्मेण सत्यसत्कर्मतत्पराः—सत्यं हितभाषणं, सत्कर्म शुभकर्म, तयोः तत्पराः परायणाः, आसन्निति शेषः ॥ १६ ॥ तद्वासिविप्रं नामतो गुणतश्च निर्दिशति—आत्मदेव इति सपादेन। तस्मिन्नुत्तमे पुरे आत्मदेवनाम्ना सर्ववेदविशारदः सर्वेषु वेदेषु विशारदो निपुणः चतुर्वेदतत्त्वज्ञ इत्यर्थः। श्रौतस्मार्तेषु श्रुतिर्वेदः तत्प्रतिपाद्या धर्माः श्रौताः, स्मृतिर्धर्मशास्त्रं तन्निरूपिता धर्माः स्मार्त्ताः ते च ते चेति तथा, तेषु निष्णातो निपुणः, द्वितीयोऽन्यो भास्कर इव सूर्य इव ॥ १७ ॥ भिक्षुको भिक्षावृत्तिः। वित्तवान् धनी। लोके जगति। तद्भार्यां वर्णयति—तत्प्रियेति सत्रिपादेन। तत्प्रिया तस्य प्रिया भार्या धुंधुली नाम्ना स्मृता। धुंधुलीति वदति घर्घररावात् तां विशिनष्टि—स्ववाक्यस्थापिकेति। नित्यम् आत्मवचनसिद्धिकर्त्री, सुंदरी प्रशस्तरूपा, सुकुलोद्भवा सुष्ठु शोभने कुले उद्भवो जनिर्यस्याः सा तथा ॥ १८ ॥ लोकवार्त्तारता

एवं निवसतोः प्रेम्णा दंपत्योः रममाणयोः । अर्थाः कामास्तयोरासन्न सुखाय गृहादिकम् ॥ २० ॥
पश्चाद्धर्माः समारब्धास्ताभ्यां संतानहेतवे । गोभूहिरण्यवासांसि दीनेभ्यो यच्छतः सदा ॥ २१ ॥
धनार्धं धर्ममार्गेण ताभ्यां नीतं तथापि च । न पुत्रो नापि वा पुत्री ततश्चिन्तातुरौ भृशम् ॥ २२ ॥
एकदा स द्विजो दुःखाद्गृहं त्यक्त्वा वनं गतः । मध्याह्ने तृषितो जातस्तडागं समुपेयिवान् ॥ २३ ॥
पीत्वा जलं विषण्णस्तु प्रजादुःखेन कर्शितः । मुहूर्तादपि तत्रैव संन्यासी कश्चिदागतः ॥ २४ ॥
दृष्ट्वा पीतजलं तं तु विप्रो यातस्तदन्तिकम् । नत्वा च पादयोस्तस्य निःश्वसन्संस्थितः पुरः ॥ २५ ॥
यतिरुवाच—कथं रोदिषि विप्र त्वं का ते चिन्ता बलीयसी । वद त्वं सत्वरं मह्यं स्वस्य दुःखस्य कारणम् ॥ २६ ॥
ब्राह्मण उवाच—किं ब्रवीमि ऋषे दुःखं पूर्वपापेन संचितम् । मदीयाः पूर्वजास्तोयं कवोष्णमुपभुञ्जते ॥ २७ ॥
मद्दत्तं नैव गृह्णन्ति प्रीत्या देवा द्विजातयः । प्रजादुःखेन शून्योऽहं प्राणांस्त्यक्तुमिहागतः ॥२८॥
धिग्जीवितं प्रजाहीनं धिग्गृहं च प्रजां विना । धिग्धनं चानपत्यस्य धिक्कुलं संततिं विना ॥ २९ ॥
पाल्यते या मया धेनुः सा वन्ध्या सर्वथा भवेत् ।
यो मया रोपितो वृक्षः सोऽपि वन्ध्यत्वमाश्रयेत् ॥ ३० ॥
यत्फलं मद्गृहायातं शीघ्रं तच्च विशुष्यति । निर्भाग्यस्यानपत्यस्य किमतो जीवितेन मे ॥ ३१ ॥

लोकानां जनानां वार्ता–साधुर्दुष्टो पापो निन्द्योऽसावित्येवंरूपा तस्यां रता निरता, क्रूरा क्रूरस्वभावा, प्रायशो बाहुल्येन बहुजल्पिका बहुभाषिणी, गृहकृत्येषु गृहकार्येषु शूराऽनलसा । च पुनः कृपणा आगतायातिथये किंचिदपि अन्नादिकं दातुमसमर्था, कलहप्रिया कलहो झकटनं प्रियो यस्याः सा तथा ॥ १९ ॥ तयोर्वृत्तांतमनुवदति—एवमिति त्रिभिः । एवमुक्तविधया प्रेम्णा प्रीत्या गृहे निवसतोः निवासं कुर्वतोः दंपत्योः जायापत्योः अनपत्ययोः न पतंति पित्रादयो नरके यस्मादित्यपत्यं पुत्रस्तद्रहितयोस्तयोर्द्वयोः अर्था धनादिपदार्थाः कामा अभिलाषाः गृहादिकं सुखाय नासन् नाभूवन् ॥ २० ॥ ताभ्यां स्त्रीपुंसाभ्यां पश्चात् कियत्कालानन्तरं संतानहेतवे पुत्रप्राप्त्यर्थं धर्माः समारब्धाः कृताः । कीदृशाः धर्मा इत्याह—दीनेभ्यो याचकेभ्यो गोभूहिरण्यवासांसि गौः सूर्यसुता, भूरिला, हिरण्यं सुवर्णं, वासांसि सूत्रोर्णानिर्मितानि सदा यच्छतो दत्तः, ताविति कर्तृपदमध्याहार्यम् ॥ २१ ॥ ताभ्यां जंपतीभ्यां धनार्द्धं स्वगृहे यावद्धनमासीत्तदर्द्धं धर्ममार्गेण नीतं क्षपितं व्ययीकृतमिति यावत् । तथापि च पुत्रो नाभूत्, कन्यापि वा नाभूत् । तत उद्यमवैफल्याद्धेतोः भृशमतिशयेन चिंतातुरौ चिंतया दुःखितौ, अभूतामिति शेषः ॥ २२ ॥ किंच एकदेति एकदा एकस्मिन्काले स द्विज आत्मदेवाख्यो विप्रो दुःखात्पुत्राभावरूपाद् दुःखाद्धेतोः गृहं त्यक्त्वा वनं गतः मध्याह्ने काले तृषितः पिपासितस्तडागं मानुषख्यातो जलाश्रयः तडाग इत्युच्यते तं समुपेयिवान् प्राप्तवान् ॥ २३ ॥ 'पीत्वा' इत्यारभ्य 'विप्रस्तु गृहमागतः' इत्यंतेन प्रकारेण सोपपत्तिकं तत्संवादमाह—जलं पीत्वा प्रजादुःखेन कर्षितः प्रजा पुत्ररूपस्तस्या दुखमसंभवरूपं तेन कर्शितः कृश विषण्णः स्थितो भूत् तत्रैव वने मुहूर्त्ताद्घटिकाद्वयात्मकात् कश्चित् अनिर्द्धारितनामगोत्रः संन्यासी आगतः आगमत् ॥ २४ ॥ पीतजलं पीतं जलं येन स तथा तं संन्यासिनं दृष्ट्वाऽवलोक्य विप्रः तदंतिकं तस्य संन्यासिनः समीपं यातः प्राप्तः, तस्य पादयोश्चरणौ नत्वा 'कर्मादीनामपि संबंधमात्रविवक्षायां षष्ठ्येव' इति पादयोरिति कर्मणि षष्ठी । पुरस्तादग्रे निःश्वसन् निःश्वासं मुंचन् संस्थितः स्थितोऽभूत् ॥ २५ ॥ संन्यासी आत्मदेवं दुःखितं दृष्ट्वा पृच्छति—कथमिति । हे विप्र त्वं कथं केन कारणेन रोदिषि, ते तव बलीयसी बलिष्ठा का चिंता, स्वस्यात्मनः दुःखस्य कारणं हेतुं सत्वरं शीघ्रं मह्यं वद ब्रूहि ॥ २६ ॥ ब्राह्मणः संन्यासिनं प्रति सकारणं दुःखमाह—किमिति । हे ऋषे पूर्वपापेन प्राक्तनेनाघेन संचितं संपादितं दुःखं किं ब्रवीमि वक्तुमशक्यमित्यर्थः तथाहि—मदीयाः पूर्वजाः पित्रादयः तोयं तर्पणादौ दत्तं जलं कवोष्णम् ईषदुष्णम् उपभुंजते पिबन्ति ॥ २७ ॥ मया दत्तमपि प्रीतितोऽग्राह्यमित्याह—मद्दत्तमिति । प्रीत्यापि प्रेमतोपि मद्दत्तं देवा द्विजातयो ब्राह्मणादयो नैव गृह्णंति नांगीकुर्वंति । किं कारणमित्यत आह–प्रजेति । प्रजादुःखेन पुत्राभावजदुःखेन शून्यः गतसत्त्व इव प्राणांस्त्यक्तुमिहागत इहाहमागतोऽस्मि ॥ २८ ॥ लोके पुत्रं विना सर्वं निष्फलमित्याह—धिगिति । प्रजाहीनं पुत्ररहितं जीवितं धिक्, पष्ठ्यर्थे द्वितीयेयम् । प्रजां विना गृहं गेहं धिक् । च पुनः अनपत्यस्य सुतहीनस्य धनं द्रव्यादिसंपत्ति धिक् । संततिं विना संतानमंतरेण कुलं च धिक् ॥ २९ ॥ आत्मनो दौर्भाग्यं सूचयन्नाह—पाल्यत इति द्वाभ्याम् । या धेनुः प्रत्यब्दं प्रसूयमाना गौः मया पाल्यते तृणयवादिना पोष्यते सापि गौः सर्वथा सर्वप्रकारेण वंध्या पुत्राऽभाववती भवेत् भवति । यो वृक्ष आम्रादिः मयाऽऽरोपितः भवेत् स वृक्षो घृतदुग्धाभ्यां सिक्तोपि वंध्यत्वं फलाऽप्रदर्शनरूपम् आश्रयेत् लभेत ॥ ३० ॥ यत्फलम् आम्रपिचुमंदबीजपूरादिफलं मद्गृहायातं मम गृहं मद्गृहं तत्रायातम् आगतं भवति, तच्च शीघ्रं तत्क्षणमेव विशुष्यति । एतेन पूर्वं फलं सरसमित्यर्थतः सिद्धम् ।

इत्युक्त्वा स रुरोदोच्चैस्तत्पार्श्वे दुःखपीडितः । तदा तस्य यतेश्चित्ते करुणाऽभूद्गरीयसी ॥ ३२ ॥

तद्भालाक्षरमालां च वाचयामास योगवान् । सर्वं ज्ञात्वा यतिः पश्चाद्द्विजमूचे सविस्तरम् ॥ ३३ ॥

यतिरुवाच—मुञ्चाज्ञानं प्रजारूपं बलिष्ठा कर्मणो गतिः । विवेकं तु समासाद्य त्यज संसारवासनाम् ॥ ३४ ॥

शृणु विप्र मया तेऽद्य प्रारब्धं तु विलोकितम् । सप्तजन्मावधि तव पुत्रो नैव च नैव च ॥ ३५ ॥

संततेः सगरो दुःखमवापांगः पुरा तथा । रे मुञ्चाद्य कुटुम्बाशां संन्यासे सर्वथा सुखम् ॥ ३६ ॥

ब्राह्मण उवाच—विवेकेन भवेत्किं मे पुत्रं देहि बलादपि । नोचेत्त्यजाम्यहं प्राणांस्त्वदग्रे शोकमूर्छितः ॥ ३७ ॥

पुत्रादिसुखहीनोऽयं संन्यासः शुष्क एव हि । गृहस्थः सरसो लोके पुत्रपौत्रसमन्वितः ॥ ३८ ॥

इति विप्राग्रहं दृष्ट्वा प्राब्रवीत्स तपोधनः । चित्रकेतुर्गतः कष्टं विधिलेखविमार्जनात् ॥ ३९ ॥

न यास्यसि सुखं पुत्राद्यथा दैवहतोद्यमः । अतो हठेन युक्तोऽसि ह्यर्थिनं किं वदाम्यहम् ॥ ४० ॥

तस्याग्रहं समालोक्य फलमेकं स दत्तवान् । इदं भक्षय पत्न्या त्वं ततः पुत्रो भविष्यति ॥ ४१ ॥

सत्यं शौचं दया दानमेकभक्तं तु भोजनम् । वर्षावधि स्त्रिया कार्यं तेन पुत्रोऽतिनिर्मलः ॥ ४२ ॥

अतः अस्मात्कारणात् निर्भाग्यस्य भाग्यहीनस्य अनपत्यस्य अपुत्रस्य मे मम जीवितेन किं, न किमपि प्रयोजनम् ॥ ३१ ॥ तद्दुःखाक्रोशं वीक्ष्य तस्य करुणोत्पन्नेत्याह—इतीति । इत्येवमुक्त्वा गदित्वा स विप्रो दुःखपीडितः तत्पार्श्वे तस्य यतेः समीपे उच्चैः स्वरेण यदा रुरोद रोदनं चकार, तदा तस्य यतेः संन्यासिनश्चित्ते हृदि गरीयसी गुरुतरा करुणा दयाऽभूत्, जातेत्यर्थः ॥३२॥ योगबलेन तत्प्रारब्धं विलोक्याब्रवीदित्याह—तदिति । योगवान् योगी तद्भालाक्षरमालां तस्य विप्रस्य भाले ललाटपट्टे अक्षरमालां विधात्रा लिखितां वर्णमालां जन्मतो मरणावधिसूचिकां वाचयामास । सर्वं ज्ञात्वा पश्चात् सविस्तरं यथा स्यात् तथा विप्रम् ऊचे ॥ ३३ ॥ संन्यासी ब्राह्मणं वैराग्यं प्रदर्शयन्नाह—मुंचेति । प्रजारूपं पुत्ररूपम् अज्ञानमविद्यां मुंच त्वं त्यज । किमित्यत आह—कर्मणो गतिर्बलिष्ठा बलवत्तरा । एतेन संततिकरं त्वद्भाग्यं नास्तीति सूचितम् । किं मया कर्त्तव्यमित्यपेक्षायामाह—तु उक्तार्थतो वैलक्षण्ये वर्त्तते । विवेकं ज्ञानं समासाद्य संप्राप्य संसारवासनां पुत्रो मे भूयादितीच्छारूपां त्यज ॥ ३ ॥ मद्भाग्ये किं विधिना पुत्रो न लिखितः, किं वा पापेन प्रतिबद्धः, ग्रहदोषैर्वेति संदेहं निराकरोति—शृण्विति । हे विप्र अद्य इदानीं ते तव प्रारब्धं मया विलोकितं दृष्टम्, तुशब्दो योगबलसूचकः । सप्तजन्मावधि सप्तजन्मपर्यंतं तव पुत्रो नैव च नैव नास्ति नास्तीति वीप्सा पुत्रेच्छां मा कुरु इति सूचनार्था ॥ ३५ ॥ पुत्रात् सुखं स्यादिति मा निश्चिनुहीत्याह—संततेरिति । दैवमंतरा योगप्रभावात् दत्तायाः संततेः सगरो राजा यथा येन प्रकारेण दुःखमवाप प्राप, तथाङ्गोऽपि नृपतिः । अविसर्गपाठे अंगेति संबोधनम् । यथा यथावदिति गुरवः । पुरा पूर्वम् । रे इति अवज्ञया संबोधयति । कुटुंबाशां मे संततिरविच्छिन्ना भूतले तिष्ठतु चिरायेतीच्छामद्य मुंच परिहर । संन्यासे वासनात्यागे सर्वथा सर्वप्रकारेण सुखमस्ति ॥ ३६ ॥ विप्रो भाषते—विवेकेनेति । विवेकेन ज्ञानेन मे मम किं भवेत् किं स्यात्, न किमपि । बलाद् दैवं निवर्त्यापि योगबलतः मे पुत्रं त्वं देहि । विपक्षे दोषं प्रदर्शयति—नो चेत् चेद्यदि नो ददासि तर्हि त्वदग्रे तव पुरतः शोकमूर्छितः शोकेन कर्त्तव्याकर्त्तव्यविचारशून्योऽहं प्राणांस्त्यजामि मरिष्यामि । वर्त्तमानसामीप्ये भविष्यति लट् ॥ ३७ ॥ स्वचिंतितमाह—पुत्रादीति । पुत्रः प्रसिद्धः, आदिना पौत्रादिसंग्रहः, तस्य सुखेनानंदेन हीनो रहितोऽयं संन्यासः शुष्को विरसः, एव हीति निश्चयार्थकनिपातद्वयेनोक्तोऽर्थो दृढीकृतः । पुत्रपौत्रसमन्वितः पुत्रपौत्रैर्युक्तो गृहस्थ गृही लोके जगति सरसः रसवान् ॥ ३८ ॥ सूतोक्तिरियम् । इतीति—इत्येवं विप्राग्रहं विप्रस्य आग्रहं हठं दृष्ट्वाऽलोक्य स तपोधनो मुनिः प्राब्रवीत् प्रावदत् । मम प्रारब्धे न पुत्रस्तथापि योगबलेन संततिं देहीत्याग्रहवंतं प्रति विधिलेखनिवारणेन पुत्रदानेऽपि दुःखमेव प्रत्युत न सुखमित्याह—चित्रकेतुरिति । विधिलेखविमार्जनात् विधिर्विधाता तस्य लेखो लेखनं कर्मानुसारेण वर्णावलिस्तस्य विमार्जनात् विलायनात् चित्रकेतुर्नृपः कष्टं गतः ॥ ३९ ॥ किंच—नेति । पुत्रात्सुखं त्वं न यास्यसि न प्राप्स्यसि । तत्र दृष्टांतः—दैवहतोद्यमः दैवेन "पूर्वजन्मजनितं पुराविदः कर्म दैवमिति संप्रचक्षते" इत्युक्तलक्षणेन हतो नष्ट उद्यमः पुरुषार्थो यस्य स यथा सुखं नैति । अतोऽस्माद्धेतोः त्वं हठेन युक्तोऽसि पुत्राग्रहवानसि । हि युक्तोऽयमर्थः । अर्थिनं पुत्रेच्छावंतं त्वां किं वदामि ॥ ४० ॥ स्वदर्शनफलं विख्यापयन् तस्मै एकं फलं प्रदत्तवानित्याह—तस्येति । तस्य विप्रस्य आग्रहं हठं समालोक्य दृष्ट्वा एकं फलम् ( आम्रस्येति शेषः ) स संन्यासी तस्मै विप्राय दत्तवान् । किमेतेन स्यादिति ध्यायन्तं प्रत्याह—इदमिति । इदं फलं पत्न्या स्त्रिया त्वं भक्षय खादय, ततः फलभक्षणाद्धेतोः पुत्रो भविष्यति उत्पत्स्यते ॥ ४१ ॥ नियमाचरणात् पुत्रोऽपि निर्मलो भविष्यतीत्याह—सत्यमिति । सत्यं यथार्थभाषणम् । शौचं शरीरशुद्धिः । दया परस्य दुःखासहिष्णुत्वम् । दानं दीनेभ्योऽन्नादेः । एकभक्तं सकृद्भोजनम् । वर्षावधि वर्षपर्यंतं स्त्रिया गृहिण्या कार्यं कर्त्तव्यम् । तेन हेतुनाऽतिनिर्मलोऽतिशुद्धः

एवमुक्त्वा ययौ योगी विप्रस्तु गृहमागतः। पत्न्याः पाणौ फलं दत्त्वा स्वयं यातस्तु कुत्रचित् ॥ ४३ ॥
तरुणी कुटिला तस्य सख्यग्रे च रुरोद ह। अहो चिन्ता ममोत्पन्ना फलं चाहं न भक्षये ॥ ४४ ॥
फलभक्षेण गर्भः स्याद्गर्भेणोदरवृद्धिता। स्वल्पभक्ष्यं ततोऽशक्तिर्गृहकार्यं कथं भवेत् ॥ ४५ ॥
दैवाद्धाटी व्रजेद्ग्रामे पलायेद्गर्भिणी कथम्। शुकवन्निवसेद्गर्भस्तं कुक्षेः कथमुत्सृजेत् ॥ ४६ ॥
तिर्यक्चेदागतो गर्भस्तदा मे मरणं भवेत्। प्रसूतौ दारुणं दुःखं सुकुमारी कथं सहे ४७ ॥
मन्दायां मयि सर्वस्वं ननान्दा संहरेत्तदा। सत्यशौचादिनियमो दुराराध्यः स दृश्यते ॥ ४८ ॥
लालने पालने दुःखं प्रसूतायाश्च वर्तते। वन्ध्या वा विधवा नारी सुखिनी चेति मे मतिः ॥ ४९ ॥
एवं कुतर्कयोगेन तत्फलं नैव भक्षितम्। पत्या पृष्टं फलं भुक्तं भुक्तं चेति तयेरितम् ॥ ५० ॥
एकदा भगिनी तस्यास्तद्गृहे स्वेच्छयाऽऽगता। तदग्रे कथितं सर्वं चिन्तेयं महती हि मे ॥ ५१ ॥
दुर्बला तेन दुःखेन ह्यनुजे करवाणि किम्। साऽब्रवीन्मम गर्भोऽस्ति तं दास्यामि प्रसूतितः ॥ ५२ ॥
तावत्कालं सगर्भेव गुप्ता तिष्ठ गृहे सुखम्। वित्तं त्वं मत्पतेर्यच्छ स ते दास्यति बालकम् ॥ ५३ ॥

पुत्रः, स्यादिति शेषः ॥ ४२ ॥ एवमिति—एवमित्थम् उक्त्वा कथयित्वा योगी संन्यासी ययौ। विप्रो गृहमागतः, तुरविलंबार्थः। पत्न्याः भार्यायाः पाणौ हस्ते फलं दत्त्वा समर्प्य स्वयं कुत्रचित् क्वापि यातः, कार्यार्थं गतवानित्यर्थः ॥ ४३ ॥ दुर्ज्ञेयं स्त्रीचरितं प्रदर्शयंस्तज्जायाचेष्टामाह—तरुणीति सप्तभिः। तस्यात्मदेवस्य तरुणी युवतिः कुटिला कौटिल्ययुक्ता—जातिगुणरूपगृहैश्वर्यैरस्माकं तुल्या भवसि, पुत्रप्रदफलभक्षणेन न्यूनतां पूरयेति सखीभिरुच्यमानाया अपि हठेन तदभक्षणाग्रहवत्त्वं कुटिलत्वम्। सख्यग्रे सखीनां पुरतो रुरोद रोदनं चकार। ह इति खेदे। चोऽप्यर्थे। किमर्थं रोदिषीति पृष्टाह—अहो अकस्मादेव मम चिंता शरीरोच्छोषणहेतुरुत्पन्नाऽऽविर्भूता। का चिंतेति श्रोतुकामाः सखीः फलं प्रदर्शयन्ती तद्भक्षणं निराकरोति—पुत्रार्थं पत्या दत्तं फलं न भक्षये नादम्यहम् ॥ ४४ ॥ कौटिल्यं सूचयंस्तत्र कारणमाह—फलभक्षेण खादनेन गर्भः स्यात्, गर्भेण उदरस्थमांसपिंडेन उदरवृद्धिता जठरवर्धनं, ततस्तदनंतरं स्वल्पभक्षणमल्पभोजनशक्तिः तत इति पुनर्योज्यम्। ततोऽल्पभक्षणादशक्तिः शरीरशैथिल्यं, ततो देहशैथिल्यात् गृहकार्यं मार्जनलेपनादि कथं भवेत् केन प्रकारेण स्यात् ॥ ४५ ॥ दैवात् प्रारब्धतः धाटी चौराद्यागमरूपा व्रजेत् ग्रामे प्राप्नुयात् तदा गर्भिणी स्त्री कथं पलायेत् केन प्रकारेणापसरणं विदध्यात्। 'वाटी–वाहाटी' वेति वदंतो भ्रांताः। किंच–गर्भः शुकवत् व्यासपुत्रवत् निवसेत् स्थिरो भवेत्, तस्य षोडशवर्षपर्यंतं बहिरनिर्गमात्। तं गर्भं कुक्षेः सकाशात् कथमुत्सृजेत् केन प्रकारेण परित्यजेत् ॥ ४६ ॥ किंच–चेद्यदि गर्भस्तिर्यक् वक्रत्वमागतः प्राप्तो भवेत् तदा मे मरणं भवेत्। प्रसूतौ जन्मसमये दारुणमसह्यरूपं दुःखं सुकुमारी कोमलांगी बालाऽहं कथं केन प्रकारेण सहे ॥ ४७ ॥ किंच—मयि प्रसूतिकागारे मंदायां गर्भजदुःखेन कार्यासमर्थायां सत्यां सर्वस्वं ममाखिलं धनं तदा तस्मिन्नवसरे ननांदा भर्तुर्भगिनी संहरेत्। किंच—ननांद्रनाह्वाने धात्र्या कार्यसंपत्तौ सिद्धायामपि सत्यशौचादिनियमः सत्यशौचादीनां पूर्वोक्तानां नियमः स प्रसिद्धो दुराराध्यः मया कर्तुमशक्यो दृश्यते ॥ ४८ ॥ किंच—प्रसूतायाः प्रसववेदनासहनेऽपि शिशोर्लालने दुःखं वर्त्तते। तर्हि किं तेऽभीष्टमिति पृष्टा स्वाभिप्रायं प्रकाशयति—वंध्याऽप्रसूता, विधवा पतिहीना नारी स्त्री सुखिनी सुखभागिनीति मे मतिः मे बुद्धिः ॥ ४९ ॥ एवमित्थं कुतर्कयोगेन विपरीततर्कयोगतः तत्फलं धुंधुल्या नैव भक्षितं नात्तम्। पत्या पृष्टं फलं भुक्तं त्वयेति तया भुक्तं मयेति ईरितं कथितम् ॥ ५० ॥ सखीसंवादं समाप्येदानीं भगिन्योर्मिथो दुर्मंत्रं निरूपयति–एकदेति। एकदा एकस्मिन्काले तस्या धुंधुल्या भगिनी सहोदरा तद्गृहं तस्या भवनं स्वेच्छया विनैव कार्यं गताऽऽगता तदग्रे तस्याः कनिष्ठभगिन्या अग्रे सर्वं–पत्या पुत्रार्थं फलं मद्धस्ते दत्तं मया न भुक्तं पतिवंचनार्थं भुक्तमित्युक्तम्, इयं पतिवंचनरूपा फलाऽभक्षेण चिंता शरीरशोषणरूपा महती मे मम, वर्त्तत इति शेषः ॥ ५१ ॥ ततो दुर्बलाहमस्मीत्याह—दुर्बलेति। तेनोक्तेन दुःखेन हे अनुजे पश्चाज्जाते दुर्बलाऽल्पवीर्यास्मि हि यतोऽतः किं करवाणि। सा अनुजा ज्येष्ठां भगिनीमाश्वासयन्त्याह—मम गर्भोऽस्ति, प्रसूतितः सप्तममासे तं बालं दास्यामि, तुभ्यमिति शेषः। "आचतुर्थाद्भवेत्स्रावः पातः पंचषष्ठयोः। अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकी भवेत्।" इतिस्मृतेः प्रसूतिशब्दोऽत्र सप्तममासवाचक उन्नेयः, न तु जन्मसूचकोऽग्रिमवचनेनासंगतेः ॥ ५२ ॥ तावत्कालपर्यंतं कूटगर्भवती सुगुप्ता भवेत्याह। तावदिति—तावत्कालं

---

१ अत्र केचन फलशब्देनाम्रफलं, भक्षधातुप्रयोगेणोत्तमजातिकं तदिति च व्याचक्षते। तत्राऽऽम्रफलनिश्चायकवाक्याऽनुपलब्धेराम्रेतरभक्षणार्होऽनेकफलसत्त्वाच्च नैतत्कल्पना युक्तियुक्तेति भाति।

षाण्मासिको मृतो बाल इति लोको वदिष्यति ।
तं बालं पोषयिष्यामि नित्यमागत्य ते गृहे ॥ ५४ ॥

फलमर्पय धेन्वै त्वं परीक्षार्थं तु सांप्रतम् । तत्तदाचरितं सर्वं तथैव स्त्रीस्वभावतः ॥ ५५ ॥
अथ कालेन सा नारी प्रसूता बालकं तदा । आनीय जनको बालं रहस्ये धुन्धुलीं ददौ ॥ ५६ ॥
तया च कथितं भर्त्रे प्रसूतः सुखमर्भकः । लोकस्य सुखमुत्पन्नमात्मदेवप्रजोदयात् ॥ ५७ ॥
ददौ दानं द्विजातिभ्यो जातकर्म विधाय च । गीतवादित्रघोषोऽभूत्तद्द्वारे मंगलं बहु ॥ ५८ ॥
भर्तुरग्रेऽब्रवीद्वाक्यं स्तन्यं नास्ति कुचे मम । अन्यस्तन्येन निर्दुग्धा कथं पुष्णामि बालकम् ॥ ५९ ॥
मत्स्वसायाः प्रसूताया मृतो बालस्तु वर्तते । तामाकार्य गृहे रक्ष सा तेऽर्भं पोषयिष्यति ॥ ६० ॥
पतिना तत्कृतं सर्वं पुत्ररक्षणहेतवे । पुत्रस्य धुन्धुकारीति नाम मात्रा प्रतिष्ठितम् ॥ ६१ ॥
त्रिमासे निर्गते चाथ सा धेनुः सुषुवेऽर्भकम् । सर्वांगसुन्दरं दिव्यं निर्मलं कनकप्रभम् ॥ ६२ ॥

सप्तमासिकबालकप्रदानपर्यंतम्, नैरंतर्ये द्वितीयेयम्। सगर्भा इव गर्भवती यथा तिष्ठति तथा गुप्ताऽलक्षिता गृहे स्वभवने सुखं यथा स्यात्तथा त्वं तिष्ठ स्थिरा भव। स्वपुत्रस्य परस्मै दानं दुर्घटं मन्वानां प्रत्याह--मत्पतेर्मम भर्त्रे वित्तं धनं त्वं यच्छ देहि, स धनलोभी ते तुभ्यं बालकं स्वपुत्रं दास्यति 'द्रव्येण सर्वे वशाः' इत्युक्तेः॥ ५३ ॥ क ते पुत्र इति लोकैः पृष्टाऽहं मृतं विज्ञापयामीति श्रुत्वा लोकोपि तथा वदिष्यतीत्याह--षाण्मासिक इति। षट् च ते मासाश्च षण्मासाः तत्र भवः षाण्मासिको बालो मृत इति लोको जनो वदिष्यति कथयिष्यति। कृतेप्येवं बालरक्षणं मातरमन्तरा दुर्घटमिति चिंतयंतीं प्रत्याह--ते तव गृहे नित्यमागत्य तं बालम् अहं पोषयिष्यामि पुष्टं करिष्यामि॥ ५४ ॥ फलभक्षेण पुत्रः स्यादिति सत्यं वा मृषा वेति निर्द्धारयितुं गवे तत्समर्पितमित्याह--फलमिति। फलमिदं धेन्वै गवे परीक्षार्थं परीक्षणाय सांप्रतमद्य त्वमर्पय, भक्षणार्थमिति शेषः। खादयेति भावार्थः। तदा तस्मिन्नेव काले स्त्रीस्वभावतः 'स्त्रीणां दोषाः स्वभावजाः' इतिवचनात् तथैव तत्सर्वमाचरितं कृतम्॥ ५५ ॥ सकुतर्कं दुश्चेष्टितं निरूप्य प्रकृतमनुसरति--अथेति। अथ दुर्मंत्रणानन्तरं सा कनिष्ठा भगिनी बालकं प्रसूता अजीजनत्। कालेन यथोक्तसमयेन जनकस्तत्पिता बालं शिशुम् आनीय गृहीत्वा तदा सप्तमे मासि रहसि एकांते धुंधुलीं धुंधुल्यै ददौ॥ ५६ ॥ पुनः स्त्रीचरितं दुर्ज्ञेयमित्याह--तयेति। तया धुंधुलया भर्त्रे पत्ये अर्भको बालः प्रसूतो जातो ममेति कथितम्। दुःखाक्रोशो न श्रुतोऽस्माभिरथ च धात्र्यानयनमपि न कृतं कथमित्यत आह--सुखमिति। श्रुत्वैतत् सर्वस्यापि सुखमुत्पन्नमित्याह--लोकस्येति। आत्मदेवप्रजोदयात् आत्मदेवस्य ब्राह्मणस्य प्रजा पुत्रस्तस्योदयात् जन्मतः लोकस्य सुखमुत्पन्नम्॥ ५७ ॥ "पुत्रजन्मव्यतीपाते दत्तं भवति चाक्षयम्" इतिधर्मशास्त्रात् सोपि दानं चकारेत्याह--ददाविति। द्विजातिभ्यो ब्राह्मणादिभ्यः दानं ददौ। आत्मदेव इति कर्तृपदमत्रोन्नेयम्। किं कृत्वा--जातकर्म विधाय सम्पाद्य। च पादपूर्तौ तद्द्वारे तस्यात्मदेवस्य द्वारे गीतवादित्रघोषः गीतानि च वादित्राणि चेति गीतवादित्राणि तेषां घोषो नादोऽभूत्। बहु मंगलं चाभूत्॥ ५८ ॥ मम स्तनयोर्दुग्धं नास्तीति पतिं विज्ञापयति--भर्तुरिति। भर्तुः पत्युरग्रे पुरतः वाक्यं वचनमब्रवीत्। किमित्यपेक्षायामाह--मम कुचे स्तन्थं स्तने भवं स्तन्यं दुग्धं नास्तीति। कुचयोरिति वक्तव्ये कुचे इति पाठश्छंदोऽनुरोधेन। पयोर्थं धात्रीमानयिष्यामि इति वदंतं प्रत्याह--निर्दुग्धा निर्गतं दुग्धं यस्याः सा तथाभूताहम् अन्यस्तन्येन अन्यस्त्रीजनदुग्धेन बालकमल्पशिशुं कथं केन प्रकारेण पुष्णामि पालयामि॥ ५९ ॥ तर्हि किं कर्तव्यमित्यत आह--मदिति। मत्स्वसा मम कनिष्ठभगिनी या वर्तते तस्याः प्रसूतायाः प्रसवत्या बालो मृतः,अभूदिति शेषः। तां मद्भगिनीम् आकार्य आनीय गृहे रक्ष स्थापय। 'आकार्यम्' इति पाठे कार्यपर्यंतं तां गृहे रक्षेति योजना। सा ते तव अर्भं बालं पोषयिष्यति॥ ६० ॥ स्वामिना तथा कृतमित्याह--पतिनेति। पतिना पत्या तत्सर्वं कृतं संपादितम्। किमर्थं--पुत्ररक्षणहेतवे पुत्रस्य पालनार्थम्। "द्वादशेऽह्नि पितानाम कुर्यात्" इति विधिमुल्लंध्य मात्रा पुत्रनाम व्यधादित्याह--पुत्रस्य धुंधुकारीति नाम मात्रा प्रतिष्ठितं प्रतिष्ठापितम्॥ ६१ ॥ तत्राश्चर्यमुत्पन्नमित्याह--त्रिमास इति। त्रिमासे इति पाठात् भगिनीसंकेतान्मासत्रयं व्यतीते धेन्वै फलमर्यतमिति प्रतीयते। केचित्तु--विजातीयसंततिप्रभावतो गौर्द्वादशे मासे प्रसूतेत्याहुः। धुंधकारी जन्मतः त्रिमासे निर्गते सति सा धेनुः अर्भकं बालं सुषुवे जनयामास। कीदृशम्--सर्वांगसुंदरं सर्वैरंगैर्मनोहरम्। दिव्यं वीर्यसंपर्काभावात्फलमहिम्ना वा। निर्मलं शुद्धम्। कनकप्रभं सुवर्णस्य प्रभा इव प्रभा यस्येति तम्॥ ६२ ॥

---

१. यावद्बालस्य स्तनन्धयत्वं, यावद्वा तस्याः सदुग्धत्वमित्याशयः।

दृष्ट्वा प्रसन्नो विप्रस्तु संस्कारान्स्वयमादधे । मत्वाऽऽश्चर्यं जनाः सर्वे दिदृक्षार्थं समागताः ॥ ६३ ॥
भाग्योदयोऽधुना जात आत्मदेवस्य पश्यत । धेन्वा बालः प्रसूतस्तु देवरूपीति कौतुकम् ॥ ६४ ॥
न ज्ञातं तद्रहस्यं तु केनापि विधियोगतः । गोकर्णं च सुतं दृष्ट्वा गोकर्णं नाम चाकरोत् ॥ ६५ ॥
कियत्कालेन तौ जातौ तरुणौ तनयावुभौ । गोकर्णः पण्डितो ज्ञानी धुन्धुकारी महाखलः ॥ ६६ ॥
स्नानशौचक्रियाहीनो दुर्भक्षी क्रोधसंयुतः । दुष्प्रतिग्रहकर्त्ता च शवहस्तेन भोजनः ॥ ६७ ॥
चोरः सर्वजनद्वेषी परवेश्मप्रदीपकः । लालनायार्भकान्धृत्वा सद्यः कूपे न्यपातयत् ॥ ६८ ॥
हिंसकः शस्त्रधारी च दीनान्धानां प्रपीडकः । चाण्डालाभिरतो नित्यं पाशहस्तश्व संगतः ॥ ६९ ॥
तेन वेश्याप्रसंगेन पित्र्यं वित्तं तु नाशितम् । एकदा पितरौ ताड्य पात्राणि स्वयमाहरत् ॥ ७० ॥
तत्पिता कृपणः प्रोच्चैर्धन[1]हीनो रुरोद ह । वध्यत्वं तु समीचीनं कुपुत्रो दुःखदायकः ॥ ७१ ॥

तद्दृष्ट्वा हर्षितो विप्र इत्याह—दृष्ट्वेति । दृष्ट्वा गोप्रसूतं बालं निरीक्ष्य प्रसन्नस्तुष्टो विप्रः स्वयं संस्कारान् जातस्य जातकर्मादीनादधे चकार । सर्वे जना नागरिका दिदृक्षार्थं तद्दर्शनकाम्यया समागताः समाययुः । तत्र हेतुः-आश्चर्यं मत्वेति ॥ ६३ ॥ धन्योऽयं विप्र इति लोको वक्तीत्याह-भाग्योदय इति । आत्मदेवस्य विप्रस्याधुनेदानीं भाग्योदयो जातः । देवरूपी बालो धेन्वा प्रसूत इति कौतुकं यूयं पश्यत आलोकयत ॥ ६४ ॥ तद्धेतुर्न ज्ञातः कैश्चिदित्याह—नेति । तत् रहस्यं संन्यासियोगप्रभावदत्तफलभक्षण-रूपं केनापि न ज्ञातम् । अज्ञाने हेतुः-विधियोगतः दैवबलात् । गोकर्णं गोः कर्णाविव कर्णौ यस्य स तथेति तं सुतं पुत्रं दृष्ट्वा गोकर्णं नामाऽकरोत् तस्य गोकर्ण इति नाम व्यदधादित्यर्थः । अत्रात्मदेवेति कर्तृपदमध्याहार्यम् । चौ प्रसिद्धिद्योतकौ ॥ ६५ ॥ कारणवैचित्र्यं कार्यविचित्रतायां कारणमित्याह-कियदिति । तावुभौ द्वौ तनयौ बालकौ कियत्कालेन तरुणौ जातौ युवानाव-भूताम् । तयोश्चेष्टाभेदमाह-गोकर्णः पंडितः सदसद्विवेकिनी बुद्धिः पंडा सा संजाताऽस्येति तथा, ज्ञानी ज्ञानमस्यास्तीति तथा । धुंधुकारी महाखलोऽतिदुष्टो महापापकरणात् ॥ ६६ ॥ तद्दुष्टतां निरूपयति सार्द्धैस्त्रिभिः । स्नानेति-"स्नानं तु द्विविधं प्रोक्तं मंत्रमुसलभेदतः । इत्युक्तलक्षणं स्नानं शौचं च द्विविधं स्मृतम् ॥ बाह्याभ्यंतरभेदेन क्रिया नानाविधाः स्मृताः ।" इति वचनान्नि-रुक्ताभिः स्नानशौचक्रियाभिर्हीनो रहितः । दुर्भक्षी अपरीक्षितान्नभोक्ता । क्रोधसंयुतः क्रोधयुक् दुराचारनिवारणार्थसदुपदेशात् । दुष्प्रतिग्रहकर्त्ता च दुष्टा ये प्रतिग्रहाः ब्रह्मांडपुराणोक्तास्तेषां कर्त्ता । तथाहि—"तिलधेनुर्गजो वाजी प्रेतान्नमजिनं मणिः । सुरभिः सूयमाना च दुष्टाः सप्तप्रतिग्रहाः ॥" मणिः शालिग्रामः । गौरुभयतोमुखी । शवहस्तेन भोजनः सवस्य मृतस्य जंतोर्देहस्य हस्तेन साधनेन श्मशाने भुंक्ते इति स तथेति देशांतरीयव्यवहारः । वस्तुतस्तु शवं मृतं हंति वहंतीति शवहणस्तेना चौराः तैः सह भोजनं यस्येति स तथा । हंतिरत्र प्रापणार्थः । यद्वा—शववहनचौर्याभ्यां भोजनं यस्येति स तथेति केचित् । 'सव्यहस्तेन भोजनः' इति पाठोपि कुत्रचित् । "वामहस्तेन यद्भुक्तं मांसतुल्यं स्मृतं बुधैः'; इति स्मृतौ वामहस्तभोजननिषेधात् ॥ ६७ ॥ चोरः परधनमोषकः । सर्वजनद्वेषी सर्वैरात्मीयैः परकीयैर्वा जनैः सह द्वेष्टुं शीलमस्येति स तथा । परवेश्मप्रदीपकः परेषां वेश्मानि तार्णगृहाणि वह्निना प्रदीपयतीति तथा । लालनाय विलासार्थम् अर्भकान् बालकान्धृत्वा गृहीत्वा सद्यः तत्कालं कूपे न्यपातयत् प्रक्षिप्तवान् ॥ ६८ ॥ हिंसको जीवघाती । शस्त्रधारी शस्त्राणां धारकः । दीनांधानां प्रपीडकः, दीनाः—"सर्ववस्तु-विहीना ये ते दीनाः परिकीर्त्तिताः । क्षयार्थकात्तु दीङ्धातोर्निष्ठायां नत्वदर्शनात् ॥" इत्युक्ताः, अंधा नेत्रहीनाः, तेषां दुःखदः । चांडालेषु अभिरतोऽनुरक्तः । नित्यं सदा पाशहस्तः पाशो हस्ते यस्य स तथा । श्वसंगतः श्वभिः कुक्कुरैः संगतः सहितः ॥ ६९ ॥ वेश्यानां प्रसंगतः संसर्गात् तेन धुंधुकारिणा पित्र्यं पितृसंबंधि वित्तं धनं नाशितम् । 'स्वंताथादि न पूर्वभाक्' इत्यमरोक्तः । तु वैलक्षण्ये । तद्यथा—एकदा एकस्मिन् काले पितरौ माता च पिता चेति तथा तौ "पुमान् स्त्रिया" इत्येकशेषः । ताड्य ताडयित्वा । समासे ल्यब्विधानात् ताड्येति छांदसं रूपम् । पात्राणि स्थालीकमंडल्वादीनि स्वयमाहरत् हृत्वा अन्यत्रानयत् , वेश्यागृहं प्रापयदि-त्यर्थतः सिद्धम् ॥ ७० ॥ धननाशं कुमार्गेण दृष्ट्वा शोचति तत्पितेत्याह—तदिति । कृपणः कृच्छ्रात्प्रधनस्यान्यायतो व्ययमकारीति । तदुक्तम्—"धनस्य रक्षणार्थाय प्राणहानिं करोति यः । बुभुक्षितोपि नो भुंक्ते कृपणः स विधीयते ॥" इति । तत्पिता तस्य धुंधुका-रिणः पिता जनकः धनहीनः निर्धनः प्रोच्चैरुदात्तस्वरेण रुरोद विललाप । हेति स्पष्टम् । निःसत्त्वं मरणमेव । तथाहि—उद्योगपर्वणि श्रीकृष्णं प्रति युधिष्ठिरवचनम्—"लोभः प्रज्ञानमाहंति प्रज्ञा हंति हता ह्रियम् । ह्रीर्हता बाधते धर्मं धर्मो हंति हतः श्रियम् ॥ श्रीर्हता पुरुषं हंति पुरुषस्याधनं वधः । अधनाद्धिनिवर्तंते ज्ञातयः सुहृदो द्विजाः ॥ अपुष्पादफलाद्वृक्षाद्यथा कृष्ण पतत्रिणः ॥"

१. 'धनदानी' इति पाठान्तरम् ।

क्व तिष्ठामि क्व गच्छामि को मे दुःखं व्यपोहयेत् । प्राणांस्त्यजामि दुःखेन हा कष्टं मम संस्थितम् ॥७२॥
तदानीं तु समागत्य गोकर्णो ज्ञानसंयुतः । बोधयामास जनकं वैराग्यं परिदर्शयन् ॥ ७३ ॥
असारः खलु संसारो दुःखरूपी विमोहकः । सुतः कस्य धनं कस्य स्नेहवाञ्ज्वलतेऽनिशम् ॥ ७४ ॥
न चेन्द्रस्य सुखं किञ्चिन्न सुखं चक्रवर्तिनः । सुखमस्ति विरक्तस्य मुनेरेकान्तजीविनः ॥ ७५ ॥
मुञ्चाज्ञानं प्रजारूपं मोहतो नरके गतिः । निपतिष्यति देहोऽयं सर्वं त्यक्त्वा वनं व्रज ॥ ७६ ॥
तद्वाक्यं तु समाकर्ण्य गन्तुकामः पिताऽब्रवीत् । किं कर्तव्यं वने तात तत्त्वं वद सविस्तरम् ॥ ७७ ॥
अन्धकूपे स्नेहपाशैर्बद्धः पंगुरहं शठः । कर्मणा पतितो नूनं मामुद्धर दयानिधे ॥ ७८ ॥

गोकर्ण उवाच—देहेऽस्थिमांसरुधिरेऽभिमतिं त्यज त्वं जायासुतादिषु सदा ममतां विमुञ्च ।
पश्यानिशं जगदिदं क्षणभंगनिष्ठं वैराग्य[1]रागरसिको भव भक्तिनिष्ठः ॥ ७९ ॥
धर्मं भजस्व सततं त्यज लोकधर्मान्सेवस्व साधुपुरुषाञ्जहि कामतृष्णाम् ।
अन्यस्य दोषगुणचिन्तनमाशु मुक्त्वा सेवा[2]कथारसमहो नितरां पिब त्वम् ॥ ८० ॥

तमेवाह सार्द्धेन । वंध्यत्वं तु समीचीनम् "अपुत्रत्वं वरं मन्ये कुपुत्राद्दुःखदायकात्" इति विवर्णरूपमत्रोन्नेयम् ॥ ७१ ॥ क्व कुत्र स्थाने अहं तिष्ठामि स्थितिं करोमि "दुःखेन सह संवासः सर्वथा दुःखकृन्मतः" इत्युक्तेः क्व कुत्र गच्छामि स्वगेहस्य त्यक्तुमशक्यत्वात् । मे मम दुःखं कुपुत्रधननाशाभ्यां जातं को व्यपोहयेत् को विनाशयेत् । दुःखेन हेतुना प्राणान् अहं त्यजामि । हेत्याक्रोशे । कष्टं मम संस्थितं जातम् ॥ ७२ ॥ "तदानीं प्राप्य गोकर्णः पितरं पर्यबोधयत् । अवस्तुत्वं हि जगतो वैराग्येण निरूपयन् ॥" इत्याह—तदानीमिति । तदानीं तर्हि समागत्य ज्ञानेन संयुतः ज्ञानी गोकर्णो जनकं पितरं बोधयामास ज्ञापयांचक्रे 'पिता पुत्रेण संबोध्यो न पाठ्य इति संमतेः' । गोप्रजातस्य तस्य कथं पितृत्वमस्येति न भ्रमितव्यम् , "अन्नदाता भयत्राता यश्च कन्यां प्रयच्छति । विद्याप्रदो मंत्रदश्च पञ्चैते पितरः स्मृताः ॥" इति नीत्युक्तेः, "तावेव पितरौ तस्य यौ पुष्णीतः स्वपुत्रवत्" इति व्यासवचनाच्च तथा व्यवहारात् । वैराग्यं परिदर्शयन् । तथाहि—"यः पूर्वमपिबत्स्तन्यं निष्पीड्य च पयोधरान् । यस्मिञ्जातो भगे पूर्वं तस्मिन्नेव भगे रमेत् ॥ या माता सा पुनर्भार्या या भार्या जननी हि सा । यः पिता स पुनः पुत्रो यः पुत्रः स पुनः पिता ॥ एवं संसारचक्रेण कूपचक्रघटा इव" इत्यादि ॥ ७३ ॥ तत्प्रकारमाह—असार इति । संसारो मोहतः संसृतिरूपो विचारतो असारः । खलु निश्चये । दुःखरूपी दुःखाकारत्वात् । विमोहकः विशेषेण मोहकर्ता । कस्य सुतः पुत्रः, धनं, न कस्यापीत्यर्थः । स्नेहवान् अनुरक्तः अनिशमहोरात्रं ज्वलते परितपति ॥ ७४ ॥ वस्तुतस्तु न कोपि सुखीत्याह—न चेति । इंद्रस्य स्वर्गपतेः किंचित् अल्पमपि सुखं न च नास्ति । चक्रवर्त्तिनः सार्वभौमस्य नृपस्य न सुखम् । ननु 'सुखं दुःखं भवोऽभावः' इत्यादौ किमिति सुखनिरूपणं, तत्राह—सुखमिति । विरक्तस्य विरागिणो मुनेर्मननशीलस्य एकांतजीविनः एकांते निर्जनस्थाने कंदमूलफलैर्जीवितुं शीलं यस्य तस्य सुखमस्ति ॥ ७५ ॥ अथ कर्त्तव्यमाह—मुंचेति । प्रजारूपं पुत्ररूपमज्ञानं त्वं मुंच त्यज । तत्र हेतुः—मोहतो नरके गतिः गमनम् । अयं देहः पांचभौतिकः निपतिष्यति । अतः सर्वं गृहपुत्रधनादिकं त्यक्त्वा वनं व्रज गच्छ ॥ ७६ ॥ सुतोक्तं हितं मन्वानः पिताह—तद्वाक्यमिति । तस्य पुत्रस्य वाक्यं वचनं समाकर्ण्य संश्रुत्य वने गंतुकामो यातुकामः पिताऽऽत्मदेवोऽब्रवीत्—हे तात पुत्र मया किं कर्त्तव्यं, तत्तत्कार्यं सविस्तरं यथा स्यात्तथा त्वं वद ब्रूहि ॥ ७७ ॥ स्वयं विचार्य कुरुतां किं मत्कथनेनेत्यत आह—अंधकूपे कर्मणा पतितः स्नेहपाशैर्मोहरज्जुभिर्बद्धो यंत्रितः पंगुः पादहीनः शठो मूर्खोऽहमस्मि । नूनं निश्चयेन । हे दयानिधे कृपासागर मामुद्धर बहिर्निःसारय ॥ ७८ ॥ गोकर्णः पितरं संसारादुद्दिधीर्षुस्तत्प्रकारमाह—देह इति द्वाभ्याम् । अस्थिमांसरुधिरे अस्थ्ना सह मांसरुधिरे यस्मिन्स तथेति केचित् , अस्थिमांसाभ्यां सह रुधिरं यस्मिन्नित्यपरे तन्मंदम् , अस्थि च मांसं च रुधिरं चेत्यस्थिमांसरुधिराणि तानि विद्यंते यस्मिन्नित्यस्थिमांसरुधिरः । अर्शआद्यच् । तस्मिन्निति सुगमोपायसत्त्वे क्लिष्टाऽप्रशस्तकल्पनाया अन्याय्यत्वात् । एतेन अस्थिमांसरुधिरात्मके इत्यर्थो लभ्यते । ईदृशे देहे शरीरे अभिमतिं ममायमात्मेत्यभिमानं त्वं त्यज परिहर । जायासुतादिषु स्त्रीपुत्रादिषु । आदिना धनगृहादिसंग्रहः । ममतां ममेयं स्त्री ममायं सुतो ममेदं गृहमित्यादिरूपं ममत्वं सदा सर्वस्मिन् काले विमुंच त्वं त्यज, तत्र ममेत्याग्रहं मा कुर्विति भावार्थः । इदं जगत् क्षणभंगनिष्ठं क्षणेन भङ्गे नाशे निष्ठा स्थितिर्यस्य तत् । 'क्षणभङ्गुरत्वम्' इति पाठेऽपि नार्थे विशेषः । अनिशम् अहोरात्रं पश्य त्वमवलोकय । वैराग्यभावरसिकः वैराग्ये भावो भक्तिः तस्य रसिकः, वैराग्यप्रिय इत्यर्थः । भक्तिनिष्ठः भक्तौ निष्ठा स्थितिर्यस्य स तथा । 'योगनिष्ठः' इति पाठांतरम् ॥ ७९ ॥ धर्मं स्वधर्मं सततं निरंतरं भजस्व सेवस्व । लोकधर्मान् काम्यधर्मान् त्वं त्यज । 'भूतहिंसाम्' इति पाठांतरं रम्यमिति गुरवः । साधुपुरुषान् त्वं सेवस्व भजस्व ।

१. 'रागरसिकः' इति पाठान्तरम् । २. अत्र 'विष्णोः कथारसम्' इति पाठान्तरं शोभनम् । केचित् 'शैवीकथारसम्' इति पठित्वा हरिहरयोरभेदान्वयेन पूर्वापरविरोधं समादधुः, तच्च न रम्यं, 'प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरम्' इति न्यायात् ।

एवं सुतोक्तिवशतोऽपि गृहं विहाय यातो वनं स्थिरमतिर्गतषष्टिवर्षः ।
युक्तो हरेरनुदिनं परिचर्ययाऽसौ श्रीकृष्णमाप नियतं दशमस्य पाठात् ॥ ८१ ॥

इति श्रीपद्मपुराण उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये विप्रमोक्षो नाम चतुर्थोऽध्यायः ॥ ४ ॥

## अथ पञ्चमोऽध्यायः

सूत उवाच—पितर्युपरते तेन जननी ताडिता भृशम् । क्व वित्तं तिष्ठते ब्रूहि हनिष्ये लत्तया न चेत् ॥ १ ॥
इति तद्वाक्यसंत्रासाज्जनन्या पुत्रदुःखतः । कूपे पातः कृतो रात्रौ तेन सा निधनं गता ॥ २ ॥
गोकर्णस्तीर्थयात्रार्थं निर्गतो योगसंस्थितः । न दुःखं न सुखं तस्य न वैरी नापि बान्धवः ॥ ३ ॥
धुन्धुकारी गृहेऽतिष्ठत्पञ्चपण्यवधूवृतः । अत्युग्रकर्मकर्ता च तत्पोषणविमूढधीः ॥ ४ ॥
एकदा कुलटास्तास्तु भूषणान्यभिलिप्सवः । तदर्थं निर्गतो गेहात्कामान्धो मृत्युमस्मरन् ॥ ५ ॥

'कामतृष्णाम्' इत्यपपाठः, 'कामोऽभिलाषस्तर्षश्च' इत्यमरोक्तेः कामतृष्णयोरेकार्थत्वात् । वस्तुतस्तु—'कामशत्रुम्' इति पाठो रम्यः, संप्रदायानुरोधात् । कामशत्रुं कामरूपं शत्रुं त्वं जहि । "जहि शत्रुं महाबाहो कामरूपं दुरासदम्" इति गीतायां श्रीकृष्णोक्तौ कामस्य महाशत्रुत्वप्रसिद्धेः । अन्यस्य परस्य दोषगुणचिंतनं दोषाश्च गुणाश्च दोषगुणास्तेषां चिंतनमाशु शीघ्रं मुक्त्वा त्यक्त्वा भगवत्सेवाकथयोः रसं त्वं नितरामतिशयेन पिब । अहो इत्यलभ्यलाभोक्तिस्तव महाभाग्यत्वसूचनार्था ॥ ८० ॥ स चोमिति प्रतिश्रुत्य तथाऽचरणान्मुक्तिमापेत्याह—एवं सुतोक्तिवशतः—उक्तविधा या पुत्रस्योक्तिः कथनं तस्या वशतः अपि एव गृहं विहाय त्यक्त्वा स्थिरमतिः स्थिरा निश्चला मतिर्बुद्धिर्यस्य स तथा । गतषष्टिवर्षः गतानि षष्टिर्वर्षाणि यस्य स तथा वनं यातः प्राप्तः । असावात्मदेवः हरेः पापहंतुर्भगवतः परिचर्यया सेवया युक्तः सम्पन्नोऽनुदिनं प्रतिदिनं दशमस्य स्कंधस्य पाठात् श्रीकृष्णमाप प्राप । नियतमिति निश्चितम् , क्रियाविशेषणमित्येके ॥ ८१ ॥

इति श्रीशेखावाटयंतर्गतविजयपुरनिवासियाजलालिपंडितरामप्रतापविरचितायां श्रीमद्भागवतमाहात्म्यटीकायामृजुनाम्न्यां चतुर्थोऽध्यायः ॥ ४ ॥

तातस्य तातवाक्येन गतिमुक्त्वात्मघाततः । मातुर्मृतिः कुसंगेन प्रेतभावो निरूप्यते ॥
धुंधुकारिण आहोस्विद्गोकर्णाद्गतिरुच्यते । श्रीमद्भागवतस्यात्र सप्ताहश्रवणे विधिः ॥

पूर्वाध्याये "एकदा पितरौ ताड्य पात्राणि स्वयमाहरत् ( ७० )" इत्यत्रोभयोस्ताडनमुक्त्वा धननाशाद्रुदतः पितुर्गोकर्णोपदेशेन गतिरुक्ता । अत्र तु तत्संगतिनिरूपणाय तन्मातृवृत्तं निरूपयति सूतः—पितरीति द्वाभ्याम् । पितरि उपरामं गते सति तेन धुंधुकारिणा जननी धुंधुली भृशमत्यर्थं ताडिता पीडिता । वित्तं धनं क्व तिष्ठते कुत्र स्थापितमस्ति निधिरूपेण इति ब्रूहि वद, चेद्यदि नो वदसि तदा लत्तया हनिष्ये त्वां हनिष्यामि ॥ १ ॥ इत्येवं तद्वाक्यसंत्रासात् तस्य धुंधुकारिणो वाक्यं तद्वाक्यं तस्मात्संत्रास उद्वेगस्तस्मात् पुत्रदुःखतः पुत्राद् दुःखं ताडनादिकं तस्मात् जनन्या मात्रा रात्रौ निशि कूपे पातः कृतः । तेन पातेन हेतुना सा माता निधनं गता मृतिं प्राप्ता । "आत्मघातकरा ये च ते वै निरयगामिनः" इति स्मृतेर्धुंधुल्या नरकप्राप्तिर्जातेति ध्वनितम् ॥ २ ॥ "खलेन सह संवासः साधोः शांताय नेष्यते" इति वचसा गोकर्णनिर्गममाह–गोकर्ण इति । "योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय । सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥" इति गीतायां श्रीकृष्णोक्तेः योगे संस्थितो वर्त्तमानो युक्तो वा गोकर्णस्तीर्थयात्रार्थं निर्गतः निःसृतः 'तीर्थानामटनं पुण्यम्' इत्युक्तेः । तस्य गोकर्णस्य दुःखं नास्ति, सुखं नास्ति, वैरी शत्रुर्नास्ति, बांधवो भ्राता नास्ति ॥ ३ ॥ पुनः सिंहावलोकनन्यायेन मंडूकप्लुत्या वा धुंधुकारिचेष्टितमाह—धुंधुकारीति । धुंधुकारी "परप्रियाधनं हर्तुं यतो धुंधु करोत्यसौ । धुंधुकारीति लोकेस्मिन्सर्वत्र ख्यातिमागतः ॥" इत्युक्ताभिधावान , पंचपण्यवधूवृतः पणितुम् आत्ममूल्येन पुंमात्रैः सह व्यवहर्त्तुं रंतुं वा योग्याः पण्याः, पण्याश्च ता वध्वश्च पण्यवध्वः, पंच च ताः पण्यवध्वश्चेति तथा ताभिर्वृतः संयुतः । गृहे पितृनिर्मिते । अवसत् अतिष्ठत् । कथंभूतः—अत्युग्राणि हिंसात्मकानि कर्माणि तेषां कर्त्ता । च पुनः तत्पोषणं तासां वेश्यानां पोषणं तेन विमूढा धीर्यस्य स तथा ॥ ४ ॥ "स्त्रीवशो जायते कामी न चोल्लंघति तद्वचः" इत्युक्तस्तस्य तद्धीनतां दर्शयति—एकदेति । एकदा एकस्मिन काले नर्मवल्लावसरे ताः कुलटा वेश्या भूषणानि चूडामणिकुंडलहारादीनि अभिलिप्सव

यतस्ततश्च संहृत्य वित्तं वेश्म पुनर्गतः । ताभ्योऽयच्छत्सुवस्त्राणि भूषणानि कियन्ति च ॥ ६ ॥
बहुवित्तचयं दृष्ट्वा रात्रौ नार्यो व्यचारयन् । चौर्यं करोत्यसौ नित्यमतो राजा ग्रहीष्यति ॥ ७ ॥
वित्तं हृत्वा पुनश्चैनं मारयिष्यति निश्चितम् । अतोऽर्थगुप्तये गूढमस्माभिः किं न हन्यते ॥ ८ ॥
निहत्यैनं गृहीत्वार्थं यास्यामो यत्र कुत्रचित् । इति ता निश्चयं कृत्वा सुप्तं संबध्य रश्मिभिः ॥ ९ ॥
पाशं कण्ठे निधायास्य तन्मृत्युमुपचक्रमुः । त्वरितं न ममारासौ चिन्तायुक्तास्तदाऽभवन् ॥ १० ॥
तप्तांगारसमूहांश्च तन्मुखे हि विचिक्षिपुः । अग्निज्वालातिदुःखेन व्याकुलो निधनं गतः ॥ ११ ॥
तं देहं मुमुचुर्गर्ते प्रायः[1] साहसिकाः स्त्रियः । न ज्ञातं तद्रहस्यं तु केनापीदं तथैव च ॥ १२ ॥
लोकैः पृष्टा वदन्ति स्म दूरं यातः प्रियो हि नः । आगमिष्यति वर्षेऽस्मिन्वित्तलोभविकर्षितः ॥ १३ ॥
स्त्रीणां नैव तु विश्वासं मृतानां कारयेद्बुधः । विश्वासे यः स्थितो मूढः स दुःखैः परिभूयते ॥ १४ ॥
सुधामयं वचो यासां कामिनां रसवर्धनम् । हृदयं क्षुरधाराभं प्रियः को नाम योषिताम् ॥ १५ ॥
संहृत्य वित्तं ता याताः कुलटा बहुभर्तृकाः । धुन्धुकारी बभूवाऽथ महान्प्रेतः कुकर्मतः ॥ १६ ॥

अभिलब्धुं प्राप्तुमिच्छंतीति तथाभूतास्ता अभवन् । तदर्थं तन्निमित्तं गेहात् निर्गतः निरगात् । तं विशिनष्टि—कामांधः कामेन पिहितनेत्रः मृत्युम् अस्मरन्नविचारयन्सन् । तदुक्तम्—'कामातुराणां न भयं न लज्जा' इति ॥ ५ ॥ "अहमाभिर्गृहस्थोऽस्मि ह्यकार्यैकरणोद्यतः । अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत् ॥" इत्युक्तेराह—यत इति । यतस्ततः यस्मात्तस्मात्स्थानात् वित्तं धनं संहृत्य आहृत्य पुनर्भूयो वेश्म स्वगृहं गत आयातः ताभ्यः पंचभ्यो वेश्याभ्यः कियंति सुवस्त्राणि पट्टांबराणि भूषणानि पूर्वोक्तानि चाऽयच्छत् अददात् ॥ ६ ॥ "धूर्तेन धनमानीतं चौर्येणात्र न संशयः । शतं चौरस्य समया एक एव हि स्वामिनः ॥" इति नीत्या तासां वितर्कोऽभूदित्याह—बह्वितिसार्द्धद्वाभ्याम् । बहुं वित्तचयं धनसंचयं दृष्ट्वा रात्रौ नार्यो वेश्या व्यचारयन् । विचारं दर्शयति—असौ धुंधुकारी नित्यं प्रतिदिनं चौर्यं करोति, अतश्चौर्यकरणाद्धेतोः राजा ग्रहीष्यति, धनमिति शेषः ॥ ७ ॥ वित्तं चौर्यार्जितं धनं हृत्वाऽऽकृष्य पुनर्भूयः एनं चौर्यकर्त्तारं निश्चितं ध्रुवं मारयिष्यति । अतो हेतोर्गूढमप्रकाशं यथा स्यात्तथाऽर्थगुप्तये धनरक्षणार्थम् अस्माभिः किं न हन्यते, किमिति न वध्यते ॥ ८ ॥ एनं धुंधुकारिणं निहत्य निश्चयेन हत्वाऽर्थं धनं गृहीत्वाऽऽदाय यत्र कुत्रचित् अलक्षिते देशे यास्यामो वयं गमिष्याम इत्येवं निश्चयं कृत्वा ता वेश्याः सुप्तं धुंधुकारिणं रश्मिभिः रज्जुभिः संबध्य बंधयित्वा ॥ ९ ॥ अस्य धुंधुकारिणः कंठे गले पाशं निधाय कृत्वा तन्मृत्युं तस्य मृत्युम् उपचक्रमुः कर्तुमुद्यता बभूवुः । असौ धुंधुकारी महापापित्वात् त्वरितं शीघ्रं न ममार । यदा न ममार तदा ताश्चिन्तायुक्ता अभवन् ॥ १० ॥ तन्मुखे तस्यास्ये तप्तांगारसमूहान् तप्तानामंगाराणां संघान् विचिक्षिपुः निक्षिप्तवत्यः । हि युक्तम् । सोऽपि अग्नेर्ज्वाला तया अतिदुःखं महाकष्टं तेन व्याकुलो व्यग्रचित्तो निधनं मृत्युं गतः प्राप्तः ॥ ११ ॥ तं देहं मृतशरीरं गर्ते भूविवरे मुमुचुः निचिक्षिपुः । प्रायो बाहुल्येन स्त्रियः साहसिकाः 'साहसो हठः' इति चरके, तेन प्रवर्तन्त इति । "ओजस्सहोऽम्भसा वर्त्तते" इति ठकि ङीबभाव आर्षः । तदुक्तं गुणसंग्रहे—"कुर्वंति सहसा कार्यं निर्विचारं प्रकुर्वते । अतः साहसिका लोके नार्यः प्रख्यातिमागताः ॥" इति । तद्रहस्यं तस्य निदानं केनापि न ज्ञातं न बुद्धम् । इदं स्त्रीचरितं तथैवाऽलक्षितमेव । च पादपूर्त्तौ ॥ १२ ॥ "पप्रच्छुर्हि हनूः[2] पौरा अपश्यंतोऽनुरागिणम् । संसर्गी भवतीनां किं धुंधुकारी न दृश्यते" इत्यादिवचनाल्लोकैर्जनैर्धुंधुकारी क्व गत इति पृष्टास्ता वदन्ति स्म प्रोचुः । किं प्रोचुरित्याह—दूरमिति । नोऽस्माकं प्रियो वल्लभो वित्तलोभविकर्षितः वित्तस्य लोभो बहुवृद्धिरूपः तेन विकर्षित आकृष्टः दूरं देशांतरं यातो गतः । कदाऽऽगमिष्यति इत्यत आह—अस्मिन् वर्षे आगमिष्यति । एतेन मासनिर्णयोऽपाकृतः ॥ १३ ॥ स्त्रीमात्रमविश्वसनीयमित्याह सूतः—स्त्रीणामिति । तु अप्यर्थे । मृतानामपि प्राणरहितानामपि स्त्रीणां युवतीनां विश्वासं बुधो विवेकी न कारयेन्न कुर्यात् । तदुक्तं कृष्णखंडे—"न विश्वासो हि नारीषु सततं कुलटासु च । मोक्षमार्गोऽर्गलास्त्वेव श्रममायासु भूमिषु ॥" इति । "अश्वच्छाया तृणस्याग्निर्नीचसेवा स्थले जलम् । वेश्यासंगः कुमित्रं च षडेते बुद्बुदोपमाः ॥" इत्युक्तेः । "कृते तु महती हानिः स्वयं वापि विनश्यति" इत्याह—यो मूढोऽविवेकी विश्वासे स्थितः स दुःखैः परिभूयते तिरस्क्रियते ॥ १४ ॥ तदेव विशदयति—सुधेति । यासां वचो वचनं सुधामयममृतरूपम् । रूपार्थे मयडत्र । तत्र हेतुः—कामिनां रसवर्द्धनं रसवृद्धिकरम् । हृदयमंतःकरणं क्षुरधाराभं क्षुरो नापितशस्त्रं तस्य धाराया आभेव आभा यस्येति तथा तत् । योषितां को नाम प्रियः न कोपि । नामेति पादपूर्त्तावव्ययं प्रसिद्धार्थे वा ॥ १५ ॥ प्रकृतमनुसृत्य वदति—संहृत्येति । ताः कुलटा बहुभर्तृकाः बहवो भर्त्तारो यासां ता वेश्या वित्तं धनं संहृत्य याताः देशांतरं गताः । "स्वर्गः सुकृतिनां स्थानं पापिनां दुर्गतिर्भवेत्" इत्याह—धुंधुकारीति द्वाभ्याम् । धुंधुकारी

१. प्रायोग्रहणात्कुलस्त्रियो नैतादृश्यो भवन्तीति सूचितम् । २. 'हनुर्हट्टविलासिन्याम्' इति मेदिनी ।

वात्यारूपधरो नित्यं धावन्दशदिशोऽन्तरम् । शीतातपपरिक्लिष्टो निराहारः पिपासितः ॥ १७ ॥
न लेभे शरणं क्वापि हा दैवेति मुहुर्वदन् । कियत्कालेन गोकर्णो मृतं लोकादबुध्यत ॥ १८ ॥
अनाथं तं विदित्वैव गयाश्राद्धमचीकरत् । यस्मिंस्तीर्थे तु संयाति तत्र श्राद्धमवर्तयत् ॥ १९ ॥
एवं भ्रमन्स गोकर्णः स्वपुरं समुपेयिवान् । रात्रौ गृहाङ्गणे स्वप्तुमागतोऽलक्षितः परैः ॥ २० ॥
तत्र सुप्तं स विज्ञाय धुन्धुकारी स्वबान्धवम् । निशीथे दर्शयामास महारौद्रतरं वपुः ॥ २१ ॥
सकृन्मेषः सकृद्धस्ती सकृच्च महिषोऽभवत् । सकृदिन्द्रः सकृच्चाग्निः पुनश्च पुरुषोऽभवत् ॥ २२ ॥
वैपरीत्यमिदं दृष्ट्वा गोकर्णो धर्मसंयुतः । अयं दुर्गतिकः कोऽपि निश्चित्याथ तमब्रवीत् ॥ २३ ॥
गोकर्ण उवाच—कस्त्वमुग्रतरो रात्रौ कुतो यातो दशामिमाम् । किं वा प्रेतः पिशाचो वा राक्षसोऽसीति शंस नः ॥ २४ ॥
सूत उवाच—एवं पृष्टस्तदा तेन रुरोदोच्चैः पुनः पुनः । अशक्तो वचनोच्चारे संज्ञामात्रं चकार ह ॥ २५ ॥
ततोऽञ्जलौ जलं कृत्वा गोकर्णस्तमुदैरयत् । तत्सेकाद्धतपापोऽसौ प्रवक्तुमुपचक्रमे ॥ २६ ॥

कुकर्मतः निंदितेन कर्मणा महान् प्रेतो बभूव । तदुक्तं गारुडे—"पांथानामागमं दृष्ट्वा भवेद्रौद्रवपुर्धरः । अस्फुटार्थां वदन् वाचं महाप्रेतः स उच्यते ॥" इति । यद्वा—महान् पूज्य उत्कृष्टो वा ब्राह्मणत्वात् । अथेति प्रकरणांतरसूचनार्थः ॥ १६ ॥ कीदृशः—वात्यारूपधरः वातानां समूहो वात्या[1] तद्रूपधारी नित्यं प्रतिदिनं दशदिशः दश च ता दिशश्चेति तथा ताः । अंतरं मध्यम्, उपस्थितत्वाद्दिशामिति लभ्यते । धावन् भ्राम्यन् 'दशदिशो भृशम्' इति पाठः साधुः । तत्र दशदिशो भृशमत्यर्थं धावन्नित्यर्थः । शीतातपपरिक्लिष्टः शीतं हिममातपो धर्मः ताभ्यां परिक्लिष्टोऽतिदुःखितः, निराहारः निर्गत आहारो भोजनं यस्य सः । तथा पिपासितः पातुमिच्छा पिपासा सा संजातास्येति तथा, तृषित इत्यर्थः ॥ १७ ॥ हे दैव हा कष्टमिति मुहुर्वारं वारं वदन् जल्पन्सन् कुत्र कस्मिन्नपि स्थाने शरणमाश्रयं न लेभे न प्राप । तीर्थयात्रायां तन्मरणं गोकर्णः श्रुतवानित्याह—कियदिति । गोकर्णः कियत्कालेन अनिर्धारिताहर्गणेन मृतं धुंधुकारिणं लोकात्स्वपुरवासिजनात् अबुध्यत ज्ञातवान् ॥ १८ ॥ "अनाथप्रेतसंस्कारे कोटियज्ञफलं विदुः" इति स्मृतेर्बलात् तच्छ्राद्धमकरोदित्याह—अनाथमिति । अनाथं नास्ति नाथः स्वामी यस्य स तथा तं धुंधुकारिणं विदित्वा ज्ञात्वा एव निश्चयेन गयाश्राद्धं तस्य अचीकरत्, अकार्षीदित्यर्थः, स्वार्थे णिच् । अन्यतीर्थेष्वपि तच्छ्राद्धं कृतवानित्याह—यस्मिंस्तीर्थे गोकर्णः संयाति गतवान् । भूते लट् । तुशब्दो विधेः संततानुवृद्ध्यर्थः । तत्र श्राद्धमवर्त्तयत् अकरोत् । एतेन "गयाश्राद्धोत्तरं श्राद्धं न कर्त्तव्यं पुनः पुनः" इति वदंतः परास्ताः ॥ १९ ॥ "जन्मभूमिः परं तीर्थमित्यायांति हि साधवः" इति नीत्या स्वपुरागमनं तेन कृतमित्याह सूतः—एवमिति । एवमनेन प्रकारेण स गोकर्णः भ्रमन् भूमंडलमटन्सन् स्वपुरं स्वनगरं समुपेयिवान् समागतः । एतेन जन्मभूमेर्माहात्म्यं सूचितं भवति । तदुक्तं चाणक्ये—"जननी जन्मभूमिश्च जाह्नवी च जनार्दनः । जनकः पंचमश्चैव जकाराः पंच दुर्लभाः ॥" इति रात्रौ गृहांगणे स्वप्तुं दिवापरिश्रमापनोदार्थं परैरन्यैर्जनैरलक्षितोऽज्ञातः सन्नागतः आयातोऽभूत् ॥ २० ॥ "भूतप्रेतपिशाचाद्या रात्रौ क्रीडंति नित्यशः" इति वचनात्प्रेताविर्भावो जात इत्याह—तत्रेति । तत्र गृहांगणे सुप्तं स्वबांधवं गोकर्णं स धुंधुकारी विज्ञाय ज्ञात्वा निशीथेऽर्द्धरात्रे महारौद्रतरं महाभयंकरं वपुः शरीरं दर्शयामास ॥ २१ ॥ ततो नानाविधं प्रेतकौतुकं कृतवानित्याह—सकृदिति । सकृत् एकवारं मेषोऽभवत् । एवं सर्वत्र योज्यम् । हस्ती गजः । महिषः सैरिभः "लुलायो महिषो वाहद्विषत्कासरसैरिभाः" इत्यमरोक्तेः, इंद्रः स्वर्पतिः । अग्निः अंगाररूपः । पुनः पुरुषः नराकृतिरभूत् ॥ २२ ॥ तद् दृष्ट्वा दुर्गतिकोयमिति निश्चित्याह—वैपरीत्यमिति । इदं वैपरीत्यं विपरीतभावं दृष्ट्वाऽवलोक्य धैर्यसंयुतः स्थिरचित्तो गोकर्णः कोप्ययं दुर्गतिकः दुर्दुष्टा गतिर्यस्य स तथेति निश्चित्याथानंतरं तमब्रवीत् ॥ २३ ॥ 'कस्त्वं पापेन केनेमां दशां प्राप्तो वदेति भोः' इति पृच्छति—कस्त्वमिति । रात्रौ निशि उग्रतरः अतिशयेन उग्र इति तथा क्रूरतरस्त्वं कः कोसि । इमां वैपरीत्यरूपां दशामवस्थां कुतः कस्मात्पापकर्मणो यातः प्राप्तः । मूकीभूतं प्रत्याह—किं वा प्रेतः, किं वा पिशाचः, किं वा राक्षसोऽसीति त्वं नोऽस्मान् शंस कथय । "भूतः क्रियाविहीनः स्यात्प्रेतस्तु महतो वधात् । पिशाचः सूतिकास्पर्शी राक्षसो जीव[2]हिंसकः ॥" इति कर्मविपाकोक्तेः ॥ २४ ॥ ततः परं किमभूदित्याह—एवमिति द्वाभ्याम् । यदा यस्मिन्काले तेन गोकर्णेन एवमनेन प्रकारेण पृष्टस्तदा उच्चैरुदात्तस्वरेण पुनः पुनः मुहुर्मुहुः रुरोद रोदनं चकार । प्रेत इति कर्तृपदम् । कीदृशः—वचनोच्चारे भाषणे अशक्तः असमर्थः । तदा संज्ञामात्रं ध्वनिं चकार । "अज्ञानार्था तु या वाणी संज्ञामात्रं तदुच्यते" इति । हेति स्फुटम् ॥ २५ ॥ ततस्तदनंतरमंजलौ जलं कृत्वा तं प्रेतं गोकर्णः उदैरयत्

१. 'पाशादिभ्यो यः' इति यप्रत्ययः । २. 'बहुहिंसकः' इति पाठान्तरम् ।

प्रेत उवाच—अहं भ्राता त्वदीयोऽस्मि धुन्धुकारीति नामतः । स्वकीयेनैव दोषेण ब्रह्मत्वं नाशितं मया ॥ २७ ॥
कर्मणो नास्ति संख्या मे महाऽज्ञाने विवर्तिनः । लोकानां हिंसकः सोऽहं स्त्रीभिर्दुःखेन मारितः ॥ २८ ॥
अतः प्रेतत्वमापन्नो दुर्दशां च वहाम्यहम् । वाताऽऽहारेण जीवामि दैवाधीनफलोदयात् ॥ २९ ॥
अहो बन्धो कृपासिंधो भ्रातर्मामाशु मोचय । गोकर्णो वचनं श्रुत्वा तस्मै वाक्यमथाऽब्रवीत् ॥ ३० ॥
गोकर्ण उवाच—त्वदर्थं तु गयापिण्डो मया दत्तो विधानतः । तत्कथं नैव मुक्तोऽसि ममाश्चर्यमिदं महत् ॥ ३१ ॥
गयाश्राद्धान्न मुक्तिश्चेदुपायो नापरस्त्विह । किं विधेयं मया प्रेत तत्त्वं वद सविस्तरम् ॥ ३२ ॥
प्रेत उवाच—गयाश्राद्धशतेनापि मुक्तिर्मे न भविष्यति । उपायमपरं किंचित्त्वद्विचारय सांप्रतम् ॥ ३३ ॥
इति तद्वाक्यमाकर्ण्य गोकर्णो विस्मयं गतः । शतश्राद्धैर्न मुक्तिश्चेदसाध्यं मोचनं तव ॥ ३४ ॥
इदानीं तु निजस्थानमातिष्ठ प्रेत निर्भयः । त्वन्मुक्तिसाधकं किञ्चिदाचरिष्ये विचार्य च ॥ ३५ ॥
धुंधुकारी निजस्थानं तेनादिष्टस्ततो गतः । गोकर्णश्चिंतयामास तां रात्रिं न तदध्यगात् ॥ ३६ ॥

प्रोक्षीत् । तत्सेकात् तस्य जलस्य सेकात् बिंदुस्पर्शाद्गतपापः गतं पापं यस्य स तथाऽसौ प्रवक्तुं प्रभाषितुम् उपचक्रमे प्रारंभं कृतवान् ॥ २६ ॥ बंधुभावनया सहेतुकं स्वात्मवृत्तं प्रणिगदति—अहमिति चतुर्भिः । अहं त्वदीयस्तव भ्राता बंधुरस्मि । न च स्त्रीजातस्य तस्य गवोद्भवेन तेन सह कथं भ्रातृत्वव्यवहार इति शंक्यम्, भविष्यदुपकारेण तद्व्यवहारोपपत्तेः । तदुक्तं नीत्याम्—"स बंधुर्यो हिते युक्तः स पिता यश्च पोषकः । तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते ॥" इति किंनामासीत्यत आह—नामतः धुंधुकार्यहमिति । एतेन 'कस्त्वमुग्रतरो रात्रौ' (२४)इत्युत्तरितम् । कथमीदृशी व्यवस्था तव संजातेत्यत्राह—स्वकीयेनैव दोषेण स्वेनैव पाप्मना ब्रह्मत्वं ब्राह्मणत्वं मया नाशितम् ॥ २७ ॥ महाज्ञाने महच्च तदज्ञानं चेति तथा तस्मिन् निबिडतमोरूपायामविद्यायां विवर्तिनः विवर्तितुं शीलमस्येति तथा तस्य मम कर्मणो संख्या नास्ति । जात्यभिप्रायेणैकवचनम्, तेन कर्मणामित्यर्थः । यो लोकानां जनानां हिंसको घातकः सोहं स्त्रीभिर्वेश्याभिर्दुःखेन ज्वलदंगाराणां मुखे प्रक्षेपणरूपकष्टेन मारितः ॥ २८ ॥ अतोऽस्माद्धेतोः प्रेतत्वं प्रेतभावमापन्नः प्राप्तो दुर्दशां दुःखरूपिणीं दशां वहामि प्राप्नोमि । च एवार्थे । दैवाधीनफलोदयात् दैवस्य भाग्यस्य अधीनं यत्फलं तस्य उदयात् अहं वाताहारेण वायुभक्षेण जीवामि प्राणान् धारयामि । एतेन 'कुतो यातो दशामिमाम्' इत्युत्तरितम् ॥ २९ ॥ अहो इति संबोधनम् । हे बंधो हे कृपासिंधो हे भ्रातः आशु शीघ्रं मां त्वं मोचय प्रेतभावात् मुक्तं कुरु । एतेन प्रेतयोनौ दुःखस्यासह्यतोक्ता । प्रेतोक्तं वचनं श्रुत्वा गोकर्णः तस्मै प्रेताय वाक्यं वचनमब्रवीत् ॥ ३० ॥ "मृतानां मुक्तिदाने तु गयाश्राद्धं प्रगर्जति" इत्युक्त्या "यन्नाम्ना दीयते पिंडः स वै मुक्तिमवाप्नुयात्" इति गयामाहात्म्यवचनाच्च कथमेतस्य मुक्तिर्न जातेत्याश्चर्यं मन्वानः पृच्छति—त्वदर्थं त्वन्निमित्तं गयापिंडो गयायां पिंडो विधानतः शास्त्रोक्तविधितो मया दत्तः । तत्तस्मात्पिंडदानात् कथं त्वं न मुक्तोऽसि केन प्रकारेण मुक्तिं न प्राप्तोऽसि । एवेति निश्चये । इदं मम महदाश्चर्यम् । तुशब्दो दुर्गतिनिवारणार्थः ॥ ३१ ॥ तस्य वैफल्ये उपायांतरं नास्तीत्याह—गयाश्राद्धादिति । चेद्यदि गयाश्राद्धात् मुक्तिर्न मोक्षो न जातस्तर्हि अपरोऽन्य उपाय इह लोके न विद्यत इति । मया किं विधेयं किं करणीयं तत् हे प्रेत सविस्तरं यथा स्यात्तथा त्वं वद कथय ॥ ३२ ॥ उपायांतरेण मुक्तिर्भावनीयेत्याह—गयेति । त्वया तु सकृत् गयाश्राद्धं कृतं मे मम मुक्तिः गयाश्राद्धशतेनापि न भविष्यति । तत्तस्मात्कारणात् सांप्रतमधुना अपरं द्वितीयमुपायं किंचित् त्वं विचारय चिंतय ॥ ३३ ॥ असाध्यं मत्वेत्याह—इतीति । इत्येवं तद्वाक्यं तस्य प्रेतस्य वचनमाकर्ण्य श्रुत्वा गोकर्णो विस्मयम् "अन्यथोद्भूतमाश्चर्यं नृणां विस्मयकारणम् । अतर्क्यमपरे प्राहुर्दुर्विज्ञेयमथापरे ॥" इत्यादिरूपं गतः प्राप्तः । चेद्यदि शतश्राद्धैर्न मुक्तिस्तर्हि तव मोचनं मोक्षणं प्रेतयोनेरसाध्यं न पुरुषार्थक्षमम् ॥ ३४ ॥ प्रेतमाश्वासयन्नाह—इदानीमिति । हे प्रेत इदानीमधुना त्वं निर्भयो गतभयः निजस्थानं स्वनिवासं गच्छ याहि । त्वन्मुक्तिसाधकं तव मुक्त्युपायं किंचित् विचार्य अहमाचरिष्ये, विचारतः करिष्यामीति फलितोर्थः । धैर्येण स्थितोऽप्यहं बिभेमि अतस्त्वद्गमनान्निर्भयोऽहमाचरिष्य इति स्वस्य विशेषणं वा ॥ ३५ ॥ "तथेति गतवान्प्रेतो गोकर्णश्चिंतयान्वितः । न निद्रां लब्धवान्रात्रौ चिंतयन्स उपायकम्" इत्याह सूतः—धुंधुकारीति । तेन गोकर्णेनादिष्ट आज्ञप्तो धुंधुकारी निजं स्थानं संवासं गतः प्राप्तः ततस्तदनंतरं तां रात्रिं तद्रात्रा-

१. 'दैवाधीनफलोदयः' इति पाठान्तरम् । तत्र दैवाधीनः प्राक्तनकर्मानुसारी शुभाऽशुभफलोदयो यस्य स तथेत्यर्थः । २. "कालाध्वनो रत्यन्तसंयोगे" इति द्वितीयाविधानाच्चिन्तनेनैरन्तर्यं सूचितम् ।

प्रातस्तमागतं दृष्ट्वा लोकाः प्रीत्या समागताः । तत्सर्वं कथितं तेन यज्जातं च यथा निशि ॥ ३७ ॥
विद्वांसो योगनिष्ठाश्च ज्ञानिनो ब्रह्मवादिनः । तन्मुक्तिं नैव पश्यन्ति पश्यन्तः शास्त्रसंचयान् ॥ ३८ ॥
ततः सर्वैः सूर्यवाक्यं तन्मुक्तौ स्थापितं परम् । गोकर्णः स्तम्भनं चक्रे सूर्यवेगस्य वै तदा ॥ ३९ ॥
तुभ्यं नमो जगत्साक्षिन्ब्रूहि मे मुक्तिहेतुकम् । तच्छ्रुत्वा दूरतः सूर्यः स्फुटमित्यभ्यभाषत॥ ४० ॥
श्रीमद्भागवतान्मुक्तिः सप्ताहे वाचनं कुरु । इति सूर्यवचः सर्वैर्धर्मरूपं तु विश्रुतम् ॥ ४१ ॥
सर्वेऽब्रुवन्प्रयत्नेन कर्तव्यं सुकरं त्विदम् । गोकर्णो निश्चयं कृत्वा वाचनार्थं प्रवर्तितः ॥ ४२ ॥
तत्र संश्रवणार्थाय देशग्रामाज्जना ययुः । पंग्वन्धवृद्धमन्दाश्च तेऽपि पापक्षयाय वै ॥ ४३ ॥
समाजस्तु महाञ्जातो देवविस्मयकारकः । यदैवासनमास्थाय गोकर्णोऽकथयत्कथाम् ॥ ४४ ॥
स प्रेतोऽपि तदाऽऽयातः स्थानं पश्यन्नितस्ततः । सप्तग्रन्थियुतं तत्रापश्यत्कीचकमुच्छ्रितम् ॥ ४५ ॥
तन्मूलच्छिद्रमाविश्य श्रवणार्थं स्थितो ह्यसौ । वातरूपी स्थितिं कर्तुमशक्तो वंशमाविशत् ॥ ४६ ॥

त्वित्यर्थः । गोकर्णः कथमेतस्य मुक्तिः स्यादिति चिंतयामास दध्यौ । तन्मुक्तिहेतुकं नाध्यगान् न प्रापत् ॥ ३६ ॥ "पिहितं प्रतभयतो द्वारमुद्घाटितं कुतः । केनेदमिति चागत्य गोकर्णं ददृशुर्जनाः" इत्याह—प्रातरिति । तं गोकर्णमागतमायातं दृष्ट्वा लोका जनाः प्रातः प्रभाते समागता मेलितुमायाताः । निशि रात्रौ यथा येन प्रकारेण यद्धस्तिमेषादिदर्शनं जातं तत्सर्वं तेन गोकर्णेन कथितम् । तदग्र इति शेषः ॥ ३७ ॥ इदं कर्त्तव्यमिति केऽपि न विजज्ञिर इत्याह—विद्वांस इति । विद्वांसः सामान्यज्ञानिनः, योगनिष्ठाः योगिनः, ज्ञानिनो विशेषज्ञानवन्तोऽतिपंडिताः, ब्रह्मवादिनः वेदांतिनः शास्त्रसंचयान् शास्त्राणां समूहान् पश्यंतोऽवलोकयंतस्तन्मुक्तिं तस्य प्रेतस्य मोक्षं नैव पश्यंति न निरीक्षंते । "अपमृत्युहतानां वै कुर्यान्नारायणं बलिम्" इति वचनस्य प्रसिद्धत्वात् किमिति तैर्न ज्ञातमिति न शंकनीयम्, सामान्यवाक्यस्यैतस्य गयाश्राद्धविधिना विशेषतो बाधात् ॥ ३८ ॥ तेषामैकमत्यमाह तत इति । ततः तन्मुक्तिकारणाऽज्ञानानंतरं तन्मुक्तौ तस्य धुंधुकारिणः प्रेतस्य मोक्षे सूर्यवाक्यं सूर्यस्य वचनं परमुत्कृष्टं यदा सर्वैः स्थापितं स्वीकृतं तदा गोकर्णः तपःप्रभावात् योगबलतो वा सूर्यवेगस्य वै निश्चयेन स्तंभनं चक्रे । अन्यथाऽतिवेगशालिनो रवेः स्थित्यसंभवः ॥ ३९ ॥ स्वेप्सितं वरयन्नमस्करोति—तुभ्यमिति । हे जगत्साक्षिन् तुभ्यं नमः मे मह्यं मुक्तिहेतुकं मुक्तेः कारणं ब्रूहि कथय ॥ ४० ॥ सूर्यस्तत्कारणमुपादिशदित्याह—तदिति । तत्पूर्वोक्तं श्रुत्वा दूरतः दूरादेव सूर्यः स्फुटं स्पष्टम् इत्यभ्यभाषत । इति किं तदाह—श्रीमद्भागवतात् शास्त्रान्मुक्तिः स्यात् सप्ताहे सप्तदिनमध्ये वाचनं कुरु ॥ ४१ ॥ श्रुत्वेति सवितुर्वाक्यं तत्करणे संमतिं ददुरित्याह—इतीति । इत्येवं सूर्यवचः सूर्यस्य वचनं धर्मरूपं सर्वैर्विश्रुतं स्पष्टतया श्रुतम् । स्पष्टार्थे त्वव्ययम् । श्रुत्वैकमत्येनाहुः—सर्वेऽब्रुवन् सामान्यविशेषज्ञानवद्योगिवेदांतिनोऽवदन् प्रयत्नेन यत्नत इदं सूर्योक्तं सप्ताहे श्रीमद्भागवद्वाचनं सुकरं सुखेन करणीयं, संपाद्यमिति यावत् 'सुकरं सुंदरे सुखे' इति भट्टोक्तेः ॥ ४२ ॥ ओमित्युक्त्वा गोकर्णस्तथा कृतवानित्याह—गोकर्ण इति । [1]तेन प्रेतस्य मुक्तिर्भाव्येति निश्चयं कृत्वा गोकर्णो वचनार्थं श्रीमद्भागवतकथावाचनाय [2]प्रवर्त्तितः उद्यतोभूदिति सूतोक्तिः । तत्र स्थाने संश्रवणार्थाय सम्यक्श्रवणार्थं देशग्रामान् देशाद् ग्रामाच्च जनाः तत्तद्वासिनो नरा ययुराजग्मुः ॥ ४३ ॥ अन्येपि पापिनो जीवाः समागता इत्याह—पंग्वंधेति । पंगुश्चरणहीनः, अंधो नेत्ररहितः, वृद्धो जराग्रस्तः, मंदो मूर्खः, तेऽपि पापक्षयाय पापनाशार्थं समागता इति चस्यार्थः । वै निश्चये । समाजस्तु जनसमुदायस्तु देवविस्मयकारकः देवानां विस्मयं करोतीति तथा महान् अतिदीर्घः पूज्यो वा जातः ॥ ४४ ॥ किंच—यदेति । यदा यस्मिन्काले आसनं सर्वोत्कृष्टं व्यासपीठमास्थाय संस्थित्य गोकर्णः कथामकथयत्, तदा तस्मिन्नवसरे स प्रसिद्धो धुंधुकारी प्रेतोपि इतस्ततः यत्र तत्र स्थानम् आत्मनिवासार्थं स्थित्यर्हपदं पश्यन् निरीक्षमाण आयात आगतः ॥ ४५ ॥ 'किं स्थानं तेन संदृष्टं कुत्र वासमकल्पयत्' इत्याह सप्तेति । तत्र कथास्थाने सप्तग्रंथियुतं सप्तभिर्ग्रन्थिभिर्युक्तम् उच्छ्रितमत्युच्चं कीचकं वे[3]णुमपश्यत् ऐक्षत । एतेनारामे वाटिकायां वा नद्यास्तीरे वा कथारंभः कृत इति सूचितं भवति । तन्मूलच्छिद्रं तस्य कीचकस्य मूलच्छिद्रं मूलस्थविवरमाविश्य प्रविश्य श्रवणार्थं कथाश्रवणार्थमसौ प्रेतः स्थितः

१. तत्रत्यैः सर्वैः प्रवर्तितः २. अस्मिन्नर्थे त्विडापैः । निवृत्तप्रेषणत्वाण्णिजन्तादेव वा क्तो बोध्यः । ३. 'वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः' इति कोशाद्वायुपूर्णच्छिद्रशब्दायमानवेणुविशेषस्यात्र ग्रहणम् । अत एव सच्छिद्रत्वात्प्रवेशोऽपि घटते ।

वैष्णवं ब्राह्मणं मुख्यं श्रोतारं परिकल्प्य सः । प्रथमस्कन्धतः स्पष्टमाख्यानं धेनुजोऽकरोत् ॥ ४७ ॥
दिनान्ते रक्षिता गाथा तदा चित्रं बभूव ह । वंशैकग्रन्थिभेदोऽभूत्सशब्दं पश्यतां सताम् ॥ ४८ ॥
द्वितीयेऽह्नि तथा सायं द्वितीयग्रन्थिभेदनम् । तृतीयेऽह्नि तथा सायं तृतीयग्रन्थिभेदनम् ॥ ४९ ॥
एवं सप्तदिनैर्वंशसप्तग्रन्थिविभेदनम् । प्रेतोऽपि द्वादशस्कंधश्रवणात्प्रेततां जहौ ॥ ५० ॥
दिव्यरूपधरो जातस्तुलसीदाममण्डितः । पीतवासा घनश्यामो मुकुटी कुण्डलान्वितः ॥ ५१ ॥
ननाम भ्रातरं सद्यो गोकर्णमिति चाब्रवीत् । त्वयाहं मोचितो बन्धो कृपया प्रेतकश्मलात् ॥ ५२ ॥

हि निश्चये ॥ ४६ ॥ निश्चलासनं विना कथाश्रवणं न संभवत्यतो वंशप्रवेशः कृत इत्याह—वातरूपीति । वायुरूपः स्थितिं कर्तुम् अचलं निवासं संपादयितुमशक्तोऽसमर्थो वंशमाविशत् वेणुं प्रविष्टवान् । श्रोतारमंतरा कथावाचनं व्यर्थमतस्तत्पूर्वकं कथारंभमाह—वैष्णवमिति । वैष्णवं विष्णुभक्तं ब्राह्मणं जात्या विप्रं मुख्यं प्रधानं श्रोतारं श्रवणकारिणं परिकल्प्य संपाद्य ॥ ४७ ॥ प्रथमदिनकथावृत्तमाह—प्रथमेति । प्रथमस्कंधतः प्रथमस्कंधात् स्पष्टं सर्वज्ञानानुरूपम्, यद्वा—सर्वेषां बुद्ध्यारूढं यथा स्यात्तथा आख्यानं कथनं स प्रसिद्धो धेनुजो गोकर्णोऽकरोदित्यन्वयः । एतेन पाठस्तत्पूर्वकं कथारंभं प्रतिजानीते । "पूर्वं तु पठनं कार्यं व्याख्यानं तदनंतरम् । कथायाः परिपाटीति नियमः शिथिलीकृतः ॥" सप्ताह इति सूचितं भवति । तदुक्तं विधानमंजर्याम्—"पाठस्तु प्रथमं कार्यो व्याख्यानं तदनंतरम् । इति नियमस्तु सप्ताहे व्याख्याने विखण्डितः ॥" अन्यथा—"परीक्षिते कथां वक्तुं सभायां संस्थिते शुके" इत्यत्र "सभायां संस्थिते कीरे पाठं वक्तुं परीक्षिते ।" इति नोक्तम् । एवमग्रेऽपहरणीयम्, ।'सप्ताहे वाचनं कुरु' इत्यत्रापि 'सप्ताह पाठनं कुरु' इति । पुनः—'श्रावांते सर्वेषाम्' इत्यत्र च 'पाठांते सर्वेषाम्' इति । 'कथाभंगनिवृत्तये' इत्यत्र च 'पाठभंगनिवृत्तये' इति । सप्ताहश्रवणविधौ ब्राह्मणमित्युल्लेखात् ब्राह्मणं विना कथा न वाचनीया । श्रीमद्भागवतस्य सर्ववेदरूपस्य ब्राह्मणानुसरणेनैवान्येषां कथाश्रवणाधिकार इत्युक्तं भवति, "श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः" इति शिष्टोक्तेः । प्रत्यहं कथावसाने चित्रमभूदित्याह—दिनांत इति सार्द्धद्वाभ्याम् । दिनांते सायंकाले गाथा रक्षिता निवृत्तिं गता । तत्प्रमाणमुक्तं पाद्मे—"नारद उवाच । कत्यध्याया वाचनीयाः सप्ताहे प्रत्यहं पितः । नारदेनेति पृष्टोऽसौ तदा ब्रह्माऽब्रवीदिदम् ॥ ब्रह्मोवाच । प्रथमेऽह्नि वराहांतं द्वितीये भरतांतकम् । तृतीये श्रीनृसिंहांतं चतुर्थे वंशवर्णनम् ॥ पंचमे गुरुलीलांतं षष्ठे लीलासमापनम् । सप्तमे शुकपूजांतं सप्ताहक्रम ईरितः ॥" गुरुभिस्तु विशेष उक्तः । तथाहि—"द्वैपायनं नमस्कृत्य शुकदेवं च भक्तितः । हिरण्याक्षवधं यावत्प्रथमेऽह्नि प्रकीर्त्तयेत् ॥ १ ॥ चरितं भरतस्यापि द्वितीयेऽथ तृतीयके । समुद्रमथनं यावद्यत्र कूर्मः स्वयं हरिः ॥ चतुर्थे दिवसे चैव दशमे हरिजन्म च । पंचमेऽह्नि पठेद्विद्वान् रुक्मिण्या हरणावधि ॥ षष्ठे चोद्धवसंवादं सप्तमेऽह्नि समापयेत् ।" इति । तदा चित्रम् आश्चर्यं बभूव संजज्ञे । हेति स्फुटम् ॥ ४८ ॥ किं तदित्याह—सतां पश्यतां निरीक्षमाणानां सतां सशब्दं यथा स्यात्तथा वंशैकग्रंथिभेदः वंशस्यैकग्रंथेर्भेदः । द्वितीयेऽह्नि द्वितीयदिवसे सायं सायंसंध्यायां तथा तेनैव प्रकारेण द्वितीयग्रंथिभेदनमभूदिति शेषः ॥ ४९ ॥ तृतीयेऽह्नि तृतीयघस्रे । शेषं स्पष्टम् । एवममुना प्रकारेण सप्तदिनैः सप्ताहोभिर्वंशस्य सप्तग्रंथीनां विभेदनम्, अभूदिति शेषः ॥ ५० ॥ इदानीमुद्योगसिद्धिमाह—प्रेत इति । प्रेतः धुंधुकार्यपि द्वादशस्कंधश्रवणात् द्वादशस्य स्कंधस्य श्रवणम् । यद्वा—द्वादश च ते स्कंधाश्चेति तथा तेषां श्रवणं तस्मात्प्रेततां प्रेतभावं जहौ तत्याज । अत्रायमभिसंधिः—गयाश्राद्धस्य वैयर्थ्ये किमद्य करणीयमिति गोकर्णपृष्टैः सर्वविद्भिः शास्त्रावलोकने कृतेऽपि तदुपायाऽनिरीक्षणे "अंतरिक्षमृतानां तु वेदपारायणं चरेत्" इति बलवत्स्मृतिवचनं किं नो निवेदितमित्याक्षेपे—तद्विधेः केवलांतरिक्षमरणमात्रपरतया "कर्मणा नास्ति संख्या मे महाज्ञाने विवर्त्तिन" इतिवचनादेतत्कृतानां बालहत्याद्यनंतमहापातकानां विद्यमानत्वान्न तेन कार्यसिद्धिरिति विचार्य 'श्रीमद्भागवतान्मुक्तिः सप्ताहं वाचनं कुरु'' इति सूर्योक्तसमाधानस्य समीचीनत्वम् । वेदपारायणादपि श्रीमद्भागवतपारायणस्याधिकतायाः पूर्वमेवोक्तत्वात् ।."वेदोपनिषदां साराज्जाता भागवती कथा" इत्यनेन कथासमाप्तावत्र प्रेतभावनिवृत्तेः, प्रक्रमोपसंहारयोरप्येकवाच्यत्वाच्च युक्तमुक्तमिति सुधीभिर्भावनीयम् । ततो दिव्यरूपावाप्तिर्जातेति सूचयंस्तद्वाक्यमाह—दिव्येति सार्द्धेन । दिव्यरूपधरः दिवि भवा दिव्यास्तेषां रूपस्य धरो धारकः । यद्वा—दिव्यरूपस्य धरो धारको जातः । तुलसीदाममंडितः तुलस्या दामभिर्गुच्छैर्मंडितोऽलंकृतः ॥ ५१ ॥ पीतवासाः पीतं वासो यस्य स तथा । घन इव श्यामः श्यामलः । मुकुटी मुकुटमस्यास्तीति तथा । कुण्डलाभ्यामन्वितो युक्तः, शोभमान इत्यर्थः । भ्रातरं गोकर्णं सद्यस्तदानीं ननाम । नमनानंतरमित्यब्रवीदुवाच

१. 'कृत्वाऽपि द्वादशस्कन्धश्रवणम्' इति पाठान्तरम् ।

धन्या भागवती वार्ता प्रेतपीडाविनाशिनी । सप्ताहोऽपि तथा धन्यः कृष्णलोकफलप्रदः ॥ ५३ ॥
कंपन्ते सर्वपापानि सप्ताहश्रवणे स्थिते । अस्माकं प्रलयं सद्यः कथा चेयं करिष्यति ॥ ५४ ॥
आर्द्रं शुष्कं लघु स्थूलं वाङ्मनःकर्मभिः कृतम् । श्रवणं विदहेत्पापं पावकः समिधो यथा ॥ ५५ ॥
अस्मिन्वै भारते वर्षे सूरिभिर्देवसंसदि । अकथाश्राविणां पुंसां निष्फलं जन्म कीर्तितम् ॥ ५६ ॥
किं मोहतो रक्षितेन सुपुष्टेन बलीयसा । अध्रुवेण शरीरेण शुकशास्त्रकथां विना ॥ ५७ ॥
अस्थिस्तम्भं स्नायुबद्धं मांसशोणितलेपितम् । चर्मावनद्धं दुर्गन्धं पात्रं मूत्रपुरीषयोः ॥ ५८ ॥
जराशोकविपाकार्तं रोगमन्दिरमातुरम् । दुष्पूरं दुर्धरं दुष्टं सदोषं क्षणभंगुरम् ॥ ५९ ॥
कृमिविड्भस्मसंज्ञान्तं शरीरमिति वर्णितम् । अस्थिरेण स्थिरं कर्म कुतोऽयं साधयेन्न हि ॥ ६० ॥
यत्प्रातः संस्कृतं चान्नं सायं तच्च विनश्यति । तदीयरससंपुष्टे काये का नाम नित्यता ॥ ६१ ॥
सप्ताहश्रवणाल्लोके प्राप्यते निकटे हरिः । अतो दोषनिवृत्त्यर्थमेतदेव हि साधनम् ॥ ६२ ॥
बुद्बुदा इव तोयेषु मशका इव जन्तुषु । जायन्ते मरणायैव कथाश्रवणवर्जिताः ॥ ६३ ॥

च ॥ ५२ ॥ भ्रातृकृतमुपकारं स्मरञ्छ्रीमद्भागवतकथां श्लाघते-त्वयेति । हे बंधो कृपया करुणया प्रेतकश्मलात् प्रेतदुःखात् त्वयाहं मोचितः मुक्तिं गमितः । भागवती वार्ता श्रीमद्भागवतसंबंधिनी कथा धन्या प्रशस्या । तत्र हेतुः-प्रेतपीडाविनाशिनी प्रेतदुःखनाशकारिणी ॥ ५३ ॥ सप्ताहोपि परमपुण्य इत्याह-सप्ताह इति । सप्ताहः सप्तदिनसाध्यो यज्ञविशेषोपि धन्यः । तत्र हेतुः-कृष्णलोकफलप्रदः कृष्णस्य लोको वैकुंठः स एव फलं सुखप्राप्तिहेतुत्वात् तत्प्रददातीति तथा । सप्ताहश्रवणे सप्तघस्रांतराले एतत्कथाश्रवणे स्थिते जाते सति, पुरुषे वा स्थिते प्रवृत्ते सति सर्वाणि पापानि कंपंते ॥ ५४ ॥ तदुक्तिमाह-अस्माकमित्यर्द्धेन । इयं च भागवतसंबंधिनी कथा अस्माकं प्रलयं नाशं सद्योऽद्य करिष्यति । किंच—आर्द्रं ज्ञानतः कृतं पापं, शुष्कम् अज्ञानतः कृतं, लघु स्वल्पकीटपतंगघातादि, स्थूलं चतुष्पदवधादि, वाङ्मनःकर्मभिः वाचा मनसा कर्मणा वा कृतं पापं कर्म । श्रवणं कर्तृ । विदहेत् भस्मीकुर्यात् । तत्र दृष्टांतः-पावकोऽग्निः समिधः काष्ठानि यथा दहति तथा ॥ ५५ ॥ कथाश्रवणादृते मानुषं जन्म वृथेत्याह-अस्मिन्निति द्वाभ्याम् । अस्मिन् भारते वर्षे भरतखंडे अकथाश्राविणां न कथां श्रोतुं शीलं येषां पुंसां देवसंसदि ब्राह्मणसभायां सूरिभिः पंडितैः, देवानां संसदीति व्याख्याने सूरिभिर्बृहस्पत्यादिभिर्जन्म वृथा कथितम् ॥ ५६ ॥ मोहतः स्नेहात् रक्षितेन पालितेन सुपुष्टेन स्थूलीकृतेन बलीयसाऽतिबलवता अध्रुवेण विनाशिना शरीरेण देहेन शुकशास्त्रकथां श्रीमद्भागवतकथां विना किम्, न किमपि प्रयोजनमित्यर्थः ॥ ५७ ॥ एतदेव स्पष्टयति-अस्थीति चतुर्भिः । अस्थीनि अस्थ्नां वा स्तंभा यस्मिंस्तत् । स्नायुभिर्नसाजालैर्बद्धं दृढीकृतम् । मांसं च शोणितं च मांसशोणिते ताभ्यां लेपितं लिप्तम् । चर्मणाऽवनद्धमाच्छादितम् । दुष्टो गंधो यस्मिंस्तत् । मूत्रपुरीषयोः विष्ठामूत्रयोः स्थानम् ॥ ५८ ॥ जरा च शोकश्च जराशोकौ, तयोर्विपाकः फलं तेनार्तं युक्तम् । रोगमन्दिरं रोगस्य गृहम् । आतुरं दुःखितम् । दुष्पूरमपूरणम् । दुर्द्धरं दुःखेन धार्यम् । दुष्टं निंदितम् । सदोषं दोषैर्वातपित्तकफैः सहितम् । क्षणभंगुरं क्षणेन भंगुरं नाशवत् ॥ ५९ ॥ कृमिविड्भस्मसंज्ञांतं कृमयश्च विट् च भस्म च कृमिविड्भस्मानि तान्येव संज्ञा सा अन्ते यस्य तत्तथा, इत्येवंभूतं शरीरं वर्णितमुक्तम् । अयं प्राणी अस्थिरेण चलस्वभावेन देहेन स्थिरं कर्म धर्मादिकार्यं कुतो न साधयेत् कस्माद्धेतोः नोपार्जयेत् । हि युक्तमेतत् ॥ ६० ॥ प्रातः प्रभातसमये अन्नमोदनादि भक्ष्यं यत् संस्कृतं भुक्तं तच्च सायं संध्यासमये विनश्यति, तस्य भुक्तान्नस्याऽयं तदीयश्चासौ रसश्चेति तथा तेन संपुष्टे स्थूले काये शरीरे का नाम नित्यता, न कापि, विकारमात्रस्याऽनित्यत्वादिति भावः ॥ ६१ ॥ पारायणश्रवणं हरिप्राप्तिकरमित्याह-सप्ताहेति । सप्ताहश्रवणाद्धेतोः लोके जगति निकटे समीपमेव हरिः पापहंता विष्णुः प्राप्यते । अतोऽस्मात्कारणात् दोषनिवृत्त्यर्थं पापानां निराकरणाय एतत्पुराणश्रवणमेव साधनमस्ति । हि उपायांतरव्यावृत्त्यर्थः ॥ ६२ ॥ तद्धीना[1]स्तुच्छा इत्याह-बुद्बुदा इति । कथाश्रवणवर्जिताः कथा हरिसंबंधिनी न तु लौकिकी, तस्याः श्रवणं तेन वर्जिता रहिता जना मरणार्थमेव जायंते उत्पद्यंते, न तु मोक्षार्थम् । तत्र दृष्टांतद्वयम्-तोयेषु जलेषु बुद्बुदा फेना इव, जंतुषु प्राणिषु मशका दंशा इव, नरजन्मवैफल्यसूचनाय दृष्टांतद्वयमेतदिति चिन्तनीयम् ॥६३॥ सांप्रतं तत्प्रभावं द्रढयन्नाह—जडस्येति । जडस्याऽचेतनस्य शुष्कस्य विरसस्य वंशस्य वेणोर्यत्र यस्यां कथायां ग्रन्थिविभेदनं ग्रन्थिविपाटनमभूत्, तदा

---

१. कथाश्रवणेन हीनाः ।

जडस्य शुष्कवंशस्य यत्र ग्रन्थिविभेदनम् । चित्रं किमु तदा चित्तग्रंथिभेदः कथाश्रवात् ॥ ६४ ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि सप्ताहश्रवणे कृते ॥ ६५ ॥
संसारकर्दमालेपप्रक्षालनपटीयसि । कथा तीर्थे स्थिते चित्ते मुक्तिरेव बुधैः स्मृता ॥ ६६ ॥
एवं ब्रुवति वै तस्मिन्विमानमगमत्तदा । वैकुण्ठवासिभिर्युक्तं प्रस्फुरद्दीप्तिमंडलम् ॥ ६७ ॥
सर्वेषां पश्यतां भेजे विमानं धुन्धुलीसुतः । विमाने वैष्णवान्वीक्ष्य गोकर्णो वाक्यमब्रवीत् ॥ ६८ ॥
गोकर्ण उवाच—अत्रैव बहवः सन्ति श्रोतारो मम निर्मलाः । आनीतानि विमानानि न तेषां युगपत्कुतः ॥ ६९ ॥
श्रवणं समभागेन सर्वेषामिह दृश्यते । फलभेदः कुतो जातः प्रब्रुवन्तु हरिप्रियाः ॥ ७० ॥
हरिदासा ऊचुः—श्रवणस्य विभेदेन फलभेदोऽपि संस्थितः । श्रवणं तु कृतं सर्वैर्न तथा मननं कृतम् ॥ ७१ ॥
फलभेदस्ततो जातो भजनादपि मानद । सप्तरात्रमुपोष्यैव प्रेतेन श्रवणं कृतम् ॥ ७२ ॥
मननादि तथा तेन स्थिरचित्ते कृतं भृशम् । अदृढं च हतं ज्ञानं प्रमादेन हतं श्रुतम् ॥ ७३ ॥
संदिग्धो हि हतो मन्त्रो व्यग्रचित्तो हतो जपः । अवैष्णवो हतो देशो हतं श्राद्धमपात्रकम् ॥ ७४ ॥
हतमश्रोत्रिये दानमनाचारहतं कुलम् । विश्वासो गुरुवाक्येषु स्वस्मिन्दीनत्वभावना ॥ ७५ ॥

कथाश्रवात् कथायाः श्रवणात् चित्तग्रन्थिभेदः चित्ते मनसि ग्रन्थयः वासनारूपास्तेषां भेदः भेदनं किमु चित्रं, न किमपि । यत्रेत्यस्य यदेत्यर्थ इत्याहुर्गुरवः ॥ ६४ ॥ मुक्तिसाधनमप्येतदित्याह—भिद्यत इति । सप्ताहश्रवणे सप्तदिनमध्ये कथाश्रवणे कृते सति अस्य श्रोतुर्हृदयग्रन्थिर्भिद्यते भिन्नो भवति । सर्वसंशयाः असम्भावनाविपरीतभावनारूपाः छिद्यन्ते छिन्ना भवन्ति । कर्माणि पूर्वसञ्चितानि क्रियमाणानि च क्षीयन्ते नश्यन्ति । न च प्रारब्धकर्मणस्तु भोगादेव क्षयः "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इत्युक्तेरिति वाच्यम्, भगवत्कथामहिम्नोऽचिन्त्यशक्तित्वात् ॥ ६५ ॥ किंच—संसारेति । संसार एव कर्दमः पंकस्तस्यालेप आलेपनं तस्य प्रक्षालनं मलनिराकरणेन शुद्धिकरणं तस्मिन् पटीयसि अतिशयेन पटुनि कथातीर्थे कथैव तीर्थं कथातीर्थं तस्मिन् चित्ते स्थिते सति मुक्तिरेव मोक्ष एव स्मृता बुधैः पण्डितैः कथिता ॥ ६६ ॥ तत्समये विमानं प्राप्तमित्याह—एवमिति । एवमित्थं तस्मिन् दिव्यदेहधारिणि धुंधुकारिणि ब्रुवति वदति सति तदा तत्क्षणमेव विमानमगमत् । तद्विशिनष्टि—वैकुंठवासिभिर्विष्णुपार्षदैर्युक्तम्, प्रस्फुरत् अतिप्रकाशशालि दीप्तीनां मण्डलं यस्मिंस्तत्तथा । यद्वा—प्रस्फुरन्त्यश्च ता दीप्तयश्च प्रस्फुरद्दीप्तयस्तासामिति ॥ ६७ ॥ तदारूढं धुंधुकारिणं दृष्ट्वा गोकर्णः पृष्टवानित्याह—सर्वेषामिति । सर्वेषां जनानां पश्यतां सतां धुंधुलीसुतः धुंधुल्याः पुत्रो विमानं भेजे आरुरोह । विमाने विमानोपरि वैष्णवान् विष्णुसेवकान् वीक्ष्य दृष्ट्वा गोकर्णो वाक्यमब्रवीत् ॥ ६८ ॥ बहूनां श्रोतॄणामत्र विद्यमानत्वात्कथमेकं विमानमानीतम्, अन्येषाञ्च किमिति तदारोहणं न जातमित्यौत्सुक्येन पृच्छति—अत्रेति द्वाभ्याम् । अत्र स्थाने मम कथायाः श्रोतारो निर्मलाः शुद्धा बहवः सन्ति । एव निश्चये । तेषामर्थे चतुर्थ्यर्थे षष्ठीयम् । युगपत् एतत्समकालमेव विमानानि कुतः कस्मात्कारणान्नानीतानि ॥ ६९ ॥ इहात्र श्रवणं समभागेन तुल्यतया सर्वेषां जनानां दृश्यते, अस्माभिरिति शेषः । फलभेदः फले भेदो वैषम्यं कुतः कस्माद्धेतोः जात उद्भूतः । हे हरिप्रियाः हे पार्षदाः प्रब्रुवन्तु भवन्तो वदन्तु ॥ ७० ॥ 'कारणभेदात् कार्यभेदः' इति न्यायमाश्रित्योत्तरयन्ति—श्रवणस्येति सार्द्धैश्चतुर्भिः । श्रवणविभेदेन हेतुना फलभेदः फले फलस्य वा भेदोऽपि संस्थितो जातः । सर्वैः श्रवणं कृतं परन्तु तथा तेन प्रकारेण मननं विचारो न कृतम् । तुशब्दो भेदे ॥ ७१ ॥ हे मानद ! ततस्तस्मात्कारणात् भजनात् गुरुरूपिभगवदनुग्रहपूर्वकभजनात् फलभेदो जातः 'भोजनात्' इति पाठांतरं साधु । तथाहि—सप्तरात्रं यावत् । नैरंतर्ये द्वितीया । उपोष्य उपवासं कृत्वैव प्रेतेन यथा श्रवणं कृतम् ॥ ७२ ॥ तथा तेन प्रेतेन स्थिरचित्ते निश्चलचित्ते सति । भृशमत्यर्थम् । मननादि कृतम् । आदिना निदिध्यासनसंग्रहः । तत्र हेतुः—अदृढं शिथिलं ज्ञानं हतम्, भवतीति क्रियान्वयः । एवमग्रेऽपि । श्रुतं शास्त्रादीनां श्रवणं, शास्त्रमेव वा प्रमादेन हतम् ॥ ७३ ॥ संदिग्धः इत्थमनित्थं वेति सन्देहास्पदीभूतः गुरुसम्प्रदायरहितो वा मन्त्रो हतः । व्यग्रचित्तः विविधम् अग्रं वृत्तिविशेषो यस्मिंस्तथाभूतमसावधानं चित्तं यस्मिन स तथा जपो मन्त्रादिर्हतः । नास्ति वैष्णवो विष्णुभक्तो यस्मिन् स तथा देशो हतः । नास्ति पात्रं धर्मशास्त्रोक्तलक्षणसम्पन्नं ब्रह्म यस्मिन् तत्तथा । श्राद्धं पार्वणादि हतम् ॥ ७४ ॥ अश्रोत्रिये वेदपाठरहिते ब्राह्मणे दानं हतम् । नास्ति आचारो यस्मिंस्तत् कुलं हतम्, 'आचारः प्रथमो धर्मः' इति वचनात्तद्विहीनस्याऽधर्महेतुत्वात् । श्रवणस्य साफल्यसाधनान्याह—विश्वास इति सार्द्धेन । गुरुवाक्येषु गृणाति हिताहितमिति गुरुः । यद्वा—"गुकारस्त्वंधकारः स्याद्रुकारस्तद्विनाशकृत् । अन्धकारविनाशि-

१. शुद्धिहेतुत्वात् । २. ब्राह्मणः ।

मनोदोषजयश्चैव कथायां निश्चला मतिः । एवमादि कृतं चेत्स्यात्तदा वै श्रवणे फलम् ॥ ७६ ॥
पुनः श्रवान्ते सर्वेषां वैकुण्ठे वसतिर्ध्रुवम् । गोकर्ण तव गोविंदो गोलोकं दास्यति स्वयम् ॥ ७७ ॥
एवमुक्त्वा ययुः सर्वे वैकुण्ठं हरिकीर्तनाः । श्रावणे मासि गोकर्णः कथामूचे तथा पुनः ॥ ७८ ॥
सप्तरात्रवतीं भूयः श्रवणं तैः कृतं पुनः । कथासमाप्तौ यज्जातं श्रूयतां तच्च नारद ॥ ७९ ॥
विमानैः सह भक्तैश्च हरिराविर्बभूव ह । जयशब्दा नमःशब्दास्तत्रासन्बहवस्तदा ॥ ८० ॥
पाञ्चजन्यध्वनिं चक्रे हर्षात्तत्र स्वयं हरिः । गोकर्णं तु समालिंग्याकरोत्स्वसदृशं हरिः ॥ ८१ ॥
श्रोतॄनन्यान्घनश्यामान्पीतकौशेयवाससः । किरीटिनः कुण्डलिनस्तथा चक्रे हरिः क्षणात् ॥ ८२ ॥
तद्ग्रामे ये स्थिता जीवा आश्वचाण्डालजातयः । विमाने स्थापितास्तेऽपि गोकर्णकृपया तदा ॥
प्रेषिता हरिलोके ते यत्र गच्छन्ति योगिनः ॥ ८३ ॥
गोकर्णेन स गोपालो गोलोकं गोपवल्लभम् । कथाश्रवणतः प्रीतो निर्ययौ भक्तवत्सलः ॥ ८४ ॥
अयोध्यावासिनः पूर्वं यथा रामेण संगताः । तथा कृष्णेन ते नीता गोलोकं योगिदुर्लभम् ॥ ८५ ॥

त्वाद् गुरुरित्यभिधीयते ।" इत्युक्तलक्षणो वा, तस्य वाक्यानि वचनानि तेषु विश्वासः । अत एव निश्चलबुद्धिः । स्वस्मिन्नात्मनि दीनत्वभावना दीनोऽहमिति धारणा, न तु कौटिल्याहंकारादिभिरौन्नत्यम् ॥ ७५ ॥ च पुनः, एव निश्चयेन, मनोदोषजयः मनसो दोषाः कामक्रोधादयस्तेषां जयः । कथायां निश्चला मतिः स्थिरा बुद्धिः । एवमादि साधनं चेद्यदि कृतं स्यात्तदा श्रवणे फलं भवेत् ॥ ७६ ॥ सर्वेषां मुक्तिर्मया सम्पादनीयेति चिंतयानं प्रत्याहुः—पुनरिति । पुनः श्रवस्य भूयः कथाश्रवणस्यान्ते सर्वेषां श्रोतॄणां वैकुण्ठलोके ध्रुवं निश्चयेन वसतिर्वासः, भविष्यतीति शेषः । हे गोकर्ण गोविन्दो भगवान् तव तुभ्यं स्वयमेव आत्मनैव गोलोकं दास्यति ॥ ७७ ॥ पार्षदा वैकुण्ठं ययुरित्याह—एवमिति । एवमित्थं ते सर्वे हरिकीर्त्तनाः हरिं कीर्त्तयन्तीति तथा ते पार्षदा वैकुण्ठं ययुः विष्णुभवनं गताः । "पुनः श्रवान्ते सर्वेषां वैकुण्ठे वसतिर्ध्रुवम्" इति यथा विष्णुपार्षदैरुक्तं तथा श्रावणे मासि गोकर्णः पुनर्भूयः कथामूचे जगाद । तदुक्तम्—"आषाढे धेनुजः पूर्वमुवाच धुंधुकारिणे । श्रावणे सर्वमुक्त्यर्थमाश्विने तूद्धवाय च । मैत्रेय आह सौम्ये च माघे भक्तजना दधुः । ततः प्रभृति सर्वेषु मासेषु श्रवणं मतम् । प्रत्यहं शृणुयाद्यो वै तस्य मुक्तिश्च निश्चयात् । नात्र मासादिनियमः सर्वदा श्रवणं मतम् ।" इति ॥ ७८ ॥ पुनश्श्रवणात्ते कृतार्था इत्याह—सप्तेति । सप्तरात्रवतीं सप्तानां रात्रीणां समाहारः सप्तरात्रं, तद्विद्यते यस्यामिति तथा तां कथामिति पूर्वान्वयि । भूयः पुनः तैः श्रोतृभिः श्रवणं कृतम् । 'सप्तरात्रं व्रतीभूय' इति पाठः साधुरिति गुरवः । तत्र साम्प्रदायिकाः पूर्वश्लोके गोकर्णेन सहान्वयमाहुः । हे नारद कथासमाप्तौ कथावसाने, पूर्त्ताविति यावत् । यदाश्चर्यं जातं तत् श्रूयताम् । च प्रसिद्धयर्थः ॥ ७९ ॥ हरिराविर्भूय श्रोतॄणां वैकुण्ठानयनं कृतवानित्याह—विमानैरिति । विमानैः च पुनः भक्तैः सह यदा हरिराविर्बभूव प्रादुरास । हेति स्फुटम् । तदा जयशब्दा नमःशब्दा बहवोऽसंख्यातास्तत्रासन्नभवन् ॥ ८० ॥ हर्षेण शंखं वादयित्वा गोकर्णं चालिंग्य स्वसदृशं हरिरकरोदित्याह—पांचजन्येति । "समुद्रचारी यः पूर्वमासीत्पंचजनोऽसुरः । गुरोः सुतस्यानयने समुद्रवचनाद्धरिः । हत्वा तदुदरे बालमपश्यन्यममागमत् । तदंगप्रभवं शंखं नामतः पांचजन्यकम् । दध्मौ भीतो यमं प्राप्य गुरुपुत्रमथाददात् ।" इति पुराणान्तरे प्रसिद्धम् । पांचजन्यः शंखस्तस्य ध्वनिं नादं तत्र कथास्थाने स्वयमात्मनैव हरिर्हर्षाच्चक्रे चकार । तुशब्द उक्तादधिकफलसूचनार्थः । गोकर्णं समालिंग्य मिलित्वा स्वसदृशं स्वेन समं हरिरकरोत् ॥ ८१ ॥ अन्यानपि स्वपार्षदांश्चक्रुरित्याह—श्रोतॄनिति । हरिर्विष्णुः तथा तेनैव प्रकारेण क्षणात् तत्क्षणमेव अन्यान् श्रोतॄन् घन इव मेघ इव श्यामान् श्यामलान्, पीतकौशेयवाससः पीतानि कौशेयानि पट्टनिर्मितानि वासांसि येषां ते तथा तान्, किरीटमस्ति येषां ते तथा तान् कुण्डलमस्ति येषां ते तथा तान् चक्रे चकार ॥ ८२ ॥ भक्तिपारवश्ये नातिचित्रं कृतमित्याह—तदिति सार्द्धेन । आ समंततः श्वचाण्डालजातयः 'श्वचाण्डालश्वपचादयः' इति पाठे आदिशब्दोंतार्थो बोध्यः, स्तम्भादयो गृहा इतिवत्, 'अधीतवान् द्वापरादौ' इति व्यासोक्तिवच्च । जातिपर्यन्ता ये जीवाः तद्ग्रामे तस्मिन्ग्रामे स्थिता आमंस्ते सर्वेऽपि तदा तस्मिन्काले हरिणा विमाने स्थापिताः । केन हेतुनेत्यत आह—गोकर्णकृपया । योगिनो यत्र योगबलेन गच्छन्ति तस्मिन हरिलोके वैकुण्ठे ते सर्वे प्रेषिताः प्रस्थापिताः ॥ ८३ ॥ गोकर्णाय गोलोकं दत्तवानित्याह—गोकर्णेनेति । स गोपालः गां पालयतीति गोपालः, गां वेदलक्षणां वाणीं पालयतीति वा । कथाश्रवणतः कथाश्रवणात् प्रीतः प्रसन्नः गोकर्णेन सह गोपवल्लभं गोपानां प्रियं गोलोकं निर्ययौ निर्जगाम । यतो भक्तवत्सलः भक्तेषु वत्सलः कृपालुः । यद्वा—भक्तान वत्सवत् पुत्रवत् लाति गृह्णाति स्वीकरोतीति तथा ॥ ८४ ॥ परोपकारकरणे श्रीकृष्णस्य श्रीरामचन्द्रेण समतां सूचयति—अयोध्येति । अयोध्यावासिनः अयोध्यां वस्तुं शीलं येषां ते तथा पूर्वं पुरा रामेण सङ्गता रामेण सह वैकुण्ठं यथा प्राप्ता तथा योगिदुर्लभं

यत्र सूर्यस्य सोमस्य सिद्धानां न गतिः कदा । तं लोकं हि गतास्ते तु श्रीमद्भागवतश्रवात् ॥ ८६ ॥
ब्रूमोऽद्य ते किं फलवृन्दमुज्ज्वलं सप्ताहयज्ञेन कथासु संचितम् ।
कर्णेन गोकर्णकथाक्षरो यैः पीतश्च च ते गर्भगता न भूयः ॥ ८७ ॥
वाताम्बुपर्णाशनदेहशोषणैस्तपोभिरुग्रैश्चिरकालसंचितैः ।
योगैश्च संयांति न तां गतिं वै सप्ताहगाथाश्रवणेन यान्ति याम् ॥ ८८ ॥
इतिहासमिमं पुण्यं शाण्डिल्योऽपि मुनीश्वरः । पठते चित्रकूटस्थो ब्रह्मानन्दपरिप्लुतः ॥ ८९ ॥
आख्यानमेतत्परमं पवित्रं श्रुतं सकृद्वै विदहेदघौघम् ।
श्राद्धे प्रयुक्तं पितृतृप्तिमावहेन्नित्यं सुपाठादपुनर्भवं च ॥ ९० ॥

इति श्रीपद्मपुराणे श्रीभागवतमाहात्म्ये गोकर्णवर्णनं नाम पञ्चमोऽध्यायः ॥ ५ ॥

## अथ षष्ठोऽध्यायः

कुमारा ऊचुः—अथ ते संप्रवक्ष्यामः सप्ताहश्रवणे विधिम् । सहायैर्वसुभिश्चैव प्रायः साध्यो विधिः स्मृतः ॥ १ ॥
दैवज्ञं तु समाहूय मुहूर्तं पृच्छय यत्नतः । विवाहे यादृशं चित्तं तादृशं परिकल्पयेत् ॥ २ ॥

योगिभिर्दुष्प्रापं गोलोकं ते सर्वे कृष्णेन नीताः प्रापिताः ॥ ८५ ॥ श्रीमद्भागवतस्य श्रवणं मुक्तिदायकं यत्तदर्थं दृढीकुर्वन्नाह— यत्रेति । यत्र यस्मिँल्लोके सूर्यस्य रवेः, सोमस्य चन्द्रस्य, सिद्धानां देवानां गतिः कदा कस्मिन्नपि काले न भवति । गतिशब्दोऽत्र पक्षांतरे प्रकाशवाची । तं लोकं परमधामाख्यं श्रीमद्भागवतश्रवात् श्रीमद्भागवतस्य श्रवणतस्ते सर्वे गताः प्राप्ताः । हि निश्चयेन । तुशब्दस्तत्र गतानां पुनरागमननिषेधार्थः । तदुक्तं गीतायां श्रीकृष्णेन "न तद्भासयते सूर्यो न शशाङ्को न पावकः । यद्गत्वा न निवर्त्तन्ते तद्धाम परमं मम ।" इति ॥ ८६ ॥ एतदधिकमन्यन्नास्तीति सनत्कुमारो नारदायाऽऽह—ब्रूम इति । उज्ज्वलमतिशुद्धं सप्ताहयज्ञेन सप्ताह एव यज्ञो यागस्तेन कथासु संचितं नानाख्यानेषु एकीकृतं कथाभिः सुसञ्चितमिति वा । फलवृन्दं फलसमूहं किमद्य ब्रूमो वयं वदामः । तदेवाह—कर्णेन श्रोत्रेण दक्षिणस्यैव कर्णस्यात्र प्राधान्यादेकत्वमिति गुरवः । जात्यभिप्रायेणेति केचित् । गोकर्णकथाक्षरं गोकर्णेन निरुक्ता कथा गोकर्णकथा तस्या अक्षरं पदमात्रं लक्षणयाऽक्षरशब्दस्य पदमात्रे शक्तिः "तत्कथायां तु वेदार्थः श्लोके श्लोके पदे पदे" इत्युक्तेः । यैः पुंभिः पीत आदरेण श्रुतः, ते पुरुषाः भूयः पुनर्गर्भगता जन्मभाजो न भवन्ति, अर्थान्मुक्ता भवन्ति । एतेन 'ऋते ज्ञानान्न मुक्तिः' इति वेदान्तडिंडिमो भग्नः ॥ ८७ ॥ एतदेव कैमुतिकन्यायेन द्रढयति—वातेति । सप्ताहगाथाश्रवणेन यां गतिं मोक्षाख्यां श्रोतारो यान्ति प्राप्नुवन्ति तां गतिं वाताम्बुपर्णाशनदेहशोषणैः वातो वायुश्चांबु च जलं पर्णानि शुष्कपत्राणि च वाताम्बुपत्राणि तेषामशनं भोजनं तेन देहस्य शोषणानि शुष्कीकरणानि तैः साधनैः, उग्रैरतिकष्टसाध्यैः तपोभिः, चिरकालेन बहुकालेन संचितैः सम्पादितैः योगैरष्टांगसम्पन्नैश्च न संयान्ति न गच्छन्ति ॥ ८८ ॥ प्रकरणार्थमुपसंहरति—इतीति । इममधुनोक्तं पुण्यं पवित्रमितिहासं शांडिल्यो मुनीश्वरः मुनीनामीश्वरोपि ब्रह्मानन्दपरिप्लुतः ब्रह्मण आनन्दस्तस्मिन् परिप्लुतो निमग्नः, तेन व्याप्तो वा । अभेदार्थे षष्ठी, राहोः शिर इतिवत् । ब्रह्माऽऽनन्दयोरभेदे "आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन" इति श्रुतिः प्रमाणम् । चित्रकूटस्थः चित्राणि कूटानि शिखराणि यस्य स तथा तत्र तिष्ठतीति तथा स नित्यं पठते ॥ ८९ ॥ फलमाह—आख्यानमिति । एतदाख्यानं परममुत्कृष्टम्, पवित्रं पूतं शुद्धिकरं वा, सकृदेकवारं श्रुतम् ( कर्तृपदमेतत् ) अघौघं पापसमूहं विदहेत् भस्मीकुर्यात् । श्राद्धे पार्वणादौ प्रयुक्तं पठितं पितृतृप्तिं पितॄणामानन्दमावहेत् सम्पादयेत्, कुर्यादित्यर्थः । नित्यं प्रतिदिनं सुपाठात् शोभनपाठात् । एतेन ह्रस्वदीर्घव्यत्यासास्पष्टाक्षरोच्चारणेन न सम्यक् फलावाप्तिरिति सूचितम् । अपुनर्भवं नास्ति पुनर्भवो जन्म यस्मात् स तथा तं मोक्षञ्चावहेत् ॥ ९० ॥

इति श्रीशेखावाटयंतर्गतविजयपुरनिवासिव्रजलालिपण्डितरामप्रतापविरचितायां
श्रीमद्भागवतमाहात्म्यटीकायामृजुनाम्न्यां पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्भागवतश्रावाद् धुंधुकारी विमुक्तवान् । प्रेतयोनेः पुनः सर्वे वैकुण्ठपदमागताः ॥ १ ॥

पूर्वाध्याये श्रीमद्भागवतसप्ताहश्रवणफलमुक्तं, तत्र तत्प्रकारकस्याविवक्षितत्वात्तद्विधानार्थमुत्तराध्याय आरभ्यते "संविधानात्फलं पूर्णं तद्धीने तु तदल्पता । अङ्गांगिभावसम्बन्धोऽनयोरध्याययोः स्फुटम् ।" तत्र सप्ताहश्रवणविधिं विवक्षुः "मंगलादीनि मङ्गलमध्यानि मङ्गलांतानि च शास्त्राणि प्रथन्ते" इत्यादिमहाभाष्योल्लेखादनन्तमाचार्यादौ मङ्गलमाचरति—

नभस्य आश्विनार्जौ च मार्गशीर्षः शुचिर्नभाः । एते मासाः कथारम्भे श्रोतृणां मोक्षसूचकाः ॥ ३ ॥
मासानां विग्रहे यानि तानि त्याज्यानि सर्वथा । सहायाश्चेतरे चात्र कर्तव्याः सोद्यमाश्च ये ॥ ४ ॥
देशे देशे तथा सेयं वार्ता प्रेष्या प्रयत्नतः । भविष्यति कथा चात्र आगन्तव्यं कुटुम्बिभिः ॥ ५ ॥
दूरे हरिकथाः केचिद् दूरे चाच्युतकीर्तनाः । स्त्रियः शूद्रादयो ये च तेषां बोधो यतो भवेत् ॥ ६ ॥

अथेति । अथेति मङ्गले[1] । सप्ताहश्रवणे विधिं विधानं ते तुभ्यं वयं सम्प्रवक्ष्यामः सम्यक् कथयिष्यामः ! तत्रादौ कतिसाधकैर्विधिः साध्य इति निर्णीयते—वसुभिः अष्टभिः सहायैः प्रायो बाहुल्येन विधिः इतिकर्त्तव्यतासाध्यः स्मृत एव ॥ १ ॥ कदा प्रारम्भः कार्य इति कालनिर्णयार्थं दैवज्ञाह्वानमाहुः—दैवज्ञमिति । दैवज्ञं ज्योतिर्विदं ब्राह्मणम् । तत्र तस्यैवाधिकारात् । समाहूय पाद्यार्घ्याचमनासनानि निवेद्य इति संशब्दार्थः, आदरपर्यायत्वात् । मुहूर्त्तं पृष्ट्वा संपृच्छ्य, आर्षो ल्यबत्र समासाभावात् । विवाहे यादृशं चित्तं प्रमोदमानं तादृशं चित्तं कथायामपि परिकल्पयेत् विदध्याम् । 'वित्तम्' इति पाठे विवाहे यादृशं वित्तं वस्त्राभूषणगोशय्यादानादिरूपं सम्पाद्यते तादृशमत्रापि परिकल्पयेदित्यर्थः । ननु "गत्वा स्नानं प्रकर्त्तव्यं गत्वा पृच्छेच्छुभाशुभम् । समाहूय तु यः पृच्छेत्तदर्द्धफलदं भवेत् ॥" इति पाद्मोक्त्या समाहूय पृच्छायाः फलार्द्धप्रदत्वात्कथं समाहूयेत्युक्तं, तत्र नृपाभिप्रायेणेति गुरवः । "वसिष्ठं तु समाहूय यौवराज्याभिषेचनम् । एकान्ते जनकोऽपृच्छत्" इति रामायणोक्तेः । केचित्तु—विवाहयात्रादिमङ्गलं शुभम्, अशुभं कष्टरोगोत्पातादिकं च गत्वा पृच्छेदिति विधिः, एतत्कार्यस्य च परमार्थसाधकत्वादाह्वानं न दोषदमित्याहुः । अन्यत्रापि—"गत्वा नत्वा च दत्त्वा च परिपृच्छेत्सदक्षिणम् । ब्राह्मणं मङ्गलं यश्च तस्य कार्यं सुसिद्धिदम् ॥ संतोष्य च वचो ग्राह्यं ब्राह्मणस्य तु सर्वथा । असंतोष्य वचो गृह्णन् कार्यकर्त्ता विनश्यति ॥" कीदृशं तन्मुहूर्त्तं, कुत्र लिखितमिति केपि न जानन्ति, ज्योतिःशास्त्रेऽदृष्टत्वात् । अतस्तन्मुहूर्त्तं स्वयमेव व्यासोवददिति । तथाहि—"भौमार्किवर्जिता वारा भानि ध्रुवमृदूनि च । शुभयोगे तिथौ लग्ने कथारम्भः प्रशस्यते ॥ नित्यायां च कथायां च पुराणानां मुनीश्वर । द्वादशीं वर्जयेत्प्राज्ञः सूतसूतकसम्भवात् ॥ सप्ताहे न निषेधोस्ति प्राहुरेवं पुराविदः" ॥ इति पाद्मे ॥ २ ॥ मासानाह—नभस्य इति । नभस्यो भाद्रपदः । आश्विनोर्जौ आश्विनकार्त्तिकौ 'बाहुलोर्जौ कार्त्तिकिकः' इत्यमरोक्तेः । मार्गशीर्षः प्रसिद्धः । शुचिराषाढः । नभाः श्रावणः 'नभः खं श्रावणो नभाः' इत्यमरोक्तेः । एते मासाः कथारंभे श्रोतॄणां जनानां मोक्षसूचकाः मोक्षं सूचयंतीति तथा ते, मोक्षदायका इत्यर्थः । चात् माघफाल्गुनवैशाखज्येष्ठानां ग्रहणम् । "सर्वे मासाः शुभाः प्रोक्ताः पौषचैत्रविवर्जिताः" इति विशेषोक्तेः सप्ताह एव एतयोर्निषेधो नान्यत्र । "सर्वदा वाचयेद्गाथां पारायणमृते विधिम्" इति वचनात् । तदुक्तमन्यत्रापि—"नभस्यः कार्त्तिको मार्गशीर्षो माघस्तथैव च । श्रीमद्भागवतं श्राव्यं चातुर्मास्ये महत्फलम् ॥ तत्र कारणमाख्यास्ये श्रूयतां भवतोऽनघाः । इमे मासाः कथायोग्याः श्रुतौ भागवतस्य च । मोहयुक्तं तु ब्रह्माणं मासे नभस्यसंज्ञिते । शुद्धपक्षे शुभे वारे ह्युवाच भगवान्हरिः ॥ युक्तं श्लोकैश्चतुर्भिश्च सर्वथा मुक्तिदायकम् । नवमीदिनमारभ्य पूर्णमासी यदा भवेत् ॥ वैष्णवैः सह भो विप्राः श्रोतव्यं कामदं शुभम् । श्रुत्वा हरिमुखांभोजाद् ब्रह्मा मोहाद्विमुक्तवान ॥ अतो मासे नभस्ये च श्रोतव्यं च नरैः सदा । कार्त्तिके नारदो व्यासं कथामेतां जगाद ह ॥ तस्मात्तु कार्त्तिके मासे सप्ताहश्रवणं मतम् । श्रीशुकं पाठयामास मासे स मार्गशीर्षके ॥ अतः सप्ताहश्रवणं मार्गशीर्षे शुभं मतम् । एकदा तु मुनिर्धीरो गंगातीरमुपेयिवान् ॥ विष्णुरातेन संपृष्टो महाभागवतो मुनिः । माघमासे सिते पक्षे नवमीगुरुवासरे ॥ प्रारभतप्रथमस्कंधाद्वैकुंठपदमाप सः । माघमासोऽतिधन्योऽयं सप्ताहश्रवणे मतः ॥" ॥ ३ ॥ किञ्च—मासानामिति । मासानां विग्रहे शरीरे त्रिंशद्दिनात्मके "समासे च विरोधे च वपुषि विग्रहः स्मृतः" इत्युक्तेः । यानि त्याज्यानि तानि वस्तूनि सप्ताहे सर्वथा सर्वप्रकारेण त्याज्यानि । यथा—"श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा । आश्विने तु त्यजेद् दुग्धं द्विदलं कार्त्तिके तथा ॥ मार्गशीर्षे त्यजेत्कंदं पौषे च गृंजनं तथा । पलांडुमपि केप्याहू रक्तं मूलं च माघके ॥ जंबीरं फाल्गुने मासे चैत्रे चित्रान्नमेव च । कूष्मांडनालिकां राधे ज्येष्ठे पानं च मादकम् ॥ कुलित्थं तुरमाषाढे वर्जनीयं प्रयत्नतः ।" इति । यद्वा—'मासानां विप्र ह्यानि' इति पाठः । तत्र विप्रेति नारदं संबोधयति । शेषं स्पष्टम् । ये सोद्यमा उद्यमेन सहिता इति । 'जीवन्मृतकस्तु निरुद्यमोयम्' इति निरुद्यमानां त्याज्यत्वात् । ते अत्र सप्ताहयज्ञे इतरे अन्येपि सहायाः कर्त्तव्याः ॥ ४ ॥ कथावृत्तांतपत्रमन्यदेशेष्वपि सुहृत्संबंधिबांधवान्प्रति प्रेषणीयमित्याह देशे देश इति । तथा तेन प्रकारेण देशे देशे प्रतिदेशं सा प्रसिद्धा इयं वार्त्ता कथासंबंधिनी प्रेष्या प्रेषणीया दूतादिद्वारा प्रयत्नतः प्रकर्षेण यत्नात् । अत्र देशे कथा श्रीमद्भागवतगाथा भविष्यति भाविनी । अतः कुटुंबिभिः गृहस्थैरागंतव्यम् ॥ ५ ॥ ननु येषां श्रवणेच्छा स्यात्ते स्वयमेवागमिष्यंतीत्यत आह—दूर इति । केचित् केचन दूरे दूरं हरेः कथा येषां ते तथा । केचित् दूरे च अच्युतस्य कीर्त्तनं येषां ते तथा संति । ये च शूद्रादयो नीचजातयः, च पुनः स्त्रियः शौचाचारहीनाः 'स्त्रीशूद्राश्च सधर्माणः'

१. ओंकारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्मांगलिकावुभौ ॥" इति गदुक्तेः ।

देशे देशे विरक्ता ये वैष्णवाः कीर्तनोत्सुकाः । तेष्वेव पत्रं प्रेष्यं च तल्लेखनमितीरितम् ॥ ७ ॥
सतां समाजो भविता सप्तरात्रं सुदुर्लभः । अपूर्वरसरूपैव कथा चात्र भविष्यति ॥ ८ ॥
श्रीभागवतपीयूषपानाय रसलम्पटाः । भवन्तश्च तथा शीघ्रमायात प्रेमतत्पराः ॥ ९ ॥
नावकाशः कदाचिच्चेद्दिनमात्रं तथापि तु । सर्वथागमनं कार्यं क्षणोऽत्रैव सुदुर्लभः ॥ १० ॥
एवमाकारणं तेषां कर्तव्यं विनयेन च । आगन्तुकानां सर्वेषां वासस्थानानि कल्पयेत् ॥ ११ ॥
तीर्थे वापि वने वापि गृहे वा श्रवणं मतम् । विशाला वसुधा यत्र कर्तव्यं तत्कथास्थलम् ॥ १२ ॥
शोधनं मार्जनं भूमेर्लेपनं धातुमण्डनम् । गृहोपस्करमुद्धृत्य गृहकोणे निवेशयेत् ॥ १३ ॥
अर्वाक्पञ्चाहतो यत्नादास्तीर्णानि प्रमेलयेत् । कर्तव्यो मण्डपः प्रोच्चैः कदलीखण्डमण्डितः ॥ १४ ॥
फलपुष्पदलैर्विष्वग्वितानेन विराजितः । चतुर्दिक्षु ध्वजारोपो बहुसंपद्विराजितः ॥ १५ ॥
ऊर्ध्वं सप्तैव लोकाश्च कल्पनीयाः सुविस्तरम् । तेषु विप्रा विरक्ताश्च स्थापनीयाः प्रबोध्य च ॥ १६ ॥
पूर्वं तेषामासनानि कर्तव्यानि यथोत्तरम् । वक्तुश्चापि तदा दिव्यमासनं परिकल्पयेत् ॥ १७ ॥

इति वचनात् । तेषां बोधो ज्ञानं यतः कथाश्रवणात् भवेत् अतो वार्त्ताप्रेषणं युक्तम् ॥ ६ ॥ वैष्णवान्प्रति पत्रं प्रेषणीयमित्याह—देशे देश इति । देशे देशे ये वैष्णवा विरक्ताः विषयाद्यभिलाषरहिताः कीर्त्तनं हरिनामोच्चारणपूर्वकलीलावर्णनं तस्मिन्नुत्सुकाः तेषु । अप्यर्थे एवकारः । तेष्वपीत्यर्थः, पत्रं प्रेष्यं प्रेषणीयम् । तल्लेखनं तस्य पत्रस्य लेखनम् इति एवं वक्ष्यमाणप्रकारेण ईरितम् उक्तम् । च प्रसिद्धम् ॥ ७ ॥ तथाहि—सतामिति सार्द्धैस्त्रिभिः । सप्तरात्रं यावत् सतां सज्जनानां सुदुर्लभः अत्यलभ्यः समाजः समुदायो भविता भविष्यति । अत्र समाजे अपूर्वरसरूपा अद्भुतरसवर्त्तिनी कथा भविष्यति । एवेति निश्चये ॥ ८ ॥ श्रीभागवतमेव पीयूषममृतं तस्य पानाय पानार्थं रसलंपटाः रसलुब्धाः प्रेमतत्परायणाः भवंतो यूयं शीघ्रमायात आगच्छत ॥ ९ ॥ कदाचित्कार्यावरोधेन चेद्यदि सप्तरात्रं नाऽवकाशस्तथापि दिनमात्रम् एकदिनार्थमागमनं सर्वथा सर्वप्रकारेण कार्यम् । अत्र सप्ताहरूपे सतां समाजे क्षण एव क्षणोऽपि सुदुर्लभोऽस्ति । अलभ्यलाभं सूचयति ॥ १० ॥ एवममुना प्रकारेण तेषामाकरणमाह्वानं कर्त्तव्यं करणीयम् । विनयेन नम्रतया । आगमनात्पूर्वमेव वासस्थानानि कल्पनीयानीत्याह—आगंतुकानामित्यर्द्धेन । आगंतुकानाम् आगमिष्यतां सर्वेषां वासस्थानानि वासार्थं स्थानानि कल्पयेत् रचयेत् ॥ ११ ॥ कथा कुत्र वाच्येति चेत्तत्राह—तीर्थ इति । तीर्थे वा पुष्करादौ, वने वापि वृंदावनादौ, गृहे वा श्रवणं मतम् इष्टम् । यत्र मंदिरादौ विशाला विस्तृता वसुधा भूमिरस्ति तत्र कथास्थलं कर्त्तव्यम् ॥ १२ ॥ तत्र स्थानशुद्धिमाह—शोधनमिति । भूमेर्वसुधायाः शोधनं पंचगव्यादिना शुद्धिः । मार्जनं मलाद्युत्सारणम् । गोमयादिना लेपनम् । धातुर्गैरिकादिस्तेन मंडनमलंकरणम् । गृहोपस्करं गृहस्य उपस्करम् उपकरणं खट्वापीठपेषणीपट्टादिकमुद्धृत्य पूर्वस्थानादुत्थाप्य गृहकोणे गृहस्य कोणे एकदेशे निवेशयेत्स्थापयेत् ॥ १३ ॥ अन्यदपि पूर्वमेव संपादनीयमित्याह—अर्वागिति । पंचाहतः पंचदिनार्वाक् पूर्वम् आस्तरणानि भूम्याच्छादनानि कटादीनि प्रमेलयेत् संपादयेत् । ततो मंडपः कार्य इत्याह—कर्त्तव्य इति सार्द्धेन । प्रोच्चैः प्रकर्षेणोच्चतरः कदलीखंडमंडितः कदल्याः खंडानि स्तंभशाखादीनि तैर्मंडितो भूषितो मंडपः कर्त्तव्यः ॥ १४ ॥ विष्वक् परितः फलपुष्पदलैः फलं बिंबादीनाम्, पुष्पं केतक्यादीनाम् । दलमाम्रबिल्वादीनाम्, तैः वितानेन मंडपस्य उपर्याच्छादनेन "पंचवर्णं वितानं स्यान्मंडपाच्छादनाय च" इत्युक्तः । विराजितः शोभितः । चतुर्दिक्षु चतसृषु दिशासु ध्वजानाम् आरोपः, कर्त्तव्य इति पूर्वेणान्वयः । बहुसंपद्विराजितः बह्व्यश्च ताः संपदस्ताभिर्विराजितः विशेषेण प्रकाशितः ॥ १५ ॥ तत्र लोककल्पनं कार्यमित्याह—ऊर्ध्वमिति । ऊर्ध्वं मंडपोपरीति केचित् । तदसंगतं, तत्रस्थानां काप्यदर्शनादश्रुतेश्च । वस्तुतः ऊर्ध्वं सप्त लोका भूरादयः सुविस्तरं यथा स्यात्तथा कल्पनीयाः प्रकल्प्याः । एवात्रधारणे । तेषु सप्तसु लोकेषु विरक्ता विरागिणो विप्रा ब्राह्मणाः प्रबोध्याः—भो भगवन् अत्रेहीत्यभिमुखीकृत्य स्थापनीयाः ॥ १६ ॥ स्थापनमुत्तरोत्तरक्रमेणासनेष्वित्याह—पूर्वमिति । तेषां विरक्तानां श्रोतॄणाम् उत्तरोत्तरक्रमेण पूर्वमासनानि कर्त्तव्यानि तदा तस्मिन्काले पूर्वकाल इत्यर्थः । वक्तुः वाचकस्य दिव्यं सर्वतः श्रेष्ठमासनं सिंहासनं परिकल्पयेत् । अथ प्रसंगाद्वक्तुः श्रोतुश्च गुणनिरूपणम् । तथाहि—"वक्ता व्याससमासवित्प्रियकथः प्रस्ताववित्सत्यवाक् संदेहच्छिदशेषशास्त्रकुशलो नाख्यानविच्छेदकृत् । अव्यंगो जनरंजको जितसभो नाहंकृतो धार्मिकः संतोषीति चतुर्दशोत्तमगुणा वक्तुः प्रणीता इमे । भक्तो वक्तुरगर्वितः श्रुतरुचिश्चांचल्यहीनः पटुः प्रष्टा च बहुश्रुतोऽप्यनलसो निद्रोज्झिताक्षः सुधीः । दाता त्यक्तकथांतरः शुचिवपुर्दंभोज्झितः सर्वथा श्रोतुः पुंस इमे चतुर्दश गुणाः सद्भिर्निरुक्ताः स्फुटाः ॥" इति । अन्यच्च—'गीती शीघ्री शिरःकंपी तथा लिखितपाठकः । अनर्थज्ञोऽल्पकंठश्च षडेते पाठकाधमाः ॥ माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः । धैर्यं लयसमर्थश्च षडेते पाठके गुणाः" ॥ १७ ॥

उदङ्मुखो भवेद्वक्ता श्रोता वै प्राङ्मुखस्तदा । प्राङ्मुखश्चेद्भवेद्वक्ता श्रोता चोदङ्मुखस्तदा ॥ १८ ॥
अथवा पूर्वदिग्ज्ञेया पूज्यपूजकमध्यतः । श्रोतृणामागमे प्रोक्ता देशकालादिकोविदैः ॥ १९ ॥
विरक्तो वैष्णवो विप्रो वेदशास्त्रविशुद्धिकृत् । दृष्टान्तकुशलो धीरो वक्ता कार्योऽतिनिःस्पृहः ॥ २० ॥
अनेकधर्मविभ्रान्ताः स्त्रैणाः पाखण्डवादिनः । शुकशास्त्रकथोच्चारे त्याज्यास्ते यदि पण्डिताः ॥ २१ ॥
वक्तुः पार्श्वे सहायार्थमन्यः स्थाप्यस्तथाविधः । पण्डितः संशयच्छेत्ता लोकबोधनतत्परः ॥ २२ ॥
वक्त्रा क्षौरं प्रकर्तव्यं दिनादर्वाग्व्रताप्तये । अरुणोदयेऽसौ निर्वर्त्य शौचं स्नानं समाचरेत् ॥ २३ ॥
नित्यं संक्षेपतः कृत्वा संध्याद्यं संप्रयत्नतः । कथाविघ्नविघाताय गणनाथं प्रपूजयेत् ॥ २४ ॥
पितॄन्संतर्प्य शुद्ध्यर्थं प्रायश्चित्तं समाचरेत् । मण्डलं च प्रकर्तव्यं तत्र स्थाप्यो हरिस्तथा ॥ २५ ॥
कृष्णमुद्दिश्य मन्त्रेण चरेत्पूजाविधिं क्रमात् । प्रदक्षिणानमस्कारान्पूजान्ते स्तुतिमाचरेत् ॥ २६ ॥
संसारसागरे मग्नं दीनं त्वं[1] करुणानिधे । कर्मग्राहगृहीताङ्गं मामुद्धर भवार्णवात् ॥ २७ ॥
श्रीमद्भागवतस्यापि ततः पूजा प्रयत्नतः । कर्तव्या विधिना प्रीत्या धूपदीपसमन्विता ॥ २८ ॥
ततस्तु श्रीफलं धृत्वा नमस्कारं समाचरेत् । स्तुतिः प्रसन्नचित्तेन कर्तव्या केवलं तदा ॥ २९ ॥

वक्तुः श्रोतुश्च मुखनियममाह—उदङ्मुख इति । उदीच्याम् उत्तरदिशायां मुखं यस्य स तथा वक्ता वाचको यदा भवेत्, तदा श्रोता प्राङ्मुखः प्राच्यां पूर्वदिशायां मुखं यस्य स तथा स्यात् । च पुनः वक्ता प्राङ्मुखो यदा तदा श्रोता उदङ्मुखः ॥ १८ ॥ प्रकारांतरमाह—अथेति । पूज्यपूजकमध्यतः पूजितुं योग्यः पूज्यो मुख्यः, पूजयतीति पूजको गौणस्तयोर्मध्यतो मध्ये पूर्वदिक् ज्ञेया पूर्वदिशा बोध्या । सा कुत्र, कैः, केषां प्रोक्तेत्यत आह—देशकालादिकोविदैः देशकालादिनिपुणैः, आगमे शास्त्रे, श्रोतृणां प्रोक्ता ॥ १९ ॥ वक्तृलक्षणमाह—विरक्त इति । विरक्तो धनाद्यभिलाषशून्यः । वैष्णवो विष्णुभक्तः । वेदशास्त्रविशुद्धिकृत् वेदानां शास्त्राणां च विशुद्धिं करोतीति तथा अपशब्दनिरासेन । दृष्टांतकुशलः दृष्टांते निपुणः धीरः धैर्यवान्, अतिनिःस्पृहः सर्वथा संग्रहरहितः, विप्रो ब्राह्मणो वक्ता कार्यः कर्त्तव्यः, "वक्तारं ब्राह्मणं कुर्यान्नान्यवर्णजमादरात्" इति पाद्मोक्तेः । विस्पष्टमद्भुतं शांतं स्पष्टाक्षरपदं तथा । कलस्वरसमायुक्तं रसभावसमन्वितम् । ब्राह्मणादिषु सर्वेषु ग्रंथार्थं चार्पयेन्नृप । य एवं वाचयेद्राजन्स विप्रो व्यास उच्यते ।" इत्यपि तत्रैव । यत्तु—"नक्षत्रजीविनं पापं भिषजं शुल्कजीविनम् । तादृक्पौराणिकादींश्च वाङ्मात्रेणापि नार्चयेत् ॥" इति वचनं, तदभक्तलुब्धविषयम् ॥ २० ॥ 'सदोषाः पंडितास्त्याज्याः श्रीभागवतवाचने' इत्याह—अनेकेति । न एके अनेके ते च ते धर्माश्च अनेकधर्मास्तैर्विभ्रांताः चलितबुद्धयः, स्त्रैणाः स्त्रीलंपटाः, पाखंडं शीलं येषां ते तथा । यदि पंडिताः विवेकिनस्तथापि ते शुकशास्त्रकथोच्चारे शुकस्य शास्त्रं श्रीमद्भागवतं तस्य कथोच्चारे कथावाचने त्याज्याः ॥ २१ ॥ वक्तुः पार्श्वे अन्योपि तादृशः स्थाप्य इत्याह—वक्तुर्वाचकस्य पार्श्वे सहायार्थं तथाविधो वक्तृसदृशोन्यो द्वितीयः स्थाप्यः स्थापनीयः । कीदृशस्तत्राह—पंडितो ज्ञानी, संशयच्छेत्ता शीघ्रतरवाचनेन लोकानां यः संदेहः तस्य छेत्ता छेदकः, वक्तुरनवकाशात् । लोकानां बोधनं ज्ञानं तत्र तत्परः परायणः ॥ २२ ॥ वक्तृनियममाह—वक्त्रेति सार्धद्वाभ्याम् । दिनात्प्रारंभदिनात् अर्वाक् पूर्वं वक्ता वाचकेन क्षौरं क्षुरकर्म प्रकर्त्तव्यम् । किमर्थम्—व्रताप्तये व्रतस्य प्राप्त्यर्थम् । असौ वक्ता शौचं मूत्रपुरीषोत्सर्गपूर्वकदंतधावनं निर्वर्त्य कृत्वेति यावत् । अरुणोदयवेलायाम् 'सूरसूतो रुणोनूरुः' इत्यमरोक्तेः अरुणः सूर्यसारथिस्तस्य उदयः सूर्योदयाद्घटिकाद्वयात्पूर्वं तस्मिन् काले स्नानं समाचरेत् कुर्यात् ॥ २३ ॥ नित्यं कर्म संध्याद्यं संक्षेपतः संक्षेपात् कृत्वा संप्रयत्नतः सम्यक्प्रयत्नात् गणनाथं श्रीगणेशं प्रपूजयेत् । किमर्थम्—कथाविघ्नविघाताय कथायां विघ्नाः चंडवाताद्युपद्रवरूपास्तेषां विघाताय विनाशार्थम् ॥ २४ ॥ पितॄन्संतर्प्य पितॄणां तर्पणं कृत्वा शुद्ध्यर्थं शरीरपावनाय प्रायश्चित्तं समाचरेत् । मंडलं च विधेयमित्याह—मंडलमिति । मंडपमध्ये मंडलं च सर्वतोभद्राख्यं प्रकर्त्तव्यम् । तथा तेन प्रकारेण तत्र मंडलमध्ये हरिः स्थाप्यः ॥ २५ ॥ वाचयितृकृत्यमाह—कृष्णमिति द्वाभ्याम् । कृष्णमुद्दिश्य लक्ष्यीकृत्य मंत्रेण तस्यैव मंत्रेण पूजाविधिं क्रमात् चरेत् कुर्यात् । "सहस्रशीर्षा" इति षोडशभिर्वा पूजनम् । तथा प्रदक्षिणानमस्कारानाचरेत् । पूजांते पूजाया अंते स्तुतिम् आचरेत् ॥ २६ ॥ स्तुतिमंत्रमाह—संसारसमुद्रे मग्नं त्रुडितं कर्मग्राहगृहीतांगं कर्माण्येव ग्राहास्तैः गृहीतान्यंगानि यस्य स तथा तं दीनं मां हे करुणानिधे त्वं भवार्णवात् संसाराब्धेः उद्धर पृथक् कुरु, ऊर्ध्वं नयेति वा मोक्षं संपादयेति यावत् ॥ २७ ॥ ततः शास्त्रपूजा कार्येत्याह—श्रीमदिति । ततस्तदनंतरं श्रीमद्भागवतस्य शास्त्रस्यापि प्रयत्नतो विधानतः प्रीत्या भक्तिभावेन धूपेन दीपेन च संयुक्ता पूजा प्रकर्त्तव्या ॥ २८ ॥ ततः किं कर्त्तव्यमित्यत आह—तत इति । ततः पूजानंतरं श्रीफलं धृत्वा समर्प्य नमस्कारं समाचरेत् कुर्यात् । तदा तस्मिन्काले

१. 'माम्' इति पाठान्तरं द्विरुक्तिर्दोषपरिहृता ।

श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि । स्वीकृतोऽसि मया नाथ मुक्त्यर्थं भवसागरे ॥ ३० ॥
मनोरथो मदीयोऽयं सफलः सर्वथा त्वया । निर्विघ्नेनैव कर्तव्यो दासोऽहं तव केशव ॥ ३१ ॥
एवं दीनवचः प्रोक्त्वा वक्तारं चाथ पूजयेत् । संभूष्य वस्त्रभूषाभिः पूजान्ते तं च संस्तुयात् ॥ ३२ ॥
शुकरूप प्रबोधज्ञ सर्वशास्त्रविशारद । एतत्कथाप्रकाशेन मदज्ञानं विनाशय ॥ ३३ ॥
तदग्रे नियमः पश्चात्कर्तव्यः श्रेयसे मुदा । सप्तरात्रं यथाशक्त्या धारणीयः स एव हि ॥ ३४ ॥
वरणं पञ्चविप्राणां कथाभंगनिवृत्तये । कर्तव्यं तैर्हरेर्जाप्यो द्वादशाक्षरविद्यया ॥ ३५ ॥
ब्राह्मणान्वैष्णवांश्चान्यांस्तथा कीर्तनकारिणः । नत्वा संपूज्य दत्ताज्ञः स्वयमासनमाविशेत् ॥ ३६ ॥
लोकवित्तधनागारपुत्रचिन्तां व्युदस्य च । कथाचित्तः शुद्धमतिः स लभेत्फलमुत्तमम् ॥ ३७ ॥
आसूर्योदयमारभ्य सार्धत्रिप्रहरान्तिकम् । वाचनीया कथा सम्यग्धीरकण्ठं सुधीमता ॥ ३८ ॥

प्रसन्नचित्तेन हृष्टेन मनसा केवलं स्तुतिः कर्त्तव्या ॥ २९ ॥ तन्मंत्रमाह—श्रीमदिति द्वाभ्याम् । श्रीमद्भागवतम् आख्या नाम यस्य स तथा अयं ग्रंथः प्रत्यक्षः सांप्रतं मूर्तिमान् कृष्ण एव । हे नाथ मया भवसागरे संसारसमुद्रात् , पञ्चम्यर्थे षष्ठीयम् । मुक्त्यर्थं मुक्तये स्वीकृतोसि ॥ ३० ॥ हे केशव तवाहं दासोस्मि, मदीयो मनोरथः त्वया सर्वप्रकारेण निर्विघ्नेन सुखेनैव सफलः कर्त्तव्यः ॥ ३१ ॥ ततो वक्तृपूजनधनादिदानसंतुष्टिस्तवनं च कार्यमित्याह—एवमिति । एवमुक्तप्रकारेण दीनवचः दीनवत् वचः प्रोक्त्वा प्रोच्य । प्रोच्येत्यपहाय प्रोक्त्वेति पदन्यासो वैदिकत्वसूचनार्थः । तदुक्तम्—"पुराणं मानवो धर्मः सांगो वेदश्चिकीर्षितम् । आज्ञासिद्धानि चत्वारि न हंतव्यानि हेतुभिः ॥" इति । अथानंतरं वक्तारं पूजयेत् । वस्त्रभूषाभिः वस्त्रालंकारादिभिः संभूष्य अलंकृत्य पूजांते तं वक्तारं संस्तुयात् संस्तुवीत ॥ ३२ ॥ तन्मंत्रमाह—शुकेति । हे शुकरूप शुकमूर्ते, हे प्रबोधज्ञ प्रबोधनचतुर, हे सर्वशास्त्रविशारद सर्वशास्त्रनिपुण एतत्कथाप्रकाशेन एषा चासौ कथा च एतत्कथा तस्याः प्रकाशेन उद्दीपनेन मदज्ञानं मम अज्ञानं विनाशय । अन्यत्र वक्ता हरिरेवेत्युक्तम् । तद्रूपेण स्तुतिवाक्यं सूतसंहितायाम् । तथाहि—"पुराणसंहितावक्ता हरिरित्यभिधीयते । यो वदेत्सततं भक्त्या पुराणानि द्विजोत्तमः । आत्मार्थं वा परार्थं वा स हरिर्नात्र संशयः ॥ पुराणश्रवणे भक्तिर्गंगास्नानसमा स्मृता । तद्वक्तरि च या भक्तिः सा प्रयागोपमा स्मृता ॥" इति ॥ ३३ ॥ वक्तुरग्रे नियमः कर्त्तव्य इत्याह—तदिति । पश्चात् तदनन्तरं तदग्रे तस्य वक्तुरग्रे पुरतः मुदा हर्षेण श्रेयसे कल्याणार्थं नियमः कर्त्तव्यः । स एव नियमः सप्तरात्रं यावत् यथाशक्त्या शक्त्यनुसारेण धारणीयः धार्यः ॥ एव हीति गृहीतनियमस्य मध्येऽहेयतां सूचयतः ॥ ३४ ॥ ब्राह्मणवरणमपि कार्यमित्याह—वरणमिति । पंचविप्राणां वरणं कर्त्तव्यम् । किमर्थम्—कथाभंगनिवृत्तये कथाया भंगो रोगाद्युपद्रवजन्यो नाशस्तस्य निवृत्तये निरासाय । तैः किं कार्यं तदाह-तैर्हरेर्जाप्यः । कया—द्वादशाक्षरविद्यया द्वादशाक्षरमंत्रेण । तत्प्रकारो गुरुभिः प्रदर्शितः । यथा—"नमः पूर्वं प्रकर्त्तव्यं पश्चाद्भागवते ननु । ततः श्रीऋषिभिः प्रोक्तं कृष्णचंद्राय स्वत्वतः ॥ एष श्रीकृष्णदेवस्य द्वादशाक्षरसंज्ञकः । मंत्रो जप्यो मया प्रोक्तो विश्वस्योद्धरणे क्षमः ॥ द्वादशाक्षरमंत्रस्य ऋषिः प्रोक्तश्च नारदः । छंदोनुष्टुप् च विज्ञेयं कृष्णो वै देवता स्मृतः ॥ भगवानिति बीजं च शक्तिश्च श्रीरुदाहृता । कीलकं चर्षिभिः प्रोक्तं चंद्रायेति न संशयः ॥ प्राणायामत्रयं कुर्यान्मंत्रेणानेन सर्वदा । अंगन्यासादिकं कुर्याद्ध्यायेच्छ्रीकृष्णमच्युतम् ॥ कृष्णं भास्वत्किरीटांगदवलयकलाकल्पहारोदरांघ्रि श्रोणीभूतं स्ववक्षोमणिमकरमहाकुंडलामंडितास्यम् । हस्तोद्यच्छङ्खचक्रांबुजगदममलं पीतकौशेयवासं विद्युद्भासं समुद्यद्दिनकरसदृशं पद्मसंस्थं नमामि ॥ एवं ध्यात्वा च देवेशं जपेन्मंत्रमुदारधीः ।" इति जपविधिः ॥ ३५ ॥ पूजनपूर्वकमन्यानपि अनुज्ञाप्य श्रोतोपविशतीत्याह—ब्राह्मणानिति । ब्राह्मणान् प्रसिद्धान् वैष्णवान् विष्णुसेवकान् , तथा तेनैव प्रकारेण कीर्त्तनकारिणः हरिचरितगायकानन्यांश्च संपूज्य समर्च्य नत्वा प्रणम्य तैर्दत्ताज्ञः दत्ता आज्ञा यस्मै स तथा स्वयं श्रोता आसनमाविशेत् आसनोपरि तिष्ठेत् ॥ ३६ ॥ फलप्राप्तिहेतुमाह—लोकेति । लोकाः सुहृज्जनाः, वित्तं मणिसुवर्णादिकं, धनं पश्वादिरूपम् , अगारो गृहं, पुत्रो वंशकरस्तेषां चिंता चिंतनं तां व्युदस्य दूरीकृत्य, त्यक्त्वेति यावत् । कथाचित्तः कथायां चित्तं यस्य स तथा, शुद्धमतिः शुद्धा रागाद्यकलुषीकृता पवित्रा वा मतिर्बुद्धिर्यस्य स तथा एवंभूतो यः स्यात् , यत्तदोर्नित्यसंबंधात् स श्रोता उत्तमं फलं लभेत्प्राप्नुयात् ॥ ३७ ॥ कालनियममाह—आसूर्येति । आशब्दस्तारानिवृत्त्यर्थः । सूर्योदयं रवेराविर्भावमारभ्य सार्द्धम् अर्द्धेन सहितं त्रिप्रहरांतकं त्रयाणां प्रहराणामंतकमवसानपर्यंतं कथा सम्यक्प्रकारेण वाचनीया वाच्या । धीरकंठं यथा स्यात्तथा सुधीमता । एकपदे तु धीः स्वरविशेषः कंठे यस्य स तथा, स चासौ सुधीमांश्च तथा तेनैवेति व्याख्यानम् । तदुक्तं वाचनिकायाम्—"उच्चस्वरो विघ्नकरः कथायां दुःखस्य हेतुः पुनरेव वक्तुः । नीचस्वरः श्रोत्रनुरंजने न स्वस्यैव वा मानधनापहारी ॥ धीरस्य पर्यायतया स्वरेण सान्द्रेण प्रोक्ता च कथा

---

१. यथाशक्तीति तु शोभनः पाठः ।

कथाविरामः कर्तव्यो मध्याह्ने घटिकाद्वयम् । तत्कथामनु कार्यं वै कीर्तनं वैष्णवैस्तदा ॥ ३९ ॥
मलमूत्रजयार्थं हि लघ्वाहारः सुखावहः । हविष्यान्नेन कर्तव्यो ह्येकवारं कथार्थिना ॥ ४० ॥
उपोष्य सप्तरात्रं वै शक्तिश्चेच्छृणुयात्तदा । घृतपानं पयःपानं कृत्वा वै शृणुयात्सुखम् ॥ ४१ ॥
फलाहारेण वा श्राव्यमेकभुक्तेन वा पुनः । सुखसाध्यं भवेद्यत्तु कर्तव्यं श्रवणाय तत् ॥ ४२ ॥
भोजनं तु वरं मन्ये कथाश्रवणकारकम् । नोपवासो वरः प्रोक्तः कथाविघ्नकरो यदि ॥ ४३ ॥
सप्ताहव्रतिनां पुंसां नियमाञ्छृणु नारद । विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे ॥ ४४ ॥
ब्रह्मचर्यमधःसुप्तिः पत्रावल्यां च भोजनम् । कथासमाप्तौ भुक्तिं च कुर्यान्नित्यं कथाव्रती ॥ ४५ ॥
द्विदलं मधु तैलं च गरिष्ठान्नं तथैव च । भावदुष्टं पर्युषितं जह्यान्नित्यं कथाव्रती ॥ ४६ ॥
वृंताकं च कलंजं च दग्धमन्नं मसूरिका । निष्पावाद्यामिषं चैव वर्जयेद्यः कथाव्रती ॥ ४७ ॥
पलांडुं लशुनं हिंगुं मूलकं गृंजनं तथा । नालिकामूलकूष्मांडं नैवाद्याद्यः कथाव्रती ॥ ४८ ॥
द्विपाचितं सूतकान्नं भूमिजं लवणं तथा । मत्स्यमांसमजादुग्धं पल्वलोदं च वर्जयेत् ॥ ४९ ॥

सुखाय ।" इति ॥ ३८ ॥ मध्याह्ने मुहूर्त्तं विश्रमणीयमित्याह—कथेति । मध्याह्ने दिनार्द्धे घटिकाद्वयं मुहूर्त्तं यावत्कथाविरामः कथोपरतिर्यदा कर्त्तव्यः तत्कथामनु सा चासौ कथा च तत्कथा तामनु तस्याः पश्चात् तदा तस्मिन्काले वैष्णवैर्भक्तैः कीर्त्तनं हरिलीलागायनं कार्यम् ॥ ३९ ॥ श्रोतॄणां भोजनादिनियममाह—मलेति । मलं विष्ठा 'पुरीषं च मलं विष्ठा' इत्यागमात् । मूत्रं पीतजलपरिणामजं, तयोर्जयार्थं वशीकरणाय लघ्वाहारोऽल्पं भोजनं सुखावहः सुखप्रापकः । कथाम् अर्थितुं शीलं यस्य स तथा तेन श्रोता हविष्यान्नेन तंडुलश्यामाकादिना एकवारं यथा स्यात्तथा आहारः कर्त्तव्यः ॥ ४० ॥ शक्तिविशेषे भुक्तविशेषमाह—उपोष्येति । चेत् यदा शक्तिः स्यात्तदा सप्तरात्रमुपोष्य उपवासं कृत्वा शृणुयात्, घृतस्य पानं कृत्वा, पयसो दुग्धस्य वा पानं कृत्वा सुखं यथा स्यात्तथा शृणुयात् । वै निश्चयेन ॥ ४१ ॥ किंच—फलाहारेण फलभक्षणेन श्राव्यं श्रोतुं योग्यं, पुनरेकभक्तेन सकृद्भोजनेन वा यत्तु भोजनं सुखसाध्यं भवेत् तच्छ्रवणाय श्रवणार्थं कर्त्तव्यम् ॥ ४२ ॥ उपवासद्वारा भुक्तिरित्याह—भोजनमिति । सूतोक्तिरियमिति केचित् । वस्तुतस्तु—सनकाद्यन्यतमोक्तिः, पूर्वोक्तव्यवस्थायां प्रवचन एकस्यैवाधिकारात् । यतः कथाश्रवणकारकं कथायाः श्रवणं कथाश्रवणं तस्य कारकं कारणमतो भोजनमेव वरं श्रेष्ठमहं मन्ये । यदि कथाविघ्नकरः कथायां विघ्नहेतुस्तदोपवासो वरः श्रेष्ठो न प्रोक्तः ॥ ४३ ॥ सप्ताहव्रतिनां नियमानाह—सप्ताहेति द्वाभ्याम् । हे नारद सप्ताहं व्रतमस्ति येषामिति सप्ताहव्रतिनस्तेषां पुंसां नियमान् शृणु । विष्णोर्या दीक्षा तया विहीना रहिता विष्णुदीक्षाविहीनास्तेषां कथाश्रवे कथायाः श्रवणे नाधिकारः अधिकारो नास्ति ॥ ४४ ॥ कथाव्रती पुमान् ब्रह्मचर्यं स्त्रीसंसर्गानाचरणम् अधःसुप्तिं भूमौ शय्यां च पुनः पत्रावल्यां भोजनम् । तत्रापि तुशब्दो विशेषं सूचयति ॥ ४५ ॥ वर्जनीयान्याह—द्विदलमिति सप्तभिः । द्विदलं चणकादि । तदुक्तम्—"माषमुद्गमसूराश्च चणकाश्च कुलित्थकाः । निष्पावा राजमाषाश्च आढक्यो द्विदलं स्मृतम् ॥" । अन्यच्च—"नूतनान्यपि जीर्णानि सर्वाण्येतानि वर्जयेत्" इति स्कांदे । अन्यच्च—"शिलायां भिद्यमानस्य द्विदलं जायते यदि । तदेव द्विदलं धान्यं व्रतादौ च विवर्जयेत् ॥" इति । मधु क्षौद्रं, तैलं तिलादीनाम्, गरिष्ठान्नं तैलगुडमिश्रितमन्नम् । भावदुष्टं मनसा दूषितम्, पर्युषितं पूर्वेद्युः पाचितं कथाव्रती नित्यं जह्यात् त्यजेत् ॥ ४६ ॥ वृंताकम् "वार्त्ताकी हिंगुली सिंही भंटाकी दुष्प्रधर्षिणी" इति कोशोक्तं ( भांटा ) इति प्रसिद्धम् । कलंजं लंबायमानफलविशेष इति केचित् —"विषलिप्तेन बाणेन यौ हतौ मृगपक्षिणौ । तौ कलंजाविति ख्यातौ तद्भक्षे चैंदवं व्रतम् ॥" इति गुरवः । दग्धमन्नमग्निना ज्वलितमन्नम्, मसूरिका प्रसिद्धा । निष्पावः—"निष्पावः शूकशिंबिः स्याद्बलकः श्वेतशिंबिकः" इति भावप्रकाशोक्तः । भाषायाम् 'शाम्मचुला', तदादि । आमिषं मांसं चेति । शेषं पूर्ववत् ॥ ४७ ॥ 'पलांडुस्तु सुकंदकः' इत्यमरोक्तः । लशुनम्—"लशुनस्तु रसोनः स्यादुग्रगंधो महौषधम्" इति भावप्रकाशे हिंगु रामठम् । मूलकम्—"मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम् । शालामर्कटकं विस्रं शालेयं मरुसंभवं ॥ चाणक्यमूलकं तीक्ष्णं तथा मूलकपोतिका । नैपालमूलकं चान्यद्भवेत्कुंजरदंतवत् ॥" इति । तत्रैव—"मंगल्यश्च मसूरः स्यान्मंगल्या च मसूरिका" इति । गृंजनम्—"गाजरं गृंजनं प्रोक्तं तथा नागिवर्णकम्" इति । तथा नलिका—"नालिका कालशाकं च श्राद्धशाकं च कालकम्" इति । मूलं रक्तकंदविशेषः । कूष्मांडः—"कूष्मांडः स्यात्पुष्पफलं पीतपुष्पबृहत्फलम्" तत्र समाहारैकत्वम्, तद्वर्जयेत् ॥ ४८ ॥ द्विवारं पाचितम् । यस्य सूतकं भवेत्तस्यान्नम् । तथा तेनैव प्रकारेण भूमिजं लवणम् । मत्स्यं मांसम् अजायाश्छाग्या दुग्धम् च पुनः पल्वलोऽल्पजलाशयस्तस्य उदकं वर्जयेत् । "तद्भक्षणे तु दोषः स्याद् ब्रह्महत्या न स्मरेद्धरिम् । पटोले तु न बुद्धिः

कामं क्रोधं मदं मानं मत्सरं लोभमेव च। दम्भं मोहं तथा द्वेषं दूरयेच्च कथाव्रती ॥ ५० ॥
वेदवैष्णवविप्राणां गुरुगोव्रतिनां तथा। स्त्रीराजमहतां निन्दां वर्जयेद्यः कथाव्रती ॥ ५१ ॥
रजस्वलान्त्यजम्लेच्छपतितव्रात्यकैस्तथा। द्विजद्विड्वेदबाह्यैश्च न वदेद्यः कथाव्रती ॥ ५२ ॥
सत्यं शौचं दयां मौनमार्जवं विनयं तथा। उदारमानसं तद्वदेवं कुर्यात्कथाव्रती ॥ ५३ ॥
दरिद्रश्च क्षयी रोगी निर्भाग्यः पापकर्मवान्। अनपत्यो मोक्षकामः शृणुयाच्च कथामिमाम् ॥ ५४ ॥
अपुष्पा काकवन्ध्या च वन्ध्या या च मृतार्भका। स्रवद्गर्भा च या नारी तया श्राव्या प्रयत्नतः ॥ ५५ ॥
एतेन विधिना श्रावे तदक्षय्यतरं भवेत्। अत्युत्तमा कथा दिव्या कोटियज्ञफलप्रदा ॥ ५६ ॥
एवं कृत्वा व्रतविधिमुद्यापनमथाचरेत्। जन्माष्टमीव्रतमिव कर्तव्यं फलकाङ्क्षिभिः ॥ ५७ ॥
अकिंचनेषु भक्तेषु प्रायो नोद्यापनाग्रहः। श्रवणेनैव पूतास्ते निष्कामा वैष्णवा यतः ॥ ५८ ॥
एवं नगाहयज्ञेऽस्मिन्समाप्ते श्रोतृभिस्तदा। पुस्तकस्य च वक्तुश्च पूजा कार्यातिभक्तितः ॥ ५९ ॥
प्रसादतुलसीमालाः श्रोतृभ्यश्चाथ दीयताम्। मृदङ्गतालललितं कर्तव्यं कीर्तनं ततः ॥ ६० ॥

स्याद् बलहानिश्च मूलके॥ कलंकी जायते बिल्वे तिर्यग्योनिश्च निंबके। कांस्ये शरीरनाशः स्यान्नालिकायां तु मूर्खता। तुंबी गोमांसतुल्या स्याद्गोवधः स्यात्कलिंजके। शिंबिः पापकरा प्रोक्ता पूतिका ब्रह्मघातिका। वृंताके सुतनाशः स्याच्चिररोगी तु मांसके॥" इति। अनुक्तानां चशब्देन ग्रहणात्तदनुक्तिर्न दोषायेति ॥ ४९ ॥ काममभिलाषम्। क्रोधं रजोगुणेन मनःक्षोभम्, इष्टविघातजं वा। मदं गर्वम्। मानमहंकारम्, सर्वोत्तमत्वं वा। मत्सरं परोत्कर्षासहनम्। लोभं बहुधनापेक्षत्वम्। दंभं लोकानुरंजनाय कर्मानुष्ठानम्। तथा तेनैव प्रकारेण मोहं ममतारूपम्। च पुनः कथाव्रती द्वेषं विरोधं दूरयेत् त्यजेत्। एव चेति–स्पष्टमित्यर्थः ॥ ५० ॥ वेदवैष्णवविप्राणां वेदा ऋगाद्याः, वैष्णवा नारदाद्या भक्ताः, विप्रा ब्राह्मणास्तेषाम्। तथा गुरुगोव्रतिनां गुरुर्हितोपदेष्टा, गौः प्रसिद्धा, तयोर्व्रतमस्त्येषामिति तथा तेषाम्। स्त्रीराजमहतां स्त्री पतिव्रता नारी, राजा देशपतिः, महान् पूज्यः योगतपःप्रभावतोऽर्चनीयस्तेषां निंदां यः कथाव्रती स वर्जयेत् ॥ ५१ ॥ रजस्वलां रजोयुक्तां स्त्रीं त्यजेत्. तथा म्लेच्छपतितव्रातकैः म्लेच्छा चांडालादयः, पतिता गोब्रह्मघ्नादयः व्रातकाः संस्कारहीनास्तैः सह, द्विजद्विट् ब्राह्मणद्वेषी, वेदबाह्या जैना लौकायतिका वा नास्तिकास्तैः सार्द्धमपि यः कथाव्रती स न वदेत् संभाषणं न कुर्यात् ॥ ५२ ॥ पुनर्नियमानाह–सत्यमिति। कथाव्रती सत्यं कुर्यात् धातोरनेकार्थत्वात् वदेत्। शौचं शुद्धिम्। दयां दीनेषु। मौनं मितभाषणम्। आर्जवम् ऋजोर्भावं सरलताम्। तथा विनयं नम्रताम्। तद्वत्तथैव उदारमानसं चित्तमुदारं कुर्यात्। एवमिति शुभगुणग्रहणं सूचयति ॥ ५० ॥ यैरवश्यं कथा श्रोतव्या तान्निर्दिशति–दरिद्रो मंदभाग्यः। च पुनः क्षयी क्षयरोगी। निर्भाग्यः भाग्यहीनः पापकर्मवान् पापिष्ठः। अनपत्यः संतानहीनः। मोक्षकामः मोक्षार्थी च इमां कथां शृणुयात् ॥ ५४ ॥ याभिः स्त्रीभिः श्रोतव्या ता आह–अपुष्पेति। अपुष्पा अरजस्का। काकवंध्या सकृत्प्रसूता। च पुनः वंध्या सामान्यपुत्राभाववती। या च मृतार्भका मृताऽपत्या। च पुनः स्रवद्गर्भा गलितगर्भा या नारी स्त्री तया प्रयत्नतोऽतियत्नात् श्राव्या श्रोतुं योग्या। इयं कथेति शेषः ॥ ५५ ॥ विधानतः श्रावे फलं स्यादित्याह–एतेनेति। एतेनोक्तेन विधिना श्रावे श्रवणे कृते सति तच्छ्रवणमक्षय्यतरम् अनंतं भवेत्। इयं कथा दिव्या ईश्वरप्रणीतत्वादत्युत्तमा सर्वतीर्थयज्ञादेः श्रेष्ठा। तत्र हेतुः–कोटियज्ञफलप्रदा कोटियज्ञानां फलं प्रददातीति तथा ॥ ५६ ॥ उद्यापनमंतरा संपादितव्रतस्य फलमपूर्णमतस्तदुद्यापनं कर्त्तव्यमित्याह–एवमिति। एवममुना प्रकारेण व्रतविधिं व्रतस्य विधानमादौ कृत्वाऽथानंतरं पश्चादुद्यापनमाचरेत्कुर्यात्। किमिव–जन्माष्टमीव्रतमिव फलेप्सुभिः कर्त्तव्यम् ॥ ५७ ॥ गृहस्थविषयोऽयं विधिः, न तु विरक्तविषय इत्याह–अकिंचनेष्विति। न किंचन वस्तुमात्रं येषां तेऽकिंचनास्तेषु निष्परिग्रहेषु भक्तेषु हरिजनेषु उद्यापनस्याऽग्रहः प्रायो बाहुल्येन नास्ति। तत्र हेतुः–यतो वैष्णवा निष्कामास्ततस्ते श्रवणेनैव पूताः शुद्धाः ॥ ५८ ॥ समाप्तौ कर्त्तव्यमाह–एवमिति। एवमित्थम् अस्मिन्नगाहयज्ञे सप्ताहयज्ञे समाप्ते पूर्णे सति तदा श्रोतृभिः पुस्तकस्य शास्त्रस्य वक्तुर्वाचकस्य च अतिप्रेम्णा पूजा कार्या। तदुक्तं पाद्मे–"समाप्तेषु पुराणेषु शक्त्या तं तर्पयेन्नृप। वाचकः पूजितो येन प्रसन्नास्तस्य देवताः॥ गोभूहिरण्यरजतं वासांसि विविधानि च। दीयते वाचकायैव यदीच्छेत्सफलं श्रुतम्। वाचके पूजिते चैव विष्णुर्भवति पूजितः। नारायणादिदेवाश्च वाचके निवसंति वै। यो व्यासरूपी कृष्णाग्रे कथां वै वाचयेत् सुधीः॥ सर्वसौख्यमिह प्राप्य सोंते विष्णुपुरीं व्रजेत्। दर्शनात्पूजनात्स्पर्शान्नमस्कारात्स्तवादपि॥ अश्वमेधसहस्रस्य फलं तेषां न दुर्लभम्। तस्मिन्नित्यं पूजिते हि हरिः पूज्यो हि वाचके। श्राद्धे यस्य द्विजो भुंक्ते वाचकः श्रद्धयार्चितः॥ भवंति पितरस्तस्य तृप्ता वर्षशतं नृप।" इति ॥ ५९ ॥ ततः कर्त्तव्यमाह–प्रसादेति द्वाभ्याम्। प्रसादो मोदकादिः। तुलसी प्रसिद्धा। माला पुष्पादिस्रक् एताः श्रोतृभ्योऽथ दीयतां दीयन्तामित्यर्थः। ततस्तदनंतरं

जयशब्दान्नमःशब्दाञ्छङ्खशब्दांश्च कारयेत् । विप्रेभ्यो याचकेभ्यश्च वित्तमन्नं च दीयताम् ॥ ६१ ॥
विरक्तश्चेद्भवेच्छ्रोता गीता वाच्या परेऽहनि । गृहस्थश्चेत्तदा होमः कर्तव्यः कर्मशान्तये ॥ ६२ ॥
प्रतिश्लोकं च जुहुयाद्विधिना दशमस्य च । पायसं मधु सर्पिश्च तिलान्नादिकसंयुतम् ॥ ६३ ॥
अथवा हवनं कुर्याद्गायत्र्या सुसमाहितः । तन्मयत्वात्पुराणस्य परमस्य च तत्त्वतः ॥ ६४ ॥
होमाशक्तौ बुधो हौम्यं दद्यात्तत्फलसिद्धये । नानाछिद्रनिरोधार्थं न्यूनताधिकताख्ययोः ॥ ६५ ॥
दोषयोः प्रशमार्थं च पठेन्नामसहस्रकम् । तेन स्यात्सफलं सर्वं नास्त्यस्मादधिकं यतः ॥ ६६ ॥
द्वादश ब्राह्मणान्पश्चाद्भोजयेन्मधुपायसैः । दद्यात्सुवर्णं धेनुं च व्रतपूर्णत्वहेतवे ॥ ६७ ॥
शक्तौ पलत्रयमितं स्वर्णसिंहं विधाय च । तत्रास्य पुस्तकं स्थाप्यं लिखितं ललिताक्षरम् ॥ ६८ ॥
संपूज्यावाहनाद्यैस्तदुपचारैः सदक्षिणम् । वस्त्रभूषणगन्धाद्यैः पूजिताय यतात्मने ॥ ६९ ॥
आचार्याय सुधीर्दत्त्वा मुक्तः स्याद्भवबन्धनैः । एवं कृते विधाने च सर्वपापनिवारणे ॥ ७० ॥

मृदंगतालललितं मृदंगेन तालेन ललितं मनोहरं कीर्त्तनं कर्त्तव्यम् ॥६०॥ जयशब्दान् जयेति वचनानि । नमःशब्दान् नमस्कारान् । च पुनः शंखशब्दान् शंखनादान् कारयेत् । विप्रेभ्यः च पुनः याचकेभ्यः भिक्षार्थिभ्यः वित्तं धनम् अन्नं च दीयताम् ॥ ६१ ॥ निष्कामसकामपरत्वेन समाप्तौ विशेषमाह—विरक्त इति । चेद्यदि विरक्तः कलत्राद्यसंसर्गी श्रोता भवेत्तदाऽपरेऽहनि गीता वाच्या वाचनीया । गृहस्थश्चेत्तर्हि कर्मशांतये कर्मणः शांत्यर्थं होमः कर्त्तव्यः ॥ ६२ ॥ तद्विधिमाह—प्रतिश्लोकमिति । प्रतिश्लोकं श्लोकं श्लोकं प्रति दशमस्य स्कंधस्य विधिना विधानतो जुहुयात् । विधानं तंत्र उक्तम् । यथा—"ब्रह्मस्तुतिं समुच्चार्य पूर्वार्द्धहवनं चरेत् । वेदस्तुतिं पठित्वादावुत्तरार्द्धाहुतिं चरेत् ॥ प्रत्यध्यायं समाप्तौ च मंत्राष्टकमुदीरयेत् ।" इति । ॐ विष्णवे नमः । ॐ नारायणाय नमः ॐ ब्रह्मणे नमः । ॐ शिवाय नमः । ॐ वासुदेवाय नमः । ॐ प्रद्युम्नाय नमः । ॐ अनिरुद्धाय नमः । ॐ संकर्षणाय नमः । इत्यष्टाहुतयो देयाः । पायसं पयसि शृतं तंडुलम् । मधु क्षौद्रम् । सर्पिर्गोघृतम् । च पुनः तिलान्नादिकसंयुतं तिलाः कृष्णतिलाः, अन्नं यवादिः आदिना शर्करादिग्रहः, तैः संयुतं जुहुयात् ॥ ६३ ॥ प्रकारांतरमाह—अथवा यद्वा सुसमाहित एकाग्रचित्तः सन् गायत्र्या गायत्रीमंत्रेण हवनं कुर्यात् । तत्र हेतुः—परमस्योत्कृष्टस्य पुराणस्य श्रीमद्भागवताख्यस्य तत्त्वतः तन्मयत्वात् गायत्रीस्वरूपत्वात् ॥ ६४ ॥ अशक्तश्चेत्थं कुर्यादित्याह—होमेति । होमाशक्तौ होमे अशक्तिरसामर्थ्यं तस्यां सत्यां बुधो विवेकी हौम्यं होमाय योग्यं द्रव्यं तत्फलसिद्धये होमफलनिष्पत्त्यर्थं दद्यात् । नानाछिद्राणि नानांतरायाः विघ्नरूपाः तेषां निरोधार्थं निरोधाय न्यूनताधिकताख्ययोः न्यूनता लिखितार्थस्य अपूर्णता, अधिकता मूलवचनप्रसङ्गादधिकान्यप्रसंगकथनं, ते आख्ये ययोरित्युत्तरश्लोकेनान्वेतव्यम् । हौम्यद्रव्याणि आश्वलायनसूत्रभाष्य उक्तानि । यथा—"पयो दधि यवागूश्च सर्पिरोदनतंडुलाः । सोमा मांसं तथा तैलमापो हौम्यं प्रकीर्त्तितम् ॥" इति । "कलौ निषेधान्मांसस्य तत्र देयं तु तद्विधम् । लवणं पयसा युक्तं मांसमित्युच्यते बुधैः ॥ पृथक् पृथक् तु तद्दद्यान्माहिष्यं माषसंयुतम् ।" इति । वस्तुतस्तु श्लोकोत्तरार्द्धं "तैलमापश्च सोमश्च व्रीहयश्च यवास्तिलाः" इति पाठो युक्तः । हरिनामतः सर्वं संपूर्णं स्यादित्याह—दोषयोरिति । न्यूनताधिकताख्ययोर्दोषयोः प्रशमार्थं निवृत्त्यर्थं च पुनः नामसहस्रकं विष्णोः सहस्रं नामानि पठेत् । तेन नामसहस्रपठनेन सर्वं सफलं स्यात् । अस्मात् हरिनाम्नः अधिकमन्यद्यतो यस्मात्कारणान्नास्ति । तदुक्तम्—"यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतम् ॥" इति वचनात् ॥ ६५–६६ ॥ होमांते ब्राह्मणभोजनं कर्त्तव्यमित्याह—द्वादश इति । पश्चात् होमानंतरं द्वादश रविसंख्याकान्ब्राह्मणान् मधुपायसैः मिष्टान्नादिभिर्भोजयेत् । व्रतपूर्णत्वहेतवे व्रतस्य समाप्त्यर्थं सुवर्णं कांचनं, धेनुं पयस्विनीं, वात्सवत्सां दद्यात् ॥ ६७ ॥ अतिधनाढ्ये श्रीमति च श्रोतरि कर्त्तव्यविशेषमाह—शक्ताविति चतुर्भिः । शक्तौ सामर्थ्ये सति पलत्रयमितम् 'स्वर्णं षोडशमाषकम्' इत्युक्त्या स्वर्णशब्दः षोडशमाषसंख्यावाचकः, 'पलं सुवर्णाश्चत्वारः' इति चतुष्षष्टिमाषात्मकं पलमित्युच्यते । तस्य त्रयं द्विनंदचंद्रमाषात्मकम् (१९२) । तन्मितं तत्प्रमाणं सिंहं सिंहासनं सिंहस्य प्राधान्यात्तन्निर्देशः । तदुक्तम्—"विजयो जयदो जेता रिपुहंता शुभंकरः । दुःस्वहा धर्मदः शांतः सर्वारिष्टविनाशकः ॥ एते वै संनिधौ यस्मात्तव सिंहा महाबलाः । तेन सिंहासनेति त्वं वेदैर्मंत्रैश्च गीयसे । त्वयि स्थितः शिवः शांतस्त्वयि सिंह सुरेश्वरः ॥ त्वयि स्थितो हरिर्देवस्त्वदर्थं तप्यते तपः । नमस्ते सर्वदो भद्र भद्रदो भव भूपतेः । त्रैलोक्यजयसर्वस्व सिंहासन नमोस्तु ते ।" इति । विधाय कृत्वा तत्र तस्मिन सिंहासने अस्य श्रीमद्भागवतस्य ललिताक्षरं यथा स्यात्तथा लिखितं पुस्तकं स्थाप्यम् । 'ललिताक्षरैः' इत्यपि पाठः । एतेन सीसकशिलाक्षरांकितानां दानं परास्तमिति गुरवः ॥ ६८ ॥ आवाहनाद्यैः आवहनमाद्यं मुख्यं प्रधानं येषु ते तथा तैरुपचारैः षोडशभिस्तत्पुस्तकं संपूज्य वस्त्रभूषणगंधाद्यैः पूजिताय अर्चिताय यतात्मने यतो वशीकृत आत्मा मनो येन स तथा तस्मै ॥ ६९ ॥ आचार्याय ब्राह्मणाय सदक्षिणं दक्षिणायुतं दत्त्वा सुधीः सुबुद्धिमान नरो मनुष्यः भवबंधनैः संसारबंधैर्मुक्तः स्यात् । एवंप्रकारेण

फलदं स्यात्पुराणं तु श्रीमद्भागवतं शुभम् । धर्मार्थकाममोक्षाणां साधनं स्यान्न संशयः ॥ ७१ ॥

कुमारा ऊचुः—इति ते कथितं सर्वं किं भूयः श्रोतुमिच्छसि । श्रीमद्भागवतेनैव भुक्तिमुक्ती करे स्थिते ॥ ७२ ॥

सूत उवाच— इत्युक्त्वा ते महात्मानः प्रोचुर्भागवतीं कथाम् । सर्वपापहरां पुण्यां भुक्तिमुक्तिप्रदायिनीम् ॥ ७३ ॥

शृण्वतां सर्वभूतानां सप्ताहं नियतात्मनाम् । यथाविधि ततो देवं तुष्टुवुः पुरुषोत्तमम् ॥ ७४ ॥

तदन्ते ज्ञानवैराग्यभक्तीनां पुष्टता परा । तारुण्यं परमं चाभूत्सर्वभूतमनोहरम् ॥ ७५ ॥

नारदश्च कृतार्थोऽभूत्सिद्धे स्वीये मनोरथे । पुलकीकृतसर्वांगः परमानन्दसंभृतः ॥ ७६ ॥

एवं कथां समाकर्ण्य नारदो भगवत्प्रियः । प्रेमगद्गदया वाचा तानुवाच कृताञ्जलिः ॥ ७७ ॥

नारद उवाच—धन्योऽस्म्यनुगृहीतोस्मि भवद्भिः करुणापरैः । अद्य मे भगवांल्लब्धः सर्वपापहरो हरिः ॥ ७८ ॥

श्रवणं सर्वधर्मेभ्यो वरं मन्ये तपोधनाः । वैकुण्ठस्थो यतः कृष्णः श्रवणाद्यस्य लभ्यते ॥ ७९ ॥

सूत उवाच— एवं ब्रुवति वै तत्र नारदे वैष्णवोत्तमे । परिभ्रमन्समायातः शुको योगेश्वरस्तदा ॥ ८० ॥

तत्रायर्यौ षोडशवार्षिकः सदा व्यासात्मजो ज्ञानमहाब्धिचन्द्रमाः ।
कथावसाने निजलाभपूर्णः प्रेम्णा पठन्भागवतं शनैः शनैः ॥ ८१ ॥

दृष्ट्वा सदस्याः परमोरुतेजसं सद्यः समुत्थाय ददुर्महासनम् ।
प्रीत्या सुरर्षिस्तमपूजयत्सुखं स्थितोऽवदत्संशृणुतामलां गिरम् ॥ ८२ ॥

विधाने कृते सति । कीदृशे-सर्वपापनिवारणे सर्वपापविनाशके । च पूर्तौ ॥ ७० ॥ धर्मार्थकाममोक्षाणां चतुर्वर्गाणां साधनं सिद्धिहेतुकं स्यात्, शुभं मङ्गलरूपं श्रीमद्भागवतं फलदं स्यात्, न संशयः संशयो नास्ति ॥ ७१ ॥ प्रकरणमुपसंहरति—इतीति । इत्येवं ते तुभ्यं सर्वं कथितं, भूयः पुनः किं श्रोतुमिच्छसि । श्रीमद्भागवतेन शास्त्रेण । एव निश्चये । भुक्तिमुक्ती करे हस्ते स्थिते स्तः ॥ ७२ ॥ भोगमोक्षप्रदायिनी कथेयमित्याह्–इतीति । इत्येवमुक्त्वा ते कुमारा महात्मान उदारचित्ताः पूज्या वा सर्वपापहरां सर्वपापहर्त्रीं पुण्यां पुण्यरूपां पुण्यवर्द्धिनीं वा भुक्तिमुक्तिप्रदायिनीं भोगमोक्षप्रदात्रीं भागवतीं कथां प्रोचुः ॥ ७३ ॥ केषामित्याह—शृण्वतामिति । नियतात्मनां नियतः वशीकृत आत्मा मनो यैः ते तथा तेषां सप्ताहं शृण्वतां सर्वभूतानां सर्वप्राणिनामग्रे कथां प्रोचुरिति पूर्वपद्यस्थेनान्वयः । ततस्तदनंतरं यथाविधि विधिमनतिक्रम्य पुरुषोत्तमं देवं श्रीनारायणं तुष्टुवुः ॥७४॥ स्तुत्यंते सपुत्राया भक्तेः परा तुष्टिरभूदित्याह—तदंत इति । तदंते स्तुत्यंते ज्ञानवैराग्यभक्तीनां परा श्रेष्ठा पुष्टता अभूत् । च पुनः सर्वभूतमनोहरं परमम् उत्कृष्टं तारुण्यं तरुणस्य भावोऽभूत् ॥ ७५ ॥ नारदस्य कृतकृत्यता जातेत्याह—नारद इति । नारदश्च कृतार्थः कृतो जातोऽर्थः प्रयोजनं यस्य स तथाऽभूत् । क सति—स्वीये आत्मीये मनोरथे मनईप्सिते सिद्धे सति । अत एव पुलकीकृतसर्वांगः पुलकीकृतानि सरोमांचितानि सर्वाणि अंगानि यस्य स तथा । परमः सर्वोत्तमश्चासौ आनंदश्च परमानन्दस्तेन संभृतः पूर्णः ॥ ७६ ॥ कथां श्रुत्वा नारद आहेत्याह—एवमिति । एवं प्रकारेण कथां समाकर्ण्य श्रुत्वा भगवत्प्रियः भगवतः प्रियः, भगवान् प्रियो यस्येति वा स नारदः कृतांजलिः कृतः अञ्जलिर्येन स तथा प्रेमगद्गदया प्रेम्णा गद्गदरूपया वाचा वाण्या तान्सनकादीन् उवाच ॥ ७७ ॥ नारदः स्वस्याहोभाग्यतां मन्यमानस्तद्गुणवर्णनपूर्वकं श्रीहरेः प्राप्तिमाह—धन्य इति । अहं धन्योऽस्मि महाभाग्योऽस्मि यतः करुणापरैर्दयापरायणैः भवद्भिरनुगृहीतः कृपापात्रीकृतोऽस्मि । अद्य इदानीं सर्वपापहरः हरिर्भगवान् मे मया लब्धः प्राप्तः, इत्यनुग्रहफलं सूचितम् ॥ ७८ ॥ श्रवणश्रैष्ठ्यं निरूपयति—श्रवणमिति । हे तपोधनाः सर्वधर्मेभ्यः श्रवणं वरं श्रेष्ठमहं मन्ये । यतः यस्माद्धेतोः वैकुंठस्थो वैकुंठस्थायी कृष्णो यस्यास्य श्रवणात् लभ्यते प्राप्यते ॥ ७९ ॥ इत्थं नारदस्य वदतः सतः शुकागमनं जातमित्याह–एवमिति । तत्र समाजे वैष्णवोत्तमे नारदे एवं ब्रुवति सति तदा तस्मिन्नवसरे योगेश्वरो महायोगी शुकः शुकदेवः परिभ्रमन्पर्यटन्समायातः ॥ ८० ॥ सिंहासनसमीपं तदागमनं जातमित्याह्—तत्रेति । व्यासपुत्रः, सदा योगमहिम्ना षोडशवार्षिकः षोडशवर्षवयाः ज्ञानमेव महाब्धिर्महोदधिस्तस्मिंश्चंद्रमाः कथावसाने कथांते निजलाभपूर्णः आत्मानंदप्राप्त्या पूर्णः प्रेम्णा प्रेमतः शनैः शनैः मंदं मंदं भागवतं पठन्सन् तत्र कथास्थाने आययौ प्राप्तः ॥ ८१ ॥ निरीक्ष्योत्थिता जनास्तं सत्कृतवंत इत्याह—दृष्ट्वेति । सदस्याः सभ्याः परमोरुतेजसं परमम् अत्युत्कृष्टं उरु महत् तेजो यस्य स तथा तम् आगतं प्राप्तं तं शुकदेवं दृष्ट्वा सद्यस्तत्क्षणमेव समुत्थाय स्वासनेभ्य उत्थानं कृत्वा तस्मै प्रीत्या महासनं सर्वोत्तमासनं ददुः दत्तवंतः । सुरर्षिर्नारदस्तम् अपूजयन् । सुखं यथा स्यात्तथा

श्रीशुक उवाच—निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ८३ ॥
धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥८४॥
श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनं यस्मिन्पारमहंस्यमेवममलं ज्ञानं परं गीयते ।
यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन्प्रपठन्विचारणपरो भक्त्या विमुच्येन्नरः ॥८५॥
स्वर्गे सत्ये च कैलासे वैकुण्ठे नास्त्ययं रसः । अतः पिबत सद्भाग्या मा मा मुञ्चत कर्हिचित् ॥८६॥
सूत उवाच—एवं ब्रुवाणे सति बादरायणौ मध्ये सभाया हरिराविरासीत् ।
प्रह्लादबल्युद्धवफाल्गुनादिभिर्वृतः सुरर्षिस्तमपूजयच्च तान् ॥ ८७ ॥
दृष्ट्वा प्रसन्नं महदासने हरिं ते चक्रिरे कीर्तनमग्रतस्तदा ।
भवो भवान्या कमलासनस्तु तत्रागमत्कीर्तनदर्शनाय ॥ ८८ ॥

स्थितः महासनोपविष्टः शुकः अमलां शुद्धां गिरं वाचं यूयं संशृणुत इत्यवदत् ॥ ८२ ॥ "वेदवृक्षसमुद्भूतं श्रीमद्भागवतं फलम् । शुकमुखाद्गलितं भूमौ पिबंतु रसिका अहो ॥" इत्याह—निगमेति । निगमो वेदः स एव कल्पतरुः कल्पवृक्षस्तस्य फलं श्रीमद्भागवताख्यं रसं रसरूपं हेयांशहीनत्वात् । शुकमुखात् भुवि गलितं पृथिव्यां पतितम् , अमृतद्रवेण संयुतं, पक्षे अमृतस्य मोक्षस्य द्रवः प्रवाहस्तेन संयुतं, लयो मोक्षस्तमभिव्याप्य मुहुः पुनः पुनः यूयं पिबत, हे रसिकाः भावुकाः हे रसविशेषभावनानिपुणाः । अहो इति अलभ्यलाभं सूचयति ॥ ८३ ॥ "कर्मभक्तिज्ञानभेदाद्भेदाः काण्डत्रयात्मकाः । तेभ्यः श्रेष्ठतरा चेयं सुखमोक्षप्रदायिनी ॥" इत्याह-धर्म इति । अत्र श्रीमद्भागवते सतां सज्जनानां निर्मत्सराणां शांतानां परमो धर्मोऽस्ति । कीदृशः–प्रोज्झितकैतवः । प्रकर्षेण उज्झितं त्यक्तं कैतवं कपटं यस्मात्स तथा । 'अत्रपरम' इत्येकपदे अपगता त्रपा लज्जा येषां ते अपत्रपा नास्तिका धूर्त्ता वा तान्नमते आकर्षतीति तथा धातूनामनेकार्थत्वात् । एतेन वेदबाह्यानामपि रुचिकरमिदं शास्त्रमिति कर्मकांडतः श्रेष्ठतोक्ता । अत्र वस्तु उपास्यं परमार्थरूपं तापत्रयोन्मूलनं तापत्रयम् उन्मूलयतीति तथा । अत एव शिवदं कल्याणप्रदमित्युपासनाकांडतोऽप्याधिक्यं सूचितम । वास्तवं पारमार्थिकम् अविनाशि ब्रह्म वेद्यं ज्ञातुं योग्यमिति ज्ञानकांडतः श्रैष्ठ्यमुक्तम् । महामुनिकृते 'वेदव्यासो महामुनिः इति वचनान्महामुनिर्वेदव्यासः तेन कृते अत्र अस्मिञ्छ्रीमद्भागवते शास्त्रे शुश्रूषुभिः श्रोतुमिच्छद्भिः पुरुषैस्तत्क्षणादेव हृदि ईश्वर अवरुध्यते प्राप्यते । कृतिभिः पुण्यजनैः अपरैः शास्त्रैः सद्यः अवरुध्यते किं वा, अर्थान्नावरुध्यत इति कर्तृतोऽप्युत्कर्षः सूचितः ॥ ८४ ॥ पुराणोत्तमस्यैतस्य ज्ञानाद्याश्रयस्य श्रवणादितो मुक्तिर्भवतीत्याह—श्रीमदिति । श्रीमद्भागवतं पुराणतिलकं पुराणानां तिलकं शोभाकरं मुख्यमित्यर्थः । वैष्णवानां यदेव धनमस्ति । यस्मिन् शास्त्रे पारमहंस्यं परमहंसैः प्राप्यं "अहं ब्रह्मास्मि" इति महावाक्येनानुभूतम् अमलं शुद्धं परं ज्ञानं ब्रह्मात्मैक्यरूपं गीयते । यत्र यस्मिन् शास्त्रे ज्ञानविरागभक्तिसहितं नैष्कर्म्यम् ईश्वरार्पणेनांतःकरणशुद्धिद्वारा कर्मादीनां मोक्षसाधनत्वम् आविष्कृतं प्रकटीकृतम् । तच्छास्त्रं भक्त्या शृण्वन् प्रपठन् विचारणपरो भवन् नरो विमुच्यते विवेकेण मुक्तो भवति ॥ ८५ ॥ दुर्लभं रसं पातव्यमेवेत्याह—स्वर्ग इति । अयं कथामृतरसः स्वर्गे नास्ति । च पुनः सत्ये सत्यलोके नास्ति । कैलासे नास्ति । वैकुंठे नास्ति । अतोऽस्मात्कारणात् हे सद्भाग्या यूयं पिबत कर्हिचित् कदापि मा मुंचत मा मुंचत । वीप्सा हेयत्वनिरासार्था ॥ ८६ ॥ इति वदति शुके हरिरागत इत्याह—एवमिति । बादरायणौ बदरीणां समूहो तदयनं स्थानं यस्य स बादरायणो व्यासस्तस्यापत्यं बादरायणिः तस्मिन् बादरायणौ श्रीशुके एवं ब्रुवाणे इत्थं वदति सति सभाया मध्ये प्रह्लादबल्युद्धवफाल्गुनादिभिः प्रह्लादः प्रसिद्धः, बलिर्विरोचनपुत्रः, उद्धवो देवभागसुतः, फाल्गुनोऽर्जुनस्तदादिभिर्भक्तैर्वृतः संयुक्तो हरिः श्रीनारायण आविरासीत् प्रकटोभूत् । सुरर्षिर्नारदस्तं हरिं तान्प्रह्लादादींश्चापूजयत् ॥ ८७ ॥ तुष्टस्य हरेरग्रे कीर्तनं ते चक्रुरित्याह—दृष्ट्वेति । महदासने महासिंहासनोपरि स्थितं प्रसन्नं हरिं दृष्ट्वा तदा ते प्रह्लादादयस्तदग्रतः हरेः पुरतः कीर्त्तनं चक्रिरे "कीर्तनं मुनिभिः प्रोक्तं हरेर्लीलाप्रगायनम्" इति । भवान्या पार्वत्या सह भवो महादेवः तत्रागमत्तस्मिन्स्थान आगतः । कमलासनो ब्रह्मा तु अप्यर्थे । आगमत् । किमर्थम्–कीर्त्तनदर्शनाय कीर्त्तनदर्शनार्थम् ॥ ८८ ॥ कीर्तनेऽधिकारविशेषेण गायकवादकान्निरूपयति—प्रह्लाद इति द्वाभ्याम् । प्रह्लादः तालधारी तालं धर्तुं शीलमस्येति तथा च पुनः तरलगतितया शीघ्रगतित्वेन उद्धवः कांस्यधारी 'कांस्यतालादिकं घनम्' इत्यमरोक्तझल्लर्यादिधारी सुरर्षिः नारदो वीणाधारी । स्वरकुशलतया स्वरे कुशलता नैपुण्यं तया रागकर्त्ताऽर्जुनः, ।

१. आत्माभाव आर्षः, महतामर्समनि वा ।

प्रह्लादस्तालधारी तरलगतितया चोद्धवः कांस्यधारी
वीणाधारी सुरर्षिः स्वरकुशलतया रागकर्ताऽर्जुनोऽभूत् ।
इन्द्रोऽवादीन्मृदंगं जयजयसुकराः कीर्तने ते कुमारा
यत्राग्रे भाववक्ता रसविरचनया व्यासपुत्रो बभूव ।। ८९ ।।

ननर्त मध्ये त्रिकमेव तत्र भक्त्यादिकानां नटवत्सुतेजसाम् ।
अलौकिकं कीर्तनमेतदीक्ष्य हरिः प्रसन्नोऽपि वचोऽब्रवीत्तत् ।। ९० ।।

मत्तो वरं भागवता वृणुध्वं प्रीतः कथाकीर्तनतोऽस्मि सांप्रतम् ।
श्रुत्वेति तद्वाक्यमतिप्रसन्नाः प्रेमार्द्रचित्ता हरिमूचिरे ते ।। ९१ ।।

नगाहगाथासु च सर्वभक्तैरेभिस्त्वया भाव्यमतिप्रयत्नात् ।
मनोरथोऽयं परिपूरणीयस्तथेति चोक्त्वान्तरधीयताच्युतः ।। ९२ ।।

ततोऽनमत्तच्चरणेषु नारदस्तथा शुकादीनपि तापसांश्च ।
अथ प्रहृष्टाः परिनष्टमोहाः सर्वे ययुः पीतकथामृतास्ते ।। ९३ ।।

भक्तिः सुताभ्यां सह रक्षिता सा शास्त्रे स्वकीयेऽपि तदा शुकेन ।
अतो हरिर्भागवतस्य सेवनाच्चित्तं समायाति हि वैष्णवानाम् ।। ९४ ।।

दारिद्र्यदुःखज्वरदाहितानां मायापिशाचीपरिमर्दितानाम् ।
संसारसिन्धौ परिपातितानां क्षेमाय वै भागवतं प्रगर्जति ।। ९५ ।।

अभूदिति क्रिया सर्वत्रान्वेतव्या । इंद्रः मृदंगमवादीत् । यत्र कीर्त्तने जयजयशब्दोच्चारिणः ते कुमाराः सनकाद्या अभूवन् । अग्रे सर्वेषामग्रभागे रसविरचनया रसानां विरचनया विवेचनेन भाववक्ता व्यासपुत्रो बभूव । रसा दशधा । तदुक्तम्—"रौद्रोद्भुतश्च श्रृङ्गारो हास्यं वीरो दया तथा । भयानकश्च बीभत्सः शांतः सप्रेमभक्तिकः ।।" इति ।। ८९ ।। सुतेजसां तारुण्येन सुदीप्तिभाजां भक्त्यादिकानां भक्तिज्ञानवैराग्याणां त्रिकं तत्र तस्मिन्काले मध्ये सभामध्ये नटवत् ननर्त्त । अलौकिकं दिव्यम् एतत् कीर्त्तनमीक्ष्य आर्षमिदम्, ईक्षित्वा प्रसन्नस्तुष्टो हरिरपि तत्तदा वच अब्रवीत् ।। ९० ।। तदाह—मत्त इति । हे भागवता मत्तः सकाशात् यूयं वरं वृणुध्वं स्वीकुरुत । सांप्रतम् अद्य कथाकीर्त्तनतोऽहं प्रीतोस्मि । इत्येवं तद्वाक्यं तस्य हरेर्वचनं श्रुत्वाऽऽकर्ण्य प्रेमार्द्रचित्ताः प्रेम्णा आर्द्रं द्रवीभूतं चित्तं येषां ते तथाऽतिप्रसन्ना अत्यानन्दयुक्ताः ते प्रह्लादाद्या हरिमूचिरे जगदुः ।। ९१ ।। तद्वाक्यमाह—नगाहेति । नगाहगाथासु सप्ताहकथासु एभिः सर्वभक्तैः सहातिप्रयत्नात् अतिप्रयत्नेन त्वया भाव्यं स्थातव्यम् । अयं मे मम मनोरथः भवता पूरणीयः । तथास्तु एवमस्तु इत्युक्त्वाऽच्युतो हरिरंतरधीयत अदृश्योऽभवत् । अत्रान्ते गाथाशब्देन प्रक्रमोपसंहारयोः कथायामेव तात्पर्यमस्ति न तु पाठे सप्ताहे इति सूचितं भवति । तदुक्तम्—"उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् । अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये ।।" इति । प्रक्रमे 'परीक्षिते कथां वक्तुम्' इत्युक्तम् । "वेदोपनिषदां साराज्जाता भागवती कथा । श्रीमद्भागवतान्मुक्तिः सप्ताहे वाचनं कुरु ।।" "धन्या भागवती वार्त्ता प्रेतपीडाविनाशिनी" इत्युपसंहारः । अभ्यासः—"गयाश्राद्धशतेनापि न मे मुक्तिर्भविष्यति" इति प्रसंगे । "कंपंते सर्वपापानि सप्ताहश्रवणे स्थिते । अस्माकं प्रलयं सद्यः कथा चेयं करिष्यति ।।" इत्यपूर्वता । "किं श्रुतैर्बहुभिः शास्त्रैः पुराणैश्च भ्रमावहैः । श्रीमद्भागवतं शास्त्रं मुक्तिदाने प्रगर्जति ।।" इति फलम् । "सर्वेषां पश्यतां भेजे विमानं धुंधुलीसुतः । द्वादशात्मा प्रयागश्च" इत्याद्यर्थवादः । "परीक्षित्साक्षी यच्छ्रवणगतमुक्त्युक्तिकथने" इत्युपपत्तिरिति विरोधपरिहारः । 'नगाहगाथासु च सर्वभक्तैः' इत्युपसंहारश्च तात्पर्यनिर्णये लिंगं हेतुरित्यर्थः ।। ९२ ।। ततः किं वृत्तमित्यत आह—तत इति । हरेरंतर्धानानंतरं तच्चरणेषु तस्य हरेः चरणेषु पादेषु, बहुत्वं छंदोनुरोधात् । नारदः अनमत् प्रणतोऽभूत् । वस्तुतस्तु 'तच्चरणारविंदयोर्ऋषिः' इति पाठः । तथा तेनैव प्रकारेण शुकादींस्तापसांश्चाप्यनमदिति । समाप्तौ मंगलार्थोऽथ शब्दः । पीतकथामृताः पीतं कथाऽमृतं यैस्ते तथा अत एव प्रहृष्टाः प्रसन्नाः परिनष्टमोहाः परिनष्टो सर्वतो नाशं यातो मोहो येषां ते तथा ते शुकाद्याः सर्वे ययुः ।। ९३ ।। "शुकेन ससुता भक्तिः स्वशास्त्रे रक्षिता ध्रुवम्" इत्याह—भक्तिरिति । तदा निर्गमसमये सुताभ्यां ज्ञानवैराग्याभ्यां सह सा प्रसिद्धा भक्तिः स्वकीये शास्त्रे श्रीमद्भागवताख्ये शुकेन रक्षिता स्थापिता । अतोऽस्माद्धेतोः भागवतस्य सेवनात् वैष्णवानां चित्तं मनो हरिः समायाति समागच्छति । हि निश्चयेन ।। ९४ ।। अनाधाराणामाधारभूतमिदं शास्त्रमित्याह—दारिद्र्येति । दरिद्रस्य भावो दारिद्र्यं निर्धनता, दुःखं रोगादिजं, ज्वरस्तापस्तैर्दाहितानां दग्धानां, माया कपटादिरूपा सैव पिशाची

शौनक उवाच—शुकेनोक्तं कदा राज्ञे गोकर्णेन कदा पुनः । सुरर्षये कदा ब्राह्मैश्छिन्धि मे संशयं त्विमम् ॥ ९६ ॥

सूत उवाच—आकृष्णनिर्गमात्त्रिंशद्वर्षाधिकगते कलौ । नवमीतो नभस्ये च कथारम्भं शुकोऽकरोत् ॥ ९७ ॥

परीक्षिच्छ्रवणान्ते च कलौ वर्षशतद्वये । शुद्धे शुचौ नवम्यां च धेनुजोऽकथयत्कथाम् ॥ ९८ ॥

तस्मादपि कलौ प्राप्ते त्रिंशद्वर्षगते सति । ऊचुरूर्जे सिते पक्षे नवम्यां ब्रह्मणः सुताः ॥ ९९ ॥

इत्येतत्ते समाख्यातं यत्पृष्टोऽहं त्वयाऽनघ । कलौ भागवती वार्ता भवरोगविनाशिनी ॥ १०० ॥

कृष्णप्रियं सकलकल्मलनाशनं च मुक्त्यैकहेतुमिह भक्तिविलासकारि ।
सन्तः कथानकमिदं पिबतादरेण लोके हितार्थपरिशीलनसेवया किम् ॥ १०१ ॥

स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले ।
परिहर भगवत्कथासु मत्तान्प्रभुरहमन्यनृणां न वैष्णवानाम् ॥ १०२ ॥

असारे संसारे विषयविषसंगाकुलधियः क्षणार्धं क्षेमार्थं पिबत शुकगाथाऽतुलसुधाम् ।
किमर्थं व्यर्थं भो व्रजत कुपथे कुत्सितकथे परीक्षित्साक्षी यच्छ्रवणगतमुक्त्येककथने ॥ १०३ ॥

रसप्रवाहसंस्थेन श्रीशुकेनेरिता कथा । कण्ठे संबध्यते येन स वैकुण्ठप्रभुर्भवेत् ॥ १०४ ॥

तया परिमर्दितानां व्याकुलानाम् "मायाया द्वादशार्था वै पुराणे आत्मपूर्वके। द्रष्टव्या अथ संग्राह्या विबुधैश्च प्रयत्नतः ॥" संसारसिंधौ संसारसागरे परिपातितानां प्रारब्धकर्मभिः निमग्नानां क्षेमाय कल्याणार्थं वै निश्चयेन भागवतं प्रगर्जति उच्चैस्तरां शब्दायते ॥ ९५ ॥ "कस्मिन्कस्मिंस्तु काले वै नृपादिभ्यः शुकादिभिः। प्रोक्तं भागवतं सूतं परिपृच्छति शौनकः।" इत्याह शुकेनेति। राज्ञे परीक्षिते शुकेन भागवतं कदा प्रोक्तम्, सुरर्षये नारदाय ब्राह्मैः सनकादिभिः कदा उक्तम्, इमं मे मम संशयं संदेहं त्वं छिंधि अपाकुरु ॥ ९६ ॥ सूत उत्तरयति—आकृष्णेति त्रिभिः। आकृष्णनिर्गमात् कृष्णस्य स्वधामगमनं मर्यादीकृत्य त्रिंशद्वर्षाधिकगते त्रिंशद्वर्षेभ्यः अधिकं कालं गतः तथाभूते कलौ सति नभस्ये भाद्रपदे मासे नवमीतः कथारंभं शुकः अकरोत्कृतवान् ॥९७॥ परीक्षिच्छ्रवणान्ते परीक्षिच्छ्रवणांतात्। पंचम्यर्थे सप्तमीयम्। तथा पाठ एव इति गुरवः, च पुनः वर्षशतद्वये वर्षाणां शतं वर्षशतं तस्य द्वयं यस्मिन्स तथा तस्मिन्कलौ गते सति शुचौ आषाढमासे शुद्धे शुक्लपक्षे नवम्यां च तिथौ धेनुजो गोकर्णः कथामकथयत् ॥ ९८ ॥ तस्मादपि कालात् त्रिंशद्वर्षगते त्रिंशद्वर्षाणि गतानि यस्मिन्स तथा तस्मिन् एवंभूते कलौ प्राप्ते सति ऊर्जे कार्त्तिकमासे शुक्ले पक्षे नवम्यां तिथौ ब्रह्मणः सुताः सनकाद्या ऊचुः ॥ ९९ ॥ प्रकरणं समाप्तमित्याह—इतीति। हे अनघ तत्त्वयाऽहं पृष्टः एतदित्येवं ते तुभ्यं समाख्यातं कथितम्। कलौ युगे भागवती भागवतसंबंधिनी वार्त्ता कथा भवरोगविनाशिनी संसाररोगहंत्री ॥ १०० ॥ सद्भिरिदं पेयमित्याह—कृष्णेति। कृष्णप्रियं कृष्णस्याभीष्टं सकलकश्मलनाशनं सकलपापविनाशनं च पुनः मुक्त्येकहेतुं मुक्तेरेककारणम् इह लोके भक्तिविलासकारि भक्तेर्विलासं क्रीडारूपं कर्त्तुं शीलमस्येति तथा तत् इदं कथानकं हे संतः आदरेण यूयं पिबत पानं कुरुत। लोके जगति हितार्थपरिशीलनसेवया हिता वांछितश्चासौ अर्थश्च हितार्थः तस्य परिशीलनं चिंतनं तस्य सेवया किं, न किमपि ॥ १०१ ॥ वैष्णवेभ्यो यमोपि बिभेतीत्याह—स्वपुरुषमिति। पाशहस्तं पाशो हस्ते करे यस्य स तथा तं स्वपुरुषं स्वदूतं वीक्ष्य दृष्ट्वा यस्य दूतस्य कर्णमूले यमः वदति—भगवत्कथासु मत्तान्प्रमादिनः त्वं परिहर मा आनय, अन्यनृणां हरिविमुखानां नृणामहं प्रभुः स्वाम्यस्मि। किल निश्चयेन वैष्णवानां प्रभुः दंडकर्त्ता न, अप्येव तेषां ममापि पूज्यत्वात् ॥ १०२ ॥ असारे सारभूतं यमित्याह—असार इति। असारे साररहिते संसारे विषयविषसंगाकुलधियः विषयाः शब्दादयः "रूपं शब्दो गंधरसस्पर्शाश्च विषया अमी" इत्यमरोक्तेः। त एव विषं तस्य संगस्तेन आकुला व्याप्ता धीर्बुद्धिर्येषां ते तथा क्षणार्द्धम् अर्द्धक्षणमपि शुकगाथातुलसुधां शुकस्य गाथा श्रीमद्भागवती कथा सा एव अतुलसुधा अनुपमाऽमृतरूपा तां क्षेमार्थं कल्याणार्थं यूयं पिबत। कुत्सितकथे कुत्सिता निंदिता कथा यस्मिन्स तथा तस्मिन् कुपथे कुत्सितः पंथा मार्गः कुपथस्तस्मिन्कुमार्गे व्यर्थं निष्फलं यथा स्यात्तथा किमर्थं कस्मै प्रयोजनाय यूयं व्रजत गच्छत। यद्यतः श्रवणगतमुक्त्येककथने श्रवणाद्गता प्राप्ता मुक्तिस्तस्या एककथने मुख्यप्रवचने 'एके मुख्यान्यकेवलाः' इत्यमरोक्तेः। परीक्षित्साक्षी भवति। 'श्रवणगतमुक्त्युक्तिकथने' इति पाठे मुक्तिश्च भुक्तिश्च इति मुक्त्युक्ती। 'वर्णस्य वर्णयोर्लोपः' इति शिक्षायां शौनकोक्तभंलापात् श्रवणगतमुक्त्युक्ती तयोः कथने इति केचित्। तत्र दोषः, श्रवणादेः परीक्षितो मुक्तिः, भागानुक्तेरसंभवं, चिन्त्यभागानामपि लाभाद्। गुरवस्तु विशेष्यवाचकपदानां सति विशेषणपदसंनिधाने विशेष्यमात्रपरत्वमिति युक्त्या श्रवणगतमुक्तिकथने इत्ययमर्थो युक्त इत्याहुः ॥ १०३ ॥ "कथा कंठस्थिता चेयं वैकुंठपतिरेव सः" इत्याह—रसेति।

इति च परमगुह्यं सर्वसिद्धान्तसिद्धं सपदि निगदितं ते शास्त्रपुंजं विलोक्य ।
जगति शुककथातो निर्मलं नास्ति किञ्चित्पिब परसुखहेतोर्द्वादशस्कंधसारम् ॥ १०५ ॥
एतां यो नियततया शृणोति भक्त्या यश्चैनां कथयति शुद्धवैष्णवाग्रे ।
तौ सम्यग्विधिकरणात्फलं लभेते याथार्थ्यान्न हि भुवने किमप्यसाध्यम् ॥ १०६ ॥

इति श्रीपद्मपुराण उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये श्रवणविधिकथनं नाम षष्ठोऽध्यायः ॥ ६ ॥
श्रीकृष्णार्पणमस्तु ॥ समाप्तमिदं श्रीमद्भागवतमाहात्म्यम् ॥

रसप्रवाहसंस्थेन रसः प्रेमरूपः शांतरूपो वा तस्य प्रवाहस्तस्मिन् संतिष्ठते इति तथा स तेन श्रीशुकेन ईरिता कथिता कथा येन पुंसा कंठे संबध्यते धार्यते स पुमान् वैकुंठप्रभुः वैकुंठस्वामी स्यात् ॥ १०४ ॥ परं रहस्यं नान्यदस्तीत्याह—इतीति । इति च इदमेव परमं गुह्यम् उत्कृष्टं गोप्यं रहस्यं सर्वसिद्धांतसिद्धं सर्वेषु सिद्धांतेषु सिद्धं प्रसिद्धं सपदि शीघ्रं शास्त्रपुंजं शास्त्रसंघं विलोक्य दृष्ट्वा ते तुभ्यं मया निगदितमुक्तम् । जगति संसारे शुककथातः श्रीमद्भागवतकथातो निर्मलं शुद्धिकरं किंचिदन्यन्नास्ति । परसुखहेतोः परं सुखं मोक्षाख्यं तस्य हेतोर्द्वादशस्कन्धसारं द्वादश स्कन्धा एव सारः, द्वादशस्कन्धेषु वा सारः सारांशस्तं त्वं पिबेति सूतोक्तिः ॥ १०५ ॥ श्रोतृवक्त्रोः कृतकृत्यतामाह—एतां कथां नियततया नियमेन भक्त्या यः शृणोति, एतां कथां शुद्धवैष्णवाग्रे यश्च कथयति तौ द्वौ सम्यक् विधिकरणाद्विधानकरणेन सम्यक् फलं लभेते प्राप्नुयाताम् । याथार्थ्यात् वास्तवार्थत्वात् भुवने 'विष्टपं भुवनं जगत्" इति कोशात् । जगति असाध्यं किमु, अपि तु न किमपि ॥ १०६ ॥

रामपूर्वप्रतापेन ऋजुटीका कृता त्वियम् । राधाकृष्णमुदे भूयाज्जयपत्तनवासिना ॥ १ ॥

इति श्रीशेखावाटयंतर्गतविजयपुरनिवासिव्राजलालिपण्डितरामप्रतापशर्मविरचितायां
श्रीमद्भागवतमाहात्म्यटीकायामृजुनाम्न्यां षष्ठोऽध्यायः ॥ ६ ॥

गजाब्धिगोभूसंख्याते वैक्रमीये सुवत्सरे । बाहुले शुद्धपंचम्यां टीकेयं पूर्णतामगात् ॥ १ ॥
पठन्तु बालकाः सर्वे विवदन्तां विवादिनः । मनीषिणः शोधयन्तु दुष्टा नश्यन्तु मत्सरात् ॥ २ ॥
यथामति कृता चेयं दृश्यतां शुद्धभावतः । परिशोध्या बुधैः प्रेम्णा श्रमचिन्ताविचारतः ॥ ३ ॥

"अथ वैष्णवचित्तेषु दृष्ट्वा भक्तिमलौकिकीम्" इत्यारभ्य "धावन्तोऽप्याययुः सर्वे प्रथमं ये च वैष्णवाः" "विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे" इति च मध्ये "यश्चैनां कथयति शुद्धवैष्णवाग्रे" इत्यन्ते चोक्तत्वाद्वैष्णवानां श्रेष्ठत्वमुक्तम्, तेषां च शालग्रामपूजनं तुलसीमञ्जर्यार्पणं गोपीचन्दनधारणं च मुख्यो धर्मोऽस्ति, तदर्थं तेषां निरूपणं पुरश्चरणविधिश्च । तथाहि पाद्मे—"मस्तके धारणं कार्यं कर्णयोश्च तथैव च । कंठदेशे च विपुलं बाह्वोश्च मणिबन्धके ॥ तुलसीमञ्जरीश्चैव पञ्चांगे धारयेन्नरः । आजन्मपातकं धूय विष्णुलोके स गच्छति ॥ "गोपीचन्दनमाहात्म्ये इतिहासः पुरातनः । कांबोजसंज्ञिते देशे वैश्योभूद्वैष्णवोत्तमः ॥ सुशीलो विष्णुभक्तश्च कामक्रोधविवर्जितः । तस्य द्वार्य्येकदा मार्गी ह्यावेश्म संस्थितो बहिः ॥ न ज्ञातो वैष्णवेनैव रात्रौ सुप्तोऽभवद् द्विजः । निद्रायुक्तस्तु पांथः सोप्यहिना दंशितो भृशम् ॥ मृतमात्रस्य तस्यैव मूषकः स्पर्शतां गतः । क्षुधया पीड्यमानोपि कृत्वा सुविवरं महत् ॥ गोपीचन्दनार्द्रमुखो तद्देहं संस्पृशन्खलु । गोपीचन्दनसंयोगाद्गतोऽसौ विष्णुमन्दिरम् । अत एव मनुष्यैस्तु कर्त्तव्यं तिलकं शुभम् । गायत्र्याः पुरश्चरणे यत्फलं प्राप्यते द्विजैः ॥ तत्फलं प्राप्यते विप्र श्लोकार्द्धश्रवणेन वै ॥ अश्रुत्वा भगवद्वार्त्तां यो भुंजीत गृहेषु वा । अन्नं पीयेत पानं वा पापभुक् सोऽधमो मतः ॥ तदन्नं पापरूपं च तज्जलं मदिरासमम् । अत एव मनुष्यैस्तु विष्णुधर्मपरायणैः । श्रोतव्यं च प्रयत्नेन नित्यं भागवतं शुभम् । ब्राह्मणानां यथा संध्या वैष्णवानां तथा द्विजाः ॥ श्रीमद्भागवतं शास्त्रं सत्यं सत्यं वदामि ते । अष्टोत्तरशतं चास्य कार्यं पारायणं शुभम् । केदारे उदकं पीत्वा पुनर्जन्म न विद्यते ॥ नरस्यैव तथा तस्य पुनर्जन्म न विद्यते । स एव वैष्णवो धन्यः पारायणशताधिकृत् । श्रीभागवतमन्त्रस्य ऋषिः प्रोक्तश्च नारदः ॥ ब्रह्म बीजं तथा प्रोक्तं छंदश्च बृहती स्मृतम् । गुणातीतोऽव्ययश्चैव श्रीकृष्णो देवता स्मृतः ॥ भवरोगहारिणी चैव भक्तिः शक्तिरिहोच्यते । ज्ञानं तथा च वैराग्यं कीलकं वै तथा स्मृतम् ॥ इदं मन्त्रार्थविधिवज्जाप्यं मन्त्रफलप्रदम् । ॐकारं पूर्वमुच्चार्य शिवेनोत्कीलयेन्नरः । गायत्रीशतमुच्चार्य ततः पठनमाचरेत् ।" इति विधिः । "अष्टोत्तरशतैः पाठैः पुरश्चरणमिष्यते । परात्परतरं ज्ञानमनेनैव हि जायते । विना वेदान्तसेवाभिर्विना चान्द्रायणादिभिः । विना काशीनिवासाद्यैर्विना गङ्गानिषेवणैः ॥ महापापौघनाशाय पुण्योपायो महानयम् । पुरश्चरणमेतस्य कुरु पारायणं यथा ॥"

इति श्रीमद्भागवतपुरश्चरणविधिः ॥ समाप्तश्चायं ग्रन्थः ॥

# ❀ अथ स्कान्दं श्रीमद्भागवतमाहात्म्यम् ❀

॥ ॐ नमो गोवर्द्धनधारिणे श्रीकृष्णाय ॥

इह खलु जगति सर्वजगदुद्धारकप्रेमपथप्रवर्तकं श्रीमद्भागवतं महापुराणं समस्तवैदिकधर्मावलम्बिभिः परमपवित्रतया समाद्रियमाणम्। श्रद्धालुभक्तजनैः पापठ्यमानम्। परमप्रेमिभिः सुज्ञैः शोश्रूयमाणमस्ति। यत्पठनश्रवणसमर्चनादिभिस्तरीतर्ति धर्मसेतुशीताचलमध्यवर्ती भक्तजनः। यत्प्रभावेण दरीधर्ति धर्मो धरित्रीम्। यच्च संजरीहर्ति तापत्रयम्। चरीकर्ति सकलकामनासिद्धिम्। तस्य सटीकमिदमध्यायचतुष्टयात्मकं माहात्म्यं मासिकादितत्पारायणारम्भादर्वाग्दिने तावदवलोक्य सकलजगदुद्धारार्थं वाचनीयं पौराणिकविद्वज्जनैरित्यस्माकमभ्यर्थनम्।

येनाकारि सुशोभनं जयपुरे श्रीकालिकामन्दिरं येनाश्रावि पुराणमुख्यमखिलं वारत्रयं स्वे गृहे।
येनाधाय्यशनप्रवृत्तिरखिला विद्यार्थिनां विंशतेः शास्त्राम्भोधिरमन्थि येन कृतिना जीयात्स बालाभिधः ॥ १ ॥
श्रीगोवर्द्धनसेवया हि सततं पुत्रावलम्भि स्त्रिया येनाधारि सतामनेकविदुषां कार्य्याण्यनेकान्यपि।
येनातापि च विद्विषां हि हृदयं राजाप्यमोहि प्रभुस्तस्य प्रार्थनया मया कृतमिदं सर्वं समालोक्यताम् ॥ २ ॥
निर्मत्सरैश्च द्रष्टव्येयं वैष्णवानन्ददायिनी। मया श्रीकृष्णलाभाय कृता वै नात्र संशयः ॥ ३ ॥
कामधेनुरियं टीका वैष्णवानन्ददायिनी। श्रीकृष्णांघ्र्यब्जच्छायायां स्थिता भक्तिं प्रयच्छतु ॥ ४ ॥

॥ श्रीगोवर्द्धनधारी श्रीकृष्णो जयति ॥

श्रीकृष्णं श्रीगुरून् व्यासं शुकं सूतं द्विजान् गिरम्। गणेशं वैष्णवांस्तातं विश्वं वन्दे हरेस्तनुम् ॥ १ ॥
रेवतीरमणं रामं नत्वा गोपेश्वरं शिवम्। स्वाचार्य्यचरणान्नित्यं प्रणमामि मुहुर्मुहुः ॥ २ ॥
भक्त्याभासेनापि तोषं दधाने विश्वाध्यक्षे विश्वनिस्तारिनाम्नि। शुद्धाद्वैते शुद्धसाकाररूपे तत्त्वे तस्मिन् नित्यमास्तां रतिर्नः ॥ ३ ॥
सुरवसुधा व्रजवसुधा जयतु सुधारसवाहिनी यमुनापि। जयतु सकलसुरमुकुटो धृतकरलकुटोऽत्र चारयन् धेनूः ॥ ४ ॥
श्रीमद्भागवतं नत्वा खाण्डलद्विजवंशजः[1]। कुर्वे हरिहराख्योऽहं श्रीमन्माहात्म्यटिप्पणीम् ॥ ५ ॥
प्रथमे विष्णुरातेन चाहूतो मुनिसत्तमः। व्रजस्य तत्त्वं वज्राय प्राच्य यात इतीर्य्यते ॥ ६ ॥

नन्वस्य ग्रन्थस्य स्कन्दपुराणान्तर्गतत्वमभिधीयते, तत्रास्य माहात्म्यस्यानुपलब्धेः कथं प्रामाण्येन मान्यत्वमिति चेदुच्यते। यद्यपि स्कन्दमहापुराणस्थबहुलभागस्य कालेन तिरोहितत्वान्नहीदानीमुपलब्धांशे श्रीमद्भागवतस्येदं माहात्म्यमुपलभ्यते, तथाप्यध्यायचतुष्टयमाहात्म्यस्यास्या[3]प्रतिषिद्धप्रमितसमाख्यान्तरार्थोपनिबद्धत्वेनार्य्यावर्तीयश्रीमद्भागवताखिलवक्तृसम्मतत्वात्प्रामाण्येन मान्यत्वमतः सर्वैः शिरोधार्य्यं चेत्यनवद्यमेतदिति तावच्छ्रीकृष्णभक्तैर्ध्येयमिति।

श्रीसच्चिदानन्दघनस्वरूपिणे कृष्णाय चानन्तसुखाभिवर्षिणे।
विश्वोद्भवस्थाननिरोधहेतवे नुमो वयं भक्तिरसाप्तयेऽनिशम् ॥ १ ॥

अथाखिलजनानामपारदुर्वारासारसंसारपरपारप्रापणार्थं नात्रिकतनयायां सत्यवत्यां कृतावतारो भगवतो ज्ञानावतारो भगवान् महर्षिः श्रीकृष्णद्वैपायनस्वरूपो विश्वोपकाराय श्रीकृष्णाख्यपरब्रह्मणो भगवतश्चिन्मयगुणवर्णनप्रधानं श्रीमद्भागवतशास्त्रं नारायणविरञ्चिनारदादिसंप्रदायप्राप्तं प्रादुर्भाव्य तन्माहात्म्यश्रवणविधिफलादिबोधकं शास्त्रं प्रारिप्सुस्तत्प्रतिपाद्यदेवतास्वरूपवर्णननमस्कारात्मकं मंगलमाचरति श्रीति। वयं भक्तिरसाप्तये-भक्तिरसस्य "रौद्रोऽद्भुतश्च शृङ्गारो हास्यं वीरो दया तथा। भयानकश्च

---

१. खाण्डलद्विजवंशजः—श्रीमद्भगवत्परशुरामपूज्यपादयाज्ञिकखाण्डलेश्वरब्राह्मणवंशजन्मा इत्यर्थः खाण्डलशब्दस्य निरुक्तिः श्रीमन्महाभारते वनपर्वणि द्वासदशाधिकशततमेऽध्याये उक्ता ॥ ततो यज्ञेन महता जामदग्न्यः प्रतापवान् ॥ तर्पयामास देवेन्द्रमृत्विग्भ्यः प्रददौ महीम् ॥११॥ वेदीं चाप्यददद्धैमीं कश्यपाय महात्मने ॥ दशव्यामायतां कृत्वा नवोत्सेधां विशांपते ॥ १२ ॥ तां कश्यपस्यानुमते ब्राह्मणाः खण्डशस्तदा ॥ व्यभजंस्ते तदा राजन् प्रख्याताः खाण्डलेश्वराः ॥ १३ ॥ खाण्डलायना इति नीलकण्ठसम्मतपाठे तु खाण्डलब्राह्मणवंश्या इत्यर्थः ॥ १ ॥ २. शाण्डिल्यः ३. अस्या समाख्या—समाख्यान्तरम्, समाख्या नाम तुल्यार्थाभिधानी तस्य योऽर्थः स समाख्यान्तरार्थः केनाप्यप्रतिषिद्धः अत एव यः प्रमितः सोऽप्रतिषिद्धप्रमितः सचासौ समाख्यान्तरार्थश्च तेनोपनिबद्धत्वस्य भावस्तत्त्वं तेनेत्यर्थः ॥ १ ॥

नैमिषे सूतमासीनमभिवाद्य महामतिम् । कथामृतरसास्वादकुशला ऋषयोऽब्रुवन् ॥ २ ॥

श्रीऋषय उचुः—वज्रं श्रीमाथुरे देशे स्वपौत्रं हस्तिनापुरे । अभिषिच्य गते राज्ञि तौ कथं किं च चक्रतुः ॥ ३ ॥

श्रीसूत उवाच—नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ४ ॥

महापथं गते राज्ञि परीक्षित्पृथिवीपतिः । जगाम मथुरां विप्रा वज्रनाभदिदृक्षया ॥ ५ ॥

पितृव्यमागतं ज्ञात्वा वज्रः प्रेमपरिप्लुतः । अभिगम्याभिवाद्याथ निनाय निजमन्दिरम् ॥ ६ ॥

बीभत्सः शान्तः सप्रेमभक्तिकः ॥" इति पुराणप्रसिद्धदशमरसस्य प्राप्तये कृष्णाय-श्रीनन्दनन्दनाय अनिशमहर्निशम् नुम इत्यन्वयः । तं स्वरूपलक्षणेन लक्षयन् विशिनष्टि श्रीसच्चिदानन्दघनस्वरूपिणे इति । सच्च चिच्च आनन्दघनश्चेति सच्चिदानन्दघनम् । श्रिया-राधिकया युक्तम् श्रीराधैव वा सच्चिदानन्दघनं तदेव स्वरूपमस्यास्तीति तस्मै । तमेव तटस्थलक्षणेन लक्षयन् पुनर्विशिनष्टि विश्वोद्भवस्थाननिरोधहेतवे इति । प्रकृतिनियन्तृत्वेन विश्वोत्पत्त्यादेः परमकारणाय । भक्तेषु तस्य परमदयालुत्वं सूचयन् पुन-र्विशिनष्टि अनन्तसुखाभिवर्षिणे इति । अनन्तसुखस्य-स्वप्रेमरसाख्यस्य सर्वतो वर्षणशीलायेति ॥ १ ॥ एवं भगवत्स्वरूपवर्णननम-स्कारात्मकं मंगलं विधाय कथामुपक्रमते नैमिषे इति । नैमिषे-तन्नामके वैष्णवे क्षेत्रे । आसीनम्, ब्रह्मसदस्युत्तमसिंहासने इति बोद्ध्यम् । सूतम्-रोमहर्षणनामानम् । अभिवाद्य-प्रणम्य । ऋषयः-शौनकादयः यतः कथामृतरसास्वादकुशलाः-कथैवामृतं तस्य यो रसो माधुर्यं तस्यास्वादने कुशलाः-निपुणा अतोऽब्रुवन्नित्यन्वयः ॥ २ ॥ श्रीऋषय ऊचुरिति व्यासोक्तिः । "स्वराट् पौत्रं विनयिनमभ्यषिञ्चद्गजाह्वये । मथुरायां तथा वज्रं शूरसेनपतिं ततः ॥" इति प्रथमस्कन्धोक्तिमनुसृत्य ऋषयः शौनकादयः श्रीसूतं पप्रच्छुरित्यर्थः । किं पप्रच्छुरित्यपेक्षायामाह वज्रमिति । श्रियागोवर्द्धनादिसमृद्ध्या परमशोभने माथुरे देशे वज्रम्-वज्रनाभम्-श्रीकृष्णप्रपौत्रम् । सत्या भीम इतिवदुत्तरपदलोपः । हस्तिनापुरे स्वपौत्रं परीक्षितं चाभिषिच्य । राज्ञि-युधिष्ठिरे । उदीचीम् उत्तरां दिशं गते सति । तौ-परीक्षिद्वज्रनाभौ किं कर्म चक्रतुस्तच्च कथं केन प्रकारेण चक्रतुरिति प्रश्नद्वयस्योत्तरं कृपया ब्रूहीति शेषः ॥ ३ ॥ तदेवं शौनकादीनां प्रश्नमाकर्ण्य श्रीसूतो देवं प्रणमति नारायणमिति । श्रीभागवत-माहात्म्यकथाया निर्विघ्नपरिसमाप्त्यर्थं प्रथमं नारायणादीन्नमस्कृत्य ततः सर्वशास्त्रेषु बुद्ध्या व्याप्तो वक्ता । जयन्ति भक्ताः कामादीननेनेति जयो ग्रन्थः, करणेऽच् । तमुदीरयेदिति स्वयं तथोदीरयन्नन्यान् पौराणिकानुपशिक्षयति । अत्र नादब्रह्मात्मकश्रीनारायणस्य श्रीभागवतबीजत्वात् नरोत्तमनरस्य शुद्धजीवस्य च तद्भक्तत्वात् सरस्वत्याश्च वागीश्वरीत्वात् श्रीवेदव्यासस्य श्रीभागवतप्रवर्तकत्वाच्च तेभ्यो नमस्करणं युक्तमेवेति । उदीरयेदिति विध्यर्थे लिङ् । तथा च श्रीभागवतस्य महामन्त्ररूपत्वादस्मिन्नेव श्लोके । ओमस्य श्रीश्रीमद्भागवतमहामन्त्रस्य कृष्णद्वैपायनऋषिः, अनुष्टुप्छंदः, श्रीकृष्णपरमात्मा देवता । सरस्वती शक्तिः । नारायणो बीजम् । श्रीराधागोपालप्रसादद्वारा मम चतुर्वर्गफलसिद्ध्यर्थे जपे विनियोग इति तस्य विनियोगोऽपि सूचित इत्यपि बोद्धव्यम् । अन्यदन्यमहानुभावचरणैः । ननु गायत्र्या च समारम्भ इत्याद्युक्तेः कथम-स्यानुष्टुप्छंदोऽङ्गीक्रियते ? अत्रोच्यते । गायत्र्या च समारम्भ इत्यत्र गायत्र्या—गायत्र्यर्थेन समारम्भो न तु गायत्रीछन्दसा इत्यग्रे स्पष्टीभविष्यति । श्रीधरीयपाठेनापि शुक उवाच, शौनक उवाच, सूत उवाच, इति श्रीत्यादिग्रन्थगणनेनाष्टादशसहस्र-संख्यापूर्तिरिति शिष्टैर्ब्रह्मावर्त्तीयादिभिरङ्गीकृतत्वादस्यानुष्टुप्छंद एवाङ्गीकृतमिति । विशेषजिज्ञासा चेल्लघुभागवतभूषणनामक-ग्रन्थो द्रष्टव्यः । नरा अयनं यस्य अत एव नरा उत्तमा भवन्ति यस्मात्तं नरं श्रीकृष्णम् । देवीम्-प्रियं जिगीषमाणामत एव सरो मनःसरो विद्यते क्रीडोपस्करत्वेन अस्यास्तां-श्रीराधिकां च नमस्कृत्य ततो वक्ता विविधमस्यते विस्तार्यतेऽसाविति व्यासस्तं जयम्—श्रीभागवतमुदीरयेदित्यपि व्याख्यान्तरम् ॥ ४ ॥ तदेवं देवं प्रणम्य श्रीसूत उत्तरमाह महापथमित्यादिना । ननु महर्षिभ्य उत्तरदाने सूतस्य कथमधिकार इति चेदुच्यते । सूतोऽयमग्निकुण्डात्समुत्पन्नो रोमहर्षणनामा उच्यते । 'सूतोऽस्यध्वर-कुण्डत' इत्यादित्यपुराणीयवचनात् । न च क्षत्रियाद्ब्राह्मण्यां सूत इति विलोमजो ग्राह्यः । विलोमजस्य पुराणश्रवणेऽधिकार-सत्त्वेऽपि शौनकादिमहर्षिभ्यो ग्रन्थपुरस्कारेण तत्कथनेऽनधिकारात् पुराणस्य पञ्चमवेदत्वात् । तदुक्तं छान्दोग्योपनिषदि । 'इतिहासः पुराणं च पञ्चमं वेदानां वेदमिति ।' न च 'कस्मादास्ते विलोमजः' इति श्रीभागवतस्थबलरामवचनानां का गतिरिति वाच्यम् । बृहस्पतीन्द्रयोर्ब्राह्मणक्षत्रिययोर्विलोममन्त्रहवनेन वह्नेः सूतः सूत इति श्रीमद्भारतटीकायां नीलकण्ठेन तद्गतेः प्रदर्शनात् । तल्लेखनस्यैव श्रीमद्भागवतषडध्यायपाद्मीयमाहात्म्यटीकाकारेणाप्यङ्गीकृतत्वाच्च । तदुक्तं शाण्डिल्यसंहितायाम् "व्याससिंहासनं चान्यद्दीयते ऋषिभिर्द्विजैः । रोमहर्षणये यद्वत् शास्त्रव्याख्याकृतेऽर्पितम् ॥ संश्रयेद्ब्राह्मणो विद्वान् सूतो नैव विलोमजः । मन्त्रयोः प्रातिलोम्येन मखे जातस्तथोच्यते ॥ सूताः पौराणिकाः प्रोक्ताः" इति विलोमवृत्तिकथने पुराणशब्दः स तु वंशादिकीर्तनप्रबन्धपरतया भाक्त इति ज्ञेयम् । विप्राः—हे शौनकादयः । राज्ञि—युधिष्ठिरे । महापथम्—उदीचीं दिशम् । वज्रनाभस्य दिदृक्षा द्रष्टुमिच्छा तया ॥ ५ ॥ पितृव्यमिति । अथेति चकारार्थे । पितृव्यमिव पितृव्यं परीक्षितम् । इन्द्रप्रस्थान्मथुरां पुरीमागतं ज्ञात्वा । वज्रः प्रेम्णा स्नेहेन परिप्लुतः सन्नभिगम्य सम्मुखं गत्वा अभिवाद्य प्रणम्य च निजमन्दिरम्—स्वकीयं प्रासादं निनाय—प्रापित-

परिष्वज्य स तं वीरः कृष्णैकगतमानसः । रोहिण्याद्या हरेः पत्नीर्ववन्दायतनागतः ॥ ७ ॥
ताभिः सम्मानितोऽत्यर्थं परीक्षित्पृथिवीपतिः । विश्रान्तः सुखमासीनो वज्रनाभमुवाच ह ॥ ८ ॥
श्रीपरीक्षिदुवाच—तात त्वत्पितृभिर्नूनमस्मत्पितृपितामहाः । उद्धृता भूरिदुःखौघादहं च परिरक्षितः ॥ ९ ॥
न पारयाम्यहं तात साधु कृत्वोपकारतः । त्वामतः प्रार्थयाम्यङ्ग सुखं राज्येऽनुयुज्यताम् ॥१०॥
कोशसैन्यादिजा चिन्ता तथारिदमनादिजा । मनागपि न कार्या ते सुसेव्याः किन्तु मातरः ॥ ११ ॥
निवेद्य मयि कर्तव्यं सर्वाधिपरिवर्ज्जनम् । श्रुत्वैतत्परमप्रीतो वज्रस्तं प्रत्युवाच ह ॥ १२ ॥
श्रीवज्रनाभ उवाच—राजन्नुचितमेतत्ते यदस्मासु प्रभाषसे । त्वत्पित्रोपकृतश्चाहं धनुर्विद्याप्रदानतः ॥ १३ ॥
तस्मान्नाल्पापि मे चिन्ता क्षात्रं दृढमुपेयुषः । किन्त्वेका परमा चिन्ता तत्र किञ्चिद्विचार्य्यताम् ॥१४॥
माथुरे त्वभिषिक्तोऽपि स्थितोऽहं निर्ज्जने वने । क्व गता वै प्रजाऽत्रत्या यत्र राज्यं प्ररोचते ॥ १५ ॥

वानित्यन्वयः ॥ ६ ॥ प्रासादमागत्य यत्कृतवांस्तदाह परिष्वज्येति । आयतनागतः-प्रासादमागतः । कृष्ण एवैकं-केवलं गतं मानसं यस्य सः—प्रसिद्धो वीरः—परीक्षित् । तम्—वज्रनाभम् । परिष्वज्य—आलिङ्ग्य "स्त्रीबालवृद्धानादाय हतशेषान् धनञ्जयः । इन्द्रप्रस्थं समावेश्य वज्रं तत्राभ्यषेचयत् ॥" इत्येकादशोक्तेस्तत्र मथुरायां वज्राभिषेकार्थं प्रवेशितास्ततः प्रभृति तत्रैव स्थिताः रोहिण्याद्याः षोडशसाहस्रं हरेः पत्नीर्ववन्द । अत्र रुक्मिण्याद्या इति पाठस्त्वज्ञकपोलकल्पितत्वादनादरणीयः । "कृष्णपत्न्यो-विशन्नग्निं रुक्मिण्याद्यास्तदात्मिकाः ।" इत्येकादशोक्तेः । अस्यार्थः—सः श्रीकृष्ण एवात्मा स्वरूपं यासां ताः स्वरूपशक्तयो रुक्मिण्या-द्यष्टपट्टमहिष्यः प्रभासे एव अगिगताविवस्मादङ्ग्यते-प्राप्यते स्वरूपशक्तिभूताभी रुक्मिण्याद्यष्टपट्टमहिषीभिरित्यग्निस्तं नित्यानुभूतं कृष्णाख्यं धामेति यावत् आविशन्-आ-समन्तात्-सर्वभावेन प्रविष्टा इत्यर्थः ॥ ७ ॥

ताभिरिति । ततश्च पृथिवीपतिः-राजा परीक्षित् । अत्यर्थम्-अतिशयेन । सम्यक्-वस्त्रभूषणादिना मानितः-सत्कृतः । सम्माननेनैव विगतश्रमः । अत एव सुखं यथा स्यात्तथाऽऽसीनः सन् वज्रनाभं हेति स्फुटमुवाचेत्यन्वयः ॥ ८ ॥ परिक्षिदु-क्तिमेवाह तात इत्यादिचतुर्भिः । तातेति स्नेहेन संबोधनम् । हे वत्स त्वत्पितृभिः-श्रीराम-कृष्णादिभिरस्मत्पितृपितामहाः-युधिष्ठिरादयः । भूरिदुःखौघात्-विषमोदकदावजतुगृहदाहहिडंबादिराक्षसदर्शनादिवहुविपद्गणाद्रक्षिताः । अहमप्यश्वत्थामा-पसृष्टब्रह्मास्त्राद्रक्षितश्चेत्यन्वयः ॥ ९ ॥ नेति । तातेति पूर्ववत् । उपकारतः-त्वत्पित्रुपकारेण हेतुना । त्वदर्थं साधु-सुकर्म कृत्वाऽपि । प्रत्युपकारकरणे न पारयामि—नाहं समर्थो भवामि । त्वत्पित्रुपकाराणामनन्तत्वादिति भावः । अतस्त्वां प्रार्थयामि । सा का तव प्रार्थना इत्यपेक्षायामाह अङ्गेति अङ्ग हे वज्रनाभ । त्वया राज्ये सुखं यथा स्यात्तथाऽनुयुज्यताम् । मत्प्रार्थनया तव राज्यकरणेनैव ममानृण्यमिति भावः ॥ १० ॥ ननु कोशादिकं विना कथं राज्यानुयोगो भवेदित्याशङ्क्याह कोशेति । कोशसैन्यादिजा आदि-शब्देनामात्यादिचिन्तापरिग्रहः । तथारिदमनादिजा—अत्रादिशब्देन नास्तिकादिदमनचिन्तापरिग्रहः । कोशादीनां चिन्ता मनाक्-ईषदपि ते-त्वया न कार्या । कृत्यानां कर्तरि वेति कर्तरि षष्ठी । किन्तु । मातरः कृष्णपत्न्यः सुसेव्याः—श्रद्धापूर्वकं पादसंवाहनादिभिः सेवितुं योग्याः । तासां संसेवनेनैव तव सर्वचिन्ताहानिरिति भावः ॥ ११ ॥ । किञ्च । निवेद्येत्यर्द्धकेन । मनोव्यथां मयि निवेद्य-मां प्रति श्रावयित्वा तत्परिवर्जनं त्वया कर्तव्यम् । निवेदितं चेति पाठे तु सुगमम् । चकार एवार्थे । सर्वमनोव्यथायाः परिवर्ज्जनं यस्मात्तन्मन्निवेदितम्-राज्यानुयोगादिकं त्वया कर्तव्यमेव । श्रुत्वेत्यर्द्धकेन सूतोक्तिः । ततो वज्रः एतत्-चिन्तात्याग-पूर्वकमातृसेवनराज्यानुयोगादिपरीक्षिद्वचनं श्रुत्वैव परमप्रीतः सन् । तम्-परीक्षितं प्रत्युवाच । न हि वक्तव्येऽर्थे तस्य कश्चित्संदेह इति सूचयन्नाह हेति ॥ १२ ॥ वज्रोक्तिमेव दर्शयति राजन्नित्यादित्रिभिः । तत्र राजन्नित्यर्द्धकम् । राजन्निति सादरसम्बोधनम् । हे पितृव्य त्वं यच्चिन्तात्यागपूर्वकमातृसेवनाद्यस्मासु प्रभाषसे उपदिशसि । तदेतत् ते-तव पितृव्यत्वादुचितमेव । अस्मास्विति बहुवचनन्तु स्वभृत्यसाहित्याभिप्रायेण । न हि तावन्मम कोशसैन्यादिजा चिन्ता इति सहेतुकमाह त्वत्पित्रेति । त्वत्पित्रा-अभिमन्युनापि धनुर्विद्यायाः सरहस्यदानेनाहमुपकृतश्च ॥ १३ ॥ तस्मादिति । तस्मात्-त्वत्पितृकृतोपकाराद्धेतोः दृढं क्षात्रम्-क्षत्रियत्वमुपेयुषः-प्राप्तस्य मे-मम कोशसैन्यादिजा चिन्ता स्वल्पापि नास्ति । तर्हि किमित्यौदासीन्यं भजसे । किन्त्वित्यर्द्धकम् । मम त्वन्यैव परमा-अनेकोपायैरप्यनिवार्या । एका-मुख्या चिन्तास्ति । तच्चिन्ताविषये त्वया किञ्चित्-रहस्यं विचार्य्यताम् ॥ १४ ॥ सा का तव परमा चिन्ता इत्यपेक्षायामाह माथुरे इति । माथुरे देशे । अहं वृद्धप्रपितामहेन युधिष्ठिरेणाभिषिक्तोऽपि निर्ज्जने वने स्थितोऽस्मि । किञ्च यत्र-यासु प्रजासु सतीषु मम राज्यं प्ररोचते ता अत्रत्याः प्रजाः क्व गता इत्यहं न जाने इति शेषः । इत्येव मम परमा चिन्ता नान्येति भावः । प्रजेति जात्यभिप्रायेणैकवचनम् ॥ १५ ॥

( १ ) परमप्रीतस्तं नाम परीक्षिद्वचसा मातृभिश्च सम्प्रीतो भवती मातिवा ।

इत्युक्तो विष्णुरातस्तु नन्दादीनां पुरोहितम् । शाण्डिल्यमाजुहावाशु वज्रसंदेहनुत्तये ॥ १६ ॥
अथोटजं विहायाशु शाण्डिल्यः समुपागतः । पूजितो वज्रनाभेन निषसादासनोत्तमे ॥ १७ ॥
उपोद्घातं विष्णुरातश्चकाराशु ततस्त्वसौ । उवाच परमप्रीतस्तावुभौ परिसान्त्वयन् ॥ १८ ॥
श्रीशाण्डिल्य उवाच—शृणुतं दत्तचित्तौ मे रहस्यं व्रजभूमिजम् । व्रजनं व्याप्तिरित्युक्त्या व्यापनाद्व्रज उच्यते ॥ १९ ॥
गुणातीतं परं ब्रह्म व्यापकं व्रज उच्यते । सदानन्दं परं ज्योतिर्मुक्तानां पदमव्ययम् ॥ २० ॥
तस्मिन्नन्दात्मजः कृष्णः सदानन्दाङ्गविग्रहः । आत्मारामश्चाप्तकामः प्रेमाक्तैरनुभूयते ॥ २१ ॥
आत्मा तु राधिका तस्य तयैव रमणादसौ । आत्मारामतया प्राज्ञैः प्रोच्यते गूढवेदिभिः ॥ २२ ॥

कामास्तु वाञ्छितास्तस्य गावो गोपाश्च गोपिकाः ।
नित्याः सर्वे विहाराद्या आप्तकामस्ततस्त्वयम् ॥ २३ ॥

इतीति । तुरेवार्थे । इत्येवं-राजन्नित्याद्युक्तप्रकारेणोक्तो विष्णुरातः-श्रीपरीक्षित् । वज्रसंशयस्यापनयनाय नन्दादीनां पुरोहितं शाण्डिल्यनामानमृषिमेवाजुहाव । तस्य व्रजरहस्यज्ञत्वादिति भावः ॥ १६ ॥ अथेति । अथ-आह्वानानन्तरम् । उटजम्-पर्णशालाम् । आशु-शीघ्रमेव विहाय । सम्यगाह्लादपूर्वकमुपागतः शाण्डिल्यः वज्रनाभेन पूजितः सन्नासनोत्तमे निषसाद उपविवेश । समुपसर्गेणानपेक्षितावसरत्वं गृहीतव्रजरहस्यप्रतिपादकशास्त्रसार्थत्वं च ज्ञापयतीति केचित् ॥ १७ ॥ उपोद्घातमिति । ततश्च-तदनन्तरमेव । परीक्षित् तदग्रे उपोद्घातम्-प्रकृतसिद्ध्यर्थां चिन्तामाश्वेव चकार । तदुक्तम् चिन्तां 'प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः' इति । प्रकृतमत्र वज्रस्य राज्यानुयोगादि तन्निष्पत्त्यर्थं चिन्ता हि माथुरप्रजाऽभावविषया व्रजरहस्यश्रवणादिलक्षणा वा, तच्छ्रवणाद्यन्तरा राज्यानुयोगाद्यनिष्पत्तेः । ततस्तु-तदनन्तरमेवासौ शाण्डिल्यः व्रजरहस्यपरिप्रश्नेन परमप्रीतोऽत एव तावुभौ-परीक्षिद्वज्रनाभौ परिसान्त्वयन्-गुणवर्णनादिस्तुत्यात्मकसाममार्गेण संबोधयन्नुवाचेत्यन्वयः ॥ १८ ॥ शाण्डिल्योक्तिमेव दर्शयति शृण्वित्यादित्रयोविंशतिभिः पद्यैः । भो परीक्षिद्वज्रनाभौ युवां दत्तचित्तौ सन्तौ मे-मत्तो व्रजभूमितत्त्वं शृणुतम् । व्रज गतावित्यस्मात् 'गोचरसंचरवहव्रजव्यजापणनिगमाश्चे'ति पुंसि घः । 'नपुंसके भावे क्त' इति सूत्राच्चेनभाव इत्यनुवृत्त्या भाव इत्यनेन वा व्रजनं व्रजः गतिः प्रापणं व्यापनम् इति व्युत्पत्त्या निष्क्रियत्वात्कर्तृत्वादिशून्यं यत् व्यापनं तस्माद् व्रज उच्यते । यद्वा । व्यापनकर्तृत्वाद् व्रजः । अत एवोत्तरश्लोके 'ब्रह्म व्यापकं व्रज उच्यते' इत्युक्तम् । अस्मिन पक्षे पचाद्यच् । व्रजन्त्यस्मिन्मुक्ता इति तु सुवचं 'मुक्तानां परमागतिरि'ति, व्रजन्त्यनेनेति व्रज इति च 'सिद्धिदः सिद्धिसाधनः' इत्युक्तेः । अस्मिन् पक्षे करणे घ इत्यलम् । एवमुच्यते वेदान्तविद्भिरिति शेषः ॥ १९ ॥ तर्हि स किं परं ब्रह्म ओमित्याह गुणातीतमिति । गुणातीतम्-गुणकार्येष्वभिमानशून्यं यत् व्यापकं परं ब्रह्म तदेव व्रजशब्देनोच्यते । तमेव व्रजं विशिनष्टि सदानन्दमित्युत्तरार्द्धेन । यत्सच्चिदानन्दरूपं परं ज्योतिः-स्वयंप्रकाशरूपं व्रजस्तदेव मुक्तानाम्-नारदादीनां अव्ययं पदम्-नित्यनिवासस्थानमित्यर्थः ॥ २० ॥ ननु किमिति नारदादयस्तत्र निवसन्तीत्याशंक्य श्रीकृष्णानुभवार्थमित्याशयेनाह तस्मिन्निति । उक्तलक्षणे व्रज एव सच्चिदानन्दमेवाङ्गं विशेषेण-सौंदर्याद्यतिशयेन गृह्णाति स सदानन्दाङ्गविग्रहः । 'सच्चिदानन्दरूपाय कृष्णाय, आनन्दमात्रकरपादमुखोदरादिः', इत्यादिश्रुतिस्मृतिभ्यां देहदेहिविभागशून्यः । न च कृष्णविग्रहस्यैवात्मत्वे सर्वान्तरत्वे कुतो न सर्वेषां तदपरोक्षतेति वाच्यम्, अज्ञानावृतशुक्तेः सामान्यतो भानेऽपि शुक्तिरूपविशेषाकारेणाप्रतीतिवत् । सदाद्यात्मना भानेऽपि साकारचिदानन्दात्मत्वेनाप्रतीतिसंभवात् । न चात्मनो बहुश्रुतिषु निराकारत्वप्रसिद्ध्या श्रीकृष्णस्य साकारत्वासिद्धिरिति वाच्यम्, निराकारशब्दस्य मायिकभौतिकाकारनिरासपरत्वात् । 'सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरमि'त्यादिश्रुतिश्रुताकारस्यानन्तानन्दवद्गुणोपसंहारन्यायेन सर्वत्रोपसंहरणीयत्वाच्चेत्युत्तरतन्त्रे विस्तरः । श्रीकृष्ण एवात्मारामश्चाप्तकाम इति प्रेमाक्तैः-प्रेमपूर्णैर्नारदादिभक्तैरनुभूयते । न कान्यवादी । अतो व्रजभूमिरेव सर्वोत्कृष्टत्वात्सर्वदा संसव्येति भावः ॥ २१ ॥ ननु राधारमणस्य तस्य कुत आत्मारामत्वमित्याशङ्क्य राधारमणत्त्वादेव तत्त्वमिति व्युत्पत्त्या साधयति आत्मेति । रमणादेवासौ-श्रीकृष्णः वेदरहस्यविज्ञैः प्राज्ञैः ज्ञानिभिः । आत्मारामतया प्रोच्यते-प्रकर्षेण-सर्वात्मारामेषु विलक्षणत्वेन कथ्यते इत्यर्थः । चाप्तैरिति पाठे गूढवेदिभिः ज्ञानिभिः आप्तैः-प्रेमपूर्णैर्भक्तैश्च । तदुक्तं श्रीशुकाचार्यचरणैरुपक्रमे 'निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नम इति । अस्यार्थः निरस्तं साम्यमतिशयश्च यस्मात् यदपेक्षयाऽन्यस्य साम्यमतिशयश्च नास्ति तेन स्वात्मना राधसा-राधिकया स्वधामनि व्रजे रंस्यते-रममाणाय आत्मारामाय नमः । कथंभूते स्वधामनि-ब्रह्मणि-व्यापके तदुक्तं राधाकृष्णभूषणे । राधसा—'राधिकयेत्यर्थः एकप्रकृतिकभिन्नप्रत्ययांतवाच्यमप्येकमेव, ईश्वरेशशब्दवत् । मघवन्मघवशब्दवच्च । राधधातुप्रकृतिकासुनघञन्तयो राधस राधाशब्दयो राधावाचकत्वमिति ॥ २२ ॥ ननु गोचारणबालक्रीडादिरतस्य नवनीतादिचौरस्य गोपीजनवस्त्रापहारकस्य तस्य कुत आप्तकामत्वमित्याशङ्क्य तद्वादीनां नित्यत्वादेवेति तत्त्वमित्यपि व्युत्पत्त्यैव साधयति । यद्वा आप्तकामशब्दस्यापि व्युत्पत्तिं दर्शयति कामास्त्विति । तस्य-श्रीकृष्णस्य वाञ्छिताः कामाः-संकल्पविषया ये

रहस्यं त्विदमेतस्य प्रकृतेः परमुच्यते । प्रकृत्या खेलतस्तस्य लीलाऽन्यैरनुभूयते ॥ २४ ॥
सर्गस्थित्यप्यया यत्र रजःसत्त्वतमोगुणैः । लीलैवं द्विविधा तस्य वास्तवी व्यावहारिकी ॥ २५ ॥
वास्तवी तत्स्वसंवेद्या जीवानां व्यावहारिकी । आद्यां विना द्वितीया न द्वितीया नाद्यगा क्वचित् ॥२६॥
आवयोर्गोचरेयं तु तल्लीला व्यावहारिकी । यत्र भूरादयो लोका भुवि माथुरमण्डलम् ॥ २७ ॥
अत्रैव व्रजभूमिः सा यत्र तत्त्वं सुगोपितम् । भासते प्रेमपूर्णानां कदाचिदपि सर्वतः ॥ २८ ॥
कदाचिद् द्वापरस्यान्ते रहोलीलाधिकारिणः । समवेता यदाऽत्र स्युर्यथेदानीं तदा हरिः ॥ २९ ॥
स्वैः सहावतरेत्स्वेषु समावेशार्थमीप्सिताः । तदा देवादयोऽप्यन्येऽवतरन्ति समन्ततः ॥ ३० ॥

गवादयस्ते नित्याः । ये च तैः सह सर्वे विहाराद्याः-सर्वा लीला धामादिकं च तेऽपि नित्याः । ततः-तत्कामादीनां नित्यत्वा-नित्यत्वादेवायम्-श्रीकृष्ण आप्तकामः-स्वत एव परिपूर्णकाम इत्यर्थः । तदुक्तं श्रीभागवतामृते 'नित्यां मे मथुरां विद्धि वनं वृन्दावनं तथा । यमुनां गोपकन्याश्च तथा गोपालबालकान् ॥' इति । जयति जननिवासः । 'वृन्दावनं परित्यज्य पदमेकं न गच्छति ।' तथा च श्रुतिः 'सत्यकामः सत्यसंकल्प' इति ॥ २३ ॥ रहस्यमिति । इदम्-मयोक्तं रहस्यम्-व्रजलीलातत्त्वं तु प्रकृतेः-बहिरङ्गशक्तेः परमुच्यते । प्रकृतेः परत्वं च विवृतं श्रीकृष्णोपनिषदि श्रुतीनां वचनैः । तद्यथा 'पौरुषादीनि रूपाणि ज्ञातान्यस्माभिरच्युत । सुगुप्तं ब्रह्म तत्सर्वं स्वस्थं बुद्धं न ते हि नः ॥ ब्रह्मेति पठ्यमानाभिर्यद्रूपं निर्गुणं परम् । वाङ्मनोगोचरातीतं तत्तु न ज्ञायते कुतः ॥ आनन्दमात्रमिति यद्वदन्ति हि पुराविदः । तद्रूपं दर्शयास्माकमेतदेव वरो हि ते ॥ श्रुत्वैतद्दर्शयामास व्रजतत्त्वं परात्परम् ॥' इत्यादि तत्र द्रष्टव्यमिति । तयैव प्रकृत्या खेलतः-लीलां कुर्वतस्तस्य वेदान्तवेद्यस्य श्रीकृष्णस्य या लील-व्यावहारिकी साऽन्यैरेव जीवैः सांसारिकैरनुभूयते इत्यन्वयः ॥ २४ ॥ ननु सा कीदृशी लीला तत्राह सर्गेत्यर्द्धेन । यत्र-यस्यां सृष्ट्यादिरूपबहिरङ्गलीलायां रजःसत्त्वतमोगुणैर्विभिन्नस्य सर्गस्थित्यप्यया भवन्तीति सा । एवम्-व्रजनं व्याप्तिरित्याद्युक्तप्रकारेण तस्य श्रीकृष्णस्य द्विविधा लीला । एका वास्तवी द्वितीया व्यावहारिकी च ॥ २५ ॥ तयोर्लक्षणमाह । वास्तवीति । या वास्तवी लीला सा तत्स्वसंवेद्या-तेन कृष्णे स्वैर्भक्तैश्च सम्यक्-तत्सुखानुभवपूर्वकं वेदितुं योग्या । व्यावहारिकी लीला तु जीवानाम्-जीवैर्वेद्या । आद्याम्-वास्तवीमप्रकटनित्यलीलां विना द्वितीया-प्रकटा लीला न भवति । प्राकट्यस्य पूर्वसद्भावापेक्षकत्वादिति भावः । द्वितीया व्यावहारिकी लीला तु आद्यां वास्तवीं गच्छतीति तथाभूता क्वचिन्न भवति । तस्याः प्राकृतत्वादिति भावः । द्वितीयान्तपाठे-आद्यां वास्तवीं लीलां विना द्वितीया-व्यावहारिकी न संभवति । तर्हि किमिति शास्त्रेषु निरूपितेत्याशंक्याह द्वितीयामिति । द्वितीयाम्-व्यावहारिकीं लीलां विना न चाद्यगा-वास्तवी क्वचिदपि सूच्यत इत्यध्याहारः । निष्प्रपञ्चब्रह्मसूचनार्थं प्रपञ्च इव । बिम्बसूचनार्थं च प्रतिबिम्बमिव । वास्तवीसूचनार्थमेव सा निरूपितेति भावः ॥ २६ ॥ किञ्च । आवयोरिति । हे वज्र ! आवयोस्तव मम च गोचरा-दृश्या, अधिकरणघान्ताट्टाप् । न तु 'चरेष्टः' शंक्यः । इयम्-विश्वोत्पत्त्यादिकारिणी श्रीकृष्णलीला तु व्यावहारिकी अस्ति । इयम्-व्यावहारिकी श्रीकृष्णलीला तु आवयोर्दृश्येत्यन्वयो वा । यत्र-यस्यां लीलायां भूरादयो लोकाः सन्ति । भुवि भूर्लोके च माथुरमण्डलमस्ति । अप्रकटमाथुरमण्डलव्यावृत्त्यर्थं भुवीति ग्रहणम् ॥ २७ ॥ व्यावहारिकीं लीलां निरूप्य वास्तवीं विस्तरेण निरूपयति अत्रेति । अत्रैव-व्यावहारिक्यां प्राकृतवत्प्रतीयमाने माथुरमण्डले एव सा-परमानन्दरूपा चिन्मयी व्रजभूमिरस्ति । यत्र-यस्यां व्रजभूमौ सुगोपितं यत् तत्त्वम्—श्रीकृष्णाख्यं तत् प्रेमपूर्णानां प्रेमभक्तानामेव । कदाचित्-नामसंकीर्तनादौ । सर्वतो-बहिरन्तरतो भासते । अपीति निश्चितमेवेत्यर्थः ॥ २८ ॥ तर्हि कदा तस्य सर्वदा साक्षाद्भानं तत्राह कदाचिदिति सार्द्धेन । यथेदानीमस्मदादयः समवेताः सन्ति । तथा कदाचित्-अष्टाविंशतितमे द्वापरस्यान्ते यदा रहोलीलाधिकारिणो-धराद्रोणादयः दण्डकमुन्यादयश्च साधकभक्ताः अत्र-व्रजभूमौ समवेताः-मिलिताः स्युस्तदा हरिः-गोलोकवासिश्रीकृष्णोपि ॥ २९ ॥ स्वैः-रहोलीलाधिकारिकगोपीगोपगवादिभिः सिद्धैः सहावतरेत् । कथंभूताः रहोलीलाधिकारिणः स्वेषु-गोलोकवासिषु समावेशार्थम्-प्रवेशार्थं हरिणा ईप्सिताः-वाञ्छिताः । यैः सहावतरत्स्वेषु समावेशार्थमीप्सितमिति च पाठे । यथेदानीम्-अस्मिन् द्वापरस्यान्ते । तथाष्टाविंशतितमे द्वापरस्यान्ते-तत्सन्ध्यांशे । यदा कदाचित् रहस्यलीलाधिकारिणः साधकभक्ताः अत्र समवेताः स्युस्तदा यैः-गोलोकवासिभिः सिद्धैः सहावतरत्सु एषु-रहोलीलाधिकारिषु तेषु सर्वेषु ईप्सितमर्थम् स्ववाञ्छितलीलादिकं समावेश्य हरिरपि स्यात्-श्रीकृष्णोऽप्यवतरतीत्यर्थः । तैरिति च पाठे तदा तैः-रहोलीलाधिकारिभिः सहावतरत्सु एषु-देवाद्यवतारयादवादिष्वित्यर्थः । अस्मिन् पक्षे । हरिणा सह हरिपरिकरस्याप्यवतरणं ज्ञेयम् । अन्यत्समानम् । तदैव रहोलीलाधिकारिदेवादिभ्योऽन्ये ये देवगन्धर्वादयः आधिकारिकाः तेऽपि समन्ततः-स्वस्वलोकेभ्योऽवतरन्ति । स्वांशैरिति

१. वास्तवी अप्रकटलीलां विनापि भवति कदाचिद् व्यावहारिक्यां प्रत्यक्षापि भवतीति तृतीयचरणस्य निष्कर्षः । २. वास्तवी न व्यावहारिक्यामपि गच्छतीति चतुर्थचरणस्य निष्कर्षः ।

सर्वेषां वाञ्छितं कृत्वा हरिरन्तर्हितोऽभवत् । तेनात्र त्रिविधा लोकाः स्थिता पूर्वं न संशयः ॥ ३१ ॥
नित्यास्तल्लिप्सवश्चैव देवाद्याश्चेति भेदतः । देवाद्यास्तेषु कृष्णेन द्वारिकां प्रापिताः पुरा ॥ ३२ ॥
पुनर्मौशलमार्गेण स्वाधिकारेषु चापिताः । तल्लिप्सूंश्च सदा कृष्णः प्रेमानन्दैकरूपिणः ॥ ३३ ॥
विधाय स्वीयनित्येषु समावेशितवांस्तदा । नित्याः सर्वेऽप्ययोग्येषु दर्शनाभावतां गताः ॥ ३४ ॥
व्यावहारिकलीलास्थास्तत्र यत्राधिकारिणः । पश्यन्त्यात्रागतास्तस्मान्निर्ज्जनत्वं समन्ततः ॥ ३५ ॥
तस्माच्चिन्ता न ते कार्या वज्रनाभ मदाज्ञया । वासयात्र बहून् ग्रामान् संसिद्धिस्ते भविष्यति ॥ ३६ ॥
कृष्णलीलानुसारेण कृत्वा नामानि सर्वतः । त्वया वासयता ग्रामान् संसेव्या भूरियं परा ॥ ३७ ॥
गोवर्द्धने दीर्घपुरे मथुरायां महावने । नन्दिग्रामे बृहत्सानौ कार्या राज्यस्थितिस्त्वया ॥ ३८ ॥
नद्यद्रिद्रोणिकुण्डादिकुञ्जान् संसेवतस्तव । राज्ये प्रजाः सुसंपन्नास्त्वं च प्रीतो भविष्यसि ॥ ३९ ॥
सच्चिदानन्दभूरेषा त्वया सेव्या प्रयत्नतः । तव कृष्णस्थलान्यत्र स्फुरन्तु मदनुग्रहात् ॥ ४० ॥

शेषः । तदुक्तं बृहद्ब्रह्मसंहितायां पञ्चरात्रे "वेदोऽयं वसुदेवाख्यो ब्रह्म-विद्या तु देवकी । नन्दस्तु परमानन्दो यशोदा मुक्तिरूपिणी ॥ स्वांशैरवतरन्त्येते श्रीकृष्णप्रीतिहेतवे ॥" इत्यादि ॥ ३० ॥

सर्वेषामित्यर्द्धकम् । सर्वेषाम्-त्रिविधजनानाम् तेनेत्यप्यर्द्धकम् । तेन-श्रीकृष्णावतारस्य त्रिविधजनापेक्षकत्वेन हेतुना । अत्र व्रजभूमौ त्रिविधा लोकाः-जनाः । 'लोकस्तु भुवने जने' इत्यमरः । त्वत्तः पूर्वं स्थिता अभवन्निति शेषः ॥ ३१ ॥ तान् त्रिविध-जनानेव दर्शयति नित्या इत्यर्द्धकेन । नित्याः-सिद्धाः गोलोकनिवासिगोपीगोपगवादयो मुख्याः । तल्लिप्सवः-तथातत्स्वरूपेच्छवो द्रोणधरादयो दण्डकमुन्यादयश्च साधकभक्ताः द्वितीयाः । आधिकारिकदेवाद्यवतारा यादवादयश्च तृतीया इति भेदात् त्रिविधाः । लीलान्ते तेषां स्वस्वाधिकारस्थितिप्रकारमाह देवाद्या इति सार्द्धद्वयेन । तेषु-त्रिविधजनेषु मध्ये ये देवांशाद्यास्ते श्रीकृष्णेन मथुरातो द्वारकां पुरैव प्रापिताः ॥ ३२ ॥ च पुनर्मौशलमार्गेण स्वाधिकारेषु आपिताः । तल्लिप्सूंश्चेति सार्द्धकम् । ततो गोलोकनिवासिनित्य-जनसदृशस्वरूपेच्छून् धराद्रोणादीन् दण्डकमुन्यादींश्च सदा प्रेमानन्दैकरूपिणो विधाय ॥ ३३ ॥ सद्योमुक्तिमर्यादया तानपि रहोलीलाधिकारिकान् कृत्वेत्यर्थः । सदाकृष्णः-सतो भक्तानासमन्तात्स्वस्मिन्नाकर्षतीति तथाभूतः श्रीनन्दनः स्वीयनित्येषु गोलो-कवासिषु तान् यदा सम्यक्-स्वकीयत्वेनावेशितवान् तदा-सर्वे-नित्याः गोलोकनिवासिनोऽपि अयोग्येषु-तदानींतनव्यावहारिक-लीलास्थजनेषु दर्शनाभावतां गता इति सार्द्धश्लोकान्वयः । यदेति पाठान्तरम् ॥ ३४ ॥ ननु तद्दर्शनार्थं देशान्तरादागता व्यावहा-रिकलीलास्था जनाः कुत्र गता इति चेत् तेऽपि तदानीं तानदृष्ट्वा लीलासुखानुभवाभावात्तत्रैव गता इत्याह व्यावहारिकलीलास्था इति । तान् द्रष्टुमागता व्यावहारिकलीलास्था जनास्तत्राधिकारिणः-रहोलीलायामधिकारिजनान् यस्मादत्र-व्रजे न पश्यन्ति तस्मादस्य व्रजस्य समन्ततो निर्ज्जनत्वम्-निर्गता जना यस्मात्तस्य भावस्तत्त्वमस्तीत्यर्थः । आगतानिति द्वितीयान्तपाठे रहोलीला-धिकारिविशेषणम् । तत्र लोकान्तरादागतानित्यर्थः । स्थिता इति पाठे त्वतिसुगमम् ॥ ३५ ॥

तस्मादिति । तस्मात्-व्रजस्य निर्ज्जनत्वाद्धेतोः । हे वज्रनाभ ते-त्वया चिन्ता-अत्रत्यजनविषयिका न कर्तुं योग्या । तर्हि किं कर्तव्यं तत्राह । मदाज्ञया अत्र-व्रजे बहून् ग्रामान् वासय । तेन ते-तव सम्यक्-मनोऽभिलषितपूर्विका सिद्धिः-चिन्ता-हानिरित्यर्थः ॥ ३६ ॥ कृष्णेति । कृष्णलीलानुसारेण नामानि-कृष्णजन्मनि षष्ठीपूजनात् 'छटीकरा' । श्रीराधाकृष्णयोर्विवाहसमये ग्रन्थिबन्धनात् 'गाँठयौली' । चतुर्मुखेन बालवत्सहरणात् 'चौमुँहा' इत्यादीनि तत्तन्नामानि कृत्वा सर्वतो ग्रामादीन् वासयता त्वया परा-सर्वोत्कृष्टा इयम्-सच्चिदानन्दरूपा व्रजभूमिः सुसेव्या-सम्यक्-श्रद्धापूर्वकं सेवितुं योग्या इत्यर्थः ॥ ३७ ॥ गोवर्द्धने इति । गोवर्द्धने प्रसिद्धे । दीर्घपुरे-डीग इति ख्याते । बृहत्सानौ बरसानौ इति ख्याते । अन्यत्सुगमम् ॥ ३८ ॥ नदीः-यमुनादीः । अद्रीन्-श्रीगोवर्द्धनादीन् । तद्द्रोणीश्च कुण्डानि-राधाकुण्डकृष्णकुण्डादीनि । कुञ्जान् सेवाकुञ्जादीन् । सम्यक्-श्रद्धापूर्वकं सेवतस्तव प्रजाः सुसंपन्नाः धान्यादिना सम्पन्नाः भविष्यन्ति । तेन च त्वमपीत्यन्वयः ॥३९॥ आशिषा ददुक्तं व्रजरहस्यं निगमयति सच्चिदानन्द-भूरिति द्वयेन । एषा अनिर्वचनीयमाहात्म्या । सच्चिदानन्दभूः कृष्णरूपा व्रजभूमिः । तदुक्तं भागवतामृते "स तु माथुरभू-रूपः परिच्छिन्नोऽप्यथाद्भुतः । स्फारः संकुचितश्च स्यात् कृष्णलीलानुसारतः ॥ प्रमदाशतकोटयोऽपि ममुर्यत्तत्किमद्भुतम् । अत्र वाजाण्डमालापि पर्याप्तिमुपगच्छति ॥ वृन्दावनप्रतीकेषु याऽनुभूतैव वेधसा । अतः प्रभोः प्रियाणां च धाम्नश्च समयस्य च ॥ अविचिन्त्यप्रभावत्वात्तत्र किञ्चिन्न दुर्घटम् ॥" इत्यादि । यत्नतः-प्रेमिजनसेवनपूर्वकनामसंकीर्तनाद्युपायेनेत्यर्थः, सेवितुं

१. अधिकारिणः । २. साधकभक्तान् ।

वज्रसंसेवनादस्य उद्धवस्त्वां मिलिष्यति । ततो रहस्यमेतस्मात् प्राप्स्यसि त्वं समातृक ॥ ४१ ॥
एवमुक्त्वा तु शाण्डिल्यो गतः कृष्णमनुस्मरन् । विष्णुरातोऽथ वज्रश्च परां प्रीतिमवापतुः ॥ ४२ ॥

इति श्रीस्कन्दपुराणेऽखिलेष्टश्रीमद्भागवतमाहात्म्ये शाण्डिल्योपदिष्टव्रजभूमिमाहात्म्यवर्णनं नाम प्रथमोऽध्यायः ॥ १ ॥

## अथ द्वितीयोऽध्यायः

श्रीऋषय ऊचुः—शाण्डिल्ये तौ समादिश्य परावृत्ते स्वमाश्रमम् । किं कथं चक्रतुस्तौ तु राजानौ सूत तद्वद ॥ १ ॥
श्रीसूत उवाच—ततस्तु विष्णुरातेन श्रेणीमुख्याः सहस्रशः । इन्द्रप्रस्थात्समानाय्य मथुरास्थानमापिताः ॥ २ ॥
माथुरान् ब्राह्मणांस्तत्र वानरांश्च पुरातनान् । विज्ञाय माननीयत्वं तेषु स्थापितवान् स्वराट् ॥ ३ ॥
वज्रस्तु तत्सहायेन शाण्डिल्यस्याऽप्यनुग्रहात् । गोविन्दगोपगोपीनां लीलास्थानान्यनुक्रमात् ॥ ४ ॥
विज्ञायाऽभिधयाऽऽस्थाप्य ग्रामानावासयद्बहून् । कुण्डकूपादिपूर्तेन शिवादिस्थापनेन च ॥ ५ ॥
गोविन्दहरिदेवादिस्वरूपाऽऽरोपणेन च । कृष्णैकभक्तिं स्वे राज्ये ततान च मुमोद ह ॥ ६ ॥
प्रजास्तु मुदितास्तस्य कृष्णकीर्तनतत्पराः । परमानन्दसम्पन्नाः राज्यं तस्यैव तुष्टुवुः ॥ ७ ॥

योग्या । कृष्णस्थलानि तत्रासमण्डलादीनि । स्फुरन्त्वित्याशिषि लोट् ॥ ४० ॥ वज्रेति संबोधनम् । अस्याः-सच्चिदानन्दव्रजभूमेः । सम्यक्-प्रेमपूर्वकसेवनात् । ततः-उद्धवमिलनानन्तरमेव । रहस्यम्-व्रजभूमितत्त्वम् । एतस्मादुद्धवात् । मातरः-षोडशसाहस्रं श्रीकृष्णपत्न्यस्ताभिः सहितः । एतस्या इति पाठे व्रजभूमेः । ततः उद्धवात् ॥४१॥ एवमिति सूतोक्तिः । एवं वज्रनाभचिन्ताहान्युपाय-प्रकारकं व्रजरहस्यमुक्त्वा गतः पर्णशालामिति शेषः । कृष्णमनुस्मरन्नित्यस्यार्थं भावः । स्वस्य कृष्णभक्तत्वं द्योतयितुम् । यद्वा हरिस्मृतिः 'सर्वविपद्विमोक्षणमि'ति वज्रं स्मारयितुम् । यद्वा यथा कृष्णस्मरणेन मम स्वानन्दसिद्धिर्जाता तथैव व्रजभूमेः सच्चिदानन्दरूपत्वादस्यां तवापि कृष्णस्मरणेनैव राज्यसंसिद्धिर्नान्यथेति वज्रं सूचयितुमिति ॥ ४२ ॥

इति श्रीस्कन्दपुराणेऽखिलेष्टश्रीमद्भागवतचतुष्टयाध्यायमाहात्म्ये खाण्डलर्षिवंशोद्भवमथुरावसुदेवघट्टनिवासि-पौराणिकश्रीमोहनदेवात्मजहरिहरदेवकृतायां वैष्णवानन्दिन्यां टिप्पण्यां प्रथमोऽध्यायः ॥ १ ॥

द्वितीये राज्यसंसिद्धिर्वज्रनाभस्य वर्ण्यते । हर्षश्च कृष्णपत्नीनां श्रीकालिन्द्युपदेशतः ॥ १ ॥

श्रीशाण्डिल्यगमनानन्तरम् । परीक्षिद्वज्रनाभौ यत्कृतवन्तौ तदेव शौनकादय ऋषयः श्रीसूतं पप्रच्छुरिति व्यासोक्तिः । शाण्डिल्य इति । तौ-परीक्षिद्वज्रनाभौ-कर्मभूतौ समादिश्य-सम्यक्-स्वानुग्रहपूर्वकमाज्ञां दत्वा । स्वमाश्रमम् -आलस्यादिपरिहारकारणं तपःस्थानविशेषं पर्णशालामिति यावत् । परावृत्ते-गते सति । तौ-अतिप्रसिद्धौ । राजानौ-परीक्षिद्वज्रनाभौ कर्तृभूतौ । किं कर्म चक्रतुस्तच्च कथं-केन प्रकारेण चक्रतुस्तत्कर्म तत्प्रकारं च वदेत्यन्वयः ॥ १ ॥ तत्रोत्तरं वदन् श्रीसूत उवाचेति व्यासोक्तिः । तत इत्यादिना षट्केन । तुरेवार्थे । ततस्तु-शाण्डिल्यगमनानन्तरमेव । परीक्षिता सहस्रशः श्रेणीमुख्याः-तत्तद्व्यवसायिश्रेष्ठाः । इन्द्रप्रस्थात् सम्यगादरपूर्वकमानाय्य मथुरास्थानमापिताः-तान् मथुरायां स्थापितवानित्यर्थः ॥ २ ॥

किञ्च । माथुरानिति । तत्र-मथुरायाम् । तस्यामेव भवान् पूर्वमेव वर्तमानानित्यर्थः । ब्राह्मणांश्चातुर्वेदिनः । तत्रत्यान वानरांश्च पुरातनानित्युभयेषां विशेषणम् । विज्ञायविशेषेण पुराणोक्तरीत्या ज्ञात्वा । स्वाराट्-राजा वज्र-राजा वज्रनाभस्तेषु उभयेषु माननीयत्वं स्थापितवान् स्वप्रजासु तदुभयेषां पूज्यत्वमाज्ञप्तवानित्यर्थः ॥ ३ ॥ वज्र इति सार्द्धकम् । तत्सहायेन-श्रीपरीक्षित्सहायेन । शाण्डिल्यस्याप्यनुग्रहाच्च । लीलास्थानानि अनुक्रमात्-आनुपूर्व्यात् ॥ ४ ॥ विज्ञायेति । विज्ञाय-विशेषेण शास्त्रानुसारेण ज्ञात्वा । तानि च सेवाकुञ्जमहारासवंशीवटस्थलानीत्यभिधया-नाम्ना संस्थाप्य बहून् ग्रामान्-बृहत्सानुनन्दि-ग्रामादीन् ग्रामान् आ-सर्वतोऽवासयत्-तेषु जनान् स्थापितवानित्यर्थः । कुण्डेति सार्द्धकम् । कुण्डानि-राधाकुण्डकृष्णकुण्डादीनि । कूपाः-गोपकूपकृष्णकूपादयः । आदिशब्देन सुरालयारामप्रपादयस्तदेव पूर्तं तेन । शिवाः-चक्रेश्वरभूतेश्वरगोपेश्वरकामेश्वरादयस्तेषां मूर्तिस्थापनेन च । आदिशब्देन श्रीनन्दगृहे गोमयोपलस्थापनादिकर्मकर्त्र्यो वन्यानन्दीदेव्यादयो गृह्यन्ते ॥ ५ ॥ गोविन्दहरिदेवादिमूर्त्यारोपणेन च । आदिशब्देन बलदेवकेशवदेवौ ग्राह्यौ । स्वे राज्ये कृष्णैकभक्तिम्-कृष्णे अव्यभिचारिणीं भक्तिम् नामसंकीर्तनादिलक्षणाम् । ततान-विस्तारितवान् । तेन च स्वयं मुमुदे-हर्षं प्राप । तस्य कृष्णभक्तिमाहात्म्यवृद्धिजोऽयं हर्ष इत्यस्मिन्नर्थे हशब्दः । वज्रस्य शाण्डिल्यशिष्यत्वात्परमकृष्णभक्तत्वं सूचयन्नाह हेति वा ॥ ६ ॥ एवं वज्रनाभस्य ग्रामादिवासनपूर्वकशिवादिमूर्तिस्थापनेन भगवद्भक्तिप्रवर्त्तनात्मकं कर्म दृष्ट्वा तत्प्रजास्तत्कर्मानुमोदनं चक्रुरित्याह प्रजास्त्विति । तस्य-वज्रस्य प्रजास्तु यतः कृष्णकीर्तनतत्पराः । अतः परमानन्दसम्पन्नाः । अतो मुदिताः सत्यः । तस्य-वज्रस्यैव राज्यम्-राजकर्म इत्यर्थः ।

एकदा कृष्णपत्न्यस्तु श्रीकृष्णविरहातुराः । कालिन्दीं मुदितां वीक्ष्य पप्रच्छुर्गतमत्सराः ॥ ८ ॥
श्रीकृष्णपत्न्य ऊचुः—यथा वयं कृष्णपत्न्यस्तथा त्वमपि शोभने । वयं विरहदुःखार्तास्त्वं न कालिन्दि तद्वद ॥ ९ ॥
तच्छ्रुत्वा स्मयमाना सा कालिन्दी वाक्यमब्रवीत् । सापत्न्यं वीक्ष्य तत्तासां करुणापरमानसा ॥ १० ॥
श्रीकालिन्द्युवाच—आत्मारामस्य कृष्णस्य ध्रुवमात्मास्ति राधिका । तस्या दास्यप्रभावेण विरहोऽस्मान्न संस्पृशेत् ॥ ११ ॥
तस्या एवांशविस्ताराः सर्वाः श्रीकृष्णनायिकाः । नित्यसंभोग एवास्ति तस्याः साम्मुख्ययोगतः ॥१२॥
सैव सः सा स एवास्ति वंशी तत्प्रेमरूपिका । श्रीकृष्णनखचन्द्रालिसंगाच्चन्द्रावली स्मृता ॥ १३ ॥
रूपान्तरं च गृह्णाना तयोः सेवातिलालसा । रुक्मिण्यादिसमावेशो मयात्रैव विलोकितः ॥ १४ ॥

तुष्टुवुः-श्लाघयामासुः । न तात्कालिकान्यराज्यमित्येवकारेणान्ययोगव्यवच्छेदो दर्शितः ॥ ७ ॥ तदेवं वज्रस्य पितृव्याज्ञासंमाननजातशाण्डिल्यानुग्रहराज्यसंसिद्ध्या सर्वचिन्ताहानिरुक्ता । इदानीं तस्यैव श्रीकृष्णपत्नीनां संसेवनेन तत्फलरूपश्रीहरिदासोद्धवसमागमादिकमाह यावदध्यायपूर्ति । एकदा-एकस्मिन् समये । कालिन्दीम्-श्रीकृष्णाम् । मुदिताम्-हर्षिताम् । वीक्ष्य-विशेषेण दत्तदृष्टितया दृष्ट्वा । गतमत्सराः—श्रीकालिन्द्युत्कर्षासहनरहिताः पप्रच्छुः ॥ ८ ॥ श्रीकृष्णपत्न्य ऊचुरिति सूतोक्तिः । यथेति । हे शोभने । तथा त्वमपि कृष्णपत्नी असि । कुतो वयं कृष्णविरहदुःखदुःखिताः-स्मः । त्वं न त्वं तद्रहितासीत्यर्थः । तत्कारणं वद-कथय । येनास्माकमपि कृष्णविरहदुःखराहित्यं स्यादिति भावः । तदुपायं न जानामीति न वक्तव्यं यतः कलिं द्यति अवखण्डयतीति कलिन्दस्तत्पुत्र्यास्तव कुलपरंपरागतकलिनिरसनस्वभावत्वादस्मद्दुःखविदारणं तवैव हस्तगतमिति सूचयन्त्यः संबोधयन्ति कालिन्दीति ॥ ९ ॥ तदिति सूतोक्तिः । तत्-कृष्णपत्नीवाक्यं श्रुत्वा । अहो प्रभुपत्न्योऽपि मुह्यन्तीति स्मयमानपद्मसितानना । सा-श्यामरसनिमग्ना श्रीकृष्णा । यतस्तासाम्-कृष्णपत्नीनाम् । तत्-अतिप्रसिद्धम् । सापत्न्यम्-सपत्नीभावम् । वीक्ष्य विशेषेण-अन्तर्भावेण दृष्ट्वा । मत्पतेरेताः पत्न्यो विरहार्ता मा भवन्त्विति करुणापरमानसा-करुणा एव परं केवलं यस्मिन्नेवंभूतं मानसं-हृद्यस्याः । अतो वाक्यमब्रवीदित्यन्वयः । सा स्मयमाना सती वाक्यमब्रवीदित्यन्वयो वा । तत्र सापत्न्यमित्यादि श्रीकृष्णपत्नीवाक्यश्रवणे हेतुः । सारल्यमिति पाठान्तरम् ॥ १० ॥ श्रीकालिन्दी उवाचेति सूतोक्तिः । कालिन्दीवाक्यान्येव दर्शयति । आत्मारामस्येत्यादिसप्तभिः । आत्मारामस्य-आत्मन्येव रमणशीलस्य । श्रीकृष्णस्य-देहदेहिविभागशून्यत्वेन सच्चिदानन्दविग्रहस्यात्मैव राधिकेति ध्रुवम्-निश्चितमेतत् । तस्याः-श्रीराधिकायाः । अस्मानिति बहुवचनम् । तत्तु रुक्मिण्यादिसप्तमहापट्टमहिषीसाहित्याभिप्रायेण । तासामपेक्षया स्वस्य गुर्वीत्वमाननेन वा । अस्मान्न संस्पृशेदिति संभावनायां लिङ् । स्पर्शस्य संभावनाऽपि नास्तीत्यर्थः । अनेन युष्माकं तु तद्दास्याभावाच्छ्रीकृष्णविरहः संस्पृशेदेवेति ध्वनितम् । मामिति पाठे तु सुगमम् ॥ ११ ॥

किञ्च । तस्या इति । यद्यपि श्रीकृष्णनायिकाः सर्वाः यूयं वयं च । तस्याः श्रीराधिकाया एव अंशविस्ताराः-अंशरूपाः स्मः । तथापि तस्याः-श्रीराधिकायाः साम्मुख्ययोगतः-दास्ययोगेन । अस्माकमेव नित्यसंभोगः-नित्यं श्रीकृष्णरहस्यक्रीडासुखमस्ति । न तु युष्माकं श्रीराधासाम्मुख्ययोगाभावादिति भावः । आसीदिति पाठे तु सुगमम् । यतः सर्वाः यूयं वयं च श्रीराधिकांशविस्ताराः । अतस्तद्दास्यप्रभावेण सर्वासामस्माकं पूर्वं द्वारकायां श्रीकृष्णेन नित्यसंभोग आसीदेवेत्यनेन तदानीं तासां श्रीराधारूपकृष्णदास्याभावात् श्रीकृष्णेन नित्यसंभोगाभावः सूचितः ॥ १२ ॥ ननु कथं तव राधिकादास्यमात्रेणैव तत्प्रियप्राप्तिर्यया तव तेन नित्यसम्भोग इति चेत् तयोः स्वरूपज्ञानादिति तत्स्वरूपमाह सेति । यद्वा ननु पूर्वं द्वारकायां श्रीराधादास्यं विनापि तत्प्रियदास्यमात्रादेव कथं सर्वासामस्माकं तेन नित्यसंभोग आसीत् तत्राह सेति । यद्वा ननु राधासाम्मुख्ययोगस्तु पूर्वमपि नास्माकमभूत् कथमुच्यते त्वया साम्मुख्ययोगतोऽस्माकं कृष्णेन नित्यविहार इत्याशंक्याह सेति । यद्वा राधाकृष्ण इति नामभेदेन विख्यातमपि तयोर्गौरश्यामतेजसोर्द्वैविध्यं वस्तुतस्त्वैक्यमेवेत्याह । सेति पादेन । सा-राधैव सः-श्रीकृष्णः । सः-श्रीकृष्ण एव सा-राधास्ति । तदेवोक्तं श्रीसदाशिवेन 'एक एवमभूद् द्वेधा राधामाधवरूपकमि'ति । एवं श्रीराधाकृष्णयोः स्वरूपं निरूप्य तत्प्रेमरूपत्वाद्वंशीस्वरूपमपि निरूपयति वंशीति द्वितीयपादेन । वंशी तु तयोः—श्रीराधाकृष्णयोः प्रेम—परस्परस्नेहस्तं रूपयति निरूपयति, प्रवर्तयतीति यावत् तादृशी । सैव वंशी चन्द्रावली नाम गोपी अभूदिति सहेतुकमाह । श्रीकृष्णेति । सा च वंशी । रूपान्तरम्-प्रतिपक्षगृथश्रीरूपं गृह्णाना श्रीकृष्णहस्तनखचन्द्रालिसङ्गाद्धेतोश्चन्द्रावली स्मृता । कृष्णभक्तैरिति शेषः ॥ १३ ॥

तस्याः रूपान्तरग्रहणे हेतुमाह । तयोः-श्रीराधाकृष्णयोः सेवायामतिलालसा यस्या इति । सेवा चात्र द्वयो रसपोषणरूपा ज्ञेया । प्रातिपक्ष्यमन्तरा ईर्ष्यमाना भावेन रसपोषणानुपपत्तेः । किञ्च रुक्मिण्यादिसमावेश इत्यर्द्धकेन । अत्रैव-श्रीराधाकृष्णपरस्परप्रेमनिरूपकवंश्यवतारचन्द्रावल्यामेव । रुक्मिण्याद्यष्टमहापट्टमहिषीणामपि समावेशः-सम्यक्-स्वरूपज्ञानपूर्वकमावेशः-प्रवेशो मया पूर्वं विलोकितो दृष्टः । यद्वा एवं प्रासङ्गिकं समाप्य प्रकृतं वदन्ती तावद्रुक्मिण्याद्यष्टमहापट्टमहिष्यः किंस्वरूपाः कुत्र च गता इत्याशङ्क्य ता अपि राधांशत्वाद्राधायामेव लीना इत्याह । रुक्मिण्यादिसमावेशः इत्यर्द्धकेन । अत्रैव श्रीराधायामेव ।

युष्माकमपि कृष्णेन विरहो नैव सर्वतः । किन्तु एवं न जानीथ तस्माद्व्याकुलतामिताः ॥ १५ ॥
एवमेवात्र गोपीनामक्रूरावसरे पुरा । विरहाभास एवासीदुद्धवेन समाहितः ॥ १६ ॥
तेनैव भवतीनां चेद्भवेदत्र समागमः । तर्हि नित्यं स्वकान्तेन विहारमपि लप्स्यथ ॥ १७ ॥
श्रीसूत उवाच—एवमुक्तास्तु ताः पत्न्यः प्रसन्नां पुनरब्रुवन् । उद्धवालोकनेनात्मप्रेष्ठसंगमलालसा ॥ १८ ॥
श्रीकृष्णपत्न्य ऊचुः—धन्यासि सखि कान्तेन यस्या नैवास्ति विच्युतिः ।
यस्ते स्वार्थसंसिद्धिस्तस्या दास्यो बभूविम ॥ १९ ॥
परन्तूद्धवलाभे स्यादस्मत्सर्वार्थसाधनम् । तथा वदस्व कालिन्दि तल्लाभोऽपि यथा भवेत् ॥ २० ॥
श्रीसूत उवाच—एवमुक्ता तु कालिन्दी प्रत्युवाचाथ तास्तथा । स्मरन्ती कृष्णचन्द्रस्य कलाषोडशरूपिणी ॥ २१ ॥

शेषं पूर्ववत् । अनेन रुक्मिण्याद्यष्टमहापट्टमहिषीणां श्रीराधांशत्वात् श्रीराधाद्वारा कृष्णप्राप्तिः सूचिता । तया च तासां तद्विरहहानिश्च ध्वनिता । राज्ञीभ्य एतत्सर्वमुपदेशादिकं कालिन्द्याः साक्षादधिदैवरूपेणेति बोद्धव्यम् । यद्वा वेदे हि ता 'आपोऽब्रुवन्नि'त्यादि-श्रुतिदर्शनात् सर्वेषामभिमानिन्यो देवताः सन्तीति सिद्धान्तितमतः कालिन्दीसरिदभिमानिदेवतारूपेणेति बोद्धव्यम् ॥ १४ ॥ ननु रुक्मिण्यादीनामिव श्रीकृष्णविरहाभावोऽस्माकमपि किमिति न स्यात् तत्राह युष्माकमिति । युष्माकमपि श्रीकृष्णेन विरहः सर्वतो बहिरन्तरतो नैवास्ति । युस्माकं राधांशत्वात् राधायाश्च कृष्णात्मत्वादिति भावः । अनेन विरहाभास एवोक्तः । तर्हि कथमस्माकमतिवैकल्यं तत्राह । किन्त्विति-तत्कारणं शृणुतेत्यर्थः । एवं श्रीराधागोपालस्वरूपज्ञानपूर्वकश्रीराधादास्यप्रभावादिकं स्वस्य विरहाभावं च यूयं न जानीथ । तस्मात् तदज्ञानाद्धेतोः व्याकुलतामिताः प्राप्ताः । वस्तुतो विरहो नास्तीत्यर्थः । यूयमिति पाठान्तरम् ॥ १५ ॥ किञ्च । एवमिति । एवमेव यथा युष्माकं तथैवेत्यर्थः । अत्र वृन्दावने । अक्रूरावसरे तदागमनसमये इत्यर्थः । गोपीनामपि विरहाभास एवासीत् । न तु पूर्णविरह इत्येवकारार्थः । स विरहाभास उद्धवेन समाहितः सम्यक् श्रीराधागोपालस्वरूपनिरूपणपूर्वकप्रियसन्देशकथनप्रकारेण पृष्ठ्यामाक्षिप्त इत्यर्थः । अनेनोद्धवद्वारा गोपीनां श्रीकृष्णरहस्य-क्रीडाप्राप्तिः सूचिता । समाहिता इति पाठे गोपीनां विशेषणम् । सावधानचित्ताः कृताः । समाधिं प्रापिता इति वा ॥ १६ ॥

ननु तथाऽस्माकमपि कथं श्रीकृष्णरहस्यक्रीडानित्यप्राप्तिः स्यात् । तत्राह तेनेति । तेन-उद्धवेनैव । भवतीनामपि चेत् यदि अत्र-वृन्दावने समागमो भवेत् । तर्हि यूयमपि स्वप्रियपतिना श्रीकृष्णेन । विहारं रहस्यक्रीडाम् । नित्यमेव लप्स्यथ प्राप्स्यथ इत्यन्वयः ॥ १७ ॥ एवमिति सूतोक्तिः । एवं श्रीराधादास्येन स्वस्वरूपज्ञानपूर्वकोद्धवसमागमोपायानुपदिष्टप्रकारेणोक्तास्ताः सकला विकला अबलाः श्रीरोहिण्याद्याः षोडशसाहस्रं श्रीकृष्णपत्न्यः । प्रसन्नां कालिन्दीमिति विशेष्याध्याहारः । श्रीकृष्णतेजोऽ-धिष्ठानसूर्यतनयां श्रीकृष्णां पुनरब्रुवन्-धन्यवाददानपूर्वकं पुनः प्रश्नमकुर्वन्नित्यर्थः । बहुवचनान्तपाठे पत्नीनां विशेषणम् । तत्र कालिन्दीमिति कर्माध्याहारः । कथंभूताः उद्धवालोकनेन-तद्दर्शनेन स्वात्मप्रेष्ठस्य यः संगमस्तस्मिन् लालसाऽतिस्पृहा यासां ता इति हेतुगर्भविशेषणम् ॥ १८ ॥ श्रीकृष्णपत्नीवाक्यान्येव दर्शयति धन्येति द्वयेन । सखित्वेन त्वत्तोऽस्मद्दुःखनिवृत्तिरुचितैवेति सूचयन्त्यः सम्बोधयन्ति सखीति-हे कालिन्दि । यस्यास्तव कान्तेन-सर्वसुखानां पर्य्यवसानास्पदेन स्वपतिना श्रीकृष्णेन विच्युति-र्वियोगो नास्त्यतस्त्वं धन्यासि । यतो-यस्याः सकाशात् ते-तव । स्वार्थस्य-कृष्णेन नित्यविहारस्य । संसिद्धिः-सम्यक् प्राप्तिस्तस्याः-श्रीराधिकाया दास्यो वयमपि बभूविम इति 'छन्दसि लुङ् लङ् लिट' इति वर्तमाने भविष्यति वा लिट् ॥ १९ ॥ परन्त्विति । किन्तु-वयं किञ्चित्प्रार्थयाम इत्यर्थः । उद्धवलाभेऽस्मत्सर्वार्थसाधनम्-सर्वार्थसिद्धिः स्यात् । अतो यथा नः-अस्माकं तल्लाभो भवेत् तथा वदस्वेत्यन्वयः । उद्धवलाभे यथाऽस्मत्सर्वार्थसाधनं स्यात् । तथाऽस्मान् वदस्वेति । 'भासनोपसम्भाषे'ति सूत्रेण वदधातो-रात्मनेपदम् । यथा तल्लाभः उद्धवलाभोऽपि भवेत् । तथा चास्मान् वदस्वेत्यन्वयो वा । 'तथोपदिश नो देवी'ति पाठान्तरम् ॥ २० ॥ एवं धन्येत्याद्युक्तप्रकारेणोक्ता कालिन्दी-स्वनाम्नैव परदुःखविदारणसमर्था श्रीकृष्णा यतः श्रीकृष्णचन्द्रस्य कलाषोडरूपिणी अतस्ताः रोहिण्याद्या अपि तथा कृष्णकलात्वेन स्मरन्ती सती । यद्वा तथा तासां विरहदुःखं स्मरन्ती सती । यद्वा तथा तासामुद्धवमेलनप्रकारं स्मरन्ती सती । अथ कार्त्स्न्येन । 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ ।' इत्यमरः । ताः प्रत्युवाचेत्यन्वयः । यद्वा एवमुक्ता कालिन्दी । यतः कलाषोडशरूपिणी षोडशकलापूर्णा इत्यर्थः । अतः कृष्णचन्द्रस्य कृष्णचन्द्रं स्मरन्ती सती । अधीगर्थदयेशां कर्मणी'ति कृष्णचन्द्रस्येति कर्मणि षष्ठी ।' यथा कृष्णपत्नीभिः पृष्टा तथा अथ कार्त्स्न्येन ताः प्रत्युवाचेत्यन्वयः । यद्वा एवमुक्ता कालिन्दी तु कृष्णचन्द्रं स्मरन्ती सती यथा तासामुद्धवसमागमः स्यात् तथा तं प्रकारं अथ कार्त्स्न्येन ताः कृष्णवियोगेन तनुमात्रावशिष्टाः सपत्नीः प्रत्युवाच । तत्र हेतुः कलाषोडशरूपिणीति कलानां षोडश कलाषोडश षोडशोपलक्षितं षोडशसहस्रं रोहिण्याद्याः रूपं यस्याः सा । 'कलां षोडशरूपिणीमि'ति च पाठे श्रीराधिकाम् । तथात्र तदेति पाठान्तरेत्वति सुगमम् ॥ २१ ॥ कालिन्दीवाक्यान्येव दर्शयति । साधनभूमिरित्यादिषड्भिः व्रजता-स्वधाम गच्छता श्रीकृष्णेन या नदरा-

साधनभूमिर्बदरी व्रजता कृष्णेन मन्त्रिणे प्रोक्ता। तत्रास्ते स तु साक्षात् तद्वयुनं ग्राहयँल्लोकान् ॥ २२ ॥
फलभूमिर्व्रजभूमिर्दत्ता तस्मै पुरैव सरहस्यम्। फलमिह तिरोहितं सत् तदिहेदानीं स उद्धवोऽलक्ष्यः ॥ २३॥
गोवर्द्धनगिरिनिकटे सखीस्थले तद्रजःकामः। तत्रत्याङ्कुरवल्लीरूपेणास्ते स उद्धवो नूनम् ॥ २४ ॥
आत्मोत्सवरूपत्वं हरिणा तस्मै समर्पितं नियतम्। तस्मात्तत्र स्थित्वा कुसुमसरःपरिसरे सवज्राभिः॥ २५ ॥
वीणावेणुमृदङ्गैः कीर्तनकाव्यादिसरससङ्गीतैः। उत्सव आरब्धव्यो हरिरतलोकान् समानाय्य ॥ २६ ॥

तत्रोद्धवावलोको भविता नियतं महोत्सवे वितते।
यौष्माकीणामभिमतसिद्धिं सविता स एव सवितानाम् ॥ २७ ॥

श्रीसूत उवाच—इति श्रुत्वा प्रसन्नास्ताः कालिन्दीमभिवन्द्य तत्। कथयामासुरागत्य वज्रं प्रति परीक्षितम् ॥ २८ ॥
विष्णुरातस्तु तच्छ्रुत्वा प्रसन्नस्तद्युतस्तदा। तत्रैवागत्य तत्सर्वं कारयामास सत्वरम् ॥ २९ ॥
गोवर्द्धनाददूरेण वृन्दारण्ये सखीस्थले। प्रवृत्तः कुसुमाम्भोधौ कृष्णसंकीर्तनोत्सवः ॥ ३० ॥

बदर्य्याश्रमोपलक्षिता भूमिः सा साधनभूमिरिति मन्त्रिणे श्रीमदुद्धवाय प्रोक्ता प्रकर्षेण युक्तिपूर्वककथनेनोक्तैव। तद्द्वारा तत्रत्यजनोद्धरणाय न तु तपस्तप्तुं तस्मै दत्तेति भावः। तदनन्तरं सः हरिदासोद्धवस्तु लोकान् तत्रत्यसाधकभक्तजनान् तद्वयुनम्-श्रीकृष्णविषयकं ज्ञानं ग्राहयन्। तत्र साधनभूमिबदर्य्याश्रमे साक्षात् दृश्य एवास्ते इत्यन्वयः ॥ २२ ॥ ननु साधनभूमिरित्युक्त्या काचित्फलभूमिरपि स्यादेव सा का कस्मै च दत्तेत्याशङ्क्याह फलभूमिरिति। नित्यवृन्दावनविहारिणा श्रीकृष्णेन। साधनभूमि-बदर्य्याश्रमकृततपःफलभूमिर्या व्रजभूमिः सा तु तस्मै परमप्रेमिणे उद्धवाय निवस्तुं सरहस्यम् स्वरासक्रीडास्थलादिज्ञानसहितं यथा स्यात्तथा पुरैव दत्ता। उद्धवस्य फलभूमिरेव योग्या। तस्य चरमशरीरित्वादिति भावः। ननु श्रीमानुद्धवस्तत्र केन रूपेणास्ते। तत्राह फलमिति। इह व्रजभूमौ। सत् सनातनम्। फलम् श्रीकृष्णाख्यम्। तिरोहितम् अन्तर्द्धाय स्थितमित्यर्थः। तत् तस्मात्। व्रजभूमावत्र सनातनफलाभिलाषी श्रीमदुद्धवोऽपि अलक्ष्य आस्ते-अदृश्य एव स्थित इत्यर्थः ॥ २३ ॥

ननु तर्हि कथमस्माकमत्र तद्दर्शनं स्यात् तत्राह। गोवर्द्धनगिरिनिकटे इति। कृष्णसखीनां गोपीनाम्। यत् स्थलं तस्मिन्। यतस्तद्रजःकामः-गोपीचरणकमलरजोऽभिलाषी। 'आसामहो चरणरेणुजुषामहं स्यामि'त्युक्तेः। अतस्तत्रत्याङ्कुरवल्लीरूपेण सखीस्थलभवाङ्कुरवल्लीरूपेण स्थित इति नूनम्-निश्चितमेव नात्र संदेहः कार्य्य इत्यर्थः ॥ २४ ॥ ननु कुतस्तस्याङ्कुरवल्लीरूपधारणे शक्तिर्जाता तत्राह आत्मोत्सवरूपत्वमित्यर्द्धेन। हरिणा-भक्तमनोहारिणा श्रीकृष्णेन नियतं निश्चलमात्मोत्सवरूपत्वम्-स्वस्योत्सवरूपत्वम्। यद्वा आत्मनः-उद्धवस्य उत्सवो यस्मात् तद्रूपत्वम्। तस्मै-श्रीमदुद्धवाय समर्पितम्-सम्यक् कृपापूर्वकं दत्तम्। अतस्तस्य भगवद्रूपत्वेन सर्वभगवद्रूपवृन्दावनभववृक्षाङ्कुरवल्लीरूपधारणसामर्थ्यं जातमिति भावः। उक्तं च भगवता श्रीकृष्णेन 'नोद्धवोऽण्वपि मन्न्यूनो यद्गुणैर्नार्दितः प्रभुरि'ति। तर्हि कस्तस्य प्राप्त्युपायस्तत्राह तस्मादिति सार्द्धेन। तस्मात्-श्रीमदुद्धवस्याङ्कुरवल्लीरूपेण स्थितत्वात् कुसुमसरःपरिसरे-कुसुमसरसः समीपे 'पर्य्यन्तभूः परिसर' इत्यमरः। सवज्राभिः-वज्रनाभेन सह वर्तमानाभिर्युष्माभिः। तत्र-सखीस्थले स्थित्वा ॥ २५ ॥ हरिरतलोकान्-कृष्णकीर्तनपरान् भक्तजनान् सम्यगादरपूर्वकमानाय्य। वीणावेणुमृदङ्गैर्वाद्यैः सह यानि कीर्तनकाव्यादिसरससंगीतानि-कीर्तनं च काव्यं च कीर्तनकाव्ये ते आदिर्येषां नाटकनिबन्धादीनां ते कीर्तनकाव्यादयस्तेषां यानि रसैः-शृङ्गारादिभिः सह वर्तमानानि संगीतानि सम्यक्-ग्राममूर्छनादिप्रकारेण गानानि तैः तत्र-कीर्तनम्-कृष्णविषयकसंकीर्तनम्। काव्यं नाम 'अदोषौ सगुणौ सालङ्कारौ शब्दार्थावि'ति वामनः। 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः कापी'ति काव्यप्रकाशकारः। कविवाङ्निर्मितिः काव्यमिति कर्णपूरः। उत्सव आरम्भितुं योग्य इत्यन्वयः ॥ २६ ॥ ततः किं भविष्यति तत्राह। तत्र-तस्मिन् श्रीकृष्णनामसंकीर्तनरूपे महोत्सवे वितते सति। उद्धवावलोकः-उद्धवदर्शनम्। नियतम्-निश्चितमेव भविता-भविष्यति। भावीति पाठान्तरम्। सः-उद्धव एव। युष्माकमियम्-यौष्माकीणा ताम्। सवितानाम्-विस्तारसहितामभिमतसिद्धिम्-मनोऽभिलाषितप्राप्तिम्। सविता-जनयिष्यतीत्यन्वयः ॥ २७ ॥ श्रीसूत उवाचेति व्यासोक्तिः। इत्येवं-साधनभूमिरित्यादिप्रकारकं श्रीकालिन्दीकथनं श्रुत्वैव प्रसन्नास्ताः-श्रीकृष्णपत्न्यः। कालिन्दी-मभिवन्द्य-नमस्कृत्य। आगत्य च प्रासादमिति शेषः। तत्-कालिन्दीकथनं वज्रं परीक्षितं च प्रति कथयामासुरित्यन्वयः ॥ २८ ॥ विष्णुरात इति। विष्णुरातः-श्रीपरीक्षित्। तुकाराद्वज्रनाभोऽपि तत्-श्रीकालिन्द्युपदिष्टोद्धवप्राप्त्युपायरूपमातृकथनं श्रुत्वा प्रसन्नः सन्। तद्युतस्ताभिर्युतः। तदैव-तस्मिन्नेव समये। तत्रैव-सखीस्थले एवागत्य यच्छ्रीकालिन्द्युपदिष्टश्रीकृष्णकीर्तनमहोत्सवादिकं तत्सर्वं यथा स्यात्तथा कारयामासेत्यन्वयः ॥ २९ ॥ तत्रापि क कारयामासेत्यपेक्षायां तत्स्थलं दर्शयन् तत्रैव संकीर्तनमहोत्सवप्रवृत्तिं संनिरूपयति गोवर्द्धनादिति। ततश्च वृन्दारण्ये तत्रापि गोवर्द्धनसमीपे एव वर्तमाने सखीस्थले तत्रापि कुसुमसरसि तत्तीर इत्यर्थः। कृष्णसंकीर्तनोत्सवः प्रवृत्तः 'प्रपन्न' इति पाठे प्राप्त इत्यर्थः ॥ ३० ॥ तमेव वर्णयति वृषेति। कीर्तनाश्रया हेतुना। वृषभा-

वृषभानुसुताकान्तविहारे कीर्तनश्रिया । साक्षादिव समावृत्ते सर्वेऽनन्यदृशोऽभवन् ॥ ३१ ॥
ततः पश्यत्सु सर्वेषु तृणगुल्मलताचयात् । आजगामोद्धवः स्रग्वी श्यामः पीताम्बरावृतः ॥ ३२ ॥
गुञ्जामालाधरो गायन् वल्लवीवल्लभं मुहुः । तदागमनतो रेजे भृशं संकीर्तनोत्सवः ॥ ३३ ॥
चन्द्रिकागमतो यद्वत् स्फाटिकाट्टालभूमणिः । अथ सर्वे सुखाम्भोधौ मग्नाः सर्वं विसस्मरुः ॥ ३४ ॥
क्षणेनागतविज्ञाना दृष्ट्वा श्रीकृष्णरूपिणम् । उद्धवं पूजयांचक्रुः प्रतिलब्धमनोरथाः ॥ ३५ ॥

इति श्रीस्कन्दपुराणेऽखिलेष्टश्रीमद्भागवतमाहात्म्ये द्वितीयोऽध्यायः ।

## अथ तृतीयोऽध्यायः

श्रीसूत उवाच—अथोद्धवस्तु तान् दृष्ट्वा कृष्णकीर्तनतत्परान् । सत्कृत्याथ परिष्वज्य परीक्षितमुवाच ह ॥ १ ॥
श्रीउद्धव उवाच—धन्योऽसि राजन् कृष्णैकभक्त्या पूर्णोऽसि नित्यदा । यस्त्वं निमग्नचित्तोऽसि कृष्णसंकीर्तनोत्सवे ॥ २ ॥
कृष्णपत्नीषु वज्रे च दिष्ट्या प्रीतिः प्रवर्तिता । तवोचितमिदं तात कृष्णदत्तांगवैभव ॥ ३ ॥
द्वारकास्थेषु सर्वेषु धन्या एते न संशयः । येषां व्रजनिवासाय पार्थमादिष्टवान् प्रभुः ॥ ४ ॥

नुसुतायाः-श्रीराधायाः कान्तः-प्रियः श्रीकृष्णस्तस्य विहारे नृत्ये । साक्षादिव-प्रत्यक्षत इव । सम्यक्-वीणावेणुमृदङ्गादिवादनोत्कृष्ट-प्रकारेण आ-सर्वतो वृत्ते-जाते सति सर्वे-परीक्षिद्वज्रनाभादयः । अनन्यादृशः-न नामसंकीर्तनादन्यत्र देहादौ दृक् ज्ञानं येषां ते तथा-भूता अभवन्नित्यन्वयः ॥ ३१ ॥ ततो यद्वृत्तं तदाह तत् इति सार्द्धेन । ततस्तदनन्तरमेव सर्वेषु पश्यत्सु सत्सु । तृणादिसमूहा-दुद्धव आजगामेत्यन्वयः । तमेव विशिनष्टि स्रग्वीति-पुष्पमालाधारी श्यामः पीताम्बरावृत इति त्रिभिर्विशेषणैः सतडिदिन्द्र-धनुर्घनश्यामत्वद्योतनम् ॥ ३२ ॥ गुञ्जामालाधर इत्यनेन तस्य कृष्णवेषधारित्वं सूचितम् । गोपीप्रियम्-श्रीकृष्णम् । मुहुर्वारं वारम् । तदागमनतः-उद्धवागमनेन संकीर्तनोत्सवः । यद्वा तत्रस्थो जन इत्यर्थः । भृशमत्यन्तम् रेजे-शुशुभे ॥ ३३ ॥

तत्र दृष्टान्तमाह चन्द्रिकेत्यर्द्धेन । यथा समुद्रोद्भूतचन्द्रस्य चन्द्रिकागमनेन स्फटिकमणिरचिताट्टालभूमणिः शोभते तथेति । अत्र प्रेमरससमुद्रोद्भूतोद्धव एव चन्द्रस्तत्कान्तिरेव चन्द्रिका वज्रादिमण्डली एव स्फाटिकाट्टालभूस्तन्मणिरिव तत्रस्थो जन इति यथा-यथमूह्यम् । भाति स्फाटिकाट्टालभूर्यथा । भाति स्फाटिकाट्टालभूमिका । स्फाटिकाट्टालगोपुरमिति च पाठान्तरेषु सुगमम् । अथेत्य-र्द्धकम् , उद्धवगमनानन्तरम् । मग्नाः संतः । सर्वम्-देहगेहादिकम् ॥ ३४ ॥ क्षणेनेति । क्षणेनागतं प्राप्तं विज्ञानं हरिदासोऽयमुद्धव इति तत्साक्षात्कारो येषां ते वज्रादयः । उद्धवं श्रीकृष्णरूपिणं दृष्ट्वा । प्रतिलब्धस्तत्प्राप्तिरूपो मनोरथो यैस्तथाभूतास्तं पूजयांचक्रु-रर्घ्यपाद्यादिभिरिति शेषः ॥ ३५ ॥

इति श्रीस्कन्दपुराणेऽखिलेष्टश्रीमद्भागवतमाहात्म्ये खाण्डलर्षिवंशोद्भवमथुरावसुदेवतीर्थनिवासिपौराणिक
श्रीमोहनदेवात्मजहरिहरदेवकृतायां वैष्णवानन्दिन्यां टिप्पण्यां द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्भागवतं शास्त्रं तृतीये चोद्धवेन वै । वज्राय श्रावितं तेन कृष्णप्राप्तिर्निगद्यते ॥ १ ॥

तदेवं द्वितीयाऽध्याये श्रीहरिदासोद्धवसमागमादिकमुक्तम् । तदनन्तरं यद्वृत्तं तच्छ्रीसूत उवाचेति व्यासोक्तिः । अथेति । अथ-पूजनानन्तरम् । उद्धवस्तु परीक्षिदादीन् श्रीकृष्णकीर्तनतत्परान् दृष्ट्वा । अहो यूयमेव सफलजन्मभाज इति वचनेन सत्कृत्य । अथ परिष्वज्य देहेनालिङ्गय च । वैष्णवे बन्धुसत्कृत्येति भगवदुक्तेः । परीक्षितमुवाच परीक्षिता सह सम्भाषणे न तस्य कश्चि-त्संदेह इति सूचयन्नाह हेति ॥ १ ॥

उद्धवोक्तिमेव दर्शयति तदेपामित्यन्तेन ग्रन्थेन । हे राजन्-प्रेमश्रिया विराजमानः । यस्त्वं कृष्णैकभक्त्या-कृष्णे एकया-अव्यभिचारिण्या भक्त्या-अनुरागलक्षणया नित्यदा पूर्णोऽसि । अतस्त्वं धन्यः-पुण्यवानसि । 'सुकृती पुण्यवान् धन्य' इत्यमरः । ननु कथं त्वया मयि कृष्णैकभक्तिपूर्णत्वं ज्ञायते तत्राह । यस्त्वमित्यादि तदुक्तमभिज्ञैः 'कुलं पवित्रं जननी कृतार्था वसुन्धरा पुण्यवती च तेन । अपारसंकीर्तनसागरेऽस्मिन् लीनं परे ब्रह्मणि यस्य चेतः' इति । अस्यार्थः । कथंभूते संकीर्तनसागरे परे-सर्वोत्कृष्टे पुनः कथंभूते-ब्रह्मणि-व्यापके । अन्यत्सुबोधम् ॥ २ ॥ किञ्च । कृष्णपत्नीष्विति । कृष्णपत्नीषु वज्रनाभे च प्रीतिः-'माहात्म्य-ज्ञानपूर्वो यः सुदृढः सर्वतोऽधिकः । स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथेति नारदपञ्चरात्रात् । 'सा परानुरक्तिरीश्वरे' इति शाण्डिल्यसूत्राच्च । माहात्म्यज्ञानपूर्वकः कृष्णविषयकः सुदृढस्नेहः-कृष्णानुरागलक्षणा भक्तिरिति यावत् । त्वया प्रवर्तिता इति दिष्ट्या-भद्रं जातमित्यर्थः । तातेति स्नेहेन संबोधनम् । कृष्णेन दत्तोऽङ्गवैभवो यस्मै तत्संबुद्धौ । हे कृष्णदत्ताङ्गवैभव । अत इदं-कृष्णभक्तिप्रवर्तनं तवोचितमेव ॥ ३ ॥ एवं परीक्षिते धन्यवादं दत्त्वा वज्रादीनामपि धन्यत्वं निरूपयति द्वारकेति । द्वारकास्थेषु

श्रीकृष्णस्य मनश्चन्द्रो राधास्यप्रभयान्वितः । तद्विहारवनं गोभिर्मण्डयन् रोचते सदा ॥ ५ ॥
कृष्णचन्द्रः सदापूर्णस्तस्य षोडश याः कलाः । चित्सहस्रप्रभाभिन्ना अत्रास्ते तत्स्वरूपता ॥ ६ ॥
एवं वज्रस्तु राजेन्द्र प्रपन्नभयभञ्जकः । श्रीकृष्णदक्षिणे पादे स्थानमेतस्य वर्तते ॥ ७ ॥

जनेषु मध्ये एते-वज्रादय एव धन्याः-भाग्यसंपन्नाः सन्तीति, 'यत्र क्रियापदं नास्ति तत्र सत्तार्थधातोरध्याहारः कर्तव्यः' इति वैयाकरणाः । न संशयस्तेषां भाग्यसंपन्नत्वे संदेहो नास्तीत्यर्थः । तेषां भाग्यसंपन्नत्वे हेतुमप्याह येषामित्यादि । येषां-वज्रादीनाम् । व्रजनिवासाय व्रजनिवासार्थं, तादर्थ्ये चतुर्थी । यद्वा अप्रयुज्यमानतुमुनन्तस्य कर्मणि चतुर्थी, व्रजनिवासाय-व्रजनिवासं कारयितुम् । प्रभुः-श्रीकृष्णः । पार्थमर्जुनम् । आदिष्टवानाज्ञप्तवान् ॥ ४ ॥

ननु तत्र तेषां वासायाज्ञापने किं कारणं तत्राह श्रीकृष्णस्येति । यद्वा ननु तत्र वासे कोऽतिशयो येन धन्यत्वमुच्यते तत्राह श्रीकृष्णस्येति । यद्वा यतः स्वयमाज्ञापयितापि तत्रैव निवसतीत्याशयेनाह श्रीकृष्णस्येति । श्रीकृष्णस्य मनश्चन्द्रो राधास्यप्रभयान्वितः-तन्मुखप्रभान्वितत्वेन प्राप्ताधिककान्त्या । तद्विहारवनम्-श्रीराधाविहारवनम् श्रीवृन्दावनमिति यावत् । गोभिः-शुद्धसात्त्विकतत्तद्वृत्तिरूपकिरणैर्मण्डयन्नलङ्कुर्वन् व्रजे एव सदा रोचते । मन एव चन्द्र इत्यनेन यथा चन्द्रे प्रभायाः स्वाभाविकी स्थितिस्तथा कृष्णमनसि राधामुखस्येति ज्ञेयम् । तथा च व्रजे श्रीराधाकृष्णयोर्नित्यविहारस्थलत्वात्तन्निवासाज्ञापनेन वज्रादीनां धन्यत्वं युक्तमेवेति भावः । मूर्त्या नाम्ना च कृष्णस्य-श्रीकृष्णस्य-मनश्चन्द्रोऽपि कृष्ण एव । अतो राधास्यप्रभया तन्मुखकान्त्यान्वितो युक्तो भूत्वा रोचते इत्यन्वयो वा । तदुक्तं कृष्णसख्या ललितया "मूर्त्या नाम्ना च कृष्णस्तदपि च यमुनाकूलनीरे विहारः किञ्च श्यामाभिराभिः कुवलयदलदृग्वल्लवीभिः प्रसङ्गः । कुञ्जे ध्वान्तैकपुञ्जे पुनरधिवसतिः केकिपिच्छावचूडस्तस्मादस्माकमन्तस्तिमिरततिहृतिं वक्ति वेदोऽपि चित्रम् ॥" अत्रोत्तरं श्रीराधासख्या विशाखायाः-"गौरा भृङ्गकुरङ्गकोकिलगणा गौराः शुकाः सारिका गौराः सर्वमहीरुहा वनचया गौराणि पुष्पाणि च । गौराश्चक्रकपोतबर्हिविहगा गौरं च वृन्दावनं राधादेहरुचाद्भुतः सखि स च श्यामोऽपि गौरायते ॥" इति ॥ ५ ॥ न केवलमेषां धन्यत्वमात्रमपि तु कृष्णस्वरूपत्वमपीत्याशयेनाह कृष्णचन्द्र इति द्वयेन । कृष्णचन्द्रः सदापूर्णः । तस्य याः-वैष्णवशास्त्रोक्ताः कलाः । तथाहि "श्रीर्भूः कीर्तिरिला लीला कान्तिर्विद्येति सप्तकम् । विमलोत्कर्षिणी ज्ञाना क्रिया योगा तथैव च ॥ प्रह्वी सत्या तथेशाना नवमानुग्रहा मता ॥" यद्वा स्कन्दपुराणस्थप्रभासखण्डोक्ताः कलाः । तथाहि "ततो गोप्यो महादेवि विद्या याः षोडश स्मृताः । तासां नामानि ते वक्ष्ये तानि ह्येकमनाः शृणु ॥" "लम्बिनी १ चन्द्रिका २ कान्ता ३ क्रूरा ४ शीता ५ महोदया ६ भीषणी ७ नन्दनी ८ शोका ९ सुपूर्वविमला १० ऽक्षरा ११। शुभदा १२ शोभना १३ पुण्या १४ हंसी १५ सीता १६ कलाः क्रमात् ॥ हंस एव मतः कृष्णः परमात्मा जनार्दनः । तस्य ताः शक्तयो देवि षोडशैव प्रकीर्तिताः ॥ चन्द्ररूपी मतः कृष्णः कलारूपास्तु ताः स्मृताः । सम्पूर्णमण्डला तासां मालिनी षोडशी कला ॥ प्रतिपद्दिनमारभ्य संचरत्याशु चन्द्रमाः । षोडशैव कला यास्तु गोपीरूपा वरानने ॥ एकैकशस्ताः संभिन्नाः सहस्रेण पृथक् पृथक् । एवं ते कथितं देवि रहस्यं ज्ञानसम्भवम् ॥ य एवं वेद पुरुषः स ज्ञेयो वैष्णवो बुधैः ॥' इति । गोपस्य स्त्रियो गोप्यः राज्य इत्यर्थः । 'गोपो भूपेऽपीति नानार्थवर्गः । पुंयोगादाख्यायामिति ङीप् । सर्वं गोपायन्तीति गोप्यः शक्तयो वा इति अष्टादशाक्षरव्याख्याविशेषात् । लम्बिनी अवतारशक्तिरित्यर्थः । ताः सर्वाश्चित्सहस्रप्रभाभिन्नाः चिद्रूपा याः सहस्रं प्रभास्ताभिर्भिन्नाः भेदं प्राप्ताः षोडशसहस्रभेदं प्राप्ता इति यावत्, अतोऽत्र-आसु राज्ञीषु तत्स्वरूपता श्रीकृष्णस्वरूपता आस्ते । 'चित्सहस्रकलाभिन्ना आसां कृष्णस्वरूपता' इति च पाठे त्वेवं व्याख्या-कृष्ण एव चन्द्रः सदा पूर्णः स्वयं भगवत्त्वेन षोडशकलापूर्ण इत्यर्थः । 'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमि'ति श्रीभागवतप्रथमस्कन्धोक्तेः । सदा पूर्णत्वं नाम सर्वदा नानाविर्भूतसर्वशक्तित्वमिति । तस्य सदा पूर्णस्य कृष्णचन्द्रस्य । याः स्वरूपभूताः षोडशकलाः "ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥" इत्युक्तैश्वर्यादीनां षोडशभागा इत्यर्थः, ताश्चित्सहस्रकलाभिन्नाः कृष्णचिदात्मनो राधाख्यस्यासंख्यातकलाः रुक्मिण्याद्याः स्वरूपशक्तयस्ताभिर्युताः सन्त्यत आसां रोहिण्यादिकृष्णपत्नीनामपि कृष्णस्वरूपतास्तीत्यर्थः । अत्र रुक्मिण्यादिकृष्णपत्नीनां मध्ये कासांचित् राधांशत्वम्, कासांचित् तत्कलात्वम्, कासांचित् तद्विभूतित्वं चेति बोध्यम् । अंशकलाविभूतित्वं नाम तत्तज्जीवप्रवेशेन तत्तत्कार्यानुरूपाविर्भूतज्ञानक्रियाशक्तित्वम् । तत्रापि प्रविष्टायाः महाभक्त्याविर्भावेंऽशत्वव्यवहारः । अल्पशक्त्याविर्भावे तु कलात्वव्यवहारः । ततोऽप्यल्पशक्त्याविर्भावे तु विभूतित्वव्यवहारः । अन्यथा विभागरूपांऽशादित्वे तु श्रीकृष्णचन्द्रात्मरूपराधायाः पूर्णत्वाच्युतत्वाविकारित्वानिरंशत्वादिप्रतिपादकशास्त्रविरोधापत्तेरित्यलम् । विशेषजिज्ञासा चेत् कृष्णसंदर्भादयो ग्रन्था द्रष्टव्याः ॥ ६ ॥

एवं कृष्णपत्नीनां कृष्णस्वरूपतां प्रदर्श्य वज्रस्यापि कृष्णस्वरूपत्वं दर्शयति एवमिति । यथा कृष्णपत्न्यः कृष्णरूपाः एवं तथा प्रपन्नभयभञ्जकः शरणागतपालकत्वात् वज्रोऽपि कृष्णरूप एवेत्यर्थः । हेत्वन्तरमाह । यतः एतस्य वज्रस्य । स्थानम्

अवतारेऽत्र कृष्णेन योगमायाऽतिभाविता । तद्बलेनात्मविस्मृत्या सीदन्त्येते न संशयः ॥ ८ ॥
ऋते कृष्णप्रकाशं तु स्वात्मबोधो न कस्यचित् । तत्प्रकाशस्तु जीवानां मायया पिहितः सदा ॥ ९ ॥
अष्टाविंशे द्वापरान्ते स्वयमेव यदा हरिः । उत्सारयेन्निजां मायां तत्प्रकाशो भवेत् तदा ॥ १० ॥
स तु कालो व्यतिक्रान्तस्तेनेदमपरं शृणु । अन्यदा तत्प्रकाशस्तु श्रीमद्भागवताद्भवेत् ॥ ११ ॥
श्रीमद्भागवतं शास्त्रं यत्र भागवतैर्यदा । कीर्त्यते श्रूयते चापि श्रीकृष्णस्तत्र निश्चितम् ॥ १२ ॥
श्रीमद्भागवतं यत्र श्लोकं श्लोकार्द्धमेव च । तत्रापि भगवान् कृष्णो वल्लवीभिर्विराजते ॥ १३ ॥

स्थितिः । श्रीकृष्णस्य दक्षिणचरणारविन्दे वर्तते । अनेन वज्रनाभस्य श्रीकृष्णदक्षिणचरणारविन्दस्थवज्रचिह्नावतारत्वं सूचितम् ॥ ७ ॥ नन्वेषां कृष्णरूपत्वं तर्हि कस्मादेते सीदन्तीत्याशङ्क्याह अवतारे इति । श्रीकृष्णेन अत्रावतारे कृष्णावतारे या स्वयोगमाया सा जीवेषु अतिभाविता अत्यन्तं विस्तारिता । तद्बलेन योगमायाबलेन याऽऽत्मविस्मृतिः स्वस्वरूपाज्ञानं तया एते वज्रादयः सीदन्ति-श्रीकृष्णविरहदुःखं प्राप्नुवन्तीत्यर्थः ॥ ८ ॥ तर्हि कथमेषामात्मस्मृतिः स्यात् तत्राह ऋते इति । कृष्णप्रकाशादृते विना तु कस्यचिदपि जीवस्य स्वात्मबोधो न भवति । जीवानां तत्प्रकाशस्तु श्रीकृष्णप्रकाशस्तु मायया तद्बहिरङ्ग-शक्त्या सदैव पिहितः आच्छादित इत्यर्थः । श्रीकृष्णप्रकाशेनैव जीवानामात्मस्मृतिर्नान्यथेति भावः ॥ ९ ॥ ननु कदा तस्य प्रत्यक्षप्रकाशो भवेत् । तत्राह । अष्टाविंशे इति । द्वापरान्ते तत्संध्यांशे । हरिः स्वभक्तदुःखहरणशीलः श्रीकृष्णो यदा निजाम् स्वकीयाम् मायाम् बहिरङ्गशक्तिम् । उत्सारयेत् दूरीकुर्यात् । तदैव तत्प्रकाशः कृष्णप्रकाशः प्रत्यक्षतद्दर्शनमिति यावत् । भवेत् जीवानामिति शेषः ॥ १० ॥

स इति । स तु कालः-श्रीकृष्णप्रत्यक्षदर्शनसमयस्तु व्यतिक्रान्तो व्यतीतो गत इति यावत् । तेन हेतुना । 'इदमस्ति सन्निकृष्टे समीपतरवर्ति चैतदो रूपम् । अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात् ॥" इति भाष्यकारवचनादिदं सन्निकृष्टं वक्ष्यमाणमिति यावत् । अपरम् श्रीकृष्णप्रकाशकम् श्रीमद्भागवतं तन्माहात्म्यं चेत्यर्थः । मे मत्तस्त्वं शृणु । तदेवाह अन्यदेति । श्रीकृष्णप्रत्यक्ष-दर्शनसमयादन्यस्मिन् समये तत्प्रकाशः श्रीकृष्णप्रकाशस्तु । श्रीमद्भागवतात् स्वकीयं यद्भवेत्तेजः श्रीमद्भागवते न्यधादिति पाद्मीयश्रीमद्भागवतमाहात्म्यवचनात् तत्स्वरूपभूतश्रीमद्भागवतपुस्तकदर्शनादेवेत्यर्थः । यद्वा श्रीमद्भागवतात् तत्पठनपाठन-श्रवणमननादित्यर्थः । भवेत् जीवानामिति शेषः । श्रीमद्भागवतस्य श्रीकृष्णगुणप्रधानत्वात् तद्गुणानां च तत्प्रकाशकत्वादिति भावः ॥ ११ ॥ सिंहासने पुस्तकसंस्थापनपूर्वकं यच्छ्रीभागवतस्य श्रवणकीर्तनादिकं तद्वक्तृश्रोत्रोरलौकिकमाहात्म्यजनकं भवतीत्याह श्रीमद्भागवतमिति । श्रीमद्भागवतम् 'भाति यः सर्वभूतेषु गतिर्यस्य ह्यलौकिकी । वरिष्ठः सर्वशास्त्रेषु तरणिर्भवाम्बुधौ ॥' इत्युक्तलक्षणं शास्त्रम् ग्रन्थः । यत्र स्थाने । यदा यस्मिन् काले भागवतैर्भगवद्भक्तैः श्रोतरि सति कीर्त्यते जिह्वया । वक्तरि सति श्रूयते कर्णाभ्याम् । तत्रैव स्थाने । तस्मिन्नेव काले । श्रीकृष्णः श्रीभिः राधिकादिस्वप्रियाभिर्युक्तः कृष्णः परब्रह्मापि विराजते इत्युत्तरादाकृष्यान्वयः । निश्चितम् । नात्र संदेहः कार्य्य इत्यर्थः । यत्र यदेत्यव्ययाभ्यां सुतीर्थसुकालाभावेऽपि श्रीमद्भागवतस्य श्रवणकीर्तनं श्रीकृष्णप्राप्तिकरमिति ध्वनितम् ॥ १२ ॥ किं बहुना श्रीमद्भागवतस्य तत्पद्यादेर्वा स्वगृहादौ स्थापनमेव श्रीकृष्णप्राप्तिकर-मित्याह श्रीमद्भागवतमिति । श्रीमद्भागवतम् तन्नामकलिखितसमग्रग्रन्थ इत्यर्थः । तदभावे लिखितदशमस्कन्धो वा । तदभावे लिखितपञ्चाध्यायी वा । तदभावे लिखितगोपिकागीतं वा । तदभावे लिखितान्तिमतत्पद्यं वा । तदभावे लिखितानुष्टुप्श्लोको वा । श्लोकशब्दस्य नपुंसकत्वमार्षम् । तदभावे लिखिततदर्द्धमेव वा । तदभावेऽपि चकाराल्लिखिताष्टाक्षरात्मकमनुष्टुप्श्लोक-चतुर्थचरणमेव वा । यत्र गृहादौ विराजते विशेषेण तुलसीचन्दनादिना पूजितत्वेन राजते । तत्रापि तस्मिन् गृहादावपि कृष्णो वल्लवीभिः स्वपरमप्रियाभिर्गोपीभिः सह विराजते विशेषेण वत्सलतया भक्ताधीनत्वेन राजते निवसतीत्यर्थः । कथंभूतः श्रीकृष्णः । भगवान् भगवत्त्वेन प्रकटितषडैश्वर्य्य इत्यर्थः । तत्रैव हि षडैश्वर्य्याणि विराजन्ते इति भावः । अत्रेदं तत्त्वम्-लोके यथा हि केनचिदधमर्णेन सहस्रमुद्राधमर्णार्थनिमित्तमर्थित उत्तमर्णोऽर्थे तस्यापव्ययमानत्वभिया तत्प्रतीतिमकुर्वन् तस्य च स्वाधीनता-मिच्छन् । सकुसीदस्वोत्तमर्णार्थसिद्ध्यर्थं ससज्जनसाक्षिसाक्ष्यं तद्धस्तलिखितकरणपत्रं तावदादाय तस्य स्वकीयमुत्तमर्णार्थं प्रयच्छति । तदा तत् करणपत्रं च स्वगृहे काष्ठपेटिकायां यत्नेन स्थापयति । तत आरभ्याधमर्णस्तच्चिन्तयोत्तमर्णस्य सदैवाधीनो भवेत् । अथास्य प्रातिकूल्ये तु सज्जनसाक्षिणो विराजतेऽस्य गृहे त्वद्धस्तलिखितकरणपत्रमस्ति च तस्मिन् सज्जनसाक्षिणामस्माकं साक्ष्यमित्यादिवचनैस्तं ग्राहकं निगृह्णापि तदधीनं कुर्वन्त्येव । तथा भो भावुक प्रयोक्तः देहि मम त्वं स्वं मनोरूपमधमर्णार्थमिति श्रीकृष्णेनार्थितो भक्तरूपोत्तमर्णस्तस्यापह्नवानत्वभिया तत्प्रतीतिमकुर्वन् तस्य च स्वाधीनतामिच्छन् । सप्रेमरसकुसीदस्वमनो-रूपोत्तमर्णार्थसिद्ध्यर्थं ध्रुवप्रह्लादोद्धवपरमभक्तसाक्षिसाक्ष्यं श्रीकृष्णाभिधेयीयं लिखितश्रीभागवतं तत्पद्यादिरूपं वा करणपत्रं स्वगृहे स्थापयेत् । तदा तच्चिन्तया स्वप्रियाभिर्गोपीभिः सह श्रीकृष्णो भगवान् तद्गृहमागत्य तदधीनो भवेदेव । नो चेत् तदा

भारते मानवं जन्म प्राप्य भागवतं न यैः । श्रुतं पापपराधीनैरात्मघातस्तु तैः कृतः ॥ १४ ॥
श्रीमद्भागवतं शास्त्रं नित्यं यैः परिसेवितम् । पितुर्मातुश्च भार्यायाः कुलपंक्तिः सुतारिता ॥ १५ ॥
विद्याप्रकाशो विप्राणां राज्ञां शत्रुजयो विशाम् । धनं स्वास्थ्यं च शूद्राणां श्रीमद्भागवताद्भवेत् ॥ १६ ॥
योषितामपरेषां च सर्ववाञ्छितपूरणम् । अतो भागवतं नित्यं को न सेवेत भाग्यवान् ॥ १७ ॥
अनेकजन्मसंसिद्धः श्रीमद्भागवतं लभेत । प्रकाशो भगवद्भक्तेरुद्भवस्तत्र जायते ॥ १८ ॥
सांख्यायनप्रसादाप्तं श्रीमद्भागवतं पुरा । बृहस्पतिर्दत्तवान्मे तेनाहं कृष्णवल्लभः ॥ १९ ॥
आख्यायिकां च तेनोक्तां विष्णुरात निबोध ताम् । ज्ञायते संप्रदायोऽपि यत्र भागवतश्रुतेः ॥ २० ॥

सज्जनसाक्षिणो ध्रुवप्रह्लादादयो विराजतेऽस्य गृहे त्वन्नामकं लिखितश्रीभागवतं तत्पद्यादिरूपं वा करणपत्रमस्ति च तस्मिन् साक्षिणामस्माकं साक्ष्यमित्यादिवचनैस्तं निगृह्य तद्गृहे चानाय्य तद्वशे स्थापयन्त्येव । ततश्च तद्भक्तवश्यः श्रीकृष्णो भगवानपि तद्भक्तमनोरूपोत्तमर्णार्थविनिमयाय स्वस्य सदैव तदधीनतापूर्वकं तस्मै स्वपडैश्वर्य्याणि दातुं सपरिवारस्तद्गृहे एव विराजत इति दिक् ॥ १३ ॥ विपक्षे[1] दोषमाह । भारते इति । भारते भरतखण्डे । यैर्जनैः न श्रुतमित्युपलक्षणं कीर्तनादेः । तैर्जनैः । आत्मघातः कृतः । भगवद्विमुखत्वेन ते आत्महन असुरा इत्यर्थः । तदुक्तमुद्धवं प्रति श्रीभगवता 'नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम् । मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत्स आत्महा इति । यथा च श्रुतिः 'असुर्या नाम ते लोका अन्धेन तमसा वृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥' अयमर्थः–असुरेभ्यो हिता असुर्याः असुराश्च विष्णुभक्तिरहिताः तद्व्यतिरिक्ताः देवाः । तथा चोक्तमाग्नेये 'द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च । विष्णुभक्तिपरो दैव आसुरस्तद्विपर्ययः ॥' इति । तेषां ये लोकाः कथंभूताः अन्धेन तमसावृतास्तांस्ते प्रेत्य मृत्वाऽभिगच्छन्ति । के गच्छन्तीत्यत आह । ये आत्महनः आत्मघातकाः भगवद्विमुखा इति श्रुतेरर्थः ॥ १४ ॥ अथ श्रोतॄणां श्रीमद्भागवतनित्यश्रवणादिफलमाह श्रीमद्भागवतमिति । यैर्जनैर्नित्यम् अविच्छेदेन । परिसेवितम् श्रवणादिभिः श्रद्धापूर्वकं सेवितमित्यर्थः तैर्जनैः । सुतारिता सुष्ठु श्रमराहित्येन मत्स्यग्राहादिभयराहित्येन वा । सुतारिता इत्यनेन संसारस्य समुद्रत्वं सूचितम् । तेन च श्रीभागवतस्य ज्ञानतरीत्वं च ध्वनितम् ॥ १५ ॥ चतुर्वर्णानां पृथक् पृथक् तच्छ्रवणादिफलमाह विद्येति । विप्राणाम् ब्राह्मणानाम् । विद्याप्रकाशः श्रीकृष्णविषयकज्ञानप्रकाशः । राज्ञाम् क्षत्रियाणाम् । विशाम् वैश्यानाम् । शूद्राणामत्रैवर्णिकानाम् । चित्ते स्वास्थ्यं सुखमित्यर्थः ॥ १६ ॥

श्रीमद्भागवतश्रवणं स्त्र्यादीनामपि सर्वमनोऽभिलाषपूरकमित्याह । योषितामिति योषिताम्–स्त्रीणाम् । अपरेषाम्–अनुलोमजादीनाम् । श्रीमद्भागवतश्रवणात्सर्वमनोरथपूरणं भवेदिति पूर्वेणैवान्वयः । शूद्रादीनामेषां श्रीमद्भागवतश्रवणेऽधिकारः, न तु पाठे । श्रीमद्भागवतस्य पञ्चमवेदत्वात् तत्र तेषामनधिकारात् । अत एव 'जनश्च शूद्रोपि महत्त्वमीयादि'ति श्रीमद्वाल्मीकीयरामायणे । 'शूद्रः सत्तमतामियादि'ति विष्णुसहस्रनामपाठे च शूद्रादीनां श्रवणेन फलं न पाठेऽधिकार इत्यङ्गीकृतं सत्संप्रदायप्रवर्तकपूर्वाचार्य्यैः । अतः–श्रीभागवतस्य विद्याप्रकाशादिजनकत्वात् । कः श्रीभागवतं नित्यं न सेवेत किं तु सेवेत एवेत्यर्थः । यतो भाग्यवान्–पुण्यवान् । 'यतो भागवतात्तत्तु' इति च पाठे तत्-श्रीभागवतम् ॥ १७ ॥ ननु तर्हि किमिति न सर्वे तच्छृण्वन्तीत्याशङ्क्याह । अनेकजन्मसंसिद्ध इति । बहुजन्मसु सम्यक्-तपआदिना सिद्धः-पक्वो जन इति विशेष्याध्याहारः । श्रीमद्भागवतम्-तत्पुस्तकम् तच्छ्रवणादिकं वा । लभेदिति परस्मैपदम्, चक्षिङो ङित्करणाज्ज्ञापकात् । 'अनुक्तमप्यूहति पण्डितो जनः' इति भर्तृहरिप्रयोगादात्मनेपदस्यानित्यत्वेन साधु । तत्र श्रीभागवतपुस्तकलाभे तच्छ्रवणादिलाभे वा । प्रथमं प्रकाशः–श्रीकृष्णविषयकज्ञानप्रकाशस्तदनन्तरं भगवद्भक्तेरुद्भवश्च जायते । अद्भुत इति पाठे ज्ञानादिप्रकाशाद्विलक्षण इत्यर्थः । 'अनेकजन्मसंसिद्धिः श्रीमद्भागवताद्भवेदि'ति च पाठान्तरम् । तत्र किञ्चेत्यवतरणम् । योऽनेकजन्मसंसिद्धिः-बहुजन्मभिस्तत्त्वसंप्राप्तिः सा श्रीमद्भागवतात् तच्छ्रवणादिना एकस्मिन्नेव जन्मनि भवेत् जनस्येति शेषः । तत्र-तस्यां सत्याम् । अन्यत्पूर्ववत् । अतो नित्यमेतदेव श्रोतव्यमिति भावः ॥ १८ ॥ एतदेव स्वानुभवेन द्रढयति । यद्वा अहं तु श्रीमद्भागवतादेव संसिद्धोऽस्मीत्याह सांख्यायनप्रसादाप्तमिति । सांख्यायनस्य-तन्नामकपरमगुरोः । प्रसादेन-अनुग्रहेण । आप्तम्-गुरुपरंपरया प्राप्तमित्यर्थः । श्रीमद्भागवतं पुरा श्रीकृष्णानुग्रहात्पूर्वं मद्गुरुर्बृहस्पतिः । मे-मह्यम् । दत्तवान्-श्रीमद्भागवतोपदेशं कृतवानित्यर्थः । तेन-गुरूपदिष्टश्रीमद्भागवतेन हेतुना । कृष्णवल्लभः-श्रीकृष्णो वल्लभः प्रियो यस्य । श्रीकृष्णस्य प्रियोऽस्मीति वा । 'यत्र क्रियापदं नास्ति तत्र सत्तार्थकक्रियाऽध्याहारः कर्त्तव्य' इति वैयाकरणाः ॥ १९ ॥ तदेवं श्रीभागवतस्य माहात्म्यमुक्त्वेदानीं तस्यैवाऽऽख्यायिकां वक्तुं तावद्राजानमभिमुखीकरोति आख्यायिकामिति । विष्णुरात-हे परीक्षित् । तेन-बृहस्पतिनैवोक्ताम्-कथिताम् । ताम्-अतिविलक्षणाम् । श्रीमद्भागवताख्यायिकाम्-तस्य पूर्ववृत्तविषयां कथा-

1. विपक्षे-श्रीभागवतश्रवणकीर्तनस्थापनाद्यभावे ।

श्रीबृहस्पतिरुवाच—ईक्षां चक्रे यदा कृष्णो मायां पुरुषरूपधृक् । ब्रह्मा विष्णुः शिवश्चापि रजःसत्त्वतमोगुणैः ॥ २१ ॥
पुरुषास्त्रय उत्तस्थुरधिकारांस्तदादिशत् । उत्पत्तौ पालने चैव संहारे प्रक्रमेण तान् ॥ २२ ॥
ब्रह्मा तु नाभिकमलादुत्पन्नस्तं व्यजिज्ञपत् ।
श्रीब्रह्मोवाच—नारायणादिपुरुष परमात्मन् नमोऽस्तु ते ॥ २३ ॥
त्वया सर्गे नियुक्तोऽस्मि पापीयान् मां रजोगुणः । त्वत्स्मृतौ नैव बाधेत तथैव कृपय प्रभो ॥ २४ ॥
श्रीबृहस्पतिरुवाच–यदा तु भगवांस्तस्मै श्रीमद्भागवतं पुरा । उपदिश्याब्रवीद् ब्रह्मन् सेवस्वैनत्स्वसिद्धये ॥ २५ ॥
ब्रह्मा तु परमप्रीतस्तेन कृष्णाप्तयेऽनिशम् । सप्तावरणभंगाय सप्ताहं समवर्तयत् ॥ २६ ॥
श्रीभागवतसप्ताहसेवनाप्तमनोरथः । सृष्टिं वितनुते नित्यं ससप्ताहः पुनः पुनः ॥ २७ ॥
विष्णुरप्यर्थयामास पुमांसं स्वार्थसिद्धये । प्रजानां पालने पुंसा यदनेनापि कल्पितः ॥ २८ ॥
श्रीविष्णुरुवाच—प्रजानां पालनं देव करिष्यामि यथोचितम् । प्रवृत्त्या च निवृत्त्या च कर्मज्ञानप्रयोजनात् ॥ २९ ॥
यदा यदैव कालेन धर्मग्लानिर्भविष्यति । धर्मं संस्थापयिष्यामि ह्यवतारैस्तदा तदा ॥ ३० ॥
भोगार्थिभ्यस्तु यज्ञादिफलं दास्यामि निश्चितम् । मोक्षार्थिभ्यो विरक्तेभ्यो मुक्तिं पञ्चविधां तथा ॥ ३१ ॥

मित्यर्थः । मत्तस्त्वं निबोध जानीहि । यत्र यस्यामाख्यायिकायाम् । श्रीभागवतश्रुतेः तच्छ्रवणस्य । संप्रदायः सम्यक् पुराणोक्तरीत्या प्रदीयते उपदिश्यते इति पूर्वपूर्वैः स्वशिष्येभ्यः कृतस्योपदेशस्य विषयीभूतोऽर्थः इत्यर्थः । 'स्यात्पारंपर्यमाम्नायः संप्रदायो गुरुक्रमः' इति हैमः । यद्वा श्रीभागवतमेव श्रुतिर्वेदः 'श्रुतिः स्त्री वेद आम्नाय' इत्यमरः । तस्य संप्रदायः संप्रदीयते गुरुणा शिष्यायेति गुरुपारंपर्यागतत्वम् गुरुपरम्पराप्रविष्टतत्तत्पुरुषकर्तृकोपदेशविषयत्वमिति यावत् । त्वया जनैर्वा ज्ञायते इत्यन्वयः ॥ २० ॥ तामेव श्रीभागवताख्यायिकां कथयन् श्रीबृहस्पतिरुवाचेत्युद्धवोक्तिः ईक्षामित्यादिना । श्रीकृष्णः कृष्णस्तु भगवान् स्वयम् । परात्परं ब्रह्म च ते विभूतय इत्याद्युक्तेश्च । षोडशकलापूर्णतमः साकारसच्चिदानन्दपरब्रह्मपुरुषोत्तमः । आद्योऽवतारः पुरुषः परस्य । 'जगृहे पौरुषं रूपमि'त्याद्युक्तेश्च । पुरुषावतारधारी कारणार्णवशायिरूपः सन् । यदा मायाम् बहिरङ्गां स्वशक्तिम् । ईक्षांचक्रे ददर्श । यद्वा तां प्रति ईक्षाम् स्वदृष्टिं चक्रे यदा च तदीक्षामात्रेणैव रजःसत्त्वतमोगुणैः ब्रह्मा विष्णुः शिवश्चेति ॥ २१ ॥ त्रयः पुरुषाः गुणावतारा उत्तस्थुस्तदा तेभ्यो ब्रह्मादिभ्य उत्पत्त्यादिषु प्रकर्षक्रमेणाधिकारानादिशदिति द्वयोरन्वयः ॥ २२ ॥ ब्रह्मेत्यर्द्धकम् । तम् पुरुषावतारं भगवन्तम् । व्यजिज्ञपत् नमस्कारपूर्वकं स्वप्रार्थनां कृतवानित्यर्थः । तां कुर्वन् ब्रह्मोवाचेति बृहस्पतेरुक्तिः । नारायणेति सार्द्धेन ॥ २३ ॥ त्वत्स्मृतौ तव स्मरणे । तथैव त्वत्स्मृतौ रजोगुणकृतबाधाऽभावप्रकारेणैव । त्वं कृपय-कृपया तथोपदेशं कुर्वित्यर्थः ॥ २४ ॥ श्रीबृहस्पतिरुवाच यदेति । यदा ब्रह्मविज्ञापनसमये तदेति पाठान्तरम् । तस्मै ब्रह्मणे । पुरा सृष्टरादौ । किमब्रवीदित्यपेक्षायामाह ब्रह्मन्नित्यादि । स्वसिद्धये रजःकृतबन्धननिरासपूर्वकस्वसृष्टिवृद्ध्यर्थम् । एनत् श्रीमद्भागवतम् । सप्ताहक्रमेण त्वं सेवस्व ॥ २५ ॥ ब्रह्मेति । तदा ब्रह्मा तु परमप्रीतः सन् । तेन श्रीभागवतपाठेन अनिशम् अहर्निशम् । कृष्णप्राप्तये । सप्तावरणभङ्गाय तत्र शुभाशुभकर्मरूपं ग्रन्थिद्वयं पञ्चपर्वात्मिकाविद्याग्रन्थिपञ्चकं च एवं सप्तग्रन्थय एव सप्तावरणं तस्य भङ्गाय । अप्रयुज्यमानतुमुन्नन्तस्य कर्मणि चतुर्थी । सप्तावरणभङ्गं कर्तुमित्यर्थः । 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः' इत्याद्युक्तेः । यद्वा सप्तावरणभंगाय पृथ्व्यप्तेजोवाय्वाकाशाहंकारमहत्तत्त्वानीति सप्तावरणानि तेषां भंगाय । चतुर्थी तु पूर्ववत् । सप्ताहम् सप्तदिनम् अनिशम् अव्यवधानेन । समवर्तयत् सम्यक् श्रद्धापूर्वकमवर्तयत् श्रीभागवतस्य सप्ताहपाठमकरोदित्यर्थः । अनेन श्रीभागवतशास्त्रेण भगवद्रूपे ज्ञाते भक्तस्य सप्तावरणभंगपूर्वककृष्णाप्तिर्भवतीति सूचितम् ॥ २६ ॥ श्रीभागवतसप्ताहपाठस्य फलमाह । श्रीभागवतसप्ताहसेवनेनाप्तः प्राप्तो रजोनिरासपूर्वकसृष्टिवृद्धिरूपो मनोरथो येन । अत एव पुनः पुनः सप्ताहेन सह वर्त्तमानः श्रीब्रह्मा सृष्टिं वितनुते । विस्तारयति । अनेन श्रीभागवतस्य पुनः पुनः सप्ताहपाठेन पुरुषस्य सृष्टिविस्तारणे सामर्थ्यमपि भवतीति सूचितम् ॥ २७ ॥ विष्णुरिति । विष्णुरपि स्वार्थसिद्धये । स्वपालनपूर्वकप्रेमिभक्तादिपालनसामर्थ्यसिद्धये पुमांसम्–पुरुषावतारं भगवन्तं प्रार्थयामास । यत् यस्मात् । अनेन पुंसा पुरुषावतारेण भगवता । प्रजानां पालने तन्निमित्ते ॥ २८ ॥ विष्णुरुवाचेति बृहस्पतेरुक्तिः । प्रजानामित्यादिचतुर्भिः देव हे भगवन् । प्रकर्षेण योजनं प्रयोजनं कर्मज्ञानयोः प्रयोजनं तस्मात् क्रमेण या प्रवृत्तिर्या च निवृत्तिस्ताभ्याम् । यथोचितम् यथायोग्यम् ॥ २९ ॥

यदेति । कालेन निमित्तेन । अवतारैः मत्स्याद्यवतारैः । धर्मम् सनातनम् संस्थापयिष्यामि सम्यक् चतुष्पात्त्वेन स्थापयिष्यामि । अन्यत्सुबोधम् ॥ ३० ॥ भोगार्थिभ्य इति । यथा भोगार्थिभ्यः कर्मिभ्यो यज्ञादिफलं स्वर्गादि दास्यामि इति निश्चितम् । तथा मोक्षार्थिभ्यः सालोक्यम्–मया सहैकस्मिन् लोकेवासम् ( १ ) सार्ष्टिम्–समानैश्वर्यम् ( २ ) सामीप्यम्–निकट-

येऽपि मोक्षं न वाञ्छन्ति तान् कथं पालयाम्यहम् । आत्मानं च श्रियं चापि पालयामि कथं वद ॥ ३२ ॥
तस्मा अपि पुमानाद्यः श्रीभागवतमादिशत् । उवाच च पठस्वैनत्तव सर्वार्थसिद्धये ॥ ३३ ॥
ततो विष्णुः प्रसन्नात्मा परमार्थकपालने । समर्थोऽभूत् श्रिया मासि मासि भागवतं स्मरन् ॥ ३४ ॥
यदा विष्णुः स्वयं वक्ता लक्ष्मीश्च श्रवणे रता । तदा भागवतश्रावो मासेनैव पुनः पुनः ॥ ३५ ॥
यदा लक्ष्मीः स्वयं वक्त्री विष्णुश्च श्रवणे रतः । मासद्वयं रसास्वादस्तदातीव सुशोभते ॥ ३६ ॥
अधिकारे स्थितो विष्णुर्लक्ष्मीर्निश्चिन्तमानसा । तेन भागवतास्वादस्तस्या भूरि प्रकाशते ॥ ३७ ॥
अथ रुद्रोऽपि तं देवं संहाराधिकृतः पुरा । पुमांसं प्रार्थयामास स्वसामर्थ्यविवृद्धये ॥ ३८ ॥
श्रीरुद्र उवाच—नित्ये नैमित्तिके चैव संहारे प्राकृते तथा । शक्तयो मम विद्यन्ते देवदेव मम प्रभो ॥ ३९ ॥
आत्यन्तिके तु संहारे मम शक्तिर्न विद्यते । महद्दुःखं ममैतत्तु तेन त्वां प्रार्थयामहे ॥ ४० ॥
श्रीबृहस्पतिरुवाच—श्रीमद्भागवतं तस्मा अपि नारायणो ददौ । स तु संसेवनादस्य जिग्ये चापि तमोगुणम् ॥ ४१ ॥
कथा भागवती तेन सेविता वर्षमात्रतः । लये त्वात्यन्तिके तेनावाप शक्तिं सदाशिवः ॥ ४२ ॥
श्रीउद्धव उवाच—श्रीभागवतमाहात्म्यमिमामाख्यायिकां गुरोः । श्रुत्वा भागवतं लब्ध्वा मुमुदेऽहं प्रणम्य तम् ॥ ४३ ॥
ततस्तु वैष्णवीं रीतिं गृहीत्वा माममात्रतः । श्रीमद्भागवतास्वादो मया सम्यङ्निषेवितः ॥ ४४ ॥
तावतैव बभूवाहं कृष्णस्य दयितः सखा । कृष्णेनाथ नियुक्तोऽहं व्रजे स्वप्रेयसीगणे ॥ ४५ ॥

वर्तित्वम् ( ३ ) सारूप्यम्–समानरूपत्वम् ( ४ ) एकत्वम्–सायुज्यम् ( ५ ) इति पञ्चविधां मुक्तिं दास्यामि ॥ ३१ ॥ य इति । ये प्रेमरसिकाः मोक्षमपि न वाञ्छन्ति । तान् प्रेमरसिकान् । कथम् केन प्रकारेण पालयामि किं दत्वा तेभ्योऽहमनृणो भवेयमित्यर्थः । कथमात्मानं च पालयामि किं दत्वा तर्पयामीत्यर्थः । श्रियम् लक्ष्मीं च कथं पालयामि कं भोगं दत्वा तां चापि तर्पयामीत्यर्थः । तत्प्रकारं त्वं वद कथय ॥ ३२ ॥ तस्मा इति । तस्मै गुणावताराय विष्णवे । आद्यः पुरुषावतारो भगवान् आदिशत् उपदिदेश एतत् श्रीभागवतम् । तव सर्वार्थसिद्धये स्वपालनपूर्वकभक्तिरसिकादिपालनसिद्धये ॥ ३३ ॥ तत इति ततः पुरुषावतारोपदिष्टश्रीभागवतप्राप्त्यनन्तरम् । परमार्थकपालने परमा सर्वोत्कृष्टा भक्तिरेव अर्थः–पुरुषार्थो येषां ते परमार्थकाः भक्तिरसिकास्तेषां पालने । यद्वा परमः 'आत्मा हि परमो हरिरि'ति वचनात् सर्वोत्कृष्टो भगवानेवार्थः पुरुषार्थो येषां तथाभूतानामपि यत्पालनं तस्मिन् । श्रिया श्रवणकथनतत्परया सह श्रीभागवतस्यैकमासं पारायणं कुर्वन्नेवेत्यर्थः ॥ ३४ ॥

यदेति । श्रीभागवतश्रवः तच्छ्रवणम् । पुनः पुनर्मासपारायणेनैव शोभते इत्युत्तरादाकृष्यान्वयः ॥ ३५ ॥ यदेति । श्रीभागवतरसस्यास्वादो मासद्वयम् मासद्वयपर्यन्तम् । अतीव अतिशयेन सु सुष्ठु शोभते इत्यन्वयः ॥ ३६ ॥ स्वयं लक्ष्म्यास्तु स्ववक्तृत्वे श्रीभागवतरसास्वादोऽतिशयेन प्रकाशते इति सहेतुकं दर्शयति । अधिकारे इति । यतः पालनाधिकारे स्थितः । अत एव लक्ष्मीस्तु स्थिरचित्ता तस्यास्तदानीं कार्यान्तराभावात् तेन हेतुना । तस्याः लक्ष्म्याः श्रीभागवतरसस्यास्वादो भूरि अधिकं प्रकाशते । निश्चितमानसेति पाठान्तरम् ॥ ३७ ॥ अथेति अथ विष्णुसर्वार्थसिद्ध्यनन्तरम् । देवम्—मत्स्यादिनानावतारैः क्रीडन्तम् । तम् अतिप्रसिद्धम् । पुमांसम् पुरुषावतारं भगवन्तमेव । स्वसामर्थ्यविवृद्धये स्वस्याऽऽत्यान्तिकप्रलयसामर्थ्ये या विशेषेण वृद्धिस्तस्यै । 'स्वासामर्थ्यनिवृत्तये' इति पाठान्तरे तु सुगमम् ॥ ३८ ॥ प्रलयत्रये स्वशक्तिसामर्थ्यं कथयन्नात्यन्तिकप्रलयसामर्थ्यं च प्रार्थयन् श्रीरुद्र उवाचेति बृहस्पतेरुक्तिः नित्ये इति । देवानामस्मदादीनामपि देव पूज्य । हे मम प्रभो मामुपदेष्टुं समर्थ ॥ ३९ ॥ आत्यन्तिके मोक्षे । एतत् आत्यन्तिकप्रलयशक्त्यभावरूपम् । तेन—महता दुःखेन हेतुना । प्रार्थये इति वक्तव्ये प्रार्थयामहे इति 'अस्मदो द्वयोश्चे'ति साधु ॥ ४० ॥ इति रुद्रोक्तिं प्रदर्श्य श्रीबृहस्पतिरुवाचेत्युद्धवोक्तिः श्रीमद्भागवतमिति । तस्मै संहाराधिकृताय रुद्राय । ददौ उपदिदेश । स तु रुद्रोऽपि । अस्य श्रीभागवतस्य । सम्यक् आलस्यादिराहित्येन सेवनात् पठनरूपात् ॥ ४१ ॥ कथेति । तेन श्रीरुद्रेण । वर्षमात्रतः वर्षो मात्रा प्रमाणं यस्य पारायणस्य तस्मात् । यद्वा वर्ष एव वर्षमात्रम् तस्मादित्येवार्थकमात्रशब्देन मयूरव्यंसकादित्वात्समासः । तेन श्रीभागवतपारायणेन । अवाप लेभे ॥ ४२ ॥ श्रीभागवताख्यायिकां समाप्य श्रीउद्धव उवाचेति सूतोक्तिः । श्रीभागवतमाहात्म्यमिति । इमाम् पूर्वोक्ताम् । आख्यायिकाम् पूर्ववृत्तविषयां कथां चेत्यर्थः । गुरोः बृहस्पतेः । तस्मादेव लब्ध्वा पठित्वा इत्यर्थः । तम् बृहस्पतिं गुरुम् ॥ ४३ ॥ किञ्च तत इति । ततः तस्मात् बृहस्पतेर्गुरोरेव । मासपर्यन्तं श्रीभागवतस्य पठनास्वादो मया सम्यक् प्रेमपूर्वकं नितरामव्यवधानेन सेवितः ॥ ४४ ॥ तावतेति । तावतैव श्रीभागवतस्य मासिक-

विरहार्त्तासु गोपीषु स्वयं नित्यविहारिणा । श्रीभागवतसंदेशो मन्मुखेन प्रयोजितः ॥ ४६ ॥
तं यथामति लब्ध्वा ता आसन् विरहवर्ज्जिताः । नाज्ञासिषं रहस्यं तच्चमत्कारस्तु लोकितः ॥ ४७ ॥
स्वर्वासं प्रार्थ्य कृष्णं च ब्रह्माद्येषु गतेषु मे । श्रीमद्भागवते कृष्णस्तद्रहस्यं स्वयं ददौ ॥ ४८ ॥
पुरतोऽश्वत्थमूलस्य चकार मयि तद्दृढम् । तेनात्र व्रजवल्लीषु वसामि बदरीं गतः ॥ ४९ ॥
तस्मान्नारदकुण्डेऽत्र तिष्ठामि स्वेच्छया सदा । कृष्णप्रकाशो भक्तानां श्रीमद्भागवताद्भवेत् ॥ ५० ॥
तदेषामपि कार्य्यार्थं श्रीमद्भागवतं त्वहम् । प्रवक्ष्यामि सहायोऽत्र त्वयैवानुष्ठितो भवेत् ॥ ५१ ॥

श्रीसूत उवाच—विष्णुरातस्तु श्रुत्वा तदुद्धवं प्रणतोऽब्रवीत् ।

श्रीपरीक्षिदुवाच—हरिदास त्वया कार्य्यं श्रीभागवतकीर्तनम् ॥ ५२ ॥
आज्ञाप्योऽहं यथाकार्य्यं सहायोऽत्र मया तथा ।

श्रीसूत उवाच—श्रुत्वैतदुद्धवो वाक्यमुवाच प्रीतिमानसः ॥ ५३ ॥

श्रीउद्धव उवाच—श्रीकृष्णेन परित्यक्ते भूतले बलवान् कलिः । करिष्यति परं विघ्नं सत्कार्य्ये समुपस्थिते ॥ ५४ ॥
तस्माद्दिग्विजयं याहि कलिनिग्रहमाचर । अहं तु माससात्रेण वैष्णवीं रीतिमाश्रितः ॥ ५५ ॥
श्रीमद्भागवतास्वादं प्रचार्य्य त्वत्सहायतः । एतान् सम्प्रापयिष्यामि नित्यधाम्नि मधुद्विषः ॥ ५६ ॥

पारायणसेवनेनैव । अथ सखित्वानन्तरम् । स्वप्रेयसीगणे स्वस्यातिप्रियगोपीगणे । नियुक्तः नितराम् स्वकीयत्वेन योजितः आज्ञप्तः ॥ ४५ ॥ ननु किमर्थं तत्र त्वं नियुक्त इति चेत्तत्राह । विरहार्त्तास्विति । नित्यश्रीवृन्दावनस्वधाम्नि विहारिणा विहर्तुं शीलमस्यास्तीति तेन भगवता श्रीकृष्णेन विरहार्तासु विरहाभासेन दुःखितासु गोपीषु । श्रीभागवतमेव संदेशो मन्मुखेन प्रयोजितः ;तासां विरहाभासदुःखनिरासार्थं मद्द्वारा श्रीभागवतमेवोपदिष्टवानित्यर्थः ॥ ४६ ॥ तमिति । तम् श्रीभागवतमेव संदेशम् । यथामति स्वमतिमनतिक्रम्य । लब्ध्वा प्राप्य । तदनिवर्चनीयम् । रहस्यम् तत्त्वम् । नाज्ञासिषम् न ज्ञातवानहम् । चमत्कारस्तु तासु विरहाभासजन्यदुःखाभावरूपस्तु मया लोकितो दृष्ट एव ॥ ४७ ॥ किञ्च स्वर्वासमिति । स्वःशब्दः स्वर्गः । त्वं स्वर्गं वैकुण्ठं गच्छ । तत्रैव च वसेति द्वारकायामेव कृष्णं प्रार्थ्य । कृष्णस्येति पाठे तस्य स्वर्वासं तमेव प्रार्थ्य ब्रह्माद्येषु गतेषु सत्सु श्रीभागवते यद्रहस्यम् तत्त्वं तत् श्रीकृष्णः स्वयमेव नान्यद्वारा मे मह्यमेव ददौ उपदिष्टवानित्यर्थः । केषुचित्प्राचीनपुस्तकेषु । 'सर्वाःसमिति'पाठो दृश्यते सोऽस्माऽभिरनर्थकत्वादुपेक्षितः ॥ ४८ ॥ पुरत इति । अश्वत्थमूलस्य पुरतः अग्रे अश्वत्थवृक्षस्य भगवद्विभूतित्वात् तमेव साक्षिणं कृत्वेव । तत् तदेव श्रीभागवतरहस्यं मयि दृढं चकार । न हि श्रीभागवतरहस्यज्ञानादन्यद् ज्ञानं श्रेयस्करमित्युपदिदेशेत्यर्थः । 'नैतद्विज्ञाय जिज्ञासोर्ज्ञातव्यमवशिष्यते ।' इत्येकादशोक्तेः । तेन श्रीभागवतरहस्यदृढज्ञानेन हेतुना । देहेन बदरीं गतोप्यहमत्र वृन्दावने एव । व्रजवल्लीषु परब्रह्मकृष्णरूपासु वल्लीषु वल्लीरूपेण वसामि । श्रीकृष्णमेव सेवितुमिति भावः ॥ ४९ ॥ ननु तत्रापि कुत्र तव तद्रूपेण स्थितिरिति चेत्तत्राह तस्मादित्यर्द्धेन । तस्मात् श्रीभागवतस्य रहस्यज्ञानाद्धेतोः । स्वेच्छया कृष्णेच्छया । अत्र नारदकुण्डे एव तिष्ठामि । तत्र व्रजवल्लीनां बहुत्वात्तद्रूपेणैव तत्र मम स्थितिरिति भावः । तस्माज्जानीहि सर्वत्रेति पाठान्तरम् । तदेवं श्रीकृष्णोपदिष्टश्रीभागवतरहस्यज्ञानेन हेतुना श्रीनारदकुण्डे स्वस्थितिं निरूप्य प्रकृतमनुसरति । कृष्णप्रकाश इति सार्द्धेन ॥ ५० ॥ तस्मात् श्रीभागवतस्य श्रीकृष्णप्रकाशजनकत्वात् । एषाम् वज्रादीनामपि कार्य्यार्थं श्रीकृष्णदर्शनपूर्वकविरहदुःखनिवृत्त्यर्थम् श्रीभागवतमेव प्रवक्ष्यामि । अत्र श्रीभागवतवाचने । त्वयैवानुष्ठितः कृतः सहायो भवेत् त्वं सहायो भवेत्यर्थः ॥ ५१ ॥ श्रीसूत उवाचेति व्यासोक्तिः । विष्णुरातेत्यर्द्धकम् । विष्णुरातः श्रीपरीक्षित् । तत् उद्धववाक्यम् । प्रणतः नम्रीभूतः श्रीपरीक्षिदुवाचेति सूतोक्तिः । हरिदासेत्यर्द्धकम् ॥ ५२ ॥ आज्ञाप्य इति । अहं यथाकार्य्यम् कार्य्यमनतिक्रम्य त्वया आज्ञाप्य आज्ञापयितुं योग्यः । तथाऽत्र श्रीभागवतकीर्तने मया सहायोऽपि भवत् अहं सहायोऽपि भवेयमित्यर्थः । 'साहाय्यं च मया तथा इति पाठे तु यथा साहाय्यं कार्य्यं तथा त्वयाऽहमाज्ञाप्य इत्यन्वयः । श्रीसूत उवाचेति व्यासोक्तिः । श्रुत्वेति । एतत् हरिदासेत्यादिपरीक्षिद्वाक्यम् । प्रीतिः कृष्णानुरागलक्षणा भक्तिर्मानसे यस्य स उवाच विष्णुरातमिति शेषः ॥ ५३ ॥ श्रीउद्धव उवाचेति सूतोक्तिः । श्रीकृष्णेनेति सार्द्धेन । सत्कार्य्ये श्रीभागवतकीर्तनादिलक्षणे । सम्यक् श्रद्धापूर्वकमुपस्थिते सति । परम् केवलम् । परमधिकं वा । यतो बलवान् ॥ ५४ ॥ तर्हि किं कर्तव्यं मया तत्राह । तस्मादित्यर्द्धेन । तस्मात् कलियुगस्य परमविघ्नकारित्वात् । दिग्विजयं याहि कर्तुमिति शेषः । तत्र कलिनिग्रहमाचर कुरु । ननु निग्रहार्थं मयि गते सति त्वमत्र किं करिष्यसि तत्राह अहमिति सार्द्धेन । अहं तु वैष्णवीं रीतिमाश्रितः सन् ॥ ५५ ॥ त्वत्सहायेन त्वत्साहाय्येन । श्रीमद्भागवतास्वादम् तस्य रसानुभवं प्रचार्य्य । माससात्रतः मासो मात्रा प्रमाणं

श्रीसूत उवाच—श्रुत्वैवं तद्वचो राजा मुदितश्चिन्तयातुरः । तदा विज्ञापयामास स्वाभिप्रायं तमुद्धवम् ॥ ५७ ॥

श्रीपरीक्षिदुवाच—कलिं तु निग्रहीष्यामि तात ते वचसि स्थितः । श्रीभागवतसंप्राप्तिः कथं मम भविष्यति ॥ ५८ ॥
अहं तु समनुग्राह्यस्तव पादतले श्रितः ।

श्रीसूत उवाच— श्रुत्वैतद्वचनं भूयोऽप्युद्धवस्तमुवाच ह ॥ ५९ ॥

श्रीउद्धव उवाच—राजंश्चिन्ता तु ते कापि नैव कार्य्या कथंचन । तवैव भगवच्छास्त्रे यतो मुख्याधिकारिता ॥ ६० ॥
एतावत्कालपर्य्यन्तं प्रायो भागवतश्रुतेः । वार्तामपि न जानन्ति मनुष्याः कर्मतत्पराः ॥ ६१ ॥
त्वत्प्रसादेन बहवो मनुष्या भारताजिरे । श्रीमद्भागवतप्राप्तौ सुखं प्राप्स्यन्ति शाश्वतम् ॥ ६२ ॥
नन्दनन्दनरूपस्तु श्रीशुको भगवानृषिः । श्रीमद्भागवतं तुभ्यं श्रावयिष्यत्यसंशयः ॥ ६३ ॥
तेन प्राप्स्यसि राजंस्त्वं नित्यं धाम व्रजेशितुः । श्रीभागवतसंचारस्ततो भुवि भविष्यति ॥ ६४ ॥
तस्मात् त्वं गच्छ राजेन्द्र कलिनिग्रहमाचर ।

श्रीसूत उवाच—इत्युक्तस्तं परिक्रम्य गतो राजा दिशां जये ॥ ६५ ॥
वज्रस्तु निजराज्येशं प्रतिबाहुं विधाय च । तत्रैव मातृभिः साकं तस्थौ भागवताशया ॥ ६६ ॥
अथ वृन्दावने मासं गोवर्द्धनसमीपतः । श्रीमद्भागवतास्वादस्तूद्धवेन प्रवर्तितः ॥ ६७ ॥
तस्मिन्नास्वाद्यमाने तु सच्चिदानन्दरूपिणी । प्रचकाशे हरेर्लीला सर्वतः कृष्ण एव च ॥ ६८ ॥

यस्य पारायणस्य तेन मासपारायणेनैवेत्यर्थः । यद्वा मास एव मासमात्रं तेन एतान् वज्रनाभादीन् । मधुद्विपः श्रीकृष्णस्य नित्यधाम्नि श्रीवृन्दावने नित्यस्वरूपे वा सम्यक् तद्विरहदुःखनिवृत्तिपूर्वकं प्रापयिष्यामि ॥ ५६ ॥ श्रीसूत उवाचेति व्यासोक्तिः । श्रुत्वेति । एवम् श्रीकृष्णेनेत्याद्युक्तप्रकारकमुद्धववचः श्रुत्वा मुदितोपि यतश्चिन्तयातुरोऽतस्तमुद्धवं प्रति स्वाभिप्रायं विज्ञापयामास ॥ ५७ ॥ श्रीपरीक्षिदुवाच कलिमिति सार्द्धेन । हे तात । ते तव वचसि स्थितः वचसा बद्धः । कथं केन प्रकारेण श्रीभागवतसंप्राप्तिः श्रीभागवतश्रवणस्यानायासेन सिद्धिरित्यर्थः । तद् ब्रूहीति शेषः ॥ ५८ ॥

ननु श्रीभागवतश्रवणसिद्धिप्रकारं तुभ्यमन्य एव कोऽपि कथयिष्यतीति चेत्तत्राह अहमित्यर्द्धेन । यतस्तव पादतले श्रितः आश्रितोऽहमतस्त्वयैव समनुग्राह्यः सम्यक् स्वकीयत्वेनानुग्रहं कर्तुं योग्योऽस्मीत्यर्थः । त्वमेव तच्छ्रवणसिद्ध्युपायप्रकारं वदेति भावः । श्रीसूत उवाच । श्रुत्वेति । एतत् श्रीभागवतश्रवणसिद्धिप्रश्नात्मकवचनम् । तम् परीक्षितम् ॥ ५९ ॥ यतो भगवच्छास्त्रे श्रीमद्भागवते तवैव मुख्याधिकारिता-मुख्याधिकारः । अतस्ते त्वया । कापि-स्वल्पापि । न कर्तुं योग्या ॥ ६० ॥ किञ्च एतावदिति । श्रीभागवतश्रुतेः तच्छ्रवणस्य । वार्ताम् प्रवृत्तिमपि । 'वार्ता प्रवृत्तिर्वृत्तान्त' इत्यमरसिंहः । एतावत्कालपर्य्यन्तम् अद्यपर्य्यंतमपि । केचिद्भक्ता जानन्तीत्याशयेन प्रायग्रहणम् । यतः कर्मतत्पराः लौकिकवैदिककर्मैकनिष्ठा अतः ॥ ६१ ॥ तर्हि कथं ते तां ज्ञास्यन्ति त्वत्प्रसादेनेत्याह । त्वत्प्रसादेन त्वदनुग्रहेण । भारताजिरे-भारतखण्डमेवाजिरम् प्राङ्गणं तस्मिन् । श्रीमद्भागवतप्राप्तौ यत्सुखं तत्प्राप्स्यन्ति । यद्वा श्रीमद्भागवतप्राप्तौ सत्यां शाश्वतम् नित्यम् । सुखमैहिकपारलौकिकं मोक्षं वा प्राप्स्यन्तीत्यन्वयः ॥ ६२ ॥ ननु को मां श्रावयिष्यतीति चेत्तत्राह नन्दनन्दनरूपस्त्विति द्वाभ्याम् । नन्दनन्दनरूपः नन्दनन्दनस्य रूपमिव रूपं यस्य सः श्यामसुन्दर इत्यर्थः । नन्दनन्दनं कृष्णं रूपयति निरूपयतीति वा । भगवान् जीवोत्पत्त्यादिज्ञाता । तदुक्तम् 'उत्पत्तिं प्रलयं चैव भूतानामगतिं गतिम् । वेत्ति विद्यामविद्यां च भगवानिति शब्द्यते ॥' इति । ऋषिः सर्वज्ञः सर्वोपायोपदेष्टा वा । न संशयो यस्य सः श्रीशुकस्तुभ्यं श्रीमद्भागवतं श्रावयिष्यति । 'असंशयमि'ति पाठे क्रियाविशेषणम् ॥ ६३ ॥ तेनेति । तेन श्रीभागवतश्रवणेनैव । व्रजेशितुः श्रीकृष्णस्य । नित्यं धाम वैकुंठाख्यं नित्यस्वरूपं वा । ततस्तत्र भगवन्नित्यधामप्राप्त्यनन्तरम् । तव श्रीभागवतश्रवणान्तरं वा ॥ ६४ ॥ तस्मादित्यर्द्धकम् । तस्मात् कलियुगस्यैव सत्कर्मविघ्नकारित्वात् । इतिशब्दः प्रकारे । इत्येवम् राजन्नित्याद्युक्तप्रकारेणोक्तः श्रीपरीक्षित् । तम् उद्धवम् । दिशां जये तन्निमित्ते ॥ ६५ ॥ प्रतिबाहुम् तन्नामकं पुत्रम् । निजराज्येशम् स्वामिनं राजानमिति यावत् । विधाय कृत्वेत्यर्थः । 'विपूर्वो धा करोत्यर्थे' इत्युक्तेः । तत्रैव वृन्दावनान्तर्गतगोवर्द्धनगिरिनिकटसखीस्थले एव । मातृभिः रोहिण्यादिषोडशसहस्रकृष्णपत्नीभिः सह भागवताशया श्रीभागवतश्रवणेच्छया इत्यर्थः ॥ ६६ ॥ अथेति । अथ वज्रनाभस्थित्यनन्तरम् । मासम् मासपर्यन्तमित्यर्थः । गोवर्धनसमीपतः तत्समीपे सखीस्थले इत्यर्थः ॥ ६७ ॥ तस्मिन्निति । तस्मिन् श्रीमद्भागवते । आस्वाद्यमाने रस्यमाने सति । हरेः भक्तानां स्वविरहादिदुःखशमनशीलस्य श्रीकृष्णस्य । सर्वतः बहिरन्तरतः श्रीकृष्णोऽपि प्रचकाशे । 'सर्वान्त' इति पाठान्तरम् ॥ ६८ ॥ ततो यद्वृत्तं तदाह आत्मान-

आत्मानं च तदन्तस्थं सर्वेऽपि ददृशुस्तदा । वज्रस्तु दक्षिणे दृष्ट्वा कृष्णपादसरोरुहे ॥ ६९ ॥
स्वात्मानं कृष्णवैधुर्य्यान्मुक्तस्तद्भुव्यशोभत । ताश्च तन्मातरः कृष्णे रासरात्रिप्रकाशिनि ॥ ७० ॥
चन्द्रे कलाप्रभारूपमात्मानं वीक्ष्य विस्मिताः । स्वप्रेष्ठविरहव्याधिविमुक्ताः स्वपदं ययुः ॥ ७१ ॥
येऽन्ये च तत्र ते सर्वे नित्यलीलान्तरं गताः । व्यावहारिकलोकेभ्यः सद्योऽदर्शनमागताः ॥ ७२ ॥
गोवर्द्धननिकुञ्जेषु गोषु वृन्दावनादिषु । नित्यं कृष्णेन मोदन्ते दृश्यन्ते प्रेमतत्परैः ॥ ७३ ॥
श्रीसूत उवाच—य एतां भगवत्प्राप्तिं शृणुयाच्चापि कीर्तयेत् । तस्य वै भगवत्प्राप्तिर्दुःखहानिश्च जायते ॥ ७४ ॥

इति श्रीस्कन्दपुराणे अखिलेष्टश्रीभागवतमाहात्म्ये तृतीयोऽध्यायः ॥

## अथ चतुर्थोऽध्यायः

श्रीऋषय ऊचुः—साधु सूत चिरं जीव चिरमेवं प्रशाधि नः । श्रीभागवतमाहात्म्यमपूर्वं त्वन्मुखाच्छ्रुतम् ॥ १ ॥
तत्स्वरूपप्रमाणं च विधिं च श्रवणे वद । तद्वक्तुर्लक्षणं सूत श्रोतुश्चापि वदाधुना ॥ २ ॥
श्रीसूत उवाच—श्रीमद्भागवतस्याथ श्रीमद्भगवतः सदा । स्वरूपमेकमेवास्ति सच्चिदानन्दलक्षणम् ॥ ३ ॥

मित्यर्द्धकम् । सर्वेऽपि तत्रस्थाः साधारणा अपि । तदा आत्मानम् स्वात्मानं श्रीकृष्णान्तः स्थितं ददृशुः । तदानीं वज्रस्य श्रीकृष्णविरहदुःखनिवृत्तिपूर्वकविशेषानन्दप्राप्तिमाह वज्रेति । वज्रस्तु दक्षिणे श्रीकृष्णचरणारविन्दे ॥ ६९ ॥ स्वात्मानं दृष्ट्वा यदा कृष्णवैधुर्य्यात् श्रीकृष्णात्यन्तवियोगान्मुक्तस्तदा भुव्यशोभतेत्यन्वयः । तत्रान्वशोभतेति पाठान्तरम् । कृष्णपत्नीनान्तु ततोऽप्यधिकानन्दप्राप्तिर्जातेत्याह । ताः रोहिण्याद्यास्तन्मातरः वज्रनाभस्य प्रपितामह्यः कृष्णपत्न्य इति यावत् । रासरात्रिप्रकाशके श्रीकृष्णे नित्यानन्दरूपतया परमप्रेमास्पदे ॥ ७० ॥ चन्द्रे कलाः षोडश लम्बिन्याद्याः तासां प्रभाः चित्सहस्रप्रभाः । यद्वा कला षोडशकलात्मिका श्रीराधिका तस्याः प्रभाः किरणाः अंशा इति यावत् । तस्या एवांशविस्ताराः सर्वाः श्रीकृष्णनायिका इति कालिन्द्युक्तेः । तद्रूपं स्वात्मानं वीक्ष्य विशेषेण तत्परतया साक्षाद् दृष्ट्वा विस्मिताः सत्यः स्वप्रेष्ठस्य स्वस्यातिप्राणवल्लभस्य श्रीकृष्णस्य विरहदुःखाद्विमुक्ताः स्वपदम् श्रीराधाख्यं ययुः । अयं भावः—श्रीराधाकृष्णयोरेकरूपवत्त्वात्तासां श्रीराधाद्वारैव श्रीकृष्णप्राप्तिस्तया च तद्विरहदुःखनिवृत्तिश्चेति ॥ ७१ ॥ किञ्च तत्र कीर्तनादितत्पराणां तत्समाजस्थानामन्येषां चापि नित्यलीलाप्राप्तिमाह ये इति । तत्र वृन्दावनान्तर्गतसखीस्थले । तत्समाजे वा । ये वज्रादिभ्योऽन्ये हरिकीर्तनादिकर्त्तारस्ते सर्वे नित्यलीलान्तरं गताः सन्तः व्यवहारिकलोकेभ्यो जनेभ्यो वा । 'लोकस्तु भुवने जने' इत्यमरः । सद्योऽदर्शनमासर्वतो गताः प्राप्ताः ॥ ७२ ॥ ननु तर्हीदानीं तद्दर्शनेच्छूनां कुत्र तद्दर्शनं स्यात् वृन्दावनादिषु इत्याह । यद्वा प्रेमिभिस्त्विदानीमपि ते दृश्यंते इत्याह । निकुंजेष्विति । प्रेमतत्परैः प्रेमैकनिष्ठैः ॥ ७३ ॥ एतच्छ्रवणकीर्तनयोः फलं कथयन् श्रीसूत उवाचेति व्यासोक्तिः । यः श्रोता वक्ता च । एताम् पूर्वोक्ताम् । तस्य श्रोतुर्वक्तुश्च । दुःखहानिः संसारदुःखनिवृत्तिश्च जायते इति वै निश्चितं नात्र कोऽपि संदेहः कार्य इत्यर्थः ॥ ७४ ॥

इति श्रीस्कन्दपुराणे अखिलेष्टश्रीमद्भागवतमाहात्म्ये खाण्डलविंवंशोद्भवश्रीमथुरावसुदेवतीर्थनिवासि-
पौराणिकश्रीमोहनदेवात्मजहरिहरदेवकृतायां वैष्णवानन्दिन्यां टिप्पण्यां तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्भागवतस्याथ श्रोतुर्वक्तुश्च लक्षणम् । श्रवणे च विधिस्तुर्य्ये श्रीसूतेन निगद्यते ॥ १ ॥

तदेवमत्यद्भुतश्रीमद्भागवतस्य श्रवणं सर्वदुःखनिरासपूर्वककृष्णप्राप्तिकरमिति श्रुत्वा तत्स्वरूपादीनि जिज्ञासवः शौनकादय ऋषय आशीर्वाददानादिपूर्वकं श्रीसूतं प्रत्यूचुरिति व्यासोक्तिः साध्वित्यादिद्वयेन । हे सूत त्वं साधु यथा स्यात्तथा चिरम् बहुकालं जीवेत्याशीः । त्वं नाऽस्मान् एवमेव श्रीमद्भागवतमाहात्म्यादिकथनप्रकारेणैव । चिरं प्रशाधि प्रकर्षेण अस्मादभीप्सितभगवच्चरित्रकथनेन बहु शाधि शिक्षय । त्वन्मुखादपूर्वम् अद्भुतं श्रीमद्भागवतमाहात्म्यमस्माभिः श्रुतम् ॥ १ ॥ तत्स्वरूपमिति । तस्य श्रीभागवतस्य स्वरूपादीनि पञ्च वदेत्यन्वयः । तत्र स्वरूपम् यदात्मकं तत् । प्रमाणम् इयत्ताम् । श्रवणे च विधिम् प्रकारम् । तद्वक्तुः श्रीभागवतवाचकस्य लक्षणम् । वदेत्यस्य वाक्यभेदान्न पुनरुक्तिदोषः ॥ २ ॥ तत्र पञ्चानामपि प्रश्नानामुत्तरं वदन् श्रीसूत उवाचेति व्यासोक्तिः श्रीमद्भागवतस्येत्यारभ्य यावदध्यायसमाप्ति । तत्र तावत् श्रीभागवतस्य स्वरूपमाह श्रीमद्भागवतस्येति त्रिभिः । श्रीमद्भागवतनाम्ना तन्नामकपुराणस्य । श्रीमद्भगवतः श्रीकृष्णस्य च स्वरूपं सदा एकमेवास्ति । अत्राहं प्रतिज्ञां करोमीति सूचयन्नाह अथेति । 'अथशब्दोऽन्वादेशे प्रतिज्ञायां प्रश्नसाकल्ययोरपी'ति हैमः । यद्वा अथ कार्त्स्न्येन स्वरूपमेकमेवास्ति । किं तत्स्वरूपमित्यपेक्षायामाह । सच्चिदानन्द-

श्रीकृष्णासक्तभक्तानां तन्माधुर्य्यप्रकाशकम् । समुज्जृम्भति यद्वाक्यं विद्धि भागवतं हि तत् ॥ ४ ॥
ज्ञानविज्ञानभक्त्यङ्गचतुष्टयपरं वचः । मायामर्दनदक्षं च विद्धि भागवतं च तत् ॥ ५ ॥
प्रमाणं तस्य को वेद ह्यनन्तस्याक्षरात्मनः । ब्रह्मणे हरिणा तद्दिक् चतुःश्लोक्या प्रदर्शिता ॥ ६ ॥
तदानन्त्यावगाहे न स्वेप्सितावहनक्षमाः । त एव सन्ति भो विप्रा ब्रह्मविष्णुशिवादयः ॥ ७ ॥
मितबुद्ध्यादिवृत्तीनां मनुष्याणां हिताय च । परीक्षिच्छुकसंवादो योऽसौ व्यासेन कीर्तितः ॥ ८ ॥
ग्रन्थोऽष्टादशसाहस्रो योऽसौ भागवताभिधः । कलिग्राहगृहीतानां स एव परमाश्रयः ॥ ९ ॥

लक्षणम् सच्चिदानन्दमेव लक्षणम् स्वरूपमिति । तथेति पाठान्तरम् ॥ ३ ॥ किञ्च यस्य वाक्यं कृष्णभक्तानां कृष्णमाधुर्य्यप्रकाशकं सन् समुज्जृम्भति सम्यक् सर्वोत्कर्षेण वर्द्धते । तद्भागवतं विद्धीत्यन्वयः ॥ ४ ॥ किञ्च ज्ञानम् शास्त्रोत्थं च । विज्ञानमनुभवश्च । भक्तिः प्रेमलक्षणा च । अङ्गानि क्रमेण शास्त्रश्रवणमहावाक्यार्थनिदिध्यासननामसंकीर्तनादिरूपाणि तेषां साधनानि च । भक्त्यंगानि श्रवणादीनि वा इत्येवं चतुष्टयमेवं परं केवलं यस्मिन्नेवंभूतं यद्वचः अष्टादशसहस्रश्लोकात्मकम् । यच्च तैरेव ज्ञानादिभिः श्रवणादिद्वारा वा माया अविद्या तस्या मर्दने दक्षं च । तदेव श्रीभागवतं विद्धीत्यन्वयः ॥ ५ ॥

श्रीभागवतप्रमाणप्रश्नस्योत्तरमाह । यद्वा अथ श्रीभागवतस्य प्रमाणं वदन् तावदप्रमाणमाह प्रमाणमित्यादिसार्द्धत्रयेण । अनन्तस्य नान्तो देशतः कालतो वा यस्य । अत एव न क्षरति आत्मा-स्वरूपं यस्य तस्य श्रीभागवतस्य प्रमाणम्—इयत्ताम् । कः साधारणजातो वेद न कोऽपीत्यर्थः । यद्वा को ब्रह्मा किं वेदेति काकुः । न वेद इत्यर्थः । 'को ब्रह्मणि समीरात्मयमदक्षेषु भास्करे । मयूरेऽग्नौ च पुंसि स्यात्सुखशीर्षजलेषु कमि'ति हैमः । हरिणा ब्रह्मणे यत् श्रीभागवतं चतुःश्लोक्या प्रदर्शितं तत्तु दिक् प्रदर्शिता दिङ्मात्रं प्रदर्शितमित्यर्थः । वस्तुतस्त्वप्रमाणं तस्य भगवद्रूपत्वादिति भावः । तादृक् प्रदर्शितं चेति पाठे । तादृक्—अनन्तमक्षरात्मकं श्रीभागवतं हरिणा ब्रह्मणे चतुःश्लोक्यैव प्रदर्शितमित्यन्वयः ॥ ६ ॥ तदेव स्फुटयति तदानन्त्यावगाहे इति । भो विप्राः—शौनकादयः । ये ब्रह्मविष्णुशिवादयः स्वेप्सितावहनक्षमाः—स्वेप्सितस्य स्ववाञ्छितस्यावहने प्रापणे क्षमाः समर्थाः । सर्वसमर्था इत्यर्थः । त एव तदानन्त्यावगाहे—तस्य श्रीभागवतस्यानन्त्यविलोडने आनन्त्यज्ञाने इति यावत् । नैव सन्ति नैव समर्थाः सन्तीत्यर्थः । यद्वैवमन्वयः—ये ब्रह्मविष्णुशिवादयस्ते एव श्रीभागवतानन्त्यस्यावगाहेन तद्विचारेणेत्यर्थः । स्वेप्सितावहने स्ववाञ्छितज्ञाने । यद्वा स्वेप्सितस्य स्ववाञ्छितस्य ज्ञानादेः आवहने प्रापणे क्षमाः सन्ति । नान्येऽस्मदादय इत्यर्थः । तेषां पुरुषावतारकृततदुपदेशादिति भावः ॥ ७ ॥ ननु यदि तदानन्त्यं तर्हि किमित्यष्टादशसाहस्रश्लोकसंख्यानियमो लोके प्रसिद्धः, कथं च तन्मात्रेणैव जीवानां संसारान्निस्तार इति चेत् तत्राह । मितबुद्ध्यादिवृत्तीनाममित्यादिद्वयेन । मितबुद्ध्यादिवृत्तीनाम् अल्पबुद्ध्यादिवृत्तीनां मनुष्याणां हिताय परीक्षिच्छ्रोतुः शुकदेववक्तुश्च संवादो यस्मिन्नेवंभूतो योऽसौ व्यासेन कीर्तितो ग्रन्थः स एवाष्टादशसहस्रश्लोकसंख्याक इत्यर्थः । वस्तुतस्त्वानन्त्यमेव तस्येति भावः ॥ ८ ॥ योऽसावष्टादशसहस्रश्लोकसंख्याकः श्रीभागवताभिधो ग्रन्थः स एव कलिग्राहगृहीतानां परम् केवलमाश्रयः शरणम् । न तु यज्ञदानादिरिति भावः । यद्वा परमाश्रयः अतिविलक्षणाश्रय इत्यर्थः । अत्र कलेर्ग्राहत्वकथनेन संसारस्य समुद्रत्वं सूचितं तेन च श्रीभागवतस्यातिविलक्षणबृहच्चित्तरीत्वं च ध्वनितम् । अत्राधिक्योक्तिरूपकालङ्कारस्तत्रेदं बोद्धव्यम् । यथा नाविकेन वंशक्षेपिण्येरिता तरी कर्णधारस्य तरपण्यं दापयित्वा ग्राहाद्यगृहीतानेव तितीर्षतो जनान् नद्यादिष्वेव पारयति । तथेयमतिविलक्षणा बृहती चिन्मयी श्रीभागवतरूपा तरी तु ज्ञानमुद्राक्षेपणीहस्तेन वाचककर्णधारेणेरिता तच्चरणसेवारूपतरपण्यं श्रोतृनाव्यजनेभ्यस्तस्मै दापयित्वा स्वयं श्रोतृनाव्येनैवेरिता वा ध्याता आ पूजिता वा नमस्कृता वा कलिग्राहगृहीतानपि तितीर्षतो जनान् तन्मुखान्निःसार्य्य कामादिकच्छपे मानादिमकरे तृष्णादितिमिंगिले भयादिनक्रे अहंकारादिपाठीने निद्रातन्द्राद्यलगर्द्दे चिन्ताशोकादिमहावर्ते सुखदुःखादिकल्लोले संचितकर्माद्यगाधजलपूर्णे एवंभूते महाभयङ्करे संसारसमुद्रे झटिति पारयतीत्यस्या वैलक्षण्यमिति । यद्वैवमन्वयः । ननु यदि तदानन्त्यं तर्हि किमित्यष्टादशसाहस्रसंख्यानियम इत्यत आह । मितेति सपादेन । योऽसावष्टादशसाहस्रं श्लोका यस्मिन्नेवं भूतो ग्रन्थः शास्त्रं त्वल्पबुद्ध्यादिवृत्तीनां मनुष्याणां हिताय व्यासेन कीर्तित इत्यन्वयः । नन्वष्टादशसाहस्रश्लोकसंख्याकत्वेनैतादृशं भगवतीभागवतमप्यस्ति । लोकेऽपि देवीभागवतं श्रीमद्भागवतं चेति भागवतद्वयं श्रूयते, तर्हि कस्य प्रामाण्यमित्याशयेन तद्विशिनष्टि । परीक्षिच्छुकसम्वाद इति । परीक्षिदभिमन्युपुत्रो राजा । शुको व्यासपुत्रस्तयोः सम्वादो यस्मिन् सः । तथा च गोतमः । अम्बरीष शुकप्रोक्तं नित्यं भागवतं शृणुष्वेत्यादि । मत्स्यपुराणे । 'यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः । वृत्रासुरवधोपेतं तद्वै भागवतं विदुः ॥' पुराणान्तरे च 'ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः । हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥ गायत्र्या च समारम्भस्तद्वै भागवतं विदुरि'ति । यद्यपि भगवतीभागवतेऽष्टादशसाहस्रत्वं हयग्रीवब्रह्मविद्या वृत्रवधश्चास्ति, तथापि शुकप्रोक्तत्वं नास्तीति कृत्वा नातिव्याप्तिः । ननु 'व्यासेन कृत्वाथ शुभं पुराणं शुकाय पुत्राय च पाठितं तदि'ति भगवतीभागवतेऽपि वचनात्

**श्रोतारोऽथ निरूप्यन्ते श्रीमद्विष्णुकथाश्रयाः । प्रवरा अवराश्चेति श्रोतारो द्विविधा मताः ॥ १० ॥**
**प्रवराश्चातको हंसः शुको मीनादयस्तथा । अवरा वृकभूरुण्डवृषोष्ट्राद्याः प्रकीर्तिताः ॥ ११ ॥**

शुकाय प्रोक्तं शुकप्रोक्तमिति चतुर्थीसमासपक्षेऽस्ति शुकप्रोक्तत्वं तस्यापि । किञ्च हयग्रीवब्रह्मविद्या तस्मिन्नेव विस्तरेणास्ति वृत्रवधश्च तस्यैव लक्षणं सम्भवति । प्रकृते तु वृत्रवधो नास्ति विस्तरेण यथा कंसवधः गायत्र्या समारम्भोऽपि तस्यैवास्ति । 'सर्वचैतन्यरूपां तामाद्यां विद्यां च धीमहि । बुद्धिं सा नः प्रचोदयादि'ति गायत्रीछन्दः । प्रकृते तु शार्दूलच्छन्दसारम्भः । न च गायत्रीशब्दो गायत्र्यर्थपरः सम्भवति शक्यार्थेन निर्वाहे लक्षणाया[१] अप्रवृत्तेः । गायत्रीछन्दसारम्भ इति दिनकरपाठाच्च हेमसिंह-समन्वितमिति देवीपुराणमेवाक्षिपति सिंहस्य देवीवाहनत्वात् पूर्णा तिथिर्देव्या एव सापि यथा 'सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः । तद्वृत्तान्तोद्भवं शास्त्रं श्रीभागवतमिष्यते ॥' इति मात्स्योक्तेः । सारस्वतकल्पं सरस्वतीसम्बन्धि तेनापि सरस्वतीदेवता-प्रतिपादकं पुराणं समायाति । देवतासम्बन्धेन वक्तृसम्बन्धेन च पुराणानां प्रायशोऽभिधानात् । 'नवरात्रे च संप्राप्ते दौर्गं भागवतं पठेदि'ति च शाक्तग्रन्थलेखनात् कथं न भागवतीभागवतं गृह्यते इति चेत्, शृणु बृहन्नारदीये अष्टादशपुराणानुक्रमणाध्याये 'तत्र तु प्रथमस्कन्धे सूतर्षीणां च संगमे । व्यासस्य चरितं पुण्यं पाण्डवानां परीक्षितः ॥ परीक्षिच्छुकसम्वादो द्वितीयादौ प्रवर्तते ।' इत्यादिना विष्णुभागवतस्यैवानुक्रमदर्शनात् । अत एव प्रकृते भागवते परीक्षिच्छुकसम्वाद इति लक्षणं दृढं दर्शितम् । न चान्यत्र परीक्षिच्छुकसम्वादोऽस्ति । न च हयग्रीवब्रह्मविद्या नास्तीत्युक्ता सापि नारायणकवचरूपा षष्ठेऽस्ति । 'यद्वा अश्वशिरो नाम तयोरमरतां व्यधादि'ति श्रीभागवतात् । आदित्ये च दधीचिनाऽश्वशिरसैव तस्या उपदेशात् । यच्च वृत्रवधश्चात्राप्यध्यायचतुष्टये नास्ति तेन वृत्रवधाभावकथनं वृथैव, स्वल्पेनापि नियतेन स्रास्नादिना गवादिलक्षणसंभवात् । किञ्च भगवतोऽसाधारणो भक्तो वृत्रो भागवते भारते च निरूपितः, तच्छ्रोत्राद्यङ्गैः श्रवणादिभक्त्यंगानि जातानि । 'अथ ब्रह्मा च विष्णुश्च रुद्रश्चापि समागतः । वृत्रदेहेन ते भक्तिं यज्ञांश्च नवधाऽभजन् ॥ श्रवणं श्रवणाभ्यां तु नयनाभ्यां तु दर्शनम् । हृदयात्स्मरणं चक्रुः कीर्तनं जिह्वयाऽऽचरन् । कराभ्यामर्चनं विष्णोः पादाभ्यां दास्यमेव च ॥ वन्दनं शिरसा चक्रुर्गात्रेणात्मसमर्चनमि'ति सौरादित्ये कथनात् । परमभागवतेन भागवतलक्षणं सम्यगेव । गायत्र्या च समारम्भ इति गायत्रीशब्दोऽर्थपर एव, गायत्रीभाष्यरूपोऽसौ श्रीमद्भागवताभिध' इत्युक्तेः । गायत्रीछन्द-सारम्भ इति पाठस्त्वसंगत एव, भगवतीभागवते प्राचीनपुस्तकेषु 'सर्वचैतन्यरूपां तामाद्यां विद्यां च धीमहि । यया व्याप्तमिदं सर्वं बुद्धिं सा नः प्रचोदयादि'त्यनुष्टुभोपक्रमात् हेमसिंहशब्देन सिंहासनं गृह्यते, न तु देव्या वाहनं सिंहः । मत्स्यपुराणे दानप्रस्तावे धेनुदानादेरेवोक्तत्वात् वाहनदानानुक्तत्वाच्च पूर्णिमा तिथिश्च चैत्रादिपूर्णिमादिक्रमेण पुराणेषु गृहीता न तु देवीतिथित्वेन । सारस्वतकल्पं च फाल्गुनशुक्ले गोविन्दद्वादश्यां प्रवृत्तं वैष्णवं कल्पं सरस्वती च सात्त्विकी वैष्णवी शक्तिस्तत्र जाता वैष्णवा नरास्तद्वृत्तान्तः श्रीभागवते सम्यगेव । किञ्च 'कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ ।' इति बृहद्वामने । श्रुतिदेवतानां भगवता वरदानात्तल्लीलाप्राकट्यं श्रीभागवते वर्ण्यते । शाण्डिल्येऽपि तथैव कथनाच्च । नवरात्रे दौर्गभागवतपाठविधिरपि 'नमस्कृत्य शिवां देवीं सर्वं भागवतं तथा । पुराणं सम्प्रवक्ष्यामि यथोक्तमृषिसत्तमैरि'ति देवीपुराणपरं न तु भगवतीभागवतपरम् । प्राचीनग्रन्थेषु तस्य कुत्राप्यदर्शनात् इत्यादिदूषणानि विस्तरेण बहुभिर्विद्वद्भिर्नीलकण्ठीयोभयभागवतस्थितिग्रन्थखण्डनेषु श्रीमद्भागवतविजयवादश्रीमद्भागवतशङ्कानिरासप्रभृतिग्रन्थेषु निरूप्य निरस्तानीत्युपरम्यते । किञ्च न च भगवत्या इदं भागवतमिति सिद्ध्यति 'स्त्रीभ्यो ढगि'ति ढकाणो बाधनात् । तस्माद्भगवत्प्रोक्तत्वभगवद्देवताकत्वैकतररूपावयवशक्त्या च शुकभाषितशास्त्रं बोधयन्नयं भागवतशब्दः पङ्कजादिशब्दवद्योगरूढो बोध्य इति सिद्धान्तदर्पणकारचरणाः । किञ्च श्रीधरस्वामि-चरणैर्नान्यद्भागवतं शङ्कनीयमिति कथमुक्तमिति चेत् तत्र शृणु । भवन्मतेऽन्यस्य द्वादशस्कन्धादिविशिष्टस्य भागवतस्या-सत्त्वाद् देवीपुराणं कालीपुराणमादित्यपुराणं विष्णुभागवतमिति चत्वार आर्षप्रामाणिकग्रन्था भागवतनाम्ना प्रसिद्धास्तेषु श्रीधरस्वामिचरणलिखितलक्षणानां विष्णुभागवतातिरिक्तभागवतेष्वसंनिवेशनादन्यद्भागवतं न शङ्कनीयमिति श्रीधरस्वामि चरणोक्तिः सम्यगेवेत्यलम् । किञ्च केचिच्छ्रीमद्भागवतं बोपदेवकृतं वदन्ति, तदसन् । यद्येतद्भागवतं बोपदेवेन व्यरचीत्युच्यते तर्हि तस्मात्पूर्वजातैर्हनुमदादिभिस्तस्मिन् कृताष्टीकाः कथं सम्भवेयुः । हनूमान् श्रीरामपार्षदः । चित्सुखश्चाचार्यैः श्रीमद्भागवतं व्याचख्यौ । श्रीमध्वमुनिः स्वभाष्ये तद्वाक्यान्युदाजहार । शङ्कराचार्योऽपि श्रीभागवतमात्रवर्णिते स्वकृतगोविन्दाष्टके मृद्भक्षणगोपी-वस्त्रहरणादिलीला वर्णयन् तद्व्याख्यातवानेव । श्रीमध्वशङ्करौ हि समकालौ शङ्कराचार्यसमयादुत्तरे वर्षशतद्वये व्यतीते बोपदेवोऽभूदिति रामाश्रमाचार्यादिभिः स्वकृतदुर्जनमुखचपेटिकादिग्रन्थेषु लिखितम् । यद्येते हनुमदादयस्तस्य व्याख्यानादि चक्रुस्तदा बोपदेवजन्मगन्धोऽपि नाभूदिति श्रीमद्भागवतस्य तत्कर्तृकत्वं कथयन्तो भ्रान्तधिय एवेति दिक् ॥ ९ ॥
अथ श्रोतॄन्निरूपयति । श्रोतार इति । अथ श्रीभागवतानन्त्यवर्णनानन्तरम् । निरूप्यन्ते मया सूतेन । प्रवराः उत्तमाः । अवराः अधमाश्च । मताः व्यासाद्यैरिति शेषः ॥ १० ॥ तानुभयविधान् स्फुटयति । प्रवरा इति । अत्र प्रथमादिशब्देन भृङ्गादीनां ग्रहणम् ।

---

१. टि०—'मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते । रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता' इति ।

अखिलोपेक्षया यस्तु कृष्णशास्त्रश्रुतौ व्रती । स चातको यथाम्भोदमुक्ते पाथसि चातकः ॥ १२ ॥
हंसः स्यात्सारमादत्ते यः श्रोता विविधाच्छ्रुतात् । दुग्धेनैक्यं गतात्तोयाद्यथा हंसोऽमलं पयः ॥ १३ ॥
शुकः सुष्ठु मितं वक्ति व्यासं श्रोतॄंश्च हर्षयन् । सुपाठितः शुको यद्वच्छिक्षकं पार्श्वगानपि ॥ १४ ॥
शब्दं नानिमिषो जातु करोत्यास्वादयन् रसम् । श्रोता स्निग्धो भवेन्मीनो मीनः क्षीरनिधौ यथा ॥१५॥
यस्तुदन् रसिकान् श्रोतॄन् विरौत्यज्ञो वृको हि सः । वेणुस्वनरसासक्तान् वृकोऽरण्ये मृगान् यथा ॥१६॥
भूरुण्डः शिक्षयेदन्यान् श्रुत्वा न स्वयमाचरेत् । यथा हिमवतः शृङ्गे भूरुण्डाख्यो विहङ्गमः ॥ १७ ॥
सर्वं श्रुतमुपादत्ते सारासारान्धधीर्वृषः । स्वादुद्राक्षां खलिं चापि निर्विशेषं यथा वृषः ॥ १८ ॥
स उष्ट्रो मधुरं मुञ्चन् विपरीते रमेत यः । यथा निम्बं चरत्युष्ट्रो हित्वाऽऽम्रमपि तद्युतम् ॥ १९ ॥
अन्येऽपि बहवो भेदा द्वयोर्भृङ्गखरादयः । विज्ञेयास्तत्तदाचारैस्तत्तत्प्रकृतिसंभवैः ॥ २० ॥

द्वितीयादिशब्देन खरादीनां ग्रहणम् ॥ ११ ॥ तत्र प्रवरश्रोतॄन् सदृष्टान्तान् कथयन् तल्लक्षणानि च लक्षयन् तत्र तावत्प्रवरं चातकश्रोतारं व्याचष्टे । अखिलोपेक्षयेति । यथा समुद्रादिजलपानत्यागेनाम्भोदमुक्ते पाथसि जले एव कृतपाननिश्चयश्चातकस्तथाऽखिलोपेक्षया सर्वशास्त्रश्रवणत्यागेनेत्यर्थः, यः श्रीभागवतश्रवणे एव कृतनियमः स चातकः श्रोतेत्यर्थः ॥ १२ ॥ हंसश्रोतारं व्याचष्टे हंस इति । यथा दुग्धेनैकभावं प्राप्तात् तोयात् जलात् हंसस्तत्तोयं त्यजन् अमलं पयो दुग्धमेव पिबति । तथा यो विविधात्श्रुतात् तोयस्थानीयानेकदृष्टान्तादियुक्तात् श्रीभागवतादिशास्त्रात् । दृष्टान्तादितोयं त्यजन् सारं भगवच्चरितामृतमेव । यद्वा सारम् साधनेषु श्रेष्ठं भगवद्धर्ममेव । 'सतामयं सारभृतां निसर्ग' इत्यत्र दशमे तथा दर्शनात् । आदत्ते गृह्णाति । स हंसः श्रोता स्यादित्यर्थः ॥ १३ ॥ शुकश्रोतारं व्याचष्टे । शुक इति । यद्वत् तथा । शिक्षकेन सुपाठितः शुकः स्वशिक्षकं पार्श्वगांश्च स्वनिकटवर्तिनो जनानपि हर्षयन् सुष्ठु मनोहरम् राधाकृष्ण गोपीकृष्ण इति नाम । मितम् पाठितानुसारमेवोच्चारयति । तथा यो व्यासम् स्वशिक्षकं गुरुम् । स्वनिकटवर्तिनः कथाश्रोतृजनांश्च हर्षयन् । सुष्ठु मितं हरे कृष्णे इत्यादि नाम वक्ति उच्चारयति । सः शुकः श्रोतेत्यर्थः ॥ १४ ॥ मत्स्यश्रोतारं व्याचष्टे । शब्दमिति । यथा अनिमिषो मीनो मत्स्यः क्षीरनिधौ तदन्तरेव । रसम् जलादिरसमास्वादयन् जातु कदाचित् किञ्चिदपि शब्दं न करोति । तूष्णीं भूत्वैव रसमास्वादयतीत्यर्थः । तथा यः कथारसं तूष्णीं भूत्वाऽनिमिष एवास्वादयति सः स्निग्धो मीनो मत्स्यश्रोतेत्यर्थः । यद्वा यथा मत्स्यः क्षीरनिधौ सजले तत्तीरे इत्यर्थः । चन्द्रं दृष्ट्वा तत्किरणद्वारा रसम् तदमृतमास्वादयन् सन् शब्दं न करोति । तूष्णीं भूत्वैव चन्द्रामृतमास्वादयतीत्यर्थः । तथा हरिकीर्तनसभारूपसमुद्रे यः स्वसम्मुखे वक्तृमुखचन्द्रं दृष्ट्वा तन्मुखचन्द्रे वर्तमानं श्रीकृष्णचरितामृतं तूष्णीं भूत्वाऽनिमिष एव तदनेककथनरूपकिरणद्वाराऽऽस्वादयति । सः स्निग्धो मीनो मत्स्यश्रोतेत्यन्ये ॥ १५ ॥ अथावरश्रोतॄन् सदृष्टान्तान् कथयन् तत्र तावदवरं वृकश्रोतारं व्याचष्टे । य इति । यथा वृकः 'भेड़िया' इति ख्यातो महावञ्चकोऽरण्ये वेणुस्वनरसासक्तान् मृगान् व्यथयन् विरौति विशिष्टशब्दं कुर्वन् विद्रावयति । तथा यो भगवच्चरित्रश्रवणासक्तान् श्रोतृजनान् तुदन् व्यथयन् विद्रावयति, सोऽज्ञो महावञ्चको वृको वृकश्रोतेत्यर्थः ॥ १६ ॥ भूरुण्डश्रोतारं व्याचष्टे । भूरुण्ड इति । यथा हिमवतः शृङ्गे वर्तमानो भूरुण्ड इति आख्या नाम यस्य सः कश्चित्पक्षिविशेषः हंसादीनां धैर्यादिस्वभावं श्रुत्वा दृष्ट्वा च तत्स्वभावमन्येभ्यः शिक्षयति स्वयं च नैवाचरति स्वयं तु सिंहस्य जृम्भणसमये तद्दंष्ट्रालग्नं मांसं चञ्च्वा निःसार्य झटित्युड्डीयते । तथा हरिकीर्तनसभायां धैर्यादिसत्स्वभावं दृष्ट्वा श्रुत्वा चान्यजनेभ्यो यूयं धैर्येण गच्छत । कथां च धैर्येण शृणुतेत्यादिसत्स्वभावं शिक्षयेत् । स्वयं च नैवाचरेत् । स्वयं तु हरिकीर्तनसभामागत्य तत्रस्थान् श्रोतृजनान् दुर्वचनादिभिर्निःसार्य झटिति पलायते स भूरुण्डो भूरुण्डश्रोतेत्यर्थः । यथा भूरुण्डो साहसं मा कुरुत इत्यन्येभ्यः शिक्षयति स्वयं च नैवाचरति । तथा यः कथां श्रुत्वा साहसं मा कुरुत इत्यन्येभ्यः शिक्षयेत् स्वयं नैवाचरेत् स भूरुण्ड श्रोतेति केचित् ॥ १७ ॥ वृषश्रोतारं व्याचष्टे सर्वमिति । यथा सारासारान्धधीः सारे स्थिरांशे असारे तद्विपरीते च अन्धा धीर्बुद्धिर्यस्य । 'सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु' इत्यमरसिंहः । एवंभूतो वृषः । स्वादु अतिमिष्टां द्राक्षाम् । खलिम् तिलकिट्टं चापि निर्विशेषम् विवेकशून्यं यथा स्यात्तथा खादति । तथा यः श्रुतम् भगवच्चरित्रं स्त्र्यादिचरित्रं चेति सर्वम् । निर्विशेषम् रसविवेकशून्यं यथा स्यात्तथोपादत्ते गृह्णाति । सः सारासारान्धधीः—सर्वसारे भगवच्चरित्रे सर्वासारे स्त्र्यादिचरित्रे चान्धा विवेकशून्या धीर्यस्य स एवंभूतो वृषो वृषश्रोतेत्यर्थः ॥ १८ ॥ उष्ट्रश्रोतारं व्याचष्टे । स इति । यथोष्ट्रस्तद्युतम् मधुररसेन युतमप्याम्रम् तत्फलादि हित्वा कटुनिम्बमेव चरति । तथा 'रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवती'ति श्रुत्युक्तरसयुतं मधुरं फलम् श्रीभागवतादि मुञ्चन् विपरिते महाकटुविषयविषस्य श्रवणे तद्वर्णने च रमते स उष्ट्रः—उष्ट्रश्रोतेत्यर्थः ॥ १९ ॥ अन्यानपि श्रोतृभेदान् सूचयति । अन्येऽपीति । द्वयोः प्रवरावरश्रोत्रोः पूर्वोक्तश्रोतृभेदादन्येऽपि भृङ्गखरादय इति बहवो भेदाः सन्ति । आदिशब्देन मयूरतित्तिरिमार्जारमहिषमण्डूकश्वानकालूकादिभेदा ग्राह्याः । ते तु भेदास्तत्तत्प्रकृतिसम्भवैः तेषां तेषां प्रकृत्या स्वभावेन सम्भवो येषां तैस्तत्तदाचारैस्तेषां तेषा-

यः स्थित्वाऽभिमुखं प्रणम्य विधिवत् त्यक्तान्यवादो हरेर्लीलाः श्रोतुमभीप्सतेऽतिनिपुणो नम्रो विधीताञ्जलिः ।
शिष्यो विश्वसितोऽनुचिन्तनपरः प्रश्नेऽनुरक्तः शुचिर्नित्यं कृष्णजनप्रियो निगदितः श्रोता स वै वक्तृभिः ॥ २१ ॥
भगवन्मतिरनपेक्षः सुहृदो दीनेषु सानुकम्पो यः । बहुधाबोधनचतुरो वक्ता संमानितो मुनिभिः ॥ २२ ॥
अथ भारतभूस्थाने श्रीभागवतसेवने । विधिं शृणुत भो विप्रा येन स्यात् सुखसंततिः ॥ २३ ॥
राजसं सात्विकं चापि तामसं निर्गुणं तथा । चतुर्विधं तु विज्ञेयं श्रीभागवतसेवनम् ॥ २४ ॥
सप्ताहं यज्ञवद्यत्तु सश्रमं सत्वरं मुदा । सेवितं राजसं तत्तु बहुपूजादिशोभनम् ॥ २५ ॥
मासेन ऋतुना वापि श्रवणं स्वादसंयुतम् । सात्विकं यदनायासं समस्तानन्दवर्द्धनम् ॥ २६ ॥
तामसं यत्तु वर्षेण सालसं श्रद्धयाऽयुतम् । विस्मृतिस्मृतिसंयुक्तं सेवनं तच्च सौख्यदम् ॥ २७ ॥
वर्षमासदिनानां तु विमुच्य नियमाग्रहम् । सर्वदा प्रेमभक्त्यैव सेवनं निर्गुणं मतम् ॥ २८ ॥
पारीक्षितेऽपि संवादे निर्गुणं तत्प्रकीर्तितम् । तत्र सप्तदिनाख्यानं तदायुर्दिनसंख्यया ॥ २९ ॥
अन्यत्र त्रिगुणं चापि निर्गुणं च यथेच्छया । यथा कथंचित्कर्तव्यं सेवनं भगवच्छ्रुतेः ॥ ३० ॥

माचार्यैर्विज्ञेयाः विशेषेण विवेकपूर्वकं ज्ञातुं योग्याः ॥ २० ॥ सलक्षणं सर्वातिविलक्षणं मुख्यश्रोतारं निरूपयति । य इति । कृष्णजनप्रियाः—कृष्णजनाः प्रियाः यस्य । तेषां प्रियो वा । यः पुरुषः स्नानादिना शुचिर्भूत्वा । गुरोरभिमुखम् सम्मुखम् स्थित्वा । विधिवत् अष्टांगैः प्रणम्य च । तदानीं कथावधारणार्थं त्यक्तोऽन्यो लौकिको वैदिकश्च वादो येन । यतः कथारसग्रहणेऽतिनिपुणः । अत एव शिरसा नम्रो नम्रीभूतः । अत एव शिष्यः शिक्षयितुं योग्यः 'एतिस्तुशासित्यादिना' क्यप् । हरेर्लीलाः श्रोतुं विहिताञ्जलिः विधिम् विधानमितो गतोऽञ्जलिर्यस्य स विहिताञ्जलिरित्यर्थः । गृहीताञ्जलिरिति पाठे तु सुगमम् । अभीप्सते सर्वतो वाञ्छति । किञ्च । विश्वसितः श्रुतेऽर्थे कृतविश्वासः । ततस्तदनुचिन्तनपरः । संदेहे सति प्रश्नेऽनुरक्तः स एव वक्तृभिः शुकादिभिः श्रोता निगदितः नितराम् मुख्यत्वेन कथितः ॥ २१ ॥ एवं नाना श्रोतॄनभिधाय वक्तारं निरूपयति । भगवन्मतिरिति । भगवति श्रीकृष्णे मतिर्यस्य । अत एव न कृष्णातिरिक्तधनाद्यपेक्षा यस्य । अत एव सुहृदयः शोभनं हृदयस्येति योगविभागजनिताच्प्रत्ययान्तम् । सर्वजनहितकारीत्यर्थः । अत एव दीनजनेष्वनुकम्पासहितः । सुहृदेति तृतीयान्तपाठे शोभनहृदयेन । किञ्च बहुधा दृष्टान्तयुक्त्यादिना बोधनचतुरः स एव मुनिभिः व्यासादिभिर्वक्ता सम्मानितः सम्यक् आदरणीयत्वेन सर्वोद्धारकत्वेन वा । पतितपावनत्वेन वा । मानित इत्यर्थः । सुहृदो दीनजनेषु सानुकम्प इति पाठस्तु छन्दोभङ्गादनादृतोऽस्माभिः ॥ २२ ॥ एवं सुलक्षणं सर्वातिविलक्षणं वक्तारमभिधाय सफलं श्रवणविधिं कथयन् तावदृषीनभिमुखीकरोति । अथेति । अथ वक्तृश्रोतृलक्षणकथनानन्तरम् । विप्राः भगवच्चिन्तनेन दिवसयापकाः । तदुक्तम् 'वियदित्युच्यते व्योम प्रकारः प्रापणे मतः । दिवसं प्रापयन्त्येते तस्माद्विप्रा इति स्मृताः ॥' यद्वा विशेषेण यजमानं पिप्रति पूरयन्तीति विप्रास्तेषां सम्बुद्धौ हे विप्राः । येन—विधिना विधिश्रवणेन वा । सुखानां सन्ततिः बहुकालानेकसुखप्राप्तिरित्यर्थः । तं विधिं यूयं शृणुतेत्यन्वयः ॥ २३ ॥ राजसमिति । श्रीभागवतस्य सेवनम् पठनकथनश्रवणरूपम् । विज्ञेयम् विशेषेण विवेचनपूर्वकं ज्ञातुं योग्यम् श्रोतृजनैर्युष्माभिर्भवति शेषः ॥ २४ ॥ तदेव श्रीभागवतस्य चतुर्विधसेवनं कथयन् तत्र तावत् राजससेवनमाह सप्ताहमिति । बहुपूजादिना शोभनं यच्छ्रीभागवतस्य श्रवणं कीर्तनं चेत्यर्थः । सप्ताहम् सप्तदिनम् । सश्रमं सत्वरं यथा स्यात्तथा यज्ञवत् सेवितम् तत्सप्ताहसेवनं राजसमित्यन्वयः । यज्ञवत् बहुपूजादिना शोभनं सश्रमं सत्वरं यथास्यात्तथा सप्ताहं यच्छ्रवणकीर्तनादिना सेवितं तत् राजसं ज्ञेयमित्यन्वयो वा । बहुपूजादिपूर्वकमिति पाठान्तरे क्रियाविशेषणम् ॥२५॥ सात्त्विकसेवनमाह मासेनेति । मासेन । ऋतुना मासद्वयेनापि वा यच्छ्रीभागवतस्यानायासम् आयासरहितं श्रवणम् तत्सात्त्विकम् । यतः स्वादसंयुतम् सरसमतः समस्तानन्दवर्द्धनम् । श्रवणास्वादसंयुतमिति पाठे मासेन ऋतुना वापि सेवनमित्यध्याहारः । सात्त्विकं तच्च विज्ञेयमिति पाठान्तरम् ॥ २६ ॥

तामससेवनमाह तामसमिति । वर्षेण श्रीभागवतस्य सेवनं सौख्यदमपि यदि सालसम्—आलस्येन सहितम् । श्रद्धयाऽयुतम्—श्रद्धया रहितम् । विस्मृतिस्मृतिसंयुक्तं तर्हि तच्च सेवनं तामसमित्यन्वयः । सालसाश्रद्धयेति पाठान्तरम् ॥ २७ ॥ निर्गुणसेवनमाह । वर्षमासदिनानामिति । वर्षमासदिनानां नियमाग्रहं तु विमुच्य प्रेमभक्त्यैव श्रीभागवतस्य सर्वदा सेवनं निर्गुणम्—गुणातीतं ब्रह्मानन्दतुल्यमित्यर्थः । मतं व्यासाद्यैरिति शेषः । सर्वदेत्यनेन श्रीभागवतश्रवणादेर्नित्यत्वमावश्यकत्वं चोक्तम् । तेन चात्र मूहूर्तप्रश्नाद्यपेक्षा गुरुशुक्रास्तादिदोषश्च नास्तीति भावः । प्रेमास्वादसविस्तारमिति पाठान्तरम् ॥ २८ ॥ ननु श्रीभागवतस्य निर्गुणसेवनं विहाय किमिति राजससेवनमङ्गीकृतं परीक्षिता तत्राह । पारीक्षिते इति । पारीक्षिते सम्वादेऽपि । यत्परीक्षित्कृतश्रीभागवतसेवनं तदपि निर्गुणमेव प्रकीर्तितम् । तत्र पारीक्षिते सम्वादे यत्सप्तदिनाख्यानं तत्तु परीक्षिदायुर्दिनसंख्ययेति ज्ञेयम् ॥ २९ ॥ अन्यत्रेति मासादेरन्यत्र—सर्वदेत्यर्थः । यथा कथञ्चित् येन केन प्रकारेण विधिनिषेधाद्यपरिग्रहेणेति यावत् । यथा कथञ्चिदित्यनेन

ये श्रीकृष्णविहारैकभजनास्वादलोलुपाः । मुक्तावपि निराकांक्षास्तेषां भागवतं धनम् ॥ ३१ ॥
येऽपि संसारसंतापनिर्विण्णाः मोक्षकांक्षिणः । तेषां भवौषधं चैतत् कलौ सेव्यं प्रयत्नतः ॥ ३२ ॥
ये चापि विषयारामाः सांसारिकसुखस्पृहाः । तेषां तु कर्ममार्गेण या सिद्धिः साऽधुना कलौ ॥ ३३ ॥
सामर्थ्यधनविज्ञानाभावादत्यन्तदुर्लभा । तस्मात् तैरपि संसेव्या श्रीमद्भागवती कथा ॥ ३४ ॥
धनं पुत्रांस्तथा दारान् वाहनादि यशो गृहान् । असापत्न्यं च राज्यं च दद्याद्भागवती कथा ॥ ३५ ॥
इह लोके वरान् भुक्त्वा भोगान् वै मनसेप्सितान् । श्रीभागवतसंगेन यात्यन्ते श्रीहरेः पदम् ॥ ३६ ॥
यत्र भागवती वार्ता ये च तच्छ्रवणे रताः । तेषां संसेवनं कुर्याद्देहेन च धनेन च ॥ ३७ ॥
तदनुग्रहतोऽस्यापि श्रीभागवतसेवनम् । श्रीकृष्णव्यतिरिक्तं यत् तत्सर्वं धनसंज्ञितम् ॥ ३८ ॥

श्रीभागवतकथाश्रवणस्यावश्यकत्वं ध्वनितम् । तदुक्तं पाद्मे 'संस्मर्तव्यः सदा विष्णुर्विस्मर्तव्यो न जातुचित् । सर्वे विधिनिषेधाः स्युरेतयोरेव किंकराः ॥' इति । भगवच्छ्रुतेः श्रीभागवतश्रवणस्य । भागवतश्रुतेरिति वक्तव्ये भगवच्छ्रीभागवतयोरैकरूप्याद्भगवच्छ्रुतेरित्युक्तम् । यद्वा । भगवतः श्रुतिः श्रवणं यस्मिन् तत् भगवच्छ्रुति श्रीभागवतं तस्य । यद्वा । भगवत्कर्तृका श्रुतिर्वेदः स च श्रीभागवतरूपस्तस्य । निर्गुणं सगुणं चापि सेवनं यथेच्छया भवेत् । तथा कर्तव्यमित्यन्वयः ॥ ३० ॥ मुक्तमुमुक्षुविषयिभिरपीदमेव सेव्यं नान्यदित्याह । ये इत्यादिचतुर्भिः । अत एवमुक्तावपि निराकांक्षाः प्रेमभक्तिरसिकास्तेषां श्रीभागवतमेव धनम् । किमुत मुक्तादीनामेतद्धनमिति फलितोऽर्थः ॥ ३१ ॥ ये इति । संसारो जन्ममरणात्मकः । अहंताममतात्मको वा । तस्य सन्तापेन दुःखेन निर्विण्णाः दुःखिताः । अत एव तस्मान्मोक्षकांक्षिणस्तेषामपि । एतत् ऐहिकामुष्मिकचतुर्विधपुरुषार्थसाधनैकधुरीणं श्रीभागवतमहापुराणमित्यर्थः । तैरपि प्रयत्नेन सर्वकर्मत्यागपूर्वकश्रवणाद्युपायेनेत्यर्थः । कथंभूतमेतत् भवौषधम् भवस्य अहंताममतात्मकसंसारस्यौषधम् औषधवन्निवर्तकमित्यर्थः । यद्वा भवन्तीति भवाः मुमुक्षुरोगाः कामक्रोधलोभमोहरागद्वेषहर्षशोकजन्ममरणादयस्तेषामौषधानि भगवल्लीलाकथा रसा यस्मिन् तद्भवौषधम् औषधनिधानमित्यर्थः । अत्रायमाशयः वैद्यो यथा जनान् सामान्यवातपित्तकफोत्थशीतज्वरादिरोगिणो दृष्ट्वा सामान्यौषधिभिः शुण्ठीमरिचपिप्पल्यादिभिस्तद्रोगान्निवर्तयति । ये तु जना बहुकालिकसर्वरसादिशुक्रान्तधातुगतविषमज्वरादिरोगग्रस्ता दवार्दिताश्च तान् ज्ञात्वा तु स्वौषधनिधानाच्चन्द्रोदयप्रभृतिरसान्निःसार्घ्यमूल्यास्तत्पुटिकास्तेभ्यो दत्वा समूलांस्तद्रोगान्नाशयति । तथैवात्र वेदव्यासरूपोऽलौकिकवैद्यराजो जीवान् बहुकालिककामक्रोधलोभमोहरागद्वेषहर्षशोकजन्ममरणादिरोगग्रस्तान् सांसारिकविविधदुःखदवार्दितांश्च दृष्ट्वा तेषां च तत्कामादिरोगान् । सामान्यौषधस्थानीयैर्यज्ञदानजपतपआदिसाधनैरनिवार्यांश्च ज्ञात्वा समूलतद्रोगविनाशाय स्वौषधनिधानाच्छ्रीभागवतात् चन्द्रोदयप्रभृतिरसथानीयान् भगवल्लीलाकथारसान्निःसार्घ्यमूल्यास्तत्कथनरूपास्तत्पुटिकास्तेभ्यो दत्वा तेषां तत्कामक्रोधलोभमोहरागद्वेषहर्षशोकजन्ममरणाद्यनेकान् रोगान् झटिति दूरीचकारेति । यदुक्तं श्रीशुकेन संसारसिन्धुमित्यादि ॥ ३२ ॥ किञ्च । ये इति युग्मकम् । विषयेषु शब्दादिष्वारामो येषां ते । अत एव संसारोऽहंताममतात्मकस्तस्मिन् भवानि सांसारिकाणि तानि च सुखानि च सांसारिकसुखानि तेषु स्पृहा वाञ्छा येषां तेषां कर्ममार्गेण या सिद्धिः सा अधुना कलौ ॥ ३३ ॥ सामर्थ्यं शरीरादेः धनम् वित्तं विज्ञानम् शास्त्रोत्थं तेषामभावादत्यन्तदुर्लभाऽस्ति । तस्मात् कलौ कर्मसिद्धेः दुर्लभत्वाद्धेतोः । तैर्विषयासक्तैरपि श्रीमद्भागवती कथा संसेव्या सम्यक् श्रद्धापूर्वकं सेवितुं योग्येत्यनेन श्रीभागवतस्यैव सर्वफलदातृत्वेन सर्वशास्त्रपुराणेभ्यः श्रेष्ठत्वं सर्ववेदतुल्यत्वं चोक्तम् । तथा च पृथ्वीं प्रति श्रीवाराहवचनम् 'सर्वेष्वपि पुराणेषु श्रेष्ठं भागवतं स्मृतम् । वेदतुल्यं फलं पाठे श्रवणे च तदर्द्धकम् ॥ अर्थश्रवणतश्चास्य पुण्यं दशगुणं स्मृतम् । वक्तुः स्याद्द्विगुणं पुण्यं व्याख्यातुश्च शताधिकम् ॥ अन्यानि च पुराणानि वैष्णवादीनि यानि च । महिमाकीर्तनं यत्र मम स्यान्मद्व्रतस्य वा ॥ मद्भक्तस्याथ वा यत्र तद्वेदार्थफलं स्मृतम् । भारतं वेदतुल्यं स्यादर्थतोऽधिकमुच्यते ॥ तत्रापि भगवद्गीता विष्णोर्नामसहस्रकम् । दशाधिकफलं प्रोक्तं भारतादपि सर्वशः ॥ श्रोतार्द्धफलमाप्नोति भक्तितः शृणुयात्तु यः । भारतादर्द्धफलकं रामायणमपीरितम्' । इति । अतः श्रीभागवतमेव सर्वैः श्रोतव्यमिति भावः ॥ ३४ ॥ सकामश्रोतॄणां श्रीभागवतश्रवणादिफलमाह । धनमित्यादिद्वयेन । दारान् स्त्रीः । वाहनादि हस्त्यश्वादि असापत्न्यम् निष्कण्टकम् ॥ ३५ ॥ इहेति । श्रोता इह मनुष्यलोके । वरान् श्रेष्ठान् । मनसेप्सितान् मनोवाञ्छितान् । हरिकीर्तनसभायां श्रीभागवतानाम् श्रीमद्वैष्णवानां सङ्गेन सत्संगेन । श्रीभागवतपुराणे संगेन तच्छ्रवणाद्यासक्त्या वा । अन्ते देहान्ते । पदम् वैकुण्ठं चरणारविन्दं वा याति ॥ ३६ ॥ एवंभूतश्रीभागवतकथाप्राप्तेः साधनमाह यत्रेति । यत्र येषु स्थानेषु कथावक्तृवैष्णवेषु वा भागवती वार्ता । ये च वैष्णवास्तस्य श्रीभागवतस्य श्रवणे रतास्तेषां वक्तृश्रोतॄणाम् । सम्यक् श्रद्धापूर्वकं सेवनं कुर्यात् । श्रवणोत्सुका इति पाठान्तरम् ॥ ३७ ॥ ननु तेषां संसेवनेन किं भवेत् तत्राह तदनुग्रहत इति । तेषाम् वक्तृश्रोतॄणामनुग्रहादस्य विषयिपुरुषस्यापि श्रीभागवतसेवनम् तत्कथाश्रवणप्राप्तिर्भवेदिति शेषः । तदेवं श्रीभागवतकथायाः श्रवणादिफलं प्राप्तिसाधनं चोक्तमिदानीं धनार्थिनोर्वक्तृश्रोत्रोर्धन-

कृष्णार्थीति धनार्थीति श्रोता वक्ता द्विधा मतः। यथा वक्ता तथा श्रोता तत्र सौख्यं विवर्द्धते ॥ ३९ ॥
उभयोर्वैपरीत्ये तु रसाभासे फलच्युतिः। किन्तु कृष्णार्थिनां सिद्धिर्विलम्बेनापि जायते ॥ ४० ॥
धनार्थिनस्तु संसिद्धिर्विधिसंपूर्णतावशात्। कृष्णार्थिनोऽगुणस्यापि प्रेमैव विधिरुत्तमः ॥ ४१ ॥
आसमाप्ति सकामेन कर्तव्यो हि विधिः स्वयम्। स्नातो नित्यक्रियां कृत्वा प्राश्य पादोदकं हरेः ॥ ४१ ॥
पुस्तकं च गुरुं चैव पूजयित्वोपचारतः। ब्रूयाद्वा शृणुयाद्वापि श्रीमद्भागवतं मुदा ॥ ४३ ॥
पयसा वा हविष्येण मौनं भोजनमाचरेत्। ब्रह्मचर्य्यमधः सुप्तिं क्रोधलोभादिवर्ज्जनम् ॥ ४४ ॥
कथान्ते कीर्तनं नित्यं समाप्तौ जागरं चरेत्। ब्राह्मणान् भोजयित्वा तु दक्षिणाभिः प्रतोषयेत् ॥ ४५ ॥
गुरवे वस्त्रभूषादि दत्वा गां च समर्पयेत्। एवं कृते विधाने तु लभते वाञ्छितं फलम् ॥ ४६ ॥

लक्षणमाह। श्रीकृष्णेत्यर्द्धकम् ॥ ३८ ॥ वक्तृश्रोत्रोर्द्वैविध्यं निरूपयन परस्परस्वभावाद्यैक्येन तयोर्हरिचरित्रानुभवसुखं वर्द्धते इत्याह। कृष्णार्थीति। कृष्ण एवार्थः प्रयोजनमस्यास्तीति। धनमेव प्रयोजनमस्यास्तीति। श्रोता वक्ता च द्विप्रकारको मतो व्यासादैरिति शेषः। यथा श्रोता यत्प्रकारकः श्रोता। तथा वक्ता तत्प्रकारको वक्ता। तत्र तयोः सौख्यं विशेषण निःसीमत्वेन वर्द्धते ॥ ३९ ॥ तयोश्च परस्परस्वभावादिवैपरीत्येन तु फलच्युतिर्भवतीत्याह उभयोरित्यर्द्धेन। उभयोः वक्तृश्रोत्रोर्वैपरीत्ये स्वभावादिविपरीतत्वे तु रसाभासे सति फलच्युतिः यथार्थफलाभावो भवति। किन्त्वित्यर्द्धकम्। किन्तु यूयमन्यदपि शृणुतेत्यर्थः। कृष्णार्थिनाम् वक्तृणां श्रोतृणां च सिद्धिः कृष्णप्राप्तिरूपा विलम्बेन जायते अधिकारिणां तु शीघ्रमेवेत्यपिशब्दार्थः ॥ ४० ॥ किञ्च। धनार्थिन इत्यर्द्धकम्। धनार्थिनः श्रोतुर्वक्तुश्च। संसिद्धिः सम्यक् प्रतिष्ठापूर्वकधनप्राप्तिरूपा। विधिसम्पूर्णतावशान् विधेर्वक्ष्यमाणप्रकारस्य सम्पूर्णतावशाज्जायते इति पूर्वस्मादाकृष्यान्वयः। ननु कृष्णार्थिनः को विधिस्तस्य तु प्रेमैवेत्याह। कृष्णार्थिन इत्यर्द्धेन। अगुणस्य विरक्तस्य प्रेमैव उत्तमः उत्कृष्टो विधिर्नान्य इत्येवशब्दार्थः। अपीति निश्चितमेतत् पुराणेषु मुनिभिरित्यर्थः ॥ ४१ ॥ आसमाप्तीति आसमाप्ति–समाप्तिपर्य्यन्तम्। सकामेन–वक्त्रा श्रोत्रा च स्वयम्–स्वेनैव विधिः कर्तव्यः। विधिमेवाह। स्नात इत्यादिचतुर्भिः। नित्यक्रियाम्–संध्यावन्दनादिकाम्। एकवचनेन नित्यक्रियाणां संकोचन करणं सूचितम्। प्राश्य प्रकर्षेण अकालमृत्युहरणमित्यादिमन्त्रोच्चारणपूर्वकं पीत्वा ॥ ४२ ॥ पुस्तकमिति। लिखितश्रीभागवतपुस्तकम्। तदभावे मुद्रितं वा। गुरुम्–कथावक्तारम्। उपचारैः–पाद्यार्घ्याचमनीयादिषोडशोपचारैः। पञ्चोपचारैर्वा। मुदा–हर्षेण ॥ ४३ ॥ पयसा–दुग्धेन। वा–अथवा हविष्येण–व्रीह्यादिना। हविष्यान्नमुक्तमग्निपुराणे 'व्रीहिषष्ठिकमुद्गाश्च कलायाः सलिलं पयः। श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः ॥ अन्यच्च। चारुभक्ष्यं सक्तुकणाः शाकं दधि घृतं पयः। हविष्यं व्रतनक्तादावग्निकार्य्यादिके हितम्' इति अनयोरर्थः। व्रीहयः–बृहन्नाला बहुजलोत्पन्नाः शालय एतेषामपेक्षया किञ्चिदपकृष्टाः षष्टिरात्रेण पच्यमानाः षष्टिकाः 'साठीचावल' इति ख्याताः मुद्गाः मूग इति प्रसिद्धाः। कलायाः यवविशेषाः श्यामाकाः तृणधान्यविशेषाः। समाके चावल इति ख्याताः। नीवाराः मुन्यन्नभेदाः देवभात इति ख्याताः। गोधूमाः प्रसिद्धाः। आदिशब्देन यवादिपरिग्रहः। चारुभक्ष्यम् चिरोंजी छुहारे इति ख्यातम्। सक्तु सतुआ इति ख्यातम्। कणाः धूली इति ख्याताः। अन्यत्सुबोधम्। मौनमभाषणं तद्युक्तं भोजनमाचरेदिति सर्वत्र सम्बध्यते। ब्रह्मचर्य्यम् अष्टाङ्गम्। तदुक्तं मनुना 'दर्शनं स्पर्शनं केलिः प्रेक्षणं गुह्यभाषणम्। संकल्पोऽध्यवसायश्च क्रिया निर्वृतिरेव च ॥ एतन्मैथुनमष्टांगं प्रवदन्ति मनीषिणः। विपरीतं ब्रह्मचर्य्यमि'त्यादि। अधःसुप्तिम् भूमौ शयनम्। क्रोधलोभादिवर्जनम्। आदिशब्देन मोहादेः परिग्रहः ॥ ४४ ॥ कथान्त इति। समाप्तौ श्रीभागवतस्य पारायणादिसमाप्तौ तु जागरम् जागरणम् चरेत् कुर्यात् ॥ ४५ ॥ गुरवे इति। गुरवे श्रीभागवतवाचकाय वस्त्रभूषादि दत्वा। आदिशब्देन सोपस्करगृहभूमिहट्टदानादिपरिग्रहः। गां च समर्पयेत् सम्यक् श्रद्धाप्रेमपूर्वकमर्पयेदिति विध्यर्थे लिङ्। ननु समर्पणानन्तरम् पुराणादिकथावाचकस्य तत्पूजाद्रव्यग्रहणे 'वृत्त्यर्थं नैवयुञ्जीत प्राणैः कण्ठगतैरपी'त्यादिनिषेधश्रवणात्कथं तद्ग्रहणं सम्भवेदित्यत्रोच्यते। ये निजपूर्वपुरुषपरंपरया वृत्त्यर्थमेव कथां वाचयन्ति तेभ्यस्तु नायं दोषो देयः। तदेवोक्तं प्रायश्चित्तहेमाद्रौ धर्मशास्त्रात् 'येनास्य पितरो याता येन मातामहादयः। तेन मार्गेण गन्तव्यं सतां धर्ममनुस्मर'न्नि'ति। ये च कथावृत्त्यभावेऽपि दत्तां पूजां गृह्णन्ति तेभ्योऽपि न दोषः। 'समादरेण श्रोतव्या पीठस्थस्य गुरोर्मुखात्। पूजा सम्यक् प्रकर्तव्या वैष्णवस्य च वैष्णवैरि'ति श्रवणात्। शाण्डिल्येऽपि 'पुराणं पूजयेत्पूर्वं वाचकं तदनन्तरम्। वस्त्रालंकारगोदानैर्दक्षिणाभिश्च सादरम् ॥ अन्यैश्च हेमदानैश्च भूमिदानैश्च भूरिभिः। पूजयेद्वाचकं भक्त्या बहुपुण्यफलाप्तये ॥ वाचकस्यार्चनेनैव पूजितोऽहं न संशयः। संतुष्टे तुष्टतां यामि वाचके नात्र संशयः ॥' इति गारुडे च। एवमन्यत्रापि वाचकपूजाविहितत्वात्। बृहदारण्यके याज्ञवल्क्येन जनकाद्गृहीताः ज्ञानदानदक्षिणाग्रहणश्रवणाच्चेत्यलमतिविस्तरेण। प्रकृतमनुसरामः। एवम् एवंप्रकारके विधाने कृते सति जनो वाञ्छितं फलं धनपुत्रादि लभते ॥ ४६ ॥ दारेति। दाराः स्त्रियः। अगाराणि गृहाणि।

दारागारसुतान् राज्यं धनादि च यदीप्सितम् । परन्तु शोभते नात्र सकामत्वं विडम्बनम् ।। ४७ ।।
कृष्णप्राप्तिकरं शश्वत् प्रेमानन्दफलप्रदम् । श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितम् ।। ४८ ।।

इति श्रीस्कन्दपुराणेऽखिलेषुश्रीमद्भागवतमाहात्म्ये चतुर्थोऽध्यायः समाप्तिश्रियमगमत् ।। ४८ ।।
ॐ नमः सर्वबुद्धिसाक्षिणे श्रीकृष्णाय ॥

सुताः पुत्रास्तान् । यदीप्सितम् वाञ्छितम् । तत्सर्वं लभते । अत्र श्रीभागवतकथायाः कथने श्रवणे च । वक्तुः श्रोतुश्च सकामत्वं न शोभते यतो विडम्बनं हासास्पदम् ।। ४४ ।। ननु तर्हि किमस्ति श्रीभागवतश्रवणादेर्मुख्यं फलं तत्राह । कृष्णप्राप्तिकरमिति । कीरेण कृष्णद्वैपायनसुतश्रीशुकदेवेन । 'कीरशुकौ समाविति'त्यमरः । 'कीरो व्याससुते शुके' इति च हैमः । भाषितम् कथितम् ।। ४८ ।।

श्रीभागवतमाहात्म्यटिप्पणीयं कृता तया । राधाकृष्णौ च प्रीयेतां प्रीयन्तां वैष्णवा जनाः ।। १ ।।

स्फुरदतुलितसर्वाङ्गीणरम्यार्थसार्थप्रचुररुचिरभावोत्कर्षहर्षप्रकर्षाम् ।
इति हरिहरसूरिः स्कान्दमाहात्म्यटीकां व्यधित निधिशराङ्कक्ष्मामिते १९६९ विक्रमाब्दे ।। २ ।।

वेदव्यासमहर्षिसद्रसवचःपीयूषपाथोधरैर्भट्टश्रीपुरुषोत्तमैर्निजदृशा प्रेमस्पृशा पाविताम् ।
निर्ध्यातामतिवामनार्य्यकृतिभिर्विद्वन्मुकुन्दैर्नुतां दृष्टां नन्दकिशोरपट्टकविना पश्यन्तु टीकामिमाम् ।। ३ ।।

इति श्रीस्कन्दपुराणेऽखिलेषुश्रीमद्भागवतमाहात्म्ये खाण्डलर्षिवंशोद्भवमथुरावसुदेवतीर्थनिवासिपौराणिकश्रीमोहनदेवसूनुहरिहरदेवकृतायां वैष्णवानन्ददायिन्यां टिप्पण्यां चतुर्थोऽध्यायः समाप्तिश्रियमगमत् ॥

अनेन श्रीगोवर्द्धनधारी श्रीनन्दनन्दनः प्रीयताम् । तदर्प्पणं चास्तु ।। १ ।।

# श्रीमद्भागवतभूषणम्

श्रीगणेशाय नमः

श्रीरुक्मिणीपतये द्वारकानाथाय नमः

लक्ष्मीनारायणं नत्वा गोपालः कुरुते सुधीः । सज्जनानंदसंदायि श्रीभागवतभूषणम् ॥ १ ॥

तत्र तावत् । अर्थवादाधिकरणसंमतां भक्त्यर्थं भगवन्महिमोक्तिरिति भक्तिपादीयां श्रीमदाचार्योक्तिमनुसृत्य महापुराणचक्रवर्तिनः श्रीमद्भागवतस्य महिमा प्रस्तूयते । यथा पाद्मीयोत्तरखंडे श्रीभागवतमाहात्म्ये षष्ठेऽध्यांये सूत उवाच । तत्राययौ षोडशवार्षिकस्तदा व्यासात्मजो ज्ञानमहाब्धिचन्द्रमाः । कथाऽवसाने निजलाभपूर्णः प्रेम्णा पठन् भागवतं शनैः शनैः ॥ श्रीशुक उवाच । निगम कल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् । पिवत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् । श्रीमद्भागवते महामुनिकृते किंवाऽपरैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥ श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां प्रियं यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते । यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तत् शृण्वन् प्रपठन् विचारणपरो भक्त्या विमुच्येन्नरः ॥ तत्रैवाग्रे । रसप्रवाहसंस्थेन श्रीशुकेनेरिता कथा । कण्ठे संबद्ध्यते येन स वैकुंठप्रभुर्भवेत् ॥ तत्रैव तृतीयेऽध्याये । कुमारा ऊचुः । सदा सेव्या सदा सेव्या श्रीमद्भागवती कथा । यस्याः श्रवणमात्रेण मुक्तिमत्र समाश्रयेत् ॥ ग्रन्थोऽष्टादशसाहस्रो द्वादस्कन्धसंमितः । परीक्षिच्छुकसंवादः शृणु भागवतं च तत् । तावत् संसारचक्रेऽस्मिन् भ्रमतेऽज्ञानतः पुमान् । यावत् कर्णगता नास्ति शुकशास्त्रकथा क्षणम् ॥ किं श्रुतैर्बहुभिः शास्त्रैः पुराणैश्च भ्रमावहैः । एकं भागवतं शास्त्रं मुक्तिदानेन गर्जति ॥ कथा भागवतस्याऽपि नित्यं भवति यद्गृहे । तद्गृहं तीर्थरूपं हि वसतां पापनाशनम् ॥ अश्वमेधसहस्राणि वाजपेयशतानि च । शुकशास्त्रकथायाश्च कलां नार्हति षोडशीम् ॥ तावत् पापानि देहेऽस्मिन्निवसंति तपोधनाः । यावन्न श्रूयते सम्यक् श्रीमद्भागवतं नरैः ॥ न गंगा न गया काशी पुष्करं न प्रयागकम् । शुकशास्त्रकथायाश्च फलेन समतां नयेत् ॥ वेदादिर्वेदमाता च पौरुषं सूक्तमेव च । त्रयी भागवतं चैव द्वादशाऽक्षर एव च ॥ द्वादशात्मा प्रयागश्च कालः संवत्सरात्मकः । ब्राह्मणश्चाऽग्निहोत्रं च सुरभिर्द्वादशी तथा ॥ तुलसी च वसंतश्च पुरुषोत्तम एव च । एतेषां तत्त्वतः प्राज्ञैर्न पृथग्भाव इष्यते ॥ यश्च भागवतं शास्त्रं वाचयेदर्थतोऽनिशम् । जन्मकोटिकृतं पापं नश्यते नाऽत्र संशयः । श्लोकार्द्धं श्लोकपादं वा पठेद्भागवतं च यः । नित्यं पुण्यमवाप्नोति राजसूयाश्वमेधयोः ॥ उक्तं भागवतं नित्यं कृतं च हरिचिंतनम् । तुलसीपोषणं चैव धेनूनां सेवनं समम् ॥ अन्तकाले तु येनैव श्रूयते शुकशास्त्रवाक् । प्रीत्या तस्यैव वैकुण्ठं गोविंदोऽपि प्रयच्छति । हेमसिंहयुतं चैतत् वैष्णवाय ददाति च । कृष्णेन सह सायुज्यं स पुमान् लभते ध्रुवम् । आजन्ममात्रमपि येन शठेन किंचित् चित्तं विधाय शुकशास्त्रकथा न पीता । चंडालवच्च खरवद्बत तेन नीतं मिथ्या स्वजन्म जननीजनिदुःखभाजा ॥ जीवच्छवो निगदितः स तु पापकर्मा येन श्रुतं शुककथावचनं न किंचित् । धिक् तं नरं पशुसमं भुवि भारभूतमेवं वदंति दिवि देवसमाजमुख्याः ॥ दुर्लभैव कथा लोके श्रीमद्भागवतोद्भवा । कोटिजन्मसमुत्थेन पुण्येनैव तु लभ्यते इत्यादि । तत्रैवाग्रे । सूत उवाच । यदा कृष्णो धरां त्यक्त्वा स्वपदं गंतुमुद्यतः । एकादशं परिश्रुत्य उद्धवो वाक्यमब्रवीन् ॥ उद्धव उवाच । त्वं तु यास्यसि गोविन्द भक्तकार्यं विधाय च । मच्चित्ते महती चिन्ता तां श्रुत्वा सुखमावह ॥ आगतोयं कलिर्घोरो भविष्यति पुनः खलाः । तत्संगेनैव सन्तोऽपि गमिष्यंत्युग्रतापदम् ॥ तदा भारवती भूमिर्गोरूपेयं कमाश्रयेत् । अन्यो न दृश्यते त्राता त्वत्तः कमललोचन । अतः सत्सु दयां कृत्वा भक्तवत्सल मा व्रज । भक्तार्थं स गुणो जातो निराकारोऽपि चिन्मयः ॥ त्वद्वियोगेन ते भक्ताः कथं स्थास्यंति भूतले । निर्गुणोपासने कष्टमतः किंचिद्विचारय ॥ इत्युद्धववचः श्रुत्वा प्रभासे चिन्तयद्धरिः । भक्तावलंबनार्थाय किं विधेयं मयेति च ॥ स्वकीयं यद्भवेत्तेजस्तद्वै भागवते न्यधात् । तिरोधाय प्रविष्टोयं श्रीमद्भागवतार्णवम् । तेनेयं वाङ्मयी मूर्तिः प्रत्यक्षा वर्तते हरेः ॥ सेवनात् श्रवणात् पाठात् दर्शनात् पापनाशिनीत्यादि । न चेदं भागवतमाहात्म्यं पाद्मनाम्ना कल्पितमिति वाच्यम् । आकाशीरामेश्वरीयेषु सर्वेषूपलंभात् । अथ तेषूपलब्धस्यापि कल्पितत्वं ब्रूषे हंतैवं तेषूपलब्धानां कार्तिकमाहात्म्यमाघमाहात्म्यगीतामाहात्म्यादीनामपि कल्पितत्वं स्यादिति विरम साहसात् । महामहिमोपेतैस्तोषिणीकारादिभिरुदाहृतत्वाच्च । बृहत्तोषिणीकारकृतहरिभक्तिविलासे च स्कांदे कृष्णार्जुनसंवादे । जीवितादधिकं येषां शास्त्रं भागवतं कलौ । न तेषां भवति क्लेशो याम्यः कल्पशतैरपि ॥ धारयंति गृहे नित्यं शास्त्रं भागवतं हि ये । आस्फोटयंति चलंति तेषां प्रेताः पितामहाः । यावद्दिनानि विप्रर्षे शास्त्रं भागवतं गृहे । तावत् पिबन्ति पितरः क्षीरं सर्पिर्मधूदकम् ॥ येऽर्चयंति सदा गेहे शास्त्रं भागवतं नराः । प्रीणितास्तैश्च विबुधा यावदाभूतसंप्लवम् । यच्छन्ति वैष्णवे भक्त्या शास्त्रं भागवतं हि ये । कल्पकोटिसहस्राणि विष्णुलोके वसंति ते ॥ श्लोकार्धं श्लोकपादं वा वरं भागवतं गृहे । शतशोऽथ सहस्रैश्च किमन्यैः शास्त्रसंग्रहैः ॥ न यस्य तिष्ठते गेहे शास्त्रं

भागवतं कलौ। न तस्य पुनरावृत्तिर्याम्यात् पाशात् कदाचन ॥ कथं स वैष्णवो ज्ञेयः शास्त्रं भागवतं कलौ । गृहे न तिष्ठते यस्य स विप्रः श्वपचाधमः ॥ यत्र यत्र भवेद्विप्र शास्त्रं भागवतं कलौ । तत्र तत्र हरिर्याति त्रिदशैः सह नारद ॥ तत्र सर्वाणि तीर्थानि सर्वे यज्ञाः सदक्षिणाः । यत्र भागवतं शास्त्रं पूजितं तिष्ठते गृहे ॥ अत्र तिष्ठते इत्यात्मनेपदमार्षम् । चान्द्रादिमतेन वा । 'चान्द्रादयस्तु मन्यन्ते सर्वस्मादुभयं पदमि'ति न्यायसुधोक्तेः । तत्रैव नित्यं भागवतं यस्तु पुराणं पठते नरः । प्रत्यक्षरं भवेत्तस्य कपिलादानजं फलम् ॥ श्लोकार्धं श्लोकपादं वा नित्यं भागवतोद्भवम् । पठेत् शृणोति वा भक्त्या गोसहस्रफलं लभेत ॥ यः पठेत् प्रयतो नित्यं श्लोकं भागवतं मुने । अष्टादशपुराणानां फलं प्राप्नोति मानवः । तत्रैव स्कांदे मार्कण्डेयभगीरथसंवादे । यो हि भागवते शास्त्रे विघ्नमाचरते पुमान् । नाभिनंदति दुष्टात्मा कुलानां पातयेत् शतम् ॥ तत्रैव पाद्मे गौतमांबरीषसंवादे । अंबरीषशुकप्रोक्तं नित्यं भागवतं शृणु । पठस्व स्वमुखेनापि यदीच्छसि भवक्षयम् ॥ श्लोकं भागवतं वापि श्लोकार्धं पदमेव वा । लिखितं तिष्ठते यस्य गृहे तस्य सदा हरिः ॥ वसते नाऽत्र संन्देहो देवदेवो जनार्दनः । यत्तु शुकाय प्रोक्तं देवीभागवतमस्य विषय इति तन्न । राज्ञा पृष्टं शुकेनोक्तं श्रीमद्भागवतं परमिति बृहन्नारदीयस्थपुरुषोत्तममाहात्म्यीयद्वितीयाध्यायवचोविरोधात् । शुकमध्यापयामास निवृत्तिनिरतं मुनिः । सूतमध्यापयामास महाराजं परीक्षितमि'ति श्रीमद्भागवतमुपक्रम्य श्रीमद्भागवतोक्तेश्च । 'शुकाय प्रोक्तमिति त्वदीयविग्रहांगीकारेऽपि अस्मदभीष्टसिद्धेश्च । अत एव गृहे तस्य सदा हरिरित्युपसंहारः । इतरथा 'देवी तस्य सदा गृहे' इत्युपसंहारमकरिष्यत् । प्रकृतिभावाभावेन रंधनाय स्थालीतिवच्चतुर्थीसमासस्याप्राप्तेश्च । न च साधनं कृतेति भाष्योक्तवचनेन सः पस्पशाह्निकीयधर्माय नियम इति भाष्यस्थप्रदीपोद्योतपर्यालोचनया तस्याऽपि तत्राऽप्रवृत्तेः । अत एव 'चतुर्थीतदर्थे' तिसूत्रे रक्षितग्रहणं चरितार्थम् । प्रकृतिविकृतिभावाऽभावेऽपि साधनं कृतेत्यनेन चतुर्थीसमासे तद्वैयर्थ्यं स्पष्टमेव । ध्वनितं चेदमश्वघासादयस्तु षष्ठीसमासा इति वदद्भिर्भाष्यकृद्भिः । घासशब्दो हि घञंतः । तत्रैव स्कान्दे द्वारकामाहात्म्ये मार्कण्डेयेन्द्रद्युम्नसंवादे । श्रीमद्भागवतं शास्त्रं यः पठेत् कृष्णसन्निधौ । कुलकोटिशतैर्युक्तः क्रीडते योगिभिः सह ॥ तत्रैव गारुडे पाद्मे च । 'अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः । गायत्रीभाष्यरूपोऽसौ वेदार्थपरिबृंहितः ॥ पुराणानां साररूपः साक्षात् भागवतोदितः । द्वादशस्कन्धयुक्तोऽयं शतविच्छेदसंयुतः ॥ ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः ।' तत्रैव पाद्मे उत्पलिनीमाहात्म्ये अंबरीषं प्रति गौतमः । नित्यं नामसहस्रेण भक्त्या स्तौपि जनार्दनम् । पुराणं त्वं भागवतं पठसे पुरतो हरेः । तत्रैव स्कान्दे ब्रह्मनारदसंवादे प्रह्लादसंहितायां च एकादशीजागरं प्रकृत्य 'श्रीमद्भागवतं भक्त्या पठते विष्णुसन्निधौ । जागरे तत्पदं याति कुलवृन्दसमन्वितः ॥ वृन्दावनझाशीग्रामपुण्यग्रामादावुपलभ्यमाने रामकृष्णभट्टोदाहृते गौरीतन्त्रे 'गायत्रीभाष्यरूपोऽयं द्वादशस्कन्धसंयुतः । ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः ॥ मथुरादावुपलभ्यमाने हरिभक्तिविलासाद्युदाहृते स्कान्दे भागवतमाहात्म्ये ॥ ४ ॥ कृष्णप्राप्तिकरं शश्वत् प्रेमाऽऽनन्दफलप्रदम् । श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितम् ॥ परीक्षित्शुकसंवादो योऽसौ व्यासेन कीर्तितः । कलिग्राहगृहीतानां स एव परमाश्रयः ॥ वर्षमासदिनानां तु विमुच्य नियमाऽऽग्रहम् । प्रेमास्वादसविस्तारं सेवनं निर्गुणं मतम् ॥ पारीक्षितेऽपि संवादे निर्गुणं तत्प्रकीर्तितम् । तत्र सप्तदिनाख्यानं तदायुर्दिनसंख्यया ॥ प्रमाणं तस्य को वेद ह्यनंतस्याऽक्षरात्मनः । ब्रह्मणे हरिणा तद्दिक् चतुःश्लोक्या प्रदर्शितेत्यादि । रामकृष्णभट्टोदाहृते पाद्मे चाऽन्यत्र 'पुराणेषु तु सर्वेषु श्रीमद्भागवतं परम् । यत्र प्रतिपदं विष्णुर्गीयते बहुधर्षिभिः ॥ जन्माद्यस्य यतश्चेति धीमद्यन्तमुपावददित्यादि । तत्रैव नारदीये च ॥ ४ ॥ श्रीमद्भागवतं नाम पुराणं वेदसंमितम् । तत्र तु प्रथमे स्कन्धे सूतर्षीणां समागमः ॥ व्यासस्य चरितं पुण्यं पाण्डवानां तथैव च । पारीक्षितमुपाख्यानमितीदं समुदाहृतम् ॥ परीक्षित्शुकसंवादे सृतीद्वयनिरूपणम् । ब्रह्मनारदसंवादेऽवतारचरितामृतम् ॥ पुराणलक्षणं चैव सृष्टिकारणसंभवः । द्वितीयोऽयं समुदितः स्कन्धो व्यासेन धीमता ॥ चरिते विदुरस्याऽथ मैत्रेयेण समागमः। सृष्टिप्रकरणं पश्चाद् ब्रह्मणः परमात्मनः ॥ कापिलं सांख्यमप्यत्र तृतीयोऽयमुदाहृतः । सत्याश्चरितमादौ तु ध्रुवस्य चरिते ततः ॥ पृथोः पुण्यं समाख्यानं ततः प्राचीनबर्हिषः । इत्येष तुर्यो गदितो विसर्गे स्कन्ध उत्तमः। प्रियव्रतस्य चरितं तद्वंश्यानां च पुण्यदम् । ब्रह्माण्डांतर्गतानां च लोकानां वर्णनं ततः । नरकस्थितिरित्येष संस्थाने पञ्चमो मतः । अजामिलस्य चरितं दक्षसृष्टिनिरूपणम् ॥ वृत्राख्यानं ततः पश्चान्मरुतां जन्म पुण्यदम् । षष्ठोऽयमुदितः स्कन्धो व्यासेन परिपोषणे । प्रह्लादचरितं पुण्यं वर्णाश्रमनिरूपणम् । सप्तमोऽयं समुदितः स्कन्धो भागवते शुभः ॥ गजेन्द्रमोक्षणाख्यानं मन्वन्तरनिरूपणम् । समुद्रमन्थनं चैव बलिदैत्यस्य बन्धनम् ॥ मत्स्याऽवतारचरितमष्टमोऽयं प्रकीर्तितः । सूर्यवंशमाख्यानं सोमवंशनिरूपणम् ॥ वंशानुचरितं प्रोक्तो नवमोऽयं महामते । कृष्णस्य बालचरितं कौमारं च व्रजस्थितिः ॥ भूभारहरणं चाऽत्र निरोधे दशमः स्मृतः । नारदेन तु संवादो वसुदेवस्य कीर्तितः ॥ यदोश्च दत्तात्रेयेण श्रीकृष्णेनोद्धवस्य च । यादवानां मिथोऽतश्च मुक्तावेकादशः स्मृतः ॥ भविष्यत्कलिनिर्देशो मोक्षो राज्ञः परीक्षितः। वेदशाखाप्रणयनं मार्कण्डेयतपःक्रियाः ॥ सौरी विभूतिरुदिता सात्वती च ततः परम् । पुराणसंख्याकथनमाश्रये द्वादशोऽह्ययम् ॥ इत्येवं कथितं वत्स श्रीमद्भागवतं तव । वक्तुः श्रोतुश्चोपदेष्टुरनुमोदितुरेव च ॥ माहात्म्यकर्तुर्गदितं भुक्तिमुक्तिविमुक्तिदम् । प्रौष्ठपद्यां पूर्णिमायां हेमसिंहसमन्वितम् । इदं भागवतं देयं द्विजाय प्रीतिपूर्वकम् ॥ संपूज्य वस्त्रहेमाद्यैर्भगवद्भक्तिमिच्छते । इदं च भागवतमाहात्म्यं मथुरायां कृष्णार्तागस्थमेणवल्लीग्रामे च दृष्टम् । स्कांदे च मार्गशीर्षमाहात्म्ये । वैष्णवानां व्रतानां च कुर्यात्स्वीकरणं बुधः । मत्प्रियं शृणुयाच्छश्वत्

श्रीमद्भागवतं परम् ॥ श्रीमद्भागवतं नाम पुराणं लोकविश्रुतम् । श्रृणुयाच्छ्रद्धया युक्तो मम संतोषकारकम् ॥ नित्यं भागवतं यस्तु पुराणं पठते नरः । प्रत्यक्षरं भवेत्तस्य कपिलादानजं फलम् ॥ श्रीमद्भागवतं पुण्यं दृष्ट्वा नोत्तिष्ठते हि यः । संवत्सरात्मकं पुण्यं विलयं याति पुत्रक । श्रीमद्भागवतं दृष्ट्वा प्रत्युत्थानाभिवादनैः ॥ संमानयेत तं दृष्ट्वा भवेत्प्रीतिर्ममातुला । दृष्ट्वा भागवतं दूरात् प्रक्रमेत्संमुखं हि यः ॥ पदे पदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयम् । उत्थाय प्रणमेद्यो वै श्रीमद्भागवतं नरः ॥ धनं पुत्रांस्तथा दारान् भक्तिं च प्रकरोम्यहम् । महाराजोपचारैश्च श्रीमद्भागवतं सुत । श्रृण्वंति ये नरा भक्त्या तस्य वश्यो भवाम्यहम् । ममोत्सवेषु सर्वेषु आदौ भागवतं परम् । समर्चयंति भक्त्या ये ममाभेदेन सुव्रत ॥ वस्त्रालंकरणैः श्रेष्ठैर्धूपदीपोपहारकैः । वशीकृतो दृढं वत्स स्त्रियश्च सत्पतिं यथा ॥ नारदपंचरात्रे पंचविंशतितमे पटले । यथा विष्णोः सदाऽभीष्टं नैवेद्यं शालिसंभवम् । शुकाय भवता दत्तं पुराणमित्र तन्महत् । वल्लभं देवदेवस्य तथेदं तुलसीदलमि'ति दिक् । विशेषस्तु मत्कृते भक्तिभूषणे द्रष्टव्यः ।

इति श्रीनारायणपरायणश्रीकृष्णातीरश्रीकरहाटक्षेत्रवासिवासुदेवाचार्यसुतनारायणाचार्यांगजगंगागर्भगोपालाचार्यविरचिते श्रीभागवतभूषणे परमानन्दः प्रथमोल्लासः ॥ १ ॥

श्रीकृष्णाय नमः । स्यादेतत् । सकलभूमण्डलप्रख्यातश्रीमद्भागवतस्याऽयं महामहिमा वक्तुमशक्यः । तस्य शंकापंकविलिप्तत्वनिबंधानुदाहृतत्वदृढबंधत्वपदलालित्यहेतुकप्रामाण्याऽनधिकरणमेतदित्यनुमितिविषयत्वेन पौरुषेयत्वे निश्चिते 'पाखंडशैववामाद्यैर्वेदमार्गाः कलौ युगे ।' इति विजयध्वजसंमतदशमस्कंधीयश्रीमद्भागवतवचनबोधितदुर्मार्गत्वमसहमानैः पाखंडजंगमादिशैवतांत्रिकवामादिभिरुत्प्रेक्षितस्य बोपदेवकृतमिति प्रलापस्य प्रामाणिकत्वादिति चेन्न । त्वदीयहेतुचतुष्टयस्याऽऽभासत्वेनाऽसाधकत्वात् । तथाहि काठकादिसंज्ञादर्शनेन वेदस्य पौरुषेयत्वं शंकितं जैमिनिना । 'असदेवेदमग्र आसीत्ततो वै सदजायते'त्यादिश्रुत्या ब्रह्मण उत्पत्तिः शंकिता, 'असंभवस्तु सतोऽनुपपत्तेरि'ं इत्यधिकरणे भगवता बादरायणेन । पौरुषेयत्वेन स्मृतीनामप्रामाण्यमाशंकितं माधवेन । अतस्तेषु शंकापंकविलिप्तेषु अप्रामाण्यगंधस्याऽप्यभावेनाऽऽद्यो हेतुर्व्यभिचरितः । अयं तु विशेषः- 'त्रयो वेदस्य कर्तारो मुनिभांडनिशाचराः' इति वदद्भिः सौगतैर्निर्दोषेश्वरकृतत्वेनाऽऽप्तवाक्यत्वाद्वेदः प्रमाणमिति वदद्भिस्तार्किकैश्च वेदस्य पौरुषेयत्वमंगीकृतम् । अस्य तु तत् केनाऽपि नेति । प्रत्युत ललितासहस्रनामदेवीभागवतव्याख्यानादिषु भास्करराजनीलकंठभट्टप्रभृतिभिः शाक्तैः शिवतत्त्वविवेकतत्त्वकौमुद्यादिनिबंधेषु अप्पयदीक्षितभट्टोजिदीक्षितप्रभृतिभिः शैवैः । "कृष्णः सख्यश्च राधाया भक्ता राधापदाश्रयाः । तद्भक्तभावतः सेव्या नमस्या राधिकाऽऽश्रितैः ॥ न च कर्माणि कुर्वीत नान्यं देवं यजेन् कचित् । नोपोष्यैकादशी वाऽपि न हि सा राधिका परा ॥ वैष्णवत्वाभिमानोऽपि नैव धार्यो हृदि कचिन् ।" इत्यादिचोदनाप्रतिपादकेषु निबन्धेषु राधावल्लभीयैश्चाऽस्य श्रीमद्भागवतस्य पुराणत्वमेवोररीकृतम् । अथ तत्र जैमिन्यादिभिः शंकाबाधकमुक्तिमिति विशेषः । अबाधिता खलु शंका प्रामाण्यमपनयति नतु बाधिताऽपीति अभियुक्तोक्तेरिति चेदत्रापि बाधकं अस्य यामा ७, ५, ३, १, ऋचं जप्त्वा त्रिवारं विष्णुमंदिरे । फलं भागवतं तस्य लभते नात्र संशयः ॥ जप्त्वा आभरतीमंत्रं त्रिवारं च दिने दिने । भारताख्यानमखिलं पारायणफलं लभेत् २, ८, १, रामायणफलं भद्रे भद्रया च जपेदृचम् । पारायणफलं सर्वं शतकोटिप्रविस्तरम् ७, ५, ३, १, इति शौनकोक्तऋग्विधानं १ तत्र तु प्रथमे स्कंधे सूतर्षीणां समागमः । 'व्यासस्य चरितं पुण्यं पांडवानां तथैव चे'त्यादिना द्वादशस्कंधाऽनुक्रमणीनिरूपकं रामकृष्णभट्टोदाहृतं नारदीयं २ 'एवं सर्वं भागवतं श्रीहरेरंगमुच्यते । तत्र श्रीदशमः श्रेष्ठस्तत्र गोकुलकेलयः ॥ तत्राऽपि श्रीरासलीला गोपिकागीतिका ततः । तत्राटवीति पद्यं तु प्रोच्यते परमं धरम् । तत्रैव चरमः श्लोकः प्रेमनिर्याससरूपकः ।' इति मथुराक्षेत्रब्रह्मासीग्रामादावुपलभ्मानं गौरीतंत्रीयद्वितीयपटलं ३ परीक्षित् शुकसंवादः श्रीमद्भागवताऽभिधः । यत्र प्रतिपदं विष्णुर्गीयते बहुधर्षिभिः ॥ जन्माद्यस्य यतश्चेति धीमद्यन्तमुपावदत् । शुकोक्तं ब्रह्मराताय सदसि ब्रह्मवादिनाम् । श्रीमद्भागवतं नाम धुनद्यां तमसः परम् ।' इत्यादिरामकृष्णभट्टोदाहृतं पाद्मीयं बृहत्भागवतमाहात्म्यं ४ 'वाराहं वामनं पाद्मं गारुडं वैष्णवं तथा । श्रीमद्भागवतं विष्णुपरं सात्विकमुच्यते ॥' इति पाद्मीयोत्तरखंडं ५ 'गारुडं वामनं पाद्मं श्रीमद्भागवतं तथा । एभिश्चतुर्भिः श्रीविष्णुर्गीयते पुरुषोत्तमः ॥' इतीशानसंहितास्थं स्कांदम् ६ । पूर्वोक्तवचनकदंबकं च वरीवर्तीति विशेषाऽभावात् । द्वितीयस्त्वसिद्धः । 'मां विधत्तेऽभिधत्ते मां त्रिकल्प्योऽपोह्य इत्यहम् । इत्यस्य हृदयं साक्षान्नान्यो मद्वेद कश्चन ।' इति भागवत इति श्रीमन्मध्वाचार्यचरणकृतब्रह्मसूत्रभाष्ये १ प्रथमाध्यायस्य तृतीये पादे चरमाधिकरणे तत्त्वप्रकाशिकायां २ तात्पर्यचंद्रिकायां ३ दिनत्रयमीमांसायां ४ क्षीरनिधौ ५ सदाचारस्मृतिव्याख्यानेषु ६ स्मृतिकौस्तुभे ७ स्मृत्यर्थसागरे ८ निर्णयरत्ने ९ विद्यारण्यस्वामिकृतजीवन्मुक्तिप्रकरणे पुण्यग्रामादावुपलभ्यमाने १० हेमाद्रिकृतव्रतखंडदानखंडयोः ११ वामनजयंतीनिर्णयप्रकरणे निर्णयसिंधौ १२ पूजाप्रकरणे भट्टोजिदीक्षितान्हिके १३ नागोजीभट्टकृतान्हिकशेखर'गुरोरनृत' इति सूत्रस्थशब्दरत्नरामायणव्याख्यानसप्तशतीव्याख्यानेषु १४ अनंतदेवकृतसंस्कारकौस्तुभमथुरासत्वाः १५ श्राद्धमयूखव्यवहारमयूखयोः १६ कालदिनकरद्योते १७ विधानपारिजाते भोजनप्रकरणे १८ प्रयोगपारिजाते १९ आचाररत्ने २० संवत्सरप्रदीपे कलिधर्मप्रकरणे २१ कालनिर्णये तत्रैव २२ कालनिर्णयदीपिकाविवरणे देवपूजाप्रकरणे २३ शंकराचार्यकृतपद्मपुराणीयवासुदेवसहस्र-

नामाऽपरपर्यायविष्णुसहस्रनामभाष्ये पुण्यग्रामादावुपलब्धे 'स आश्रयः परं ब्रह्म परमात्मा परात् परः' इति भागवत इति प्रथमशतके पंचमनामव्याख्याने। 'पश्यंत्यदोरूपमदभ्रचक्षुपा सहस्रपादोरुभुजाननाद्भुतमित्यादि भागवत इति पंचपंचाशन्नामव्याख्याने। 'सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहाऽस्य धत्ते। स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः॥' इति भागवत इति द्वितीयशतके नवमनामव्याख्याने। 'छन्दोमयेन गरुडेन विगाह्यमान इति भागवत इति तृतीयशतके पंचदशनामव्याख्याने २४ 'परमहंसधर्मो भागवते पुराणे कृष्णेनोद्धवायोपदिष्टः।' इति शंकराचार्यकृतचतुर्दशमतविवेके पुरुषोत्तममहाराजोदाहृते २५ भागवतमात्रवर्णितमृद्भक्षणानुवादके तत्कृतगोविंदाष्टके नंदमिश्रोदाहृते २६ रामार्चनचंद्रिकायां २७ तत्कृतरामतापिनीव्याख्यायां २८ 'कृष्णस्तु भगवान् स्वयमि'ति भागवत इति वल्लभाचार्यकृतनिबंधे २९ उत्सवप्रताने ३० शुद्धाद्वैतमार्तंडे ३१ विद्वन्मंडने ३२ पुरुषोत्तममहाराजकृतसुवर्णसूत्रे ३३ निंबार्कीयस्वमतनिर्णयसिंधौ ३४ हरिभक्तिविलासे ३५ रामानुजीयरामतापिनीव्याख्याने ३६ तत्कृतसारसंग्रहे ३७ अप्पयदीक्षितकृतशिवतत्त्वविवेके ३८ वाचस्पतिकृतभक्तिप्रकाशे ३९ अद्वैतसिद्धिकारमधुसूदनसरस्वतीकृतभक्तिरसायनभगवद्गीतासप्तमाध्यायव्याख्यानमहिमव्याख्यानेषु ४० लक्ष्मीधरकृतभगवन्नामकौमुद्यां ४१ विद्यानिवासभट्टाचार्यकृतसच्चरितमीमांसायां ४२ विष्णुपुरीकृतभक्तिरत्नावल्यां ४३ काश्मीरदेशीयक्षेमेंद्रप्रकाशे ४४ भास्करराजकृतललितासहस्रनामटीकायां ४५ नीलकंठकृतदेवीभागवतटीकायां ४६ स्वप्नेश्वराचार्यकृतशांडिल्यप्रणीतभक्तिसूत्रभाष्ये च ४७ लक्षशः कोटिशोऽन्यनिबंधेषु च पुराणत्वेनोदाहृतेः। शंकराचार्यपरमगुरुभिर्गौडपादाचार्यैः पंचीकरणव्याख्यायां 'जगृहे पौरुषं रूपमि'ति भागवतमुपन्यस्तमिति परकालादिमठीयैतिह्याच्च हनुमतीचित्सुखीशांकरीश्रीमध्वाचार्यकृतभागवततात्पर्यवल्लभाचार्यकृतसुबोधिनीरामानुजीयवीरराघवीनिंबार्कीयाबोपदेवकृतहरि - लीलामुक्ताफलपरमहंसप्रियाख्यव्याख्यात्रयविद्वत्कामधेनुसंबंधोक्तितत्त्वदीपिकाशुकहृदयासुदर्शनीमुनिभावप्रकाशिकाप्रहर्षिणी श्रीधरश्रीविजयध्वजीयादुपतीश्रीनिवासीसत्यधर्मतीर्थीबृहत्तोषिणीलघुतोषिणीचक्रवर्तिसंदर्भतोषिणीसारमाधवीवामनीएकनाथीपुरुषोतमी - त्यादि ३१ अनंतसंस्कृतव्याख्यानिबंधानां भगवदपरोक्षादिज्ञानिकृतानामेव विद्यमानत्वाच्च तृतीयचतुर्थावपि व्यभिचरितौ। छांदोग्यैतरेयाद्युपनिषत्सु वैष्णवादिपुराणेषु भारतीयाष्टावक्रख्यानसनत्सुजातीयगीतादिभागेषु हरिवंशीयपुष्करप्रादुर्भावे सुंदरकांडे च दृढबंधपदलालित्ययोर्दर्शनात्। प्रत्युत शंकराचार्यसमयादुत्तरे वत्सरशतद्वये व्यतीते बोपदेवोऽभूदिति रामाश्रमनंदमिश्रादिभिरुक्तत्वेन तत्प्राक्कालिकहनुमत्-चित्सुखादीनां भागवतव्याख्याने प्रवृत्तेश्च। उक्तं च सिद्धांतदर्पणकृता 'बोपदेवकृतत्वं च बोपदेवपुराभवैः। कथं टीकाः कृताः संस्युर्हनुमत्चित्सुखादिभिरि'ति। कृष्णस्तु भगवान् स्वयं सितकृष्णकेशावित्यादिभागवतीयपद्येषु परस्परविरुद्धेषु गंगायमुनाजलस्वामिनावित्यादिक्लिष्टव्याख्यानपरपरमहंसप्रियादिनिबंधेषु भागवतीयकथाप्रतिपादकपूर्वापराविरुद्धमुक्ताफलहरिलीलाख्यनिबंधद्वयकर्तुः कविशिरोमणेर्बोपदेवस्य प्रवृत्तेश्च। 'यस्य व्याकरणे वरेण्यघटनाः स्फीताः प्रबंधा दश प्रख्याता नव वैद्यकेऽथ तिथिनिर्धारार्थमेकोऽद्भुतः। साहित्ये त्रय एव भागवततत्त्वोक्तौ त्रयस्तस्य भुव्यंतर्वाणिशिरोमणेरिह गुणाः के के न लोकोत्तराः॥' इति मुक्ताफलटीकायां हेमाद्रिणा बोपदेवकृतग्रन्थानां परिगणनाच्च। अत एवोक्तं हरिलीलाख्यभागवतव्याख्यायां बोपदेवेन 'श्रीमद्भागवतस्कंधाध्यायार्थादि निरूप्यते। विदुषा बोपदेवेन मंत्रिहेमाद्रितुष्टये॥ आनंदस्य हरेर्लीलां वक्ता भागवतागम'इत्याद्युक्तं व्याख्यातं च हेमाद्रिणा। भागवतमेवागमो वेदः। 'इतिहासः पुराणं च पंचमो वेद उच्यत इत्युक्तेरित्या'दि। मुक्ताफलपरमहंसप्रियासंज्ञकयोर्भागवतव्याख्यानयोरपि बोपदेवेन तद्व्याख्यानयोर्हेमाद्रिणा च श्रीमद्भागवतस्य महापुराणत्वं स्पष्टमाविष्कृतम्। एते च हरिलीलामुक्ताफलपरमहंसप्रियासंज्ञकास्त्रयो ग्रंथा बोपदेवकृताः श्रीमद्भागवतव्याख्यानभूता हेमाद्रिकृततद्व्याख्याश्च मथुरावृंदावनलाहुरमेणवलीकरहाडादिषूपलब्धाः। किंच हेमाद्रिबोपदेवाभ्यां पुराणमिति कीर्तनात्। तत्प्राचीननिबंधेषु संमतित्वेन लेखनात्। प्रवादो 'बोपदेवीयो बंध्यापुत्रायतेतराम्'। तथाहि। 'आनंदस्य हरेर्लीलां वक्ता भागवताऽऽगम' इति आगमशब्दं वेदपर्यायं प्रायुंक्त बोपदेवः। तथाच व्याख्यातं हेमाद्रिणा। भागवतमेवागमो वेदः इतिहासः पुराणं च पंचमो वेद उच्यत इत्युक्तेरिति। मुक्ताफलव्याख्यायां च 'स्पर्शेच कामं नृपरेतसांभः ये वा परे योगसमीरदीपितज्ञानाग्निनारंधितकर्मकल्मषा'इति भागवतपद्ययोर्व्याख्यानाऽवसरे रेतसा रेतसि आर्षो व्यत्ययः सुपामित्याकारो वा। रंधि तेति सापेक्षत्वेऽपि समास आर्षः अलुग्वेति हेमाऽद्रिः। तत्रैव इदं भागवतं नाम यन्मे भागवतोदितमिति भागवतमुपादाय यत् यस्मात् भागवतोक्तं तेन भागवतम्। प्रोक्तार्थेऽणिति व्याचख्यौ हेमाद्रिः। यदि हीदं भागवतं बोपदेवकृतमभविष्यत् तर्हि बोपदेवसमानकालिकः प्रामाणिकशिरोमणिर्हेमाद्रिर्भागवतस्थप्रयोगाणामार्षत्वं भगवता कृतं भागवतमिति व्युत्पत्तिं भागवतमेवागमो वेदः 'इतिहासः पुराणं चे'त्युक्तेरिति नावदिष्यत्। कविशिरोमणिर्बोपदेवोऽपि आर्षान् प्रयोगान् न प्रायोक्ष्यत्। परमहंसप्रियाख्यायां भागवतव्याख्यायां च रेतसेत्यादिसहस्रावधिप्रयोगाणामार्षत्वं च नाऽभ्यधास्यत्। व्रतहेमाद्रौ च भविष्यत्पुराणभागवतयोर्विरोधे कल्पभेदेन व्यवस्थेति वदता हेमाद्रिणाऽपि श्रीमद्भागवतस्य पुराणत्वं व्यक्तीकृतम्। न च हेमाद्रेर्बोपदेवसमानकालिकत्वे किं मानमिति चेत्तदुक्तिभ्यामेवेति गृहाण। तथाहि हरिलीलायां बोपदेवः 'विदुषा बोपदेवेन मंत्रिहेमाद्रितुष्टये। श्रीमद्भागवतस्कंधाध्यायार्थादि निरूप्यते॥' इति।

मुक्ताफले च वोपदेवः 'विद्वद्धनेशशिष्येण भिषक्केशवसूनुना। हेमाद्रिर्बोपदेवेन मुक्ताफलमचीकरदि'ति। हेमाद्रिश्च देवगिरीश्वरस्य रामचंद्रस्य राज्ञो मंत्री। यद्यपि भूयसा तदर्थत्वेन हेमाद्रितुष्ट्य इत्युक्तं तथापि योग्यतोपलक्षणपरं बोद्धव्यमिति। हरिलीलापद्यं विद्वद्धनेशशिष्येणेत्यतिरोहितार्थम्। यदुराजमहामंत्रिणा हेमाद्रिणा अभ्यर्थितस्तत्कर्तृकत्वं ख्यापितवानिति मुक्ताफलपद्ये च व्याचख्यौ। 'वेदः पुराणं काव्यंच प्रभुर्मित्रं प्रियावचः। बोधयंतीति हि प्राहुस्त्रिवत् भागवतं पुनः॥' इति हरिलीलास्थवोपदेवपद्यम्। ननु पुराणमात्रे प्रकृतोपयुक्ते किमन्ययोः कथनेन तत्राह त्रिवदिति अवततार च हेमाद्रिः। सचाऽयं हेमाद्रिर्द्वादशाधिकद्वादशशत १२१२ शकोद्भवदाक्षिणात्यालंदीग्रामस्थज्ञानेश्वरसंज्ञकभगवद्भक्तकृतगीताव्याख्यानोत्तरकालिको हेमाद्रपंतनाम्ना प्राकृतभाषया प्रसिद्धस्तां ज्ञानेश्वरीं नीतवान्, सा ततोऽन्येन हरिदासेनोद्धृतेति स्पष्टं श्रीमद्विठ्ठलभक्तकृतग्रंथेषु। तथाच तदाश्रिततत्समानकालिकवोपदेवप्राक्कालिकैकादशगते शाके विंशत्यब्दद्वये गते। अवतीर्णं मध्वमुनिं सदा वंदे महागुरुमिति स्मृत्यर्थसागरादिमहानिबंधमहितश्रीमदानंदतीर्थभगवत्पादाचार्यैरन्यैश्च तत्रत्यवचनं तदानीमविद्यमानं ब्रह्मसूत्रभाष्यादौ संमतित्वेनाऽऽलेखि। न च शंकराचार्यैः शारीरकभाष्ये विष्णुपुराणीयवचनोपन्यासवत् श्रीमद्भागवतीयवचनानुपन्यासे किं बीजमितिचेन् त्वत्संमतभागवतताऽनुपन्यासे यद्बीजं तदेवेत्यवेहि। केचित्तु शारीरकमीमांसायाः प्रधानतया ज्ञानप्रतिपादकत्वेन श्रीमद्भागवतादेश्च प्रधानतया भक्तिप्रतिपादकत्वेन तयोश्च निर्विण्णाऽनिर्विण्णरूपभिन्नाधिकारिविषयत्वेन भिन्नप्रकरणत्वान्नोदाहृतिः। गीता तु यथा काशीक्षेत्रं वामनपुराणलक्ष्मीसंहितात्रिस्थलीसेतुपर्यालोचनया वैष्णवमिति वैष्णवा वदंति। स्कंदपुराणशिवरहस्यादिपर्यालोचनया शैवमिति शैवा वदन्ति। तथा ज्ञानप्रधानेति ज्ञानवादिनो भक्तिप्रधानेति भक्ता इति तदुदाहृतिरित्याहुः। अत एव श्रीमद्भागवतमुपक्रम्य विष्णुद्वेषात् पौरुषेयं तामसं चेति केचन वदंतीत्यादिपर्वादौ विलिलेख चतुर्धरः।

**इति श्रीमन्नारायणपरायणकृष्णाकूलस्थीकरहाटक्षेत्रवासिवासुदेवाचार्यसुतनारायणाचार्याऽङ्गजगङ्गागर्भजगोपाऽऽचार्यकृते भागवतभूषणे दुर्जनधिक्कारो नाम द्वितीयोल्लासः॥ २॥**

श्रीकृष्णाय नमः। स्यादेतत्। 'अष्टादशपुराणानि कृत्वा सत्यवतीसुतः। भारताख्यानमखिलं चक्रे तदुपबृंहितम्'इति स्कंदमात्स्याभ्यां 'अष्टादशपुराणानि अष्टौ व्याकरणानि च। ज्ञात्वा सत्यवतीसूनुश्चक्रे भारतसंहिताम्'इति भविष्यत्प्रथमाध्यायस्थवचसा च भारतोत्तरं भागवतं कृतमिति प्रतिपादकं भागवतं विरुद्धमिति चेन्न। आख्यानरहितं चतुर्विंशतिसहस्रसंख्याकं भारतं कृत्वाऽथ भागवतं कृत्वा साख्यानं सकलं भारतं कृतवानित्यर्थेन विरोधाऽभावात्। स्फुटीभविष्यति चैतदुपरिष्टात्। अत एव भारताऽऽख्यानमखिलमित्युक्तिः स्वरसतः संगच्छते। मार्कंडेयपुराणीयादिमाध्याये 'भगवन् भारताख्यानं व्यासेनोक्तं महात्मने'त्याद्युक्त्वा 'तदिदं भारताख्यानं बह्वर्थं बहुविस्तरम्। तत्त्वतो ज्ञातुकामोऽहं भगवंतमुपागतः॥' इत्याद्युक्त्वा जैमिन्युक्तप्रश्नचतुष्टयेन पुराणमुपक्रम्यांऽतिमाध्याये जैमिनिरुवाच। 'भारतेनाभवन्मे संदेहस्फोटनं द्विजाः। तद्भवद्भिः कृतं यत्तैः कश्चिन्नान्यः करिष्यती'त्युपसंहृतत्वेन आग्नेयपुराणे 'गीतासारं प्रवक्ष्यामि सर्वगीतोत्तरोत्तरम्। कृष्णो'यमर्जुनायाह 'त्युपक्रम्य 'दैवी ह्येषा' गुणमयी मम माया दुरत्यया। 'यस्यां जाग्रति भूतानी'त्यादिगीतोक्तकतिचित्पद्यानां लेखनेन तयोरप्युक्तवचनत्रयविरुद्धत्वेन तद्विरोधस्याऽभियोगानर्हत्वाच्च। 'यश्चोभयोः समो दोषः स उभाभ्यां परिहरणीय इति न्यायात्। वाराहकल्पवृत्तांतमधिकृत्याह पराशरः।' यत्राह धर्मानखिलांस्तमुक्तं वैष्णवं विदुः। सारस्वतस्य कल्पस्य मध्ये ये स्युर्नराऽमराः॥ तद्वृत्तांतोद्भवं लोके तद्भागवतमुच्यते॥' इत्यादिमात्स्यपर्यालोचनया सत्यकल्पवृत्तांताश्रयत्वान्मात्स्यस्य तत्पुरुषवृत्तांताश्रयत्वात् स्कांदस्य अघोरकल्पवृत्तांताश्रयत्वाद्भविष्यस्य सारस्वतकल्पवृत्तांताश्रयत्वात् भागवतस्य तैरिदं विरुद्धमित्युक्तेरप्रयोजकत्वाच्च॥ अत एव निर्णयसिंधौ दशावतारप्रकरणे मध्याह्ने परशुरामः, सायं परशुराम इति प्रतिपादकपुराणयोः कल्पभेदेनैव व्यवस्थोक्ता। एतेनेक्ष्वाकुवंशस्थजिनस्यैव बौद्धत्वप्रतिपादकभागवतस्य बौद्धावतारोक्तौ 'मायामोहं ददौ हरिरि'त्यादिप्रतिपादकविष्णुपुराणेन विरोधोऽपि परिहृतः। शक्तिमनतिक्रम्य इत्यादाविव शेखरोक्तं बौद्धपरावरत्वमादाय परावरयोगि चेति विहितत्वेऽभ्युपगमाच्च॥ सिद्धांतदर्पणे तु 'सर्वाण्येव पुराणानि कथितानि नरर्षभ। द्वादशैव सहस्राणि प्रोक्तानीह महर्षिभिः॥ पुनर्वृद्धिं गतानीह व्याख्यानैर्बहुभिर्नृपे'ति भविष्यप्रथमाध्यायं मनसिकृत्य 'ब्रह्मश्रीपतिसंवादो योंऽशोऽष्टादशमध्यगः। व्यासनारदसंवादस्तत्र यस्मात्प्रवेशितः॥' इति विरोधः परिहृतः। व्याख्यातं च नंदमिश्रैः इदं भागवतं पूर्वं ब्रह्मणे नाभिपंकजे। स्थिताय भवभीताय कारुण्यात्संप्रकाशितमि'ति द्वादशस्कंधवाक्यात् ब्रह्मनारायणसंवादरूपो यो भागवतभागः स भारतात्पूर्वं अष्टादशसु आविर्भावितः। व्यासनारदसंवादरूपस्तस्यैव योऽपरो भागः स तत्र प्रवेशितः। अत एकस्योभयं संभवेत्। तदुक्तं प्रथमे सूतेन 'स संहितां भागवतीं कृत्वाऽनुक्रम्य चात्मजम्। शुकमध्यापयामासे'ति। प्रथमतो ब्रह्मश्रीपतिसंवादरूपां कृत्वा पश्चान्नारदोपदेशादनुक्रम्य विस्तार्य चेत्यर्थः। भारतमपि पूर्वं आख्यानैर्विना चतुर्विंना चतुर्विंशतिसहस्रं कृत्वा ततः तत्सहितपंचाशत्सहस्रं ततस्ततोऽप्यधिकमिति भारते स्पष्टमिति। प्रातरित्वेत्यादिवत् कृत्वेत्यस्यान्येभ्योऽपि दृश्यंत इति विहितकनिवंतत्वाच्च। न च तद्योगे 'कर्तृकर्मणोरि'ति

पद्यापत्तिः। धार्यैरामोदमुत्तमं पुष्पंधय इत्यादाविव अनित्यमिदं तदर्हमिति निर्देशादिति मनोरमोक्त्या व्यत्ययेन वा तदप्रवृत्तेः। ननु मात्स्ये 'पंचागानि पुराणानी'त्युक्तेः पुराणांतरकोशयोश्च सर्गश्च प्रतिसर्गश्च वंशो'मन्वंतराणि च। वंशानुचरितं चैव पुराणं पंचलक्षणमि'त्युक्तेर्नेदं महापुराणम्, अस्य दशलक्षणत्वादिति चेन्न। दशलक्षणांतःपातिनां 'पोषणं विष्णुभक्तिश्च निरोधो मुक्तिराश्रयः॥' इत्युक्तानां पंचानां लक्षणानां पाद्मादिषु सत्त्वेन तेषामपि महापुराणत्वाभावप्रसंगात्। अथ पंचलक्षणमित्यनेन न्यूनव्यावृत्तिरेव। स्पष्टा चेयं रीतिर्व्यवहारमिताक्षरायां 'षड्विधं स्त्रीधनं स्मृतमि'ति मनुवचनव्याख्यानावसरे इति ब्रूषे तर्हि सिद्धं नः समीहितमिति दिक्। नच ग्रंथोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः' इत्युक्ते वैष्णवभागवतं न महापुराणम्। तस्याऽष्टादशसहस्रसंख्याकत्वाभावादिति वाच्यम्। देवीभागवतस्याऽपि किंचिदधिकषोडशसहस्रसंख्याकत्वात्। विजयध्वजीयपाठानुसारेण तस्य तत्संख्याकत्वाच्च। श्रीधरीयपाठानुसरणेपि शौनक उवाच सूत उवाच इति श्रीत्यादिगद्यगणनेन तत्संख्यापूर्तेः शिष्टैर्ब्रह्मावर्तीयादिभिरुररीकृतत्वाच्च। न च विजयध्वजीयपाठश्रीधरीयपाठयोर्मध्ये कः प्रामाणिकः पाठ इति चेत्। तैत्तिरीयनारायणोपनिषद आंध्रद्रविडयोः पाठभेदे कः प्रामाणिकः पाठः। अथ विद्यारण्यभाष्यानुयायी सांप्रदायिकः पाठ इति वाच्यं, तैरपि तद्भाष्ये यद्यपि आंध्रद्रविडयोरत्र महान् पाठभेदः शिष्टपरिगृहीतत्वाच्चोभयमपि प्रामाणिकं, तथापि द्रविडपाठानुसारेण व्याख्यास्याम इत्युक्तत्वेनोभयविधपाठस्याऽपि तत्संमतत्वात् तद्वदत्राप्यवेहि। स्पष्टा चेयं रीतिः 'कडारादेका संज्ञा' इतिसूत्रे महाभाष्ये। तत्र हि किमाकडारादेका संज्ञेति आहोस्वित् प्राक्कडारात्परं कार्यमिति उभयथाप्याचार्येण सूत्रं प्रतिपाठिताः। केचिदाकडारादेकासंज्ञेति केचित्प्राक्कडारात्परं कार्यमितित्युक्तम्। प्रकृतमनुसरामः। 'ग्रंथोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः। पंचत्रिंशोत्तराध्यायत्रिशतीयुक्त ईश्वरीति काशीमथुराद्वाशीपुण्यग्रामादावुपलभ्यमाने गौरीतंत्रे च स्पष्टमुक्तत्वाच्च। देवीभागवते च द्वात्रिंशत्त्रिंशताध्यायानामेवोपलब्धेर्न तन्महापुराणम्। तत्र तदनुयायिनो द्वात्रिंशत्त्रिशतं पूर्णमिति पाठं कल्पयंति ते भ्रांताः। 'तत्र श्रीदशमः श्रेष्ठस्तत्र गोकुलकेलयः। तत्रैव श्रीरासलीला गोपिकागीतिका ततः॥' इत्यग्रिमगौरीतंत्रीयोक्तिविरोधात्। गोपीगीतस्य देवीभागवतेऽनुपलंभात्। एवमुक्तसमाधीनामनंगीकारे पुराणानां सप्तदशत्वापत्तिः। न च देवीभागवतं गृहीत्वाऽष्टादशत्वोपपत्तिरिति वाच्यं, तत्राऽपि तृतीयस्कंधे 'वेदशाखाः पुराणानि वेदांतं भारतं तथा। कृत्वा संमोहसंमूढोऽभवं राजन्मनस्यपी'त्यादिना भारतोत्तरं संमूढो व्यासो देवीमाहात्म्यं ज्ञातवानित्युक्त्या देवीभागवतस्याऽपि भारतोत्तरत्वप्रतीतेः। प्रत्युत देवीभागवतस्य माहापुराणत्वे स्कांदीयेश्वरसंहितायां 'चतुर्भिर्भगवान्विष्णुरि'त्युक्त्वा तानि च 'भागवतपाद्मगारुडवामनानी'त्युक्तम्। तथा पाद्मे 'सात्त्विको वैष्णवो धर्म' इत्युपक्रम्य 'वैष्णवं नारदीयं च तथा भागवतं शुभम्। गारुडं च तथा पाद्मं वाराहं शुभदर्शने॥ सात्विकानि पुराणानि विज्ञेयानि शुभानि चे'त्युक्तं तथा विष्णुभागवतसप्ताहमुपक्रम्य 'दशसप्तपुराणानि षट् शास्त्राणि समाययुरि'ति पाद्मं तथा भागवतमाहात्म्यमुपक्रम्य दशसप्तपुरा० परामिति पाद्मम्। तथा स्कांदे 'प्रभासखंडे चतुर्भिर्भगवान् विष्णुर्द्वाभ्यां ब्रह्मा तथा रविः। अष्टादशपुराणेषु शेषेषु भगवान् भव'इत्युक्तम्।

तथा स्कांदे सौरसंहितायां 'कथ्यते दशभिर्विप्राः पुराणैः परमेश्वरः। चतुर्भिर्भगवान् विष्णुर्द्वाभ्यां ब्रह्मा प्रकीर्तितः॥ इत्युक्तं च विरुध्येत। देवीभागवते प्राधान्येन देवीमाहात्म्यप्रतिपादनात्। उक्तवचनेषु च प्राधान्येन देवीप्रतिपादकस्य महापुराणत्वाभावकथनात्। ननु यत्राऽधिकृत्य गायत्रीमिति मात्स्योक्तभागवतलक्षणस्य गायत्र्या च समारंभ इति स्कांदोक्तभागवतलक्षणस्य च 'सर्वचैतन्यरूपां तां विद्यामाद्यां च धीमहि। बुद्धिं या नः प्रचोदयादि'ति देवीभागवतप्रारंभश्लोके स्वरसत उपपद्यमानत्वात् न विष्णुभागवतं महापुराणम्। न च गायत्रीसमानार्थत्वाद्विष्णुभागवतस्य तदुपपत्तिरिति वाच्यम्। गायत्रीप्रतिपाद्यब्रह्मणोऽष्टादशस्वपि सुलभतयाऽसाधारणलक्षणस्याऽभावात् इति चेन्न। 'यत्राऽधिकृत्य शकुनीन् धर्माधर्मविचारणम्। यत्राधिकृत्यमाहात्म्यमादित्यस्य चतुर्मुखः॥ यदा च गारुडे कल्पे विश्वांडं गरुडोद्भवम्। अधिकृत्याऽब्रवीत्कृष्णो गारुडं तदिहोच्यते॥ इत्यादिमात्स्यीयपूर्वापरवचनप्रायपाठैकत्वाय 'गायत्रीभाष्यरूपोऽसौ' इति गारुडगौतमीतंत्रैकवाक्यतया च 'अथवा हवनं कुर्यात् गायत्र्या सुसमाहितः। तन्मयत्वात्पुराणस्य परमस्यास्य तत्त्वतः॥' इति विष्णुभागवतसप्ताहविधिस्थपाद्मेन च 'यत्राधिकृत्य गायत्रीमि'त्यादेश्छंदःपरत्वाभावात्। उत्तरोत्तरानुवृत्तया स्वार्थबोधकत्वरूपाधिकारलक्षणस्यार्थ एव संभवाच्च। 'अथ शब्दाऽनुशासनं' 'अथ योगाऽनुशासनमि'त्यादौ आसमाप्तेः शब्दस्य योगस्य च विचारवत् गायत्र्यर्थाऽधिकारस्याऽन्यत्राऽनुपलभ्यमानत्वादत्रैवोपलभ्यमानत्वात् लक्ष्यतावच्छेदकसमनियतत्वरूपाऽसाधारणधर्मस्य विद्यमानत्वात्। 'गायत्र्यर्थश्च विष्णुध्यानमि'त्याग्नेये गायत्र्यर्थाऽध्याये निरूपितम्। विष्णुसंज्ञमिति श्रुतिः काचित् वरेण्यं सवितुर्भर्गं विष्णवभिधं जगौ। ततश्चाविष्णुरेवार्थो गायत्र्या' इति शिवतत्त्वविवेके स्पष्टम्। 'हिरण्यगर्भं पुरुषं व्योम्नि तद्विष्णुसंज्ञितमि'त्यादिना बृहद्योगियाज्ञवल्क्येनाऽपि विष्णुपरत्वं गायत्र्या उक्तम्। एतदेकवाक्यतया यन्मैत्रायणीयश्रुतौ गायत्र्यर्थप्रकरणे 'अक्षिणीवैष' इत्यारभ्य 'भर्गो रुद्र'इत्युक्तं तत्रापि 'रुजं द्रावयते यस्माद्रुद्रस्तस्माज्जनार्दनः। इति ब्रह्मांडात् अक्षिद्वित्वलिंगेन च 'रुद्रोमाविशांतक इत्यादाविव युभ्वाधिकरणन्यायेन हरिरेव। एतेनैव सवितादेवतेति श्रुतिः गायत्रीदेवतेति भरद्वाजस्मृतिः शिवादेवतेति आदित्यकौमारादिपुराणं त्रिपुरसुंदरीदेवतेति सुंदरीतापिनी च व्याख्याता। सवित्रादिशब्दानाम् अनुमानिकाऽधिकरणीय'सूक्ष्मंतु तदर्हत्वात् तदधीनत्वादर्थवदि'ति गुणसूत्रन्यायेन विष्णुपरत्वात्।

विष्णुसंज्ञमितिवत् सवितृसंज्ञमित्यनुक्तत्वात्। 'सारस्वतस्य कल्पस्य वृत्तांतो यत्र वर्ण्यते। गायत्रीछंदसारंभस्तद्भागवतमुच्यते॥' इति दिनकरलिखितवचनं तु निर्मूलमेव। समूलत्वेऽपि गायत्रीमंत्रार्थेनेत्यर्थः। छंदःशब्दस्य 'बहुलं छंदसी'त्यादिवद्वेदपरत्वात्। ननु हयग्रीवब्रह्मविद्येति भागवतलक्षणं देवीभागवतस्यैव तत्रैव प्रथमस्कंधे हयग्रीवनामकदैत्येनोपासितब्रह्मप्रतिपादकविद्यायाः स्त्रीदैवत्यमंत्रस्य 'जपन्नेकाक्षरं मंत्रं मायाबीजात्मकं ममेत्यादिनोक्तेरिति' चेन्न। विष्णुभागवत एव पंचमस्कंधे 'ओंनमो भगवते धर्माये'त्यादिना हयग्रीवविद्यायाः स्फुटत्वात्। निषादस्थपत्यधिकरणन्यायेन रथकाराऽधिकरणन्यायेन च वचनस्वारस्येन च हयग्रीवरूपब्रह्मविद्येत्येव तदर्थात्। त्वष्ट्रीया षष्ठस्कंधीयनारायणवर्मणोऽपि हयग्रीवब्रह्मविद्यात्वात्। 'यद्वा अश्वशिरो नाम तयोरमरतां व्यधादि'ति तत्रैवोक्तेः। 'अश्वशिरसा प्रोक्तत्वादश्वशिरः' इत्यादि श्रीधरीये स्पष्टम्। ननु शारदातिलकादिषु 'मंत्राः पुंदेवताः प्रोक्ता विद्याः स्त्रीदेवताः पुनरि'त्युक्तत्वात्स्त्रीदैवत्यमंत्रेष्वेव विद्यापदप्रयोग इति हयग्रीवब्रह्मविद्येत्यत्र देवीभागतस्यैव विद्या ग्राह्येति वाच्यम्। तस्य वचनस्य तांत्रिकमंत्रविद्याविषयत्वात्। अन्यथा 'जपन्नेकाक्षरं मंत्रं मायाबीजात्मकं ममे'ति देवीभागवते मंत्रपदप्रयोगस्य 'विद्यां धारयतो भवेत्, द्वादशाक्षरविद्यया, इमां विद्यां पुरा कश्चित् वैष्णव्या विद्यया विभुरि'त्यादौ विष्णुभागवते द्वादशाक्षरविद्यायामिति पाद्मे कार्तिकमाहात्म्ये वैष्णवमंत्रेषु विद्यापदप्रयोगस्य चाऽसंगत्यापत्तेः। ननु देवीभागवते देवीकृतवृत्रासुरवधस्योपवर्णनात् 'वृत्रासुरवधोपेतमि'ति लक्षणं तत्राऽतिव्याप्तमिति चेन्न। 'वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा' इति ऋग्वेदवाजसनेययोः 'इंद्रो वृत्रँ हन्वेहति तैत्तिरीये' 'इंद्रो वै वृत्रं हत्वा महानभवदि'ति ऐतरेयारण्यके च प्रसिद्धस्येंद्रकृतवृत्रवधस्यैव वृत्रासुरवधोपेतमित्यत्र ग्रहणात्। स्पष्टा चेयं रीतिः प्रथमस्य द्वितीये पादे गुहाधिकरणे ब्रह्मसूत्रभाष्ये जीवब्रह्मणोरुभयोर्गुहाप्रविष्टत्वेपि 'यो वेद निहितं गुहायामि'त्यादौ प्रसिद्धगुहाप्रविष्टत्वं विष्णोरेवेत्यर्थिकेति दिक्। ननु 'सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः तद्वृत्तांतोद्भवं तच्च पुराणं परिकीर्तितमि'ति मात्स्ये भागवतस्य सारस्वतकल्पीयत्वकथनान्मुख्यत्वेन सरस्वत्या आविर्भावप्रतिपादकं देवीभागवतमेव ग्राह्यं न विष्णुभागवतम्। तत्र मुख्यत्वेन सरस्वत्या आविर्भावस्याऽसत्त्वादिति चेन्न। अघोरकल्पवृत्तांतबोधके भविष्ये 'यत्राधिकृत्य माहात्म्यमादित्यस्य चतुर्मुखः। अघोरकल्पवृत्तांतप्रसंगेने'त्यादिना मात्स्येनादित्यमाहात्म्यप्रतिपादनस्य बोधनात्। लक्ष्मीकल्पवृत्तीयबोधके कौर्मे प्राधान्येन शिवमाहात्म्यस्यैव प्रतिपादनाच्च। मात्स्ये 'प्रथमः श्वेतकल्पस्तु' इत्यारभ्य 'व्यान एकादशः प्रोक्तस्तथा सारस्वतः परः। त्रयोदश उदानस्तु गारुडोऽथ चतुर्दश इत्याद्युक्त्वा 'संकीर्णास्तामसाश्चैव राजसाः सात्त्विकास्तथा। रजस्तमोमयास्तत् द्वत्रयस्त्रय उदाहृताः॥ संकीर्णेषु सरस्वत्याः पितॄणां च्यांग्रिरुच्यते। अग्नेः शिवस्य माहात्म्यं तामसेषूपवर्ण्यते॥ सात्त्विके अधिकं तद्वद्विष्णोर्माहात्म्यमुच्यते। इत्युक्तत्वेन द्वादशस्य सारस्वतस्य सात्त्विकत्वेन विष्णुमाहात्म्यप्रतिपादकत्वस्य स्पष्टमभिधानाच्च। तस्मात्सरस्वत्याः कल्पादौ प्रादुर्भावमाहात्म्यमूलकैव सारस्वतकल्प इति प्रसिद्धिः। 'आदावेवाह्निमाहात्म्यं यस्मिन्यस्य विधीयते। तस्य कल्पस्य तन्नाम विहितं ब्रह्मणा पुरे'ति मात्स्यात्। वल्लभीयोदाहृतबृहद्वामनपुराणे भृगुब्रह्मसंवादे 'कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ। पृथिव्यां भारते क्षेत्रे माथुरे मम मंडले॥ वृंदावने भविष्यामि प्रेयान्वो रासमंडले। जारधर्मेण सुस्नेहं सुदृढं सर्वतोऽधिकमि'ति श्रुतीः प्रति भगवदुक्तत्वेन वेदात्मकसरस्वतीरूपगोपिकानां प्रादुर्भावो यत्र स सारस्वतः कल्प इति वक्तुं शक्यत्वाच्च। न च विष्णुभागवते 'पाद्मं कल्पमथो शृणु' इति द्वितीयस्कंधे उक्तत्वेन न तत्सारस्वतकल्पीयवृत्तांतबोधकमिति वाच्यम्। 'अयं तु ब्रह्मणः कल्प'इत्यारभ्य वराहावतारवर्णनपर्यंतं ब्राह्मपाद्मवाराहकल्पीयवृत्तांतं समाप्य ततः समाप्तिपर्यंतं सारस्वतकल्पीयवृत्तांतस्योक्तत्वात्। बृहद्वामनपुराणीयसारस्वतकल्पीयरासक्रीडाया सारस्वतेतरकल्पीयवृत्तांतबोधकेषु सप्तदशपुराणांतरेषु वर्णनस्य वक्तुमशक्यत्वेन सारस्वतस्य कल्पस्येत्यादिपूर्वोक्तमात्स्यपर्यालोचनयाऽत्रैव तस्याः प्रवेशनीयत्वात्। अतिविस्तृतस्याऽपि कृष्णचरित्रस्य लक्षणघटकत्वं तु न संभवति। कृष्णजन्मखंडादौ व्यभिचारात्। प्रकृतिखंडादौ व्यभिचरितातिविस्तृतदेवीचरित्रवत्। ननु शिवपुराणे उत्तरखंडे मध्यमेश्वरमाहात्म्ये अष्टादशपुराणनामनिर्वचनप्रकरणे 'भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते। तत्तु भागवतं प्रोक्तं न तु देवीपुराणकम्॥' इत्युक्तिर्देवीभागवतस्यैव महापुराणत्वं वदतीति चेन्न। 'विष्णोर्माया भगवती यया संमोहितं जगत्।' 'इत्युपक्रम्य दुर्गेति भद्रकाली'ति इत्यादिना दुर्गाचरितस्य विष्णुभागवते दशमस्कंधे उक्तत्वेनादोषात्। व्यंजितश्चायमर्थो भागवतोक्तभगवतीदुर्गापदग्रहणेन। अत एव पूर्वोक्तपाद्मगारुडादिवचसां संगतिः। 'शैवमादिपुराणं च देवीभागवतं तथे'ति पाद्मात्। 'नवरात्रे तु देवेशि दौर्गं भागवतं पठेदि'ति दुर्गातरंगिणीधृतयामलात् देवीभागवतं पठेद्युक्त्या समाहित इति महेशठक्कुरधृतदेवीयामलाच्च देवीभागवतस्य सप्रमाणत्वेऽपि महापुराणत्वे मानाभावः। केचित्तु देवीभागवतस्य हेमाद्रिमाधवादिमहानिबंधेष्वनुदाहृतत्वात् उक्तवचनेषु भागवतपदस्य देवीपुराणपरत्वं वर्णयंतो देवीभागवतं निर्मूलमित्याहुः। अन्ये तु नारदपंचरात्रे पंचत्रिंशत्तमपटले 'पारायणक्रमं कृत्वा नवभिर्वक्ष्यमाणतः। स्वाध्यायाध्ययनानंदसर्वमंगलकारिणः। संसेव्याः सर्वथा सद्भिर्वासराः शारदा यतः॥' इत्यादिना नवरात्रोत्सवस्य वैष्णवत्वकथनात् तत्र विष्णुभागवतपारायणस्यैव विधायकानीमानि वचांसि। सौभाग्यकल्पलतोदाहृताभ्यां 'इदं रहस्यं चरितं गाथोपासनमुत्तमम्। व्यासाय मम भक्ताय प्रोक्तं पूर्वं मया द्विजे॥ मत्तो रहस्यं ज्ञात्वैवं राधामाहात्म्यमुत्तमम्। एतस्य विस्तरं चक्रे श्रीमद्भागवते तथा॥ नारदे ब्रह्मवैवर्ते लोकानां हितकाम्यये'ति संहारभैरवतंत्रे 'श्रीमद्भागवतं नाम पुराणं वेदसंमितम्। पारीक्षितायोपदिष्टं सत्यवत्यंगजन्मना॥

यत्र देव्यवताराश्च बहवः प्रतिपादिताः ॥' इति देवीयामलतंत्राभ्यां राधाप्रभृतिगोपीमाहात्म्यप्रतिपादकविष्णुभागवतस्यैव देवीभागवतपदवाच्यत्वम् । अत एव वाल्मीकीयरामायणे 'आदिकाव्यमिदं कृत्स्नं सीतामाहात्म्यमुत्तमम् ।' इत्युक्तम् । पुराणादिप्रतिपाद्योपास्योपासकयोरन्यतरेण व्यपदेश इति तदाशयः । एतेनोभयोर्देवीभागवतविष्णुभागवतयोः पुराणमतभेदेनोपपुराणत्वं महापुराणत्वं चेति देवीभागवतटीकोक्तिः परास्तेत्याहुः । 'तत्र भागवतं पुण्यं पंचमं वेदसंमितमि'ति देवीभागवतवाक्ये तु भागवतपदेन विष्णुभागवतमेवोच्यते । मात्स्यादिक्रमस्य तत्राऽनुवादात् । मात्स्यादौ च विष्णुभागवतस्यैव निश्चितत्वात् । देवीभागवतीयगणनायां चतुर्थत्वेन भागवतगणनात् । न च 'लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम् । प्रौष्ठपद्यां पौर्णमास्यां स याति परमां गतिमिति मात्स्योक्तेर्देवीपुराणं देवीभागवतं वा महापुराणमिति चेन्न । ब्राह्मपाद्मवैष्णववाराहभागवतानां क्रमेण वैशाखीज्येष्ठीआषाढीश्रावणीभाद्रपदीषु दानस्योक्तत्वेनादोषात् । अन्यथा ब्राह्मपाद्मादिष्वपि पौर्णमासीग्रहणे बीजं वद । हेमसिंहेत्यस्य हेमसिंहासनस्थितमित्यर्थः । 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वाच्य'इति वार्तिकेन आसनपदस्य लोपात् । श्रुनायोगे सत्या भामा भीम इतिवत् । 'अष्टादशपलैः कुर्याद्धेमसिंहासनं प्रिये' इति गौरीतंत्रात् अत एव 'हेमसिंहयुतं चैतद्वैष्णवाय ददाति यः । कृष्णेन सह सायुज्यं स पुमाँल्लभते ध्रुवमि'ति पाद्मं संगच्छते । अन्यथा शाक्ताय देवीसायुज्यमित्यवक्ष्यत् । शैवलैंगादौ शिवरात्र्यादिकालस्य नंद्यादिवाहनस्यादर्शनाच्च । 'प्रणम्य च शिवां देवीं शर्वं भागवतं तथा । पुराणं संप्रवक्ष्यामि' इति देवीपुराणे । 'यदिदं कालिकाख्यं च मूलं भागवतं स्मृतमि'ति कालिकापुराणे । 'ततो भागवतं प्रोक्तं भागद्वयसमन्वितम् । ददाति सूर्यभक्ताय यस्तु भागवतं द्विजाः ॥' इति सौरपुराणे चोक्तम् । तत्र भागवतपदं तत्तत्पुराणविशेषणं यौगिकमेव । त्रयाणामप्युपपुराणेष्वेव मात्स्यादौ गणनात् । तेषां मात्स्यगौरीतंत्रपाद्माद्युक्तभागवतलक्षणानाक्रांतत्वाच्च । अतो भागवतं नामान्यदिति नाशंकनीयमिति श्रीधरोक्तेः कालिकापुराणदेवीपुराणदेवीभागवतविष्णुभागवतानां भागवतपदाभिधेयानां मध्ये महापुराणं विष्णुभागवतमेव नान्यत् कालिकापुराणाद्याशंकनीयम् । अतो यत्राधिकृत्येत्यादिमात्स्याद्युक्तलक्षणस्य विष्णुभागवत एवोपलभ्यमानत्वादित्यर्थ इति न दोषः । ननु भारते मोक्षधर्मे भीष्मेण युधिष्ठिरं प्रति धर्मोपदेशप्रस्तावे शुकमुक्तिरुक्तेति कुत एव परीक्षिन्पर्यंतं शुकानुवृत्तिरिति चेदत्र केचित् । नवमस्कंधे एकविंशेऽध्याये 'स कृत्व्यां शुककन्यायामि'ति श्लोकव्याख्यायां यद्यपि शुक उत्पत्त्यैव विमुक्तसंगो निर्वृतः, तथापि विरहातुरं व्यासमनुयातं दृष्ट्वा छायाशुकं निर्माय गतवान् । तदभिप्रायेणैव गार्हस्थ्यादिव्यवहार इत्युक्तम् । स च व्यवहारो हरिवंशे स्पष्टः । 'पराशरकुलोत्पन्नः शुको नाम महायशाः । व्यासादरण्यां संभूतो विधूमोऽग्निरिवोज्ज्वलन् ॥ स तस्यां पितृकन्यायां वीरिण्यां जनयिष्यति । कृष्णं गौरप्रभं शंभुं तथा भूरिश्रुतं जयम् । कन्यां कीर्तिमतीं षष्ठीं योगिनीं योगमातरम् । ब्रह्मदत्तस्य जननीं महिषीमणुहस्य चे'त्यादिना । भारतेपि 'छायां स्वपुत्रसदृशीं सर्वतोनपगां सदा । द्रक्ष्यसे त्वंच लोकेऽस्मिन् मत्प्रसादान्महामुने' इति । विष्णुपुराणादौ च प्रसिद्धोऽयम् । तथाच तस्य छायाशुकस्यैव वक्तृत्वांगीकारान्न कश्चिद्दोष इति वदंति । अन्ये तु तत्र मुक्तपदं जीवन्मुक्तपरम् । भागवतवक्तुः शुकस्यैव 'यं प्रव्रजंतमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहावे'ति प्रथमस्कंधे वर्णनात् । परिक्षिन्शुकसंवादोत्तरं त्रिंशद्वर्षाऽधिकशतद्वयवर्षीयनारदसनत्कुमारसप्ताहोत्सवे 'परिभ्रमन् समायातः शुको योगेश्वरस्तदा । तत्रायर्यौ षोडशवार्षिकस्तदा प्रेम्णा पठन् भागवतं शनैः शनैरि'ति पाद्मे 'योगेश्वरः षोडशवार्षिकः भागवतं पठन्' इत्यादि विशेषणविशिष्टस्यैव शुकस्यागमनवर्णनाच्च । अंशिनं रुद्रं विहायांशस्य शुकस्य मुक्तेः सर्वप्रमाणविरुद्धत्वाच्च । तथाच तस्यैव भागवतवक्तृत्वमिति वदंति । ननु ज्योतिःशास्त्रे गोलाकारत्वं पृथिव्या उक्तम्, अत्र तु पंचमस्कंधे तद्विपरीतमुक्तमिति तद्विरुद्धमिदमिति चेत् सत्यम् । भागवतटीकायां विजयध्वजीयायां तात्पर्येच ५-१६ 'यथा भागवते तूक्तं भौवनं कोशलक्षणम् । तस्याविरोधतो योज्यं सर्वं ग्रंथांतरस्थितम् ॥ अंडोदे पूरणं चैव व्यत्यासः क्षीरसागरे ॥ राहुसोमरवीणां च मंडलाद् द्विगुणोक्तिताम् । विनैव सर्वमुन्नेयं योजनाभेदतोऽत्र तु ॥' इति वचनात् ज्यौतिषाद्युक्तव्यवस्था न सतीत्युक्तेस्तद्विरोधस्याऽकिंचित्करत्वात् । युक्तं चैतत् । योगशास्त्रे पतंजलिना योगजप्रत्यक्षेण पौराणमानकभौवनकोशप्रत्यक्षोक्तेः । गणितानुमानस्य प्रत्यक्षतो दुर्बलत्वात् । पुराणानां वस्तुस्थितिप्रतिपादनार्थं प्रवृत्तत्वाच्च । भूगोलमुपक्रम्य एतदेवाखिलमहं मानतो लक्षणतश्च सर्वं विजिज्ञास्यामि इति राज्ञा पृष्टेन शुकेन भूगोलादिवर्णनोत्तरं 'भूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिङ्नरकभागगलोकसंस्था । गीता मया नृप तवाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधामे'ति पंचमस्कंधे उक्तेः । तस्मादिदं कालविधानशास्त्रमिति वेदाङ्गज्यौतिषपर्यालोचनया ज्योतिःशास्त्रस्य कालज्ञानार्थं प्रवृत्तत्वेन तत्सौकर्यानुरोधेन तत्र पदार्थाकाराणां कल्पितत्वात् । अत एव सिद्धांतशिरोमणौ 'मूर्तो धर्ता चेद्धरित्र्यास्ततोन्यस्तस्याप्यन्योस्यैवमत्रानवस्था । अंत्ये कल्प्या चेत्स्वशक्तिः किमाद्ये किं नो भूमिः साष्टमूर्तेश्चमूर्तिः ।' इतिवेदादिसिद्धशेषकूर्माद्यभाव उक्तः । यथा व्याकरणशास्त्रे घातको घटः पट इत्यादि सिद्ध्यर्थं कुत्ववृद्धितत्वसुप्रत्ययादयः कल्पितास्तद्वत् । तदुक्तं हरिणा । यद्यपि पदेन वर्णो विद्यते वर्णेष्ववयवा न च । वाक्ये पदानामत्यंतं प्रविवेको न कश्चन । तथापि उपायाः शिक्षमाणानां बालानामुपलालनाः । असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते । उपेयप्रतिपत्त्यर्थमुपाया अव्यवस्थिता इति । उपेयस्य घातकादेः कालज्ञानस्य च प्रतिपत्त्यर्थं ज्ञानार्थं उपायाः कुत्वतत्वादयो गोलाकारपृथिवीत्यादयोऽव्यवस्थिताः अनियताः अवास्तविकाश्च । अतएव केचन वैयाकरणाः सुप्रत्ययमपरं सि प्रत्ययमाहुः । ज्योतिर्विदोऽपि केचन सूर्यादिभ्रमणमपरे पृथ्वीभ्रमणमाहुः । तथा चंद्रः स्वी

बुधो नपुंसकः राहुस्तु पृथ्वीछायैव उपग्रहो वेत्याहुः। प्रकारांतरैरपि विरोधपरिहारस्य मथुराक्षेत्रांतिककाम्यकवनीयग्रंथेषु चतुर्धरकृतभीष्मपर्वटीकायां शंकरभट्टकृतव्यासाविरोधग्रंथे 'अचिंत्याः खलु ये भावा न तांस्तर्केण योजयेदि' ति वाराहे च दृष्टत्वाच्च। अस्य विरोधस्य पुराणांतरेऽपि सत्त्वेन पर्यनुयोगानर्हत्वाच्च। एवमन्येऽपि विरोधाभासाः श्रीमदाचार्यकृतभागवततात्पर्यबोपदेवकृतपरमहंसप्रियावृंदावनीयसंदर्भवल्लभाचार्यीयटीकादिपर्यालचनया परिहर्तव्याः।

इति श्रीनारायणश्रीकरहाटक्षेत्रवासिवासुदेवाचार्यसुतनारायणाचार्यांगजगंगागर्भजगोपालाचार्यविरचिते भागवतभूषणे क्षुद्रोपद्रवनिवारणं नाम तृतीयोल्लासः।

श्रीकृष्णाय नमः। अथैतस्य श्रीमद्भागवतस्य श्रवणादिविधानं तच्चतुर्विधं निर्गुणं सात्त्विकं राजसं तामसं चेति। तदुक्तं स्कांदे भागवतमाहात्म्ये "वर्षमासदिनानां तु विमुच्य नियमाग्रहम्। प्रेमास्वादसुविस्तारं सेवनं निर्गुणं मतम्। पारीक्षितेऽपि संवादे निर्गुणं तत्प्रकीर्तितम्॥ तत्र सप्तदिनाख्यानं तदायुर्दिनसंख्यया। अन्यत्र त्रिगुणं चापि निर्गुणं तु यथेच्छया॥ मासेन ऋतुना वापि श्रवणास्वादसंयुतम्। सात्विकं यदनालस्यं समस्तानंदवर्धनम्॥ सप्ताहं यज्ञवद्यत्तु सश्रमं सत्वरं मुदा। सेवितं राजसं तत्तु बहुपूजादिशोभनम्॥ तामसं यत्तु वर्षेण सालसं श्रद्धया युतम्। विस्मृतिस्मृतिसंयुक्तं सेवनं तच्च सौख्यदम्॥ पाद्मे तु 'दिनानां नियमो नाऽस्ति सर्वदा श्रवणं मतमि'ति निर्गुणं श्रवणमुपक्रम्य 'सत्येन ब्रह्मचर्येण सर्वदा श्रवणं मतम्। अशक्यत्वात्कलौ बोध्यो विशेषोऽत्र शुकाज्ञया॥ मनोवृत्तिजयश्चैव नियमाचरणं तथा। दीक्षां कर्तुमशक्यत्वात्सप्ताहश्रवणं मतम्॥ मनसश्चाजयाद्रोगात् पुंसां चैवायुषः क्षयात्। कलेर्दोषबहुत्वाच्च सप्ताहश्रवणं मतमि"ति तदनुकल्पः सप्ताह उक्तः। तस्य च कृतभूरिपरिश्रमेण श्रमाभाववानधिकारी। तथाच सप्ताहो द्विविधः। निर्गुणो राजसश्च कृतभूरिपरिश्रमकृतः श्रमाभावान्निर्गुणः। भागवतेऽकृतपरिश्रमकृतः श्रमसद्भावाद्राजसः। एवमेव मासेन ऋतुना वा कृतश्रवणस्य निर्गुणत्वं सात्त्विकत्वं च ज्ञेयम्। अत एव 'श्रद्धातः श्रवणे नित्यं माघे तावद्धि यत्फलम्। तत्फलं शुकदेवेन सप्ताहश्रवणे कृतमि'ति पाद्मे निर्गुणसप्ताहोपमानता माघमासीयश्रवणस्योक्ता संगच्छते। अथ देवः द्वादशस्कंधे 'पुष्करे मथुरायां च द्वारवत्यां यतात्मवानि'ति। विधानमालायां 'शिवालये गृहे चैव देवतासदने तथा। वृंदावने नदीतीरे तथा चैव गृहे शुभे॥ पुराणं शृणुयाद्भक्त्या यथोक्तविधिना गृही'ति। अथ कालः। स्कांदे भागवतमाहात्म्ये स्नातो नित्यक्रियाः कृत्वा प्राश्य पादोदकं हरेः। पुस्तकं च गुरुंश्चाऽपि पूजयित्वोपचारतः॥ ब्रूयाद्वा शृणुयाद्वाऽपि श्रीमद्भागवतं मुदा।' प्रथमस्कंधेऽपि 'प्रातर्हुतहुताग्नय' इति। दक्षस्मृतौ 'इतिहासपुराणाभ्यामहःशेषं नयेत्सुधीरि'त्यष्टधा विभक्तदिवसषष्ठसप्तमभागौ उक्तौ। पाद्मे तु 'सदा सेव्या सदा सेव्या श्रीमद्भागवती कथे'ति सर्वोपि काल उक्तः अथ श्रोतृलक्षणम्। स्कांदे 'प्रवराअवराश्चेति श्रोतारो द्विविधा मताः। प्रवराश्चातको हंसः शुको मीनादयस्तथा॥ अवरा वृकभूरुंडवृषोष्ट्राद्याः प्रकीर्तिताः। अखिलोपेक्ष्या यस्तु कृष्णशास्त्रकथाश्रुतौ। स चातको० (१) हंसः स्यात्सारमादत्ते यः श्रोता विविधात् श्रुतात् (२) शुकः सुष्ठु मितं वक्ति व्यासं श्रोतृंश्च हर्षयन् (३) शब्देनाऽनिमिषो जातु करोत्यास्वादयन् रसम्। श्रोता स्निग्धो भवेन्मीनः० (४) यः स्तुवन् रसिकान् श्रोतृन् विरौत्यज्ञो वृको हि सः (५) भूरुंडः शिक्षयेदन्यान् श्रुत्वा न स्वयमाचरेत्। (६) सर्वं श्रुतमुपादत्ते साराऽसारांधधीर्वृषः (७) स उष्ट्रो मधुरं मुंचन् विपरीते रमेत यः (८) अन्येऽपि बहवो भेदा द्वयोर्भृंगखरादयः। यः स्थित्वाऽभिमुखं प्रणम्य विधिवत् त्यक्तान्यवादो हरेर्लीलाः श्रोतुमभीक्षतेऽतिनिपुणो नम्रो विनीतांजलिः। शिष्यो विश्वसिताऽनुचिंतनपरः प्रश्नेऽनुरक्तः शुचिर्नित्यं कृष्णजनप्रियो निगदितः श्रोता स वै वक्तृभिः।' गौरीतंत्रे 'हेतुवादरतो मूर्खः स्त्रीजितः कृपणः शठः। अहंयुः क्रोधनोऽसाधुः श्रोता न स्याद्वरानने॥ अथ वक्तृलक्षणं स्कांदे। भगवन्मतिरनपेक्षः सुहृदो दीनजनेषु सानुकंपः। बहुधीर्वा घनचतुरो वक्ता संमानितो मुनिभिः।' गौरीतंत्रे 'असूयाक्रोधरहितो गर्वहीनः सुशांतधीः। संप्रदायी कृपापूर्णः श्रीभागवतवाचकः॥ नातिनीचस्वरो नात्युच्चस्वरो न विलुप्तधीः। नासूयुर्न खलः नापि नालसः क्रोधनश्चलः॥ न स्त्रैणो नच साधुद्विट् स्यात् भागवतवाचकः।' विधानमालायां 'पौराणीं वृत्तिमाश्रित्य ये जीवंति द्विजोत्तमाः। ते यांति ब्रह्मसायुज्यमन्ते ते गतकल्मषाः।' 'व्यासः श्वा चाऽभिजायते'इति स्कांदपाद्मवचने पौराणिकस्य शुनो योनिरुक्ता, सा तु कणलोभेन पुराणवक्तुर्नतु लोकोद्धारकामनया वक्तुः। 'विप्रैर्भागवती वार्ता गेहे गेहे जने जने। कारिता कणलोभेन कथासारस्ततो गतः॥' इति पाद्मात्। 'अधीयते च वृत्त्यर्थं ये तु भागवतं शुभम्। हरिणा स्वयमुद्दिष्टं तेऽपि सद्गतिमाप्नुयुरि'ति गौरीतंत्रवचस्त्वर्थवादः। अपिघटितत्वात् अपि वेदांतपारगमितिवत्। अथ तद्विधिः भारते 'नारायणं नमस्कृत्य नरं चैव नरोत्तमम्। देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥' जय इतिहासपुराणादिरिति कृत्यरत्नावल्यादौ। गौरीतंत्रे 'दिव्यमासनमास्थाय वाचकः कथयेत्कथाम्। तथा नमस्क्रियां कृत्वा वक्तृप्रच्छकश्रोतृभिः॥ उपक्रमोपसंहारे सादरं गिरिनंदिनि। स्कंधाध्यायाद्यंतपद्यं द्विस्त्रिर्वोच्चारयेच्छिवे।' विधानमालायां चतुर्वर्गचिंतामणौ पुराणसंग्रहे 'सर्वपापविनिर्मुक्तिकरणे यस्य मानसम्। कृत्वाऽऽह्निकं समाहूय वक्तारं शास्त्रकोविदम्। संभाव्य मनदानेन नमस्कुर्यात्तमंजसा॥' तत्र मंत्रः 'नमस्ते भगवन् व्यास सर्वशास्त्रार्थकोविद। ब्रह्मविष्णुमहेशानां मूर्ते सत्यवतीसुत। नमर्चयित्वा गंधाद्यैः पुराणं शृणुयात्ततः। पूर्वपक्षोक्तिसिद्धान्तपरिनिष्ठासमन्वितम्। कथां श्रुत्वा पुनः पूजां कुर्याद्भक्तः

प्रयत्नतः। नारायणं हृषीकेशं मानसे परिचिंतयेत्। निधाय तुलसीमिश्रपुष्पदाममतंद्रितः॥ प्रार्थयित्वा हितं विप्रं भोजयेत् प्रयतः शुचिः। अन्यांश्च भोजयेद्विप्रान् विधिवन्मानपूर्वम्। एवं नित्यकथां विद्वान् शृणुयान्मधुघातिनः॥ कथासमाप्तौ विप्रस्य व्यासरूपस्य धीमतः। दद्याद्वित्तं च वस्त्राणी'ति। गौरीतंत्रे 'उपदेशं विना व्यासो नाज्ञासीत्पूर्वमीश्वरि। तस्मात् प्रयत्नतः कार्य उपदेशः सतो मुखात्॥ उपक्रमोपसंहारे हरिकीर्तनमाचरेत्। एतस्य पाठकाले तु अन्यालापांश्च वर्जयेत्॥' भारते शेषधर्मे 'श्रीरागेण पूर्वीरागेणान्येन वा पुराणं पठनीयमि'त्युक्तम्। स्कांदे ब्रह्मोत्तरखंडे 'सोष्णीषो न शृणुयात् व्यासपीठस्थो वक्ता न कस्मैचित् प्रणमेत् उत्थापयेद्वे'ति उक्तम्। अथाहारः स्कांदे॥ 'पयसा च हविष्येण मौनं भोजनमाचरेत्।' गौरीतंत्रे। अश्नन्ननश्नन् शृणुयाद्वाचयेद्वा धरात्मजे। सकामः शृणुयात् सुभ्रु कथयेद्वा उपोषितः॥' शूद्रस्तु शृणुयादेव न पठेत्। अध्येतव्यं ब्राह्मणेन वैश्येन क्षत्रियेण च। श्रोतव्यमेव शूद्रेण नाऽध्येतव्यं कदाचनेति शूलपाणौ पुराणाऽधिकारे भविष्योक्तेः। 'न वेदेष्वधिकारो हि कश्चिच्छूद्रस्य विद्यते। पुराणेष्वधिकारो मे दर्शितो ब्राह्मणैरिहे'ति शूलपाणिस्थपाद्मवचने श्रवणे इति शेषः। हरिवंशे। 'सुगतिमियात् श्रवणाच्च शूद्रजातिरि'ति द्विजानां पठनेन सुगतिमुक्त्वा शूद्राणां श्रवणेन सुगतिरुक्ता। अत एव 'शूद्रः सुखमवाप्नुयादि'ति विष्णुसहस्रनामव्याख्यानावसरे शूद्रः श्रवणेनैवेति शंकराचार्यैर्व्याख्यातम्। बालकांडीयाग्रसर्गव्याख्यायां नागोजीभट्टोऽप्येवम्। एवंच भागवतादौ पृथगाख्यानद्वादशस्कंधादौ यच्छूद्रस्य फलमुक्तं तत् श्रवणेनैवेति बोध्यम्। तच्च श्रवणं ब्राह्मणं हरिं चाग्रतः कृत्वा कार्यम्। भारते 'श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः' इत्युक्तेः। नारदीये शूद्रानुपक्रम्य तेषां मध्ये हरेरग्रे पठनीयं द्विजातिभिरित्युक्तेश्च। स्पष्टंचेदं शूद्राऽऽचारशिरोमणौ शूद्रकमलाकरे निर्णयसिंधौ धर्मसिंधौ च श्राद्धप्रकरणे। एवं च ये इदानींतनाः शूद्रादयो गीताभागवतविष्णुसहस्रनामचंडीपाठं पठंति ते नारकिण एवेति सहृदयैराकलनीयम्। 'शूद्रवदेव स्त्रीणां परभूसंज्ञकानां स्वर्णकारादीनां च श्रवणे एवाधिकारो न तु पठने' इति शूद्रकमलाकरे। अथ प्रयोगः 'श्रोता वक्ता वा आचम्य प्राणानायम्य देशकालौ संकीर्त्य विष्णुप्रीतिकामोऽन्यकामो वा श्रीविष्णुप्रेरणाया श्रीविष्णुप्रीत्यर्थं श्रीमद्भागवतश्रवणं पठनं वा करिष्ये' इति संकल्प्य गणपतिं संपूज्य दिव्यासनस्थाय पुराणवक्त्रे 'नमस्ते भगवन् व्यास सर्वशास्त्रार्थकोविद। ब्रह्मविष्णुमहेशानां मूर्ते सत्यवतीसुत॥ इति मंत्रेण नमस्कृत्य गंधाद्यैरर्चयित्वा भागवतपुस्तकं संपूजयेत्। ततो वक्ता भागवतपुस्तकं संपूज्य गणेशं नत्वा। नारायणाय नमः। नराय नमः। नरोत्तमाय नमः। देव्यै नमः। सरस्वत्यै नमः। व्यासाय नमः। गुरुभ्यो नमः। इति श्रोतृभिः सह नमस्कृत्य हरिकीर्तनं कृत्वा स्कंधाध्यायाद्यंतपद्यं द्विस्त्रिर्वोच्चारयन् अन्यालापान् वर्जयन् गुरूपदिष्टं भागवतं श्रीरागेण पूर्वीरागेणाऽन्येन वा रागेण पठेत्। कथासमाप्तौ च हरिकीर्तनं कुर्यात्। ततः श्रोता वक्तारं विप्रं गंधाद्यैः संपूज्य तुलसीदलमिश्रितपुष्पमालां तद्गले निधाय तं भोजयित्वाऽन्यानपि भोजयेत्। एवं प्रत्यहं पुराणसमाप्तिपर्यंतं कृत्वा तत्समाप्तौ व्यासरूपिणो वाचकस्य यथाविभवं वस्त्रभूषणदक्षिणादिभिः पूजां कृत्वा ब्राह्मणान् भोजयेदिति। अथ पाद्मोक्तसप्ताहयज्ञविधानम्। सप्ताहश्च सप्तदिवसाधिकरणकविष्णुभक्तब्राह्मणमुखतः स्पष्टव्याख्यानसहितद्वादशस्कंधश्रवणं न तु केवलमूलश्रवणं नापि स्वतः पठनम्–'विरक्तो वैष्णवो विप्रो वक्ता कार्योतिनिस्पृहः। प्रथमस्कंधतः स्पष्टव्याख्यानं धेनुजोऽकरोत्॥ सप्ताहश्रवणेनैवेति पाद्मात्।' (धेनुजो गोकर्णः) परोद्धरचिकीर्षया सप्ताहवक्तुरपि मुक्तिः। सप्ताहवक्तारं गोकर्णं तु समालिंग्याकरोत्स्वसदृशं हरिरि'तिपाद्मात्। केचित्तु 'सत्येन ब्रह्मचर्येण सर्वदा श्रवणं मतम्। दिनानां नियमो नाऽस्ति सर्वदा श्रवणं मतम् दीक्षां कर्तुमशक्यत्वात्सप्ताहश्रवणं मतम्। श्रद्धातः श्रवणे नित्यं माघे तावद्धि यत्फलम्। तत्फलं शुकदेवेन सप्ताहश्रवणे कृतम्। मनसश्चाजयाद्रोगात्पुंसां चैवायुषः क्षयात्। कलेर्दोषबहुत्वाच्च सप्ताहश्रवणं मतमि'त्यादिपाद्मादिवाक्येषु श्रवणपदं पठनस्योपलक्षकं 'पुस्तकं च गुरुंचापि पूजयित्वोपचारतः। ब्रूयाद्वा शृणुयाद्वापि श्रीमद्भागवतं मुदा॥ अश्नन्ननश्नन् शृणुयाद्वाचयेद्वा धरात्मजे। सकामः शृणुयात् सुभ्रु कथयेद्वा उपोषितः॥' इति स्कांदगौरीतंत्रायुक्तभागवतसेवनानुकल्पत्वात्सप्ताहादिविधेः। अत एव स्कांदे 'सप्ताहं यज्ञवद्यत्तु सश्रमं सत्वरं मुदा। सेवितं राजसं तत्तु बहुपूजादिशोभनमि'ति श्रवणपठनोभयबोधकः सेवनशब्द उपात्तः। श्रोत्रनपेक्षपठने च अर्थपरिकीर्तनं व्यर्थमेव। पठनं नैव तद्वाधात्। अतः श्रोत्रनपेक्षः अर्थपरिकीर्तनरहितः केवलसंहितापाठोऽपि सप्ताहयज्ञः। शिष्टाचारोऽप्येवमिति प्राहुः तत्राधिकारिणः। धर्मार्थकाममोक्षान्यतमकामोऽकामश्चाधिकारी। 'दुःखदारिद्र्यदौर्भाग्यपापप्रक्षालनाय च। कामक्रोधजयार्थं च कलौ धर्मोऽयमीरितः॥ दरिद्रश्च क्षयी रोगी निर्भाग्यः पापकर्मवान्। अनपत्यो मोक्षकामः शृणुयाच्च कथामिमाम्। अपुष्पा काकवंध्या च वंध्या याच मृतार्भका। स्रवद्गर्भा च या नारी तया श्राव्यः प्रयत्नतः॥' इति पाद्मात्। ते च चंडालम्लेच्छजैनपाशुपतत्र्यम्बकवामादिकृष्यासूतकिमृतकादिभिन्नाः। ब्राह्मणक्षत्रियवैश्यशूद्रसंकरः। 'विप्रोधीत्याप्नुयात् प्रज्ञां राजन्योदधिमेखलाम्। वैश्यो निधिपतित्वं च शूद्रः शुद्ध्येत पातकादि'ति द्वादशस्कंधात्। अत्र शूद्रः श्रवणेनैवेति शंकराचार्यादय इति प्रागुक्तम्। 'स्त्रियः शूद्रादयो ये च तेषां बोधो यतो भवेदि'ति पाद्माच्च। अनुलोमसंकराणां मातृजातित्वमिति शंखस्मृतेश्च प्रतिलोमसंकराणामपि चंडालेतरेषां श्रवणाधिकारस्य कमलाकरेण समर्थितत्वाच्च। 'रजस्वलांऽत्यजम्लेच्छपतितव्रातकैस्तथा। द्विजद्विड्वेदबाह्यैश्च न वदेत्कथामिति पाद्माच्च। इम एव श्रोतार इत्युच्यंते। अथैतेषां श्रोतॄणां नियमाः पाद्म 'विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे।

ब्रह्मचर्यमधः सुप्तिः पत्रावल्यां च भोजनम्। कथासमाप्तौ भुक्तिं च कुर्यान्नित्यं कथाव्रती ॥' अत्यशक्तस्तु मध्येऽपि पयआदिकं भक्षयेत्। 'इक्षुरापः फलं मूलं ताम्बूलं पयऔषधम्। भक्षयित्वाऽपि कर्तव्याः स्नानदानादिकाः क्रियाः ॥' इति स्मृतेः। तत्रैव 'द्विदलं मधु तैलं च गरिष्ठान्नं तथैव च। भावदुष्टं पर्युषितं जह्यान्नित्यं कथाव्रती ॥ कामं क्रोधं मदं मानं मत्सरं लोभमेव च। दंभं मोहं तथा द्वेषं दूरयेच्च कथाव्रती ॥ वेदवैष्णवविप्राणां गुरुगोव्रतिनां तथा। स्त्रीराजमहतां निंदां वर्जयेच्च कथाव्रती ॥ रजस्वलांत्यजम्लेच्छपतितव्रातकैस्तथा। द्विजद्विड्वेदबाह्यैश्च न वदेच्च कथाव्रती ॥ सत्यं शौचं दयां मौनमार्जवं विनयं तथा। उदारमानसं तद्वदेवं कुर्यान् कथाव्रती। वैष्णवं ब्राह्मणं मुख्यं श्रोतारं परिकल्प्य स इति पाद्मात् मुख्यश्रोता च कार्यः। अथ वक्तृलक्षणं 'पाद्मे विरक्तो वैष्णवो विप्रो वेदशास्त्रविशुद्धिकृत्। दृष्टांतकुशलो धीरो वक्ता कार्योऽतिनिस्पृहः ॥ अनेकधर्मविभ्रांताः स्त्रैणाः पाखंडवादिनः। शुकशास्त्रकथोच्चारे त्याज्यास्ते यदि पंडिताः ॥ अथ वक्तृनियमाः पाद्मे 'वक्त्रा क्षौरं प्रकर्तव्यं दिनादर्वाग्व्रताप्तये। अरुणोदयेऽसौ निर्वर्त्य शौचं स्नानं समाचरेत् ॥ अथो वक्तृसहायलक्षणं पाद्मे। 'वक्तुः पार्श्वे सहायार्थमन्यः स्थाप्यस्तथाविधः। पंडितः संशयच्छेत्ता लोकबोधनतत्परः ॥' इति। अथ देशः पाद्मे 'तीर्थे वाऽपि वने वाऽपि गृहे वा श्रवणं मतम्। विशाला वसुधा यत्र कर्तव्यं तत्कथास्थलम् ॥' द्वादशस्कंधे 'पुष्करे मथुरायां च द्वारावत्यां यतात्मवानि'ति। अथ मंडपादि पाद्मे। 'कर्तव्यो मंडपः प्रोच्चैः कदलीखंडमंडितः। फलपुष्पदलैर्विष्वग्वितानेन विराजितः ॥ चतुर्दिक्षु ध्वजारोपो बहुसंपद्विराजितः। ऊर्ध्वं सप्तैव लोकाश्च कल्पनीयाः सुविस्तरम्। तेषु विप्रा विरक्ताश्च स्थापनीयाः प्रबोध्य च ॥ पूर्वं तेषामासनानि कर्तव्यानि यथोत्तरम्। वक्तुश्चाऽपि तदा दिव्यमासनं परिकल्पयेत् ॥' अथ कालः पाद्मे 'नभस्य आश्विनोर्जौ च मार्गशीर्षः शुचिर्नभाः। एते मासाः कथारंभे श्रोतॄणां मोक्षसूचकाः ॥' नेयं परिसंख्या। अग्रे सर्वथेत्युक्तेः। अतोऽन्येष्वपि मासेषु अन्येष्वपि पक्षेषु अन्यास्वपि तिथिषु सप्ताहकथाऽऽरंभो भवति। यथा संक्रान्तिप्रकरणे 'संक्रांतिः पक्षिणी ज्ञेया यद्दिने संक्रांतिः तदहः पुण्यकालः पूर्वापराः षोडश पुण्यकाल'इति वचनानां पूर्वाऽऽबाधेनोत्तरोत्तरप्राशस्त्यमात्रपरता माधवादिभिरादृता तथेहाऽपीति केचित्। 'मासानां विग्रहे यानि तानि त्याज्यानि सर्वथा।' विग्रहे कृष्णपक्षे। अमांतमानपूर्णिमांतमानयोस्तत्रैव हि विवादः। तत्राऽपि शुक्लपक्षीयनवम्यामेव। 'नवमीतो नभस्ये च कथारंभं शुकोऽकरोत्। शुद्धे शुचौ नवम्यां च धेनुजोऽकथयत् कथाम्। ऊचुरूर्जे सिते पक्षे नवम्यां ब्रह्मणः सुताः इति पाद्मोपनिबद्धशिष्टाचारात्। अथ द्रव्यं 'विवाहे यादृशं वित्तं तादृशं परिकल्पयेत्।' अथ प्रयोगः। ज्योतिर्विदादिष्टाऽऽषाढश्रावणभाद्रपदाश्विनकार्तिकमार्गशीर्षान्यतममासीयशुक्लपक्षीयनवमीरूपसप्ताहयज्ञप्रारम्भदिवसात् पूर्वेद्युः श्रोताऽरुणोदये स्नातः कृतनित्यक्रियस्तीर्थक्षेत्रवनगृहाऽन्यतमे शुचौ देशे कृतं कदलीखण्डमण्डितं फलपुष्पदलैस्तिर्यक्वितानेन विराजितं चतुर्दिक्षु ध्वजारोपेण युक्तं बहुसंपद्विराजितं ऊर्ध्वं सुविस्तरं कल्पितैः सप्तलोकैर्युक्तं तेषु सप्तलोकेषु आसनस्थैर्विप्रैर्विरक्तैश्च युक्तं दिव्येन कथावक्तुरासनेन युक्तं अत्युच्चमंडपं प्रविश्य आचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रीविष्णुप्रेरणया श्रीविष्णुप्रीत्यर्थं सप्तदिवसाऽधिकरणकसार्थश्रीमद्भागवतश्रवणरूपसप्ताहयज्ञं करिष्ये इति संकल्प्य। सकामश्चेत् पुत्रकामः सप्ता० करिष्ये। धनकामः सप्ता० करिष्ये। स्त्रीकामः सप्ता० करिष्ये। इत्यादि कर्तृविशेषणघटितं संकल्प्य। तदंगत्वेन विहितं कथाविघ्नविघातार्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं नान्दीश्राद्धं च करिष्ये इति संकल्प्य गणपतिपूजनस्वस्तिपुण्याहवाचननांदीश्राद्धानि कृत्वा शरीरशुद्ध्यर्थं सर्वप्रायश्चित्तं च कृत्वा मंडले श्रीकृष्णं षोडशोपचारैः संपूज्य विशेषतः प्रदक्षिणनमस्कारान् कृत्वा स्तुवीत। तत्र मन्त्रः 'संसारसागरे मग्नं दीनं मां करुणानिधे। कर्ममोहगृहीताङ्गं मामुद्धर भवार्णवात् ॥' इमां श्रीकृष्णमूर्तिं सप्ताहसमाप्तिपर्यन्तं प्रत्यहं पूजितां स्थापयेदिति शिष्टाः। ततः श्रीमद्भागवतपुस्तकं प्रीत्या विशेषतो धूपदीपयुक्तैरुपचारैः संपूज्य तत्पुरतः श्रीफलं धृत्वा नमस्कृत्य प्रसन्नचित्तेन तत् स्तुवीत। तत्र मन्त्रौ 'श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि। स्वीकृतोऽसि मया नाथ मुक्त्यर्थं भवसागरे ॥ मनोरथो मदीयोऽयं सफलः सर्वथा त्वया। निर्विघ्नेनैव कर्तव्यो दासोऽहं तव केशव ॥' ततः प्राक् कल्पितासने उदङ्मुखं प्राङ्मुखं वा कृतक्षौरं विरक्तं वेदशास्त्रविशुद्धिकर्तारं दृष्टान्तकुशलं वैष्णवं विप्रं शुकमूर्तिं वक्तारमुपवेश्य वस्त्रभूषणादिभिः संभूष्य संपूज्य स्तुवीत। तत्र मन्त्रः 'शुकरूप प्रबोधज्ञ सर्वशास्त्रविशारद। एतत्कथाप्रकाशेन मदज्ञानं विनाशय ॥' शुकरूपेत्यस्य शुकावेशयुक्तेत्यर्थः। ततो वक्तुर्दक्षिणपार्श्वे सहायार्थं लोकबोधतत्परं संशयच्छेत्तारं वक्तृतुल्यं पण्डितं उत्तमासने उपवेश्य वस्त्रभूषादिभिः संभूष्य संपूजयेत्। ततः वैष्णवं ब्राह्मणं मुख्यश्रोतारं परिकल्प्य संपूजयेत्। ततः उपोषणघृतपानपयःपानफलाहारैकभक्तान्यतमनियमं संकल्पयेत्। तद्यथा 'श्रीमद्भागवतसप्ताहश्रवणाङ्गभूतं सप्ताहं एकभक्तमहं करिष्ये।' फलाहारादिकरणे तु एकभक्तपदस्थाने फलाहारमित्याद्यूहः कार्यः। ततः 'कथाभङ्गनिवृत्त्यर्थं पंचसंख्याकब्राह्मणद्वारा द्वादशाक्षरजपमहं करिष्ये इति संकल्प्य तज्जपार्थं पञ्चब्राह्मणान् वृणुयात्। तैश्च प्रत्यहं कथावसानपर्यन्तं द्वादशाक्षरो जाप्य इति शिष्टाः। ततः कथाश्रवणोत्तरं प्रत्यहं तालमृदंगादियुक्तं कीर्तनार्थं कीर्तनकारिणो वैष्णवान् ब्राह्मणान् वृत्वा संपूज्य एकवारं हविष्यं भुंजीत। इति पूर्वदिनकृत्यम्। यद्यपि एतावत् कृत्यं पूर्वेद्युः कार्यमिति पाद्मे नोक्तं तथापि महत्सु पूर्वेद्युरिति गृह्यपरिशिष्टन्यायेन ज्योतिष्टोमादिषु तथैव दर्शनेनाऽस्याऽपि पाद्मादौ यज्ञत्वेन व्यवहृतत्वाच्चोक्तम्। ततः परदिनेऽरुणोदये वक्त्रादिभिः सह स्नात्वा संध्यायां संक्षेपतः कृत्वा लोकविस

धनागारपुत्रचिन्तां व्युदस्य मण्डपं गत्वा पूर्वकल्पितसप्तलोकेषु आसनानि निधाय तेषु वैष्णवान् विरक्तांश्चोपवेश्य विदुषो ब्राह्मणान् स्त्रीः शूद्रांश्च आकारितान् यथास्थानमुपवेश्य आगन्तुकान् सर्वान् वयोग्यताऽनुसारेणैवोपवेश्य गणपतिं स्मृत्वा श्रीकृष्णपूजां श्रीमद्भागवतपूजां वक्तृपूजां उपवक्तृपूजां श्रोतृपूजां च विधाय वक्तोदङ्मुखश्चेत् प्राङ्मुख आसने उपविश्य वक्ता प्राङ्मुखश्चेत् उदङ्मुखआसने उपविश्य सूर्योदयमारभ्य सार्धत्रिप्रहरपर्यन्तं कथाचित्तः शुद्धमतिः सार्थं श्रीमद्भागवतं शृणुयात् ६ दि० ५० अ० ७ दि० ३५ अ० इत्याचारः। कुतुपसंज्ञकेऽष्टमे मुहूर्ते घटिकाद्वयरूपे विरामं कृत्वा तत्र मध्याह्नसन्ध्याब्रह्मयज्ञादि संक्षेपतः कुर्यात्। कथासमाप्त्यनन्तरं तालमृदङ्गादिभिर्वैष्णवैर्ब्राह्मणैर्हरिकीर्तनं कार्यम्। ततः द्विदलमधुतैलगरिष्ठान्नभावदुष्टपर्युषितादिभिन्नं हविष्यं यथासुखं लघु एकवारं पत्रावल्यां भुंजीत। वक्त्रादीनामप्येवमेव भोजनम्। ततः सायं संध्यादि विधाय ब्रह्मचारी अधः शय्यायां शयीत। एवं प्रत्यहम्। ततः समाप्ते सप्ताहयज्ञे सप्तमदिवसे श्रोतृभिः पुस्तकपूजा वक्तृपूजा च यथाविभवं कार्या। वक्ता च श्रोतृभ्यः कृष्णसमर्पिततुलसीमालारूपं प्रसादं दद्यात्। ततः श्रोता उपवक्तृपूजां मुख्यश्रोतृपूजां च कृत्वा जापकेभ्यो दक्षिणां दत्वा मृदंगतालललितं हरिदासैर्ब्राह्मणैः कीर्तनं कारयित्वा जयशब्दं नमः शब्दं शंखशब्दं च कारयित्वा चूर्ण ( गुलाल ) लाजा-प्रसूनानि विकीर्य हरिकथावक्तृन् यथाविभवं संपूज्य परेऽहनि सकामश्चेत् जन्माष्टमीव्रतवदुद्यापनं कृत्वा पायसमधुतिलघृतान्ना-दिभिर्दशमस्य, प्रतिश्लोकं हुत्वा गायत्र्या वा हुत्वा होमाऽशक्तौ तावद्धौम्यं वा ब्राह्मणाय दद्यात्। निष्कामश्चेद्गीतामात्रं पठेत्। ततो निष्कामः सकामश्च नानाछिद्रनिरोधार्थं न्यूनाधिकतादोषप्रशमार्थं च विष्णुसहस्रनामपठनं करिष्य इति संकल्प्य पठेत्। ततो मधुपायसैर्द्वादश ब्राह्मणान् भोजयित्वा ब्राह्मणाय सुवर्णं धेनुं च दत्वा विप्रेभ्यो याचकेभ्यश्च वित्तमन्नं यथाविभवं दद्यात्। स शक्तश्चेत् विंशत्यधिकशतपरिमितमाषरूपपलत्रयमितं स्वर्णसिंहं विधाय तत्र पुस्तकं संस्थाप्यावाहनाद्यैः संपूज्य वस्त्रभूषणगंधाद्यैः पूजिताय यतात्मने आचार्याय दद्यात्। तेन भवबंधेभ्यो मुक्तो भवेत्। सकामश्चेदीक्षितं कामं प्राप्नुयादिति। अष्टोत्तरशतवृत्त्या भागवतपुरश्चरणमिति शिष्टाः। भागवतशकुनप्रकारो ब्रह्मयामलोक्तो विधामपालायामिति शिवम्। इत्थं यथामति कृतं भागवत-भूषणम्। प्रीयतां तेन भगवान् मथुरानायकोऽच्युतः॥ ॐ॥

**इति श्रीनारायणपरायणश्रीकरहाटकक्षेत्रवासिवासुदेवाचार्यसुतनारायणाचार्यांगजगंगागर्भजगोपालाचार्यविरचिते श्रीभागवतभूषणे सप्ताहविधानकथनं नाम चतुर्थोल्लासः। श्रीकृष्णार्पणमस्तु। अनुक्तपूरण-दुरुक्तनिष्कासनाभ्यां भगवद्भक्ताः साधवः शोधयन्तु। इति भागवतभूषणं समाप्तम्॥**

'श्रीमद्भागवतस्यादौ महिमा मंगलोत्तरा। श्लोकानुवादः पाद्मीयः, श्रवणं मुक्तिसाधनम्॥ १॥ कृष्णसान्निध्यमेतस्मिन् कल्पितत्वनिराकृतिः। श्रीभागवतशब्दस्य देवीभागवतं नहि॥ २॥ तात्पर्यविषयः किंतु गायत्रीभाष्यमेव सः। एतद्द्वादशस्कन्धानां नारदोक्तो ह्यनुक्रमः॥ ३॥ एतत्पूजाफलं प्रोक्तमुल्लासे प्रथमे इह। अस्याप्रामाण्यशङ्का हि वामादीनां कुमार्गता॥ ४॥ बोपदेव-कृतत्वस्य खण्डनं बाधकानि तु। अप्रामाण्यस्य शङ्कायामेतद्व्याख्यानिदर्शनम्॥ ५॥ हेतूनां व्यभिचारित्वं विस्तरेण निरूपितम्। हेमाद्रिबोपदेवीयग्रन्थानां गणनं ततः॥ ६॥ बोपदेवीयटीकायामागमत्वनिरूपणम्। हेमाद्रिरचिताष्टीकाः सन्त्यस्या मथुरादिषु॥ ७॥ श्रीमद्भागवतीयानां हेमाद्रावार्षतोदिता। प्रोक्तं भागवताय स्यादिति निर्वचनं कृतम्॥ ८॥ तत्रास्योक्तं पुराणत्वं बोपदेवो हि संमतः। हेमाद्रिसमकालो ह्ययं ज्ञानेश्वरोत्तरः॥ ९॥ ग्रन्थे प्राच्ये बोपदेवात् श्लोका भागवतस्य हि। प्रमाणत्वेन लभ्यन्ते, भाष्ये शारीरके तथा॥ १०॥ अनुपन्यासस्य बीजं चतुर्धरस्य संमतिः। विरोधोन्यपुराणानामाशङ्क्य हि निराकृतः॥ ११॥ वैष्णवस्य पुराणस्य विरोधपरिहारणे। सिद्धान्तदर्पणमतं, कृत्वेतिकनिबन्तकम्॥ १२॥ दशलक्षणमित्यस्य पुराणं पञ्चलक्षणम्। विरोधः साकमेतेन ततस्तस्य निराकृतिः॥ १३॥ अष्टादशसहस्रस्य उपपत्तिर्निरूपिता। अन्यथा बाधकं प्रोक्तमुल्लासे हि द्वितीयके॥ १४॥ प्रामाणिकावुभौ पाठौ श्रीधरो वैजयध्वजः। विद्यारण्यमहाभाष्ये प्रमाणं हि उदाहृतिः॥ १५॥ देवीभागवतं चापि निर्मितं भारतोत्तरम्। महापुराणता नास्ति देवीभागवतस्य हि॥ १६॥ यत्राधिकृत्य गायत्रीमित्यस्यार्थस्तदेव हि। विष्णुभागवतं नाम गायत्र्यर्थो हरेः स्मृतिः॥ १७॥ श्रीमैत्रायणीयप्रभृतिवचनानां व्यवस्थितिः। हयग्रीवब्रह्मविद्यामन्त्रविद्याविचारणम्॥ १८॥ वृत्रासुरवधोपेत-मित्यस्यार्थनिरूपणम्। सारस्वतस्य कल्पस्येत्यस्यार्थो हि निरूप्यते॥ १९॥ शैवस्य हि पुराणस्य वचनानां विचारणम्। अप्रमाणं कचिदाहुर्देवीभागवतं त्विदम्॥ २०॥ शारदं नवरात्रं हि विष्णुदैवतमेव च। पारायणं तत्र कुर्यात् श्रीमद्भागवतस्य च॥ २१॥ देवीभागवतस्यैव टीकायाः खण्डनं कृतम्। हेमसिंहसमन्वितमित्यस्यार्थनिरूपणम्॥ २२॥ अन्यत्वस्य समाशङ्का शुकमुक्तिविचारणम्। श्रीमद्भागवतस्येह विरोधो ज्योतिषे न हि॥ २३॥ निराकृतः समाशङ्क्य उल्लासे हि तृतीयके। चतुर्विधं श्रवणादि सप्ताहो द्विविधो मतः॥ २४॥ माघमासे भागवतश्रवणं देशशंसनम्। कालः श्रोतुर्लक्षणं हि श्रोतारो द्विविधा मताः॥ २५॥ दुःश्रोतृलक्षणं चाथ वक्त्रो-र्लक्षणं ततः। पठनं हि पुराणानां धनलोभेन वर्जितम्॥ २६॥ पुराणवक्ता मुच्येत लोकोद्धरणकामुकः। पुराणपाठश्रवणविधिः पाठो गुरूक्तितः॥ २७॥ आद्यन्तयोर्हरेः कीर्तिः पाठो रागादिभिर्युतः। शृणुयान्नैव सोष्णीषो भक्त्या भागवतं परम्॥ २८॥ व्यासपीठांस्थिता वक्ता कस्मैचित्प्रणमेन्न हि। आहारोऽथ पठेन्नैव शुद्धः श्रवणमर्हति॥ २९॥ ब्राह्मणं वा हरिं चाग्रे कृत्वा हि

शृणुयादिदम्। स्त्रिया ष्येवंविधं कार्यं, प्रयोगः श्रवणस्य च ॥ ३० ॥ सप्ताहस्य विधानं च लक्षणं परिकीर्तितम्। तत्राधिकारिणः प्रोक्ताः श्रोतॄणां नियमास्ततः। समाप्तौ भोजनं कुर्यादस्य शक्तौ फलादिकम् ॥ ३१ ॥ मध्येपि भक्षयेत्किंचिन्मुख्यश्रोतृप्रकल्पनम्। लक्षणं नियमा वक्तुः सहायस्य च लक्षणम् ॥ ३२ ॥ देशकालौ मण्डपादि द्रव्ये यत्ता ततो विधिः। आरम्भदिवसात्पूर्वं कृत्यं संकल्पकामने ॥ ३३ ॥ प्रायश्चित्तविधिर्वक्तुरुपवक्तुश्च पूजनम्। मुख्यश्रोतुः पूजनं च एकभक्तादिसंयमः ॥३४॥ वरणं ब्राह्मणानां च द्वादशाक्षरजापिनाम्। वरणं पूजनं चैव हरिदासस्य संमतम् ॥ ३५ ॥ एतावतः कर्मणो हि पूर्वेद्युः करणं मतम्। आरम्भदिनकृत्यं हि वक्तुः श्रोतुर्यमा दिशः ॥ ३६ ॥ प्रत्यहं श्रवणस्यैव विरामो हरिकीर्तनम्। पूजनं पुस्तकादीनां होम उद्यापनं ततः ॥ ३७ ॥ पुस्तकस्य तथा दानं पुरश्चर्या ततः परम्। शकुनानां प्रकारश्च चतुर्थे परिकीर्तितः ॥ इति

विद्योदयो निराकुर्यादविद्यातिमिरं सदा।
सहस्रांशुरिवाशेषं मुद्राकिरणराजिभिः ॥

श्रीहरिः शरणम्

# अथ श्रीमद्भागवताद्यपद्यव्याख्याशतकम् ।

॥ ॐ स्वस्ति ॥ श्रीगणेशाय नमः ॥

हेरम्बं गिरिजापतिं च गिरिजां स्कन्दं गुरुं भारतीं श्रीभानुं पितरं निजं च जननीं विद्यागुरून् सर्वतः ।
नत्वा श्रीवृषभानुजाप्रियतमं कृष्णं वृतं वल्लवैः कालिंदीविपिने विहारनिरतं वन्द्यं हि वृंदारकैः ॥ १ ॥
श्रीमत्सद्गुरुपादपद्ममकरंदास्वादभृंगाकृतिर्विप्रो गौडकुलोद्भवो हरिरतो वंशीधरो लब्धवाक् ।
कुर्वे भागवताद्यपद्यविषये व्याख्याशतं मोददं सुज्ञानां पठतां च बोधजनकं सर्वागमानां परम् ॥ २ ॥

गणेशो भारती भानुः शंकरस्तत्प्रिया तथा । तपः सज्जनसंगश्च गुरुरोंकार एव च ॥ कर्ममत्स्यौ च कमठौ नारदश्रीनृसिंहकौ । धन्वंतरी रामकृष्णौ श्रीगंगा ब्राह्मणस्तथा ॥ वाराहो वामनश्चैव पर्शुरामबलौ तथा । बुद्धः कल्किहयग्रीवौ दत्तः कपिल एव च । सनकाद्या गवां शैलः श्रीराधा कीर्तिनंदिनी । वृन्दावनं हरेर्नाम वार्ग्विद्रवरुणास्तथा ॥ धर्मराजः कुबेरश्च वह्निविष्णुशिवौ तथा । श्रीमद्भागवतव्यासौ श्रीशुकः पृथुरेव च । ऋषभध्रुवौ ततः प्रोक्तौ नरनारायणस्तथा । हंसोथ यमुना चैव श्रीपुष्करप्रयागकौ ॥ कुरुक्षेत्रं तथा मायाक्षेत्रं साकेतकं तथा । वाराणसी द्वारिका च गोपीचन्दनमेव च ॥ ऊर्ध्वपुंड्रं तथा कांच्यवंतिकाक्षेत्रमेव च । जगन्नाथोथ नैवेद्यं विष्णुतीर्थं तुलस्यथ । शालिग्रामोथ बदरी सेतुरब्धिस्तथैव च ॥ काश्मीरं भारतं खंडं कालश्च मनसः स्थितिः । हिरण्यगर्भः सेनानीर्जननी जनकस्तथा ॥ प्रद्युम्नश्चानिरुद्धश्च फाल्गुनश्चोद्धवस्तथा । हनुमान्गरुडश्चैव सुदर्शनमथो रमा ॥ अष्टादशाक्षरो गीता वेदो गायत्रिका तथा । गवां कुलं च रुद्राक्षपंचाक्षरकमन्त्रकौ । शिवलिंगं भस्मधृतिर्बिल्ववृक्षः स्वयंपचिः । नवग्रहा हरेर्घस्रस्तर्कशास्त्रं च पुष्यभम् । कलिस्तुर्याश्रमश्चैव शतं चैते प्रकीर्तिताः । एषां पक्षे योजना मे कृता गुरुप्रसादतः । श्रीमद्भागवतस्याद्यश्लोकस्य सुधियो भृशम् । वक्ष्यामो योजनाहेतून्विचार्य निजया धिया । पौर्वापर्यविचारोत्र न कार्योहि मनीषिभिः । सर्वविघ्नविघातार्थं गणनाथस्य पूजनम् । कार्यारम्भे गणेशश्च पूजनीयः प्रयत्नतः । इत्युक्तेर्गणेशध्यानम् । 'सरस्वत्याः प्रसादेन सर्वं ज्ञानं प्रजायते ।' इति ज्ञानहेतुत्वेन तद्ध्यानम् । 'सर्वांधकारशमनो भास्करो विश्वपूजितः । इति सर्वांधकारशमकत्वेन हृदयांधकारमपि नाशयतीति तद्ध्यानमिति । यद्वा 'आरोग्यं भास्करादिच्छेदि'ति हेतोरपि तद्ध्यानम् ।' श्रीशंकरस्यापि सर्वकल्याणहेतुत्वाच्छिवरूपाज्ज्ञानमर्हतीत्यार्योक्तेश्च ज्ञानहेतुत्वात्तद्ध्यानमिति । विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु 'वाक्येषु च का त्वदन्या इति मार्कंडेयोक्तेः सर्वविद्याहेतुत्वात्तद्ध्यानमिति । 'सृजामि तपसा विश्वमिति'भगवदुक्तेस्तपसः परपुमर्थकारणत्वात्तद्ध्यानमिति । 'सत्संगतिः कथय किं न करोति पुंसामि'ति हरिभर्तृक्तेस्तद्ध्यानमिति । 'हरौरुष्टे गुरुस्त्राता गुरौरुष्टे न कश्चन । तस्मात्सर्वप्रयत्नेन गुरुमेव प्रसादयेदि'ति स्मृतेस्तद्ध्यानमिति । ओङ्कारस्य सर्ववाङ्मयकारणत्वेन ध्यानमिति । 'कर्मणैवाखिलं फलमि'त्युक्तेः कर्मैव ध्येयमिति । मत्स्यावतारेणापि हयग्रीवदैत्यहृतवेदानयनं हरिणा कृतं तद्द्रोहहृतिश्च कृतातस्तद्ध्यानमप्यत्रोपयोग्यमेव कूर्मरूपस्यापि हरेर्मंदरधृतिपूर्वकममृतोत्पादनं कारितम् । श्रीमद्भागवतस्यापि परमामृतरूपत्वात्तदारब्धौ तद्ध्यानं युक्तमेवेति । श्रीनारदेनैव व्यासशोकापनोदनं कृतमतस्तद्ध्यानमिति । निजजनावनार्थं कर्तुमशक्यमपि करोति हरिरत एष हरिणा निजभृत्यभाषणरक्षणार्थं श्रीनृसिंहविग्रहोंगीकृतस्तद्ध्यानं तु सर्वथा कार्यमेव । धन्वंतरेः स्मृतेरेव सर्वार्तिशमकत्वान्ममाप्यंतरार्तिर्नश्यत्विति हेतोस्तद्ध्यानमिति । श्रीरामेण तु समुद्रे सेतुः कृतस्तत्कृपयाहमपि संसारसमुद्रेसेतुभूतं श्रीमद्भागवतं करोमीति तत्सिद्ध्यैतद्ध्यानं न्याय्यमेव । श्रीकृष्णस्य त्वत्र प्रतिपाद्यत्वात्तद्ध्यानं कार्यमेव । श्रीगंगा यथा त्रिलोकीं पुनाति तथा मत्त आविर्भूतं श्रीमद्भागवतं त्रिलोकीं श्रोतृवक्तृप्रच्छकान्वा पुनात्विति तद्ध्यानमिति । ब्राह्मणानां सर्वामररूपत्वाद्ब्राह्मणार्चने सर्वार्चनमिति तद्ध्यानम् । श्रीवाराहेण सर्वाधारभूतपृथिव्युद्धारः सर्वोपद्रवकारी दैत्यश्च हतस्तद्ध्यानेन ममाप्युपद्रवो मा भूदिति युक्तं तद्ध्यानम् । श्रीवामनेन निजजनावनार्थं कपटरूपं धृत्वा दैत्या निरस्तास्तद्ध्यानेन ममाप्यबोधदैत्यो हतो भवत्विति न्याय्यं तद्ध्यानम् । श्रीपरशुरामेण भूयो भूयो दुष्टक्षत्रं नाशयित्वाऽधर्मोवितस्तद्ध्यानं ममापि भूयो भूयो ग्रन्थनिर्मितावालस्यादिकं नाशयत्विति योग्यं तद्ध्यानम् । श्रीबलदेवस्य शेषावतारत्वेन सर्पाधीशत्वाद्ग्रन्थनिर्माणावसरे मम सर्पादिविषधरसत्त्वभीतिर्माभूदिति तद्ध्यानम् । बुद्धरूपेण हरिर्वेदाद्दैत्यान्प्रच्याव्य निजभक्तेभ्यो देवेभ्यस्तन्मार्गं ददावतो ममापि स वेदार्थं बोधयत्विति तद्ध्यानम् । कल्किस्तु कलिदोषं नाशयत्यतो ममापि कलिसम्बन्धो माभूदिति तद्ध्यानम् । हयग्रीवस्य निःश्वासतो ब्रह्मयज्ञे वेदाविर्भावोऽभूदिति हेतोर्ममापि वेदार्थावबोधो भवत्विति तद्ध्यानम् । श्रीदत्तात्रेयस्तु ज्ञानिशिरोमणिरभूत्तद्ध्यानेन ममापि रचनाज्ञानं स्यादिति । कपिलस्मृतेः सांख्ये बुद्धिरप्रतिहतास्त्विति तद्ध्यानमिति सनकादिस्मृतेः कामादिपीडा नश्यत्विति तद्ध्यानं तेषां नैष्ठिकत्वात् ॥ गोवर्द्धनेन तु व्रजरक्षा कृता तस्य रक्षावत्स्वभावत्वान्मामपि स रक्षत्विति हेतोस्तद्ध्यानम् । श्रीराधायास्तु श्रीकृष्णस्यापि वशकर्त्रीत्वेन सर्वोत्कर्षवत्त्वान्ममापि सोत्कर्षं ददात्विति तद्ध्यानम् । वृन्दावनस्य तु साक्षाच्छ्रीकृष्णस्य नित्यालयत्वान्ममापि तद्भवत्विति तद्ध्यानम् । कलौ

तु हरिनामैव सर्वार्थसाधकत्वाद्ध्येयमिति तद्ध्यानम् । वायोस्सर्वाधारत्वेन सर्वजीवनहेतुत्वाद्ध्येयत्वम् । इन्द्रस्य सर्वदेवाधिपत्याद् ध्येयत्वम् । वरुणस्य सर्वजीवनहेतुजलाधीशत्वाद्ध्येयत्वम् । धर्मराजस्तु सर्वशास्ता सर्वेषां कर्मफलदाता चेति ध्येयः । सर्वनिधीशत्वात्कुबेरस्यापि तथात्वम् । वह्नेः सर्वदेवमुखत्वाद्ध्येयत्वम् । विष्णुशिवयोरभेदबुद्धेर्मोक्षहेतुत्वादभेदरूपेण तयोर्ध्यानं न्याय्यमेव । श्रीमद्भागवतस्य श्रीकृष्णवाङ्मयमूर्तित्वात्सर्ववेदसारत्वाच्च ध्येयत्वम् । व्यासस्तु साक्षान्नारायण एवातस्तद्ध्यानं कार्यमेव ॥ श्रीशुकस्यैतच्छास्त्रप्रवर्तकत्वाद् ध्येयतास्त्येव । पृथोरादिराजत्वेन सर्वमर्यादास्थापकत्वात्पूज्यत्वं स्यादेव । ऋषभदेवस्य मोक्षहेतुपारमहंस्याश्रमप्रदर्शकत्वाद्ध्यानविषयतास्तीति ॥ ध्रुवस्य तु सर्वोत्कृष्टपदस्थत्वात्सर्वदा स्थायित्वाच्च तथात्वम् । नरनारायणयोस्तु कामक्रोधादिजेतृत्वेन ध्येयतास्त्येव । हंसावतारस्य तु ब्रह्मणोपि मोहनिरासकत्वेन गुरुत्वादर्च्यत्वम् ॥ यमुनायास्तु श्रीकृष्णकेलिस्थानत्वेन तटिनीषु मुख्यत्वाद्ध्येयता । पुष्करस्य सर्वतीर्थगुरुत्वाद् भुवो नेत्रत्वाच्चार्हतास्त्येव । प्रयागस्य तु तीर्थराजत्वाद् ध्येयत्वम् । कुरुक्षेत्रस्य तु त्रिधा मुक्तिहेतुत्वेन ध्येयत्वम् । मायाक्षेत्रस्य तु मोक्षहेतुत्वाच्छ्रीगंगाया मुख्यस्थलत्वाच्च ध्येयता । श्रीसाकेतापरपर्यायायोध्याक्षेत्रस्य श्रीरामाविर्भावभूमित्वाद् ब्रह्मप्रियसरय्वधिकरणत्वाच्च सर्वदा ध्येयत्वमेव । श्रीकाश्या मरणादेव मोक्षदातृत्वेन ध्येयता श्रीविश्वेशनिवासभूतत्वाद्वा ॥ श्रीद्वारिकायाः श्रीकृष्णराजधानीत्वेन सपरिकरस्य भगवतो निवासभूमित्वात्तथात्वम् । गोपीचंदनधृतेः पापिनोपि मोक्षं यांतीति ध्येयमेव तत् ॥ उर्ध्वपुंड्रस्य सर्वकर्मसु धार्यत्वेन कर्मपूर्तिकरत्वाद्भगवत्प्रियत्वाच्च ध्येयता । कांचीद्वयस्यापि सप्तपुर्यंतर्गतत्वेन मुक्तिदत्त्वाद्ध्येयत्वम् । अवंतिकाया अपि श्रीकृष्णविद्याध्ययननगरत्वेन मोक्षहेतुत्वादर्हता । श्रीजगन्नाथस्तु कलौ साक्षादेव प्रसिद्धस्सर्ववांछितप्रदश्चातो ध्येय एव सः । श्रीविष्णुनैवेद्यस्य त्वखिलपापहरत्वेन भक्ष्यत्वाद्ध्येयत्वम् । श्रीविष्णुचरणोदकस्य निखिलतीर्थरूपत्वादर्च्यतास्ति । श्रीतुलसीं विना दत्तमप्यन्नादि हरिर्न गृह्णात्यतस्तस्या हरिवल्लभात्वेन ध्येयतास्त्येव । शालिग्रामे सर्वदा विष्णोराविर्भावाद् ध्येयतैव । बदरीक्षेत्रस्याद्युनापि साक्षान्नरनारायणस्थितिमत्त्वाद्ध्येयत्वम् ॥ सेतुदर्शनस्य ब्रह्महत्यानिवर्तकत्वेन रामेश्वराधिकरणत्वाद्वा ध्यानयोग्यता ॥ समुद्रस्य तु सर्वतीर्थरूपत्वाद्रक्षआदिभ्यो लोकरक्षकत्वाच्च ध्येयता । काश्मीरमंडलस्य वाग्देवतायाः सर्वदा स्थलत्वादादिवराहाविर्भावभूमित्वाद्वा ध्येयता ॥ भारतखंडस्य तु पुण्यक्षेत्रत्वेन ध्येयता । कालस्य सर्ववशित्वाद्ध्येयता । 'परो हि योगो मनसः समाधिरि'ति भगवदुक्तेर्मनः स्थितेःसर्वार्थसाधकत्वाद्ध्येयत्वम् । ब्रह्मणस्तु सर्वजगदुत्पादकत्वेन ध्यानगोचरता । कार्तिकेयस्यापि प्रज्ञावर्द्धकत्वाद्देवसेनापतित्वाद्वार्च्यतास्त्येव । जननीजनकयोस्तु चतुर्वर्गसाधनदेहदातृपालकत्वात्सर्वामररूपत्वाद्वा ध्यानयोग्यता । श्रीप्रद्युम्नस्य कामावतारत्वे नाखिलबलिभ्योबलवत्तरत्वाद्ध्यानविषयता । अनिरुद्धस्यापि चतुर्व्यूहांतर्गतत्वेन भगवद्रूपतया ध्येयता । अर्जुनस्य तु श्रीकृष्णस्यातीव वल्लभत्वात्पूज्यतैव । उद्धवस्य श्रीकृष्णमंत्रिषु प्रवरत्वाद्ध्येयत्वम् । हनुमतोऽतिबलवत्तरत्वेन तद्ध्यानं ममापि बलं करोत्विति ध्येयत्वम् । गरुडस्य तु भगवद्यानत्वादमृतनेतृत्वाच्चार्चनयोग्यता । सुदर्शनस्य भगवदायुधेषु मुख्यत्वाद्ध्येयत्वम् । श्रीलक्ष्म्यास्तु कटाक्षपातेन सर्वसंपद्धेतुत्वाद्ध्यानयोग्यता । अष्टादशाक्षरस्य सर्वमंत्रराजत्वाच्छ्रीकृष्णस्वरूपत्वाच्च तथात्वम् । श्रीगीतायाः सर्वोपनिषत्सारत्वात्साक्षात् श्रीमुखोक्तित्वाच्च ध्येयता । 'वेदो नारायणः साक्षादि'त्युक्तेः पुरुषार्थोपायाद्बोधकत्वाद्ध्यानगोचरता । अस्य पुराणस्य गायत्र्यर्थभूतत्वात्तद्ध्यानमुचितमेव । गवां कुलस्य सर्वदेवदैत्यनरादिपालकत्वाद्ध्येयत्वम् । रुद्राक्षस्य हरवल्लभत्वात्सर्वदेवमनुजेष्वभ्यर्हितत्वाच्च ध्यानगोचरता । पञ्चाक्षरमंत्रस्य तूपदेशं विनापि श्रेयोहेतुत्वादर्हता ॥ शिवलिंगस्य सर्वपुरुषार्थजनकत्वेन ध्येयता ॥ भस्मधृतेस्तु शिवपूजनोपयोगित्वात्तथात्वम् ॥ बिल्वस्य साक्षाच्छ्रीनिवासभूमित्वेनामृतोद्भूतत्वेन च ध्यानविषयता । स्वयं पाकस्य सर्वाचारेषु मुख्यत्वाद्ब्राह्मण्यापादकत्वाच्च ध्येयता । नवग्रहाणां जगत्सु दुःखहेतुत्वात्तद्ध्यानेन मम दुःखं माभूदिति तद्ध्यानम् । हरिवासरस्य सर्वव्रतेषु मुख्यत्वेन सर्वथा कार्यत्वाद्ध्येयत्वम् । तर्कशास्त्रस्य वादिवृंदमर्दकत्वेन तद्ध्यानान्मन्निर्मितशास्त्रे कश्चिद्वादं न कुर्यादिति तद्ध्यानम् । पुण्यः परकृतं हंति न तु पुण्यकृतं पर 'इत्युक्तेः सर्वकार्ये' साधकत्वात्तस्यर्क्षेषु प्रधानत्वाद्वा ध्यानम् । 'दुर्जनं प्रथमं वंदेदि'ति न्यायेन कलियुगस्य सर्वसुबुद्धिहरत्वात्तन्मे माभूदिति तद्ध्यानम् । संन्यासस्य तु मोक्षोपयोग्याश्रमत्वादेव तद्ध्यानमिति । अत्र पौर्वापर्यविचारो न कार्यो बहुव्याख्याने तात्पर्यत्वात्संगतिविचारस्यात्र चिंता न कार्या । बह्वर्थे संगतिर्वाक्यैनैवालोच्या मनीषिभिः इत्यभियुक्तोक्तेः । अथ गणेशपक्षः । नत्वा लंबोदरं देवं व्याख्या भागवतस्य हि । आद्यश्लोकस्य विशदापञ्च गाणपते'कृता ॥ १ ॥ कार्यारंभे गणेशश्च पूजनीयः प्रयत्नतः । इति मनसि निधाय व्यासः श्रीमद्भागवतारंभरूपकार्यादौ गणेशं प्रणमति । जन्माद्यस्येति ।

जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ १ ॥

वयं तं गणेशं ब्रह्मलता ब्रह्मदृष्ट्या आदौ धीमहि । आदीत्यव्ययमाद्यावित्यर्थे । 'मनसि दृशि हृच्छन्दो वागीशेन प्रकीर्तित' इत्यनेकार्थचिंतामणिः । गणेशस्य ब्रह्मरूपतात्वथर्वशिरस्युक्ता 'त्वं प्रत्यक्षं ब्रह्मासि त्वं ज्ञानमयो विज्ञानमयोसि । सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति सर्वं जगदिदं त्वयि लयमेष्यतीति

तो’ति श्रुतेः। यतो यस्माद्गणेशात्स्वराडिंद्रः अर्थेषु समुद्रोद्भूतकामधेन्वादिपदार्थेष्वाद्यस्य समुद्रमंथनादिकारणस्यामृतस्य जन्माविर्भावमन्वयात्, जनेः प्रादुर्भावार्थकत्वाज्जन्मशब्द आविरर्थकः। ‘स्वराण्नमुचिसूदन’ इत्यमरः। यद्वा स्वराट् युधिष्ठिरो यतो गणेशादाद्यस्य सर्वादिकारणस्य श्रीकृष्णस्य जन्माविर्भावमन्वयात् प्राप। अनुपूर्वो या-प्रापणे ततो लङ्। युधिष्ठिरेण वनस्थेनापद्ग्रस्तेन कस्यचिद्दषेरुपदेशाद् गणेशार्चनं कृतं ततः श्रीकृष्णप्राप्तिस्ततश्चापत्त्यभाव एतच्च भविष्ये स्फुटम्। ‘सामंतेशश्चचक्रवर्ती स्वराट् सम्राण्महाधिप’ इति धरणिः। समुद्रमथनारंभे गणेशार्चनं न कृतं तत एव गिरिपातादिना सुरासुरविनाशो गिरेरधोगत्यादिरूपश्चोपद्रवोऽभूत्। ततो विष्णुना गणेशार्चनं कारयित्वा मथनमारंभितम्। ‘विलोक्य विघ्नेशविधिं तदाच्युत’ इत्यादिनाष्टमस्कंधे वक्ष्यति। ‘अनाराध्य गणाधीशं नहि किंचित्प्रसिध्यती’ति भविष्येऽपि। ततोऽमृतादि प्राप। यन्निमित्तं यत् क्रियते तदेव तस्य हेतुः यथा ‘स्वर्गकामो यजेते’त्यादौ स्वर्गकाम एव यजने हेतुस्तथामृतमेवात्राब्धिमथने कारणमिति पूर्वोक्तमनुसंधेयम्। कीदृशः स्वराट् इतरतः सकाशादभिज्ञः। ‘इः कामे कामनायां चे’त्यनेकार्थोक्तेः, इं कामं तरति जयतीतीतरो विष्णुस्तस्मादितरतः। तस्य नित्यं ब्रह्मचर्यदत्त्वादितरत्वम्। तदुक्तं जैमिनीये ‘यद्यहं ब्रह्मचर्येण न भग्नो भूतले तदा। तेन मे सुकृतेनाद्य पार्थस्यायातु वै शिरः॥ येनींतं ते पतंत्वद्य भिन्नशीर्षा ममाज्ञया॥’ इति। किञ्च दुर्वासोदर्शनार्थिनीभिर्गोपीभिरप्येतद्यमुनातरणावसरे ‘कृष्णाज्ञयैतद्ब्रह्मचर्यमनुभूतं यमुनामार्गदानेन हेतुने’ति गोपालतापिन्याम्। गर्गसंहितायां चैतत्स्पष्टतरम्। तथा वक्ष्यत्यपि श्रीदशमे ‘आत्मन्यवरुद्धसौरत’ इति। तथा चेतरतो विष्णोरभिज्ञः प्राप्तशिक्षः। तच्छिक्षा च ‘लोभः कार्यो न वो जातु कामं रोषस्तु वस्तुषु’ इत्यादिनाष्टमस्कन्धे प्रकटीभविष्यति। यद्वार्थेषु इतरतः इता दूरीभूता रतिः प्रीतिर्यस्य स तथा, समासांतोऽत्र डः। ‘तस्मिन्बलिः स्पृहां चक्रे नेन्द्र ईश्वरशिक्षया।’ इत्यग्रे वक्ष्यमाणत्वात्। युधिष्ठिरपक्षे इतरतः शत्रोरभिज्ञस्त्रस्तः। ‘इतरो रिपुनीचान्यशिवविष्णुगुहेषु च’ इति सर्वार्थचिंतामणौ। ज्ञा त्रासेप्यनेकार्थत्वाद्धातूनाम्। यत्कोर्थः यं सूरयो मुह्यंति ध्यायन्ति मुह वैचित्ये। इह चित्यते संज्ञायतेनेनेति चित्तं ध्यानं विशेषेण चित्तं विचित्तं तस्य भावो वैचित्त्यमित्यर्थान्मुहि ध्यानार्थो भवतीति। ‘पादांबुजध्यानवशेन यस्य विघ्नांधकारा विलयं प्रयांती’ति जातकाभरणोक्तेः। कस्मै कवये कवित्वाय, भावप्रधानो निर्देशः। यत्र यस्मिन्गणेशे ध्याते सतीति शेषः। त्रयाणां शोकमोहविघ्नानां सर्गः स्थितिर्मृषा। ‘सृष्टौ स्थितौ च संहारे सर्गोऽध्यायेऽथ निश्चये’ इति कोशात् स्थितावपि सर्गोस्ति। शोक इष्टविनाशजं दुःखम्। मोहोऽज्ञानम्, विघ्नस्तु कार्योत्पत्तिप्रतिबंधक उपद्रवः। कथं यथा तेजोवारिमृदां विनिमयो व्यत्यासो मृषेति दृष्टांतः। किंभूते यत्र तेने तेत्वं करित्वं नयति प्राप्नोति तच्छिरोधारणेनेति तेनस्तस्मिंस्तेने। डोऽत्र कर्मणि नयतेः। अत्रापि भावप्रधानो निर्देशः। ‘ते करी’ स्मृत इति सौभरिप्रोक्तनाममालायां गजमुख इत्यर्थः। कीदृशं तं स्वेनान्यत्र विद्यमानेन धाम्ना तेजसा परं सर्वोत्कृष्टम्। आदिपूज्यत्वात्सर्वदेवपराभवकर्तृत्वाच्च। आदिपूज्यत्वं तु सर्वत्र प्रसिद्धमेव। सर्वदेवपराभवकर्तृत्वं शिवपुराणे स्पष्टम्। पुनः कीदृशं सत्यं ब्रह्मरूपत्वात्। पुनः सदा नित्यं निरस्तोपास्तः कुहको विघ्नसमूहः स्तवपाठकानां येन स तथा। ‘सर्वे विघ्नाः शमं यांति गणेशस्तवपाठतः।’ इत्यभियुक्तोक्तेः। इति गणेशपक्षः॥ १॥

अथ सरस्वतीपक्षः। वयं तत्सारस्वतं धाम हृदा धीमहि। तत् किं यस्यान्वयात्संबंधात्स्वराट् दरिद्रोऽप्यभिज्ञ ईश्वरो भवति। ‘वंशानुगतिसंबंधे पदानां योजने तथा। पदार्थसंगतौ प्राप्तौ संसारे सेवनेऽन्वयः॥’ इति महीदेवः। ‘स्वराडि वनिपानखनित्रमिन्द्र’ इत्यत्र स्वराट्पदं दरिद्रपरं वक्ष्यति। अभितो ज्ञापयति नियोजयति सर्वानित्यभिज्ञः। ज्ञा नियोगेऽतो डः। सरस्वतीप्रसादादाप्तविद्यः सर्वान्स्वे स्वे कर्त्तव्ये नियोजयतीति तं पृष्ट्वैव सर्वे स्वं स्वं कार्यमारभंत इति भावः। यद्वाऽभिज्ञो नारदः स्वराट् स्वरमटति जानातीति स्वराट् स्वरज्ञानवानभूदित्यर्थः। एतच्च गर्गसंहितादावतिस्पष्टम्। यत्सारस्वतं धाम आदिकवये बृहस्पतये ब्रह्म ज्ञानं तेने। ‘ब्रह्म तत्त्वे तपोभेदे न द्वयोः पुंसि वेधसि। ऋत्विग्योगभिदोर्विप्रे’ज्ञाने वेदे च भूमनि॥’ इति मेदिनी। ‘दत्तं ते निर्मलं ज्ञानं कुमतिध्वंसकारकम्।’ इति स्कांदे बृहस्पतिं प्रति भारतीवाक्यात्। यस्मिन्ब्रह्मणि ज्ञाने सूरयः शास्त्रज्ञा अपि मुह्यंति ज्ञानस्य शास्त्रेष्वनेकधा कथनात्किं द्वैतमेव श्रेष्ठमुताद्वैतमिति निश्चयं नाधिगच्छन्ति। यत्र सारस्वतधामध्याने त्रयाणां जाड्यास्मृत्यस्फूर्त्तीनां सर्गः स्थितिर्मृषा। ‘अस्फूर्त्यस्मृतिजाड्यानि नश्यन्ति यद्विचिंतनात्। तां देवीं शारदां वन्दे सदा सुरवरार्चिताम्॥’ इत्यभियुक्तोक्तेः। यथा तेजोवारिमृदां विनिमयो विपर्यासो मरुमरीचिकादिं मृषेति। किञ्च यत्सारस्वतं धाम आद्यस्य ब्रह्मणः। ‘इः कामे कामनायां च चन्द्रे सांबादिषु तथा।’ इति कोशात् इना चन्द्रेण तीर्यत उपमीयते इतीतरं मुखं यद्वा इं चन्द्रं तरत्युल्लंघयति शोभयेतीतरं तस्मादितरतो मुखादित्यर्थः। धातूनामनेकार्थत्वात्तरतिरत्रोपमार्थः। तथा च ब्रह्ममुखादिति लब्धं जन्माप प्राप। ‘आस्याद्वागि’ति तृतीये वक्ष्यमाणत्वात्। किंभूतं धाम सदा सत्यं कालत्रये विद्यमानम्। ‘नित्यसिद्धां ब्रह्मरूपां वन्दे देवीं सरस्वतीम्।’ इति तत्स्तवोक्तेः। पुनः परं ब्रह्मादिसेव्यं ‘या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वंदिता सा मां पातु सरस्वती भगवती निःशेषजाड्यापहे’ति संहितोक्तेः। पुनः स्वेन निजेन धाम्ना प्रकाशेन अर्थेषु वाच्येषु निरस्तोऽपास्तः कुहकोऽस्फूर्तिलक्षणो येन तत्तथा। यद्वाऽर्थेषु महावाक्यार्थेषु निरस्तः कुहकोऽज्ञानरूपो येन तत्तथा। तथा च ज्ञानं दत्त्वा मोक्षं ददातीति भावः। ‘मोक्षदे मुक्तिमार्गे’ इति रुद्रयामलोक्तेः। सरस्वत्या वागधिष्ठातृदेवतात्वेन वागप्रतिहता मे भवत्विति ग्रन्थादौ तद्ध्यानमुचितमेवेति प्रतीयतेऽस्माकमत्र। इति

सरस्वतीपक्षः ॥ २ ॥ ❀ ❀ अथ सूर्यपक्षः । सूर्य एव सर्वजगतः प्रकाशकत्वाद्धितकरः । किं चास्य पुराणस्यापि 'कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः ।' इत्यग्रे वक्ष्यमाणत्वेन सूर्यरूपत्वमस्ति । तच्चान्तस्तमोनाशकत्वसाम्यात्समञ्जसम् । निखिलश्रुत्यर्थपंकजोद्बोधकत्वाद्गायत्र्यर्थवर्णकत्वाद्वा बोध्यम् । गायत्र्यामपि सूर्य एव स्तूयते । किंच गायत्रीरूपत्वकथनेन द्विजस्यैवास्याध्ययनपाठादावधिकारो न त्वत्रैवर्णिकस्येत्यपि सूचितं भवति । सूर्यस्य बहिरंतस्तमोनाशकत्वात्सशिष्यो व्यासस्तमेव ध्यायति जन्माद्यस्येत्यादिना । वयं तं सूर्यं हृदा धीमहि । तं कम् । यतः सूर्यादस्य जगतो जन्मादि भवति । 'सूर्याद्भवन्ति भूतानि सूर्येण पालितानि सूर्यं प्राप्नुवंती'ति सूर्योपनिषदि । आदित्यहृदयेपि 'यन्मण्डलं विश्वसृजं प्रसिद्धमुत्पत्तिरक्षाप्रलयप्रगल्भम् ।' इत्युक्तम् । य आदि सनातनं ब्रह्म वेदं कवये याज्ञवल्क्याय तेने अश्वरूपेण प्रकाशितवान् । एतच्च द्वादशे स्फुटीभविष्यति । यश्च तेजोवारिमृदां तेजसां वारीणां मृदां धाम्नाश्रयत्वेन इतरतः इता ज्ञाता रतिः क्रीडा यस्य स तथा प्रसिद्ध इत्यर्थः । तेजसामाश्रयत्वं तु तत्र प्रमाणानपेक्षमेव । वार्याश्रयत्वं तु 'आदित्याज्जायते वृष्टिरि'ति स्मृतेः । वक्ष्यत्यपि 'यथैव सूर्यात्प्रभवन्ति वारः पुनश्च तस्मिन्प्रविशन्ति काले ।' इति चतुर्थे । द्वादशेपि 'अपामादानविसर्गाभ्यामिमां लोकयात्रामनुवहती'ति । रविकरा एव घनाकारेण परिणता वर्षंतीति । यथा घनोर्कप्रभवोऽर्कदर्शन इति वक्ष्यमाणत्वात् । मृच्छब्देन तदुपलक्षितं जगत्तस्य धाम्ना प्रकाशकत्वेनेत्यर्थः । यद्वा मर्दयति सर्वं जगदिति मृद्धर्मराजस्तस्य धाम्ना जनकत्वेनेत्यर्थः । किंच यस्मिन्सूर्ये त्रयाणां प्रातर्मध्यसायानां सर्गो रचना मृषा । प्रातरादयः कालास्तु लोकापेक्षयैव न तु तत्र ते संतीति भावः । अर्थेष्वभिज्ञः स्वमनोरथपूर्तिकामो नायं सदाऽन्वयात् सेवते । किंच सूरयः शास्त्रतात्पर्यज्ञा ब्रह्माद्या यत् यं सदा मुह्यंति । मुह वैचित्त्ये, वैचित्त्यं मोहो ध्यानं च विशेषेण चिन्त्यते संज्ञायते ध्येयं येन तद्विचित्तं ध्यानं तस्य भावस्तथा । 'ब्रह्मेन्द्रनारायणरुद्रवन्दितः स नः सदा यच्छतु मंगलं रविरि'ति भविष्योक्तेः । यद्वा मुह्यन्ति कीर्तयन्ति धातूनामनेकार्थत्वात् । 'एवं ब्रह्मादयो देवा ऋषयश्च तपोधनाः । कीर्तयन्ति सुरश्रेष्ठ देवं नारायणं रविम् ॥' इति तत्रैवोक्तेः । किञ्च यः सूर्यो यथा यथावद्विनिमयः नितरां मीयते क्षिप्यते शरीरमनेनेति निमयो रोगसमूहः । निपूर्वेडुमिञ् प्रक्षेपणेऽप्रत्ययः साधने । विगतो निमयो यस्मात्स विनिमयः । 'आरोग्यं भास्करादिच्छेदि'ति स्मृतेः । 'वाताश्मरीदुर्नामत्वग्दोषमहोदरप्रमेहांश्च । ग्रहणीभगंदरमुखान्महारुजस्त्वमिन मंहरसी'त्यार्यास्तवोक्तेश्च । 'कुष्ठव्याधिस्तथा दद्रूरोगाश्च विविधाश्च ये । जपतस्तस्य नश्यंति भक्त्या शृणु तदर्जुन ॥' इति भविष्ये श्रीकृष्णोक्तेश्च । किंभूतं स्वेनान्यनिरपेक्षेणैव निरस्तः कुहकोन्धकारो येन स तथा तम् । किंच यः सूर्यः स्वराट् स्वयं प्रकाशः न त्वन्येन केनचित्प्रकाशितः यच्च येनेद्धः सूर्यस्तपतीति सूर्यस्तपति यद्भयादिति च श्रुतौ । 'यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमि'ति स्मृतौ चोक्तं तत्त्वाधिकारिकदेवतापरम् । अत्र तु साक्षाद् ब्रह्मरूपसूर्यो ध्येयोऽभिप्रेतः । पुनः किंभूतं सत्यं त्रैकालाबाध्यम् आत्मरूपत्वात् । 'सूर्य आत्मा जगतस्तस्थुषश्चे'ति श्रुतेः । पुनः परं सर्वोत्कृष्टं ब्रह्मादिपूज्यत्वात् । तदुक्तमादित्यहृदये 'आदित्यमर्चयेद् ब्रह्मा आदित्यमर्चयेच्छिवः ।' इति । यद्वा पाति सर्वमिति पं जलं तद्राति ददातीति परम् । 'स्वर्गोभिर्मोकुमारेभे भूम्या उन्मयं वसु ।' इति श्रीदशमे वक्ष्यमाणत्वात् । इति सूर्यपक्षः ॥ ३ ॥ अथ शिवपक्षः । शिवरूपाज्ज्ञानमहमित्यार्यास्तवोक्तेश्शिवस्य ज्ञानदातृत्वश्रुतेर्व्यासस्तं ध्यायति । वयं तं शिवं सदा हृदा धीमहि । तं कं यत्र त्रयाणां नेत्राणां सर्गो रचनाऽमृषा । यद्वा त्रयाणां ब्रह्मादीनां सर्गः प्रेरणममृषा सत्यः । 'यस्याज्ञया जगत्स्रष्टा विरिंचिः पालको हरिः । रुद्रः संहारकर्त्ता च नमस्तस्मै पिनाकिने ॥' इति स्मृतेः । 'सर्गोध्याये च निर्मोक्षे प्रेरणे सृष्टिहानयोः । स्वभावे गमने ज्ञाने हिंसनेपि च कीर्तितः ॥' इति महीदेवोक्तेः । यद्वा त्रयाणां त्रिपुरस्थदैत्यानां सर्गो हिंसनममृषा सत्यः । तेजोवारिमृदां यथाऽविनिमयः स्वभावावस्थितिरामृष्टेरमृषा च, पुनर्यस्यान्वयाद्देहादाद्यस्याग्रपूज्यस्य गणेशस्य जन्माभूत् । पार्वतीमलादुत्पत्तिर्गणेशस्य कल्पांतरविषया बोध्या । गणेशस्यादिपूज्यत्वं तु भगवदर्पितमालाधृतेरेव जातमेतच्च ब्रह्मवैवर्ते स्पष्टम् । यः शिव आदिकवये पाणिनये ब्रह्म वेदैकदेशं व्याकरणं तेने । 'येनाक्षरसमाम्नायमधिगम्य महेश्वरात् । कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥' इति स्मृतेः ॥ पाणिनये शिव एव ददाविति अंगांगिनोरभेदोपचारात् ब्रह्मैकदेशेपि ब्रह्मशब्दप्रयोगः । एकदेशत्वे मानं तु 'मुखं व्याकरणं स्मृतमि'ति स्मृतिः । यद्वा 'मुखमर्द्धं शरीरस्य सर्वं वा मुखमुच्यते ।' इति कामंदकोक्तेर्व्याकरणं वेदमुखत्वाद्वेद एवेति ध्येयम् । यः शिवः स्वराट् स्वयं प्रकाशः संगीताचार्यश्च संगीताचार्यत्वं ग्रंथांतरे स्पष्टम् । स्वयंप्रकाशत्वं तु सर्वेश्वरत्वादेवेति । यश्चेतरत इतराणां कामतरणशीलानां योगिनामर्थेषु कर्तव्ययमनियमादिष्वभिज्ञः नियोजकः इत्थं समाधिसिद्धये यमा इत्थं नियमाश्च कार्या इत्येवं प्रेरकः । ज्ञा नियोगे डप्रत्ययः । यस्मिन शिवे सूरयो भृग्वादयोपि तदाचरणनिंदनादिना मुह्यंति । एतच्चतुर्थे दक्षोपाख्याने स्फुटीभविष्यति । यद्वा यस्मिन्व्याकरणे सूरयोऽन्यशास्त्राभ्यासेन कथंचन निपुणा अपि मुह्यंति । शब्दापशब्दापरिज्ञानान् क्लिश्यंति । अत एवोक्तमभिज्ञैः 'यद्यपि बहुधाधीतं तथापि व्याकरणं पठनीयम् । शब्दोऽशब्दो मा भूत्सकलं शकलं शकृत्सकृत् ॥' इति । किंच 'वैयाकरणकिरातादपशब्दमृगाः क यांति संत्रस्ताः । नटभटगणकचिकित्सकमुखविवरगह्वराणि यदि न स्युरि'त्यप्येतदभिप्रायेणैवोक्तम् । अथ च व्याकरणाध्ययनं विनान्यशास्त्राध्ययनस्याधिकार एव न संभवति । तदुक्तं 'यो वेद वेदवदनं सदनं हि सम्यग्ब्राह्मयाः स वेदमपि वेद किमन्यशास्त्रम् । यस्मादतः प्रथममेतदधीत्य धीमाञ्शास्त्रान्तरस्य भवति श्रवणेऽधिकारी ॥' इति ॥ तथाच श्रुतिः "तस्य वाग्वधो भवती"ति श्रुतेर्व्याकरणं

विनान्यशास्त्राध्येतु र्दोषमप्याह। तस्मादादाविदमेवाध्येतव्यम्। किंच 'अनधीत्य शब्दशास्त्रं योन्यच्छास्त्रं समीहते बालः। सोऽहेः पदानि गणयति निशि तमसि जले चिरगतस्य ॥' इति। किंभूतं शिवं परं सर्वनियंतारं 'ब्रह्मादयो यत्कृतसेतुपाला' इति वक्ष्यमाणत्वात्। किंभूतं व्याकरणं परं परप्रयोजनकत्वात्सर्वशास्त्रश्रेष्ठम्। ननु किं व्याकरणप्रयोजनं तत्राह 'रक्षोहागमलघ्वसंदेहाः प्रयोजनमि'ति भाष्यम्। रक्षार्थं वेदानामध्येयं व्याकरणं लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यतीति, ऊहः खल्वपि न सर्वैर्लिंगैर्न च सर्वाभिर्विभक्तिभिर्वेदे मंत्रा निगदितास्ते चावश्यं यज्ञगतेन यथायथं विपरिणमयितव्याः, तान्नावैयाकरणः शक्नोति विपरिणमयितुं तस्मादध्येयं व्याकरणम्। आगमः खल्वपि 'ब्राह्मणेन निष्कारणो धर्मः 'षडंगो वेदोध्येयो ज्ञेयश्चे'ति। प्रधानं च षडंगेषु व्याकरणं प्रधाने च कृतो यत्नः फलवान्भवति। लघ्वर्थं चाध्येयं व्याकरणं ब्राह्मणेनावश्यं शब्दा ज्ञेया इति। न चांतरेण व्याकरणं लघुनोपायेन शब्दाः शक्या विज्ञातुम्। असंदेहार्थं चाध्येयं व्याकरणं याज्ञिकाः पठंति 'स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेते'ति। तस्यां संदेहः स्थूला चासौ पृषती च स्थूलानि वा पृषंति यस्याः सेयं स्थूलपृषतीति। तन्नावैयाकरणः स्वरतोध्यवस्यति, यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिरथांतोदात्तत्वं ततस्तत्पुरुष इति भाष्यम्। यद्वा किंभूतं व्याकरणं परं सर्वोत्कृष्टपुरुषार्थचतुष्टयापादकत्वात्। यथाहि निष्कारणो धर्मः षडंगो वेदोध्येयो ज्ञेयश्चेत्यध्ययनविधिर्व्याकरणाध्ययनतां गमयति सांगवेदाध्ययनपरोयं नित्यो धर्मः संध्योपासनादिवदित्यर्थः। षट्स्वंगेषु प्रधानं व्याकरणं पदपदार्थज्ञानस्य व्याकरणमूलत्वात्। वाक्यार्थज्ञानस्य च तद्धेतुकत्वादिति धर्मसाधनता। अथार्थसाधनतामाह। 'यो वा इमां पदशः स्वरशो वाचं विदधाति स आर्त्विजीनो भवति।' इति बोधयति श्रुतिर्याजने यजने च विदुष एवाधिकारम्। 'षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका। याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥' इति स्मृतिश्च। अध्यापनं ब्राह्मणस्य वृत्तिः तन्निर्वाहश्च शब्दज्ञानाधीनः न ह्यशब्दज्ञं शिष्याः समुपगच्छंतीति शब्दज्ञानं व्याकरणं विना लघुनोपायेन न संभवति शब्दानामानंत्यात्। प्रतिपदपाठस्याशक्यत्वात्। अथ कामसाधनतामाह 'एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवती'ति कामसाधनतां बोधयति। साधुशब्दप्रयोगस्य स्वर्गहेतुतावगमात्। अथ मोक्षसाधनतामाह 'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छती'ति श्रुतिः। किंच 'तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते। तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ॥' इति। किंच ध्वनिविशेषावच्छिन्नं ब्रह्मशब्दवाचकं व्यक्तिविशेषावच्छिन्नं ब्रह्मशब्दवाच्यमिति। एवं सति वेदांतेन सह सिद्धांतैक्यान्मोक्षहेतुत्वं स्फुटमेवेत्यलमतिप्रसंगेन। किंच वेदांगत्वादस्याध्ययने द्विजेतरानधिकार एव। पुनः स्वेन धाम्ना प्रकाशेन निरस्तः कुहकोऽपशब्दोच्चारणरूपो येन तत्तथा वाक्छुद्ध्यापादकमित्यर्थः। शिवपक्षे निरस्तोऽपास्तः कुहकोऽघलक्षणः स्वनामोच्चारकाणां येन तम्। 'यद्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसंगादघमाशु हन्ति।' तदिति वक्ष्यमाणत्वात्। यद्वा निरस्ताः कुहका वृकांधकप्रभृतिदैत्या येन तम्। पुनः सत्यं कालत्रयेप्येकरसम्। 'देवाह वै रुद्रमपृच्छन् को भवानिति सोऽब्रवीदहमेकः प्रथममासीत् वर्त्तामि च भविष्यामि च।' इति श्रुतेः। द्वितीयपक्षे सत्यं शब्दसत्यत्वापादकम्। 'उपायाः शिक्षमाणानां बालानामुपलालना। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ॥' इति भाष्योक्तेरिति। ननु किं नाम व्याकरणत्वं, शब्दान्वाख्यापकत्वे सति व्याख्याविशिष्टसूत्रवार्तिकभाष्याद्यन्यतमत्वं व्याकरणत्वम्। केवलविशेषणोपादाने कोशादावतिव्याप्तिस्तेषामपि शब्दान्वाख्यापकत्वात्। केवलविशेष्योपादाने सूत्रादीनां तत्स्याच्छब्दानां तन्न स्यादत उभयोपादानं सूत्रवार्तिकभाष्याद्यन्यतमत्वं तत्त्वमित्युक्ते शेखरादिग्रंथानां व्याकरणत्वं न स्यादतो व्याख्याविशिष्टेति विशेषणम्। सूत्रत्वं च 'अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम्। अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥' सारवदिति सिद्धांतरूपमात्रस्याभिधायकम्, विश्वतोमुखं ज्ञापनीयनिपातनीयानेकार्थसूचकम्, अस्तोभमपरिचितार्थपदरहितम्। अनवद्यमप्राकरणिकत्वदुर्बोधत्वाविकलत्वविसंधिकत्वादिदोषरहितमिति। वार्तिकत्वम् 'उक्तानुक्तद्विरुक्तानां विचारो यत्रनिबंधनम्। हेतुभिर्यत्प्रमाणं स्यादेतद्वार्तिकमुच्यते ॥' यद्वा वृत्तिकारेण कृतं वार्तिकं वृत्तिश्च स्फुटत्वेन सूत्रस्थपदविवरणम्। भाष्यत्वं च 'सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुकारिभिः। स्वपदानि च वर्ण्यंते भाष्यं भाष्यविदो विदुः ॥' इति शिवपक्षः ॥ ४ ॥ अथ दुर्गापक्षमग्रे व्याख्यास्यामः ॥

अथ गुरुपक्षमाह। वयं तं गुरुं सदा हृदा धीमहि। तं कम्। यतो यस्य गुरोरन्वयात्सेवनादर्थेषु धर्मादिचतुष्केषु सर्वपदवाच्येषु वाऽभिज्ञो भवति। 'चतुर्वर्गपरिज्ञानं शब्दार्थज्ञानमेव वा। गुरुसेवनतो नृणां भवेदेव न संशयः ॥' इति स्मरणात्। 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैतेऽकथिता ह्यर्थाः प्रकाशंते महात्मनः ॥' इति श्वेताश्वतरोक्तेश्च। किंच यत्र गुरौ त्रयाणां ब्रह्मविष्णुरुद्राणां सर्गोऽमृषा। 'गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः।' इति स्मृतेः। कथं यथाऽत्रिनिमयो वस्तुनः स्वाभाविकरूपममृषा। यश्च गुरुः तेजोवारिमृदामेतदुपलक्षितदेहानामागस्य निदानस्य कर्मविशेषस्य परं कारणं कर्तारमर्थाज्जीवं प्रति ब्रह्म ज्ञानं तेने। 'अखंडमंडलाकारं व्याप्तं येन चराचरम्। तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥'

१. षडंगानि च–'शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणम्। छंदसां लक्षणं चैव षडंगो वेद उच्यते ॥' इति।

इति मंत्रात्। यश्चेतरत इतरेभ्यो धनान्नदात्रादिभ्यः स्वराट् प्रबलतरः धनान्नादिनैहिकसुखमेव सिध्यति यच्च धनाद्धर्मकरणेनाऽन्नदानेनोत्पद्यते पुण्यं तदपि स्वर्गादिफलं दत्वोपक्षीणप्रायमेव। गुरुश्च मंत्रशास्त्रोपदेशादिनैहिकं कारयित्वा पारलौकिकमपि करोति। 'भुक्त्वा भोगानैहिकांश्च देहांते परमं पदम्। प्राप्नोति नात्र संदेहो गुरुभक्त्या नरोत्तम ॥' इत्यादिपुराणात्। 'चिंतामणिर्लोकसुखं सुरद्रुः स्वर्गसंपदम्। प्रयच्छति गुरुः प्रीतो वैकुंठं योगिदुर्लभम् ॥' इति पाद्माच्च। 'सत्कीर्त्तिर्विमलं यशः सुकविता पांडित्यमारोग्यता वादे वाक्पटुता कुले चतुरता गांभीर्यमक्षोभिता। प्रागल्भ्यं प्रभुता विधौ निपुणता यस्य प्रसादेन वै तं वंदे शिवरूपिणं निजगुरुं सर्वार्थसिद्धिप्रदम् ॥' इति निरुत्तरतंत्राच्च। यद्वा इतरतो देवादिभ्यः स्वराट्। तदुक्तं निरुत्तरे 'लोकेशो हरिरम्बिका स्मरहरो मातापिताभ्यागतः स्वाचार्यः कुलपूजितो यतिवरो वृद्धस्तथा भिक्षुकः। नैते यस्य तुलां व्रजन्ति कलया कारुण्यवारांनिधेस्तं वन्दे शिवरूपिणं निजगुरुं सर्वार्थसिद्धिप्रदम् ॥' इति। 'हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन। तस्मात्सर्वप्रयत्नेन गुरुमेव प्रसादयेत् ॥' इति ग्रन्थांतराच्च। च पुनर्यस्य गुरोरन्वयात्सम्बन्धात्स्वेन 'स्वः स्वकीये धनेपि चे'ति कोशात् स्वीयेनार्थाच्छिष्येण निरस्तं विवेकित्यक्तं शास्त्रं दृष्ट्वा कुहकमज्ञानलक्षणमादि नाश्यते स्म। अत्रादिर्भक्षणार्थोपि नाशपरो ज्ञेयः। अत्तेर्ण्यंतात्कर्मणि चिण्। यस्मिन् गुरौ सूरयोपि शास्त्रसम्पन्ना अपि मुह्यन्ति मनुष्योयमिति कदाचिद् भ्रमन्ति। गुरौ मनुष्यबुद्धिर्भ्रम एव। तदुक्तं 'यो गुरुः स हरिस्साक्षाद् भ्रान्ताः पश्यन्ति तं नरम्।' इति पुराणात्। किञ्च 'यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ। मर्त्यासद्धीः श्रुतं तस्य सर्वं कुञ्जरशौचवत् ॥' इति वक्ष्यत्यपि। कस्मै कवये कवित्वाय। भावप्रधानो निर्देशः। गुरुसेवया कवित्वलाभः प्रथित एव। 'सत्कीर्त्तिर्विमलं यशः सुकविते'ति पूर्वमुक्तत्वात्। किंभूतं गुरुं धाम्ना तेजसा सत्यं ब्रह्मरूपम्। 'सत्यं ब्रह्मयथार्थयोरि'ति कोशांतरात्। 'आदित्यवर्णं तमसः परस्तादि'ति श्रुतेः 'तेजोराशिं सर्वतो दीप्तिमन्तमि'ति स्मृतेश्च तेजोरूपत्वम्। ब्रह्मणः गुरुश्च ब्रह्माभिन्न एव। 'आचार्यं मां विजानीयादि'ति वक्ष्यमाणत्वात्। गुरुरेव परं ब्रह्मेत्युक्तत्वाच्च। गुरुलक्षणं तु 'संसारतापविस्तारकारणार्थप्रबोधकः। गुरुर्लोके स विज्ञेयो नान्यश्चातुर्यबोधकः ॥' इति। ब्रह्मवैवर्त्ते तु 'यस्यास्याद्यस्य विशति मनुः श्रोत्रं द्विजोत्तम। स एव तद्गुरुर्ज्ञेयो न मालादिप्रदो गुरुः ॥' इत्युक्तम्। वस्तुतस्तु गृणाति तत्त्वमिति गुरुः। तत्त्वं तु 'वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्। ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥' इत्युक्तलक्षणं ब्रह्मैव। यद्वा आचार्योपि गुरुर्मुख्य एव तं धीमहीति योज्यम्। यद्वा यो गुरुरितरतः पित्रादिभ्यः स्वराट् श्रेष्ठः। तदुक्तमापस्तम्बेन 'आचार्यः श्रेष्ठो गुरूणां स हि विद्यातस्तं जनयति तच्छ्रेष्ठं जन्म शरीरमेव मातापितरौ जनयतः शीर्यत्स्वभावं सर्वयोनिसुलभं प्राकृतं मलजं शरीरमि'ति तल्लक्षणात्। आचार्यलक्षणं त्वागमे 'स्वयमाचरते शिष्यानाचारे स्थापयेच्च यत्। आचिनोति च शास्त्रार्थमाचार्यस्तेन कथ्यते ॥' स्मृतौ तु 'उपनीय तु यः शिष्यान्वेदमध्यापयेद् द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥' इत्युक्तम्। यद्वा ज्ञानदो गुरुरत्र ध्येयः। ज्ञानं तु महावाक्यार्थविचारादेव जायते। गिरति तत्त्वोपदेशेन संसारमिति गुरुः। 'गिरति ह द्विषंतं पाप्मानमि'ति श्रुतेः। महावाक्यार्थविचारस्तु पदार्थविचारमृते न सम्भवति, पदपदार्थज्ञानं तु शास्त्रोपदेष्टृगुरुत एव जायतेऽतः स एव सर्वगुरुषु मुख्योतस्तमेव धीमहीति सम्बन्धः। सदा धीमहीत्यत्र गुरुमूर्त्तेः सदा ध्यानमित्यत्र स्मृतौ च ध्यानमुपलक्षणमर्चनादेरिति ध्येयम्। सदा ध्यानार्चनाद्यभावे तूत्सवाद्यवसरे तदभावे प्रतिवर्षमाषाढ्यां पूर्णिमायां त्ववश्यमेव गुर्वर्चनं विधेयमन्यथा तु महापापी स्यात्। तदुक्तं गाधिजसंहितायाम् 'सदा सेव्याः सदा सेव्या गुरवो नृभिरन्यथा। उत्सवेषु विशेषेण तदभावे द्विजोत्तम ॥ आषाढ्यां पूर्णिमायां तु प्रतिवर्षं सुखाप्तये। गुरूणामर्चनं कार्यं संवत्सरकृतं शुभम् ॥ अन्यथा निष्फलं याति महापापी स जायते।' इति गुरुपक्षः ॥ ५ ॥

अथ च 'आचार्यत्वं त्वाद्यवर्णे मया संस्थापितं धरे।' इति धरां प्रति श्रीवाराहोक्तेः। 'बालयोरनयोर्नॄणां जन्मना ब्राह्मणो गुरुः।' इति गर्गं प्रति नन्दराजोक्तेश्च ब्राह्मण एव गुरुः कार्यो नान्यवर्ण इत्यतो ब्राह्मणपक्षे श्लोकं योजयति। वयं तं ब्राह्मणसंघं सदा धीमहि। यतो यस्य ब्राह्मणसंघस्यान्वयात्सेवनात्। इह षष्ठ्यर्थे तसिः। जन्मात्ति तिरस्करोतीति जन्माद्यं ज्ञानम्। ऋते ज्ञानान्न मुक्तिरिति श्रुतेः। इह जन्मोपपदादत्ते 'मदिर्ये' इति यप्रत्ययः। 'वंशे पश्चाद्गतौ प्रोक्तः पदानां योजने तथा। पदार्थसंगतौ प्राप्तौ संसारे सेवनेऽन्वयः ॥' इत्यनुशासनात्। तस्य जन्माद्यस्य ज्ञानस्य तद्रूपस्य ब्रह्मणो वा तत्प्रतिपादकशास्त्रस्याभिज्ञो ज्ञाता भवति ज्ञानी भवतीति भावः। पुमानिति शेषः। नहि ज्ञानिनो जन्मादिरूपः संसारो भवति, तस्य तु भगवद्रूपतैव जायते। 'ज्ञानी त्वात्मैव मे मतम्' इति श्रीमुखोक्तेः। ब्राह्मणसेवया ज्ञानं लभते। इह प्रमाणं तु 'पुमाल्लँभेतानतिवेलमात्मनः प्रसीदतोत्यंतशमं स्वतः स्वयम्। यन्नित्यसम्बन्धनिषेवये'ति पृथूक्तिरेव। यश्च सग इतरत इतरेषु क्षत्रियादिषु स्वराट् स्वयमेव राजत इत्यर्थः। इह सप्तम्यर्थे तसिः। ननु क्षत्रियादिकृतप्रकाशः। क्षत्रियादयस्तु ब्राह्मणानुकंपयैव राजन्ते। "स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च। तस्यैवानुग्रहेणान्ये भुंजते क्षत्रियादयः ॥" इति मनुस्मृतेः। चतुर्थं पृथूक्तेश्च। यश्च ब्राह्मणसंघः तेजोवारिमृदां कोर्थः त्रिवृत्करणश्रुतेरेतन्निर्मितब्रह्माण्डस्य विनिं रचनां यथा यथावत्तेन विस्तारितवान्। 'विनिः स्याद्रचनायां स्त्री प्रापके ना गुरौ हरौ' इति कौशिकः। कारणे कार्यप्रयोगस्तु 'गोभिः श्रीणीत मत्सरमि'तिवद्बोध्यम्। विस्तृतं चैतदधिकरणमालादौ। प्रमाणं चात्र 'येरिदं तपसा सृष्टमि'ति नवमे वाक्यम्। यश्च

संघोर्थेषु धर्मार्थकाममोक्षेषु अयः शुभावहः। 'अयः शुभावहो विधिरि'त्यमरः। "विप्रा धर्मप्रदा लोके त एवार्थप्रदा मताः। कामदा मोक्षदा देव सर्वपूज्याः शुभावहाः॥' इत्यादिपुराणात्। यत्र त्रयाणां सन्ध्याविधीनां सर्गः करणममृषा सत्यः त्रिकालं सन्ध्यावन्दनकर्तृत्वात्। 'दशधेनुसमाः सन्ध्या विप्रास्तिस्र उपासते' इति वात्स्योक्तेः। यद्वा त्रयाणां ब्रह्मविष्णुरुद्राणां सर्गः स्थितिरमृषा। 'ब्रह्मा विष्णुरहं देवि तिष्ठामो विप्रविग्रहे' इति स्कांदात्। यद्वा त्रयाणां कामक्रोधलोभानां सर्गो मृषा वस्तुतो यत्र नास्ति उपाधिसम्बन्धं विना सात्त्विकस्वभावत्वादिति कदाचित्तदाविर्भाव उपाधित एव। 'उष्णत्वमर्कातपसंनियोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य।' इति न्यायात्। यद्वा त्रयाणां ब्रह्मादीनां सर्ग ऐक्यनिश्चयोऽमृषा। "ब्रह्मा विष्णुः शिवश्चेति सर्गस्थित्यन्तकारिणः। एषु भेदं न कुर्वन्ति वेदज्ञा ब्राह्मणाः प्रिये॥" इति स्कान्दे। किञ्च 'न ते मय्यच्युते ते च भिदामण्वपि चक्षते।' इति द्वादशे शिवो मार्कण्डेयं प्रति वक्ष्यति। 'सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषि'त्यमरः। किञ्च यत्संघः ब्रह्महृदायः ब्रह्मणो वेदस्य हृदभिप्रायमासमंतादयते जानातीति ब्रह्महृदायः 'ब्रह्म ज्ञाने तथा वेदे' इति विश्वः। 'स्वांते स्तेने हृदौ रम्येऽभिप्राये च हृदुच्यते।' इति धरणिः। अयतेः पचाद्यच्। 'रहस्यं नैगमं विप्रा जानंत्येव न चेतराः। तदर्थस्य विमर्शे तु यतो लग्ना दिवानिशम्॥' इत्यभियुक्तोक्तेः। यस्मिन्वेदे सूरयो ब्रह्मादयोऽपि मुह्यन्ति यथावत्तत्तात्पर्यं न जानंति। 'वेदस्य चेश्वरात्मत्वात्तत्र मुह्यंति सूरयः।' इत्येकादशे वक्ष्यमाणत्वात्। किंच 'शब्दब्रह्म सुदुर्बोधं प्राणेंद्रियमनोमयम्। अनन्तपारमक्षोभ्यं दुर्विगाह्यं समुद्रवत्॥' इत्यारभ्य यावदध्यायसमाप्ति वेदस्य दुर्ज्ञेयतैवोद्भवायोक्तेति। कस्मै आदिकवये सनातनकवित्वाय गद्यपद्यरचनालाभायेति यावत्। निर्देशोऽत्र भावमयः। ब्राह्मणसेवनेन कवित्वलाभस्तु 'मोक्षं कवित्वं च लभेद्द्विजार्चया भोगान्यशःपुत्रधनादिसौख्यम्। विप्रार्चनादेव भवंति देहिनामतः सदार्च्या नृपते द्विजोत्तमाः॥' इत्यादिपुराणादवसीयते। यद्वा यस्मिन् विप्रसंघे सूरयः शास्त्राभ्यासेन कथंचिद्विद्वांसोऽप्यन्ये नास्तिककापालिकादयो मुह्यंति। शास्त्रे श्रूयमाणं विप्रमहत्त्वप्रतिपादकवाक्यजातम् 'अव्यक्तरूपिणो विष्णोः स्वरूपं ब्राह्मणा भुवि।' इति 'न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजम्।' इति च। 'इयं ब्राह्मणनौ राजन्विपरीता भवार्णवे। तरंत्यधो गता यस्यां मज्जंत्युपरिवर्तिनः॥' इति च। 'मज्जंश्च सर्वतीर्थानि पूजयन् सर्वदेवताः। पठंश्च सर्वशास्त्राणि नाविप्रः पूज्यतां व्रजेत्॥ असंयतो द्विजः पूज्यो न च शूद्रो जितेंद्रियः। को दुष्टांगां परित्यज्य दुह्याच्छीलवतीं खरीम्॥' इत्याद्यनेकत्र पठितमर्थवादत्वेन मन्यंत इत्यर्थः। किंभूतं स्वेनासाधारणेन धाम्ना तपआदिजन्येन तेजसा निरस्तं कुहकं दर्शनादिकर्तॄणां पापादि येन तम्। 'धाम स्याद् गृहतेजसोरि'ति। 'कुहकः कपटे पापे दुःखेऽज्ञानेऽशुभे द्वयोरि'ति च विश्वः। 'श्रवणाद्दर्शनाद्वापि महापातकिनोपि वः। शुध्येरन्नंत्यजाश्चापि किमु सम्भाषणादिभिः॥' इति मार्कण्डेयं शिवो द्वादशे वक्ष्यति। पुनः सत्यं सत्यस्वरूपं मोक्षोपयोगित्वात्। 'भूत्वा द्विजवरस्त्वं वै मामुपैष्यसि केवलम्।' इति मुचुकुन्दं प्रति श्रीमुखोक्तेः। 'त्रैवर्ग्यार्थो यतो नित्यं कृतान्तभयसंयुते।' इत्यादिवाक्यैर्मोक्षस्यैव सत्यतावसीयते। पुनः परं सर्वदेवोपास्यत्वादुत्कृष्टतमम्। 'ब्राह्मणाः साधवः शान्ता निःसङ्गा भूतवत्सलाः। एकान्तभक्ता अस्मासु निर्वैराः समदर्शिनः॥ सलोका लोकपालास्तान्वंदंत्यर्चंत्युपासते। अहं च भगवान् ब्रह्मा स्वयं च हरिरीश्वरः॥' किञ्च 'विप्रान्स्वलाभसन्तुष्टान्नमस्ये शिरसासकृत्।' इति रुक्मिण्युपाख्याने श्रीकृष्णः। 'स मत्परोहं द्विजदेवदेव' इति पञ्चमे ऋषभः। 'ब्रह्मण्यस्य परं दैवं ब्राह्मणाः किल मे विभो।' इति सनकादीन्प्रति विष्णुः। 'नन्वस्य ब्राह्मणा राजन्कृष्णस्य परमात्मनः। पुनन्तः पादरजसा त्रिलोकीदैवतं महत्॥' इति युधिष्ठिरं नारदः। अन्यान्यपि बहूनि वाक्यानि सर्वत्रेतिहासपुराणादौ सन्ति। किञ्च 'ब्रह्म ब्राह्मण आत्मने'ति श्रुतिरपि ब्राह्मणमहत्त्वं प्रतिपादयति। इति ब्राह्मणपक्षः॥ ६॥

अथ कर्मकर्तृनिरूपणानन्तरं कर्मपक्षे श्लोकं योजयति। अथ यत्कर्मवशादनेकप्रबन्धरचनां कुर्वाणोऽद्यापि सन्तोषपदं नागतोहं निखिलजगन्नाटनपटुतरं तत्कर्म शास्त्रारम्भे स्तौमि जन्माद्यस्येति। वयं तत्कर्म हृदा मनसा सदा धीमहि। परं तत्पदादर्शनेपि यत्पदर्शनात्तल्लाभो यत्तदोर्नित्यसम्बन्धत्वात्। तदुक्तं 'यत्पदन्तत्पदादेव ह्युपतिष्ठेत सर्वदा। तत्पदं यत्पदादेव ते सदैवान्विते मिथः॥' इति तत्किं। यतः कर्मणोस्य पुरुषस्य जन्मादि। तदुक्तं 'कर्मणा जायते जन्तुः कर्मणैव हि लीयते।' इति। किंभूतस्यास्य अनु अनु अयते प्राप्नोति जीवानित्यन्वयः संसारः स चासावादिश्चेत्यन्वयादिस्तस्मिन्ननादिसंसारे तरति प्लवनं करोतीत्यन्वयादितरस्तस्य तथा। इह षष्ठ्यर्थे तसिः "सर्वविभक्तिभ्यस्तसिः" इति पाणिन्यनुशासनात्। 'संसारे सेवनेन्वय' इति कोशः पूर्वमुक्त एव। प्लवनं च मनुष्यो भूत्वा कश्चित्तुरङ्गो भवति तद्भूत्वा पशुपक्ष्यादिर्भवति यथा मण्डूका जले वानराश्च वृक्षाद्वृक्षेषु प्लवनं कुर्वन्ति तथा जीवो योनौ योनाविति। किञ्च यतः येन कर्मणैवान्तःकरणशुद्धिद्वाराऽर्थेषु तत्त्वमस्यादिमहावाक्यार्थेष्वभिज्ञो ज्ञानवान्सन स्वराट् परमात्मैव भवति। 'सर्वं वाक्यं सावधारणमि'ति न्यायादेवकारोऽत्र बोध्यः। चशब्दो यत इत्यस्य पौनःपुन्यद्योतनार्थः। 'ब्रह्मविद् ब्रह्मैव भवती'ति श्रुतेः। स्वराडेव भवति स्वेनेन्द्रियाद्यनपेक्षत्वेन राजते प्रकाशत इति। तथाच स्वप्रकाशो भवति। 'चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमि'त्यादिश्रुतेः। किञ्च यत्कर्म कवये जीवायादि सनातनमर्थादनेकजन्मसम्भवं ब्रह्म ज्ञानं तेने। गर्भ इति शेषः। एतत्तृतीयस्कन्धे स्फुटीभविष्यति। "काव्यकर्त्रसुराचार्यजीवदेवगुरुष्वपि। विवेकिनि जलचरे कविर्ब्रह्मनिरामयोः॥" इति व्याडिः। यद्यस्मिन्कर्मणि सूरयः कवयोऽपि मुह्यन्ति। 'कि

कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः' इति श्रीमुखोक्तेः। वक्ष्यत्यप्येकादशे "कर्माकर्मविकर्मेति वेदवादो न लौकिकः। वेदस्य चेश्वरात्मत्वात्तत्र मुह्यन्ति सूरयः॥" इति। यत्र यस्मिन्कर्मणि सति त्रयाणां ब्रह्मविष्णुरुद्राणां सर्गः कार्यविशेष उत्पत्तिस्थिति-लयरूपोऽमृषा सत्यः। यतः कर्मणि सत्येवोत्पद्यते स्थीयते लीयते चातस्तत्सत्तायामेव तत्सत्तेति। कथं यथा तेजोवारिमृदां विनिमयो व्यत्यासोऽसदप्यधिष्ठानसत्तया सद्वत्प्रतीयते। तथायमपि तेजसो विनिमयो रविकरजाले वारिबुद्धिः वारिमृदोर्विनि-मयस्तु मयकृतसदसि दुर्योधनेनानुभूतः। तच्च भारते सभापर्वणि स्फुटम्। किंभूतं कर्म सत्यं कार्यदर्शनात्। कार्यं सद्बुद्धेरतोपः। पुनः किंभूतं स्वेन निजेन धाम्ना आश्रयेण भगवता परं शुद्धम्। कर्मणां तस्मिन्समर्पणात्स एवाश्रयः। एतच्च 'यद्ददासि यदश्नासी'-त्यादिना भगवतैवार्जुनायोपदिष्टम्। शुद्धिरपि कर्मणो भगवत्यर्पणादेव। कर्मशुद्धिर्मदर्पणमित्येकादशे श्रीमुखोक्तेः। अत एव निरस्तकुहकमिति हेतुगर्भितं विशेषणम्। निरस्तो दूरीभूतः कुहको बन्धप्रदत्वसामर्थ्यलक्षणो यस्य तत्तथा। पूर्वं बन्धप्रदमपि ब्रह्मणि समर्पितं कर्म बन्धनाशकं भवति। तद्वक्ष्यति "एतत्संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम्। यदीश्वरे भगवति कर्म ब्रह्मणि भावितम्॥ आमयो येन भूतानां जायते यश्च सुव्रत। तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितम्॥ एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः। त एवात्मविनाशाय कल्पन्ते कल्पिताः परे॥' इति कर्मपक्षः॥ ७॥

कर्मवशादेव सत्संगो भवतीति सत्संगपक्षमाह। वयं तं सत्संगं हृदा धीमहि। तं कं यतो यस्य सत्संगस्यान्वयात्प्राप्तेः आद्यस्य वेदप्रोक्तज्ञानस्य इतरतो लौकिकज्ञानस्य च जन्म भवति। इति 'आद्यो वेदश्च निगमः श्रुतिः सर्वार्थसम्भवः। स्वयंभूश्च हरिप्राणो ह्यनादिर्ब्रह्मब्राह्मणौ॥ द्विजाध्येया आदिशास्त्रं द्विजत्वापादको गुरुरि'ति बह्वर्थचिन्तामणौ। वेदस्याद्यत्वात्तत्प्रतिपादित-ज्ञानस्य सुतरामाद्यत्वमिति। 'लौकिकं वैदिकं चार्थज्ञानं सत्सङ्गतो नृणामि'त्यभियुक्तोक्तेः। सत्संग एव सर्वबोधहेतुरिति भावः। 'संसारे सेवनेऽन्वय' इति महीदेवः। च पुनः यतः सत्संगादर्थेषु धर्मादिसदुक्तश्रुत्यर्थेष्वभिज्ञो भवति। 'सर्वेषामर्थज्ञानानां बोधः सत्संगतो भवेत्।' इति स्मरणात्। यः सत्संगः स्वेनैव राजते धीजाड्यापाकरणमानप्रदानादिष्विति स्वराट्। तदुक्तं भर्तृहरिणा 'जाड्यं धियो हरति सिञ्चति वाचि सत्यं मानोन्नतिं दिशति पापमपाकरोति। चेतः प्रसादयति दिक्षु तनोति कीर्तिं सत्संगतिः कथय किं न करोति पुंसाम्॥' इति। यश्च सत्संगः आदिकवये वाल्मीकये ब्रह्म तत्त्वं तेने। वाल्मीकेस्तु प्राग्भवे सप्तर्षीणां संगो वने जातस्तैश्च विपरीतं रामेति तत्त्वं तस्मै प्रोक्तमित्यध्यात्मरामायणे प्रसिद्धम्। भृगुगोत्रोत्पन्नसुमतिशर्मणः पुत्रो हि पितृशर्मा स्वपितृभ्यां दुर्भिक्षे वनान्तरं गतो दस्युभिर्मिलितो भूयसा कालेन नष्टगोत्रादिस्मृतिर्दस्युधर्मा सप्तर्षिहनने प्रवृत्तस्तैर्बोधितस्तद्धर्मं त्यक्त्वा जपनिष्ठोभूत्तत्र तच्छरीरे वल्मीकोभूत्पुनः कदाचित्तत्रागतैस्तद्ध्वनिं श्रुत्वा सप्तर्षिभिरस्य निष्कास्य वाल्मीकिनाम्नाहूतस्तद्वरेण वाल्मीकीयाख्यं काव्यं चकारेति स्कांदीयावन्तीखण्डे वाल्मीकेश्वरमाहात्म्ये च प्रसिद्धतरम्। 'जाते जगति वाल्मीके कविरित्यभवत्पदम्। कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि॥' इति प्रबन्धोक्तेरादिकविर्वाल्मीकि-रेवेति यद्यस्मिंस्तत्त्वे सूरयोऽपि मुह्यन्ति। यद्वा यत्रेषु धर्मादिषु सूरयो मुह्यन्ति 'धर्मार्थकाममोक्षाश्च इति वर्गचतुष्टयम्। दुःशकं ज्ञानमेतस्य तत्र मुह्यन्ति सूरयः॥' इति वाक्यात्। तत्त्वे सूरिमोहस्त्वेकादशे सनकादिप्रश्ने ब्रह्मणो मोहदर्शनादवसीयत एव। तद्वृत्तं विस्तरभियेह नोक्तम्। यत्र सत्संगे सति त्रयाणां कामक्रोधलोभानां सर्गो मृषा कामसर्गः। 'कामकारणमेवेह शोकमोहाश्रमस्य हि। निर्लज्जता निर्भयता कामेन क्रियते क्षणात्॥' इति संहितोक्तेः शोकादिरूपः। यद्वा धर्मकर्तनादिरूपः। तदुक्तं "यो धर्मद्रुमकर्तनाय कठिनः स्फीतः कुठारः कृतो यश्चार्थोच्चयशुष्कदारुदहने विश्वांतवैश्वानरः। योऽयं मुक्तिमृगी-विहिंसनविधौ शार्दूलवत्क्रीडति तेनालं मदनेन वै कुरुत रे कृष्णे सतृष्णं मनः॥" इति ग्रन्थान्तरोक्तेः। क्रोधसर्गस्तु दुर्बोधादि-रूपस्तदुक्तं "दुर्बोधमूलमधिकं लघुतैकमूलं शूलं निजस्य शिरसः परिपीडनेन। दुर्दैवकेन बत केन कृतः किलैष रोषज्वरो जडधियः स्वकृतो हि दोषः॥" इति। लोभसर्गस्तु दृष्टश्रुतपदार्थेषु तृष्णाधिक्यमिदं मे भूयादिदं मे भूयादित्येवंरूपः। अयं त्रिसर्गस्सत्संगेन नश्यतीति। तदुक्तं 'यश्चेह श्रूयते लोके प्रपञ्चः क्रोधकामयोः। लोभस्य च स हीयेत सत्संगे सति निश्चितम्॥' कथं मृषा भवति यथा तेजोवारिमृदां विनिमयो यथार्थज्ञानेनेति भावः। किंभूतं सत्संगं सत्यं सत्यस्वरूपं ब्रह्म वशीकरणशीलत्वात्। तच्चैकादशे वक्ष्यति 'न रोधयति मां सांख्यं न योगो धर्म एव च। न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा॥ यथावरुन्धे सत्संगः सर्वसंगापहो हि माम्। सत्संगेन हि दैतेया यातुधानाः खगा मृगाः॥" इत्यारभ्य 'सत्सगान्मामु-पागता' इत्यन्तेन। पुनः परमुत्कृष्टमन्येषां तदपेक्षया निकृष्टत्वात्। तद्वक्ष्यति 'तुलयाम लवेनापि न स्वर्गं नापुनर्भवम्। भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः॥' इति। किञ्च संसारान्ते भवनशीलत्वाद्भगवद्भक्तिजनकत्वाद्वा परम्। तदुक्तं श्रीदशमे मुचुकुन्देन 'भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युतसत्समागमः। सत्संगमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिः॥' इति। परपुण्यप्राप्यत्वाद्वा परम्। तदुक्तं 'गंगेवाघविनाशिनी जनमनःसन्तोषसच्चन्द्रिका तीक्ष्णांशोरुचिरप्रभेव जगदज्ञानान्धकारापहा। छायेवातुरतापनाशनकरी स्वर्धेनुवत्कामदा पुण्यैरेव हि लभ्यते सुकृतिभिः कैरेव सत्संगतिः॥' इति। पुनः किंभूतं निरस्तोऽपास्तः कुहकोऽविवेकलक्षणो येन तं 'अविवेकः परः शत्रुः सत्संगेनैव शाम्यती'त्युक्तेः। इति सत्संगपक्षः॥ ८॥

सत्सङ्गादेव तीर्थयात्रादौ रुचिरुत्पद्यतेऽतस्सर्वतीर्थोत्तमं श्रीगंगाप्रवाहं ध्यायति। 'गंगायाः सेवनं राजन्नन्तः क्लेशं हरेद् ध्रुवम्।' इत्युक्तेरन्तः क्लेशनाशकत्वाद्वा तं ध्यायति व्यासः जन्माद्यस्येति। वयं तं श्रीगंगाप्रवाहं सदा धीमहि। तं कं यत्र त्रयाणां स्वर्गमर्त्यपाताललोकानां सर्गो निर्मोक्षो मुक्तिरमृषा। 'सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु' त्यमरः। 'मन्दाकिनी स्वर्गलोकमधो भोगवती तथा। भागीरथी मर्त्यलोकं तमसो मोचयिष्यति॥' इति गंगामाहात्म्ये। किंभूतं स्वत एवेनः स्वेनो न केनचित्कृतः। 'स्वादिनः स्वामिसूर्ययोरि'ति कोशात् स्वेनः कृष्णस्तस्य सर्ववशित्वात्। तदुक्तं 'ससुरासुरगन्धर्वं सयक्षोरगराक्षसम्। जगद्वशे वर्ततेदं कृष्णस्य सचराचरम्॥' इति। तस्य धाम्ना धामत्वेन स्वरूपत्वेन परं सर्वतीर्थोत्तमम्। 'न गंगासदृशं तीर्थं स्वयमेव द्रुतो हरिः।' इति गंगामाहात्म्ये। कृष्णरूपता तु गंगायाः स्वजलेङ्गत्यागिनां कृष्णस्वरूपकर्त्रीत्वात्। तदुक्तं कालिदासेन 'इदं हि गांगं त्यजतामिहांगं पुनर्न चांगं यदि वापि चांगम्। करे रथांगं शयने भुजंगं याने विहंगं चरणे च गाङ्गम्॥' इति। 'श्रीगंगा द्रवरूपेण त्रैलोक्यं व्याप्य तिष्ठति।' इति संमोहनतंत्रेपि यथा गंगारूपेण हरिर्द्रुतस्तथा गर्गसंहितामथुराखण्डे स्फुटः। स्वेनस्येत्यत्रार्षत्वात् षष्ठ्या लुक्। यद्वा स्वेन निजेन धाम्नाऽधिकरणेन श्रीकृष्णेन परं आधाराधेययोरभेदोपचारात्, वह्न्यंगारवत्। पुनर्निरस्तकुहकं निरस्ता कुभूर्मिर्यैर्ऋषिभिस्ते निरस्तकवस्तेषां हो हर्षो येन तथा तम्। अत्र समासान्तः कः। ततः सप्तर्षयस्तत्प्रभावाभिज्ञा इत्यारभ्य मुक्तिमिवागतां मुमुक्षव इव सबहुमानमद्यापि जटाजूटैरुद्वहंतीति वक्ष्यति पंचमे। यः स्वराट् अनन्यसाधारणः। तदुक्तं "त्रैलोक्ये यानि तीर्थानि पुण्यक्षेत्राणि यानि च। सर्वत्र सर्वधर्माश्च सर्वे यज्ञाः सदक्षिणाः॥ तपांसि कृच्छ्ररूपाणि श्रुतिः सांगा चतुर्विधा। ब्रह्मा विष्णुश्च रुद्रश्च देवतानां गणास्तथा॥ पुरुषार्थाश्च सर्वे वै शक्तयो विविधास्तथा। गंगायां सर्व एवैते सूक्ष्मरूपेण संस्थिताः॥ सुस्नातः सर्वतीर्थेषु सर्वक्रतुषु दीक्षितः। चीर्णसर्वव्रतः सोपि यस्तु गंगां निषेवते॥ तपांसि तेन तप्तानि सर्वदानप्रदश्च सः। स प्राप्तयोगनियमो यस्तु गंगां निषेवते॥ सर्ववर्णाश्रमेभ्यश्च वेदविद्भ्यश्च वै तथा। शास्त्रार्थपारगेभ्यश्च गंगास्नायी विशिष्यते॥ मनोवाक्कायजैर्दोषैर्दुष्टो बहुविधैरपि। वीक्ष्य गंगां भवेत्पूतः पुरुषो नात्र संशयः॥ कृते सर्वाणि तीर्थानि त्रेतायां पुष्करं परम्। द्वापरे तु कुरुक्षेत्रं कलौ गंगैव केवलम्॥ ये देहपातनं यावद्गंगातीरं न मुंचति। स हि वेदांतविद्योगी ब्रह्मचर्यव्रती सदा॥ कलौ कलुषचित्तानां पापद्रव्यरतात्मनाम्। विधिहीनक्रियाणां च गतिर्गंगां विना न हि॥ अलक्ष्मीः कालकर्णी च दुःस्वप्नो दुर्विचिंतनम्। गंगेति जपमानानामंगं नोपविशंति हि॥ यज्ञदानतपोयोगजपाः सनियमा यमाः। गङ्गासेवासहस्रांशं न लभंते कलौ क्वचित्॥ किमष्टांगेन योगेन किं तपोभिः किमध्वरैः। वास एव हि गंगाया जलं ज्ञानस्य कारणम्॥ अपि दूरस्थितस्यापि गंगामाहात्म्यवेदिनः। अयोग्यस्यापि गोविंदो गंगाभक्त्या प्रसीदति॥" पुराणांतरे–'गंगा गंगेति यो ब्रूयाद्योजनानां शतैरपि। मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति॥ इदं ब्रह्मा इदं विष्णुरिदं साक्षात्परो हरिः। एतद् ब्रह्म निराकारं केवलं जाह्नवीजलम्॥' इति। ब्रह्मांडे 'दृष्टा जान्मशतं पापं पीता जान्मशतद्वयम्। स्नाता जान्मसहस्राणि हंति गंगा कलौ युगे॥ चिरपर्युषितं वापि शूद्रस्पृष्टमथापि वा। जाह्नव्याः स्नानदानादौ पुनात्येव नु न संशयः॥' इति। हेमाद्रिः 'तटस्थमुद्धृतं वापि शीतमुष्णमथापि वा। अपि चांडालभांडस्थं गंगांभः सर्वदा शुचि॥ भुक्त्वा वा यदि वाऽभुक्त्वा रात्रौ वा यदि वा दिवा। न कालनियमः कश्चिद्गंगां प्राप्य सरिद्वराम्॥' इति। यश्च प्रवाहः यथा यथावत्तेजोवारिमृदां विनिमयः तेजः प्रतापं वांति गच्छंतीति तेजोवा देवाः अरीन्प्रदंति चूर्णयंति सेवकानामित्यरिमृदः। मृद मर्दनेऽत औणादिकः क्विप्संप्रसारणञ्च। ते च तथा तेषां पुनस्तथा। 'देवास्तेजस्विनो मता' इति पूर्वनिरुक्तौ 'स्वजनार्तिदजंतुहराश्च सुरा' इति परनिरुक्तौ मानमभियुक्तोक्तम्। विनिमयः प्रशस्तनिवासस्थानम्। विशेषेण न याति मनो यत्र स विनिरावसथः। डिप्रत्ययोऽत्र णी प्रापणेऽतः कर्त्तर्यौणादिकः। 'विनिः पुमानावसथ' इति कोशात्। प्रशस्तो विनिर्विनिमयः प्राशस्त्ये मयट्। किंभूतं सदा सत्यं ब्रह्मरूपत्वात्। 'पुण्ये ब्रह्मस्वरूपे हरिचरणरजोहारिणि स्वर्गमार्गे' इति शंकारोक्तेः। यः प्रवाहः सूरयः सुष्ठु रयो वेगो यस्य स तथा। निपातनादुपसर्गस्य दीर्घः। यद्वा सूते उत्पादयति धर्मं दर्शनादिकर्तॄणामिति सूः स चासौ रयः सूरयः। सूरं सूर्यं याति प्रापयति स्वसंगिनामिति वा सूरयः। 'जाह्नव्याः सर्वदा सेवी संप्राप्य रविमंडलम्। ततो ब्रह्मपुरं याति न भूयो भुवि जायते॥' इति संहितोक्तेः। च पुनः यः प्रवाहः इतरत इतरेषां पापजीवानां सर्पादीनामपि तीरस्थानां जन्मान् जन्मनिवर्तकः। कृष्णरूपप्रापकत्वात्। तदुक्तमभियुक्तैः 'कदाचिन्नागारिः सुरतटिनीवीथिषु चरन्समाकृष्य व्यालं सकलमगिलत्कंचन चिरात्। चतुर्बाहुर्भूत्वा तदुपरि लसत्पीतवसनो गतो विष्णोर्लोकं तव जननि तीरस्य महिमा॥' इति। एतदभिप्रेत्यैव वाल्मीकिनाप्युक्तं "त्वत्तीरे तरुकोटरांतरगतो गंगे विहंगो वरं त्वन्नीरे नरकांतकारिणि वरं मत्स्योथ वा कच्छपः। नैवान्यत्र मदांधसिंधुरघटासंघट्टघंटारणत्कारत्रस्तसमस्तवैरिवनितालब्धस्तुतिर्भूपतिः।" इति। यश्च प्रवाह आदिकवये ब्रह्मणे आनंदं तेने। "वैकुंठादागतं नीरं गांगं दृष्ट्वा चतुर्मुखः। आनंदं परमं लेभे अहो भाग्यं नृणामिह॥" इति। गंगामाहात्म्ये। यस्य प्रवाहस्यांति समीपे स्थितो जन अर्थेष्वलौकिकस्वर्गीयादिपदार्थेषु आत्मसाक्षात्कारोपयोगेषु भक्त्यादिषु वाऽभिज्ञः साक्षात्कारवान् भवति। 'गंगातीरे सदा वासात्सर्वाभिज्ञो भवेत्स्फुटम्' इत्युक्तेः। यश्च प्रवाहः अमुह्यो मोहनिवर्तकः कुतोऽन्वयात्सेवनतः। 'कुतो मोहः प्रभवति गंगासेवनतो नृणाम्' इत्यादिपुराणात्। इति गंगापक्षः॥ ९॥

श्रीगंगातीरस्य तपोभूमित्वात्तदग्रे तपःपक्षे श्लोकान्वयमाह। वयं तत्तपः सदा धीमहि यतस्तपसः स्वराट् श्रीविष्णुरपि अस्य विश्वस्य जन्मादि अन्वयाच्चकार। 'सृजामि तपसा विश्वं ग्रसामि तपसा पुनः। बिभर्मि तपसा विश्वमि'ति वक्ष्यमाणत्वात्। किंभूतः स्वराट् इतरत इतरानभक्तान् अर्थेषु विषयादिषु अभिज्ञो नियोजकः। अभितो ज्ञापयति नियोजयतीत्यभिज्ञः। ज्ञा नियोगे चुरादिः। 'एष एवासाधु कर्म कारयती'ति श्रुतेः। भक्तांस्तु न तथेत्यर्थतो ज्ञायते। तद्भक्तास्तु भगवता दीयमानमपि मोक्षादि न गृह्णंतीति 'नैकात्मतां मे स्पृहयंति केचिन्मत्पादसेवाभिरता मदीहाः। येन्योन्यतो भागवताः प्रसज्य सभाजयंते मम पौरुषाणि॥' इति एतेन भक्तिर्निष्फलेति न शंक्यम्। 'तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः। हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो गतिमण्वीं प्रयुंक्ते॥' इति। यत्तपः कवये ब्रह्मणेपि आदि सनातनं ब्रह्म ज्ञानं तेने। 'तपसोनंतरं ब्रह्मा ज्ञानं लेभे सनातनम्' इत्युक्तेः। 'ज्ञातोसि सद्यसुचिरादि'ति तदुक्तेश्च। किंच 'एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात्। यथा ससर्जेदममोघदृष्टिर्यथाप्ययात्प्राग्व्यवसायबुद्धिः॥' इति वक्ष्यमाणत्वाच्च। यद्यस्मिंस्तपसि सूरयोपि मुह्यंति कठिनतरं तपः कर्तुमशक्यमित्यादिरूपमोहमाप्नुवन्तीति भावः। यस्मिंस्तपसि त्रिसर्गः त्रयाणामंतःकरणशुद्धिपारलौकिकानंदैहिकयशसां सर्गो निश्चयोऽमृषा सत्यो भवति। तदुक्तं 'तपसा मनसः शुद्धिः परत्र तपसा सुखम्। तपसा लभ्यते कीर्तिः किं वक्ष्ये तपसः परम्॥' इति संहितायाम्। यथा तेजोवारिमृदामविनिमय आत्माऽमृषा सत्यस्तथेति सत्यत्वमात्रे दृष्टांतः। कीदृशं तपः ब्रह्मणः परमेश्वरस्य हृद् हृदयम्। तथा च वक्ष्यति भगवानेव 'तपो मे हृदयं ब्रह्मन्नि'ति। पुनः परं सर्वोत्कृष्टं 'तपसो न परं किंचिदि'ति वाराहे। परपराक्रमरूपत्वाद्वा परं 'वीर्यं मे दुश्चरं तप' इति वक्ष्यमाणत्वात्। पुनः सत्यं सत्यस्वरूपं भगवत्प्रापकत्वात्। तथा च वक्ष्यति 'तपसैव परं ज्योतिर्भगवंतमधोक्षजम्। सर्वभूतगुहावासमंजसा विंदते पुमान्॥' इति पुनः स्वेन निजेन धाम्ना प्रकाशेन निरस्तं दूरीकृतं कुहकमज्ञानलक्षणं येन तत्तथा। 'सर्वेषां तपसाऽज्ञानं नाशमायाति वै नृणाम्' इति पुराणांतरात्। किंभूतः स्वराट् आयः सर्वलाभस्वरूपः 'आयः सर्वनिधौ लाभे' इति कोशात्। इति तपःपक्षः॥ १०॥

तपसि ध्येयमोङ्कारपक्षं प्रसंगागतमाह। ओङ्कारस्य सर्ववाङ्मयादित्वात्तद्ध्यानस्य च 'ओंकारं बिन्दुसंयुक्तं नित्यं ध्यायंति योगिनः। कामदं मोक्षदं चैवे'ति सर्वफलप्रदश्रवणाद्वा। 'ओमित्येकाक्षरं ब्रह्मे'ति ब्रह्मरूपत्वाद्वा। 'ओंकारं ये त्वधीयंते मनसा ब्रह्मसत्तमाः। विमुक्ताः सर्वकर्मभ्यस्तेयं पश्यंति साधवः॥ एतद्धि परमं ब्रह्मे'ति हरिवंशोक्तेश्च प्रथममोंकारं व्यासो ध्यायति। वयं तमोंकारं सदा धीमहि। तं कं यत्र त्रयाणां भुवनानां देवानां विश्वादिजीवानां विराडादीनां वा तिसृणां जाग्रदाद्यवस्थानां सृष्ट्यादीनां वा सर्गोऽकारादिभिर्वर्णरचनाऽमृषा यथार्थ एव। तथाहि 'ऋग्वेदो जाग्रदवस्था भूर्लोको ब्रह्मा विश्वो विराट्सृष्टिश्चाकारार्थः। तथा यजुर्वेदः स्वप्नावस्थ भुवर्लोको विष्णुस्तैजसो हिरण्यगर्भः स्थितिश्चेत्युकारार्थः। तथा सामवेदः सुषुप्त्यवस्था स्वर्लोको महेश्वरः प्राज्ञो व्याकृतः प्रलयश्चे'ति मकारार्थ इति नृसिंहतापिन्याम्। किंच पुष्पदंतेनाप्युक्तम् 'त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति।' इति। कुतः, सर्वेषु पदपदार्थेष्वन्वयात्। अन्वयश्च सर्वाक्षरसमाम्नायकारणत्वादेव। कारणं हि कार्येष्वनुगतमेव भवति तत्तु समवाय्येव। मृद्घटादिष्विवेति बोध्यम्। कारणत्वमोंकारस्य श्रीकृष्ण एव स्वभक्तशिरोमणिमुद्धवं प्रत्येकादशे वक्ष्यति 'ओंकाराद् व्यंजितस्पर्शस्वरोष्मांतस्थभूषिताम्। विचित्रभाषाविततां छंदोभ्यश्चतुरुत्तरैः॥' इत्यादिना। किं च 'तस्याथासंस्त्रयो वर्णा अकाराद्या भृगूद्वह। धार्यंते यैस्त्रयो भावा गुणनामार्थवृत्तयः॥ ततोक्षरसमाम्नायमसृजद्भगवानजः। अन्तस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम्॥ तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः। असृजदि'त्यादिना। यत ओंकारादाद्यस्य सर्वक्लेशापहारकारणीभूतस्य ज्ञानस्य जन्म भवति उपासनयेति शेषः। 'तारोपासनया ज्ञानं जायते सर्वदुःखहृत्।' इत्यादिपुराणोक्तेः। 'तारः प्रणव ओंकारो वेदादिः सर्वकारणम्।' इत्यभिधानचन्द्रोदयोक्तेस्तारपदं प्रणवपरम्। च पुनर्यतो यस्याभिज्ञः स्वराट् ब्रह्मैव भवति 'ओङ्कारो विदितो येन ज्ञातं तेनाखिलं जगत्। स ब्रह्मरूपो देहस्थोप्यथ याति परं पदम्॥' इत्यादिपुराणात्। यद्यस्मिन्नोङ्कारे इतरत इतरेऽज्ञा मुह्यन्ति। प्रथमार्थे तसिः। 'मूढान्यनीचेष्वितरो निष्कामे च सकामके।' इत्यनेकार्थकल्पद्रुमः। कथं मुह्यन्तीत्याकांक्षायामाह। ओमितीदं सर्वमिति श्रुतिमाकर्ण्य तद्विमर्शासमर्थाः सन्तः कथमोङ्कारादिदं जातमेतन्न संगच्छत इत्येवं मुह्यन्तीति भावः। ये सूरयो विद्वांसस्ते तु इति वितर्केन मुह्यन्ति। किन्तु ब्रह्म हृदा ब्रह्मरूपेणोपासत एवेति भावः। कस्मै आदिकवये आदिकविं विष्णुं प्राप्तमित्यर्थः। आदौ सृष्ट्यादौ कौस्तुभारयति ब्रह्मणे तपतपेत्यादिरूपं वचश्चतुःश्लोकीरूपं वेत्यादिकविर्विष्णुस्तस्मै। तुमोऽप्रयुक्तस्य इति चतुर्थी। 'प्रणवाभ्यासतो विप्रा विष्णुः प्राप्यो न चान्यथा।' इति योगचिन्तामणौ। तिज्यते क्षम्यते अपराधो भृगुकृतपादताडनादिरूपो येन स तेजा विष्णुः। तिज निशाने क्षमायां चेत्यतः कर्मण्यसुः त्यज्यतेऽज्ञैरिति वा तेजाः। 'न मां दुष्कृतिनो मूढाः प्रपद्यंते नराधमाः।' इति श्रीमुखोक्तेः। 'मूढोऽयं नाभिजानाति लोको मामजमव्ययम्।' इति तदुक्तेश्च। यद्वा सर्वतेजोरूपत्वात्तेजा इति। तेजस्तेजस्विनामहम्। 'यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्।' इति स्मृतेः। 'आदित्यवर्णं तमसः परस्तात्' इति श्रुतेश्च। व्रियते स्वीक्रियते सृष्टिव्यवहारोनेनेति वारिर्ब्रह्मा। वृत्रवरणेऽत इञ्प्रत्ययः। यद्वा वरयतीच्छति सृष्ट्यादिज्ञानमिति वारिः। वर ईप्सायामदन्तश्चौरादिकोयं कश्चिदनदन्तोप्यत एव वृद्धिरत्र। 'स ईश्वरो मे कुरुतान्मनोरथमि'ति तृतीये वक्ष्यमाणत्वात्। 'वारिर्ना ब्रह्मणि क्लीबं नीरे स्त्री गजबन्धने।'

इति कोशसर्वस्वात्। म्रदति प्रलये मर्दयति सर्वमिति मृद्रुद्रः। म्रद मर्दने कर्तरि क्विप्संप्रसारणं च निपातनात्। तेषां तेजोवारिमृदां विष्णुब्रह्मरुद्राणां यथा यथावत् विनिमयः य ओङ्कारो बोधकः विशेषेण नितरां मय्यतेऽनेनेति विनिमयः। मय गतावतोच्। यद्यप्योङ्कारस्तिसृभिर्मात्राभिर्गुणादीनपि बोधयति। तथापि विशेषतो ब्रह्मादीनामेव बोधकः। तदुक्तं नारदीये—"मात्रास्तिस्रः समाख्याता ब्रह्मविष्ण्वीशदेवताः। अकारो ब्रह्मणो रूपमुकारो विष्णुरूपकम्॥ मकारो रुद्ररूपं स्यादर्द्धमात्रा परात्मिका।" इति। किंभूतं स्वेन निजेन धाम्ना प्रकाशेन सत्यं परम्। सच्छब्देन पृथिव्यप्तेजांसि त्यच्छब्देन वाय्वाकाशाविति। सच्च त्यच्चाभवदिति श्रुतेः। सत्यं सत्यशब्दोपलक्षितं ब्रह्माण्डं पिपर्त्ति प्रकाशयतीति सत्यंपरम्। अत्र पिपर्त्तिप्रकाशने तु धातूनामनेकार्थत्वात्। 'ॐकार एवेदं सर्वं प्रकाशितवानि'ति श्रुतेः। पुनः निर्गतोऽस्तो नाशो येषां ते निरस्ता अमरास्तान्कोहयति विस्मापयतीति निरस्तकुहकस्तम्। देवा अपि तदुपासनाफलं विचार्य विस्मयमाप्नुवंत्यहो ॐकारमाहात्म्यमिति कथयन्तीति भावः। इत्योङ्कारपक्षः॥ ११॥

अथ नारदपक्षः। सर्वेषामवताराणामोङ्कारार्थत्वाविशेषेपि प्रथमं व्यासो निजोपदेष्टृत्वान्नारदं ध्यायति। वयं तं नारदं हृदा मनसा धीमहि। तं कं यतो यस्मान्वयात्संगादाद्यस्य सर्वादिकारणीभूतब्रह्मज्ञानस्य जन्माभूत्। प्रह्लाददक्षात्मजध्रुवप्रचेतआदीनामिति शेषः। एतच्चाग्रे चतुर्थादिस्कन्धेषु स्पष्टीभविष्यति। ब्राह्मण आद्यत्वात्तज्ज्ञानस्याप्याद्यत्वं ज्ञानज्ञेययोर्भेद औपचारिक एव न परमार्थत इति। किञ्च यो नारदोऽर्थेष्विन्द्रियार्थेषु इतरतः इता दूरीभूता रतिर्यस्य स इतरतः। नैष्ठिकत्वाद्विषयाभिलाषरहित इत्यर्थः। च पुनः यो नारदोऽभिज्ञः न बिभेत्यन्यत इत्यभिः कृष्णः। ञिभी भयेऽत औणादिको डिः। 'भीषास्माद्वातः पवते' इत्यादिश्रुतेः। 'यद्बिभेति स्वयं भयमि'ति स्मृतेश्च। तद्भयं तु सर्वेषां न तस्य कस्यचिद्भयमस्तीति भावः। तं जानातीत्यभिज्ञः कृतकृष्णसाक्षात्कार इत्यर्थः। 'आहूत इव मे शीघ्रं दर्शनं याति चेतसि' इति तदुक्तेः। च पुनः यो नारदः स्वराट् स्वरं स्वररूपं ब्रह्माटति जानातीति स्वराट्। विशेषतोऽभ्यस्तसंगीतशास्त्रत्वात्तस्य। अट गतौ गत्यर्थानां ज्ञानार्थतापि। ज्ञानगमनप्राप्तिभेदेन गतिपदस्यार्थत्रयपरत्वात्। स्वरस्य ब्रह्मता तु 'स्वरब्रह्मविभूषिताम्। स्वरब्रह्मणि निर्भातहृषीकेशपदांबुजे' इत्याद्युक्तेर्वक्ष्यमाणत्वात्। स्वरलक्षणं तु संगीतरत्नाकरे 'श्रुत्यनन्तरभावी यः स्निग्धोनुरणनात्मकः। स्वरो रंजयति श्रोतुश्चित्तं स स्वर उच्यते॥' इति। श्रुतिस्तु स्वरारम्भकः शब्दविशेषः। तदुक्तं 'प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रतः। सा श्रुतिः सम्परिज्ञेये'ति। किञ्च 'श्रुतिभ्यस्तु स्वराः षड्जर्षभगांधारमध्यमाः। पञ्चमो धैवतश्चाथ निषाद इति सप्त ते॥' इति। एषां स्वरूपं विस्तरभियेह नोक्तम्। यत्र यस्मिन्नारदे त्रयाणां भक्तिज्ञानवैराग्याणां सर्गो निश्चयोऽमृषा सत्यः। येन करतलीकृतामलकवदुक्तेः परमात्मन्यनुरागरूपाया ज्ञानस्य जीवब्रह्मणोरैक्यरूपस्य वैराग्यस्य चाब्रह्मलोकभोगारुचिरूपस्य च स्वरूपं निश्चितम्। 'भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः' इति सप्तमे युधिष्ठिरं प्रति तदुक्तेरेवावसीयत इति। तेजोवारिमृदामविनिमयः स्वाभाविकं रूपं यथा सत्यं तथेति दृष्टांतार्थः। 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि'ति श्रुतेः। किंभूतं नारदं स्वेन निजेन धाम्ना प्रभावेण परं सर्वोत्कृष्टं परं पालकं वेति पिपर्त्ति पालयति ज्ञानोपदेशेन संसाराद्रक्षत्यज्ञानिति परस्तमिति निरुक्तेः, पपालनपूरणयोरतोऽप्रत्ययः। पुनः सदा निरस्तकुहकं सतां कर्ममार्गे प्रवर्तमानानां प्राचीनबर्हिषादीनामासमन्तान्निरस्तं दूरीकृतं कुहकं कर्मकरणजक्लेशोऽध्यात्मश्रावणेनेति तथा। एतच्च पुरंजनोपाख्यानादौ स्पष्टम्। यो नारद आदिकवये मह्यं ब्रह्म तद्रूपं भागवताख्यं पुराणं तेने प्रकाशितवान्। 'इदं भागवतं नाम पुराणं ब्रह्मसम्मितम्। इति तदुक्तेः। यत्रास्मिन् भागवते सूरयो विद्वांसोपि तात्पर्यावधारणासमर्थाः सन्तो मुह्यन्ति व्याकुलीभवन्ति। गुरूपदेशं विना यथा ब्रह्म न ज्ञायते तथेदमपीति बोध्यम्। गुरुमत एव बोधश्रवणात्। तथाच श्रुतिः 'आचार्यवान्पुरुषो वेदे'ति। कीदृशं भागवतं सत्यं सत्यस्वरूपब्रह्माभिन्नत्वात्। 'श्रीमद्भागवते शास्त्रे श्रीकृष्णे परमात्मनि। अन्तरं ये प्रपश्यन्ति ते नरा ब्रह्मघातिनः॥' इति पाद्मोक्तेर्भेददर्शनस्यानर्थजनकत्वश्रुतेरेवेत्यलम्। इति नारदपक्षः॥ १२॥

अथ रामपक्षः। श्रीरामं सच्चिदानन्दं योगिध्येयांघ्रिपंकजम्। वन्दे स्वाज्ञाननुत्त्यर्थं सदा बोधप्रलब्धये॥ १॥

सर्वावतारेषु राम एव समुद्रमुल्लंघ्य सीतारूपां श्रियमवापातस्तद्ध्यानेन प्रारिप्सितग्रन्थरूपाब्धिमुल्लंघ्य चित्तशान्तिरूपां श्रियमवाप्स्यामीत्थं मनसि निधाय व्यासो रामस्मरणरूपं मंगलमाचरति जन्माद्यस्येति। वयं तं रामं हृदा मनसा धीमहि। तं कं यत्र त्रयाणां रावणकुम्भकर्णेन्द्रजितां सर्गो निश्चयो रामं मारयामो रामो वाऽस्मान्मारयिष्यतीत्येवंरूपोऽमृषा सत्यो मृषा वा। यद्वा यत्र त्रयाणां पित्राज्ञापालनशिवधनुरगमर्दनाब्धिसेतुकरणानां सर्गो निश्चयोऽमृषेति। किञ्च यो रामः जन्माद्यस्य यतोऽर्थेष्वभिज्ञः जन्मन आदिकारणमज्ञानमस्यति नाशयतीति जन्माद्यस्तम्। अज्ञानेनैव कर्म क्रियते ज्ञानिनो लोकसंग्रहमन्तरा तदप्रतिपादनात्। कर्मणा च जन्मादि भवत्यतोऽज्ञानमेव जन्मादिहेतुः। तथाच जन्माद्यस्यं ज्ञानं तस्मै यतते प्रयतत इति जन्माद्यस्ययत् तस्य तथा तस्य वेदस्यार्थेष्वभिप्रेयेषु कर्मादीनुपसर्जनीकृत्य ब्रह्मप्रतिपादनपरेषु यज्ञेन

दानेन तपसा नाशकेनेत्यादिरूपवाक्यार्थेषु अभिज्ञः सर्वतो ज्ञानवान् तत एव तस्याविर्भावश्रुतेः। 'ऋचः सामानि जज्ञिरे' इति श्रुतेर्वेदाभ्यासेनैव ज्ञानमुत्पद्यतेऽतो वेदस्यैव यत्नो लोकबोधे। तदुक्तं 'ज्ञानमुत्पद्यते पुंसो निगमाभ्यासनाद् ध्रुवम्। ज्ञानेन तीर्यते नित्यं संसृतेः कारणं तमः॥' इत्यादिपुराणात्। च पुनः यो रामः अन्वयादितरतः स्वराट् अन्वयः पुत्रस्तदादयो दानतीर्थ-तपआदयस्तैस्तीर्येत इत्यन्वयादितरः नरकः 'अपुत्रस्य गतिर्नास्ती'ति स्मृतेः। 'अज्ञस्तरेम भवता प्रजदुस्तरं यद् ध्वान्तमि'ति विचित्रकेतूपाख्याने वक्ष्यमाणत्वाच्च। 'दानव्रततपोभिश्च तीर्थसेवनया जनैः। नरको न भवत्येव हरेराराधानात्तथा॥' इति वाक्याच्च। तस्मान्नरकात्स्वान् भक्तान् राजयति नयति वैकुंठमिति स्वराट्। 'कृष्ण कृष्णेति कृष्णेति यो मां स्मरति नित्यशः। जलं भित्त्वा यथा पद्मं नरकादुद्धराम्यहम्॥' इति तदुक्तेः। रामकृष्णयोरवतारतो भेदेपि वास्तवाभेदात्कृष्णोक्ती रामोक्तिरेव 'य एव रामश्च स एव कृष्ण' इति चिरंजीवभट्टैर्विद्वन्मनोरंजिन्यामुक्तत्वात्। यश्च कवये निपुणाय लक्ष्मणाय आदि सनातनं ब्रह्म ज्ञानं रामगीतारूपं तेने प्रकाशितवान् तथा ह्यध्यात्मरामायणोत्तरकांडे 'त्वं शुद्धबोधोसि हि सर्वदेहिनामात्मास्यधीशोसि निराकृतिः स्वयम्।' इत्यादिरूपं लक्ष्मणवाक्यं श्रुत्वा। आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वेत्यादिना तं बोधितवान्। यत्रास्मिन् ज्ञाने तद्बोधक-शास्त्रे सूरयोप्यधीतशास्त्रा अपि मुह्यंति तेषामपि भ्रमबाहुल्यान्नात्मसाक्षात्कारो जायते। कीदृशं तं स्वेन निजेनासाधारणेन धाम्ना सत्तास्फूर्तिरूपेण सदा सत्यं परमार्थभूतं निरस्ता त्यक्ता कुर्भूमिर्यैस्ते निरस्तकवस्तैर्ह्रियते प्राप्यत इति निरस्तकुहः। प्रापणार्था-द्धरतेर्डः। स एव निरस्तकुहकः स्वार्थे कः। तं निरस्तकुहकं 'ग्रामाद्वनं क्षितिभुजोपि ययुर्यदर्थाः' इत्यग्रे वक्ष्यति। पुनः तेजोवारिमृदां यथायोग्यं परं प्रकाशकं देहादीनां प्रकाशस्यात्माधीनत्वात्। नहि जडं चैतन्यमंतरेण प्रकाशते। यत्सत्तया सर्वमिदं प्रकाशते इत्यादिवचनात् कथंभूता वयं विनिमयः विगतो भगवतोन्यो निमिराश्रयो येषां ते तथा भगवदाश्रया इत्यर्थः। 'निमी राजा आश्र-यश्चे'ति कोशात्। इति रामपक्षः॥ १३॥

अथ कृष्णपक्षः। सर्वावताराणां श्रीकृष्णस्याधिष्ठानत्वेनास्मिञ्छास्त्रे प्रतिपाद्यत्वेन च तस्येतिहेतोरादौ तं व्यासो ध्यायति। जन्माद्यस्येति। वयं सदा हृदा मनसा तं श्रीकृष्णचंद्रं धीमहि। तं कं यतो यस्यान्वयाद्वंशादाद्यस्य ब्रह्मणो विधेर्जन्माभू-दिति शेषः। 'मय्यनंतगुणेऽनंते गुणतो गुणविग्रहः। यदासीत्तत एवाद्यः स्वयंभूः समभूदज॥' इत्यत्र ब्रह्मण्याद्यशब्दप्रयोगदर्शनादाद्यो ब्रह्मार्थक इति षष्ठे वक्ष्यति हरिर्दक्षं प्रति। पुनस्तं कं यतोन्वयात्सेवनात्स्वराट् दरिद्रः सुदामा अर्थेषु लौकिकपदार्थेषु इतरतोभूत्। इता प्राप्ता रतिः क्रीडा येन स तथा। अत्र समासांतो डः। 'स्वराडिव निपानखनित्रमिंद्र' इत्यत्र स्वराट्शब्दो दरिद्रार्थको दृष्टोतोत्रापि बोध्यः। तद्वक्ष्यति श्रीदशमे स एव "नूनं बतैतन्मम दुर्भगस्य शश्वद्दरिद्रस्य समृद्धिहेतुः। महाविभूतेरवलोकोन्यो नैवोपपद्येत यदूत्तमस्य" इति। यद्वा इतरतो गतेच्छः तदुक्तं श्रीदशमे 'विषयान् जायया त्यक्ष्यन् बुभुजे नातिलंपट' इत्यादिना। कीदृशः स्वराट् अभिज्ञः सर्वशास्त्रार्थकुशलः श्रीकृष्णेन सह कृताध्ययनत्वात्। तदुक्तं तेनैव "किमस्माभिरनिर्वृत्तं देवदेव जगद्गुरो। भवता सत्यकामेन येषां वासो गुरावभूत्॥" इति, यः कृष्णः कवयेर्जुनायादि सनातनं ब्रह्म गीतारूपं तेने, के स्वर्गे वाति गच्छति निवात-कवचादिवधेन देवत्राणार्थमिति कविः। वा गतिगन्धनयोरतो डिरौणादिकः। 'तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता। जघान स्वर्गतो राजन्नेक इंद्रप्रियंकरः॥' इति वक्ष्यमाणत्वात्। यस्मिन् कृष्णे सूरयो ब्रह्मादयोपि मुह्यंति। ब्रह्ममोहस्तु दशमे 'इतीरेशेतर्क्ये निजमहिमनि स्वप्रमितिके परत्राजातोतन्निरसनमुखब्रह्मकमितौ। अनीशेपि द्रष्टुं किमिदमिति वा मुह्यति सति चच्छादाजो ज्ञात्वा सपदि परमोजाजवनिकाम्॥" इत्यादिना स्फुटीभविष्यति। यत्र श्रीकृष्णे तेजोवारिमृदां विनिमयो विकृतिरूपो देहो मृषैव। त्रिवृत्करणश्रुतेस्त्रिभिरपि केषांचिन्मते देहादिरुत्पद्यतेऽतोत्र त्रयाणां ग्रहणं न विरुध्यतेऽयं शरीरीति व्यवहारस्तस्मि-न्मायाकल्पित एव 'माययोपात्तविग्रहमि'ति भीष्मोपाख्यानोक्तेः परब्रह्मत्वात्तस्य। तद्वक्ष्यति श्रीदशमे "कृष्णमेनमवेहि त्वमात्मा-नमखिलात्मनाम्। जगद्धिताय सोप्यत्र देहीवाभाति मायया॥" इति, 'अशरीरं वावसंतमि' त्यादिश्रुतेश्चात्मनोऽशरीरत्वप्रसिद्धेः। यथा त्रिसर्गः त्रिगुणकार्यैः प्रपञ्चो मृषेति दृष्टांतार्थः। प्रपञ्चमिथ्यात्वं त्वनुमानश्रुतिस्मृतिभिः साध्यत एव। तथाहि प्रपंचो मिथ्या दृश्यत्वात् जन्यत्वाद्वा घटादिवत्। यन्नैवं तन्नैवं यथात्मेत्यनुमानम्। 'आदावन्ते च यन्नास्ति वर्तमानेपि तत्तथा।' इति स्मृतिः। 'नेह नानास्ति किञ्चने'ति श्रुतिश्च। किंभूतं कृष्णं स्वेनालौकिकेन धाम्ना गोवर्धनोद्धरणदावानलपानादिरूपतेजसा निरस्तं कुहकं मनुष्यनाट्यप्रदर्शनरूपं येन स तथा तं ह्येतन्मनुष्येण कर्तुं शक्यते विनेश्वरमिति भावः। पुनः सत्यं परमसत्यं सत्यस्य सत्य-मित्युक्तेः। पुनः परं परिपूर्णतमं पूर्णावताराणामाधारभूतं लयस्थानत्वात्। तदुक्तं गर्गसंहितायाम् 'ककारः कमलाकांत ऋकारो राम इत्यपि। षकारः षड्गुणपतिः श्वेतद्वीपनिवासकृत्॥ णकारो नारसिंहोयमकारो ह्यक्षरोग्निभुक्। विसर्गौ च तथा ह्येतौ नरनारायणा-वृषी॥ संप्रलीनाश्च षट्पूर्णा यस्मिञ्छब्दे महात्मनि। परिपूर्णतमे साक्षात्तेन कृष्णः प्रकीर्तितः॥' कमलाकान्तादीनां मूर्तिव्यूहानां कृष्णे लयो दृश्यते गोलोकगतैर्देवैरिति तद्वृत्तं तु विस्तरभियेह नोक्तम्। षण्णां पूर्णत्वमपि गोलोकखंडे उक्तम् 'पूर्णो नृसिंहो रामश्च श्वेतद्वीपाधिपो हरिः। वैकुण्ठोपि तथा यज्ञो नरनारायणः स्मृतः। परिपूर्णतमः स स्याद्यस्मिन्नेते लयं ययुः॥' इति। एतादृशस्तु श्रीकृष्ण एव न चान्य इत्यलमतिप्रयासेन। इति कृष्णचन्द्रपक्षः॥ १४॥

अथ धन्वंतरिपक्षः। श्रोतॄणां सुखप्राप्त्यर्थं वक्तुश्चादौ स्तुवे हरिम्। धन्वंतरिं महारोगनाशकं स्मृतिमात्रतः॥
वयं तं धन्वंतरिं सदा हृदा धीमहि यस्मिन्ध्याते सति त्रयाणां वातपित्तश्लेष्मणां सर्गो ज्वरादिरूपो मृषाऽसत्यो भवति नश्यतीति भावः। धन्वंतरिस्मृतौ 'सत्यं नश्यन्ति विविधा रुजः' इत्यादिपुराणात्। 'धन्वंतरिश्च भगवान् स्वयमेव कीर्तिनाम्ना नृणां पुरुरुजां रुजआशु हंती'त्यग्रे वक्ष्यमाणत्वात्। यश्च पुनः आद्यस्यात्तुं योग्यस्य यज्ञीयभागस्य जन्माविर्भावमन्वयान् 'यज्ञे च भागममृतायुरवावरुंध' इत्युक्तेः। 'धन्वंतरिश्च भगवानायुर्वेददृगिज्यभाक्।' इत्युक्तेश्च धन्वंतरितः पूर्वं चिकित्सकेभ्यो यागभागो नासीदिति। 'भिषजं गणकं चैव द्विजं श्राद्धादिषु त्यजेत्।' इति स्मृतेः। आद्यस्येति अदभक्षणेऽस्मात् यत्। तेजोवारिमृदां विनिमयो देहो यतो यस्य स्मरणेन यथा 'कोर्थोऽरुग्भवति स्मृतमात्रार्तिनाशन' इति वक्ष्यमाणत्वात्। यश्च कवये कवित्वाय कल्पत्वायारोग्यत्वायेति यावत्। कं सुखं वाति यस्मिन्काले स कविरारोग्यावस्थारूपः कालः कविरिति भावप्रधानो निर्देशः। अत्र वातेर्डिरौणादिकः। ब्रह्म कोर्थो वेदमर्थादायुर्वेदं तेने विस्तारितवान्। 'आयुश्च वेदमनुशास्त्यवतीर्य लोके' इति द्वितीये वक्ष्यमाणत्वात्। तस्यायुर्वेदस्याष्टावंगानि। तदुक्तं नीलकंठेन 'कायबालग्रहोर्ध्वांगशल्यदंष्ट्राजरावृषान्। अष्टावंगानि तस्याहुश्चिकित्सा येषु संश्रिता॥' इति तस्यायुर्वेदस्य कायचिकित्साबालचिकित्साग्रहो भूतप्रेतादि ऊर्ध्वांगं शिरोनेत्रादि शल्यं शस्त्रघातादिदंष्ट्रास्थावरजंगमात्मकं विषं तेषां चिकित्सा जरारसायनादिना। जराया दूरीकरणं वृषो वाजीकरणतंत्रमित्यर्थः। कथंभूतं ब्रह्म इतरतः इतरेभ्यः शास्त्रेभ्यः स्वराट् शरीरारोग्यजनकत्वेनेह लोके चमत्कारजनकम्। सर्वे लोका आयुर्वेदविदग्रे दैन्यमाश्रित्य वर्त्तंते सार्वभौमाग्रेऽतः स्वराडिति समुचितं विशेषणम्। पुनः परं सर्वोत्कृष्टं 'धर्मार्थकाममोक्षाणां शरीरं साधनं मतम्। तच्छुद्धिर्जायते येन तच्छास्त्रं हि परं महत्॥' इत्यातंकहरणोक्तेः। किञ्च 'कचिद्दानं कचिन्मानं कचिद्भोगः कचिद्यशः। चिकित्सया प्रजायेत चिकित्सा नास्ति निष्फला॥' इति भिषक्कल्पलतोक्तेः। किंभूतं धन्वंतरिं सत्यं भगवद्रूपत्वात् भगवद्रूपत्वं तु हर्यवतारेषु तस्य गणितत्वात् यश्च पुनः अर्थेषु रोगहारिविश्वौपधादिपदार्थेष्वभिज्ञः एतद् द्रव्यममुकरोगहारीति ज्ञानवान्। यस्मिन्नायुर्वेदे सूरयो ज्ञातान्यशास्त्रा अपि मुह्यंति 'सिंहीत्वचमुपाहरे'-दित्यादि सिंह्याः शार्दूलभार्यायास्त्वचमुपरितनचर्मोपाहरेदित्याद्यर्थकल्पनया मुह्यंति। किञ्च तत्र ब्राह्मीरसं क्षिपेदिति वीक्ष्य 'ब्राह्मी तु भारती भाषे'ति कोशाद् ब्राह्मी सरस्वती तद्रूपं पुस्तकमतस्तज्जलेनाप्लाव्य तद्रसं क्षिपेदित्येवं मोहमाप्नुवंतीति भावः। 'पुस्तकं भारतीरूपं न च तस्मात्परं स्मृतम्।' इति ग्रंथांतरोक्तेः। पुनः किंभूतं ब्रह्म आदि सनातनं न तु धन्वंतरिणैव रचितम्। 'आयुर्वेदं धनुर्वेदं गान्धर्वं वेदमात्मनः। स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैरि'ति वक्ष्यमाणत्वात्ततोपि प्राक्तनाद्ब्रह्मणस्तत्सर्गश्रुतेः। पुनः स्वेन निजेन धाम्ना प्रतापेन निरस्तं दूरीकृतं कुहकं सर्वलोकरोगरूपं येन तं तथा। इति धन्वंतरिपक्षः॥ १५॥

अथ च श्रीनृसिंहस्य भक्तपक्षपातितया ममापि श्रीभागवतव्याख्यानसामर्थ्यप्रदानेन पक्षं करिष्यतीति हेतोर्नृसिंहं ध्यायति व्यासः। जन्माद्यस्येति। वयं तं नृसिंहं धीमहि। तं कं यस्मान्वयात्सेवनादभिज्ञो नारदादवाप्तज्ञानः प्रह्लादः अर्थेषु संसारीयपदार्थेषु इता गता रतिः प्रीतिर्यस्य स इतरतः। समासांतोत्र डः। मुह्यंति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो ह्येष भिनत्ति मे मतिं इति तदुक्तेः। यः प्रह्लादः स्वराट् सन् आदि सनातनं च तत्कं सुखमित्यादिकं तद्वेति प्राप्नोतीत्यादिकविः। वी गतिव्याप्त्यादावतो डिः। तस्मै दत्तात्रेयाय आप प्राप तदग्रे सप्तमे प्रकटीभविष्यति। किं च यश्चादिकविरात्रेयस्तस्य हृदा प्रियत्वेन सौहार्देन ब्रह्म ज्ञानं तेने 'सुखमस्यात्मनो रूपं सर्वेहोपरतिस्तनुः।' इत्यादिवाक्यैः 'सौहार्दं मनसि स्वीये ह्यप्रियेपि प्रवर्तनं।' इति कोशात्। यस्मिन् नृसिंहे सूरयो ब्रह्मादयो भीताः संतो यं दृष्ट्वा मुह्यन्ति तत्पार्श्वं न गच्छन्ति। धातूनामनेकार्थत्वान्मुहिरत्र गतौ। यत्र त्रयाणां देवदैत्यनराणां सर्गो निश्चयोऽमृषा देवनिश्चयो हतोयमसुरोल्पक इत्यादिरूपः। दैत्यनिश्चयोऽयं मां मारयिष्यतीत्येवंरूपः। नरनिश्चयोऽयमस्माकं त्रातेत्यादिरूपः। यद्वा त्रयाणां देवदैत्यनराणां सर्गो यत्र मृषाऽसत्यः। 'नायं नरो नापि सुरो न दैत्यः कश्चिदीदृशः। श्रूयते हि मया लोके यादृशोयमुपस्थितः॥' इति पुराणांतरे हिरण्यकशिपूक्तेः। तेजोवारिमृदां विनिमयो देहो यथा मृषा। कीदृशं तं स्वेनासाधारणेन धाम्ना तेजसा निरस्ता दूरीकृताः कुहकाः कपटिनो दैत्या येन तम्। सर्वनिर्जितगायुधप्रवेकविद्रावितदैत्यदानवमित्युक्तेः। पुनः सदा सत्यम्। 'अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम्। पश्चादहं यदेतच्च योवशिष्येत सोस्म्यहम्॥' इति श्रीमुखोक्तेः। सत्यं ज्ञानमनंतमिति श्रुतेश्च। परं सर्वोत्कृष्टं सर्वदेवदैत्यगंधर्वयक्षादिस्तुत्यत्वात्। तच्च सर्वं सप्तमे स्फुटम्। न ह्यनुत्कृष्टः सर्वैः स्तूयते किन्तु सर्वोत्कृष्ट एव स्तूयत इति भावः॥ इति नृसिंहपक्षः॥१६॥

अथ मत्स्यावतारपक्षः। वयं तं मत्स्यावतारं हरिं हृदा धीमहि। यतः स्वराट् ब्रह्मा आद्यस्य सर्वादिकारणस्य वेदस्य जन्माविर्भावमन्वयात्। हत्वा सुरं हयग्रीवमित्युक्तेः। यो हरिरर्थेषु कर्त्तव्येषु अभिज्ञः जलचररूपं विना जले गुप्तस्यान्वेषणासम्भव इत्याद्यर्थाभिज्ञः। यो मत्स्यरूपो हरिः कवये विवेकिने सत्यव्रताय नृपाय इतरतश्चेतरेभ्य ऋषिभ्यः। आदावित्यर्थे आदीत्यव्ययम्। सृष्ट्यादौ प्रलयान्ते च ब्रह्म तत्प्रतिपादकं तद्रूपं मात्स्याख्यं पुराणं तेने। तद्वक्ष्यत्यष्टमस्कन्धान्ते 'प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा। दितिजमकथयद्यो ब्रह्मसत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं नतोस्मि॥' इति। यदस्मिन् मत्स्यरूपे हरौ सूरयोपि विद्वांसोपि सत्यव्रतादयः ईश्वरो भूत्वा किमर्थं मात्स्यं तिर्यग्योनिरूपं दधारेत्यादिमोहं प्राप्नुवंति। 'किमर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितम्' इति वक्ष्यमाणत्वात्। यद्वा तद्वर्द्धनेन मुह्यंति इयता कालेन कथमियाञ्जात इत्यादिरूपं मोहं यांति। तद्वक्ष्यत्यष्टमे 'एवं विमोहितस्तेन वदता वल्गुभारतीम्। यो भवान् योजन-

शतमहाभिव्यानशे सरः ।। नैवंवीर्यो जलचरो दृष्टोऽस्माभिः श्रुतोपि वा ।।' इति । यत्र मत्स्यरूपे हरौ तेजोवारिमृदां तत्तच्छब्दोपलक्षितानां रजस्सत्त्वतमसां त्रिषु कालेषु सर्गस्त्रिसर्गो देहसम्बन्धादिरूपो मृषा मायाविलसितत्वात् । 'यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः ।' इत्यादिना प्रथमे । 'उच्चावचेषु भूतेषु चरन्वायुरिवेश्वरः । नोच्चावचत्वं भजते निर्गुणत्वाद्धि यो गुणैः ।।' इत्यादिना अष्टमे च वक्ष्यति । कथं मृषा यथा विनिमयो मिथ्याज्ञानं शुक्तिरजतादि स्वेन धाम्ना तेजसा निरस्तं प्रलयकालीनं तमो येन तम् । पुनः सदा सत्यं परं सत्यं धर्मं पिपर्त्तीति सत्यंपरस्तं पिपर्त्तेरत्र खः । 'धर्मः सत्यः सदा ज्ञेय असत्योऽधर्म ईरितः । सत्येन लभते स्वर्गमसत्येन तमो व्रजेत् ।।' इत्यादिपुराणात् । मत्स्यावतारस्य वेदावनकर्तृत्वेनात्र वेदार्थप्रकाशो ममापि भूयादित्याशयेन तन्नतिः । इति मत्स्यावतारपक्षः ।। १७ ।।

अथ कूर्मावतारपक्षः ।। वयं तं कूर्मरूपं हरिं सदा धीमहि । तं कं यतो यस्यानुग्रहादाद्यस्याचुं योग्यस्यामृतस्य च पुनरितरत इतरेषां कौस्तुभादीनां जन्माविर्भावं स्वराडिन्द्रोऽन्वयात्प्राप । यत्र यस्मिन्कूर्मरूपे हरावाविर्भूते सति त्रयाणां देवदैत्यमुनीनां सर्गो निश्चयोऽमृताद्याप्तिरूपोऽमृषा सत्यो जातः । यथाऽविनिमयो वस्तुयाथात्म्यबोधोऽमृषा । यः कूर्मः कं सुखं वान्ति प्राप्नुवन्ति देवादयो यत्र सः कविर्मंदरगिरिस्तस्मै कोर्थस्तं भर्तुं धारयितुं सत्यंपरं देहं कमठाकृतिं तेने । कवय इति तुमोऽप्रयुक्तस्येति कर्मणि चतुर्थी । सच्छब्दः पृथिव्यप्तेजसां वाची त्यच्छब्दस्तु वाय्वाकाशवाची 'सच्चत्यच्चाभवदि'ति श्रुतौ श्रुतः । तथा च सच्च त्यच्च सत्यं पञ्चभूतसमुदायस्तेन पूर्यत इति सत्यंपरो देहस्तम् । यस्मिन्कूर्मरूपे सूरयोपि भगवन्महित्वं कथंचिज्जानंतोपि मुह्यन्ति । अहो कूर्मपृष्ठस्य नतोन्नतत्वात्तत्र कथं मन्दरः स्थितिं लेभ इत्यादिरूपम् । यद्वेयद्विस्तृतदेहोयं कथं जात इत्येवंरूपं मोहमाप्नुवन्ति । यश्च तेजोवारिमृदामेतच्छब्दोपलक्षितानां देवदैत्यनराणामर्थेषु कार्येषु अभिज्ञः अनया रीत्यैवैतत्सेत्स्यति नान्यथेति ज्ञानवान् । कूर्मरूपं विना जलगतमन्दरो गिरिरुपरि नायास्यतीत्येवं विचार्यैव हरिः कूर्मरूपं दधारेति भावः । कथंभूतं देहं ब्रह्महृदा विरिञ्चिप्रियेण स्वेन धाम्नाऽसाधारणशक्त्या निरस्तमपास्तं देवादीनामुदधिमथनाशक्यत्वरूपं कुहकं येन स तथा तम् । कूर्माविर्भावतः पूर्वं देवा दैत्याश्च समुद्रमथने संशयिताः कथममृतावाप्तिर्न इति ततश्च हरिणा कूर्मरूपेणाविर्भूय तत्संशयो निवर्त्तित इति भावः । इति कूर्मपक्षः ।। १८ ।।

अथ वामनपक्षः ।। वयं तं वामनं सदा हृदा धीमहि । तं कं यत्र त्रयाणां पादन्यासानां सर्गोऽमृषा सत्य एव । यद्वा त्रयाणां लोकानां सर्गोऽमृषा 'ददर्श लोकत्रयमेव तत्रे'त्युक्तेः । यथाऽविनिमयस्तात्त्विकं रूपममृषा पृथिव्यादेरिति शेषः । 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि'ति श्रुतेः । तेजो वान्तीति तेजोवाः अरीन्मृद्नंतीत्यरिमृदस्तेजोवाश्च तेरिमृदश्च तेजोवारिमृदस्तेषां देवानामितरत इतरेषु दैत्येषु । अत्र सप्तम्यर्थे तसिः । जायते जगदेभिरिति जन्मानि पृथिव्यादीनि पञ्चभूतानि । अत्र साधने जनेर्मन् । तेषामाद्यस्य पृथिवीरूपस्य निमित्तमिति शेषः । अन्वयात् प्राप । यातेर्लङ् । यो वामनोऽर्थेषु देवप्रयोजनेष्वभिज्ञो ज्ञाता विना छलं बलिर्न जेय इत्यादिवृत्तज्ञः । यः स्वेनासाधारणरूपेण राजते संकल्पग्रहणानन्तरं प्रकाशत इति स्वराट् । 'जले तु पतिते हस्ते वामनोऽभूदवामनः ।' इति हरिवंशोक्तेः । यो वामनो यतः यतते देवकार्यार्थमिति यतः । पचाद्यच् । य आदिकवये भार्गवाय ब्रह्म 'ब्रह्मन्संतनु शिष्यस्य यच्छिद्रं वितन्वतः । यत्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत् ।।' इत्यादिरूपं ज्ञानं तेने । 'उशना भार्गवः कविरि'त्यमरः । यद्वा ब्रह्मशब्दो ब्राह्मणमहत्त्वपरः । तेनैव वाक्येन ब्राह्मणमहत्त्वं तेने । यस्मिन्वामने सूरयो बलिप्रभृतयोपि बालोयं किं करिष्यतीति मुह्यन्ति । किंभूतं स्वेन धाम्ना स्वस्वरूपप्रकाशेन निरस्तं कुहकं मर्त्यलक्षणं कपटं येन तम् । पुनः सत्यं पातीति सत्यपो बलिः । अलुक्समास आर्षः । यद्वा खप्रत्यये मुम् । तस्मै रात्यात्मानं सुतलैश्वर्यं भावीन्द्रपदं वेति सत्यंपरस्तम् । डप्रत्ययः । वामनं मोहनाशाय भजेतेति वाराहोक्तेस्तद्ध्यानं व्यासदेवेन कृतमादावित्ति ज्ञेयमत्र । इति वामनपक्षः ।। १९ ।।

अथ वाराहपक्षः ।। वयं तं वाराहं सदा हृदा धीमहि । तं कं यत्र त्रयाणां प्रातःसवनमध्याह्नसवनसायंसवनादीनां सर्गोऽमृषा त्रिरूपरसायामित्युक्तेः सवनान्यवस्थितिरित्युक्तेश्च । यद्वा यत्र त्रयाणां वेदानां सर्गोऽमृषा । 'त्रयीमयं रूपमिदं च सौकरमि'ति वक्ष्यमाणत्वात् । यथाऽविनिमयो यथार्थज्ञानरूपोऽमृषा । यद्वा निश्चयेन मीयते प्रक्षिप्यते हितैषिभिरिति निमयः पापसंघः । डुमिञ्प्रक्षेपणेऽतः स्वराद इत्यप्रत्ययो बोध्यः । विगतो निमयो येन स विनिमयः पवित्रताहेतुर्धर्मादिः न विनिमयः पवित्रताहेतुर्येस्मात्सोऽविनिमयः । 'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ।' इति श्रीमुखोक्तेः । सत्यं ज्ञानमनंतं ब्रह्मे ति श्रुतेश्च ज्ञानं सत्यमेव तदन्यन्मृषेति । 'किंच बुद्धींद्रियार्थरूपेण ज्ञानं भाति तदाश्रयमि'ति द्वादशे ज्ञानस्य सत्यत्वं वक्ष्यति । यो वाराहः आद्यस्य ब्रह्मणः सकाशाज्जन्माविर्भावमन्वयात्प्राप । यत इति प्रथमार्थे तसिः । आद्यस्येति पंचम्यर्थे षष्ठी । 'सृजतो मे क्षितिर्वार्भिः प्लाव्यमाना रसां गता । अथात्र किमनुष्ठेयमस्माभिः सर्गयोजितैः ।। इति चिंतयतस्तस्य ब्रह्मणः सहसानघ ।। वाराहतोको निरगादंगुष्ठपरिमाणतः ।।' इति तृतीये वक्ष्यति । यो वाराहः इताः संसारापेक्षया ज्ञानिनो रता अनुरक्ता यस्मिन्स इतरतः । ज्ञानिनामहमेवेष्ट इति गीतोपनिषदुक्तेः । योऽर्थेषु भूम्युद्धरणदैत्यवधादिष्वभिज्ञः ज्ञानवान् । यः स्वेनैव प्रलये राजत इति स्वराट् ईक्षाज्ज्योतिरित्युक्तेस्तदा सूर्यादिप्रकाशो नास्तीति प्रतीयते ।। यः के जले रेति गच्छति प्रलये इति कविर्भूमिस्तस्मै आदि ब्रह्म वाराहपुराणरूपम् ।

यद्वा आदौ के जले वेति गच्छतीत्यादिकविर्हिरण्याक्षस्तस्मै ब्रह्म 'एते वयं न्यासहरा रसौकसामि'त्यादिना निजमहत्त्वं तेने। अत्र ब्रह्मशब्दो ब्रह्ममहत्त्वपरो लक्षणया बोध्यः। मुख्यार्थबाधे गौणार्थकल्पनं लक्षणेति केचित्। वस्तुतस्तु शक्यसम्बंधो लक्षणा। सा द्विधा केवललक्षणा लक्षितलक्षणा चेति। आद्या त्रिधा जहल्लक्षणाऽजहल्लक्षणाजहदजहल्लक्षणाभेदात्। शक्यार्थपरित्यागेन तत्संबंध्यर्थान्तरे वृत्तिर्जहल्लक्षणा, यथा गंगायां घोषः प्रतिवसति। अत्र गंगापदस्य स्वसंबंधिनि तीरे जहल्लक्षणा। शक्यार्थापरित्यागेन तत्संबंध्यर्थान्तरे वृत्तिरजहल्लक्षणा, यथा मंचाः क्रोशंतीति। अत्र मंचपदस्य स्वार्थापरित्यागेन मंचस्थपुरुषेषु अजहल्लक्षणा। शक्यैकदेशपरित्यागेनैकदेशेनुवृत्तिर्जहदजहल्लक्षणा, इयमेव भागत्यागलक्षणा चोच्यते, यथा सोयं देवदत्त इत्यत्र सोयमितिपदयोः केवलदेवदत्तपिंडे। अत्र तच्छब्दस्तत्सदृशतत्कालविशिष्टदेवदत्तपिंडवाचकः। इदं शब्दस्त्वेतद्देशैतत्कालविशिष्टदेवदत्तपिंडवाचकः। तदुक्तं 'इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम्। अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्॥' इति मनोरमादौ। यथा तत्त्वमसीत्यत्र तत्त्वंपदयोरखंडचैतन्ये। अत्र च मायोपहितचैतन्यं तत्पदवाच्यार्थः। स्थूलसूक्ष्मशरीरोपहितचैतन्यं त्वंपदवाच्यार्थः। ततश्च तत्पदवाच्यैकदेशो माया तत्परित्यागेनैकदेशे चैतन्ये वृत्तिस्तत्पदस्य एवं त्वंपदवाच्यार्थैकदेशस्थूलसूक्ष्मशरीरादिस्तत्परित्यागेनैकदेशे चैतन्ये वृत्तिस्त्वंपदस्येति भावः। द्वितीयामाह शक्यपरंपरासंबंधो लक्षितलक्षणा। यथा द्विरेफपदस्य मधुकरे, द्विरेफपदस्य शक्यं रेफद्वयं तस्य भ्रमरपदेन संबंधस्तस्य मधुकरेण संबंधः, तथा च द्विरेफपदस्य मधुकरेण परंपरासंबंधो लक्षितलक्षणेत्यर्थः। किंच गौण्यपि लक्षितलक्षणैव यथा सिंहो देवदत्त इति। अत्र सिंहपदस्य सिंहमृगः शक्यस्तस्य क्रौर्येण संबंधः क्रौर्यस्य देवदत्तेन संबंध इति। लक्षणाबीजं तु क्वचिदन्वयानुपपत्तिः क्वचित्तात्पर्यानुपपत्तिरिति ध्येयं मनीषिभिः। अत्र वक्तव्यं तु बह्वस्ति प्रकृतमधुनानुसरामः। यस्मिन्वाराहे सूरयो मुनयोपि मुह्यंति 'किमेतत्सौकरव्याजं दिव्यं सत्त्वमवस्थितम्।' इत्यादितर्करूपं मोहं प्राप्नुवंति। किंभूतं तेजोवारिमृदां देवानां परं पालकं सर्वेश्वरत्वात् एष सर्वेश्वर इति श्रुतेः। पुनः स्वेन धाम्ना तेजसा निरस्तः कुहकः मायाविहिरण्याक्षदैत्यो येन तम्। 'मैनं मायाविनं दृप्तं निरंकुशमसत्तममि'ति ब्रह्मोक्तेर्दैत्यस्य मायावित्वं ज्ञायते। इति वाराहपक्षः॥२०॥

अथ परशुरामपक्षः॥ वयं तं परं परशुरामं सदा हृदा धीमहि। नामैकदेशोच्चारणेन सर्वनाम्नो ग्रहणं यथा भीम इति कथनेन भीमसेनबोधस्तथात्र परशब्देन परशुरामबोध इति। तं कं यत्र त्रयाणां देवानां सर्गो जपोऽमृषा। कुतः यतः आद्यस्य वेदस्य जन्माविर्भावो भविष्यतीति शेषः। यत्र यस्य स्थितिस्तत एव तदाविर्भाव इति न्यायेन परशुरामेऽधुना स्थित एव वेदाग्रे प्रकटीभविष्यतीति भावः। 'आगामिन्यंतरे ब्रह्मन्वर्तयिष्यति वै बृहत्।' इति नवमे वक्ष्यमाणत्वात्। यः स्वेन धाम्ना प्रतापेन तेजोमरणावसरेपि दैन्याभावस्तद्वांति गच्छंतीति तेजोवाः अरीन्मृदन्तीत्यरिमृदस्तेच ते तेजोवारिमृदः क्षत्रियास्तेषां तथा अन्वयं वंशमत्ति नाशयतीत्यन्वयान्। अत्तिरत्र नाशेऽनेकार्थत्वात्। यद्वादनमपि नाश एवादर्शनसाम्यात्। 'दुष्टक्षत्रं भुवो भारमब्रह्मण्यमनीनशत्।' इत्यग्रे वक्ष्यति। योर्थेषु वेदार्थेषु देवप्रयोजनेषु वा यथा यथावदभिज्ञः। यद्वार्था यथार्था व्याघातरहिता अरिच्छेदकरा इति यावत्, य इषवो बाणास्तेषामभिज्ञः अत्रेषुशब्दः शस्त्रमात्रोपलक्षकः। यः स्वेनान्यानपेक्षतया राजते क्षत्रनाशादाविति स्वराट्। यः कवये भीष्माय इतरतोऽन्येभ्योपि। अत्र चतुर्थ्यर्थे तसिः। ब्रह्म धनुर्वेदं तेने। किंभूतं आदि सनातनं ब्रह्ममुखोद्भूतत्वात्। तदुक्तं तृतीये 'आयुर्वेदं धनुर्वेदं गांधर्वं वेदमात्मनः। स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः॥' इति। धनुर्वेदश्च दीक्षासंग्रहसिद्धप्रयोगभेदात्पादचतुष्टयात्मकः। तत्र प्रथमपादे धनुर्लक्षणमधिकारिनिरूपणं च कृतम्, तत्र धनुःशब्दश्चापे निरूढोपि चतुर्विधायुधेषु वर्तते, तच्चचतुर्विधं मुक्तममुक्तं मुक्तामुक्तं मंत्रमुक्तं च। तत्र मुक्तं चक्रादि अमुक्तं खड्गादि मुक्तामुक्तं शल्यावांतरभेदादि मंत्रमुक्तं शरादि तत्र मुक्तमस्त्रमुच्यते अमुक्तं शस्त्रमुच्यते। तदपि ब्राह्मवैष्णवपाशुपत्याग्नेयादि भेदादनेकविधम्। एवं साधिदैवतेषु समंत्रेषु चतुर्विधायुधेषु येषामधिकारः क्षत्रियाणां तदनुयायिनां वा ते सर्वे चतुर्विधाः पदातिरथतुरगगजारूढा दीक्षाभिषेकसन्नहनमंगलकरणादिकञ्च सर्वमपि प्रथमपादे निश्चितम्। सर्वेषां शस्त्रविशेषाणामाचार्यस्य च लक्षणपूर्वकसंग्रहप्रकारो दर्शितो द्वितीयपादे। गुरुसंप्रदायसिद्धानां शस्त्रविशेषाणां पुनः पुनरभ्यासो मंत्रदेवतासिद्धिकरणमपि निरूपितं तृतीयपादे। एवं देवतार्चनाभ्यासादिभिः सिद्धानामस्त्रविशेषाणां प्रयोगश्च चतुर्थपादे निरूपितः। क्षत्रियाणां स्वधर्माचरणं युद्धं दुष्टदस्युचौरादिभ्यः प्रजापालनं च धनुर्वेदस्य प्रयोजनमित्यलमतिप्रसंगेन। यत्र धनुर्वेदे सूरयोपि विद्वांसोपि विना गुरूपदेशं इदमस्त्रं कथं प्रयोज्यं कथं वा संहार्यमित्येवं मुह्यंति। यद्वा यस्मिन्परशुरामे सूरयोपि क्षत्रियामारणीयोयं द्विजात्मजः किमस्मत्तो गां ग्रहीष्यत्यल्पबल इति मुह्यंति। किंभूताः विगता निमिरिक्ष्वाकुतनयो नृपो येषां ते विनिमयश्चंद्रवंशोद्भूतहैहयजा इत्यर्थः। 'निमिरिक्ष्वाकुतनयो पापे दुःखे च मारणे।' इति धरणिदेवकोशान्निमिः सूर्यवंश्यः। किंभूतं परं निरस्ताः कुहका दुष्टा नृपा येन तथा तम्। पुनः सत्यं चिरजीवित्वेनाद्यापि वर्तमानम्। चिरजीविनस्तु 'अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः। मार्कण्डेयः पर्शुरामः कृपश्च चिरजीविनः॥' इति परशुरामपक्षः॥ २१॥

अथ संकर्षणपक्षः। वयं तं संकर्षणं सदा हृदा धीमहि। तं कं यत्र त्रयाणामस्योत्पत्तिस्थितिसंयमानां सर्गो निश्चयोऽमृषा। यद्वा त्रयाणां गुणानां सर्गः संबंधो मृषा। 'यमाहुरस्य स्थितिजन्मसंयमं त्रिभिर्विहीनं यमनंतमृषयः।' इत्युभयव्याख्याने मानं पंचमे वक्ष्यति। यथा तेजोवारिमृदां विनिमयो देहादि मृषाऽमृषा च विचारभ्रांतिदशयोः। यतः संकर्षणादाद्यस्य ब्रह्मणो जन्माभूदिति

शेषः। 'यस्याद्य आसीद् गुणविग्रहो महान्विज्ञानधिष्ण्यो भगवानजः किल।' इत्यग्रे पंचमे वक्ष्यति। यश्च अन्वयो जन्मादि येषां स्थितिक्लेशसंयमानां तेऽन्वयादयस्तांस्तरंति संप्लवंतीत्यन्वयादितरा विवेकिनस्तेषामन्वयादितरतः। अत्र षष्ठ्यर्थे तसिः। अर्थेषु मनोरथेष्वभिज्ञः तत्संपादक इत्यर्थः। विवेकिनां मनोरथो हि हृदयग्रंथ्यादिभेदनरूपः। तदुक्तं 'य एष एवमनुश्रुतो ध्यायमानो मुमुक्षूणामनादिकालकर्मवासनाग्रथितमविद्यामयं हृदयग्रंथिं सत्त्वरजस्तमोमयमंतर्हृदयंगत आशु निर्भिनत्ती'त्यपि तत्रैव वक्ष्यति। यः स्वराट्। तदुक्तम् इति श्रीदशमे' 'अग्रतो भविता देवः सहस्रवदनः स्वराट्।' इति। य आदिकवये सनत्कुमाराय ब्रह्म भागवतरूपम्। 'इदं भागवतं नाम पुराणं ब्रह्मसम्मितम्॥' इत्युक्तः। तेने विस्तारितवान्। 'प्रोक्तं किलैतद्भगवत्तमेन निवृत्तिधर्माभिरताय तेन। सनत्कुमाराय स चाह पृष्टः सांख्यायनायांगधृतव्रताय॥' इति तृतीये वक्ष्यति। यस्मिन्भागवते सूरयो विद्वांसोपि भक्तिं विना मुह्यन्ति। 'भक्त्या भागवतं शास्त्रं न व्युत्पत्त्या न टीकया। गृहिण्यैव गृहं प्रोक्तं न पुंश्चल्या न वेश्यया॥' इत्यभियुक्तोक्तेः। 'धनञ्जये हाटकसम्परीक्षा विपत्तिकाले गृहिणीपरीक्षा। महाहवे शस्त्रभृतां परीक्षा विद्यावतां भागवते परीक्षा॥' इत्युक्तेश्च। यद्वा यस्मिन्संकर्षणेपि यादवोऽयमिति वसुदेवसूनुरिति मोहं प्राप्नुवन्तीत्यर्थः। किंभूतं स्वेन धाम्नाश्रयेण कृष्णेन तेजसा वा निरस्ताः कुहकाः प्रलंबाद्या येन तम्। यद्वा निरस्तं कुहकं मर्त्यलक्षणं यस्य श्रीकृष्णेन तम्। 'अहो अमी देववरामरार्चितं पदाम्बुजं ते सुमनःफलार्हणम्। नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म यत्कृतम्॥' इत्यादिना श्रीदशमे श्रीकृष्णो वक्ष्यति। पुनः किंभूतं सत्यं यद्रूपं ध्रुवमकृतमिति पञ्चमे वक्ष्यति। पुनः परं सर्वोत्कृष्टं शेषरूपेण भूगोलधारणादित्यर्थः। 'मूर्द्धन्यर्पितमणुवत्सहस्रमूर्ध्नो भूगोलं सगिरिसरित्समुद्रम्। आनंत्यादनिमितविक्रमस्य भूम्नः को वीर्याण्यधिगणयेत्सहस्रजिह्वः॥' इति। यद्वा सर्वेश्वरत्वात्परं 'सर्वे वयं यस्य वशे महात्मनः स्थिताः शकुन्ता इव सूत्रयन्त्रिताः। सृजाम सर्वे यदनुग्रहादिदमि'ति शिवोक्तेः॥ इति संकर्षणपक्षः॥ २२॥

अथ बुद्धपक्षः॥ वयं तं बुद्धं धीमहि। तं कं यत्र बुद्धे त्रयाणां वेदानां सर्गः यस्मात्स त्रिसर्ग ईश्वरः। 'ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥' इति श्रुतेः। तस्य निरीश्वरवादित्वात् तन्मते मृषैवेश्वरः। तन्मतं त्वित्थम्—चत्वारः किल बुद्धस्य शिष्याः सौत्रान्तिकवैभाषिकयोगाचारमाध्यमिकभेदात्। तत्र बुद्धेनाद्ययोर्बाह्यार्थेष्वभिनिवेशमालोक्य तदाशयानुसारेणैव सर्वशून्यतालक्षणे तत्त्वे तयोर्बुद्धेरवताराय बाह्यार्थवादमभ्युपेत्य राद्धान्तोभिहितः। तृतीयस्य त्वीषत्परिपक्वचित्तस्य विज्ञानमात्रास्तित्वमात्रेणा। चतुर्थमुख्याधिकारिणस्तु साक्षादेव शून्यवाद उपदिष्टः। यथाहुः 'देशनालोकनाथानां सत्त्वाशयवशानुगाः। भिद्यन्ते बहुधा लोके उपायैर्बहुभिः पुनः॥ गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणा। भिन्नापि देशना भिन्नशून्यताद्वयलक्षणा' इति। देशना उपदेशः लोकनाथानां बुद्धानां पूजायां बहुत्वं गाम्भीर्यं गूढाभिप्रायता उत्तानता स्फुटोक्तिरित्यर्थः। तत्र सौत्रान्तिकमते आन्तरे विज्ञाने घटपटाद्याकारवैचित्र्यस्यानुभविकस्य तत्तदर्थसादृश्यातिरिक्तस्य दुर्वचत्वादसति बाह्यार्थे ज्ञानेऽर्थसादृश्योदयासम्भवात्तन्निमित्तभूतो बाह्यार्थो विज्ञानवैचित्र्यादनुमीयते न त्वसौ प्रत्यक्षः। इति। वैभाषिकमते त्वसति विज्ञानस्य बाह्यार्थसम्बन्धे तदाकारत्वासम्भवात्सति च प्रकाशसम्बन्धे बाह्यार्थप्रकाशस्यावर्जनीयत्वात्प्रत्यक्षगोचरोपीति। योगाचारमते क्षणिकमेव विज्ञानम्। तत् द्विधा प्रवृत्तिविज्ञानमालयविज्ञानं च। तत्रायं घट इति प्रवृत्तिविज्ञानम्। सुषुप्तावहमित्यालयविज्ञानम्। सुखादिकमस्यैव विकारस्तदतिरिक्तवस्तुन एवाप्रसिद्धेः इति। माध्यमिकमते सुषुप्त्यवहितोत्तरक्षणे उत्थितस्य सुषुप्तावहं नास्मित्यनुभवाच्छून्यमेवात एव सर्वं मिथ्यैवेत्यलं प्रपञ्चेन। अथ प्रकृतमनुसरामः। यथाद्यस्य वेदविहितस्य कर्मणोऽविनिमयो याथार्थ्यं मृषाऽसत्यं तन्मत एव यतो वेदविहितमृषात्वनिश्चयाज्जन्म भवति। जन्मशब्दः संसृतिपरः। 'वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे। नैष्कर्म्यांल्लभते सिद्धिं रोचनार्था फलश्रुतिः॥' इत्येकादशे वक्ष्यमाणत्वात्। वेदविहिताचरणतो मोक्षोऽन्यथा नेति भावः। यो बुद्धं इं कामं तरतीतरः। अत्र प्रथमार्थे तसिः। 'मारजिल्लोकजिज्जिन' इत्यमरात्। यश्च स्वेषु निजानुवर्त्तिष्ववैदिकेषु राजत इति स्वराट्। योर्थेषु देवप्रार्थितवेदग्रहणादिष्वभिज्ञः पाखण्डवेषणैत्र श्रुतिविगानादिना दैत्या वंचनीया इत्थं विज्ञ इति भावः। यश्च तेजोवारिमृदां धाम्ना, पुरेण चरद्भयो दैत्येभ्य इति शेषः। 'धाम स्याद्गृहतेजसोः। पुरं च पोषके धामे'ति व्याडिः। एकत्वं तु सामान्याभिप्रायेण धामभिरित्यर्थः। अब्रह्म वेदविरुद्धं पाखण्डं स्वर्गः कुत्र च कुत्र दैवतकुलं कुत्राथ जन्मान्तरमित्यादिरूपम्। यद्वा 'यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः। यतस्ततः उपादाय ऋणं कृत्वा घृतं पिबेत्॥ देहं विना न चात्मास्ति स सेव्यः सर्वथा नृणाम्। भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥' इत्यादिरूपं तेन वितस्तार। 'वेदाद्या नोपरीकार्या वंचनार्थः कृता हि सः। त्रयो वेदस्य कर्तारो मुनिभंडनिशाचराः॥' इत्यादिरूपं वा। किं कर्तुं आदिकवये आदिकविं वेदमपहर्तुम्। तुमोऽप्रयुक्तस्य कर्मणि चतुर्थी। 'सुवर्णं तेजसा रूपं रजतं वारिरूपकम्। लोहं तु श्यामं भूरूपं ताम्रं वादित्यरूपभृक्॥' इति स्मृतिसंग्रहोक्तेस्तेजोवारिमृच्छब्दाः स्वर्णरूप्यलोहपराः। 'देवद्विषां निगमवर्त्मनि निष्ठितानां पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः। लोकान्घ्नतां मतिविमोहमतिप्रलोभं वेषं विधाय बहु भाष्यत औपधर्म्यम्॥' इति द्वितीयस्कन्धात् यस्मिन्पाखण्डे सूरयोपि मुह्यन्ति 'धर्मे इत्युपधर्मेषु नग्नरक्तपटादिषु। प्रायेण सज्जते भ्रान्त्या पेशलेषु च वाग्मिषु॥' इति चतुर्थे वक्ष्यति। किंभूतं स्वेन हृदा परमसंगमवैदिकेभ्य इति शेषः। पुनः सत्यं सत्ये तिष्ठतीति सत्यः, तद्धिते ण्यप्रत्ययः मत्वर्थीयोच् वा।

प्रमाणं सत्यलौकिक इति कपिलोक्तेः। सत्यशब्दो वेदपरः, पुनः निरस्तं दूरीकृतं कुहकं पाखण्डोऽयमिति कपटं येन स्वपृष्ठदर्शनादिनेति निरस्तकुहकस्तं वेदनिन्दनानन्तरं त्यक्तवेदेभ्यो दैत्येभ्यो गृहीतवेदैर्वेदवादिभिर्दर्शनार्थं प्रार्थितेन स्वपृष्ठमेव दर्शितं नतु स्वमुखं लोकसंग्रहार्थमिति भावः। 'वेदं वेदोदितं यो ना निंदेतास्य मुखं सदा। न निरीक्ष्यं निरीक्षेच्चेत्प्रायश्चित्ती भवेन्नरः॥' इति स्मृतेः। इति बुद्धपक्षः॥ २३॥

कल्किपक्षमाह। वयं तं कल्किं सदा हृदा धीमहि। तं कं यत्र त्रयाणां साधुत्राणखलप्रहाणधर्मसंस्थापनानां सर्गः स्वभावोऽमृषा। 'संरक्षणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय कल्किरूपो भवाम्यहम्॥' इति कल्किपुराणात्। यद्वा त्रयाणां लोकानां सर्गो मोक्षो रक्षणं वा मृषा। 'सर्गो रक्षणमोक्षयोरि'ति धरणिः। 'लोकानां सर्वतो विष्णुर्मोक्षदो रक्षकः सदे'त्युक्तेः। यथा तेजोवारिमृदामविनिमयस्तात्त्विकं रूपममृषा। यतः कल्केरागस्य चतुर्युगापेक्षया प्रथमस्य कृतयुगस्य चतुर्वर्गापेक्षयाद्यस्य धर्मस्य च जन्माभूत्। 'यदावतीर्णो भगवान्कल्किर्धर्मपतिर्हरिः। कृतं भविष्यति तदा प्रजासूतिश्च सात्त्विकी'ति द्वादशे वक्ष्यमाणत्वात्। 'सत्त्वं धर्मो रजोऽधर्मस्तमो ज्ञानमिहोच्यते' इत्येकादशे श्रीमुखोक्तेः। सात्विकी धार्मिकीत्यर्थः। चतुर्युगं तु कृतं त्रेता द्वापरं तु कलिरिति चतुष्टयमिति वक्ष्यति। चतुर्वर्गस्तु 'त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः।' इत्यमरः। यश्च सिंहल इति शेषः, अन्वयात् ययौ विवाहार्थं प्राप। 'द्वीपं सिंहलनामानं विवाहार्थं जगाम ह। कल्किर्धर्मपतिर्विष्णुरि'त्यपि कल्किपुराणे। यश्च अर्थानिच्छन्तीत्यर्थेपवस्तानभितो ज्ञापयति नियोजयतीत्यर्थेष्वभिज्ञः। अर्था अत्र धर्माद्या ज्ञेयाः। 'यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः।' इह तत्रैव प्रयुक्तत्वात् दुष्टनाशितयथोक्तधर्मादिप्रवर्तक इत्यर्थः। ज्ञा नियोगेऽतो डः। यश्च स्वेन स्वकीयेन सत्त्वेनेति यावत् राजत इति स्वराट्। 'स्वः स्वकीये धनेपि चे'ति कोशात्स्वशब्दः स्वीये। 'कल्किरूपो जगद्भर्ता निजसत्त्वेन राजते। रजस्तमो विनाश्यैव कलेरन्ते स्वराडतः॥' इत्यपि तत्पुराणे। यश्च कश्ये मरुसंज्ञराज्ञे देवापये च राज्ञे इतरतोऽन्येभ्योपि कलापग्रामवासिभ्य ऋषिभ्य आदि सदातनं ब्रह्म धर्मं तेने। 'देवापिः शंतनोर्भ्राता मरुश्चेक्ष्वाकुसंभवः। कलापग्राम आसाते महायोगबलान्वितौ॥ ताविहैत्य कलेरन्ते वासुदेवानुशिक्षितम्। वर्णाश्रमयुतं धर्मं पूर्ववत्प्रथयिष्यतः॥ इति अत्र चादन्य ऋषयो ज्ञेयाः। इति द्वादशे वक्ष्यमाणत्वात् वासुदेवानुशिक्षितावित्यनेन पूर्वं कल्किनोपदिष्टं तेभ्य इति भावः। इतरत इह चतुर्थ्यर्थे तसिः। यस्मिन्धर्मे सूरयो विद्वांसोपि मुह्यन्ति धर्मस्यातिसूक्ष्मत्वात्। तदुक्तमभियुक्तैः 'कानीनस्य मुनेः स्वबांधववधूवैधव्यविध्वंसिनो नप्तारः किल गोलकस्य तनयाः कुण्डाः स्वयं पाण्डवाः। तेमी पंच समानयोनिनिरताः ख्यातास्त्रिलोकीतले तेषां कीर्तनमेव पापशमनं धर्मस्य सूक्ष्मा गतिः॥' इति। तत्कीर्तनस्य पापशमकत्वं पाण्डवगीतायां 'धर्मो विवर्धति युधिष्ठिरकीर्तनेन पापं प्रणश्यति वृकोदरकीर्तनेन। शत्रुर्विनश्यति धनंजयकीर्तनेन माद्रीसुतौ कथयतां न भवंति रोगाः॥' इति। किंभूतं तं स्वेन धाम्ना तेजसा निरस्ताः कुहका नृपलिंगच्छदाः शूद्राद्या येन तं 'नृपलिंगच्छदो दस्यून्कोटिशो निहनिष्यति।' इति द्वादशोक्तेः। पुनः सत्यं संसारं त्याजयति भक्तानामिति सत्यस्तम्। 'संसारे च सत्ये चे'त्येकाक्षरीनाममालायाम्। 'संसारं त्याजयिष्येहं भक्तानां नृपतेयतः। अतः सत्यं ममाख्यात्र सत्यरूपतया तथा॥' इति पुराणात्। पुनः परं सर्वनियंतारं 'परः सर्वनियंता स्यात्सर्वश्रेष्ठः परो मतः॥' इत्यभिधानचिंतामणेः। इति कल्किपक्षः॥ २४॥

अथ हयग्रीवपक्षः॥ वयं तं हयग्रीवं सदा हृदा धीमहि। तं कं यत्र त्रयाणां वेदानां सर्गो रचनाऽमृषा। तस्य छंदोमयत्वात्। तदुक्तं 'छंदोमयो मखमयोखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतोस्य नस्तः॥' इति द्वितीये। यथा तेजोवारिमृदामविनिमयः स्वरूपममृषा। य आद्यस्य ब्रह्मणो यज्ञ इति शेषः जन्माविर्भावमन्वयात्। यद्वा इः कामनासमूहस्तीर्यतेऽनेनेतीतरो यागः। 'स्वर्गकामो यजेत्' 'कारीर्या वृष्टिकामो यजेदि'त्यादि श्रुतेः, तस्मिन्नितरतः। सप्तम्यर्थे तसिः। 'इः कामे कामनाव्यूहे लक्ष्मीरी च वसुंधरे'ति नाममाला। तथा च 'सत्रे ममास भगवान् हयशीरषाथो साक्षात्सयज्ञपुरुषस्तपनीयवर्णः।' इति द्वितीये ब्रह्मा वक्ष्यति। यो हयग्रीव आदिकवये ब्रह्मणे ब्रह्म वेदं तेने 'तस्मै भवान् हयशिरस्तनुवं च बिभ्रद्वेदद्रुहावतिबलौ मधुकैटभाख्यौ। हत्वानयच्छ्रुतिगणांस्तु रजस्तमश्च सत्त्वं तव प्रियतमां तनुमामनंति॥' इति सप्तमे प्रह्लादो वक्ष्यति। यतो येन ब्रह्मणा वेदेन स्वराट् ब्रह्मा अर्थेषु जगद्रचनादिष्वभिज्ञोभूदिति शेषः। 'वेदं प्राप्य हरेर्धाता चक्रे विश्वं यथा पुरा' इति पुराणात्। यस्मिन्वेदे सूरयोऽन्याखिलशास्त्रप्रवीणा गौतमादयोपि मुह्यंति। अन्यथा व्याख्यातृत्वादन्यथा व्याख्यातृत्वं तेषां वास्तवभेदवादित्वात्। तत्त्वमसीत्यादिषु तस्य त्वमसीत्यर्थस्तथैव दर्शनात्। किञ्च तदनुयायिना पञ्चाननभट्टेनापि मुक्तावल्यां भेदनाशेपि व्यक्तिद्वयं स्यास्यत्येव मुक्तावपि भेदांगीकृत इति किं बहुना। किंभूतं स्वेन धाम्ना तेजसा निरस्तौ कुहकौ मधुकैटभौ येन स तथा तम्। अनेन शक्तिकल्पितः शक्त्याश्रयेण हरिणा तौ हताविति प्रवादो निरस्तः। अधिकरणस्य शक्तिमतोऽपेक्षया शक्तेराधेयत्वेनाल्पत्वादिति भावः। 'तावप्यतिबलोन्मत्तौ महामायाविमोहितौ' इत्युक्तेर्देवावित्र भगवत्या मोहितौ न तु किञ्चिद्धतस्तया कृतमिति। पुनः किंभूतं सत्यं निजभाषितं पिपर्ति पालयतीति सत्यं। परस्तम्। तदुक्तं मार्कंडेये 'आवां जहि न यत्रोर्वी सलिलेन परिप्लुता।' इति ताभ्यामुक्तेन हरिणा 'तथेत्युक्त्वा भगवता शंखचक्रगदाभृता। कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः॥' इति हयग्रीवपक्षः॥२५॥

अथ दत्तात्रेयपक्षः ॥ वयं तं दत्तात्रेयं सदा हृदा धीमहि । तं कं यत्र त्रयाणामाध्यात्मिकाधिदैविकाधिभौतिकानां पापानां सर्गो निश्चयो मृषा । 'आध्यात्मिकादिभिर्दुःखैरविमुक्तस्य कर्हिचित् । मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किम् ॥' इति तदुक्तेर्मर्त्यस्य ते संति नतु तस्य हरेरवतारत्वात् । 'आध्यामिकाद्यास्तापास्तु विज्ञे पुंसि न संति चेत् । श्रीविष्णोरवतारेषु कथं तेषां समुद्भवः ॥' इत्यभियुक्तोक्तेः । यथा तेजोवारिमृदां विनिमयो व्यत्यासो मृषा आदेर्ब्रह्मणोऽपत्यमात्रेस्तस्यापत्यं । पंचम्यर्थे षष्ठीयम् । अत्रेः सकाशाज्जन्माविर्भावमन्वयात् प्राप । यश्चात्रेय इतरत इता गता रतिर्विषयेषु यस्येतीतरतः । अत्र समासांतो डः । 'विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात् ।' इति सप्तमे स एव वक्ष्यति । यश्चार्थेषु गुरुतः शिक्षणेषु परितोषाभ्यासादिष्वभिज्ञः । 'कविः कल्पो निपुणदृक् चित्रप्रियकथः समः ।' इति तं प्रति प्रह्लादोक्तेः । यः स्वस्मिन्नात्मस्वरूपे नित्यशुद्धचिद्रूपे राजते न तु वर्णाश्रमादिनेति स्वराट् । अज्ञाज्ञेय इत्यर्थः । तदुक्तं सप्तमे 'कर्मणा कृतिभिर्वाचा लिंगैर्वर्णाश्रमादिभिः । न विदंति जना यं वै सोसाविति नवेति वा ॥' इति । यः कवये बुद्धिमते अलर्काय नृपतये आदि प्राक्तनं ब्रह्म ज्ञानं तेने । 'षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोनसूयया । आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥'' इत्यग्रे वक्ष्यति । यस्मिन्ब्रह्मणि ज्ञानेऽद्वितीयरूपे सूरयोपि जैमिन्यादयो मुह्यंति । तैर्द्वैतस्य सत्यत्वेन स्वीकृतत्वात् 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तद्भूतानां क्रियार्थेन समाम्नाय' इति जैमिनिसूत्राभ्यामिति । 'यन्नामाकृतिभिर्ग्राह्यं पञ्चवर्णमबाधितम् । व्यर्थेनाप्यर्थवादोयं द्वयं पंडितमानिनाम् ॥' इत्यग्रे वक्ष्यमाणत्वाच्च । किंभूतं स्वेन निजेन धाम्ना प्रकाशेन निरस्तं कुहकमज्ञानं मानापमानरूपं येन तम् । 'न मे मानापमानौ स्तो न चिंता गेहपुत्रिणाम् । आत्मक्रीड आत्मरतिर्विचारामी'ति तदुक्तेः । पुनः किंभूतं परमसंगम् । 'विचरामि महीमेतां मुक्तसंगोनहंकृतिः ।' इति स एव वक्ष्यत्येकादशे इति दत्तात्रेयः ॥ २६ ॥ इति दत्तात्रेयपक्षः ।

अथ कपिलपक्षः ॥ वयं तं कपिलं सदा धीमहि । तं कं य आदेर्ब्रह्मणो जात आद्यः कर्दमस्तस्य गृहे जन्मान्वयात् । 'निजं वाक्यमृतं कर्तुमवतीर्णोसि मे गृहे ।' इति शेषः । यत इह प्रथमार्थे तसिः । योर्थेषु सांख्यीयपदार्थेष्वभिज्ञः । यः स्वान् राजयतीति स्वराट् । यः स्वानां पक्षपोषण इति वक्ष्यति तदाख्याने । यः कवये कं जलं वाति प्राप्नोतीति कविर्देवहूतिः 'तस्यास्तद्योगविधुतं मार्त्यं मर्त्यमभूत्सरित् ।' इत्यग्रे वक्ष्यमाणत्वात् । तस्यै । कविरित्यत्र कशब्दस्य भावप्रधानत्वं नीव्यादित्वात् । प्रत्ययो डिरत्र । देवहूत्यै इतरत इतरस्मै आसुरिसंज्ञमुनये आदि सनातनं ब्रह्म सांख्यं तेने । 'पंचमः कपिलो नाम सिद्धेशः कालविप्लुतम् । प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम् ॥' इति वक्ष्यति प्रथमे । यद्वा इतरत इतरेभ्य ऋषिभ्यो ब्रह्म योगं तेने । 'तमिमं ते प्रवक्ष्यामि योगं सर्वांगनैपुणम् । ऋषीणां श्रोतुकामानां यमवोचं पुरानघे ॥' इति तदीयोक्तेः । यद्यस्मिन्सांख्ये सूरयोपि मुह्यंति । 'दुर्बोधं तत्त्वनिवहं सांख्यं कपिलभाषितम् । निपुणास्तत्र मुह्यंति मादृशानां तु का कथा ॥' इत्यभियुक्तोक्तेः । यत्र यस्मिन्सांख्ये त्रयाणां प्रकृतिविकृतितदुभयानां सर्गोऽमृषा सत्यः । यथा तेजोवारिमृदामविनिमयः स्वभाविकाकारोऽमृषा । प्रकृतित्वं चाजन्यत्वे सति जनकत्वम्[1] । विकृतित्वं च तत्त्वविभाजकोपाध्यवच्छिन्नाजनकत्वे सति जन्यत्वम्[2] । तदुभयत्वं प्रकृतिविकृतित्वम् । तच्च तत्त्वविभाजकोपाध्यवच्छिन्नजनकत्वे[3] सति जन्यत्वम् । तदुक्तं सप्तत्यां ''मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥' इति । किंभूतं तं परं बुद्धेरिति शेषः । 'इन्द्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः । मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥' इति श्रीमुखोक्तेः । पुनः स्वेन निजेन धाम्ना प्रकाशेन निरस्ता दूरत एव विनाशिताः कुहकाः सगरात्मजा येन तम् । यद्यपि ते तेन न हतास्तथापि तदवज्ञया हतत्वात्तत्रोपचर्यते । यद्वा निरस्तः कुहकः संसारो येन तम् । 'यस्येरिता सांख्यमयी दृढेह नौर्यया मुमुक्षुस्तरते दुरत्ययम् ।' इति नवमोक्तेः । पुनः सत्यं ब्रह्मरूपत्वात् । ब्रह्म सत्यं जगन्मिथ्येत्युक्तेः ॥ इति कपिलपक्षः ॥ २७ ॥

अथ सनकादिपक्षः ॥ वयं तं सनकादिव्यूहं धीमहि । तं कं यत्र त्रयाणां कामक्रोधलोभानां सर्गो मृषा न वस्तुतः । जयविजयशापे क्रोधस्तु 'उष्णत्वमग्न्यातपसंनियोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य ।' इति महाकविवाक्यादागंतुको बोध्यो न तु स्वाभाविकः । कामलोभौ तु तत्र श्रुतप्रायावेव । यथा तेजोवारिमृदां विनिमयो विकृतिर्मृषा । यो व्यूह आद्यस्य ब्रह्मणः इः कामो वामनः तीर्यतेऽनेनेतीतरं तपस्तस्मादितरतः । अत्र पञ्चम्यर्थे तसिः । 'सर्वे कामा अवाप्यंते तपसैव सदाऽखिलैः' इति वचनात् । जन्मान्वयात्प्राप । 'तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनत्स्वतपसः स चतुस्सनोभूत्' इति द्वितीये वक्ष्यति । यो व्यूहोऽर्थेषु नैष्ठिककर्तव्यबृहद्व्रतेष्वभिज्ञः । 'चरंति श्रद्धया धीरा बाला एव बृहंति वा ।' इति चतुर्थे वक्ष्यति । यो व्यूहः स्वमात्मानं

१. मूलप्रकृतेरेव ।

२. तत्त्वविभाजकोपाधयः पृथिवीत्वादयस्तदवच्छिन्नाः पृथिव्यादयस्तेषामजनकत्वमिंद्रियादेर्गुणेभ्यो जन्यत्वं चास्ति ततस्तेषां विकृतित्वम् ।

३. तत्त्वविभाजकोपाध्यवच्छिन्नपृथिव्यादिजनकत्वेन शब्दादीनामहंकारजन्यत्वेन चोभयत्वम् ।

हरिरटत्युच्चारयत्यहर्निशमिति स्वराट्। 'हरिः शरणमेवास्ति मुखे येषां सदा वचः' इति पाद्मोक्तेः। तेषां हर्यवतारत्वात्स्वशब्दोत्र हरिपरः। यश्चादिकवये नारदाय ब्रह्म ज्ञानं तेने। तथाच श्रुतिः 'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमारः।' इति। तस्मै नारदाय तमसोऽविद्यायाः पारमात्मतत्त्वमित्यर्थः। यस्मिन्नात्मतत्त्वे सूरयो भरद्वाजादयोपि मुह्यंति। तथाच श्रुतिः 'त्वं हि नः पिता योस्माकमविद्यायाः परं पारं तारयसि श्रुतं मे भगवद्दृशेभ्यस्तरति शोकमात्मवित्।' इति अस्यार्थः। पिप्पलादं भरद्वाजादयः षड्ऋषय एवमूचुरग्रे स्पष्टोऽर्थः। किंभूतं स्वेन धाम्ना तेजसा निरस्तौ वैकुण्ठात्पातितौ कुहकौ जयविजयौ येन तम्। 'को वात्मवत्कुहकयोः परिशंकनीयः' इत्यत्र जयविजययोः कुहकशब्दस्तेनैव व्यूहेन प्रयुक्त इति तृतीये स्पष्टम्। पुनः सत्यं सत्यलोके प्रायः स्थितम्। 'सत्ये तु ब्रह्मणो लोके प्रायस्तिष्ठंति ते सदा। सनकाद्यास्तथा वेदाः सांगाः स्मृतिगणादिभिः ॥' इति संहितोक्तेः। पुनः परं पं परात्मतत्त्वं राति निजसेवकेभ्य इति परस्तम्। इह पशब्द एकदेशन्यायेन परात्मपरः। 'पं पालकं प्रभुं प्राहुरि'त्येकाक्षरीनाममालादावपि। इति सनकादिपक्षः ॥ २८ ॥

अथ गोवर्द्धनपक्षः। वयं तं गोवर्द्धनं सदा हृदा धीमहि। तं कं यत्र तेजोवारिमृदां विनिमयः प्रतीतिर्मृषा। 'प्रतीतौ च विनिमयोऽन्यथा भाने स्थितौ गतौ' इति कोशात्। तस्य रत्नमयत्वात्। रत्नमयत्वं तु गर्गसंहितायामुक्तम् 'राधाप्रार्थनया कृष्णहृदयादुत्थितं जलम्। पतितं रासभूमौ तद्ववृधे पर्वताकृति ॥ रत्नधातुमयं दिव्यं सुनिर्झरदरीवृतम्।' इति गिरिराजखंडे। किंच 'गोवर्द्धनो रत्नशिलामयोभूत्सुवर्णशृंगैः परितः स्फुरद्भिः ॥' इति। यथा त्रिसर्गस्त्रिगुणप्रपंचो मृषा। यद्वा त्रयाणामिंद्रद्रोणपुलस्त्यानां सर्गो निश्चयो भेदनप्रदानवाराणसीनयनरूपो मृषा। यो गोवर्द्धनः आत्मस्य स्थावरजंगमद्वये जंगमापेक्षया प्रथमस्य स्थावरस्य द्रोणगिरेः सकाशाज्जन्मान्वयात्। यश्च इं कामं तरतीतरो नैष्ठिकः। प्रथमार्थे तसिः। यद्वा अगादितीतः। गत्यर्थत्वादिणः कर्त्तरि क्तः। इतः सर्वगतः श्रीकृष्णः रतोनुरतोऽतीतरतः श्रीकृष्णक्रीडाश्रयः। तदुक्तम् 'परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान्हरिः। यस्मिन स्थितः सदा क्रीडामर्भकैः सह मैथिल ॥' करोतीति गर्गेण। योर्थेषु निजसपर्यापरायणार्थेषु अभितो ज्ञापयति नियोजयतीत्यभिज्ञः। तत्तदर्थप्रद इत्यर्थः। 'गोवर्धनः सेवककामपूरो रराज राजन्व्रजभूप्रदेशे।' इत्यपि संहितायाम्। यः स्वराट् गिरिचक्रवर्त्ती। तदुक्तं 'तदैव शैलाः किल मूर्तिमंतः सोपायना मेरुहिमालयाद्याः। नेमुर्गिरिं मंगलपाणयस्तं गोवर्द्धनं रूपधरं गिरींद्राः ॥' इति संहितायाम्। यद्वा स्वेन स्वातंत्र्येण राजते इति स्वरः कृष्णः स्वरोटत्यत्रेति स्वराट् कृष्णक्रीडाभूः। यो गोवर्द्धनः आदिसनातनं परमानंदरूपं च तत्कं सुखं चेत्यादिकं यस्मिन्नत्र परमानन्दमित्याद्युक्तेः, तद्वाति प्राप्नोतीत्यादिकविर्व्रजलोकः। आदिकं सुखमत्रेत्यादिकः कृष्णः स वसत्यत्रेत्यादिकविः। यद्वा आदिकं येषां ते आदिकाः कोककोलकौंचकलविंकादयस्ते वयः पक्षिणोऽत्रेत्यादिकविः तस्मै व्रजवासिने ब्रह्म सुखं स्वेन निजेन धाम्नाश्रयेण श्रीकृष्णेन तद्भृतिद्वारा तेने विस्तारितवान्। व्रजस्थानामादिसुखवत्त्वं तु श्रीकृष्णरूपत्वादेव। तदुक्तमादिपुराणे। 'व्रजे न गोपिकाभिन्ना मत्तः काश्चन पक्षिणः। गोपा गावश्च वृक्षाश्च ममैवानंदविग्रहम् ॥' 'ये व्रजस्थानहो भिन्नान्मत्तः पश्यन्ति केचन। न तेषां मूढबुद्धीनां गतिरिह परत्र च ॥' इति नारदं प्रति श्रीकृष्णेन। यस्मिन् गोवर्द्धने सूरयो विवेकिनो मुह्यंति मोदन्ते। मुहिरत्र मोदे तु धातूनामनेकार्थत्वात्। 'मोदन्ते मोदरूपत्वादत्र शैले विवेकिनः। गोवर्द्धने व्रजत्राणकरे' इति संहितायाम्। किंभूतं निर्गतोऽस्तो नाशो येषां ते निरस्ता अमरास्तेषां गोपरूपाणां कुहकं विस्मापकं अहो विचित्रोऽयं गिरिर्येन रूपी भूत्वा बलिर्गृहीत इत्याश्चर्यकरम्। पुनः सत्यं सत्यरूपाद्धरेराविर्भूतत्वात्। 'समुत्थितोसौ हरिवक्षसो गिरिर्गोवर्द्धनो नाम गिरीन्द्रराडि'ति संहितोक्तेः। पुनः परं कृष्णरूपत्वात्। तथाहि "गोवर्द्धनो न गिरिभिरन्यैस्तुल्यो महागिरिः। भृगो कृष्णस्वरूपोयं दर्शनस्पर्शनार्चनैः ॥ सर्वपापहरो ज्ञेयः स्मरणादपि दूरतः।" इत्यादिपुराणे भृगुं प्रति ब्रह्मवाक्यादुत्तमतरं सर्वतीर्थमयत्वाद्वा श्रेष्ठतमम्। सर्वतीर्थमयत्वं त्वस्य गर्गेणोक्तं संहितायाम् "सर्वतीर्थमयः शैलो रत्नधातुविचित्रितः। गोलोकादत्र संजातो द्वीपे शाल्मलिसंज्ञके ॥ पुलस्त्येन समानीतो व्रजे गोवर्द्धनाभिधे ॥" इति गोवर्द्धनपक्षः ॥ २९ ॥

अथ श्रीराधापक्षः ॥ वयं सदा हृदा तद्राधारूपं तेजो धीमहि। तत्किं यत्र तेजोवारिमृदां विनिमयो देहित्वेन प्रतीतिर्मृषा, तस्य ब्रह्मरूपत्वात्। 'तस्माज्ज्योतिरभूद् द्वेधा राधामाधवरूपकम्।' इति संमोहनतंत्रोक्तेः। 'अथैव राधावृषभानुपत्न्यामाश्रयैरूपं महसः पराख्यम्।' इति संहितोक्तेश्च। यतो यदर्थं श्रीराधार्थमिति यावत्। चतुर्थ्यर्थे तसिः। अस्य वासुदेवस्य जन्मादि। 'अकारो वासुदेवः स्यादि'त्येकाक्षरकोशे। अत्रादिना क्रीडाग्रहः। तदुक्तमादिपुराणे 'त्वदर्थं चागतः कृष्णः परिपूर्णतमः प्रभुः। गोलोकाद्राधिके गोपवेषेण क्रीडति त्वया ॥' इति। किञ्च 'सर्वेश्वरोप्यवततार श्रीराधाप्रियकारणात्। गोलोकवासिगोपाद्यैर्गोलोकेन सहैव हि ॥' इति। कुत्र जन्मादि। आये व्रजे अयनमायस्तस्मिन। व्रज गतावित्यनेन समानार्थत्वादयगतावित्यस्य तत्र यथा व्रजनं व्रज इति तथात्रापि। च पुनः यस्यान्वयात्सेवनादितरतः नैष्ठिको नारदोर्थेषु देवैरप्यलभ्यव्रजविनोदेष्वभिज्ञो जातः। एतच्चादिपुराणीयवृन्दावनमाहात्म्ये कन्यारूपेण नारदेन नन्दिनीमखीसमेतेन राधासेवनं कृतम्। तत्कृपया सर्वो व्रजानन्दोनुभूत इति स्फुटम्। यत्तेजः स्वेनासाधारणरूपेण राजत इति स्वराट्। तच्च नन्देनानुभूतं 'नन्दैव कोप्यर्कसमप्रदीप्रमागच्छतीवाचलती दिशासु। बभूव तस्यां वृषभानुपुत्रीं ददर्श राधां नवनन्दराजः ॥' इति संहितायाम्। यत्तेजः कन्यं

शिवाय आदि पूर्वमेव सत् ब्रह्म तन्नामसहस्रं तेने। अत्र नामनामिनोरभेदोपचारात्। तच्चोक्तं गोपालसहस्रनामस्तवे 'कृष्णेनोक्तं राधिकायै मयि प्रोक्तं तया शिवे।' इति पार्वतीं प्रतीशः। यत्रास्मिन् राधारूपे तेजसि सूरयो वैष्णवशास्त्रान्यशास्त्रज्ञा मुह्यन्ति। न हि राधाविवाहादि भागवतादिशास्त्रेऽतः सा कथं कृष्णपट्टराज्ञीति मुह्यन्ति। किंभूतं तेजः। स्वेन धाम्ना निरस्तः कुहकः श्रीदामाख्यो गोपो येन तत्तथा तया कदाचित्कपटं कुर्वाणः श्रीदामा शापेन गोलोकान्निरस्तः स एव शंखचूडोऽसुरोभूदिति ब्रह्मवैवर्तादौ। तत्रत्यवाक्यानि विस्तरभिया नोक्तानि। पुनः किंभूतं सत्यं रमादिलयस्थानत्वात्सदा सत्यगोलोकवासित्वाच्च "रः शब्दस्तु रमावाची लीलावाच्याऽऽध्वनिः स्मृतः। धरावाची धशब्दोत्र ह्याकारो विरजापरः॥ श्रीकृष्णस्य परस्यापि चतुर्धा तेजसोऽभवन्। श्रीलीलाभूश्च विरजाश्चतस्रः पत्न्य एव हि॥ संप्रलीनाश्च ताः सर्वा राधायां कुञ्जमन्दिरे। परिपूर्णतमां राधां तस्मादाहुर्मनीषिणः॥" इति संहितायाम्। पुनः किंभूतं परं सर्वोत्कृष्टम्। तदुक्तं "त्रैलोक्ये पृथिवी धन्या जम्बूद्वीपस्तु तत्र वै। तत्रापि भारतं खण्डं यत्र वृन्दावनं पुरम्॥ तत्र राधासखीवर्गस्तत्र राधा प्रिया मम॥" इति भागवतामृते कृष्णवाक्यं सर्वेशश्रीकृष्णवशकर्तृत्वेन वा परम्। तदुक्तमादिपुराणे "यद्भीपा वाति पवनो भानुस्तपति यद्भिया। इन्द्रश्चन्द्रस्तथा कालः स्वे स्वे कार्ये चरन्ति हि॥ स एव परमो विष्णुः श्रीकृष्णाख्यस्तु यद्वशे। सा राधिका परं दैवं न ततोस्त्यधिकं परम्॥" इति कृष्णस्य पूज्यत्वादादावुच्चार्यत्वाच्च। 'गृहे राधा वने राधा राधिका भोजने गतौ। रात्रौ राधा दिवा राधा राधैवाराध्यते मया॥' इत्यादिका बहुश्लोका ब्रह्माण्डे उक्ताः कृष्णाराध्यत्वे प्रमाणीभूताः। "आदौ राधां समुच्चार्य पश्चात्कृष्णं वदेत्सुधीः। अन्यथोच्चारणादेव पातकी ना प्रजायते॥" इति संहितोक्तेः। "गौरं तेजो विना यस्तु श्यामतेजः समर्चयेत्। जपेद्वा ध्यायते वापि स भवेत्पातकी शिव॥" इति संमोहनतन्त्राच्चादावेव राधा पूज्योच्चार्या चेति प्रतीयते। किं बहुना वाग्जालेन। इति राधापक्षः॥ ३०॥

अथ वृन्दावनपक्षः॥ वयं तद् वृंदावनं धीमहि। तत् किं यत्र त्रयाणां गोवर्धनबृहत्सानुनंदीश्वरगिरीणां सर्गो रचना स्थितिर्वाऽमृषा सत्यः। तदुक्तं संहितायां "यत्र गोवर्धनो नाम गिरिराजो विराजते। कालिंदी निकटे यत्र पुलिनं मंगलायनम्॥ बृहत्सानुगिरिर्यत्र यत्र नंदीश्वरो गिरिः। क्रोशानां च चतुर्विंशद्भिस्तृतैः काननैर्वृतम्॥ पशव्यं गोपगोपीनां गवां सेव्यं मनोहरम्। लताकुंजवृतं तद्वै वनं वृंदावनं स्मृतम्॥" इति। यथा तेजोवारिमृदामविनिमयस्तात्त्विकं रूपममृषा। यत्र चाग्रस्य सर्वेषामादिकारणस्य श्रीगोलोकवासिनः परिपूर्णतमस्य श्रीकृष्णस्य सदाजन्माविर्भावोस्ति। 'पादमेकं न गच्छामि त्यक्त्वा वृन्दावनं मुने।' इत्यादिपुराणे नारदं प्रति श्रीमुखोक्तेः। यतः यस्यान्वयात्सेवनात्स्वराट् स्वयं श्रीकृष्ण एव भवति। तदुक्तमादिपुराणे 'योगी नित्यं समागत्य माथुरं मण्डलं सुधीः। वृन्दावनं सुपेवेत स स्यात्कृष्णस्वरूपभाक्॥' इति। च पुनः यस्यान्वयादर्थेष्वभिज्ञो भवति। अर्थाः निखिलपदार्था इषव इषुवद् दुःसहा येषां तेऽर्थेषवो विरक्तास्तैरभितो ज्ञायते पूज्यत्वेनेत्यर्थेष्वभिज्ञः। तदुक्तम् 'मुमुक्षा विशने येषां निर्विण्णानां च संसृतेः। पूज्यः स्यान्नात्र संदेहो वृन्दावननिषेवकः॥' इत्यादिपुराणात्। यद्वृन्दावनं सूरयो जन्मान्तरकृतपुण्यपुञ्जास्ते मुह्यन्ति पश्यन्ति ये इतरत इतरेऽकृतसुकृतास्ते आ इत्याश्चर्ये इ इति वितर्के मुहिरत्र दर्शने, धातूनामनेकार्थत्वात्। तस्मिन्नत्र प्रथमार्थे। 'सूरिः स्याद्बहुपुण्ये ना विदुषि बहुसंततौ। उत्पत्तौ पीडनैश्वर्ये प्रेरके रविकालयोः॥' इति धरणिदेवः। 'नीचे मूढे त्वकंदर्पे पुंसि द्रव्ययुते स्मृतः। इतरो नास्तिकेपि स्यादि'ति च। किं कर्तुमादिकवये आदिकविं द्रष्टुं तुमोऽप्रयुक्तस्यति चतुर्थी। 'परप्रेम्णा दृश्यते हि श्रीवृन्दाविपिने हरिः। प्रियानुरागरसिको वल्लवीगणसंवृतः॥' इति संहितोक्तेः। किंभूतं ब्रह्मणा परमेष्ठिना ह्रियते वत्सगोपगणोऽत्रेति ब्रह्महृत्। एतच्च श्रीमद्दशमे विशदीभविष्यति "अंभोजन्मजनिस्तदन्तरगतो मायार्भकस्येशितुर्द्रष्टुं मंजु महित्वमन्यदपि तद्वत्सानितो वत्सपान्। नीत्वान्यत्र कुरूद्वहान्तरदधात्खेऽवस्थितः खे पुरा दृष्ट्वाघासुरमोक्षणं प्रथमतः प्राप्तः परं विस्मयम्॥" इत्यादिना। पुनः निरस्ताः कुहका वृन्दावनममन्यमाना नेदं वृन्दावनमस्ति चेत्किंलक्षणमित्यादिजल्पनपरा येन तत्तथा। केन स्वधाम्ना स्वस्य श्रीकृष्णस्य धाम्ना धामत्वेन। तत्र हि गोविन्ददेवमदनमोहनराधावल्लभादिविग्रहाः श्रीकृष्णस्य सन्ति। ते च मौशलावशिष्टवज्राभिधश्रीकृष्णपौत्रेण स्थापिता वृन्दावने। एतच्च स्कन्दपुराणे—"माथुरान्ब्राह्मणांस्तत्र वानरांश्च पुरातनान्। विज्ञाय माननीयत्वं तेषु स्थापितवान्स्वराट्॥ वज्रस्तु तत्सहायेन शाण्डिल्यस्याप्यनुग्रहात्। गोविन्दगोपगोपीनां लीलास्थानान्यनुक्रमात्॥ विज्ञाप्याभिधयास्थाप्य ग्रामानावासयद्बहून्। कुण्डकूपादिपूर्तेन शिवादिस्थापनेन च॥ गोविन्दहरिदेवादिस्वरूपारोपणेन च। कृष्णैकभक्तिं स्वे राज्ये ततान प्रमुमोद च॥" इति। पुनः किंभूतं ब्रह्म ब्रह्मरूपम्। तदुक्तं स्कान्दे 'व्रजनं व्याप्तिरित्युक्ता व्यापनाद् व्रज उच्यते। गुणातीतं परं ब्रह्म व्यापकं व्रज उच्यते॥ सदानन्दं परं ज्योतिर्मुक्तानां पदमव्ययम्॥" इति। आदिपुराणेपि "वृन्दावने भूर्नच भूर्विवेया व्रजौकसो जीवसमानजीवाः। न तत्र देवान्तरसंप्रवेशो निरन्तरं ब्रह्ममयं समन्तात्॥ कलिन्दपुत्र्या जलमंग नो जलं चतुर्भुजांकाकृतयो मनुष्याः। खगा मृगाश्चौषधयो नगाद्यास्ते ब्रह्मदेहा नहि तत्र भेदः॥" इति नारदं श्रीकृष्णः। यद्यप्यत्र वृन्दावनं ध्येयत्वेनाभिप्रेतं न तु व्रजस्तथापि वृन्दावनस्य व्रजावयवेषु मुख्यत्वमस्ति। 'मुख्यं वृन्दावनं व्रजे' इत्युक्तेर्मुखस्य सर्वावयववित्त्वमप्युक्तं कामन्दके 'मुखधर्मं शरीरस्य सर्वं वा मुखमुच्यते' इति। अवयवावयविनोरभेद एव वा यथा गंगैकदेशेपीयं गंगेति व्यवहारात्। पुनः किंभूतं सत्यं त्रैकालिकाबाध्यम्। तदुक्तमादिपुराणे

"अनादिनिधनं सत्यं वनं वृन्दावनं मुने। न चास्योत्पत्तिनाशौ स्तः प्रलये सर्वहारिणि ॥" इति। पुनः किंभूतं परं सर्वतीर्थेभ्यः सर्वलोकेभ्यश्च श्रेष्ठम्। "सर्वेभ्य एव तीर्थेभ्यः श्रेष्ठं वृन्दावनं परम्। पृथिवीतः परं स्वर्गस्तस्माच्छ्रेष्ठं विधेः पुरम् ॥ शिवलोकं ततः श्रेष्ठं ततो वैकुण्ठमव्ययम् ॥ वैकुण्ठाच्च परं लोको गवां तस्मात्परं मुने। वृन्दावनं यत्र देवः श्रीकृष्णो नन्दनन्दनः ॥" इत्यादि-पुराणात्। तथा च श्रुतिः 'ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः। अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि ॥' इति। अस्यार्थः ताः तानि वां युवयोः रामकृष्णयोर्वास्तूनि रम्यस्थानानि गमध्यै गन्तुं प्रभवामः। यत्र येषु वास्तुषु भूरिशृङ्गा महाशृङ्गवत्यो गावः अयासः संचरन्ति। अत्र भूलोके अह निश्चितं तत् गोलोकाख्यं परमं पदं भूरि अत्यन्तं मुख्यादपि विशिष्टमवभाति अत्यन्तं शोभते। वृष्णः आनन्दवर्षकस्योरुगायस्य महाकीर्तेरित्यर्थः। एतेन ये वदन्ति व्रजे न हि श्रुतिर्मानं ते परास्ताः। श्रुतिरियं नीलकण्ठेन हरिवंशे कृष्णपर्वव्याख्याने सार्थालेखि। इति वृन्दावनपक्षः ॥ ३१ ॥

अथ हरिनामपक्षः ॥ वयं तद्धरिनाम सदा हृदा धीमहि। तत् किं यत्र त्रयाणां तपोयज्ञदानानां सर्गो निश्चयोऽमृषा। तदुक्तं 'संकीर्तिते हरेर्नाम्नि दानयज्ञतपांसि वै। कृतान्येव भवन्तीह सत्यं सत्यं न संशयः ॥' इति कौशिकसंहितायाम्। किं च 'स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः। स च दानफलं प्राप्तो यस्तु संकीर्तयेद्धरिम् ॥" इति वैष्णवचिन्तामणौ नारदः। यद्वा यत्र सति पातकोपपातकमहापातकानां सर्गो मृषा। 'सहस्राणि पातकानामुपपातककोटयः। महापातकसंघाश्च नश्यन्ति हरिनामतः ॥' इति ब्रह्मसंहितोक्तेः। पातकानि मांसाशनादीनि। उपपातकानि पतितसंभाषणादीनि। महापातकानि ब्रह्महत्यादीनीति विवेकः। कथं यथा तेजोवारिमृदां विनिमयोऽमृषा व्यवहारे, मृषा परमार्थतः। यतः यस्य नाम्नोऽन्वयात्सेवनादर्थेष्वाद्यस्य धर्मादिषु प्रथमस्य धर्मस्य इतरत इतरेषां अर्थकाममोक्षाणां जन्म भवति। तदुक्तं 'अम्बरीष शुभं वाक्यं मयोक्तं शृणु भक्तितः। धर्मार्थकाममोक्षार्थं कुरु गोविन्दकीर्तनम् ॥' इति गारुडे शौनकः। यद्वा ज्ञानाज्ञानयोर्मध्ये आद्यस्य ज्ञानस्य जन्म भवति। तदुक्तं तत्रैव "यदीच्छसि परं ज्ञानं ज्ञानाच्च परमं पदम्। तदादरेण राजेन्द्र कुरु गोविन्दकीर्तनम् ॥" इति च। पुनः यतो नाम्नः अर्थेषु सर्वपदार्थेषु ऐहिकामुष्मिकार्थेषु अभिज्ञश्च भवति। 'आमुष्मिका ऐहिकाश्च भोगाः सर्वेऽप्रयत्नतः। प्राप्यन्ते जपतां नित्यं कृष्ण कृष्णेति सत्तमाः ॥' इत्यादिपुराणात्। किंच यन्नाम स्वराट् नैव राजते नृणां शोधनेन त्वासनस्नानादिविधिर्नेति स्वराट् 'अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा। यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥' इत्युक्तेः। यद्वा स्वराट् सर्वधर्मेषु चक्रवर्तिसमम्। तदुक्तं 'सामन्तास्त्वखिला धर्मास्तत्र नाम हरेः स्वराट्।" इत्यभियुक्तोक्तेः। यन्नामादिकवयेऽजामिलाय ब्रह्म ब्राह्मणजातिं वृषलीसंगतो नष्टां पुनस्तेने प्रकाशितवान्। आदौ कविर्विवेकी आदिकविस्तस्मै अजामिलोपि पूर्वं विवेक्या-सीत्पश्चाद् वृषलीसंगाद् भ्रष्टो जातः। पुनः संकेतितभगवन्नामोक्त्या भगवत्पार्षदसंगेन गतं ब्राह्मणत्वमापेत्यग्रे षष्ठे स्कन्धे स्फुटीभविष्यति। तत्रत्यवाक्यानि विस्तरभिया नोक्तानीह। 'नामैव परमं तप' इत्यादिपुराणात्सृष्ट्यादौ भगवतापि ब्रह्मणे तपतपे त्युक्त्या नामैव बोधितम्। 'निष्किंचनानां नृप यद्धनं विदुरि'त्युक्तेरपि नामैव प्रतीयते। 'निष्किंचनधनं नाम श्रीहरेः शोधनं सदा।' इति नाममाहात्म्यात्। आदिकवये ब्रह्मणे यन्नाम ब्रह्म सृष्ट्यादिज्ञानं तेने न इति वा। यद्वादिकवये प्राचेतसाय सप्तर्षिभिः पूर्वजन्मन्युपदिष्टं यद्विपरीतं मरेति नाम भावि जन्मनि ब्रह्म रामायणरूपं वेदं तेने इति ब्रह्माण्डपुराणे स्पष्टम्। 'वेदवेद्ये परे पुंसि जाते दशरथात्मजे। वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना ॥' इति रामीयतिलकोक्ते रामायणं ब्रह्मैव। यस्मि-न्नाम्नि सूरयोऽप्यापाततोऽधीतशास्त्रा अपि मुह्यन्ति अर्थवादोयमिति मोहं प्राप्नुवन्ति। तत्रार्थवादकल्पना तु निरयदा। तदुक्तं ब्रह्मसंहितायाम् 'यन्नामकीर्तनफलं विविधं निशम्य न श्रद्दधाति मनुते यदुतार्थवादम्। यो मानुषस्तमिह दुःखचये क्षिपामि संसारघोरविविधार्तिनिपीडिताङ्गम् ॥' इति। कृष्णेन शौनकं प्रति 'अर्थवादं हरेर्नाम्नि संभावयति यो नरः। स पापिष्ठो मनुष्याणां नरके पतति स्फुटम् ॥' इति कात्यायनसंहितायामपि। किञ्चात्र नास्तिको ब्रूते ननु नामकीर्तनात्सद्यः पापक्षयप्रतिपादकमन्त्रार्थवादेतिहासपुराणोपपुराणसंहितागमादीनां कर्मानुष्ठानादिपराणां स्वार्थे प्रामाण्यमेव नास्तीति चेन्मानांतर-वादविसंवादवाक्यानामग्निर्हिमस्य भेषजं, स प्रजापतिरात्मनो वपामुदखिदद्, यजमानः प्रस्तर इत्यादीनामिव स्वार्थे, उत मानान्तर-संवादविसंवादरहितानामपि। आद्ये इष्टापत्तिः, द्वितीयस्तु न संभवति। तादृशवाक्यानां स्वार्थेऽवांतरतात्पर्यस्य देवताधिकरणादौ व्यासादिभिर्भगवत्पूज्यपादादिभिश्चांगीकृतत्वात्। भट्टाचार्यैरपि 'अथवा मन्त्रार्थवादेतिहासपुराणप्रामाण्यात्सृष्टिप्रलयावपीष्येते' इत्यादिग्रन्थेन मन्त्रार्थवादादीनां प्रामाण्यस्वीकाराच्च मन्त्रार्थवादयोः स्वार्थे प्रामाण्यं नास्तीति वदतो नहुषस्यानर्थप्राप्तिदर्शनाच्च। नामकीर्त्तनात्पापक्षयप्रतिपादकवाक्यानामपि मानांतरसंवादविसंवादयोरभावात्स्वार्थे प्रामाण्यं स्वीकर्तव्यमेवान्यथानर्थप्राप्तिरेव। तदुक्तं नारदीये 'अहो हि वाक्ये चतुरक्षरे द्वे पुण्यस्य पापस्य निदानभूते। उच्चारणादेव नृणां मुनीन्द्रा नारायणश्चेति तथार्थवादः ॥' इति। अथ प्रकृतमनुसरामः। किंभूतं नाम निरस्ताः कुहका नामापराधा यस्मिंस्तत्तथा निरस्तकुहकं नामापराधरहितमेव नाम यथोक्तफलदमन्यथा नेति भावः। तदुक्तं भक्तिरसामृतसिन्धौ "सर्वापराधकृदपि मुच्यते हरिसंश्रयः। हरेरप्यपराधान्यः कुर्याद् द्विपदपांसुलः ॥ नामाश्रयः कदाचित्स्यात्तरत्येव स नामतः। नाम्नोपि सर्वसुहृदो ह्यपराधात्पतत्यधः ॥" इति। नामा-

पराधास्तु—'सन्निन्दाऽसति नामवभवकथा श्रीशेशयोर्भेदधीरश्रद्धा श्रुतिशास्त्रदेशिकगिरां नाम्न्यर्थवादो भ्रमः। नामास्तीति निषिद्धवृत्तिविहितत्यागौ च धर्मान्तरैः साम्यं नाम्नि च शंकरस्य च हरेर्नामापराधा दश ॥' इति वैष्णवसिद्धान्ते। पुनः किंभूतं सत्यं सारभूतं 'असारे खलु संसारे सारभूतं विनिश्चितम्। सर्वेभ्य एव धर्मेभ्यो नाम श्रीजगदीशितुः ॥' इति नाममाहात्म्योक्तेः। पुनः स्वेन धाम्नाश्रयेण हरिणा परमुत्कृष्टम्। आश्रयस्योत्कृष्टत्वादाश्रयिणोप्युत्कृष्टत्वं वैकुण्ठवैकुण्ठेशवद्बोध्यम्। यद्वा परं पररूपं नामनामवतोरभेदोपचारात् नाम्नो मन्त्रत्वादपि भगवद्रूपत्वं वक्ष्यति हि 'इति मूर्त्यभिधानेन मन्त्रमूर्तिममूर्त्तिकम्। यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान् ॥' इति मीमांसका अपि मन्त्ररूपामेव देवतां मन्वते। 'नाम ब्रह्मेत्युपासीते'ति श्रुतेरपि नाम ब्रह्मरूपमेव। इति नामपक्षः ॥ ३२ ॥

अथ वायुपक्षः ॥ वायोरधीनं शास्त्रादिकथनं वक्तुर्वातादिव्याधिर्मा भवेदित्येतदर्थं व्यासो वायुं ध्यायति जन्माद्यस्येति। वयं तं वायुं धीमहि। वायुश्च बाह्याभ्यन्तरभेदेन द्विधा। बाह्यस्तु रूपरहितस्पर्शवान्वायुरित्युक्तलक्षणः प्रसिद्धः। आभ्यन्तरः प्राणः, स च शरीरान्तः संचार्येव। तमुभयविधमेव धीमहि। तं कं यत्र यस्मिन्सति त्रयाणां देहेन्द्रियान्तःकरणानां सर्गोऽमृषा सत्यः। सत्येव प्राणरूपे वायौ देहः सत्योन्यथा मृषैव, एवमिन्द्रियान्तःकरणयोः सत्यतापि तत्सत्त्वे एवेति भावः। तदुक्तं 'प्राणे सत्येव देहस्य सर्वेन्द्रियहृदोरपि। तं विना शृणु विप्रेन्द्र यथा स्नेहं विना शिखी ॥' इति स्मृतेः। यथा तेजोवारिमृदामविनिमयोऽनन्यथात्वममृषा। यो वायुराद्यस्य भूतेष्वाद्यस्याकाशस्य सकाशाज्जन्मान्वयात्। 'आकाशाद्वायुरि'ति श्रुतेः। यतो वायोरितरत इतरे अग्न्यादयस्त्रयः स्युरिति शेषः। प्रथमार्थे तसिः। 'वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी'ति श्रुतेः। यो वायुः अर्थेषु निजनिजप्रयोजनेषु अभितो ज्ञापयति नियोजयति सर्वानिति तथा। तं विना न कुत्रापि कस्यचित्प्रवृत्तिरस्तीति भावः। यश्च स्वेनैव राजत इति स्वराट् अनन्यापेक्षः। 'अनुप्राणन्ति यं प्राणः प्राणन्तं सर्वजंतुषु। अपानन्तमपानन्ति नरदेवमिवानुगाः ॥' इत्यग्रे वक्ष्यति। यो वायुरादिकवये ब्रह्मणे स्वेन हृदा पुत्रेण हनुमता सह ब्रह्मस्तुतिं तेने। तत्र 'ततः पितामहं दृष्ट्वा वायुः पुत्रवधार्दितः। शिशुकं तं समादाय उत्तस्थौ धातुरग्रतः ॥ लसत्कुण्डलमौलिस्त्रक्तपनीयविभूषणः। पादयोर्न्यपतद्वायुस्त्रिरुपस्थाय वेधसः ॥' इत्यादिना वाल्मीकीयोत्तरकांडे स्फुटम्। 'हृदयादभिजायत' इति श्रुतेः। पुत्रस्य हृदयजत्वाद् 'गोभिः श्रिणीत मत्सरमि'तिवत्कारणे कार्यप्रयोगः। यस्मिन्वायौ सूरयो मुह्यन्ति अप्रचलिते इति शेषः। तत्र ध्रुवोपाख्याने स्फुटीभविष्यति, वाल्मीकीयेपीन्द्रकृद्धनुमत्ताडनावसरे प्रसिद्धम्। "वायुप्रकोपाद् भूतानि निरुच्छ्वासानि सर्वतः। संधिभिर्भिद्यमानैश्च काष्ठभूतानि जज्ञिरे ॥ प्रजापतिं समाधावन्दुःखिताश्च सुखेच्छया। ऊचुः प्रांजलयो देवा महोदरनिभोदराः ॥" इत्यादिना। किंभूतं धाम्ना तेजसा निरस्तं कुहकमपावित्र्यरूपं येन स तथा तम्। 'पावनात्पवनः प्रोक्तः सर्वेषां जगतामयम्। वायुना यत्र संस्पृष्टं तत्सर्वमशुचि ध्रुवम् ॥' इत्युक्तेः। पुनः सत्यं ब्रह्मरूपत्वात्। 'वायुः प्राणः सुखं वायुर्वायुर्ब्रह्ममयो ध्रुवम्' इत्यादि वाल्मीकीये। 'प्राणस्तथानुगमादि'ति न्यायाच्च प्राणो ब्रह्मैव, कुतः तथा ब्रह्मपरत्वेनानुगमादवगमादित्यर्थः। पुनः परं सर्वोत्कृष्टं सर्वोत्कृष्टत्वं प्राणसंवादे श्रूयते। वागादयः सर्वे प्राणाः प्रत्येकं श्रेष्ठतामात्मनो मन्यमानास्तन्निर्दिधारयिषया प्रजापतिमुपजग्मुः। स च तानुवाच यस्मिन्नुत्क्रांते शरीरं पापिष्ठतरमिव भवति स युष्माकं मध्ये श्रेष्ठ इति तस्मिन् प्रजापतावेवमुक्तवति वागादिषूत्क्रांतेष्वपि मूकादिभावेन शरीरं स्वस्थमस्थात्। मुख्यप्राणस्योत्चिक्रमिषायां तु वागादीनां व्याकुलत्वात्तान्प्रति प्राण उवाच मा मोहमापद्यथ यतोहमेवैतत्करोमि। किं तत्पञ्चधा प्राणापानादिभेदेन स्वात्मानं विभज्य एतद्बाणं शरीरं वाति गच्छतीति वानं वानमेव बाणमस्थिरं शरीरमिति यावत्। तदवष्टभ्य विधारयामीति श्रवणात्। अर्थतोनुक्रांता श्रुतिस्तु 'मामोहमापद्यथाहमेवैतत्पञ्चधात्मानं विभज्यैतद्बाणमवष्टभ्य विधारयामीति प्राणाभिन्नत्वम्।' इति वायुपक्षः ॥ ३३ ॥

अथेन्द्रपक्षः ॥ वयं तं सदा हृदा स्वराजमिंद्रं धीमहि। तं कं यत्र त्रिसर्गस्त्रयाणां लोकानां सर्गः पालननिश्चयोऽमृषा। 'इंद्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जिताम्। भुंजानः पाति लोकांस्त्रीनि'त्यग्रे वक्ष्यमाणत्वात्। यथा तेजोवारिमृदामविनिमयो याथार्थ्यममृषा यः स्वराट् इंद्र आद्यस्य वामनरूपस्य भगवतोऽन्वयात्संबंधादर्थेषु स्वर्गादिभोगेष्वभिज्ञो जातः। बलिगृहीतस्वर्गस्तु वामनेनैव संपादितस्ततस्तदर्थाभिज्ञता जातैव। यो जन्मा जनयति सर्वं वृष्टिद्वारेति जन्मा। कामं लोके प्रवर्षतीत्युक्तः। इंद्र आदिकवये आदौ कृयते उच्चार्यते नृपत्वेनेत्यादिकविरादिराजः पृथुस्तस्मै अब्रह्म वेदविरुद्धं पाखंडं इतरतः इः काममन्वीयते ऽनेनेतीतरस्तस्मिन्नितरतः। सप्तम्यर्थे तसिः। यत्तेने। यत्रास्मिन पाखंडे सूरयो विद्वांसोपि मुह्यंति। पाखंडस्यापातरम्यत्वात्। इत्यग्रे चतुर्थस्कंधे विशदीभविष्यति। वाक्यानि तु विस्तारभिया नोक्तानि। किंभूतं स्वेन धाम्ना तेजसा निरस्ताः कुहका मायाविदैत्या येन तम्। पुनः सत्यं सत्यरूपहरेर्विभूतित्वात्। तदुक्तं 'देवानामस्मि वासव' इति गीतोपनिषदि। पुनः परं मत्तामरेशत्वाच्छ्रेष्ठम्। इतीन्द्रपक्षः ॥ ३४ ॥

अथ वरुणपक्षः ॥ वयं तं वरुणं सदा हृदा धीमहि। तं कं यत्र त्रयाणां दैत्यदानवासुराणां सर्गो वयं वरुणं जयेमेति निश्चयो मृषा। किंतु तेनैव ते जिताः। 'विजित्य लोकेखिलदैत्यदानवान्यद्राजसूयेन पुरायजत्प्रभो।' इत्यग्रे वरुणं प्रति हिरण्याक्षो वक्ष्यति। कथं यथा तेजोवारिमृदां विनिमयोऽतात्त्विकावस्था। यश्चादिकवये भृगवे ब्रह्म ज्ञानं तेने। 'भृगुर्वै वारुणिर्वरुणं

पितरं पप्रच्छे'ति श्रुतेर्भृगुप्रश्नानंतरं स तस्मै प्रोवाचेति। यद्वायो वरुणः। 'अंगादंगात्संभवति हृदयादभिजायते। आत्मा वै पुत्रनामासी'ति श्रुतेः। 'यः पिता स च वै पुत्र' इति स्मृतेश्च। 'स एष भगवान्द्रोणः प्रजारूपेण वर्त्तते।' इति वक्ष्यमाणत्वाच्च। वाल्मीकिरूपेणादिकवये भारद्वाजायादि सनातनं ब्रह्म श्रीरामायणरूपं तेने। वाल्मीकिर्वरुणस्यासीदित्यग्रे पद्ये वक्ष्यति। यश्चान्वस्य श्रीकृष्णस्यान्वयात्संसर्गादर्थेषु ज्ञातव्यार्थेष्वभिज्ञो जातः। 'अद्य मे निभृतो देहो ह्यद्यार्थोधिगतः प्रभो'। इति श्रीदशमे वरुणो नंदानयने श्रीकृष्णं वक्ष्यति। अत्रार्थशब्दे एकत्वं सामान्याभिप्रायेण बोध्यम्। यश्च स्वराट् कृतराजसूयत्वात्। 'येनेष्टं राजसूयेन स स्वराडिति कथ्यते' इत्यभिधानात्। यश्चेतरतः द्वादशसूर्येभ्य इतरत्रापि जन्माभूल्लोकपालेष्विति भावः। यद्यस्मिन्ब्रह्मणि सूरयो विद्वांसोपि मुह्यंति दुर्ज्ञेयत्वात्। किंभूतं स्वेन धाम्ना तेजसा निरस्ताः कुहका युद्धावसरे येन स तथा तम्। पुनः किंभूतं सत्यं परं श्रेष्ठं यस्य तं सत्यसंभाषणपरम्। तच्च तदुक्तेर्ज्ञायते 'पश्यामि नान्यं पुरुषात्पुरातनाद्यः संयुगे त्वां रणमार्गकोविदम्। आराधयिष्यत्यसुरर्षभेहितं मनस्विनो ये गृणते भवादृशाः॥ तं वीरमारादभिपद्य विस्मयः शयिष्यसे वीरशये श्वभिर्वृतः॥' इत्यादि तृतीये वरुणो वक्ष्यति। सत्यसंभाषणादृते शत्रुमित्थं कथनं संमुखे न संभवतीति भावः। इति वरुणपक्षः॥ ३५॥

अथ धर्मराजपक्षः॥ वयं तं धर्मराजं धीमहि। तं कं यत्र त्रयाणां वराणां पितृसौमनस्याग्निविद्यात्मविद्यारूपाणां सर्गोऽस्मै दास्यामीति निश्चयोऽमृषा। यथा तेजोवारिमृदामविनिमयोऽमृषा। एतच्च कठवल्ल्यां स्फुटम्। तथाहि पितुः कोपाच्छप्तो नचिकेता धर्मराजपुरं गत्वा धर्मराजमदृष्ट्वोपवासत्रयं चकार। ब्रह्मलोकादागत्य यमेनोक्तो वरत्रयं गृहाण' स चाह मे पितुः सौमनस्यमस्त्विति प्रथमो वरः। स त्वमग्निं स्वर्ग्यमध्येपि मृत्यो प्रब्रूहि श्रद्दधानाय मह्यमित्यग्निविषयः प्रश्नः। 'येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके। एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः।' इति जीवप्रश्नः। 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद॥' इति परमात्मप्रश्नः। इह कठवल्लीग्रन्थे जीवपरमात्मनोः कल्पितभेदत्वात्पृथक्प्रश्नो न। वरान्वृणीष्वेति मृत्युना प्रेरितेन नचिकेतसा पितुः सौमनस्याग्निविद्यात्मकवरत्रयमेव पृष्टमिति वराणामेष वरस्तृतीय इति लिंगान्निश्चितत्वात्तथापि जीवात्मनोः कल्पितभेदापेक्षया सूत्रकारैरपि त्रयाणामेव चैवमुपन्यासः प्रश्नश्चेति सूत्रे त्रयाणामित्युक्तम्। यद्वा सदक्नासुजनशासनाश्रितभरणरूपाणां त्रयाणां धर्माणां सर्गः स्थितिर्यत्र धर्मराजेऽमृषा। यश्च स्वस्मिन्राजत इति स्वराट् प्राप्तात्मतत्त्वः। यश्चास्य सूर्ये आत्मादिकृद्धरिरित्युक्तेः सूर्यस्य सकाशाज्जन्माये प्राप। यश्चार्थेषु वेदस्यार्थेष्वभिज्ञः। 'वेदैर्यद्विहितं न्याय्यं तत्करोति सदा यमः' इत्यादिपुराणात्। किंच यस्यान्वयात्सेवनादितरतस्तदितरश्चित्रगुप्तोप्यर्थेष्वभिज्ञः। ननु कोयं चित्रगुप्त इति प्रश्ने 'दृग्गोचरोभूदथ चित्रगुप्तः कायस्थ उच्चैर्गुण एतदीयः।' इति नैषधीये। कायस्थ उक्तस्तस्य का जातिर्यतो धर्मसभायां प्रवेश इति प्रश्ने पद्मपुराणवाक्यान्याह "सृष्ट्यादौ सदसत्कर्मज्ञप्तये प्राणिनां विधिः। क्षणं ध्याने स्थितस्तस्य सर्वकायाद्विनिर्गतः॥ दिव्यरूपः पुमान्हस्ते मषीपात्रं च लेखिनीम्। दधानश्चित्ररूपेण रक्षितो दैवतैर्हृदि। चित्रगुप्त इति ख्यातो धर्मराजसमीपतः। प्राणिनां सदसत्कर्मलेखनाय नियोजितः॥ ब्रह्मणातीन्द्रियो ज्ञानी देवाग्र्यो यज्ञभुक् सदा॥ भोजनाच्च सदा तस्मादाहुतिर्दीयते द्विजैः। ब्रह्मकायोद्भवो यस्मात्कायस्थो जातिरुच्यते॥ तस्य पुत्राः समुद्भूताश्चत्वारो बहुवित्तमाः। माथुरो गौडसंज्ञश्च नागरो नैगमस्तथा॥ तेषां नामानि चत्वारि चतुर्णां च यथाक्रमम्। नानागोत्राश्च तद्वंश्याः कायस्था भुवि सन्ति ते इति॥" 'एवं हत्वार्जुनं रामः सन्धाय निशितान् शरान्। अन्वधावत्स तान्हंतुं सर्वानेवातुरान्नृपान्॥ ततः क्षत्रवराः सर्वे प्राद्रवन्त च तद्भयात्। केचिद्गहनमाश्रित्य केचित्पातालमाविशन्॥ सगर्भा चन्द्रसेनस्य भार्या दाल्भ्याश्रमं ययौ। ततो रामः समायातो दाल्भ्याश्रममनुत्तमम्॥ पूजितो मुनिना रामो ह्यर्घपाद्यासनादिभिः। ददौ मध्याह्नसमये तस्मै भोजनमादरात्॥ रामस्तु याचयामास हृदिस्थं स्वमनोरथम्। याचयामास रामाच्च कामं दाल्भ्यो महामुनिः॥ ततो द्वौ परमप्रीतौ भोजनं चक्रतुर्मुदा। भोजनानन्तरं दाल्भ्यो राममूचे महामुनिः॥ यत्त्वया प्रार्थितं देव तत्त्वं शंसितुमर्हसि॥ राम उवाच—तवाश्रमे महाभाग सगर्भा स्त्री समागता। चन्द्रसेनस्य राजर्षेः क्षत्रियस्य महात्मनः॥ तन्मे त्वं प्रार्थितं देहि हिंस्येयं तां महामुने। ततो दाल्भ्यः प्रत्युवाच ददामि तव वांछितम्॥ यन्मया प्रार्थितं देव तन्मे त्वं दातुमर्हसि। ततः स्त्रियं समाहूय चन्द्रसेनस्य वै मुनिः॥ रामाय प्रददौ भीतां रामः प्रीतमना अभूत्। राम उवाच—यत्त्वया प्रार्थितं देव भोजनावसरे पुरा। तन्मे शंस महाभाग ददामि तव वांछितम्॥ दाल्भ्य उवाच—स्त्रिया गर्भममुं बालं तन्मे त्वं दातुमर्हसि। ततो रामोऽब्रवीद्दाल्भ्यं यदर्थमहमागतः॥ क्षत्रियान्तकरश्चाहं तं त्वं याचितवानसि। प्रार्थितश्च त्वया विप्र कायस्थो गर्भ उत्तमः॥ तस्मात्कायस्थ इत्याख्या भविष्यति शिशोः शुभा। दुष्टादेनं क्षात्रधर्माद्वारितुं च त्वमर्हसि॥ ततो दाल्भ्यः प्रत्युवाच भार्गवं प्रति हर्षितः। मा कुरुष्वात्र संदेहं दुर्बुद्धिर्न भविष्यति॥ एवं रामो महाबाहुर्हित्वा तां गर्भमुत्तमम्। निर्जगामाश्रमात्तस्मात्क्षत्रियान्तकरः प्रभुः॥ कायस्थ एष उत्पन्नः क्षत्रिण्यां क्षत्रियात्ततः। रामाज्ञया स दाल्भ्येन क्षत्रधर्माद्बहिष्कृतः॥ ततः कायस्थधर्मोऽस्मै चित्रगुप्तस्य यः स्मृतः। प्राप्तकायस्थनामत्वाल्लेख्या वृत्तिश्च भूभृताम्॥ तस्य भार्या कृता चित्रगुप्तकायस्थवंशजा। तद्गोत्रजाश्च कायस्था दाल्भ्यगोत्रास्ततोऽभवन्॥ दाल्भ्योपदेशतस्ते वै धर्मिष्ठाः सत्यवादिनः। सदाचारपरा नित्यं रता हरिहरार्चने॥ देवर्षिपितृणां चैव ह्यतिथीनां च पूजकाः॥' इति। चन्द्रसेनीयानां क्षत्रियत्वं चित्रगुप्तवंश्यानां तु क्षत्रियत्वं चन्द्रसेनीयैर्योनिसम्बन्धादेव 'तस्य भार्या कृता चित्रगुप्तकायस्थ-

वंशजा' इति वाक्येन बोध्यते। भविष्ये तु चित्रगुप्तस्य ब्राह्मणत्वं प्रतिभाति "विसृज्य धर्मराजानं ब्रह्मा ध्यानमकल्पयत्। दिव्यवर्षसहस्रं तु तपः कृत्वाब्रवीदिदम्॥ संनिधौ पुरुषं दृष्ट्वा श्यामं कमललोचनम्। कंबुग्रीवं गूढशिरं पूर्णचन्द्रनिभाननम्॥ लेखिनीपाटिकाहस्तमषीभाजनसंयुतम्। मम कायात्समुत्पन्नः स्थितः कायेभवद्यतः॥ कायस्थ इति तस्याथ नाम चक्रे पितामहः। चित्रवाचा मया गुप्तश्चित्रगुप्तः स्मृतो बुधैः॥ स गत्वा कोटिनगरे चण्डीपूजनतत्परः।" इत्यारभ्य नमस्तेस्तु जगद्धात्रीत्यादिबहुश्लोकैः स्तुत्वा ततो वरत्रयं प्राप्तं दुर्गातः। "चित्रगुप्त त्वया पुत्र कृतमाराधनं मम। तस्मात्तेद्य मया दत्तं वराणां त्रयमुत्तमम्॥ परोपकारे कुशलश्चाधिकारे सदा स्थिरः। भविष्यसि चिरायुस्त्वं दत्त्वा सान्तरधीयत॥ चित्रगुप्तस्ततो यातो धर्मराजेन संगतः। एकस्मिन्नेव काले तु धर्मशर्मा द्विजोत्तमः॥ अपत्यार्थं विधातारमाराध्य सोभजत्तदा। परमेष्ठिप्रसादेन लब्ध्वा कन्यामिरावतीम्॥ चित्रगुप्ताय तां दत्त्वा विवाहमकरोत्तदा।" इति वाक्यजातेन विप्रकन्याविवाहाद्विप्रत्वं प्रतिभाति। अत्र धर्मशर्मणापि सा कन्या क्षत्रियायामुत्पादिता तेन चित्रगुप्ताय दानेपि न दोषः। न ह्येतेन विप्रत्वं चित्रगुप्तस्य सेत्स्यति। चित्रगुप्तेन तस्यामष्टौ पुत्रा उत्पादिताश्चारवादय इति अपरस्यां भार्यायां चत्वारो भान्वादयः पुत्रा उत्पादिता इति माण्डव्यशापतस्तद्वंश्यानां मद्यादौ प्रवृत्तिः। पुनस्तदनुग्रहेण 'वंशे वृद्धिः सुवृत्तानां दुर्वृत्तानां भवेत्क्षयः। द्विजातीनां यथा दानं यजनाध्ययनं तथा॥ वैश्यादुच्चा हि तद्वृत्तिर्ब्राह्मणक्षत्रियादधः॥" इत्यादिवरोपि जातः। किं बहुना क्षत्रियत्वमेवैतेषां सिद्धम्। यत्तु 'माहिष्यवनितासूनुं विदेहाद्यं प्रसूयते। स कायस्थ इति प्रोक्तस्तस्य कर्म विधीयते॥ लिपीनां देशजातानां लेखनं च समाचरेत्। गणकत्वं विचित्रं च बीजपाटीप्रभेदतः॥ अधमः शूद्रजातिभ्य' इति शूद्र ?कमलाकरवाक्येन शूद्राधमत्वं तद्भिन्नजातिपरम्। तत्र कायस्थपदप्रयोगस्तु कायस्थवृत्तिसाधारण्येन गौण एव। सृष्ट्यादौ ब्रह्मणा चित्रगुप्तस्यैव संपादितत्वात्। "ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहिकस्तथा। माहिष्यः क्षत्रियाज्जातो वैश्यायामि"ति कोशात्। अलं प्रकृतानुपयुक्तेन। यश्च धर्मराट् आदि सनातनं ब्रह्म कवये नचिकेतसे तेने। "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति॥" इत्यादिरूपं प्रकाशितवान्। यद्वेतरतो भगीरथायादि सनातनं ब्रह्म ज्ञानं तेने। तच्च बृहन्नारदीये स्पष्टम्। यत्रास्मिन् ब्रह्मणि सूरयो विद्वांसो मुह्यन्ति। किंभूतं स्वेन धाम्ना तेजसा निरस्ताः कुहका अधर्मवर्तिनो येन तम्। पुनः सत्यं समदर्शिनम्। 'सत्यं च समदर्शनमि'त्येकादशोक्तेः। सत्यमस्यास्तीति सत्यः। मत्वर्थीयोच्। तं सत्यम्। समदर्शित्वन्तु तस्य "पण्डिते चैव मूर्खे च बलवत्यपि दुर्बले। ईश्वरे च दरिद्रे च मृत्योः सर्वत्र तुल्यता॥" इति गरुडोक्तेः। पुनः परं श्रीकृष्णरूपत्वात्। 'यमः संयमतां चाहमि'ति गीतोक्तेरिति धर्मराजपक्षः॥ ३६॥

अथ कुबेरपक्षः॥ वयं तं कुबेरं सदा हृदा धीमहि। तं कं यत्र त्रयाणां श्रीदत्वयक्षेश्वरत्वमनुष्यधर्मत्वानां सर्गो निश्रयोऽमृषा सत्यः। यथा तेजआदीनां वास्तवं रूपम्। 'श्रीदो यक्षेश्वरस्त्वेष नरधर्मा हरप्रियः।' इत्यभिधानात्रिसर्गाधिकरणत्वं तत्र सत्यम्। यः कुबेर आद्यस्य ब्रह्मणोऽन्वयाद्धरादर्थेपु धनेष्वभिज्ञो नियोक्ता स्वामीति यावत्। सेवनादन्वीयते प्राप्यत इत्यन्वयो वरः। कुबेरेण वर्षसहस्रं तपः कृतं ततस्तुष्टेन ब्रह्मणा तस्मै धनेशता दत्ता। तदुक्तं श्रीवाल्मीकीयोत्तरकाण्डे—"स तु वैश्रवणस्तत्र तपोवनगतस्तदा।" इत्यारभ्य 'ब्रह्मा सुरगणैः सार्द्धं बाढमित्येव हृष्टवत्। अहं वै लोकपालानां चतुर्थं स्रष्टुमुद्यतः॥ यमेन्द्रवरुणानां च पदं यत्तव चेप्सितम्। तद्गच्छ बत धर्मज्ञ निधीशत्वमवाप्नुहि॥' इत्यन्तेन ग्रन्थेन। यश्च कुबेर आद्यस्य ब्रह्मणोऽन्वयाद्वंशाज्जन्म लेभ इति ब्रह्मणः पुलस्त्यस्ततो विश्रवास्ततः कुबेरः। इहाद्यस्यान्वयादिति पदद्वयमावृत्त्या योज्यम्। किंभूत इतरतः इः काममर्थ्यतेऽनेनेतीतरं तपस्तत्तनोति विस्तारयतीतीतरतः। तनोतेर्डः, तपस्वी। पुनः स्वेन धनेन राजते इति स्वराट् धनेशत्वात्। य आदि प्राक्तनं कवये निपुणाय ध्रुवाय ब्रह्म तेने ज्ञानं प्रकाशितवान् "भो भो क्षत्रियदायाद परितुष्टोस्मि तेनघ। यस्त्वं पितामहादेशाद्वैरं दुस्त्यजमत्यजः॥ न भवानवधीद्यक्षान्न यक्षा भ्रातरं तव। काल एव हि भूतानां प्रभुरप्ययभावयोः॥" इत्यादिना तेने इत्यर्थः। यत्रास्मिन्कुबेरे सूरयो मुह्यन्ति। ईशश्चेत्कथमयं कुबेरो जातः कुत्सितं सरोगं बेरं शरीरमस्येति कुबेर इति शंकां कुर्वन्ति। "बेरं मूर्तौ च ह्रीबेर" इति धरणिः। तेन कदाचित्पार्वतीं प्रति मन्ददृष्टिः कृता, तेनैकपिंगो जात इति रामायणे प्रसिद्धम्। "कुत्सायां क्वितिशब्दोयं शरीरं बेरमुच्यते। कुबेरः कुशरीरत्वान्नाम्ना तेनैव कीर्त्तितः॥" इति वायुपुराणात्। किंभूतं स्वेन धाम्ना तेजसा निरस्ताः कुहका रावणाद्याः सेवकदारिद्र्यं वा येन स तथा। पुनः किंभूतं सत्यं सत्यरूपं हरेर्विभूतित्वात् 'वित्तेशो यक्षरक्षसामि'ति श्रीमुखोक्तेः। पुनः परमुत्कृष्टमन्यत्राविद्यमानपुष्पकनिधीशत्वात्। पुष्पकं विमानम्। निधयस्तु "महापद्मश्च पद्मश्च शंखो मकरकच्छपौ। मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव॥" इति कुबेरपक्षः॥ ३७॥

अथाग्निपक्षः॥ वयं तमग्निं सदा हृदा धीमहि। तं कं यत्र त्रयाणां दाक्षिणात्यगार्हपत्याहवनीयानां सर्गो निश्चयोऽमृषा सत्यः। यथा तेजोवारिमृदामविनिमयः स्वाभाविकावस्थाऽमृषा। दक्षिणादिशातः समानीतस्तत्र स्थापितो वा दाक्षिणात्यः। गृहपतिना संयुक्तो गार्हपत्यः। आहूयते प्रक्षिप्यते इत्याहवनं हविस्तदर्हतीत्याहवनीय इति विवेकः। यद्वा त्रिभिरृग्यजुःसामभन्त्रैःसृज्यते विसृज्यते हविरत्रेति त्रिसर्गः। यद्वा यत्राग्नौ सति त्रयाणां होत्रध्वर्यूद्गातॄणां सर्गो रचनाऽमृषा अग्निसृते तेषामसिद्धेः। यश्चाग्निराद्यस्य शिवस्यान्वयादेव कृतस्तवनाज्जन्म तन्नेत्रादाविर्भावमाप। अय गतावतो लिट्। यश्चार्थेषुभिः

सकामैरभितो ज्ञायते सेव्यते इत्यर्थेष्वभिज्ञः। "सर्वे कामा अवाप्यन्ते वह्निसाध्येन कर्मणा। वह्नावाहुतिप्रक्षेपः श्रद्धयार्थप्रपूरकः॥" इति स्मरणात्। यश्चाग्निरितरतोऽन्येभ्यः सर्वेभ्यः स्वेनैव राजते न त्वन्यमपेक्ष्येति स्वराट् स्वयंप्रकाशः। इतरे पदार्थास्तमसि वह्निना प्रकाश्यन्ते वह्निस्तु स्वयमेव प्रकाशत इति भावः। स्वराट् सम्राडिति वार्थः। 'सम्राजमतिथिं जनानामि'ति श्रुतेः। किं कर्तुमादिकविं हन्तुं अदनमादिर्भोजनमादेः कं सुखमादिकं तद्वायते तन्यतेऽनेनेत्यादिकविरुदरे रुच्यजनकरोगविशेषस्तस्मै तथा। इहात्तेर्भावे इञ् वातेश्च डिरौणादिकः कर्मणि। आदिकवय इति "तुमोऽप्रयुक्तस्य" इति कर्मणि चतुर्थी। यद्वादिकविमग्निं द्रष्टुं वयमग्निं धीमहि। अग्नेरादिकवित्वं तु मन्त्रवर्णात्—'आजातमग्निं कविँ सम्राजमि'ति श्रुतेः। वह्निस्मृतेरुदरादिरोगक्षये प्रमाणं स्कान्दवाक्यजातम्। तथाहि देवा ऊचुः—"अग्निर्वैश्वानरो वह्निः कृष्णवर्त्मा भयानकः। प्रभवो विभवश्चैव वीतिहोत्रस्तनूनपात्॥ भवो भीमो भीमनेत्रसमुत्थो देहसंस्थितः। त्रैलोक्यदीपको भानुः स्वर्भानुः सर्वगस्तथा॥ चित्रभानुः शीतहन्ता शीतमंस्थः कृपाकरः। धेनुको वडवाजन्मा जाठरो जठरस्थितः॥ यज्ञनेता यज्ञभोक्ता भक्तिगम्यो लयंकरः। कृपीटयोनिः शोचिष्मान्ज्वलनो जातरूपदः॥ जातवेदा वेदसंस्थोऽथाश्रयाशो महाप्रभुः। दानवारिर्ज्वलत्केशो मदनो दीनवत्सलः॥ स्कन्द उवाच—अग्नेरेतानि नामानि यः पठेत्प्रयतो नरः। सर्वसिद्धिमवाप्नोति शतयज्ञफलं लभेत्॥ मन्दाग्निर्यो नरो विप्र सुभक्त्या प्रतिपत्तिथौ। नामामृतं पिबेन्नित्यं त्रिवारं नियतः शुचिः॥ मन्दाग्निस्तस्य नश्येत सर्वरोगक्षयस्तथा। धन्यो भवति लोकेषु पूतात्मा नात्र संशयः॥" इति। यतो येन वह्निना ब्रह्मयज्ञस्तेने विस्तारितं तमृते तदसिद्धेः स एव तत्तानक इति। यत्रास्मिन्यज्ञे सूरयो विद्वांसो मुह्यन्ति यज्ञस्य सर्वथा कर्मरूपत्वाद्दुर्ज्ञेयत्वम्। 'किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।' इति स्मृतेः। किंभूतं स्वेन निजेन धाम्ना तेजसा निरस्तं कुहकं तमोरूपं येन स तथा तं पुनः। सत्यं सत्यरूपं विष्णुरूपत्वाद्वसूनामस्मि हव्यवाडिति स्मृतेः, पुनः परं मुख्यं 'अग्निरेतु प्रथमो देवतानामि'ति श्रुतेः। इति वह्निपक्षः॥ ३८॥

अथ विष्णुशिवाभेदपक्षः॥ वयं तं विष्णुशिवं धीमहि। तं कं यत्र त्रयाणां गुणानां सर्गो देहादिर्मृषा। यथा तेजोवारिमृदां विनिमयोऽन्यथाभावो मृषा। 'अशरीरं वा व संतमि'ति श्रुतेरुभयोर्ब्रह्मरूपत्वेनाशरीरित्वम्। 'त्वमकरणः स्वराडखिलकारकशक्तिधरः।' इति वक्ष्यमाणत्वाच्च। अनिंद्रियोऽपि यो देव इति श्रीधरोक्तेश्चानिन्द्रियत्वं विष्णोः। शिवस्याप्यनिंद्रियत्वम्। "त्वं ब्रह्म परमं साक्षाद्देहेंद्रियविवर्जितः। अनुग्रहाय भक्तानां तद्वानिव च दृश्यते॥" इति पुराणात्। 'मृडनाय हि लोकस्य व्यक्तिस्तेऽव्यक्तकर्मणः।' इति वक्ष्यमाणत्वाच्च। यतो विष्णोः शिवाद्वाद्यस्य ब्रह्मणो वेदस्य वा जन्म। 'एतस्य महतो भूतस्य निश्वसितं यदृग्वेदो यजुर्वेदः सामवेद' इति श्रुतेः। 'तस्माद्यज्ञात्सर्वहुतऋचः सामानि जज्ञिरे' इति श्रुत्यंतराच्च वेदस्य। किंत्वीश्वरत्वान्न विनिर्गतोऽसीति ब्रह्मवाक्याद्वेधसश्च जन्म विष्णोः प्रतीयते। 'पुरारेर्वेदवेगत्वं वेदाविर्भावमेदिनी' इति स्मृतेर्वेदा वेदांगैः सहितास्त्वत्प्रसूता यज्ञः दीक्षा च दक्षिणा चाभिरूपेति हरिवंशे हर्युक्तेश्च 'त्वत्तो जातो महादेव ब्रह्मा सृष्टिप्रवृत्तये' इत्यादिपुराणात्। शिवादपि ब्रह्मणो वेदस्य च जन्म प्रतीयते। च पुनः यतो यस्य शिवस्य विष्णोर्वान्वयात्सेवनादर्थेषु धर्मादिष्वभिज्ञस्तत्प्रसादाल्लब्धज्ञानः सञ्जितरतो भवति इता गता रतिर्यस्येतीतरतः। समासांतो डः। विरक्तो भवतीत्यर्थः। तद्वक्ष्यति "यदा यस्यानुगृह्णाति भगवानात्मभावितः। स जहाति मतिं लोके वेदे च परिनिष्ठिताम्॥' इति। यः उभयरूप एव स्वान् भक्तान् जयति प्रकाशयति लोके लोकांतरे चेति स्वराट्। 'स्वं स्वानत्र परत्राथ राजामि राजयामि च। यतः स्वराडहं तेन प्रथितो लोकशास्त्रयोः॥" इत्यभियुक्तोक्तेः। यो विष्णुरादिकवये ब्रह्म वेदं हृदा तेने। 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रुतेः। यः शिवोऽपि कवये नारदायादि सनातनं ब्रह्म तेने। 'कृत्वोरौ दक्षिणे सव्यं पादपद्मं च जानुनि। बाहुं प्रकोष्ठेऽक्षमालामासीनं तर्कमुद्रया। नारदाय प्रवोचंतं परं ब्रह्म सनातनम्॥' इति वक्ष्यमाणत्वात्। यत्रास्मिन्ब्रह्मणि सूरयो जैमिन्यादयोऽपि मुह्यंति सुदुर्बोधत्वात्। तदुक्तं 'शब्दब्रह्म सुदुर्बोधं दुर्विगाह्यं समुद्रवत्' इत्येकादशे। किंभूतमुभयं स्वेन धाम्ना तेजसा निरस्ताः कुहका मायाविनस्त्रिपुरांधकाद्या मुरकंसाद्या वा येन स तथा तम्। पुनः सदा सत्यं त्रैकालिकाबाध्यम्। ज्ञानान्तरेणाविषयासत्यत्वप्रतीतिर्बाधः, तद्योग्यो बाध्यः, न बाध्योऽबाध्यः, त्रैकालिकश्चासावबाध्यः स तथा तम्। 'आविर्भावतिरोभावौ भवतस्तु हरीशयोः। अन्येषामादिदेवानां न हि नाशः कदाचन॥' इति स्मरणात्। पुनः परं सर्वेश्वरम्। 'परः सर्वेश्वरानयोरि'ति धरणिधरः। नहि द्वौ सर्वेश्वरौ भवितुं शक्यावुभयोरनैकमत्या जगदांध्यप्रसंगादिति शंक्यम्। तयोर्द्विरूपत्वेप्यैक्यमेव। द्विरूपत्वं तु भक्तेच्छयैव। 'हरहर्योः प्रकृत्यैक्यं साधनैक्यं तथापि तौ। तथापि भजतां रुच्या संप्राप्तौ भिन्नरूपताम्॥' इति पुराणांतरात्। 'माधवामाधवावीशौ सर्वसिद्धिविधायिनौ। वंदे परस्परात्मानौ परस्परनुतिप्रियौ॥' इति श्रीधरोक्तेश्च। रामेश्वरस्थापनावसरे मुनिभिरपि तदैक्यमेव निश्चितम्। 'रामेश्वरपदं प्राप्य बहुव्रीहिं महेश्वरः। रामस्तत्पुरुषं ब्रूते मनुजः कर्मधारयम्॥' इत्यभियुक्तोक्तेः। 'यः शिवः स च वै विष्णुर्यो विष्णुः स न वै शिवः॥' इति हरिवंशाच्च। 'शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः। ईषदप्यंतरं कृत्वा रौरवं नरकं व्रजेत्॥' इति वचनेन भेदे निंदाश्रवणाच्च। 'वेदे शास्त्रे पुराणे च दृश्यते न भिदा तयोः।' चिरंजीविभट्टोक्तेश्च। 'स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्। स एव विष्णुः स प्राणः स कालोऽग्निः स चंद्रमाः॥ स एव सर्वं यद्भूतं यच्च भाव्यं सनातनमि'ति कैवल्योपनिषदि सर्वात्मन्त्वश्रुतेरभेद एव तयोः। किं बहुना वाग्जालेन। इति शिवविष्णुपक्षः॥ ३९॥

अथ दुर्गापक्षः ॥ वयं तत् दुर्गारूपं तेजो हृदा सदा धीमहि । तत्किं यत्र तिसृणां महाकालीमहालक्ष्मीमहासरस्वतीनां सर्गो रचनाऽमृषा सत्यः । कथं यथा त्रिनिमयोऽमृषा । यतो येन तेजसाऽस्य विष्णोरितरत इतरयोर्ब्रह्मरुद्रयोश्च जन्म देहसंबंधस्तेने प्रकाशितः । 'विष्णुः शरीरग्रहणमहमीशान एव च । कारितास्ते यतोतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥' इति मार्कंडेये ब्रह्मवाक्यात् । यच्चारिमृदां शूराणां दैत्यानामन्वयात् । अन्वयं वंशमत्ति भक्षयतीत्यन्वयात् । 'इत्थं यदा यदा बाधा दानवोत्था भविष्यति । तदा तदावतीर्याहं करिष्याम्यरिसंक्षयम् ॥" इति श्रीमुखोक्तेः । स्वराडिन्द्रः अभिज्ञोऽन्योपि देवः अर्थेपु सत्सु यतश्च यस्य तेजसो ब्रह्म कोर्थः स्तुतिमाये चकार । इहाय गत्यर्थोपि करणे धातूनामनेकार्थत्वाद्बोध्यः । तच्च स्फुटं सप्तशतीचरिते 'देव्या हते तत्र महासुरेन्द्रे सेंद्राः सुरा वह्निपुरोगमास्ताम् । कात्यायनीं तुष्टुवुरिष्टलाभादि'त्यादिना । 'शक्रादयः सुरगणा निहतेतिवीर्ये' इत्यादिना च । किं कर्तुं धीमहि आदिकवये आदिकविं विष्णुं प्राप्तुम् । तदुक्तं ब्रह्मवैवर्त्ते 'अनाराध्य महेशानीं नैवाप्नोति हरिं नरः ।' इति । आदिपुराणेपि 'यो न राधामनाश्रित्य सेवते मां मुनीश्वर । न कदापि स चाप्नोति मां राधारहितं खलु ॥' इति । यत्रास्मिन्दुर्गारूपे तेजसि सूरयोपि शुंभाद्या मुह्यंति 'मां वा ममानुजं वापि निशुंभमुरुविक्रमम् । भज त्वं चंचलापांगी'त्यादि मोहं प्राप्नुवंति । किंभूतं तत्स्वेन धाम्ना तेजसा निरस्ताः कुहका रक्तबीजाद्या येन तत्तथा । यद्वा निरस्तः कुहकः स्मर्तॄणामापल्लक्षणो येन तत्तथा । 'दुर्गे स्मृता हरसि भीतिमशेषजंतोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि । दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचिता ॥' इति मार्कंडेयोक्तेः । पुनः सत्यं नित्यं 'नित्यैव सा जगन्मूर्तिर्यया सर्वमिदं ततम् ।' इत्यादिपुराणात् । पुनः परं सर्वसेव्यत्वात् । सर्वस्वरूपे सर्वेशे इत्युक्तेः । मुक्तिहेतुत्वाद्वा परम् । 'या मुक्तिहेतुरविचिंत्यमहाव्रता चेति' मार्कंडेयोक्तेश्च । सैषा ब्रह्मविष्णुरुद्रस्वरूपाणि सैषा प्रजापतींद्रमनव इत्यादि, तामहं प्रणौमि नित्यं देवीं पापहारिणीं भुक्तिमुक्तिप्रदायिनीमित्यंताथर्वश्रुतेः सा परैवेत्यलं प्रपञ्चेन । इति दुर्गापक्षः ॥ ४० ॥

अथ श्रीभागवतपक्षः ॥ वयं तत् श्रीभागवतं महापुराणं सदा हृदा धीमहि । ननु भागवतस्याधुना प्रारब्धत्वेन कथमादौ विना तन्निष्पत्तिं तद्ध्यानमिति चेन्न । नहि भागवतं श्रीव्यासदेवेन रचितं किंतु पूर्वं सदेवाविष्कृतमन्यथा तस्य 'इदं भागवतं नाम पुराणं ब्रह्मसंमितम् ।' इति वाक्येन ब्रह्मरूपत्वाद् ब्रह्मणोप्यनित्यता स्यात् । 'पिबत भागवतं रसमालयमि'त्यग्रे वक्ष्यमाणत्वादप्यस्यानागताख्यानेनैव प्रवृत्तेः । पुराणांतरे प्रशंसाश्रवणादपि नित्यत्वमेवास्य सेत्स्यति । तथा च गरुडपुराणे 'अर्थोयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः । गायत्रीभाष्यभूतोसौ वेदार्थपरिबृंहितः ॥ ग्रंथोष्टादशसाहस्रो द्वादशस्कंधसंमितः । पठनात्पाठनाद्ध्यानात्स्पर्शनादर्चनादृशेः ॥ सर्वपापहरः कृष्णरूपी चैव न संशयः ।' इति ब्रह्मवैवर्तेपि, पुराणेषु भागवतमिति विभूतिषु श्रीभागवतस्य गणितत्वादपि ब्रह्मरूपतासिद्धेर्यतो नित्यमेवेदं पुराणमथाग्रेऽस्य वैभवं वक्ष्यामः । तत्किम् । यत्र त्रयाणां कर्मोपासनाज्ञानकांडानां सर्गो रचनाऽमृषा सत्यः । इह काण्डत्रयस्य यथावत्प्रतिपादनात् । कर्मकाण्डस्तु विधिनिषेधात्मकः । तत्र संक्षिप्य विधिभेदानाह । अप्राप्तं फलवन्तं चार्थं यः स्वसामर्थ्येन प्रकाशयति विधिरुत्पत्त्यादिधर्मैर्युक्तः । स चोत्पत्तिविधिर्विनियोगविधिः प्रयोगविधिरधिकारविधिश्चेति चतुर्द्धा भवति । तत्र कर्मस्वरूपमात्रबोधको विधिः प्रथमः, यथाग्निहोत्रं जुहोतीति । अंगसंबंधबोधको विधिर्विनियोगविधिः । यथा दध्ना जुहोतीति, स हि तृतीयाप्रतिपन्नांगभावस्य दध्नो होमसंबंधं विधत्ते दध्ना होमं भावयेदिति । दध्यादीनामंगत्वं नाम परोद्देश्यप्रवृत्तकृतिव्याप्यत्वं पारार्थ्यम् । तच्चानेन विधिना ज्ञाप्यते । प्रयोग आशुभावबोधको विधिः प्रयोगविधिः । स चांगवाक्यैकवाक्यतामापन्नः प्रधानविधिरेव सांगं प्रधानमनुष्ठापयन्विलम्बे मानाभावादविलम्बापरपर्याये प्रयोग आशुभावं विधत्ते । न च विलम्बवदविलम्बेपि मानाभावः । विलंबेंऽगप्रधानविध्येकवाक्यतावगततत्साहित्यानुपपत्तेः । नहि विलम्बेन कृतयोः पदार्थयोः सहकृतमिति साहित्यं व्यवहरंति । स चाविलम्बो नियते क्रमे आश्रयमाणे भवति । अन्यथा किमेतदनन्तरमेतत्कर्तव्यमेतदनन्तरं वेति प्रयोगविक्षेपापत्तेः । अतः प्रयोगविधिरेव स्वविधेयप्रयोग आशुभावसिद्ध्यर्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते । तत्र क्रमो नाम विततिविशेषः पौर्वापर्यरूपो वा । फलस्वाम्यबोधको विधिरधिकारविधिः । फलस्वाम्यं च कर्मजन्यफलभोक्तृत्वम् । स च यजेत स्वर्गकाम इत्येवंरूपः । अनेन हि स्वर्गमुद्दिश्य यागं विदधता स्वर्गकामस्य यागजन्यफलभोक्तृत्वं बोध्यते । तच्च स्वाम्यं तस्यैव योधिकारविशेषणविशिष्टः । अधिकारविशेषणं च तदेव यत्पुरुषविशेषणत्वेन श्रुतमत एव । राजा राजसूयेन स्वाराज्यकामो यजेतेत्यनेन स्वाराज्यमुद्दिश्य राजसूयं विदधतापि न स्वाराज्यकाममात्रस्य तत्फलभोक्तृत्वं बोध्यते । किंतु राज्ञः सतस्तत्कामस्य । किंचित्तु पुरुषविशेषणत्वेनाश्रुतमप्यधिकारिविशेषणं भवति । यथाध्ययनविधिसिद्धा विद्या । अग्निसाध्येषु च कर्मस्वाधानसिद्धाऽग्निमत्ता । एवं सामर्थ्यस्याप्यधिकारिविशेषणम् । आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति न्यायात् । अर्थी समर्थो विद्वान्यजेदिति असमर्थं प्रति विध्यप्रवृत्तेश्च । एवमर्थितादेरपि बोध्यमिति दिक् । तत्सिद्धफलस्वाम्यबोधको विधिरधिकारविधिरिति तदेवं निरूपिता विधिभेदश्चतुर्द्धेति । चतुर्धाप्ययं पुनः प्रकारांतरेण त्रिविधः स च 'विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम् ।' उदकत्वं चापूर्वत्वाद्विधिस्तु धारणेऽपूर्वत्वात् नियमार्थं वा पुनः श्रुतिमकयत्न परिसंख्येयत्वमादिषु भगवता जैमिनेः सूत्रैरभिहितः । भट्टपादैश्चान्योन्यासंकीर्णतया सलक्षणो विशिष्टमुपपादितः ।

"विधिरत्यंतमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥" इति । अस्यार्थः यस्य यदर्थत्वं मानांतरेणाप्राप्तं तस्य तदर्थत्वेन यो विधिः सोपूर्वविधिः । यथा 'यजेत स्वर्गकामः व्रीहीन्प्रोक्षतीत्यादिनात्र यागस्य स्वर्गार्थताया व्रीहीणां प्रोक्षणस्य च संस्कारकर्मणो विधिं विना कथमपि प्राप्तिरस्ति अतोयमपूर्वविधिः । पक्षप्राप्तस्याप्राप्तांशपरिपूरणफलोविधिर्नियमविधिः । यथा व्रीहीनवहंतीति । अत्र विध्यभावेपि पुरोडाशप्रकृतिद्रव्याणां तंडुलनिष्पत्त्याक्षेपादेवावहननाप्राप्तांशसम्भवात्तदंशपरिपूरणफलः । उभयत्रैकस्योभयोर्वैकत्र युगपत्प्राप्तावन्यतरनिवृत्तिफलो विधिः परिसंख्याविधिः । यथा चयनेऽश्वगर्दभरशनयोर्ग्रहणे युगपदनुष्ठेये सामर्थ्याविशेषात्प्राप्तस्य । 'इमामागृभ्णन् रशनामृतस्ये' ति मन्त्रस्याश्वाभिधानीमादत्ते इति गर्दभरशनाग्रहणव्यावृत्तिमात्रफलको विधिः । एवं पञ्चपञ्चनखा भक्ष्या इत्यपि परिसंख्याविधिः । इदं हि न भक्षणपरं तस्य रागतः प्राप्तत्वात् । किंतु पञ्चेतरपञ्चनखभक्षणनिवृत्तिपरमिति । न च नियमपरिसंख्ययोः फलतो न विशेषः । यतो नियमस्य विधेयावघातनिष्ठत्वात्सन्निहितमप्राप्तांशपूरणमेव फलं नखविदलनादिवृत्तिस्त्वार्थिकीति विधिपक्षे वक्तव्यं बह्वस्ति तदन्यत्रानुसंधेयम् । विधेर्यथा विधेयार्थपरिच्छेदकत्वेनार्थवत्त्वं तथानर्थहेतुकर्मणः सकाशात्पुरुषस्य निवृत्तिकरणत्वेन निषेधस्यापि पुरुषार्थानुबंधित्वं बोध्यम् । तथाहि विधयो यथा प्रवर्त्तनामभिदधतः स्वनिर्वर्त्तकत्वनिर्वाहार्थं विधेयस्य यागादेः श्रेयःसाधनत्वमाक्षिपंतः पुरुषं तत्र प्रवर्त्तयंति एवं न कलंजं भक्षयेदित्यादयो निषेधा अपि निवर्त्तनामभिदधतः स्वनिर्वर्त्तकत्वनिर्वाहार्थं निषेधस्य कलंजभक्षणादेरनर्थहेतुत्वमाक्षिपंतः पुरुषं ततो निवर्त्तयंतीति । किंच निषेधस्य क्रतुवैगुण्यप्रतिपादकत्वेन हेयतया यागार्थतापि सिद्धा । अर्थवादवाक्यं हि स्वार्थप्रतिपादने प्रयोजनाभावाद्विधेयनिषिध्यमानयोः प्राशस्त्यनिंदितत्वे लक्षणया प्रतिपादयंति । तल्लक्षणं तु प्राशस्त्यनिंदान्यतरपरं वाक्यमर्थवादः । स द्विधा विधिशेषो निषेधशेषश्चेति । तत्र 'वायव्यं श्वेतमालभेत भूतिकाम' इत्यादिविधिशेषस्य 'वायुर्वै क्षेपिष्ठा देवते'त्यादेर्विधेयार्थप्राशस्त्यबोधकतयार्थवत्त्वम् । बर्हिषि रजतं न देयमित्यादिनिषेधशेषस्य 'सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमि'त्यादेर्निषेध्यनिंदितत्वबोधकतयार्थवत्त्वं न च प्राशस्त्यादिबोधस्य निष्प्रयोजनत्वेन नार्थवादस्यार्थवत्त्वमिति वाच्यम् । आलस्यादिनाऽप्रवर्तमानस्य पुंसः प्रवृत्त्यादिजनकत्वेन तद्बोधस्योपयोगात् । स पुनस्त्रेधा । तदुक्तं 'विरोधे गुणवादः स्यादनुवादोवधारिते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः ॥' इति । प्रमाणांतरविरोधे सत्यर्थवादो गुणवादः । यथादित्यो यूप इति यूपे आदित्याभेदस्य प्रत्यक्षबाधितत्वादादित्यवदुज्ज्वलत्वरूपगुणोऽनेन लक्षणया प्रतिपाद्यते । प्रमाणांतरावगतार्थबोधकोनुवादः । यथाग्निर्हिमस्य भेषजमित्यादि । हिमविरोधित्वस्याग्नौ प्रत्यक्षावगतत्वात् । प्रमाणांतरविरोधतत्प्राप्तिरहितार्थबोधको भूतार्थवादः । यथेंद्रो वृत्राय वज्रमुदयच्छदित्यादि । न ह्यत्र प्रमाणांतरविरोधतत्प्राप्ती स्तः । एवं सर्वः कर्मकांडो विधिनिषेधांतर्गत एव । अत्रैव धर्मशास्त्रमपि गतार्थं तत्प्रतिपादकमिति बहुवक्तव्यत्वादत्रोपरम्यते हि । उपासनाकांडे उपासनास्वरूपमाह । वस्तुस्वरूपानपेक्षं पुरुषेच्छामात्रतंत्रं मानसं प्रवाहरूपमुपासनम् । यथा यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्नित्यादिरूपम् । उपासना हि परमेशस्य कार्या तत्र च परमेशोऽनेकधा यथामति दार्शनिकैः स्वीकृतस्तस्य चोपासना कर्त्तुमशक्याऽतः सर्वाविरुद्ध एवोपास्यः । स चौपनिषदाभिमतः कथं तदुपगमे सर्वाविरोध इति चेदत्र पातंजलमतमाह–'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः सोपि जीववदसंगश्चिद्रूपश्च परश्च जीवेभ्यस्तन्नियंतृत्वात् । 'प्रधानक्षेत्रज्ञपतिर्गुणेश' इति श्रुतेः । ननु नियंतृत्वं नाम कारयितृत्वम् । तच्चासंगस्यानुपपन्नम् । यः कारयति स करोत्येवेति न्यायेन कर्त्तृत्वस्य दुर्वारत्वात् । दृश्यते हि योधयितृषु नृपेषु दानादिकर्त्तृत्वं स्वयं योद्धृत्वं च । लोहचुम्बकन्यायेनासंगस्यापि प्रेरकत्वोपपत्तेः । न च तन्निष्प्रमाणं 'भीषास्माद्वातः पवते'इत्यादिश्रुतिसिद्धत्वात् । बंधमोक्षादिव्यवस्था पृथिव्यवस्थित्यनुपपत्तिसिद्धत्वाच्च । जीवानामपि स्वतः क्लेशादिराहित्येपि बुद्ध्या सह विवेकाग्रहेण क्लेशादिसत्त्वांगीकारात् । ईशस्तु सदा तैरसंसृष्ट इति विशेषः । एतेन सेश्वरसांख्यवादोपि व्याख्यातः, एतत्तुल्ययोगक्षेमत्वात् । तार्किकास्त्वसंगस्य नियंतृत्वमसहमाना नित्यबुद्धीच्छाकृतिमान्पुरुषविशेष ईश्वरः । पुंविशेषत्वमप्यस्य नित्यबुद्ध्यादिगुणकत्वादेव । नान्यथा नित्यज्ञानादिमत्त्वात् । अनित्यज्ञानादिमज्जीवेभ्यस्तद्वैलक्षण्यमपि सिद्ध्यति । क्षित्यादि सकर्तृकं कार्यत्वादित्यनुमानं तत्र मानम् । स च लाघवादेकः सर्वत्र कार्योपलब्धेर्विभुश्च । ज्ञानादेर्निकर्षवदुत्कर्षोप्यंगीकार्यो बाधकाभावादिति न्यायेन भवाद्युपादानसर्वसूक्ष्मदर्शित्वात्सर्वज्ञश्च सत्यकामः सत्यसंकल्पः । यः सर्वज्ञः सर्वविदित्यागमोपि तत्र मानमित्याहुः । यद्यप्यकामकर्माद्यभावाज्जन्यं सुखमीश्वरे न संभवति । तथापि नित्यसुखांगीकारे बाधकाभावात् । आनंदं ब्रह्मणो विद्वान्नित्यादिश्रुतेश्च नित्यसुखाश्रयत्वमपीशस्यान्यत्सर्वं समानमिति तदेकदेशिनः । नित्यज्ञानादिमत्त्वे सदा सर्गप्रसंगान्नित्यजिहीर्षावत्त्वे सदा प्रलयापत्तेश्च नैतन्मतं साधु । अतो लिंगदेहसमष्ट्युपहितो हिरण्यगर्भ ईशः । न च देहयोगे जीवत्वं शंक्यम् । तत्समनियताविद्याद्यभावेन तस्य संभवात् । कथं तर्हि शरीरपरिग्रहः ? लीलयैवेति गृहाण । न च तदीश्वरत्वे मानाभावः । उद्गीथब्राह्मणस्य तत्र मानत्वादिति हैरण्यगर्भाः । स्थूलदेहं विना सूक्ष्मस्यानुपलब्धेः स्थूलसमष्ट्युपहितो विराडेवेशः । सच सर्वतो मस्तकादिमान् सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादित्यादिश्रुतेः । 'सर्वतः पाणिपादं तदि' त्यादिस्मृतेश्च । सदेहत्वेपि जीवत्वाभावादिकं पूर्ववदिति वैराजाः । विधिमुपासीनास्तु बहुपाणिपादत्वं नेशत्वप्रयोजकमन्यथा कृमिविशेषस्य सहस्रपद्या ऽपीशत्वप्रसंगात् । तस्मात् श्रुतिस्मृत्यादिमर्त्ववाङ्मयशरीरया सरस्वत्या सदोपासितः सत्यलोकाधिपो ब्रह्मैवेशः । यतो वेदादि-

सामान्यवाक्यान्यप्याग्नेयं चतुर्द्धा करोतीति विशेषवाक्येन पुरोडाशचतुर्द्धाकरणवाक्यवत्प्रजापतिः प्रजा असृजतेत्यादिविशेषवाक्यात्तत्परतयैव नेयानि। सच रुद्रस्य ललाटादाविःकर्त्ता हरेरप्यसुरवधार्थमवतारेषु नियोजकः। कचित्तयोः स्तुत्यादौ प्रवृत्तिस्तु लोकसंग्रहाय। सा च विधेः स्वीयैव तयोः स्वांशत्वादित्याहुः। श्रीविष्णुनाभ्युद्भूतपद्मोत्पन्नो हि विधिः स चैतत्क तिष्ठतीति विचारितवान् सोपश्यत्पुष्करपर्णं तिष्ठन्सोमन्यत अस्ति चैतद्यस्मिन्निदमधितिष्ठतीति श्रुतेः। ततो यदस्याधिष्ठानं तन्मे मूलमिति तन्निश्चयार्थं चिरं भ्रमन्नपि नापश्यत्पश्चात्समाधावपश्यत्तदाज्ञाप्रश्चिरं तप्त्वा प्रजासृष्टौ समर्थो बभूव तत एव वेदानवाप्य सार्वज्ञ्यमापेति सर्वमग्रे वक्ष्यति। अतो विष्णुरेवेशः। स च स्वकृतमर्यादावनाय स्वेच्छयावतरति। 'यदा यदा हि धर्मस्ये'-त्यादिस्मृतेः। महोपनिषद्यपि 'एको ह वै नारायण आसीन्न ब्रह्मा नेशान' इत्यादिना। पुनरेव नारायणः सोन्यत्कामो मनसा ध्यायततल्ललाटात्स्वेदोपतत्ता इमा आपस्तासु तेजो हिरण्मयमंडमभवत्तत्र ब्रह्मा चतुर्मुखोजायतेत्यादिना। अथ पुनरेव नारायणः सोन्यत्कामो मनसाध्यायत तस्य ललाटात् त्र्यक्षः शूलपाणिः पुरुषो जायतेत्यादिना च ब्रह्मरुद्रयोस्तत्स्रष्टत्वोपवर्णनं दृश्यते तस्माद्विष्णुरेवेश इति वैष्णवाः। शैवास्तु 'ब्रह्माद्याः स्थावरांताश्च देवदेवस्य शूलिनः। पशवः परिकीर्त्यंते संसारवशवर्त्तिनः॥ तेषां पतित्वाद्देवेशः शिवः पशुपतिः स्मृतः॥ मलमायादिभिः पाशैः स बध्नाति पशून्पतिः। स एव मोचकस्तेषां भक्त्या सम्यगुपासितः॥' इत्यादि शिवधर्मे। अथर्वशिरसि 'यो वै रुद्रः स भगवान्भूर्भुवःस्वर्यश्च ब्रह्मा यश्च विष्णुरि'त्यादिना तस्य सर्वात्मत्वं दर्शितम्। शिव एको ध्येयः शिवंकरोन्यत्सर्वं परित्यज्येति श्रुतेरित्याहुः। गाणपत्यास्तु तुरीयः परमशिवः श्रीगणेश एव स एव वैष्णवैर्महाविष्णुरित्युच्यते। तथाच श्रुतिः नमस्ते गणपतये त्वमेव प्रत्यक्षं ब्रह्मासीत्यादिका। अत्र विशेष्यसंबद्धत्वादन्ययोगव्यवच्छेदेनैवकारेण पार्थ एव धनुर्द्धर इत्यत्रैवकारेण पार्थादन्यत्र धनुर्द्धरस्येव गणपतेरन्यत्र साक्षाद्ब्रह्मत्वस्य योगो व्यवच्छिद्यते। सूर्याद्याराधनफलारोग्यादिमोक्षांतकथनानन्तरं सर्वमिच्छेद्गणाधिपादिति स्मृतेरन्याराधने प्रयोजनाभावात्। 'अनधीते महाभाष्ये व्यर्था स्यात्पदमंजरी। अधीतेपि महाभाष्ये व्यर्था स्यात्पदमंजरी॥' इति न्यायात्कृतेऽकृतेप्यन्यदेवाराधने गणेशार्चा सर्वार्थदेति भावः। न चैतावतान्यदेवार्चननिषेधः शंक्यः। प्रयाजादिषु कृतेषु ज्योतिष्टोमादीनामप्यननुष्ठानापत्तेः। इतरोपासनाविधायकशास्त्राप्रामाण्यापत्तेश्च। सर्वमिच्छेदिति वाक्यं तु परंपरया गणेशार्चनस्य सर्वत्रोपयोगपरं नत्वितरनिषेधपरम्। तद्विधिविरोधादित्याहुः। भैरवमुपासीनास्तु शिवशंकरशंभ्वादिनामात्रिनेत्रेन्दुशेखरादिलिंगो विधेरपि शास्ता हरेरपि वरदः श्रीकालभैरव एव वेदांतप्रतिपाद्यो मुमुक्षुभिराराध्य एतत्सर्वं कूर्मपुराणे काशीखंडे च स्फुटम्। स एव मल्लारिनाम्ना विख्यातस्तदुक्तम् 'ध्यायेन्मल्लारिदेवं कनकगिरिनिभंम्हालसाभूषितांकं श्वेताश्वं खड्गहस्तं विविधबुधजनैः सेव्यमानं कृतार्थैः। युक्तांघ्रिं दैत्यमूर्ध्नि डमरुविलसितं नैशचूर्णाभिरामं नित्यं भक्तेषु तुष्टं स्वगणपरिवृतं नित्यमोङ्कारगम्यम्॥' इत्यत्र नित्यपदेन प्रागभावाप्रतियोगित्वविशिष्टध्वंसाप्रतियोगित्वार्थकेन तस्य न कुतश्चिदुत्पत्तिर्न वा कुत्र च लय इति प्रतिपादनात्सर्वकारणत्वं सूचितमित्याहुः। श्रीकार्तिकेयोपासकास्तु सर्वगतत्वाद्भक्तानां सविलासाज्ञानशोषणाच्च स्कंदपदाभिधेयः सर्वबुद्धिरूपा गुहा विद्यते आधारत्वेनास्येति व्युत्पत्त्याशैआद्यजन्तगुहपदाभिधेयश्च सर्वान्तरात्मा सद्भजनीयानन्तकल्याणगुणो ब्रह्मादिविभूतिस्तन्नियन्ता परमशिवः सनत्कुमारो भगवान्भोगमोक्षप्रदायकः। इति स्कान्दोक्तेर्मोक्षदाता सुब्रह्मण्य एवेत्याहुः। सौरास्तु 'ब्रह्मेन्द्रनारायणरुद्रवन्दितः स नः सदा यच्छतु मंगलं रविः।' इति भविष्यवाक्यात् एष ब्रह्मा शिवश्चैव रुद्रश्चैवेति ब्रह्मादिविभूतिकः सूर्य एवोपास्यः सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेः। सूर्याद्वै खल्विमानि भूतानि जायन्ते। इति श्रुतेश्चेत्याहुः। केचित्तु मार्कण्डेयपुराणान्तर्गतसप्तशतीप्रतिपाद्यमहालक्ष्मीः सर्वोत्तमा ब्रह्मादयो भारत्यादयश्च तद्विभूतयः। सैव सर्गादिहेतुर्बन्धमोक्षादिहेतुश्चेति। 'तया विसृज्यते विश्वं जगदेतच्चराचरम्। सैषा प्रसन्ना वरदा नृणां भवति मुक्तये॥ संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी। सृष्टिस्थितिविनाशानां हेतुभूते सनातनि॥ विष्णुः शरीरग्रहणमहमीशान एव च॥ कारितास्त' इत्यादिवचनात्। तत्रैव 'हंसयुक्तविमानस्थे' इत्यादिना 'वृत्रप्राणहरे चैन्द्री'त्यन्तेन सप्तमातॄणां तद्विभूतित्वं दर्शितम्। एतेषां ब्रह्मादीनां तदंशत्वात्तदभिन्नत्वेन्योन्यमप्यभेदः। तदभिन्नाभिन्नस्य तदभिन्नत्वमिति न्यायादित्याहुः। केचित्तु स्वस्वप्रीतिगोचरान्यक्षराक्षसभूतप्रेतपिशाचादीन्नृपनापितपुत्रन्यायेनायमेव सर्वोत्तमोऽयमेव सर्वोत्तम इति मन्यन्ते। तेभ्यश्च स्वयं तत्तत्स्वाभिलपितार्थतृष्णाग्रस्तेभ्योपि। 'स्वशिश्नमपि चुंबंतमिक्षुदण्डमयाचता' इति न्यायेन स्वाभिलषितान्याचन्ते। अन्ये वटाश्वत्थचैत्यार्कवंशादीनि स्वस्वकुलदैवतानि मत्वा स्थावरयोनिप्राप्त्यातिदुःखितेभ्योपि 'महिषीप्रसवोन्मुख्ये महिषो मदनातुर' इति न्यायेनेष्टं याचन्ते। अन्धचटकन्यायेन कस्माल्लब्धं चार्थं तद्दत्तं मन्यन्ते। अघटनघटनापटीयस्या माययोपहितं जगतामभिन्ननिमित्तोपादानं परं ब्रह्म परमेश्वरः तस्यांशैरिवांशैरीश्वरकोटिभिर्ब्रह्मादिभिर्जीवकोटिभिश्च सूत्रविराडादिभिर्जगदुद्भवाप्रमित्यौपनिषदाः। कचिच्छिवविष्ण्वादीनां परस्परमुपास्योपासकभावो भारतादिषु श्रुतः। स च लीलामात्र एवान्योन्यमभेदबोधतात्पर्यकः। न हि बहव ईश्वराः सम्भवन्ति। सत्त्वे च सुन्दोपसुन्दन्यायेन स्वयमेव बाधिताः सर्वे स्युरत एक एवेश्वरमेशः। स च ब्रह्माद्यनन्तदेवार्थनयाविष्कृतलीलाविग्रहो माथुरमण्डले श्रीनन्दराजवेश्मनि शेषावतारबलदेवसहितो रोमकूपाधिष्ठितानेकब्रह्माण्डः श्रीकृष्ण एव स एव श्रुतिषु परब्रह्मपदेनोक्तः। तथाहि। 'कृषिर्भूवाचकः शब्दो णश्च निर्वृत्तिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते॥'

इति मुनयो ह वै ब्रह्माणमूचुः कः परमो देवः कुतो मृत्युर्बिभेति कस्य विज्ञानेनाखिलं विज्ञातं भवति केनेदं विश्वं संसरतीति। तदुहोवाच ब्राह्मणः श्रीकृष्णो वै परमं दैवतं गोविन्दान्मृत्युर्बिभेतीत्यादिना पूर्वतापनीयोक्तेः। 'कृष्णमेनमवेहि त्वं स्वात्मानमखिलात्मनाम्। जगद्धिताय सोऽप्यत्र देहीवाभाति मायया॥' इति वक्ष्यति। किञ्च 'सर्वेषामेव वस्तूनां भावार्थो भवति स्थितः। तस्यापि भगवान्कृष्णः किमेतद्वस्तु रूप्यताम्॥' इत्यप्यग्रे श्रीदशमे प्रकटीभविष्यति। श्रीगीतायामपि 'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते।' इति स्वयमेवाह। किञ्च 'अहमात्मा गुडाकेश सर्वभूताशयस्थितः। अहमादिश्च मध्यं च भूतानामन्त एव च॥' इत्यपि। एवं 'यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥' इति। किञ्च 'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा। मत्तः परतरं नान्यत् किञ्चिदस्ति धनंजय॥ मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥' इति। 'सर्वस्य चाहं हृदि संनिविष्ट' इत्यादिबहूनि तस्य परमेशत्वे मानानि सन्ति। यत्तु विष्णुपुराणे 'एवं संस्तूयमानस्तु भगवान्परमेश्वरः। उज्जहारात्मनः केशौ सितकृष्णौ महामुने॥ उवाच च सुरानेतौ मत्केशौ वसुधातले अवतीर्य भुवो भारं क्लेशहानिं करिष्यतः॥' इत्युक्तं तस्यायं भावः। 'सुराः समस्ताः सुरनाथकार्येमेभिर्मया यच्च तदीश सर्वम्। आज्ञापयाज्ञाः परिपालयन्तः सदैव तिष्ठाम ह्यपास्तदोषाः॥' इति सुरैरुक्तो भगवान्मम दुष्करं चेत्तदा साहाय्यं कार्यं स्यान्नत्वेवमस्ति भूभारहरणादौ कर्त्रंतरापेक्षया महत्यपि कार्ये मत्केशयोरपि शक्तत्वादिति। न तु केशमात्रावतार इति भ्रमितव्यम्। 'ततः क्षयमशेषास्ते दैतेया धरणीतले। प्रयास्यंति न संदेहो मद्दृक्पातविचूर्णिताः॥ कृष्णाष्टम्यामहं भाद्र उत्पत्स्यामि न संशयः॥' इत्यादिषु तत्रैव स्वावतारत्वोक्तेर्विरोधात्। 'कृष्णस्तु भगवान्स्वयमि' ति वक्ष्यमाणविरोधाच्च। अजरामरस्येशस्यार्द्धपलितत्वासम्भवादेककेश ईशेच्छया रामस्य श्वेतरूपज्ञापनार्थम्। तदेव श्वेतोभूदिति गम्यते। जयंति कृष्णस्य दशावताराः। इति मुकुटेनापि श्रीकृष्णस्यावतारित्वमन्येषां नृसिंहादीनामवतारत्वं ध्वनितम्। यत्तु श्रीदशमे 'कृष्णावतारोत्सवसंभ्रमोऽस्पृशदि' ति श्रीकृष्णेऽप्यवतारप्रयोगः स चाविर्भावपरो बोध्यः। किंच विष्णुनामान्युक्त्वा 'वसुदेवोऽस्य जनक' इत्यनेनामरसिंहेनापि श्रीकृष्णस्यैव विष्णुपदवाच्यत्वं ध्वनितमिति। एतेनैव भारतवाक्यमप्येतत्तुल्यं व्याख्यातम्। ब्रह्मादौ मत्स्यादौ चांशत्वोक्तिरौपचारिकी बोध्या। तत्रांशत्वं ब्रह्मादिष्वाविष्कृतोत्पत्त्यादिहेतुत्वयाल्पोत्पत्त्याद्येकैकशक्तित्वमेव। न तु स्वांशित्वेनाभिमतानंतशक्तिमायीशापेक्षया। वस्तुतोऽल्पशक्तित्वं संख्यातशक्तित्वेनानीशत्वापत्त्या तदनंतशक्तिबोधकानंतवाक्यानामप्रामाण्यापत्तेः। तस्मात्त्रिगुणमायोपहित एक एवेशः। किं बहुना वाग्जालेन। श्रीकृष्णोपासनैव मोक्षहेतुः। तदुक्तं श्रीमुखेनैव। 'अनन्यचेताः सततं यो मां स्मरति नित्यशः। तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः॥ मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्। नाप्नुवंति महात्मानः संसिद्धिं परमां गताः॥ आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन। मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते॥' इति श्रीगीतोपनिषदाचार्येणार्जुनं प्रतीति। श्रीकृष्णोपासने रतिस्तु पूर्वकृतसुकृतानामेव नान्येषाम्। तदपि तत्रैव 'अवजानंति मां मूढा मानुषीं तनुमाश्रितम्। परं भावमजानंतो मम भूतमहेश्वरम्॥ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः। राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः। महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः॥ भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्॥' इति। किंच 'न मां दुष्कृतिनो मूढाः प्रपद्यंते नराधमाः। माययापहृतज्ञाना आसुरं भावमाश्रिताः॥ चतुर्विधा भजंते मां जनाः सुकृतिनोऽर्जुन। आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते। प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः। उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्॥ आस्थितः सहि युक्तात्मा मामेवानुत्तमां गतिम्॥ बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते। वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥ कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यंतेऽन्यदेवताः। तं तं नियममास्थाय प्रकृत्या नियताः स्वया॥ यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति। तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान्मयैव विहितान्हितान्॥ अंतवत्तु फलं तेषां तद्भवत्यल्पचेतसाम्। देवान्देवयजो यांति मद्भक्ता यांति मामपि॥' इति बहुश उक्तं श्रीभगवता वक्ष्यत्यपि 'दुरापा ह्यल्पतपसः सेवा वैकुण्ठवर्त्मसु। यत्रोपगीयते विष्णुर्देवदेवो जनार्दनः॥' इति। किंच 'तपंतु तापैः प्रपतंतु पर्वताद्टंतु तीर्थानि पठंतु चागमान्। यजंतु यागैर्विवदंतु वादैः कृष्णं विना नैव सृतिं तरंति॥' इति श्रीधराचार्येणाप्युक्तम्। 'दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यंते मायामेतां तरंति ते॥' इत्यपि श्रीमुखेनैवोक्तम्। किंच 'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु। मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे॥' इत्युपांतमन्त्रे श्रीगीतासु हरिणा प्रतिश्रुतम्। किंच श्रीदशमे ब्रह्मा श्रीकृष्णं वक्ष्यति। 'श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये केवलबोधलब्धये। तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम्॥' इति। किं बहुना श्रीकृष्णभक्तिरेव कल्याणहेतुरित्यलमतिप्रसंगेन। किंच 'भक्तिः सिद्धेर्गरीयसी' ति कापिलोक्तेः 'मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगमि' ति पञ्चमोक्तेश्च मुक्तेर्भक्तिरधिकाऽत एव भक्तैः सा मुक्तिर्नाद्रियते। 'नेच्छंति ते मया दत्तं कैवल्यमपुनर्भवम्।' इति भगवदुक्तेः। मुक्तौ तु तद्रूपता जायते भक्तस्तु श्रीहरिः स्वायत्तीभवतीति रहस्यम्। नहि वशीकृतनृपनरस्येव स्वयं नृपस्य तत्सुखमिति भावः। अथ ज्ञानकांडमाह। व्यावहारिकप्रातिभासिकपारमार्थिकभेदाज्ज्ञानं त्रिधा। घटपटादिव्यवहारोपयोगि घटोऽयं पटोऽयमित्यादिरूपमाद्यम्। स्वप्नादिविषय

द्वितीयम् । मोक्षोपयोगि पारमार्थिकम् । तच्च जीवब्रह्मणोरभेदरूपमस्ति । तदधिकारी तु साधनचतुष्टयसंपन्नः प्रमाता । साधनानि तु नित्यानित्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः शमादिषट्कसम्पत्तिर्मुमुक्षुत्वं च । नित्यानित्यवस्तुविवेकस्तावत् ब्रह्मैव नित्यं वस्तु ततोन्यदखिलमनित्यमिति विवेचनम् । नित्यत्वं नाम कालानवच्छिन्नत्वम् । तद्विपरीतत्वमनित्यत्वम् । ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानां कर्मजन्यतयाऽनित्यत्ववदामुष्मिकाणामप्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोगविराग इति । शमादयः शमदमोपरतितितिक्षासमाधानश्रद्धाख्या इति । शमः श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः । दमो बाह्येंद्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्त्तनम् । निवर्त्तितानां च सर्वेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः । अथवा विहितानां कर्मणां विधिना त्यागः । तितिक्षा शीतोष्णादिद्वंद्वसहिष्णुता । निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम् । गुरुवेदान्तवाक्येषु विश्वासः श्रद्धेति । मुमुक्षुत्वं मोक्षेच्छा मोक्षो नाम विद्यानिरस्ताविद्यातत्कार्यब्रह्मात्मनावस्थानं तद्विषयेच्छा मोक्षेच्छा तद्वत्त्वं मुमुक्षुत्वमिति । अथायमधिकारी जन्ममरणादिभवाग्नितप्तः 'समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसरति' स निजदयालुतयाध्यारोपापवादाभ्यामुपदिशति । अध्यारोपो नाम वस्तुन्यवस्त्वारोपः । वस्तु सच्चिदानंदं ब्रह्म तद्भिन्नमज्ञानादिसकलजडमवस्तु । अज्ञानं नाम सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति । इदमज्ञानं समष्टिव्यष्टिरूपेणैकमनेकमिति च व्यवह्रियते । व्यष्टिर्विशेषः । समष्टिः सामान्यम् । यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशः। यथा च जलानां समष्ट्यभिप्रायेण जलाशय इति व्यपदेशः। तथा नानात्वेन प्रतीयमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः । 'अजामेकां लोहितशुक्लकृष्णामि'त्यादिश्रुतेः इयं समष्टिरुत्कृष्टोपाधितया शुद्धसत्त्वप्रधाना । एतदुपहितं चैतन्यं सर्वज्ञत्वादिगुणाश्रयं सदव्यक्तमंतर्यामीश्वरेत्यादिशब्दैर्व्यपदिश्यते । सर्वाज्ञानावभासकत्वात् । अज्ञानस्येयं समष्टिरखिलकारणत्वात्कारणशरीरमानन्दप्रचुरत्वात्कोशवदाच्छादकत्वाच्च । आनन्दमयः कोशः सर्वोपरमत्वात्सुषुप्तिरत एव स्थूलसूक्ष्मप्रपञ्चलयस्थानमिति चोच्यते । यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशः, यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति तदनेकत्वव्यपदेशः । तथाज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः, 'इन्द्रो मायाभिः पुरुरूप ईयत' इत्यादिश्रुतेः, इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना । एतदुपहितं चैतन्यमल्पज्ञत्वादिगुणात्मकं प्राज्ञ इत्युच्यते । एकाज्ञानावभासकत्वादिति । अस्यापीयमहंकारादिकारणत्वात्कारणशरीरमानंदप्रचुरत्वादानन्दमयकोशः सुषुप्तिरसर्वोपरमस्थानत्वात्स्थूलसूक्ष्मशरीरलयस्थानमिति चोच्यते । तदानीमेतावीश्वरप्राज्ञौ चैतन्यैद्धाभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानंदमनुभवतः । अनयोर्व्यष्टिसमष्ट्योर्वनवृक्षयोरिव जलाशयजलयोरिवाभेदः । एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरिव जलाशयजलगतप्रतिबिंबाकाशयोरिवाभेदः । वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयजलगतप्रतिबिम्बाकाशयोर्वाधारानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमुच्यते । इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यामविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते । अस्याज्ञानस्यावरणविक्षेपनामकं शक्तिद्वयमस्ति । यथाल्पोपि मेघोनेकयोजनमायतं सूर्यमंडलं द्रष्टृनेत्रपथपिधायकतयावृणोति तथावरणशक्तिः परिच्छिन्नाप्यपरिच्छिन्नमात्मानमवलोकयितृबुद्धिपथपिधायकतयावृणोति । आवरणशक्त्यावच्छिन्नात्मनः कर्तृत्वभोक्तृत्वादिसंसारभावना भवति । यथा स्वाज्ञानावृतरज्जौ सर्पत्वभावना । विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति एवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्त्याकाशादिप्रपञ्चमुद्भावयति । शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति । यथा 'लूता तंतुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानञ्च । 'यथोर्णनाभिः सृजते गृह्णीते च यथा पृथिव्यामोषधयः संभवंति । तथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवति विश्वम् ॥' इति श्रुतेः तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशमाकाशाद्वायुर्वायोरग्निरग्नेरापोद्भ्यः पृथिवी चोत्पद्यते । आकाशादिषु जाड्याधिक्यात्तमःप्राधान्यं तत्कारणस्येति । तदानीं तेष्वाकाशादिषु कारण²-गुणप्रक्रमेण सत्त्वरजस्तमांस्युत्पद्यंते । एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपंचीकृतानि चेत्युच्यंते । एतेभ्यः पंचीकृतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यंते । सूक्ष्मशरीराणि सप्तदशावयवकानि लिंगशरीराणि । ते चावयवा ज्ञानेन्द्रियपंचकं बुद्धिमनसी कर्मेंद्रियपञ्चकं प्राणादिपञ्चवायवः । ज्ञानेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि एतानि पुनराकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक्पृथक्क्रमेणोत्पद्यंते । बुद्धिर्नाम निश्चयात्मिकांतःकरणवृत्तिः । मनो नाम संकल्पविकल्पात्मिकांतःकरणवृत्तिरिति । अनयोरेव चित्ताहंकारयोरंतर्भावः । एते पुनराकाशादिसात्त्विकांशेभ्य उत्पद्यंते । एतेषां प्रकाशात्मकत्वात्सात्त्विकांशकार्यत्वम् । इयं बुद्धिर्ज्ञानेंद्रियैः सहितो विज्ञानमयः कोशः । अयमेव कर्तृत्वाद्यभिमानित्वेनेहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते । मनस्तु कर्मेन्द्रियैः सहितं मनोमयः कोशोस्ति । कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थानि । एतानि पुनराकाशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक्पृथक् क्रमेणोत्पद्यन्ते । वायवस्तु प्राणापानव्यानोदानसमानाः । प्राणोनासाग्रवर्ती

---

१. लूता मर्कटीति यावत् ।

२. अव्याकृतगुणानां प्रक्रमणे ।

प्राग्गामी। अपानस्त्ववधोगामी पाय्वादिवर्त्ती। व्यानोऽखिलशरीरसंचारी। उदानः कण्ठव्याप्यूर्ध्वगामी। समानोऽशितपीतादिसमीकरणकरः। केचित्तु नागकूर्मकृकलदेवदत्तधनंजयाख्या अन्येपि पञ्च वायवः संतीत्याहुः। 'कूर्म उन्मीलनकरो नाग उद्गिरणप्रदः। कृकलः क्षुत्करो जंभाकरः स्याद्देवदत्तकः॥ धनंजयः पोषकरो योमृतं न जहात्यपि॥ इति। इदं प्राणादिपंचकं कर्मेन्द्रियैः सहितं सत्प्राणमयः कोशः। प्राणादेः क्रियात्मकत्वेन रजोंशकार्यत्वम्। एतेषु कोशेषु विज्ञानमयः कर्तृरूपः मनोमयः करणरूपः प्राणमयः कार्यरूपः, एतत्कोशत्रयं मिलितं सत्सूक्ष्मशरीरमित्युच्यते। अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः। अनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिरिति च भवति। एतत्समष्ट्युपहितचैतन्यं सूत्रात्मा हिरण्यगर्भः प्राण इति चोच्यते। सर्वत्रानुस्यूतत्वात् ज्ञानक्रियाशक्तिमदपंचीकृतपंचमहाभूताभिमानित्वाच्च तदुपहितत्वाच्च। अस्यैषा समष्टिः। स्थूलप्रपंचापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नोत एव स्थूलप्रपञ्चस्थानमिति चोच्यते। एतद्व्यष्ट्युपहितं चैतन्यं तेजसो भवति। तेजोमयांतःकरणोपहितत्वात्। अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वात्सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नः स्थूलशरीरलयस्थानमिति चोच्यते। तदानीं सूत्रतैजसौ मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः। अत्रापि समष्टिव्यष्ट्योस्तदुपहितयोः सूत्रात्मतैजसयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवद्वा जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्चाभेद एव। एवं सूक्ष्मशरीरोत्पत्तिरिति। स्थूलभूतानि पञ्चीकृतानि। पञ्चीकरणं त्वाकाशादिषु पंचस्वेकैकं द्विधा समं विभज्य तेषु दशसु प्राथमिकान्पंचभागान्प्रत्येकं चतुर्द्धा समं विभज्य तेषां चतुर्णां स्वस्वद्वितीयभागपरित्यागेन भागांतरेषु संयोजनमिति। केचित् त्रिवृत्करणमप्याहुः। तदानीमाकाशे शब्दोभिव्यज्यते। वायौ शब्दस्पर्शौ। अग्नौ शब्दस्पर्शरूपाणि। अप्सु शब्दस्पर्शरूपरसाः। पृथिव्यां शब्दस्पर्शरूपरसगंधा इति। एतेभ्यः पंचीकृतभूतेभ्यो भूर्भुवःस्वर्महोजनस्तपस्सत्यमित्येतन्नामकानामुपर्युपरि विद्यमानानामतलवितलसुतलतलातलरसातलमहातलपातालनामकानामधोधो विद्यमानानां लोकानां ब्रह्मांडस्य तदंतर्गतानां चतुर्विधस्थूलशरीराण्पमन्नपानादीनां चोत्पत्तिर्भवति। शरीराणि जरायुजांडजस्वेदजोद्भिज्जाख्यानि। जरायुजानि मनुष्यपश्वादीनि। अंडजानि पक्षिपन्नगादीनि। स्वेदजानि यूकामशकादीनि। उद्भिज्जानि तृणवृक्षादीनि। अत्रापि चतुर्विधस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवत्समष्टिर्वृक्षवद्वनवद्व्यष्टिश्च भवति। एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडिति चोच्यते। सर्वनराभिमानित्वाद्विविधं राजमानत्वाद्वा। अस्यैषा समष्टिः स्थूलशरीरमन्नविकारत्वादन्नमयः कोशः। स्थूलभोगायतनत्वाज्जाग्रदिति चोच्यते। एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते। सूक्ष्मशरीरमपरित्यज्य स्थूलशरीरादिप्रविष्टत्वात्। अस्याप्येषा स्थूलशरीरमन्नविकारत्वादन्नमयः कोशः स्थूलभोगायतनत्वाच्च जाग्रदित्युच्यते। तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कप्रचेतोभिः क्रमान्नियंत्रितेन श्रोत्रादींद्रियपंचकेन क्रमाच्छब्दस्पर्शरूपरसगन्धानिंद्रोपेन्द्रयमप्रजापतिभिः क्रमान्नियंत्रितेन वागादींद्रियपंचकेन क्रमाद्वचनादानगमनविसर्गानन्दांश्च चन्द्रचतुर्मुखशंकराच्युतैः क्रमान्नियंत्रितेन मनोबुद्ध्यहंकारचित्ताख्येनांतरिंद्रियचतुष्केण क्रमात्संकल्पविकल्पनिश्चयाहंकार्यचैत्त्यांश्च सर्वानेतान्स्थूलविषयाननुभवतः। अत्राप्यनयोः स्थूलसमष्टिव्यष्ट्योस्तदुपहितयोर्विश्ववैश्वानरयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलजलाशयवत्तद्गतप्रतिबिंबाकाशवच्च वा पूर्ववदभेद एव। एवं पंचीकृतस्थूलभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिरिति। एषा स्थूलसूक्ष्मकारणशरीरप्रपंचानामपि समष्टिरेको महाप्रपंचः। यथावांतरवनानां समष्टिरेकं महद्वनं यथा चावांतरजलाशयानां समष्टिरेको महान् जलाशयः। एतदुपहितं विश्ववैश्वानरादीश्वरपर्यंतं चैतन्यमवांतरवनावच्छिन्नाकाशवदवांतरजलाशयतद्गतप्रतिबिंबाकाशवच्चैकमेव। आभ्यां महाप्रपञ्चतदुपहितचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सदनुपहितचैतन्यं सर्वं खल्विदं ब्रह्मेति वाक्यस्य वाच्यं सल्लक्ष्यमिति। एवं वस्तुन्यवस्त्वारोपोऽध्यारोपः सामान्येन प्रदर्शितः। इदानीं प्रत्यगात्मनि विशेषस्तमाह। अतिप्राकृतस्तु आत्मा वै पुत्रनामासी'ति श्रुतेः स्वस्मिन्निव स्वपुत्रेपि प्रियत्वदर्शनात्पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्यनुभवाच्च पुत्र आत्मेत्याह। चार्वाकस्तु 'स वा एष पुरुषोन्नरसमय' इत्यादिश्रुतेः प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात्स्थूलोहं कृशोहमित्यनुभवाच्च स्थूलशरीरमात्मेत्याह। अन्यश्चार्वाकस्तु 'ते ह प्राणाः प्रजापतिमेत्य ब्रूयुरि'त्यादिश्रुतेरिन्द्रियाणामभावे शरीरचलनाभावात्काणोहं बधिरोहमित्याद्यनुभवाच्चेंद्रियाण्यात्मेति वदति। अपरश्चार्वाको'न्योंतर आत्मा प्राणमय इत्यादिश्रुतेः प्राणाभावे इन्द्रियादिचलनायोगादहमशनायावानहं पिपासावानित्याद्यनुभवाच्च प्राण आत्मेत्याह—अपरश्चार्वाकस्तु 'अन्योंतर'आत्मा मनोमय' इति श्रुतेर्मनसि सुप्ते प्राणादेरभावादहं संकल्पविकल्पवानित्याद्यनुभवाच्च मन आत्मेत्याह। बौद्धस्तु 'अन्योंतर आत्मा विज्ञानमय इत्यादि' श्रुतेः कर्तुरभावे करणस्य शक्तेरभावादहं कर्ताहं भोक्तेत्यनुभवाच्च बुद्धिरात्मेत्याह। प्रभाकरतार्किकौ तु 'अन्योंतर आत्मा आनंदमय' इति श्रुतेर्बुद्ध्यादीनामज्ञाने लयदर्शनादहमज्ञोहं ज्ञानीत्यनुभवाच्च ज्ञानमात्मेति वदतः। भाट्टस्तु 'प्रज्ञानघन' एवानंदमय इति श्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावान् मामहं न जानामीत्यनुभवाच्चाज्ञानोपहितचैतन्यमात्मेति वदति। अपरो बौद्धोऽसदेवेदमग्र आसीदित्यादिश्रुतेः सुषुप्तौ सर्वाभावादहं सुषुप्तौ नासमित्युत्थितस्य स्वभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति। एतेषां पुत्रादीनां शून्यपर्यंतानामनात्मत्वमुच्यते एतैरिति प्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैर्बाधदर्शनात् पुत्रादीनामनात्मत्वं स्पष्टमेव। किंच प्रत्यगस्थूलोऽचक्षुरप्राणोऽमना अकर्ता चैतन्यं चिन्मात्रं सदित्यादिप्रबलश्रुतिविरोधात्। अस्य

पुत्रादिशून्यपर्यंतस्य जडस्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वादहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासानां बाधितत्वात्पुत्रादिशून्यपर्यंतमखिलमनात्मैव। अतस्तत्तद्भासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावप्रत्यक्चैतन्यमेवात्मतत्त्वमिति विद्वदनुभव एवमध्यारोप इति। अथापवादमाह। अपवादो नाम अतात्त्विकोऽन्यथाभावो विवृत्तिः, यथा रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्तस्यावस्तुनोऽज्ञानादिप्रपंचस्य वस्तुमात्रत्वमिति। कार्यस्य कारणमात्रावशेषणं कारणस्वरूपव्यतिरेकेण कार्यस्यासत्तावधारणं वापवाद इति यावत्। तथाहि एतद्भोगायतनं चतुर्विधं सकलशरीरजातं भोग्यरूपान्नादिकमेतदाश्रयभूरादिचतुर्दशभुवनान्येतदाश्रयभूतं ब्रह्माण्डञ्चैतत्सर्वमेतेषां कारणभूतं पंचीकृतभूतमात्रं भवति। एतानि शब्दादिविषयसहितानि पंचीकृतभूतानि सूक्ष्मशरीरजातं चैतत्सर्वमेतेषां कारणरूपापञ्चीकृतभूतमात्रं भवति। एतानि सत्त्वादिगुणसहितान्यपंचीकृतान्युत्पत्तिव्युत्क्रमेणैवैतत्कारणभूताज्ञानोपहितचैतन्यमात्रं भवति। एतदपि तत्सर्वमज्ञानोपहितं चैतन्यं चेश्वरादिकमेतदाधारभूतानुपहितचैतन्यतुरीयब्रह्ममात्रं भवति। आभ्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं भवति। तथाहि अज्ञानादिसमष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहितचैतन्यञ्चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति। एतदुपाध्युपहिताधारभूतमनुपहितचैतन्यं तत्पदलक्ष्यार्थो भवति। अज्ञानादिव्यष्टिरेतदुपहितात्पज्ञत्वादिविशिष्टचैतन्यमेतदनुपहितं चैतन्यं चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति। एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानंदं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भवति। अथ महावाक्यार्थः—इदं तत्त्वमसीति वाक्यं संबंधत्रयेणाखंडार्थबोधकं भवति। संसर्गानवगाहि यथार्थज्ञानजनकत्वमखंडत्वम्। तदुक्तं 'सामानाधिकरण्यं च विशेषणविशेष्यतः। लक्ष्यलक्षणसंबंधः पदार्थप्रत्यगात्मनाम्॥' इति भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे प्रवृत्तिः सामानाधिकरण्यम्। यथा सोयं देवदत्त इति वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्य एतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन्पिंडे तात्पर्यसंबंधः। तथा तत्त्वमसीति वाक्ये परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वंपदस्य चैकस्मिंश्चैतन्ये तात्पर्यसंबंधः।

विशेषणविशेष्यभावसंबंधस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थैतत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्त्तकतया विशेषणविशेष्यभावः। तथा तत्त्वमसीति वाक्येपि तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः। व्यावर्त्तकं विशेषणं व्यावर्त्यं विशेष्यम्। तथाच सोयं देवदत्त इति वाक्ये एवायं शब्दवाच्यो योसावेतत्कालैतद्देशसंबंधविशिष्टो देवदत्तपिंडः अयं स इति तच्छब्दवाच्यात्तत्कालतद्देशसंबंधविशिष्टाद्देवदत्तपिंडाद्भिन्नो नेति यदा प्रतीयते तदा तच्छब्दार्थस्यायंशब्दवाच्यार्थनिष्ठभेदव्यावर्त्तकतया विशेषणत्वम्। अयंशब्दार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वम्। यदा च स इति तच्छब्दवाच्यस्तत्कालतद्देशविशिष्टो देवदत्तपिण्डः स अयमितीदंशब्दवाच्यादेतत्कालैतद्देशसंबंधविशिष्टाद्देवदत्तपिंडान्न भिद्यते इति यदा प्रतीयते तदायंशब्दवाच्यस्य तच्छब्दार्थनिष्ठभेदव्यावर्त्तकतया विशेषणत्वम्। तच्छब्दार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वम्। अयमेव स स एवायमित्यन्योन्यभेदव्यावर्तकतया सोयंशब्दार्थयोः परस्परं विशेषणविशेष्यभाव इत्यर्थः। लक्ष्यलक्षणभावसंबंधस्तु यथा तत्रैव वाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वा परस्परविरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः। तथात्रापि तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वादिविशिष्टत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः। इयमेव जहदजहल्लक्षणापरपर्यायः एकांशपरित्यागेनैकांशस्य ग्रहणाद्भागत्यागलक्षणेत्युच्यते। असाधारणधर्मप्रतिपादकं वाक्यं लक्षणम्। तत्प्रतिपाद्यमविशिष्टवस्तु लक्ष्यमिति विवेकः। एवमन्येषामपि महावाक्यानामर्थो ग्रंथांतरादवसेयः। एतेनाभेदज्ञानमेव ज्ञानकांडप्रयोजनमिति सिद्धम्। तज्ज्ञानं मोक्षहेतुः। इह च श्रुतिस्मृत्यादिरूपाणि बहूनि मानानि संति। ननु जगज्जीवादेर्ब्रह्मणो भेदोस्ति न वा। आद्ये ब्रह्मणोऽसत्त्वाजाड्यदुःखरूपत्वं बलादायातम्। द्वितीये कथमैक्यमिति। किंचाभेदे मानमस्ति न वा। आद्ये घटरूपस्य चाक्षुषत्वे घटस्येव जगज्जीवब्रह्माभिन्नाभेदस्य प्रमाणविषयत्वे जीवब्रह्मणोरपि प्रमाणविषयत्वावश्यंभावेन जाड्यं तदवस्थमेव। प्रमाणेनाभेदाविषयीकरणे प्रमाणसत्त्वांगीकरणमेव नास्ति चेत् शशशृंगवदसत्त्वापात इति चेन्न। यदि मानेनैव वस्तुसिद्धिरिति ते मतं तर्हि माने मानमस्ति न वा। आद्ये ततो भिन्नमभिन्नं वा। द्वितीये मानं विषयीकरोति न वा। आद्ये त्वात्माश्रयः, स्वसिद्धौ स्वस्यापेक्षणमात्माश्रयः। द्वितीये तदङ्गीकरणस्य कैमर्थ्यम्। ततो भिन्नमिति पक्षश्चेत्तत्रापि मानसत्त्वासत्त्वविकल्पे पूर्ववदात्माश्रयोऽनवस्था च।

इतरेतरसाधकत्वे त्वन्योन्याश्रयः। किंच मानस्य मानविषयत्वे प्रमेयत्वापत्त्या मानत्वमेव व्यालुप्येत। माने मानं नास्तीति पक्षे मानरहितस्य शशशृंगतुल्यतायास्त्वयैवाभ्युपगतत्वान्मानस्यैव शून्यता। किंच सति प्रमेये प्रमाणं प्रवर्तते असति वा! आद्ये न प्रमाणप्रयोजनं पश्यामः। तत्प्रवृत्तेः प्रागेव प्रमेयस्य स्वतः सिद्धत्वात्। अंत्येपि न प्रमाणप्रयोजनं न हि प्रमाणमसत्सत्कर्तुमलम्। अन्यथा वंध्यातनुजमपि प्रकटयेत्। किंच प्रमाणं स्वयं प्रमेयं भवति न वा। आद्ये तस्य घटादिसदृशतया न प्रमाकरणत्वम्। द्वितीये तु सप्तमरसवदवाच्यतैव। अभिधेयत्वप्रमेयत्वयोः साहचर्यनियमात्। तस्माज्जडे एव प्रमाणापेक्षा न स्वयंप्रकाशे। तन्निष्ठे धर्मे वा प्रमाणमवश्यमपेक्षणीयम्। वस्तुतस्तु श्रुतिरूपं प्रमाणं तु तत्रास्त्येव। ननु श्रुतिः सच्चिदानंदं विषयीकरोति न वा। अंत्ये किं तदंगीकारेण। आद्ये प्रमेयत्वेन जडत्वं तत्सहचारितत्त्वेनाभिधेयत्वेन वाग्विषयत्वम्। 'यतो वाचो निवर्तंते' इति श्रुतिबाधश्च

स्यादिति चेन्न। श्रुतिरपि यथा कथंचिदविषयतयैव लक्षणावृत्त्या ज्ञापयति नाभिधावृत्त्या। तथा प्रवृत्तौ श्रुतेरेवाप्रमाणता स्यादिति न कोपि दोषः। तदुक्तं पुष्पदन्तेन। 'अतीतः पंथानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि।' इति। ननु न प्रमाणमुत्पादकं ब्रूमः, किंतु साधकमिति चेच्चिरं जीव। अस्मदिष्टस्यैव त्वया कथनात्। साधकमपि प्रमाणं स्वतःसिद्धिहीनं जडं साधयतु न तु स्वयंप्रकाशं परमात्मानम्। तस्य स्वतः सिद्धत्वात्। 'तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति।' इति श्रुत्या सर्वस्य सिद्धेस्तदधीनत्वनिरूपणात्। कथं तर्हि लक्षणयापि श्रुतिविषयत्वमिति चेदज्ञानावृतस्यैवानावृते तु न श्रुतिरपि प्रवर्त्तते इति रहस्यम्। ननु पारमार्थिकभेद एवास्थीयतां किमनया क्लिष्टकल्पनया। अन्यथा सेव्यसेवकभावो जीवानां परस्परं भेदे गुरुशिष्यबद्धमुक्तसुखदुःखजन्मव्यवस्था च न स्यात्। तथा सति द्वयोरपि जाड्यापत्त्यानात्मत्वानित्यत्वादिदोषप्रसंगात्। तथाहि जीवो जडो ब्रह्मभिन्नत्वात्, घटादिवत्। ब्रह्मभिन्नत्वजडत्वयोर्व्याप्तेः संप्रतिपन्नत्वात्। एवं ब्रह्मापि जडं जीवभिन्नत्वात्पाषाणादिवत्। तथाच जडत्वपरिच्छिन्नत्वानात्मत्वानित्यत्वादयो दोषा न निवारयितुं शक्याः। न च परमाण्वाकाशादौ व्यभिचार इति वाच्यम्। परमाणूनामप्रामाणिकत्वेनानभ्युपगमादाकाशादेश्चास्मन्मते जन्यत्वेनानित्यत्वान्न क्वापि व्यभिचारः। तथात्वे च कस्य ज्ञानेनाविद्यातत्कार्यबाधः को वा श्रवणाद्यनुष्ठाता स्यात्। तथाहि जडस्य ब्रह्मणो विज्ञानमानंदं ब्रह्मेति श्रुत्युक्तज्ञानरूपत्वाभावेन व्यापकज्ञानविषयत्वानुपपत्तेः। अज्ञानविषयत्वेनाज्ञातस्यैव च ज्ञानविषयत्वनियमात् ज्ञानगोचरतापि न। तथा जीवस्यापि जडत्वादज्ञानाश्रयावच्छिन्नचेतनता न संभवति। जडं स्वत एवाप्रकाशितत्राज्ञानकृत्यभावात्। न च जडमेवाज्ञानमाश्रयतु विषयीकरोतु वा घटादिषु दृष्टत्वादिति वाच्यम्। घटादिनिष्ठाज्ञानस्य घटाद्यवच्छिन्नचैतन्यविषयत्वांगीकारेण तत्रापि घटादिविषयत्वानुपपत्तेर्न क्वचिज्जडाश्रयत्वमज्ञानस्य संभवति। एतदभिप्रायेणोक्तं सर्वज्ञसूक्तैः—'आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला। पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नैव गोचरः॥' इति। तथाच जडयोर्जीवब्रह्मणोरज्ञानाश्रयत्वविषयत्वाभावे कस्य ज्ञानेन मोक्षः कस्य वा साधनानुष्ठायित्वम्। किंच जातेपि तत्त्वज्ञाने द्वयोरपि जडतया बाधावश्यंभावेन शून्यवादप्रसंगः। ततो न जीवब्रह्मणोर्वास्तवो भेदः। नापि जीवानां परस्परभेदः। पूर्ववज्जाड्यापत्त्या दोषस्य तादवस्थ्यात्। न च व्यवहारसंकरः। कुंभाद्यनुगतरविशशिनभसां प्रातीतिकभेदवदाविद्यकांतःकरणभेदवशाज्जीवानामपि तादृशभेदाभ्युपगमात्। तेन व्यवहारे सिद्धे किं परमार्थभेदाभ्युपगमेन। न च पारमार्थिकभेदं विना व्यवहारसिद्धिरिति वाच्यम्। स्वप्नादौ तं विनापि निखिलव्यवहारदर्शनात्। प्रत्युत भेदे वस्तुत्वे 'एकमेवाद्वितीयं ब्रह्म, अजो ह्येकः, क्षेत्रज्ञं चापि मां विद्धी'त्याद्यभेदपरश्रुतिस्मृतिवाक्यानामप्रामाण्यमनिर्मोक्षप्रसंगस्तदर्थं श्रवणाद्यनुष्ठानवैयर्थ्यं च स्यादतोऽभेद एव न्याय्यो न भेद इति। तथाच सर्वाभिन्नात्मज्ञानं श्रवणादिभिः स्यात् श्रवणादीनां श्रुतिविहितत्वात्तद्विधायकां श्रुतिमाह—'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः।' इति। 'अत्राग्निहोत्रं जुहोति यवागूः पचती'ति वत्पाठक्रमादर्थक्रमो बलीयानिति ध्येयोन्यथा द्रव्यपदस्यांते पाठः स्यादिति। श्रवणं नाम न्या[१]यैर्निर्णीततात्पर्यैकश्रुत्यादिभिरात्मनिर्णयः। ततोप्युक्तवादिदुस्तर्कजालैरसंभावनाविपरीतभावनोत्पत्तेस्तन्निवारकन्यायानुसन्धानं मननम्। ततश्च व्यासंगत्यागेन देहातिरिक्तात्माकारमनोनुसंधानं निदिध्यासनम्। ततो यथाभूतदेहाद्यतिरिक्तात्मसाक्षात्कारस्तत्त्वज्ञानात्मको जायते यः समूलं मिथ्याज्ञानमुन्मूलयति विशेषदर्शनजन्यलौकिकसाक्षात्कारत्वेन भ्रमनिवर्त्तकत्वदर्शनात्। श्रुतिरप्येवमाह 'तरति शोकमात्मवित्' इति। मिथ्याज्ञाननाशः शोकतरणं तद्धेतुरात्मदर्शनं तद्धेतूनि श्रवणादीनीति विवेकः। न त्वात्मसाक्षात्कारस्यैव मिथ्याज्ञाननाशकत्वेन्यपदार्थनिरूपणं व्यर्थमिति चेन्न। तत्तत्त्वज्ञानमंतरेण तद्भिन्नत्वेनात्मज्ञानासम्भवात्परंपरोपयोगेन सार्थक्यात्। तच्चात्मज्ञानं भगवत्प्रसादेनैव न तद्विनेति। अतः सोपि ज्ञेय उपास्यश्चेति पूर्वमुपपादितमेतद्रहस्यः। अत्रैवान्येषां सांख्याद्यभिमतज्ञानानामंतर्भावो यथाकथंचिद्बोध्यः। सर्वे पदा हस्तिपदे निमग्ना इति न्यायेनेति संक्षेपतो निरूपितः कांडत्रयविभागः। कथं यथा तेजोवारिमृदामविनिमयः स्वभावावस्थितिरमृषा तथेति दृष्टांतः। यतः श्रीमद्भागवतात्स्वेन राजते सत्यलोक इति स्वराट् ब्रह्मा आद्यस्य प्राकल्पीयज्ञानस्य जन्माविर्भावमन्वयात्प्राप। एतच्चाग्रे स्फुटीभविष्यति। 'पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममादिसर्गे। ज्ञानं परं स्वात्मरहःप्रकाशं यत्सूरयो भागवतं वदंति॥' इति तृतीये वक्ष्यति भगवान्। किंच 'यथात्ममायायोगेन नानाशक्त्युपबृंहितम्। विलुंपन् विसृजन् गृह्णन् बिभ्रदात्मानमात्मना॥ क्रीडस्यमोघसंकल्प ऊर्णनाभिर्यथोर्णुते। तथा तद्विषयां धेहि मनीषां मयि माधव॥' इत्यादिना ब्रह्मप्रार्थनानंतरं श्रीहरिणा 'ज्ञानं परमगुह्यं मे' इत्यादिश्लोकैः संक्षेपेण श्रीमद्भागवतं ब्रह्मणे उपदिश्यांतर्दधे। ततश्च 'अंतर्हितेंद्रियार्थाय हरये विहितांजलिः॥ सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत्॥' इति च वक्ष्यति द्वितीये। इतरत इतरेपि नारदव्यासमैत्रेयादयोपि यतो भागवतादाद्यस्य सर्वादिकारणस्य हरेर्जन्म कोर्थः साक्षात्कारमन्वयुः। अत्रार्थवशाद्वचनविपरिणामः। च पुनः यतो भागवतात्पुमानर्थेषु धर्मादिषु शास्त्रीयपदार्थेषु वाभिज्ञो ज्ञाता भवति। 'धर्मार्थकाममोक्षाणां ज्ञानं भागवतं श्रुतेः। सर्वशास्त्रार्थविज्ञानमस्याध्येतुश्च जायते॥' इति संहितोक्तेः। यद्भागवतमादिकवये श्रीव्यासाय मह्यं परं परमानंदं तेने। 'परः स्यात्परमानंदे परमेशे रिपौ पुमान्॥' इति कोशात्।

१. श्रुत्यर्थनिर्णायको न्यायः सूत्रमित्यर्थः।

किंभूताय महां ब्रह्म हृदये यस्य स ब्रह्महृदः। समासान्तोऽत्रान् प्रत्ययः तस्मै ब्रह्महृदाय 'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्।' इति गीतासु ब्रह्मशब्दः प्रकृतिपरः श्रीहरिणोदाहृतः। इह च ब्रह्मशब्देन प्रकृतिकार्यभूतो प्रसन्नतारूपः शोको बोध्यः। 'गोभिः श्रिगीतमत्सरमि' तिवत्कारणेपि कार्यप्रयोगः। तेन ब्रह्महृदाय कोर्थः शोकाकुलायाति लब्धम्। एतद्वृत्तमग्रे स्फुटीभविष्यति-'नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ।' इत्यारभ्य 'अथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः। असंपन्न इवाभाति ब्रह्मवर्चस्यसत्तम ॥' इत्यन्तग्रन्थेन। यद्वा यद्भागवतमादिकवये ब्रह्मणे ब्रह्म वेदं तेने सृष्ट्यादौ भगवता चतुःश्लोकीरूपेणोपदिष्टमेव तद्वेदं तेने वेदरूपेण चतुर्मुखेभ्य आसेत्यर्थः। 'चतुश्लोकी चतुर्वेदबीजभूता न संशयः।' इति संहितोक्तेः। चतुष्टयरूपेण वेदप्राकट्ये चतुश्लोकोपदेश एव हेतुरन्यथा पंचादिभिः कथं नोपदिष्टमिति भावः। यस्मिन्भागवते सूरयोपि शास्त्रज्ञा अपि हरिभक्तिं विना मुह्यंति एतदर्थरहस्यं नाप्नुवंति। 'भक्त्या भागवतं शास्त्रं न व्युत्पत्त्या न टीकया।' इत्यभियुक्तोक्तेः। यद्वा यस्मिन्नितरत इतरे शाक्तिकनास्तिकप्रभृतयः सूरयः संतोपि मुह्यंति नैतद्व्यासकृतमिति वदंति। व्यासकृतेतरपुराणरचनाविलक्षणत्वात्। किंच "अष्टादशपुराणानि कृत्वा सत्यवतीसुतः। चक्रे भारतमाख्यानं वेदार्थैरुपबृंहितम् ॥" इति स्कांदमाहात्म्योक्तेरिह च 'जिज्ञासितं सुसम्पन्नमपि ते महदद्भुतम्। कृतवान्भारतं यस्त्वं सर्वार्थपरिबृंहितम् ॥' इति प्रथमस्कंधे श्रीनारदो व्यासशोकापनोदावसरे तमुक्त्वा भागवतवर्णनं तस्मा उपादिदेशेति विरुद्धत्वाच्च। अत्र प्रांचः 'इतिहासपुराणानां भागो यो वाचकस्य सः। कर्तृवर्जित एवास्य व्यासः प्राकट्यकृन्मतः ॥ मार्कंडेयादिसंज्ञा तु काठकादिवदिष्यताम्। नन्वृगादिपुराणांतो वेदो नित्योस्ति किं त्वदः ॥ सम्प्रति प्रचरद्भूमौ श्रीमद्भागवताभिधम्। अष्टादशातिरिक्तत्वाद्वेदरूपं न संभवेत्। अष्टादशोत्तरं व्यासो भारतं कृतवान्प्रभुः ॥ भारतोत्तरमेतत्तु चक्रे भागवतं मुनिः। इत्येवमुक्तेरेतस्य नाष्टादशसु सम्भवः। मैवंलक्षणसंख्याभ्यामिदमेव हि तद्भवेत्। ब्रह्मश्रीपतिसंवादो योऽशोऽष्टादशमध्यगः ॥ व्यासनारदसंवादस्तत्र यस्मात्प्रवेशितः। एकस्यैव तदेतस्य श्रीमद्भागवतस्य तत् ॥ अष्टादशांतर्वर्तित्वं पौर्वापर्यं च संभवेत्। विवक्षा नास्ति कालस्य स चेदत्र विवक्ष्यते ॥ मार्कंडेयाग्नेययोः स्याद्बहिर्भावस्तदानयोः ॥' इति। अथास्य व्याख्या। अथेतिहासपुराणेषु विष्णुभक्तिवाक्यान्यवेदरूपाणीति विवक्षून् मीमांसकैकदेशिनः कांश्चिन्नास्तिकाभासान्निराकर्तुं प्रवर्तते। तथाहि नन्वितिहासपुराणयोर्न वेदत्वमष्टादशपुराणानि कृत्वा भारतं चक्रे व्यास इति स्कांदादौ तयोः कृतकत्वाभिधानादिति चेन्नत्राह। कृत्वा सत्यवतीसुतश्चक्र इत्यत्र तानि प्रकटय्यैतत्प्रकटयांचकारेत्येवार्थः। अन्यथा 'एवं वा अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदोथर्वांगिर इतिहासः पुराणं विद्या उपनिषद' इत्यादिबृहदारण्यकश्रुतेर्मुख्यार्थबाधः स्यात्। किंच यद्ब्राह्मणानीतिहासपुराणानीति ब्रह्मयज्ञे विनियोगाच्च तयोर्वेदत्वम्। 'आख्यानैश्चाप्युपाख्यानैर्गाथाभिर्द्विजसत्तमाः। पुराणसंहिताश्चक्रे पुराणार्थविशारदः ॥ यच्छिष्टं तु यजुर्वेद इतिशास्त्रार्थनिर्णयः ॥' इति वायवीयाच्चापि तयोर्वेदत्वं पूरणात्पुराणमिति वेदपूरकत्वान्निरुक्तिः। नहि न्यूनस्य स्वर्णकंकणस्य त्रपुणा पूर्तिर्युज्यत इत्यभिप्रेत्यैव स्कांदे—'यो वेद चतुरो वेदान्सांगोपनिषदो द्विजः। पुराणं नैव जानाति न च स स्याद्धि वेदवित् ॥' इत्युक्तम्। ननु वेदस्य चैतद्भागस्तर्ह्यनादौ तस्मिन्मार्कंडेयादिसंज्ञा कथं तत्राह मार्कंडेयेनोच्चारितामिति विविक्षया तद्व्युत्पत्तिः काठकादिसंज्ञावन्मन्तव्या। यथा कठेनोच्चारितं काठकमिति संज्ञा तथा मार्कंडेयादिसंज्ञेति भावः। एवमवेदत्वशंकायामितिहासपुराणयोर्निराकृतायां श्रीभागवतविद्वेषिणः शंकंते—ऋगादेः पुराणांतस्य वेदत्वमस्तु, किंतु शुकपरीक्षित्संवादतया भुवि संप्रति यत्प्रचरति तदिदं भागवतं वेदरूपं न भवेद्यदिदमष्टादशभ्योऽतिरिक्तं प्रतीयते। एतदुपपादयति अष्टादशोत्तरमिति अष्टादशपुराणानीत्यादिना मात्स्यादिवाक्येनाष्टादशपुराणप्राकट्यानंतरं भारतप्राकट्यमुक्तं तदनुभागवतं चक्रे मुनिरिति। तथैव श्रीव्यासनारदसंवादे प्रथमस्कंधे प्रवक्ष्यत्येव। तेन नैतदष्टादशांतर्भूतमतो न वेदरूपं यदष्टादशान्तर्भूतं तद्वेदरूपमिति भावः। परिहरति मैवमिति। अष्टादशांतर्गतस्य भागवतस्य ये लक्षणसंख्ये मात्स्यादौ कथ्येते ताभ्यामेतच्छुकभाषितमेव तदंतर्गतं नान्यदित्यर्थः। तत्र मात्स्ये "यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः। वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥ सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः। तद्वृत्तांतोद्भवं लोके तद्भागवतमुच्यते। अष्टादशसहस्राणि पुराणं तत्प्रकीर्तितम् ॥ लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम्। प्रौष्ठपद्यां पौर्णमास्यां स याति परमां गतिम् ॥" इति। स्कांदे च 'ग्रंथोष्टादशसाहस्रो द्वादशस्कंधसंमितः। हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥ गायत्र्या च समारंभस्तद्वै भागवतं विदुः ॥' इति शुकभाषितत्वं चास्योक्तं पाद्मे 'अंबरीष शुकप्रोक्तं नित्यं भागवतं शृणु। पठस्व स्वमुखेनापि यदीच्छसि भवक्षयम् ॥" इति गौतमेन। वाराहे च परीक्षितः शापकथनप्रसंगे तत्त्वमुक्तं 'तत्राजग्मुर्महाभागा मुनयः संशितव्रताः। शुकश्च व्यासतनयो महाभागवतो मुनिः ॥ संहितां श्रावयामास राज्ञे भागवतीं शुभाम्।' इत्यादिकं श्रीवराहदेवेनोक्तम्। ब्रह्मांडेपि 'शुकवागमृताब्धींदुः परीक्षित्स्वांतगं तमः। निरस्यन् दिद्युते विप्र श्रीमद्भागवताख्यया ॥' इति श्रीशपदेवेन च लक्षणेन ह्यसाधारणवचनेन वस्तु परिचीयते न तु व्युत्पत्तिमात्रेण यथा सास्नादिमत्त्वेन लक्षणेन गौः परिचीयते। अन्यथा भगवता प्रोक्तं भगवद्देवताकं यत्किंचिच्छास्त्रं भागवतं स्यात्। यद्वा भगवत्या इदं भागवतम्। 'यः प्राह भगवान्विष्णुस्तदाह भगवान् शिवः। तथाह भगवान्ब्रह्मा भगवान्पाणिनिस्तथा ॥' इत्यादिषु वाक्येषु विष्णवादिषु भगवच्छब्दप्रयोगाद्भगवतो विष्णोः शिवस्य ब्रह्मणो वा पाणिनेश्चेदं भागवतं तेने विष्णुपुराणशिवपुराणब्रह्मपुराणादीनामष्टाध्याय्याश्च भागवतत्वं स्यात्। यद्वा 'चकार-

भगवान्व्यास' इत्युक्तेः पुराणमात्रस्य भागवतत्वं स्यात्। किंच स्त्रीलिंगव्युत्पत्त्या सप्तशत्यादेश्च तत्स्यात्। गच्छतीति व्युत्पत्त्या महिषोष्ट्रादिश्च गौः स्यात्। अतः श्रीधरस्वामिनापीत्थमुक्तमत एव भागवतं नामान्यदिति न शंकनीयमिति। अत एव कोर्थः लक्षणोक्ते भागवतं नामान्यद्विष्णुपुराणादिव्युत्पत्त्या न भवेदिति तदर्थः। तस्माल्लक्षणेनैव वस्तु परिचेयम्। यत्तु मात्स्याद्युक्तलक्षणं वीक्ष्य केनचित्कृतमेतद्व्यासकृतं तत्त्वन्यदिति पामराणां शंकांतरं तत्परिहरिष्यामः। नन्वष्टादशोत्तरं भारतं प्रकटितं भारतोत्तरं तु श्रीनारदोपदेशतो भागवतमिति ब्रुवता त्वया भागवतद्वयमभिमतम्। तेन च पुराणान्यूनविंशतिरुक्तानि। किञ्च भारतोत्तरस्य लक्षणसंख्ये मात्स्याद्युक्ते प्रतीते भारतात्पूर्वस्य। ते केऽतः स्ववक्तृत्वं प्रज्ञांधप्रेष्ठं प्रकाशितमिति चेत्तत्राह। ब्रह्म श्रीपतीति 'इदं भगवता पूर्वं ब्रह्मणे नाभिपंकजे। स्थिताय भवभीताय कारुण्यात्संप्रकाशितम्॥' इति द्वादशवाक्याद्भागवतं ब्रह्मनारदसंवादरूपं संक्षेपेण कृत्वा पश्चान्नारदोपदेशादनुक्रम्य विस्तारितं चेत्यर्थः। तथाच त्वदुक्तं वियत्पुष्पायमाणं सर्वमभूदतो मूर्द्धानं गृहीत्वा रुदिहीति। भारतोपक्रमेप्येवमस्ति प्रथमं चतुर्विंशतिसहस्रं भारतं कृतमाख्यानैर्विना ततस्तैः सहितं पंचाशत्सहस्ररूपं तदनंतरं ततोप्यधिकमिति अन्यां संगतिमाह। पौर्वापर्येण भासनस्य कालस्य विवक्षा नास्ति। स तादृशः कालश्चेदत्रेतिहासपुराणनिरूपणे वक्तुमिष्यते, तर्ह्यनयोः संप्रति भुवि प्रचरतोर्मार्कंडेयाग्नेययोरष्टादशभ्यो बहिर्भावः स्यात्। अयमर्थः—भारतात्पूर्वेष्वष्टादशसु यद्भागवते ततोन्यदिदं शुकभाषितं यद्भारतादुत्तरमिति चेत्तव शंका तर्हि मार्कंडेयादावप्येवं साभ्युदेति। तथाहि मार्कंडेयारंभे 'भगवन्भारताख्यानं व्यासेनोक्तं महात्मना। पूर्णमस्त्यमलैः शब्दैर्नानाशास्त्रसमुच्चयैः॥' इत्यादि। 'तदिदं भारताख्यानं बह्वर्थं बहुविस्तरम्। तत्त्वतो ज्ञातुकामोऽहं भगवंस्त्वामुपाश्रितः॥' इति च प्रोच्यते। जैमिनिना कृतैश्चतुर्भिः प्रश्नैः पुराणकथावतारिता, सा च भारतोत्तरभावित्वं विना न संमतेति मार्कंडेयस्याष्टादशभ्यो बहिर्भावः। एवमाग्नेयारंभे 'सूत त्वं पूजितोस्माभिः सारात्सारं वदस्व नः।' इति शौनकेन पृष्टः सूतः 'सारात्सारं हि भगवान्विष्णुरव्यय ईश्वरः।' इत्यादिकमुक्त्वाऽवतारांश्च पुराणं तद्विद्यासारं ब्रुवन्प्रसंगाद् ग्रंथांतर्गीतासारं प्रवक्ष्यामीति प्रतिज्ञाय 'दैवी ह्येषा गुणमयी मम माये' त्यादीनि कानिचित्पद्यान्यवोचत। अर्थमात्रोक्तौ यथावत्तानि न ब्रूयादित्याग्नेयस्यापि तेभ्यः सः। तस्मात्कालविवक्षात्र नास्तीति कालपौर्वापर्यकथनं तु ह्यसुरादिमोहार्थमेव। अन्यथा 'व्यासो नारायणः स्वयमि' त्युक्तेः सर्वज्ञस्य नारायणावतारस्य व्यासस्याप्युन्मत्तप्रलपितता स्यात्। ततश्च भागवतादीनां त्रयाणामष्टादशांतर्भावः सिद्धः। इत्थं चेतिहासपुराणानि सर्वाण्यनादिसिद्धान्येव व्यासात्तेषां प्राकट्यमित्युक्तं न विस्मर्तव्यम्। "प्रणम्य च शिवं देवीं शर्वं भागवतं तथा। पुराणं संप्रवक्ष्यामि यथोक्तमृषिभिः पुरा॥ इति वाक्यात्तु ये देवीपुराणद्वेषसंकुलाः। ऊचुर्भागवतं ते हि स्वमौढ्यं प्रवितन्वते॥ मात्स्यादौ यद्भागवतं प्रोक्तं तच्छुकभाषितम्। न तद्देवीपुराणं स्याल्लक्षणादिविपर्ययात्॥ तत्र भागवतत्वेन सर्वस्यैव विशेषणम्। तथेति व्यवधानाच्च पुराणं न विशिष्यते॥ यदिदं कालिकाख्यं च मूलं भागवतं स्मृतम्। इत्युक्तः कालिकाभिख्यं यद्भागवतमूचिरे॥ तच्च प्रमादाद्विद्वपाद्येति प्राहुर्विपश्चितः। एतस्योपपुराणत्वान्मत्स्योक्तत्वं विमूढता॥ त्रयोदशत्वाद्यसिद्धेर्लैंङ्गादीनां समूढता॥" अथास्य व्याख्या। एवं शुकपरीक्षित्संवादरूपं भागवतमष्टादशपुराणांतर्गतं महापुराणमित्यापाद्य तत्र शाक्तैककृतानि शंकांतराणि निराकर्तुं प्रवर्तते। तथाहि ननु प्रणम्य चेत्यादिके देवीपुराणस्याद्यपद्ये भागवतपदप्रयोगाद्भगवत्या इदं भागवतमिति योगाच्च देवीपुराणमेव भागवतमस्तु। यल्लक्षणादिकं मात्स्ये प्रोक्तं न चेदं भुवि शुकप्रोक्तत्वेन प्रचरदिति चेत्तत्राह। प्रणम्य चेत्यादि, प्रकटार्थं तेषां मौढ्यं प्रपंचयति। मात्स्ये स्कांदे च यस्य लक्षणं गायत्रीसमारब्धत्वं कथितम्, यस्य संख्याष्टादशसाहस्री वर्णिता तद्धि पाद्मादौ शुकभाषितत्वेनोक्तं ग्राह्यम्, नतु देवीपुराणम्। तत्र मात्स्याद्युक्तयोर्लक्षणसंख्ययोरभावात्तद्विपरीतयोश्च सत्त्वात् तस्य हि विजयत्रैलोक्याभ्युदयशुंभनिशुंभमथनाख्यपादत्रयविशिष्टत्वं लक्षणं, लक्षं च तस्य संख्योक्ता 'लक्षमात्रेण श्लोकानां विद्या देवेन भाषिते'-त्यभ्युदयपादपूर्त्यध्यायस्य वाक्यात्। शुकपरीक्षित्संवादस्तु तत्र क्वापि नास्ति। किंचाध्यायसमाप्तौ निबंधेषु तदुदाहृती च देवीपुराणनाम्नैव समाप्तिरुदाहृतिश्च दृश्यते, नतु भागवतनाम्नेत्यतो देवीपुराणं भागवतं वदंतः शुकभाषिततद्विद्वेषिणो विमूढा एव विदिताः। एतेन हेमसिंहसमन्वितमिति सिंहवाहिनीत्वेन लिंगेन देवीपुराणत्वशंकनलक्षणजीवनं च निरस्तम्। न खलु तत्र तत्तद्वाहनोपेतानि तत्तत्पुराणानि देयान्युच्यंते। किंतु जलधेन्वाद्युपेतान्येव तस्मात्सिंहशब्देन सिंहासनं वाच्यं पुस्तकाधारत्वेन तस्यापेक्षितत्वात् भीमो भीमसेन इतिवदेकदेशेनापि पूर्णनामाभ्युपगमाच्च। यस्य चतुर्षु पादेषु हेम्नः सिंहाः संतीत्येके। प्रणम्येत्यादिवाक्याद्देवीपुराणे भागवतत्वभ्रांतिं निरस्य तस्य वाक्यस्य परमार्थं दर्शयति। तत्रेति। तत्र पद्ये भागवतशब्दस्य शर्वविशेषणत्वात्तथाशब्देन व्यवधानाच्च पुराणं भागवतमिति न विशेषणीयमिति। शर्वस्य भागवतत्वं तु 'भस्मोद्धूलितदेहस्तु जटामंडलमंडितः। अहं ध्यायामि तं विष्णुं परमात्मानमव्ययम्॥ विष्णोराराधनार्थं मे व्रतचर्या पितामह॥' इति गारुडे तद्वाक्यात्। नच भगवत्या इदं भागवतमिति वाच्यम्, तथात्वे तद्विषयकस्य सर्वस्य तत्त्वापत्तेः। भगवत्प्रोक्तत्वभगवद्देवताकत्वैकतररूपावयवशक्त्या समुदायशक्त्या च शुकभाषितं शास्त्रं वाच्यं बोधयन्नयं भागवतशब्दः पंकजादिवद्योगरूढो बोध्यः। ननु यदिदमित्यादिकात्पुराणदानप्रसंगे कालीपुराणवाक्यात्कालीपुराणं भागवतमस्तु। यदष्टादशसु गण्यते चेतदित्याह सार्द्धश्लोकेन यदिदमिति। मात्स्ये यद्भागवतं लक्षणसंख्याभ्यां वर्णितं न तत्कालीपुराणम्। तल्लक्षणसंख्ययोस्तत्राभावात्। पाद्मादौ शुकभाषित-

त्वं च लक्षणं तत्कालिकापुराणे नास्त्येव। ततः प्रमादाच्छ्रीमद्भागवते विद्वेषाच्च ते तथा वदंतीति विमूढास्त इत्यर्थः। मात्स्ये-लक्षगसंख्याभ्यां पुराणानि लक्षयित्वा तेषां दानमाहात्म्यानि चोक्तानि। अस्य कालीपुराणस्योपपुराणमध्ये गणितत्वात्तन्मात्स्योक्तं भागवतमिदमेवेति ब्रुवंतो विमूढा भवंति। अपिच तत्रैव कालिकापुराण उपपुराणान्यष्टादशोक्तानि। 'शैवं यद्वायुना प्रोक्तं वैरिंचं वैष्णवं तथा। यदिदं कालिकाख्यं च मूलं भागवतं स्मृतम्॥ सौरं च नारदीयं च मार्कंडेयं च वाह्निजम्। भविष्यं ब्रह्मवैवर्तं लिंगं चैव त्रयोदशम्॥ वामनं कौर्ममात्स्ये च सप्तदशं च गारुडम्। स्कान्दमष्टादशं प्रोक्तं पुराणं च न संशयः॥' इति। यदि कालिकाख्यं पुराणं भागवतमिति संबध्यते तर्हि लैंगादीनां त्रयोदशत्वाद्यनुपपत्तिरिति ब्रुवंतस्ते संमूढा इत्यर्थः। तस्माद्भागवताख्यमुपपुराणमिदमन्यदेव। यत्सौरपुराणे—'ततो भागवतं प्रोक्तं भागद्वयसमन्वितमि'ति कृतलक्षणम्। 'ददाति सूर्यभक्ताय यस्तु भागवतं द्विजाः। सर्वपापविनिर्मुक्तः सर्वरोगविवर्जितः। जीवेद्वर्षशतं साग्रमंते वैवस्वतं पदमि'ति। यस्य दानफलं चोक्तमिति कौर्मे प्रथमाध्याये। उपपुराणसंख्यैवमस्ति—"आद्यं सनत्कुमाराख्यं नारसिंहं ततः परम्। तृतीयं स्कांदमुद्दिष्टं कुमारेण तु भाषितम्॥ चतुर्थं शिवधर्माख्यं साक्षान्नंदीशभाषितम्। दुर्वाससोक्तमाश्चर्यं नारदीयमतः परम्॥ कापिलं वामनं चैव तथैवोशनसेरितम्। ब्रह्मांडं वारुणं चाथ कालिकाद्वयमेव च॥ माहेश्वरं तथा सांबं सौरं सर्वार्थसंचयम्। पराशरोक्तमपरं मारीचं भार्गवाह्वयम्॥' इति। तस्मादेतानि शैवादीनि पुष्करपुराणशिवरहस्यविष्णुधर्मोत्तरादिवदुपपुराणान्येव। तेपूक्तं भागवतमन्यदेवेति सिद्धमिति। ननु श्रीधरस्वामिभिर्यदुक्तं भागवतं नामान्यदिति न शंकनीयम्। तत्तूपपुराणापेक्षमिति। यदि च नहि बीजमंतरा शंकोद्भवतीति मतं तत्राह—'शंकापंकावलिप्तत्वादप्रामाण्यं यदीष्यते। वेदादौ चिरशंकास्ति तस्यापि च तदिष्यताम्॥ श्रौतकर्मपरित्यागान्निबंधेष्वनुदाहृतेः॥ अप्रमाणमिदं वेदविरुद्धं प्रतिभाति नः। मैवं कर्मपरित्यागो वेदेनाप्यधिकारिणाम्। दृश्यते भारतेनापि किं मूढ नहि पश्यसि॥ संवत्सरप्रदीपादिष्वार्षग्रंथेपु वित्तमैः॥ वाक्यान्यस्य निबंधेपु लिखितानि पुरातनैः॥ टीकाश्चास्य कृताः सद्भिर्बहवो वेदवित्तरैः। यस्मान्न वीक्षसे तत्त्वं दिवांधः परिकीर्त्यसे॥"

अथास्य व्याख्या। शंकापरिहारमाह। वेदादाविति सौगतैर्वेदस्य 'त्रयो वेदस्य कर्त्तारो मुनिभंडनिशाचराः।' इत्यादिवाक्यैर्मुनि-भंडादिकृतत्वमाशंक्यते। सांख्यैश्च मृदश्रवीदापोऽश्रवन्नित्यादिदर्शनादनाप्तत्वं तस्य शंकितम्। तथा वेदवाच्येश्वरस्य कालस्य च सांख्यैरभावः स्मर्यते। तैरेव वेदविहितज्योतिष्टोमादेर्हिंसादोषेणाननुष्ठेयत्वं चोच्यते। जैमिनिना काठकादिसंज्ञादर्शनाद्वेदस्य पौरुषेयत्वं शंकितम्। किंचाचारमाधवे स्मृतीनामप्रामाण्यं शंकितम्। न चैतावता वेदादीनामप्रामाण्यादिकं स्यात्तदप्रामाण्यादेः परिहृतत्वात्। किं चाबाधिता खलु शंका प्रामाण्यमपनयति ननु बाधितापीति। ननु मार्कंडेयादौ शंकाविरहात्तत्प्रमाणमेव। अत्र संप्रचरिते भागवते शंकासत्त्वादप्रामाण्यं स्यादिति चेत्, मैवं, मार्कंडेयादौ तत्तत्कथाप्रधानतया दुर्धियां तत्र बलवद्विद्वेषा-भावान्न शंकोदयः। श्रीभागवते विष्ण्वेकभक्तिप्रतिपादके तदितरधर्मनिरासके तेषां बलवद्विद्वेषात्तद्धेतुका शंका स्यादेव वाममार्गगानाम्। ते च 'विष्णोर्नाम न गृह्णीयान्न स्पृशेत्तुलसीदलम्।' इत्यादिवाक्यैर्निखिलवेदप्रतिपाद्यं सर्वेश्वरं श्रीविष्णुमपि निंदंति। तदुत्कर्षप्रतिपादके श्रीभावगते कथं तेषां शंका न भवेदिति भावः। शंकामात्रेणाप्रामाण्यं चेत्तर्हि कल्पतरौ कुठारस्त्वया निक्षिप्यताम्। 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' 'अहरहः संध्यामुपासीत' 'यावज्जीवमग्निहोत्रं जुहोति' 'वीरहा स देवानां योग्निमुद्वासयेदि'त्यादिश्रुतिभिर्यावज्जीवं कर्त्तव्यतोक्ता येषां त्यागे वीरघातः प्रत्यवायः श्रावितस्तेषां वर्णाश्रमकर्मणां त्यागाभिधानाद्वेदविरुद्धत्वमस्य। तदुक्तं प्रथमे 'त्यक्त्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्वोथ पतेत्ततो यदि। यत्र क्व वाभद्रमभूदमुष्य किं कोवार्थ आप्तो भजतां स्वधर्मतः॥' इति। एकादशेपि 'आज्ञायैवं गुणान्दोषान् मयादिष्टानपि स्वकान्। धर्मान्संत्यज्य यः सर्वान्मां भजेत स सत्तमः॥' इति। एवमनेकत्र कर्मत्यागोऽत्र पठ्यते। किंच प्राचीननिबंधे चैतद्वचसामनुदाहरणाच्च वेदविरुद्धं भागवतं प्रमाणं नेति परिहारमाह मैवमिति। "एतद्धस्मैव विद्वांस आहुर्ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे। एतद्धस्म वै पूर्वे विद्वांसोग्निहोत्रं न जुहवांचक्रिरे एवं वैतमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंति। न कर्मणा न प्रजया न धनेन त्यागेनैकेऽमृतत्वमानशुः॥" इत्याद्याः श्रुतयः पारिव्राज्याधिकारे सति नित्यनैमित्तिककर्मणां त्यागं दर्शयंति। एवं भारते मोक्षधर्मे पितापुत्रसंवादादिषु निवृत्तिरुपदिष्टा प्रवृत्तिस्त्याजितेति निरूपितम्। किंच 'सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज' इति श्रीमुखोक्तेस्तथा शुद्धभक्त्यधिकारे कर्म त्याजयता भागवतेन किमपराद्धमिति यथाजातत्वादेवं ते भणितिरिति यदुक्तं प्राचीननिबंधेष्वेतद्वचसामनुदाहरणात्मिति तत्परिहरति संवत्सरेत्यादिना। प्रकटार्थप्राचीनगौडकृते संवत्सरप्रदीपनाम्नि स्मार्तनिबंधे 'गृहे भागवताभावे' इति स्कांदवचनैर्दोषं प्रदर्श्य कलिदोषापनुत्तये कतिचिच्छ्रीभागवतपद्यानि लेख्यानीति प्रतिज्ञाय बहूनि तद्वाक्यानि तत्र लिखितानि। श्रीमध्वमुनिना स्वभाष्ये तद्वाक्यान्युदाहृतानि। बोपदेवेन चैतत्कथाया मुक्ताफलहरिलीलाख्यौ निबंधौ परमहंसप्रियाख्या टीका चास्य कृता। सच्चरितमीमांसाख्ये स्मार्तग्रंथे विद्यानिध्याचार्येण देवर्षिभूताप्तत्यादीनि तद्वचांस्युपात्तानि। लक्ष्मीधरेण भगवन्नामकौमुद्यामनन्तदेवेन मथुरातीर्थप्रकाशे वाचस्पतिना भक्तिप्रकाशे मधुसूदनस्वामिना भक्तिरसायने तद्वाक्यानि न्यस्तानि। नृसिंहवाजपेयिना श्रीमन्नित्यचन्द्रोदये स्मृतिसंग्रहे स्मार्तग्रंथे चास्य बहूनि वाक्यानि प्रोक्तानि। विष्णुपुरीयतीशेन तद्वाक्यैरेव भक्ति-

रत्नावली व्यधायि। तथा भगवन्नाममाहात्म्ये रघुनाथदण्डिना बहूनि तद्वाक्यानि क्षिप्तानि। तथाप्पय्यदीक्षितेन कर्णं पिधाय निरयादित्यादिकं तद्वाक्यमलेखि। निर्णयसिंधौ कमलाकरभट्टेन वामनजयंतीनिर्णये श्रोणायां श्रवणद्वादशयामित्यादिकं तद्वाक्यं प्रमाणितम्। भट्टोजिदीक्षितेन चतुर्विंशतिमतव्याख्यायां तर्पणोत्तरपूजानिर्णये मूर्त्त्याभिमतयात्मन इति तद्वाक्यमलेखि। सर्वतः प्राक्तनेन श्रीस्वायंभुवेन मनुनापि स्वस्मृतौ 'न दद्यादामिषं श्राद्धे' इत्यादिकं 'स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च।' इत्यादिकं लिखितम्। तथा श्राद्धमयूखेपि 'न दद्यादामिषमि'ति प्रोक्तम्। एवं दिनकरद्योतादिषु बहुग्रंथेष्वेतद्वाक्यानि संति। श्रीशंकराचार्यादपि प्राक्तनेनानुभूतिस्वरूपाचार्येण मस्करिणा सारस्वताख्यव्याकरणग्रंथकारकप्रकरणे छंदसि स्यादिः सर्वत्रेत्यत्र छांदसप्रयोगोदाहरणावसरे व्रजतीर्विरेजुरिति श्रीदशमस्कंधपञ्चमाध्यायवाक्यमुदाहृतमिति। तथा टीकाश्चास्य चित्सुखीविजयध्वजीविद्वत्कामधेनुसंबंधोक्तितत्त्वदीपिकाशुकहृदयासुदर्शनीमुनिभावप्रकाशिकाभावार्थदीपिकाद्या बह्व्यः संति अर्वाचीनाः प्राचीनाश्च। एतैः सर्वविद्वद्वरैः शतसंख्याकैर्महद्भिरभ्यर्चितं श्रीभागवतमस्वीकुर्वन्नज्ञः कुंडजोऽसि विज्ञातः। माधवसरस्वतीनामानं प्रति भागवतमनार्षं ब्रुवन्कश्चित्पंडितस्तेन यतिना जारजोऽयमित्युक्तैः पंडितैः स गोलक एव निश्चित इति काश्यां प्रसिद्धेः। एतस्माद्वेदसारात्सर्वमान्याच्छ्रीभागवताद्भीता वामोपासका राज्ञस्तस्कराश्चौराः परस्वमिव विधवाः स्वगर्भमिव निजधर्मं गोपायंतो विद्वेषादेवं कल्पयंति। मात्स्यस्कांदपाद्मादिभ्यो भागवतस्य लक्षणादीनि ज्ञात्वा बोपदेवोऽतिसूक्ष्मबुद्धिः संप्रचरदिदं भागवतं व्यासनाम्ना निबबंध। व्यासकृतं त्वन्यदेव। एतस्य व्यासकृतत्वे दृढबन्धः पदलालित्यं च न स्यात्। नहि पाद्मादिषु व्यासकृतेषु भागवतवद्गाढबंधादिकमस्ति। तस्मान्नवीनमेतदिति तान्निराकर्त्तुं तद्भाषणं तावदाह—
'मात्स्यादौ लक्षणादीनि विलोक्यामितबुद्धिमान्। बोपदेवश्चकारेदं व्यासनाम्ना द्विजर्षभः॥ एतच्च दृढबंधत्वात्पदलालित्यतस्तथा। येऽनुमिन्वंति ते मूढा निश्चितं वाममार्गिणः॥ स महान् दृढबंधस्तु छांदोग्यादिषु दृश्यते। वैष्णवे पदलालित्यं दृढबंधश्च वर्तते। अस्ति सुंदरकांडेपि पदलालित्यशालिता। कथमेषां नवीनत्वं दुर्बुद्धे त्वं न भाषसे॥ बोपदेवकृते त्वत्र बोपदेवात्पुरातनैः। कथं टीकाः कृताः संत्युर्हनुमच्चित्सुखादिभिः॥ यान्या शंकार्प्यते पापैः साप्यतेनैव नश्यति।'
अथास्य व्याख्या। द्वावाद्यौ प्रकटार्थौ दृढबंधादिसत्त्वे नवीनत्वं यत्तद्व्यभिचारयति द्वाभ्याम्। छांदोग्यादिष्वित्यादिपदादैतरेयादि ग्राह्यम्। वैष्णवे श्रीविष्णुपुराणे प्रायेणेति बोध्यमग्रेऽपि। एवं श्रीगीतासु चोभयं दृष्टं स्फुटार्थमन्यत्। तथा च छांदोग्यादिवत्स्वतः सिद्धं भागवतेपि दृढबन्धादिकमिति नैतावता त्वच्छंकावकाश इति भावः। किञ्चान्यनाम्ना ग्रंथो धनलोभादिना साक्षान्मैत्र्या वा दृष्टः, यथा धनलोभाद्बोपदेवेन हिमाद्रेर्नाम यथा प्रीत्या विद्यारण्यैर्वेदभाष्ये माधवनाम। अत्र च व्यासनामलिखने ग्रंथकर्त्तुः किं कारणं न धनादिलाभो न प्रीत्यतिशयः। किञ्च ग्रंथकरणं यशोर्थं लाभार्थं वा। 'काव्यं यशसेर्थकृते व्यवहारविदे शिवेतरक्षतये।' इत्यभियुक्तोक्तेर्बोपदेवस्य व्यासनामलिखने न किमपि संभवति। किञ्च ग्रंथकर्त्तुर्नाम्नि सत्यपि यदि वः संदेहस्तर्हि पतंजलिप्रणीतत्वे महाभाष्ये तर्कादौ गौतमकृतत्वे शारीरकादौ शंकराचार्यप्रणीतत्वे च संदेहो दुर्वारः स्यात्। किंच स्ववाक्यान्यार्षाण्युक्त्वा लोकान्वंचयन्बोपदेवो मृषावादी स्वमाप्तत्वात्पातयन् महापापी स्यादिति नेदृक् तादृशस्य कर्मेति। किंच यत्तद्बोपदेवेन व्यरचीत्युच्यते। तर्हि तस्मात्पूर्वं जातैर्हनुमदादिभिस्तस्मिन्कृताष्टीकाः कथं स्युः। हनुमान् श्रीरामपार्षदश्चित्सुखः आचार्यश्च। किञ्च श्रीशंकराचार्योपि भगवतमात्रवर्णिते मृद्भक्षणवत्सहरणे गोविंदाष्टके व्याख्यातवानेव तत्। श्रीमध्वमुनिरपि तद्वाक्यानि स्वभाष्ये उदाजहार। श्रीमध्वश्रीशंकरौ हि समकालीनौ प्रसिद्धौ। शंकराचार्यसमयादुत्तरं वत्सरशतद्वये व्यतीते बोपदेवोभूदिति रामाश्रमादिभिर्लिखितम्। यदि ते हनुमदादयस्तस्य व्याख्यानादि चक्रुस्तदा बोपदेवस्य जन्मापि नाभूदिति तस्य कृतत्वं कथयन् भ्रांतधीरेव। एवमन्यापि वाममार्गगैः कृता शंका निरस्ता स्यादिति। तथाहि मात्स्याद्युक्तलक्षणादि वीक्ष्येदं कृतं बोपदेवेनेतरपुराणवैलक्षण्यात्। व्यासकृतपुराणांतरश्लोकानुपूर्वीसादृश्यं भागवतश्लोकेषु न दृश्यते। अत्राह सकलधर्मशास्त्रेतिहासपुराणानंतरं प्रेम्णा व्युत्पत्तिदशायां कृतत्वादत्र वैलक्षण्यम्। यथा शंकराचार्यकृतषोडशभाष्येषु मध्ये शारीरकभाष्ये इतरभाष्यवैलक्षण्यं दृश्यते। तत्किं शंकराचार्यकृतं न भवति। किंतु कर्मस्वनादरात्तत्र प्रीत्यभावान्न सौष्ठवम्। ननु भागवतं नामान्यदिति न शंकनीयमिति श्रीधरशंकनान्निश्चीयते प्रागपि श्रीभागवते शंकास्तीति चेदुच्यते। वैशेषिकमीमांसकादिभिर्वेदाप्रामाण्यं साधितम्। तत्किं प्राग्वेदाप्रामाण्यशंका स्थितेति न स्वीक्रियते यथा, तथात्रापि स्वीकार्यम्। किं चास्तिकानां वेदाप्रामाण्यशंका यद्यपि नास्ति, तथापि नास्तिकानां सास्त्येवेति चेत्समः समाधिः। किंच मन्वादिशास्त्रे चौर्यहिंसादिनिषेधे प्राक् तदनुष्ठानं किं स्थितमिति न शंक्यं यथा तथात्रापीति। अथ विधिना चौर्याद्यनुष्ठानाभावेपि संगप्राप्तं तदासीदिति चेत्तर्ह्यत्रापि द्वेषतस्तदाशंकनं स्थितमिति समं समाधानम्। वस्तुतस्तु श्रीधरस्वामिनां नायमाशयः प्राक् शंका स्थितेति। किंत्वन्य एव। तथाहि सर्गादीनि दशलक्षणानि यत्रोक्तानि तद्भागवतं श्रीमद्भागवतं नाम। सर्गादिदशलक्षणमिति द्वादशे वक्ष्यमाणत्वादिति। द्वितीयद्वादशस्कंधयोर्भागवतत्वमस्तु दशानामपि लक्षणानां संक्षेपेणोक्तत्वात्तृतीयादीनामपि तदस्तु सर्गाद्यैकैकलक्षणवत्त्वात्। प्रथमस्य तु न कथमपि भागवतत्वमेकस्यापि लक्षणस्यानुक्तेः। अतः प्रथमस्कंधो न भागवतमिति यदि कश्चिच्छंकेत तत्स्वामिभिर्निराक्रियते। किं च 'अम्बरीष शुकप्रोक्तं नित्यं भागवतं शृणु' इत्युक्तेरपि प्रथमस्य शुकानुक्तत्वान्न संज्ञाघटीतीति चेन्न। अष्टादशसहस्रत्ववद्द्वादशस्कंधसंमितत्वगायत्र्यारब्ध-

त्वादीनां प्रथमेन विनाऽसम्भवात्। उपोद्घातत्वेनाधिकारिनिरूपणेन प्रथमस्यापि भागवतत्वमस्त्येव। यथा 'अशोच्यानन्वशोचस्त्वमि' त्यारभ्य भगवद्गीतात्वेपि ततः प्राक्तनग्रंथस्योपोद्घाततया गीतात्वं तथा प्रथमस्यापि तत्त्वमिति। यद्वा प्रथमेपि संक्षेपतोऽवतारकथादिरूपलक्षणवत्त्वमस्त्येव। तेनात्र शंकैव नावतरति। नन्वस्य निंदने शाक्तादीनां को हठ इति चेदत्राह। 'न वेत्ति यो यस्य गुणप्रकर्षं स तं सदा निंदति नात्र चित्रम्। वने किराती करिकुम्भजातां मुक्तां परित्यज्य बिभर्ति गुंजामि'ति न्यायेन तेषां निंदने कोतिभारः पांखडित्वात्। 'पालनाच्च त्रयीधर्मः पाशब्देनेह कथ्यते। तं खंडयंति ये मूढाः पाखंडास्ते प्रकीर्तिताः॥' इति पाखंडलक्षणवत्त्वं तेषामस्त्येव। किंच पुनर्बोपदेवकृतत्वं निराकरोति। इदानींतनाः स्वल्पमपि भाषाकवित्वं कृत्वा तत्र स्वनाम क्षिपंति वोपदेवोऽष्टादशसाहस्रीं कृत्वा लोभादि विनैव व्यासनाम निक्षिप्तवान्स कथं न भ्रांतः स्यात् 'प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते' इति न्यायात्। किंच 'यावत्कीर्त्तिर्मनुष्यस्य पुण्यलोकेषु गीयते। तावद्वर्षसहस्राणि स्वर्गलोके महीयते॥' इति वचनात्स्वर्गप्राप्त्यर्थं व्यासनामनिक्षेपेण वोपदेवेन भागवतं कृतमिति किं न स्यादिति चेन्न। कीर्तिप्रचारो हि तदुक्तश्लोकात्स्वर्गप्राप्तिहेतुत्वेनावगम्यते। कीर्तिश्च व्यासनामनिक्षेपाद्व्यासस्यैव न तु ग्रंथकर्तुः। यद्यप्यस्यानार्षत्वं नहि संभवति कथंचिदपि। तथापि त्वं ब्रूहि अयं ग्रंथो वेदविरुद्धार्थस्य प्रतिपादकोऽविरुद्धस्य ? आद्येस्यार्षत्वेप्यप्रामाण्यमेव बृहस्पतिप्रणीतचार्वाकशास्त्रवत्। अंत्येऽनार्षत्वेपि वेदमूलकत्वेन स्मृतिवदस्य प्रामाण्यमव्याहतमेव। स्मृतीनां प्रामाण्यमपि वेदमूलकत्वेनैव न त्वृषिप्रणीतत्वेन। अन्यथा कणादप्रणीतशास्त्रस्यापि प्रामाण्यं स्यात्। तस्याप्रामाण्यंतु पराशरपुराणे बहुधा प्रपंचितमिति। ननु स्मृतीनामृषिप्रणीतत्वे सति वेदाविरुद्धार्थत्वेन प्रामाण्यमिति चेन्न। लाघवेन वेदाविरुद्धार्थकत्वेन तत्प्रामाण्यस्योचितत्वादित्यलमतिप्रसंगेन। अनया रीत्यास्मिन्सूरयोपि आपाततः शास्त्रज्ञा अपि मुह्यंति। ननु यथार्थतः शास्त्रज्ञा इति भावः। अथ प्रकृतमनुसरामः। पुनराह किंभूतं भागवतं स्वेन निजेनान्यत्रासंस्थितेन धाम्ना तेजसा निरस्तं दूरीकृतं धुंधुकार्यादीनां कुहकं प्रेतत्वादिलक्षणं येन तत्तथा। यद्वा निरस्तानाममराणामपि कुहकं विस्मापकम्। अहो भागवतमहत्त्वं सर्वताधिकमित्यर्थः। तदुक्तं पाद्मे 'राज्ञो मोक्षं तथा वीक्ष्य पुरा धातातिविस्मितः। सत्यलोके तुलां बध्वातोलयत्साधनान्यजः॥ लघून्यन्यानि जातानि गौरवेण इदं महत्। तदा ऋषिगणाः सर्वे विस्मयं परमं ययुः॥ मेनिरे भगवद्रूपं शास्त्रं भागवतं क्षितौ। पठनाच्छ्रवणात्सद्यो वैकुण्ठफलदायकम्॥' इति। यद्वा निरस्ता त्यक्ता कुभूमिर्यैस्ते निरस्तकवः पितरस्तेषां भुवः स्पर्शाभाववत्त्वात्। कर्मणा पितृलोक इति श्रुत्युक्तपितृलोकस्य भूमेरुपरित्वात्पितरो निरस्तभुव एव। तेषां हं हर्षं करोतीति निरस्तकुहकम्। 'येर्चयंति गृहे नित्यं शास्त्रं भागवतं कलौ। आस्फोटयंति वल्गंति तेषां प्रीताः पितामहाः॥ यावद्दिनानि विप्रर्षे शास्त्रं भागवतं गृहे। तावत्पिबंति पितरः क्षीरं सर्पिर्मधूदकमि'ति स्कांदात्। 'हं हर्षे हरणेऽद्भुते।' इति सौभरिः। हकमित्यत्र हपूर्वात्करोतेः कर्मणि डः। पुनः किंभूतं सत्यं 'सत्यं ज्ञानमनंतं ब्रह्मे'ति श्रुत्युक्तसत्यरूपब्रह्म स्वरूपम्। त्रैकालाबाध्यम्। 'श्रीमद्भागवतस्याथ श्रीमद्भगवतस्तथा। स्वरूपमेकमेवास्ति सच्चिदानंदलक्षणमि'ति स्कांदात्। हरेर्वाङ्मयमूर्त्तित्वाद्वा 'स्वकीयं यद्भवेत्तेजस्तद्धि भागवतेऽदधात्। तिरोधाय प्रविष्टोऽयं श्रीमद्भागवतार्णवम्॥ तेनेयं वाङ्मयी मूर्त्तिः प्रत्यक्षा वर्त्तते हरेः। सेवनाच्छ्रवणात्पाठाद्दर्शनात्पापनाशिनी'ति पाद्मे। तत्रैव 'श्रीमद्भागवतं शास्त्रं भगवद्रूपमुच्यते। पादादिजानुपर्यंतं प्रथमस्कन्ध ईरितः॥ तदूर्ध्वं कटिपर्यंतं द्वितीयस्कन्ध उच्यते। तृतीयो नाभिरित्युक्तश्चतुर्थ उदरं मतम्॥ पंचमो हृदयं प्रोक्तं षष्ठः कण्ठं सबाहुकम्। सर्वलक्षणसंयुक्तं सप्तमो मुखमुच्यते॥ अष्टमश्चक्षुषी विष्णोः कपालौ भृकुटिः परः। दशमो ब्रह्मरंध्रं च मन एकादशं स्मृतम्॥ आत्मातु द्वादशस्कन्धः श्रीकृष्णस्य प्रकीर्तितः॥' इति। यद्वा सत्यं वेदरूपं वेदस्यापि त्रैकालिकाबाध्यत्वम् 'शिवाद्या ऋषिपर्यंताः स्मर्त्तारोस्य न कर्तृकाः।' इति स्मृतेः। 'वाचा विरूपनित्यये'ति श्रुतेश्च। 'अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥' इति स्मृतेश्च। श्रुतौ विरूपपदं संबुद्ध्यर्थकं ज्ञेयम्। 'ऋचः सामानि जज्ञिरे' इह श्रुतौ जज्ञिरे इति पदमाविर्थकं न तूत्पत्तिपरमिति। 'शास्त्रयोनित्वादि'ति सूत्रे योनिपदं प्रमाणपरं शास्त्रं योनिः प्रमाणं यत्रेत्यर्थः। 'योनिः स्यात्कारणे तोये प्रमाणे स्मरमन्दिरे' इति विश्वहेमौ। यद्वा 'इदं भागवतं नाम पुराणं ब्रह्मसंमितमि'ति वक्ष्यमाणत्वाद्ब्रह्मसंमितं वेदतुल्यम्। 'तेन वेदाक्षराणि यावन्ति पठितानि द्विजोत्तमैः। तावन्ति हरिनामानि कीर्त्तितानि न संशयः॥' इति शौनकस्मृतेः। प्रत्यक्षरं हरिनामोच्चारणफलमिति ध्वनितम्। किं चात्र गायत्र्यर्थस्य वर्णनादपि गायत्र्याश्च 'गायत्री वा इदं सर्वमि'त्यादिश्रुतेस्सर्ववेदरूपत्वादस्य त्रैवर्णिकानामेवाधिकारः पाठे। श्रवणे तु 'श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रतः॥' इति संहितोक्तेः शूद्रस्यापीति। नन्विदं वेदरूपं चेत्तर्हि कथं शौनकाद्यैस्त्रैवर्णिकाद्रोमहर्षणात्सूतात् एतच्छ्रुतं न हीनतः परमभ्याददीतेति श्रुतेर्हीनजातेः परोपदेशे नाधिकृतत्वात्। 'सूतस्य तु ब्राह्मण्यां क्षत्रियाज्जातः सहि सूत उदाहृत' इति स्मृतेर्विलोमजातत्वाद्धीनत्वं स्फुटमेव, तत्कथं स्मार्त्तैस्तच्छ्रुतमिति चेन्न। रोमहर्षणोग्रश्रवसोर्न जातिसूतत्वम्। तदुक्तं वायुपुराणे— 'वैन्यस्य तु पृथोर्यज्ञे वर्तमाने महात्मनः। सुत्यायामभवत्सूतः प्रथमं वर्णवैकृतम्॥ ऐन्द्रेण हविषा तत्र हविःपृक्तं बृहस्पतेः। जुहावेन्द्राय दैवेन ततः सूतो व्यजायत॥ शिष्यहव्येन संपृक्तमभिभूतं गुरोर्हविः। अधरोत्तरचारेण जज्ञे तद्वर्णवैकृतमि'ति। 'अग्निकुण्डसमुद्भूत सूत निर्मलमानसे'ति पुराणान्तराच्च रोमहर्षणो ब्राह्मण्यां क्षत्रियाज्जातः सूत इत्युक्तलक्षणः सूतो न। किं त्वग्निजः। ब्रह्मा[1]सनार्हता तु ब्राह्मणसंकल्पादेव बृहद्गुरुत्वस्य

१. ब्राह्मणता।

क्षत्रियत्ववत्। यच्च 'नीचादप्युत्तमां विद्यामाददीताविचारयन्नि'त्युक्तं तद्वृत्त्युपयोगिविद्यापरमापत्परं वा बोध्यम्। किञ्च सूतवधाद्बलदेवेन ब्रह्महत्याव्रतमपि कृतं तस्याविप्रत्वे तन्न सम्पद्यते। 'यद्यैतद्ब्रह्महत्यायाः पावनं लोकपावन। चरिष्यति भवाँल्लोकसंग्रहो नान्यचोदितः॥' इति श्रीदशमे वक्ष्यमाणत्वात्तस्य विप्रत्वं निश्चीयते। अग्निर्वै ब्राह्मण इति श्रुतेस्तस्याग्निकुण्डोद्भूतत्वाद्वा ब्राह्मणत्वम्। तत्र सूतशब्दप्रयोगस्तु 'सूताः पौराणिका मता' इति स्मृतेः पौराणिकाः प्राचीनवृत्तवक्तार इत्यर्थः। कथाप्रवक्तृसाम्येन बोध्यम्। जातिसूतेषु पौराणिकपदप्रयोगस्तु प्राचीनराज्ञामुत्साहौदार्यादिवर्णनादेव। यच्च 'मन्ये त्वां विषये वाचां स्नातमन्यत्र छान्दसादि'ति वक्ष्यति तस्यायमाशयः। यद्यपि जातिसूतस्यैव छान्दसानधिकारो ननु तव, तथापि सूतशब्दप्रयोगात्त्वय्युपचर्यतेऽत एव श्रीमहाभारतव्याख्यातृभिः श्रीनीलकण्ठाचार्यैरुग्रस्य नृसिंहतापनीयोपनिषत्प्रतिपाद्यस्य श्रवः श्रवणं यस्येत्युग्रश्रवा इति सूतनामार्थः किञ्च 'कस्मादसाविमान्विप्रानध्यास्ते प्रतिलोमज'इति यत्कथनं तदपि सूतशब्दप्रयोगादेव। किं बहुना पुराणानां प्रवक्तृत्वे 'वरयेद्ब्राह्मणं गुरुमि'ति व्याकोपापत्तेः। सूतो ब्राह्मणसंकल्पादुत्पत्तिसमये ब्राह्मण एव जात इत्यलं प्रकृतानुपयुक्तेन। गायत्र्यर्थमाह सवितृपदं जगत्प्रसवकारणपरं तदर्थो जन्माद्यस्य यत इत्यनेन पालनादिक्रीडार्थकदेवपदार्थोऽप्यनेनैव जन्मादीत्यादिपदेन पालनादिग्रहात्। वरेण्यपदार्थः परपदेन परत्वोपपादकानि सत्यादिपदानि। भर्गपदार्थो धामपदेन धीमहीति पदं स्वरूपेणैव। तेन ब्रह्महृदेत्यादिना समष्टिहिरण्यगर्भबुद्धिप्रेरकत्वोक्तेः सर्वव्यष्टिबुद्धिप्रेरकता त्वर्थसिद्धेति भावः। ननु 'ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः' इति लक्षणोक्तेरष्टादशसहस्रगणना त्वित्थं कार्या। तथाहि दीर्घवृत्तगद्यानुष्टुप्छन्दःसमूहे ग्रन्थे द्वात्रिंशदक्षरात्मकानुष्टुप्परिमाणेन गणनायां पञ्चोनद्विशत्युत्तरषोडशसहस्रसंख्या १६१९५ सम्पद्यते। उवाचमन्त्राः सप्तत्यधिकद्वादशशतसंख्याकाः १२७०, अर्द्धश्लोकाः शतद्वयसंख्या २०० इति, श्रीमद्भागवतेऽमुकस्कन्धे प्रथमादिरध्याय इति वाक्यानामपि व्यासप्रोक्तत्वाद्ग्रन्थसंख्यांतर्गतत्वेन तत्संख्या ३३५ पञ्चत्रिंशदुत्तरत्रिशती। संकलनयाऽष्टादशसहस्रं संख्या १८००० सम्पत्तिरिति। यद्वा चण्डीसप्तशतीन्यायेन मन्त्रविभागेनापीयमेव संख्या सम्भाव्यते। तथाहि अनुष्टुप्श्लोकगद्यार्यारूपमन्त्रा एकादशसहस्राणि द्विसप्तत्युत्तरे द्विशती च ११२७२, दीर्घवृत्तश्लोकानां षट्पञ्चाशदधिकसप्तविंशति २७५६ संख्याकानामर्द्धकानि, मंत्रा द्वादशाधिकसार्द्धपंचसहस्राणि ५५१२, अनुष्टुबर्द्धकानि एकादशाधिकद्विशती २११ उवाच-मंत्राणां सप्तत्यधिकद्वादशशतसंख्यानां मध्ये पञ्चषष्ट्युत्तरद्विशतानामनुवादरूपाणां पुरोवादशेषतया तावतो विहायावशिष्टा उवाचमंत्राः पंचोत्तरसहस्रम् १००५। संकलनयाष्टादशसहस्राणि १८०००। आपातत एवं संख्या। तेन तत्तदध्यायेषु तत्तन्मन्त्रगणनया संख्योनाधिक्यसंकलनमूह्यम्। यत्तु शारीरके भागवतमतनिरसनं तद्धयग्रीवपंचरात्रे गणितभागवताख्यतंत्रस्यैवेति तत्रैव स्पष्टम्। किंच सर्गादीनि दशलक्षणान्यप्येतेन सूचितानि। 'जन्माद्यस्य यत' इत्यनेन सर्गस्थानानि तृतीयचतुर्थपंचमस्कन्धव्युत्पाद्यानि सूचितानि। 'तेने ब्रह्म हृदा य आदिकवय' इत्यनेन भक्तानुग्रहलक्षणं पोषणं षष्ठस्कन्धव्युत्पाद्यम्। 'मुह्यंति यत्सूरय' इत्यनेन कर्मवासनारूपा गतिः सप्तमस्कन्धव्युत्पाद्या। मन्वंतरेशानुकथे अष्टमनवमस्कन्धप्रमेये स्थानमध्य एवांतर्भूते। 'तेजोवारिमृदां विनिमय' इत्यनेन निरोधो दशमस्कंधार्थो दर्शितः। 'धाम्ना स्वेन सदा निरस्तकुहकमि'त्यनेन मुक्तिरेकादशस्कंधार्थो दर्शिता। 'सत्यं परमि'त्यनेन द्वादशस्कंधार्थो दर्शितः। धीमहीत्यात्मनेपदोत्तमपुरुषप्रयोगादधिकारी प्रथमस्कन्धार्थो दर्शितस्तेनैव स्वध्यानोपलक्षितसाधनानुष्ठानरूपो द्वितीयस्कंधार्थकथनात्कृत्स्नभागवतार्थसूचनमनेन श्लोकेन क्रियते। अतोऽस्यैकस्यापि पाठो बहुपाठाभावे कार्य एव। बलीयमैर्बहुपाठोऽलसैश्चतुःश्लोकीपाठोऽत्यंतालसैः स्वजन्मसाफल्यावाप्तयेऽयमेक एवान्वहं पठितव्य इति ध्येयम्। अत एवोक्तं स्कांदे 'श्लोकं वा श्लोकमर्द्धं वा नित्यं भागवतोद्भवम्। यः पठेद्वै नरो भक्त्या स गोदानफलं लभेदि'त्यादि बहुश उक्तम्। केचित्त्वष्टादशसहस्ररूपतया वर्णने श्रीगोपालाष्टादशाक्षरमन्त्रव्याख्यानरूपमेतदिति वर्णयन्ति। तच्च गोपालतापन्युपनिषदादौ द्रष्टव्यमिति। प्रसंगादस्य वक्तृश्रोतृश्रवणस्वरूपमाह। 'वक्तारं वैष्णवं विप्रं विशुद्धोभयवंशजम्। सोर्ध्वपुंड्रं सुशीलं च कुर्यात्कृष्णजनप्रियमि'ति संहितायाम्। स्कांदे तु 'भगवन्मतिरनपेक्षः सुहृदो दीनजनेषु सानुकंपः। बहुधा बोधनचतुरो विप्रो वक्ता स्मृतो विज्ञैरि'ति। 'श्रोतारोऽथ निरूप्यंते श्रीमद्विष्णुकथाश्रयाः। प्रवरा अवराश्चेति श्रोतारो द्विविधा मताः॥ प्रवराश्चातको हंसः शुको मीनादयस्तथा। अवरा वृकभूरुंडवृषोष्ट्राद्याः प्रकीर्तिताः॥ अखिलोपेक्ष्या यस्तु कृष्णशास्त्रश्रुतौ व्रती। स चातको यथांभोदमुक्ते पाथसि चातकः॥ हंसः स्यात्सारमादत्ते यः श्रोता विविधाच्छ्रुतात्। दुग्धेनैक्यं गतात्तोयाद्यथा हंसोऽमलं पयः॥ शुकः सुष्ठु मितं वक्ति व्यासं श्रोतृंश्च तोषयन्। सुपाठितः शुको यद्वच्छिक्षकं पार्श्वगानपि॥ शब्दं नानिमिषो जातु करोत्यास्वादयन् रसम्। श्रोता स्निग्धो भवेन्मीनो मीनः क्षीरनिधौ यथा॥ यस्तुदन्रसिकाञ्छ्रोतॄन्विरौत्यज्ञो वृको हि सः। वेणुस्वनरसासक्तान्वृकोऽरण्यसगान्यथा॥ भूरुण्डः शिक्षयेदन्यान् श्रुत्वा न स्वयमाचरेत्। यथा हिमवतः शृंगे भूरुंडाख्यो विहंगमः॥ सर्वश्रुतमुपादत्ते सारासारांधधीर्वृषः। स्वादुद्राक्षां खलिं चापि निर्विशेषं यथा वृषः॥ स उष्ट्रो मधुरं मुंचन्विपरीते रमते यः। यथा निंबं चरन्नुष्ट्रो हित्वाम्रमपि तद्युतम्॥ अन्येऽपि बहवो भेदा द्वयो भृंगखरादयः। विज्ञेयास्तत्तदाचारैस्तत्तत्प्रकृतिसंभवैः॥ यः स्थित्वाभिमुखं प्रणम्य विधिवत्त्यक्तान्यवादो हरेर्लीलां श्रोतुमभीप्सतेऽतिनिपुणो नम्रो विनीतांजलिः। शिष्यो विश्वसितानुचिंतितपरः प्रश्नेऽनुरक्तः शुचिर्नित्यं कृष्णजनप्रियो निगदितः श्रोता स वै वक्तृभिः॥' किंच 'अवैष्णवमुखाच्छास्त्रं न श्रोतव्यं कदाचन। शुकशास्त्रं विशेषण

न श्रोतव्यमवैष्णवात् ॥ वैष्णवोत्र द्विजो ज्ञेयो यो विष्णोर्मुखमुच्यते । ब्राह्मणोस्य मुखमिति श्रुतेर्ब्राह्मण एव सः ॥ गृहीतविष्णुदीक्षाको भेदबुद्धिविवर्जितः । कुटुंबी शांतचित्तश्च विप्रो वक्ता भवेत्सदा ॥ यावद्विप्रमुखे शास्त्रं शास्त्रत्वं तावदेव हि । विप्रेतरगतं शास्त्रमशास्त्रत्वं प्रपद्यते ॥ यथा पतिरता साध्वी ह्यन्यथा स्वैरिणी स्मृता ।' अत्र विप्रपदं क्षत्रियवैश्ययोरप्युपलक्षणम्, तयोरपि द्विजातित्वेन शास्त्राधिकारित्वात्, परंतु श्रावणे विप्रस्यैवाधिकारोपि 'वक्तारं वैष्णवं विप्रमि'ति पूर्वमुक्तत्वात् । 'कौसीदं भिषजं भृत्यं गणकं देवलं तथा । अब्राह्मणाधीतविद्यं निंदकं सर्वथा त्यजेत् ॥ वक्तारं ब्राह्मणमपि निर्जरायुधधारिणमि'ति सर्वं संहितायां स्कांदादौ बहुधा प्रपंचितमत उपरम्यते । अथ भागवतपदार्थमाह—'भाशब्दः कीर्तिवचनो गशब्दो ज्ञानवाचकः । सर्वेष्टवचनो वश्च तो विस्तारस्य वाचकः ॥ कीर्तेर्ज्ञानस्य सर्वेष्टस्य च विस्तारणादिदम् । अस्य भागवतं नाम श्रीव्यासेनेति कीर्तितम् ॥ धर्मार्थकाममोक्षांश्च वक्ति वर्णचतुष्टयी । ते प्राप्यन्ते यतोनेन तस्माद्भागवतं स्मृतम् ।' श्रवणमाह—'कृष्णार्थिनो गुणस्यात्र प्रेमैव विधिरुच्यते । आसमाप्ति सकामैस्तु कर्तव्यः स्यादयं विधिः ॥ स्नातो नित्यक्रियां कृत्वा प्राश्य पादोदकं हरेः । पुस्तकं च गुरून्विप्रान्पूजयित्वोपचारतः ॥ ब्रूयाद्वा शृणुयाद्वापि श्रीमद्भागवतं मुदा । पयसा वा हविष्येण मौनभोजनमाचरेत् ॥ ब्रह्मचर्यमधःसुप्तिः क्रोधलोभादिवर्जनम् । कथांते कीर्तनं नित्यं समाप्तौ जागरं चरेत् ॥ ब्राह्मणान्भोजयित्वा तु दक्षिणाभिश्च तोषयेत् । गुरवे वस्त्रभूषादि दत्त्वा गां च समर्पयेत् ॥ एवं कृते विधाने तु लभते वांछितं फलम् । दारागारसुता राज्यं धनानि तु यदीप्सितम् ॥ परंतु शोभते नात्र सकामत्वं विडंबनमि'ति । किंच 'सुमुहूर्ते कथारम्भः कार्यः श्रद्धासमन्वितैः । एतस्य श्रवणं प्रोक्तं चतुर्द्धा मुनिसत्तमैः ॥ सात्त्विकं राजसं चैव तामसं निर्गुणं तथा । चतुर्विधं तु विज्ञेयं श्रीभागवतसेवनम् ॥ सप्ताहं राजसं प्रोक्तं तामसं सालसं तु यत् । सात्त्विकं त्वेकविंशाहं तथैवाष्टादशाहकम् ॥ तथा पंचदशाहं चानियतं निर्गुणं मतम् । राजसे त्वर्थसंकोचस्तामसे स्मृतिविभ्रमः ॥ सात्त्विकं सुखबोधाय निर्गुणं सर्वतो वरमि'ति स्कांदे कौशिकसंहितायां च बहुशो निरूपितमिति । प्रसंगादस्य दानमाह 'शक्तोस्य दानं कुर्वीत महादानविधानतः । सहस्रहेमनिष्केण तदर्द्धार्द्धेन वा पुनः ॥ चतुर्विंशतिनिष्कैर्वाथवा द्वादशभिः पलैः । यद्वा पलत्रयेणापि कृत्वा सिंहासनं वरम् ॥ तन्मध्ये स्थापयेच्छास्त्रं रौप्यपट्टिकमध्यगम् । क्षौमांबरसमाच्छन्नमर्चितं चन्दनादिभिः ॥ संपूज्य विप्रं विधिवद्वेदवेदांगपारगम् ॥ तद्व्याख्यानरतं शांतं विष्णुभक्तिपरायणम् । स्थालीपाकविधानेन होमं कुर्यात्प्रयत्नतः ॥ दद्याद्भागवतं तस्मै पूजिताय कुटुंबिने । गोदानफलमाप्नोति श्रोता प्रत्यक्षरं नरः ॥ अध्यायेनाश्वमेधस्य स्कन्धेनानंतयागजम् । समग्रश्रवणेनैव जीवन्मुक्तो भवेन्नरः ॥ श्रवणे यत्फलं प्रोक्तं दाने तद्द्विगुणं भवेत् । लिखित्वा लेखयित्वा वा दद्याद्भागवतं नरः ॥ प्रौष्ठपद्यां पौर्णमास्यां कार्तिक्यादिषु वा पुनः । दाता फलमवाप्नोति सर्वपौराणदानजम् ॥ गृहीता लभते मोक्षं पाठादिनिरतो यदि । सर्वान्कामानवाप्नोति दाता भागवतस्य च । पुस्तकं वृत्तिहेतुत्वाद्देयं विप्राय मानवैः ॥ विप्रस्य वृत्तिकरणात्कोटिगोदानजं फलम् ।' किंच 'ब्रह्मवर्चस्वितावाप्त्यै गायत्री जप्यते यथा । तथेदमपि जप्तव्यं तद्रूपत्वाद् द्विजोत्तमैः ॥' किंच 'न यस्य तिष्ठते शास्त्रं गृहे भागवतं मुने । स कथं वैष्णवो ज्ञेय इत्थं प्राह स्वयं शिवः ॥ संध्यावन्दनवन्नित्यं श्रोतव्यं वैष्णवैर्नरैः । संध्याहीनो यथा विप्रो ह्यनर्हः सर्वकर्मसु ॥ वैष्णवोपि तथानर्हः श्रीमद्भागवतं विना । श्रीकृष्णचंद्रो भगवान्यथा भागवतश्रवात् ॥ प्रीयते न तथान्यैश्च विविधैरपि पूजनैरि'ति तंत्रान्तरोक्तेः । अन्यच्चोक्तम् 'विष्णोः पूजासमाप्तिर्हि श्रीमद्भागवतस्य वै । श्रावणादन्यथा पूजा सांगा नैव कदाचन ॥ पूजानामपराधांश्च क्षमते सर्वथा हरिः ॥ श्रीमद्भागवतश्रावाद्विप्रवर्यमुखोद्गतात् । अतो नित्यं भगवदग्रे श्रीमद्भागवतं वदेत् ॥' किंच 'विधिहीनापि सांगा स्याद्धरेः पूजा कृता मुने । शुकशास्त्रप्रभावेण कलौ ब्राह्मणसत्तम ॥ विधिनापि कृता व्यंगा विना भागवतश्रुतिम् । बहुना किमिहोक्तेन पूजा सांगत्वसिद्धये ॥ श्रीकृष्णेनोद्धवायोक्तमेतद् वृत्तं द्विजोत्तम । मत्कथाः श्रावयञ्छृण्वन्मुहूर्तं क्षणिको भवेत् ॥' किंच 'वक्तारं पूजयेन्नित्यं सर्वभोगैर्द्विजोत्तमम् । नचानर्प्य स्वयं भोज्यं वस्त्रान्नाभरणादिकम् ॥ श्रोतृभिः सर्वथा विप्रभोक्तारः प्रत्यवायिनः ॥ पेयं पूयं मलं भक्ष्यं भूषास्थि कृत्ति चांबरम् ॥ तस्यानर्प्येह यो वक्त्रे पुराणादेर्निजांतिके । सदा भुंक्ते नरो विप्र वक्ता विष्णुर्यतः स्वयम् ॥ मुख्यो गुरुर्बोधयिता धर्माणां सर्वतो ह्ययम् । वक्तरि प्रीणिते सर्वं फलमाप्नोति नान्यथा ॥' इति सर्वं संहितास्कांदादौ स्थितमत्र बहु वक्तव्यमस्ति तदलं प्रपंचेन । इति श्रीमद्भागवतपक्षः ॥ ४१ ॥

अथ व्यासः 'तदुपर्यपि बादरायणः संभवादि'ति सूत्रे यथा स्वयमेव स्वमतं प्रमाणयन्नुवाच तथात्रापि बोध्यम् । सर्वकालीनताविहितस्त्वनुयुगं सहि सत्यवत्यामित्युक्तेर्वात्मानं भगवदवतारं मन्वान आत्मानमेव ध्यायति । वयं तं व्यासं सदा हृदा धीमहि । सत्यज्ञानमिति सं ज्ञानं तद्ददातीति सदा ईश्वरः 'अहं ज्ञानप्रदो गुरुरि'ति भगवदुक्तेः । सदाशब्दस्सोमपावत् क्विबंतः । सदि हृत्सदाहृत्तया सदाहृदा ईश्वरदृष्ट्या हृच्छब्दो दृशावित्युक्तमधस्तात् 'व्यवहिताश्छन्दसी'त्युक्तेर्व्यवहितस्यापि हृच्छब्दस्य समासः । वेदरूपत्वादस्य । तं कं यत्र त्रयाणां श्रुतिस्मृतीतिहासानां सर्गोऽमृषा सर्गोत्र प्राकट्ये 'इतिहासपुराणानां व्यासः प्राकट्यकृन्मत' इति सिद्धांतदर्पणे । कथं यथा तेजोवारिमृदामविनिमयोऽमृषा । यतो व्यासस्यान्वयात्सेवनादितरत इतरवत्प्रतीयमानोपि सूतः । अर्थेषु सर्वार्थेष्वभिज्ञो जातः । यश्चाग्रस्य वेदस्य जन्माविर्भावं चकारेति शेषः । चतुर्विधरूपेणाविश्चकार । 'व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधमि'ति वक्ष्यमाणत्वात् । यश्च व्यासः स्वराट् विष्णुरेव । व्यासो नारायणः स्वयमित्युक्तेः । 'कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् ।' इति पुराणांतरोक्तेश्च । य आदि सनातनं ब्रह्म तद्रूपं भागवतं कवये विवेकवते शुकायात्मजाय तेने

वितस्तार। "स संहितां भागवतीं कृत्वानुक्रम्य चात्मजम्। शुकमध्यापयामास निवृत्तिनिरतं मुनिः ॥" इति वक्ष्यति। यत्र भागवते सूरयो विद्वांसोपि मुह्यंति। तत्तात्पर्याननुगमादिति भावः। किंभूतं स्वेन धाम्ना तेजसा निरस्तमपास्तं लोकानां कुहकमज्ञानं येन तम्। पुनः परं निजोपदेशेन सर्वपालकम्। 'परः स्यात्सर्वपालक' इत्यभिधानात्। पुनः सत्यं चिरंजीविपु गणितत्वाद् भगवदवतारत्वाद्वा। इति व्यासपक्षः ॥ ४२ ॥

अथ शुकपक्षः ॥ वयं तं शुकं धीमहि। ननु स्वपुत्रस्य शुकस्य ध्यानं कथं व्यासः कृतवानित्यत आह। किंभूतं परं ब्रह्मरूपं ब्रह्मवित्त्वात्। 'ब्रह्मविद् ब्रह्मैव भवती'ति श्रुतेः। 'ज्ञानी त्वात्मैव मे मतमि'ति स्मृतेश्च। अत एव वासुदेवाद्यैर्ब्रह्मरूपत्वादेव श्रीकृष्णादीनां पुत्रतामाप्तानामपि स्तुतिः कृतेति ज्ञेयम्। पुनः सत्यं सर्वदा वर्तमानं महायोगित्वात्। योगिनो हि योगबलेन सदा तिष्ठंति। तदुक्तं योगिनां सर्वदा स्थितिरिति योगसिद्धांते। स तु महायोगी तस्य सर्वदा स्थितौ शंकैव नोदेति। महायोगित्वं तु तस्य 'सांनिध्यात्ते महायोगिन्नि'ति परीक्षिदुक्तेः। 'तस्य पुत्रो महायोगी समदृङ् निर्विकल्पकः।' इति सूतोक्तेश्च ज्ञायते। पुनः किंभूतं स्वेन धाम्ना निजेन प्रकाशेन स्वात्मानंदप्रकाशेन निरस्तं कुहकं जन्ममरणलक्षणं यस्य तम्। 'न स पुनरावर्तते' इति श्रुतेः। 'न जायते म्रियते वा कदाचिदि'ति स्मृतेश्च। ज्ञानिनो जनिमृती न स्तः। एतद्विशेषणं सत्यत्वे हेतुरेव। यः शुकः स्वराट् स्वयमेव राजते प्रकाशते इति स्वराट्। न त्वन्येन बोध्यते किं त्वज्ञैरप्ययं ज्ञानीति ज्ञायते किं पुनर्विज्ञैरिति। अत एव स्नांतीभिर्देवीभिस्तं निरस्ताज्ञानं ज्ञात्वैव वस्त्राणि न परिधत्तानीति तदग्रे स्फुटीभविष्यति। 'दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रम्। तद्वीक्ष्य पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुंभिदा न तु सुतस्य विविक्तदृष्टेः ॥' इति। यश्चार्थेषु निवृत्तिमार्गेष्वभिज्ञो ज्ञाताऽकुंठमेधस्त्वात्। 'प्रशांतमासीनमकुंठमेधसमि' त्युक्तेः। अत्रार्थशब्दो निवृत्त्यर्थकः। यद्वाऽर्थेषु धर्मादिष्वभितो नियोजयंति लोकानिति तथा वनीयस्त्वात्। 'धर्मार्थकाममोक्षांश्च मां याचध्वं ददाम्यहम्। इति यः प्रवदेद्दाता स वनीयानिति स्मृतः ॥' इति लक्षणात्। तं कं यत्र त्रयाणां गुणानां सर्गो देहादिर्मृषा तस्यात्मनिष्ठत्वात्। कथं यथा तेजोवारिमृदां विनिमयः कार्यं मृषेति। ननु तस्यात्मनिष्ठत्वे देहादिस्थितिः कथं तत्र वक्ष्यति 'देहोपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रति समीक्षत एव सासुः। तं सप्रपञ्चमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥' इति। यश्च कवये विदुषे परीक्षिन्नृपायादि सनातनं ब्रह्म श्रीमद्भागवतं तेने हृदा स्नेहेन। 'हृत्स्नेहे च सुहृद्दुंधुमनोदृष्टिहरिष्वपि।' इत्यभिधानचिन्तामणेः, स च कोङ्कणदेशे परीक्षिते शापं श्रुत्वा स्नेहात्तत्रागत्य तमुपदिदेशेति योगवासिष्ठे। यत्र सूरयो मुह्यन्ति यश्च शुक इतरतः प्रशान्तमतिः। किंभूताय जन्मादीनि जन्मस्थितिलया न्यस्यन्ते क्षिप्यन्ते तिरस्क्रियन्तेऽनेनेति जन्माद्यस्यं ज्ञानं तस्मै यतत इति जन्माद्यस्ययः। अत्र डप्रत्ययस्ततश्चतुर्थ्यर्थे तसौ कृते जन्माद्यस्ययत इति स्यात्। 'शुद्धं च तत्रामृशताभियुक्ताः' इति तदुक्तेरेव ज्ञायते तस्य ज्ञानयत्नः। शुद्धं तु ज्ञानमेव 'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते।' इति श्रीमुखोक्तेः ॥ इति शुकदेवपक्षः ॥ ४३ ॥

अथर्षभदेवपक्षः ॥ वयं तमृषभरूपं परं परमेशं सदा सत्यं हृदा धीमहि। 'परोरिपरमेशयोरि'ति हलायुधः। तं कं यत्रर्षभे त्रयाणां क्रोधलोभमोहानां सर्गो मृषा। तस्य पारमहंस्याश्रमधर्मनिष्ठत्वेन ज्ञानिवरत्वात्। 'लोभादयो ये बुधलिङ्गभावा' इति कृष्णं प्रति जिष्णूक्तेरज्ञानिष्वेव सन्तीति भावः। कथं यथा तेजोवारिमृदां विनिमयो मृषा। किञ्च यतो यस्याग्र्यादिराजस्य मनोरन्वयाद्वंशाज्जन्म। तथाहि 'मनोः प्रियव्रतस्तस्याग्नीध्रस्ततो नाभिर्नाभेर्ऋषभ' इत्यग्रे वक्ष्यति। 'एतत्ते आदिराजस्य मनोश्चरितमद्भुतम्।' इति मैत्रेयोक्तेर्मनोरादिराजत्वं यश्चेतरतो वस्तुतो विरक्तोप्यर्थेषु प्रजापालनादिष्वभिज्ञोऽभिमतो नियोजकः लोकसंग्रहार्थत्वात्। वक्ष्यति च 'अथह भगवानृषभदेवः स्ववर्षं कर्मक्षेत्रं मन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्माननुशिक्षयमाणो जयंत्यामिंद्रदत्तायामात्मजानामात्मसमानां शतं जनयामास।' इति। किञ्च 'भगवानृषभसंज्ञ आत्मतन्त्रः स्वयं नित्यनिवृत्तानर्थपरम्परः केवलानन्दानुभव ईश्वर एव विपरीतवत्कर्माण्यारभमाणः कालेनानुगतधर्ममाचरणेनोपशिक्षयन्न तद्विदां शम उपशान्तो मैत्रः कारुणिको धर्मार्थयशःप्रजानन्दामृतावरोधेन गृहेषु लोकं न्ययमयत्। यद्यच्छीर्षण्याचरितं तत्तदनुवर्त्तते लोक' इति। यः स्वराट् स्वस्मिन्राजयतिरागयुक्तान्करोति लोकानिति स्वराट्। राजृ रागेपि धातूनामनेकार्थत्वात्। तद्वक्ष्यति 'भगवतर्षभेण परिरक्ष्यमाण एतस्मिन्वर्षे न कश्चन पुरुषो वांछत्यविद्यमानमिवात्मनोऽन्यस्मात्कथञ्चन किमपि कर्हिचिदवेक्षते भर्तर्यनुसवनं विजृम्भितस्नेहातिशयमन्तरेण।' इति। यश्च कवये इति छन्दोरूपत्वादस्य बहुत्वे एकत्वात्कविभ्यो विद्वद्भ्यो निजात्मजेभ्य आदि सनातनं ब्रह्म ज्ञानम्। 'नायं देहो देहभाजां नृलोके कष्टान्कामानर्हते विड्भुजां ये। तपो दिव्यं पुत्रका येन सत्त्वं शुध्येद्यस्माद्ब्रह्मसौख्यं त्वनन्तम् ॥' इत्यादिसप्तविंशतिश्लोकैस्तेने। यस्मिन् ज्ञाने सूरयोपि मुह्यन्ति। पुनः किंभूतं स्वेन निजेन परमानन्दरूपेण धाम्ना तेजसा निरस्ताः कुहका लोकविस्मापकाः सिद्धयोन्तर्द्धानपरकायप्रवेशाद्या येन तम्। 'योगैश्वर्याणि वैहायसमनोजवान्तर्द्धानपरकायप्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि नांजसा नृप हृदयेनाभ्यनन्दत्।' इति वक्ष्यमाणत्वात् ॥ इत्यृषभपक्षः ॥ ४४ ॥

अथ पृथुपक्षः ॥ वयं तं पृथुं सदा हृदा धीमहि । तं कं यत्र त्रयाणामुत्तममध्यमाधमानां सर्गो निश्चयो मृषा समः । समानोत्तममध्यमाधमाः सुखे दुःखे चेति भगवदुपदेशात्तत्र तथात्वमस्त्येव । यथोक्तग्राहित्वात् । कथं यथा तेजआदिकार्यं मृषा । यतो यो जन्मनामवताराणामाद्यस्य सर्वावतारादिभवस्य सनत्कुमारस्यान्वयात्सेवनादादि सनातनं ब्रह्म मोक्षोपयोगिज्ञानमाये ज्ञातवान् । अय गतौ अत्र प्रथमार्थे तसिः । 'स एव प्रथमं देवः कौमारं सर्गमास्थितः ।' इत्युक्तेस्सनत्कुमारस्याद्यत्वमस्ति । 'जनिजन्मसमुद्भवाः । भवावतारौ प्रसव' इति कोशात् । यस्मिन्ब्रह्मणि सूरयो मुह्यन्ति । किंभूतं ब्रह्म, इतरत इतरेष्वर्थेषु धर्मादिषु सत्यं 'त्रैवर्ग्योर्थो यतो नित्यं कृतान्तभयसंयुतः । तत्रापि मोक्ष एवार्थ आत्यन्तिकतयेष्यते ॥' इति वक्ष्यमाणत्वात् । यश्चाभितः प्रजानां धर्मे नियोजनादभिज्ञः । तच्च 'सभ्याः शृणुत भद्रं वस्साधवो य इहागताः ।' इत्यारभ्य बहुभिः श्लोकैस्तच्चरिते स्फुटीभविष्यति । ज्ञा नियोगेऽत्र ज्ञेयः । यश्च चक्रवर्ती स एव मां हंतुमुदायुधः स्वराडिति पृथिव्युक्तेः । यः कवये कविभ्यः स्तोतृभ्यः सूतादिभ्यः परम्परमेशमेव स्तुत्यत्वेन तेने प्रकाशितवान् । कवय इत्येकत्वं सामान्याभिप्रायेण । तच्च 'भो सूत हे मागध सौम्य बन्दिन्नि' त्युक्त्वा 'सत्युत्तमश्लोकगुणानुवादे जुगुप्सितं न स्तवयन्ति सभ्याः' इत्युक्त्वा च 'कर्मभिः कथमात्मानं गापयिष्याम बालवत् ।' इत्यंतेन स्फुटयिष्यंति । किंभूतं स्वेन धाम्ना तेजसा निरस्ता दूरीकृताः कोर्भूमेर्हका आच्छादकाः पर्वता येन तं 'यो लीलयाद्रीन्स्वशरासनकोट्या भिंदन्समां गामकरोदि'ति वक्ष्यमाणत्वात् । कुं हंतीति कुहा, अत्राच्छादनार्थाद्धंतेर्डस्ततः स्वार्थे कः ॥ इति पृथुपक्षः ॥ ४५ ॥

अथ ध्रुवपक्षः ॥ वयं तं ध्रुवं धीमहि सदा हृदा मनसा । तं कं यत्र त्रयाणां सुरुच्युत्तमोत्तानपदां सर्गो राज्यदानरूपो मृषा । यथा तेजआदिकार्यं मृषा । तच्च तच्चरिते स्फुटं भविष्यति । तत्रत्यवाक्यानि विस्तरभिया नोदाहृतानि । यतः यस्यान्वयादाद्यस्यादिराजस्य पृथोर्जन्मासीत् । 'अयं तु प्रथमो राज्ञां पुमान्प्रथयिता यशः । पृथुर्नामे'त्युक्तेः । 'स आदिराजो रचितांजलिर्हरिं ध्रुवादिराजस्य यशोविजृंभितम् ।' किंचेत्यादिराजेन नुतः स विश्वदृगित्यादिवाक्यात्पृथोरादिराजत्वम् । यो ध्रुव इतरतो नैष्ठिकान्नारदादर्थेषु भगवत्प्राप्तिलक्षणेष्वभिज्ञो ज्ञाता यश्च स्वे निजे पदे राजत इति स्वराट् स्वमात्मानं राजयति सर्वोत्कृष्टत्वेनेति वा । य आदिकवये आदिकविं प्राप्य ब्रह्म तपस्तेने । किंभूतं परमुत्कृष्टं यत्तपसा सर्वे निरुच्छ्वासाः सन्तो हरिमापुः । तदेवाह यद्येन तपसा देवाः सूरयोपि मुह्यंति । तद्वक्ष्यति 'नैवं विदामो भगवन् प्राणरोधं चराचरस्याखिलसत्त्वधाम्नः । विधेहि तन्नो वृजिनाद्विमोक्षं प्राप्ता वयं त्वां शरणं शरण्यम् ॥' इति । तपसः परत्वं तु 'मा भैष्ट बालं तपसो दुरत्ययादि'ति देवाश्वासनहरिवाक्यान्निश्चीयते । किंभूतं सत्यं ध्रुवत्वादेव ध्रु गतिस्थैर्ययोरिति धातोर्ध्रुव इति । 'ध्रुवो योगे हरौ काले ध्रुवः स्यात्सर्वदा स्थिरः ।' इति कोशात् । पुनः किंभूतं स्वेन धाम्ना तेजसा निरस्ताः कुहका मायिनो यक्षा येन तम् । एतदप्यग्रे स्फुटं चतुर्थस्कंधे । इति ध्रुवपक्षः ॥ ४६ ॥

अथ नरनारायणपक्षः ॥ वयं तं नरनारायणरूपं परं परमेशं सदा हृदा धीमहि । तं कं यत्र त्रयाणां कामक्रोधलोभानां सर्गः कार्यं मृषा । 'कामं दहंति कृतिनो ननु रोषदृष्ट्या क्रोधं दहंतमुत तेन दहंति सह्यम् । सोयं यदंतरमलं निविशन्बिभेति कामः कथं नु पुनरस्य मनः श्रयेत ॥' इति वक्ष्यमाणत्वात् । एकसंबंधिज्ञानमपरसंबंधिबोधकमिति न्यायेन लोभोपि तत्र नास्तीति ध्येयम् । यद्वा त्रयाणां मदनमारुतदेववधूनां सर्गस्तन्मोहननिश्चयो यत्र मृषा । ते तत्र मुधायत्ना बभूवुः । कथं यथा तेजोवारिमृदां विनिमयः परिणामो मृषा । यश्चार्थेष्वाद्यस्य चतुर्वर्गेष्वाद्यस्य धर्मस्य सकाशाज्जन्मान्वयात् । 'धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नरऋषिप्रवरः प्रशांतः ।' इति वक्ष्यमाणत्वात् । किंभूतस्याद्यस्य ईन्कामांस्तरत्यनेनेतीतरः सर्वं धर्मादवाप्यत इति वाक्यात् । तस्य तथा षष्ठ्यर्थे तसिः । यतः स्वराट् इन्द्रः इतरत इतरे कामादयश्च तत्रसुरिति शेषः । मा भैष्ट भो मदन मारुतदेववध्वः । शक्रस्त्रास विस्मित इत्येकादशे तच्चरिते श्रवणात् । इत्थमितरत इति नाद्यस्य विशेषणम् । यश्चाभिज्ञः यः सर्वज्ञः सर्वविदिति श्रुतेः । यद्वा स्वराट् स्वतन्त्रः अन्ये देहादयस्तत्परतंत्राः । तदुक्तं मार्कंडेयेन द्वादशे 'किं वर्णये तव विभो यदुदीरितोसुः संस्पंदते न मनुवाङ्मनइंद्रियाणि । स्पंदंति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भावबंधुः ॥' इति । यः कवये नारदाय आदि सनातनं ब्रह्म वेदस्तुतिरूपं तेने । तच्च 'एकदा नारदो लोकान्पर्यटन् भगवत्प्रिय' इत्यारभ्य 'तस्मै ह्यवोचद्भगवानृषीणां शृण्वतामिदम् । यो ब्रह्मवादः पूर्वेषां जनलोकनिवासिनामि'त्याद्युक्त्वा च 'धार्यंश्रद्धया गां कामं कामानां भर्जनं नृणाम् ।' इत्यंतेन तेने । यस्मिन्वेदस्तुतिरूपे ब्रह्मणि सूरयोपि मुह्यंति, 'यद्दर्शनं निगम आत्मरहःप्रकाशं मुह्यंति तत्र कवयोजपरा यतंत ।' इति द्वादशे मार्कंडेयोक्तेर्ब्रह्मादीनामपि निगममोहश्चेत्का कथान्येषां सूरीणामिति । किंभूतं स्वेन धाम्ना तेजसा निरस्तास्तिरस्कृताः कुहका इंद्रप्रेषिताः कामाद्या येन । यद्वा निरस्ताः स्वसेविनां सुरकृतांतरायरूपाः कुहका येन तं, तद्वक्ष्यत्येकादशे 'त्वां सेवतां सुरकृता बहवोंतरायाः स्वौको विलंघ्य परमं व्रजतां पदं ते । नान्यस्य बर्हिषि बलीन्ददतः स्वभागान धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि ॥' इति । पुनः किंभूतं सत्यं सर्वदैकरसत्वेन विद्यमानम् । तद्वक्ष्यति 'कर्तास्य सर्गादिषु यो न बध्यते न हन्यते देहगतोपि दैहिकैः । द्रष्टुर्न दृग्यस्य गुणैर्न दूष्यते तस्मै नमोऽसक्तविविक्तसाक्षिणे ॥' इति नारदः पंचमे । इति नरनारायणपक्षः ॥ ४७ ॥

अथ हंसावतारपक्षः ॥ वयं तं हंसावतारं सदा हृदा धीमहि । तं कं यत्र त्रयाणां जाग्रदादीनां सर्गो मृषा न वस्तुतः । तदुक्तं तेनैव 'असत्त्वादात्मनोन्येषां भावानां तत्कृता भिदा । गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ॥' किंच 'एवं विमृश्य गुणतो मनसस्त्र्यवस्था मन्मायया मयि कृता' इत्यादि । कथं तेजोवारिमृदां विनिमयोऽन्यथात्वं मृषा । यश्चाद्यस्य ब्रह्मण इतरतश्चेतरेषां सनकादीनां हेतोर्जन्मान्वयात् । तद्वक्ष्यत्येकादशे स एव 'एवं पृष्टो महादेवः स्वयंभूर्भूतभावनः । ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः ॥ स मामचिंतयद्देवः प्रश्नपारतितीर्षया । तस्याहं हंसरूपेण सकाशमगमं तदा ॥ दृष्ट्वा मां त उपाव्रज्य कृत्वा पादाभिवंदनम् । ब्रह्माणमग्रतः कृत्वा पप्रच्छुः को भवानिति ॥' इति । यतश्च स्वराट् ब्रह्माऽर्थेषु ज्ञातव्यार्थेष्वभिज्ञो जातः, इतरे सनकादयश्चार्थेष्वभिज्ञा जाताः वचनव्यत्यासेनान्वयोत्र । चक्राक्षन्यायेनेतरत इत्यनेकत्र संबध्यते । 'इति मे छिन्नसंदेहा मुनयः सनकादयः' इत्युक्तेः । यश्चादिकवये ब्रह्मणे इतरत इतरेभ्यः सनकादिभ्यश्च ब्रह्म ज्ञानं तेने । द्वितीये 'तुभ्यं च नारद भृशं भगवान्विवृद्धभावेन साधुपरितुष्ट उवाच योगम् । ज्ञानं च भागवतमात्मसतत्त्वदीपं यद्वासुदेवशरणा विदुरंजसैव ॥' इति ब्रह्मोक्तेः 'इत्यहं मुनिभिः पृष्टस्तत्त्वजिज्ञासुभिस्तदा । यदवोचमहं तेभ्यस्तदुद्धव निबोध मे ॥' इत्यारभ्य 'मयैतदुक्तं वो विप्रा' इत्यंतग्रंथेनैकादशे तदुक्तेश्च । यद्यस्मिन् ब्रह्मणि सूरयो ब्रह्मसनकाद्याश्च मुह्यंति । तदुक्तमेव 'गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो ।' इत्यादिना । किंभूतं तं स्वेन धाम्ना प्रकाशेन निरस्तं कुहकं ब्रह्मादीनामज्ञानं येन तं, पुनः किंभूतं परं सत्यमात्यंतिकं सत्यं सत्यादीनामधिष्ठानत्वात् 'अहं योगस्य सांख्यस्य सत्यस्यर्तस्य तेजसः । परायणं द्विजश्रेष्ठाः श्रियः कीर्तेर्दमस्य चे'त्यादि तदुक्तेः । इति हंसावतारपक्षः ॥ ४८ ॥

यमुनाप्रवाहपक्षः ॥ वयं तं यमुनाप्रवाहं धीमहि सदा हृदा । तं कं यत्र त्रयाणां सर्वतीर्थस्नानसर्ववेदयजनानां सर्गोऽमृषा सत्यः । 'स्नातं वै सर्वतीर्थेषु तेनेष्टं सार्ववैदिकम् । दत्तानि सर्वदानानि यः कालिंदीं निषेवते ॥' इति व्रजमाहात्म्ये । कथं यथा तेजोवारिमृदामविनिमयो याथार्थ्यममृषा । यतः यत्र प्रवाहे स्वराट् श्रीकृष्णः आद्यस्य निजपितुर्नंदस्य जन्माविर्भावमन्वयात् आप । कदाचित्तत्र मग्नं नंदं तत्रैव श्रीकृष्णः प्रापेति । किंभूतः स्वराट् अर्थेषु कर्तव्येष्वभिज्ञः यः यमुनाप्रवाहः कवये विदुषेऽक्रूराय इतरत इतरेभ्यो नंदादिगोपेभ्यः आदि सनातनं ब्रह्म सगुणं निर्गुणं च ब्रह्मरूपं तेने ध्याने प्रकाशितवान् । 'दर्शयामास लोकं स्वं गोपानां तमसः परम् । सत्यं ज्ञानमनंतं च ब्रह्म ज्योतिः सनातनम् ॥ यदि पश्यंति मुनयो गुणापाये समाहिताः ।' इत्यादि श्रीदशमोक्तेः । 'भूयस्तत्रापि सोद्राक्षीत्स्तूयमानमहीश्वरे ।' इत्यारभ्य यावच्चत्वारिंशाध्यायसमाप्ति तद्वृत्तोक्तेश्च । ननु कृष्ण एवाक्रूरगोपेभ्यो ब्रह्म तेने न तु यमुनाप्रवाह इति चेदाह 'कृष्णवामांगसंभूता यमुना कृष्णरूपिणी ।' इति संहितोक्तेर्यमुनाकृष्णयोरभेद एव । 'न जलं यमुनावारि साक्षाद्ब्रह्मैव तज्जलमि'त्यादिपुराणादपि । तथा यत्र ब्रह्मणि यमुनाप्रवाहे वा सूरयोपि मुह्यंति प्रवाहे मोहस्तु तत्र जलबुद्धिरेव । किंभूतं प्रवाहं स्वेन धाम्नाश्रयेण कृष्णेन निरस्तो निष्कासितः कुहकः कपटरूपः कालियो येन तं, तथा पुनः किं सत्यं सत्यलोकं पातीति सत्यंपो ब्रह्म । खप्रत्ययोत्र पातेः । सत्यंपो रौति अत्र 'नौमीड्य तेभ्रवपुषे तडिदंबराये' त्यादिप्रकरणे स्तुतिरूपं शब्दं करोतीति सत्यंपरस्तं तथा । 'ततोनुज्ञाप्य भगवान्स्वभुवं प्रागवस्थितान् । वत्सान्पुलिनमानिन्ये' इत्युक्तेर्यमुनातटब्रह्मणस्तुतिः कृता । इति यमुनाप्रवाहपक्षः ॥४९॥

अथ पुष्करतीर्थपक्षः ॥ वयं तं पुष्करतीर्थं सदा हृदा धीमहि । तं कं यत्र त्रयाणां ब्रह्मविष्णुरुद्रपुष्कराणां तन्नामकसरसां सर्गो मृषा कथं यथा तेजआदीनामविनिमयः स्वभावावस्थितिरमृषा । यतो यस्य पुष्करस्यान्वयात्सेवनात्स्वराट् ज्ञानी अर्थेष्वभिज्ञश्च भवति । किंभूतस्य यतः जन्मशब्देनोपलक्षणभूतेन स्थितिभंगावपि ग्राह्यौ । जन्माद्यते नाश्यतेऽनेनेति जन्माद्यः । अत्तेर्नाशे ण्यण् । तस्य जन्माद्यस्य । पुनः किंभूतस्य यः कामास्तीर्यंतेऽनेनेतीतरस्तस्येतरतः । षष्ठ्यर्थे तसिरुभयत्र । एतद्विशेषणद्वयं स्वाराज्यार्थाभिज्ञत्वदाने हेतुभूतमिति । 'सर्वेषां चैव तीर्थानां गुरुं पुष्करतीर्थकम् । सेवते यो नरो नित्यं स ज्ञानी चार्थभाग्भवेत् ॥ कार्त्तिके तु विशेषेण तत्रापि भीष्मपंचके । दर्शनात्स्पर्शनात्पानात्स्मरणात्सर्वपापनुत् ॥ पुष्करः सर्वतीर्थेषु ब्राह्मणो जातितो गुरुः ।' इति तन्माहात्म्ये । यः पुष्कर आदि कवये ब्रह्मणेपि ब्रह्म ज्ञानं तेने, ब्रह्मणापि तत्र यज्ञरूपं तपस्तप्तं तेनैव सर्वज्ञानमापेति पुराणांतरे प्रसिद्धेः । यस्मिन् पुष्करे सूरयोपि शास्त्रज्ञा अपि नास्तिकप्रभृतयो मुह्यंति । जलसामान्यभ्रांत्या तं न सेवन्त इति भावः । किंभूतं स्वेन धाम्ना जगति प्रसिद्धेन तेजसा निरस्ताः कुहका नास्तिका येन तम् । यद्वा स्वसेविनां निरस्तं कुहकं पापं येन तं सत्यं ब्रह्मरुद्रादीनां सत्यानां तपोभूमित्वात् । 'ब्रह्मणा शंभुनेंद्रेण विष्णुना प्रभविष्णुना । अन्यैः सुरैर्मुनिगणैर्नारदाद्यैश्च सर्वतः ॥ तपः कृतं पुष्करेषु ततः सत्यो न संशयः ॥' पुनः परं सर्वोत्तमम् । 'पुष्करान्न परं तीर्थं विद्यते भुवि भारत । सर्वतीर्थव्रजश्चात्र वसत्येव न संशयः ॥' इत्यादि बहुधा प्रपञ्चितं वाराहादिपुराणेष्वेतन्माहात्म्यम् । इति पुष्करतीर्थपक्षः ॥ ५० ॥

अथ प्रयागराजपक्षः ॥ वयं तं प्रयागराजं तीर्थं सदा हृदा धीमहि । तं कं यत्र त्रयाणां गंगायमुनासरस्वतीप्रवाहाणां सर्गोऽमृषा सत्यः । तेजोवारिमृदां सत्यरूपं यथाऽमृषा । यतो यस्य प्रयागस्याद्यस्य ब्रह्मणः सकाशाज्जन्म प्राकट्यमासीत् । 'पापौघभूमिभारस्य दाहार्थं वै प्रजापतिः । प्रयागराजं विदधे प्रजानां च हिते स्थितः ॥' किंच 'सितासिता तु या धारा सरस्वत्या विगर्भिता । सा मार्गं ब्रह्मलोकस्य सृष्टिकर्ता ससर्ज ताम् ॥' इति पाद्मोक्तेः । 'द्वयोर्नद्योस्त्रिसृणां वा योगः प्रोक्तः प्रयागक' इति

स्कांदे तल्लक्षणमपीर्यते च। पुनः यतो यस्यान्वयात्सेवनात्स्वराडिंद्रोऽर्थेषु निधिष्वभिज्ञो भोक्ता जातः। 'धनकामः पुरा शक्रः स्नातोत्रैव द्विजोत्तम। धनदस्य निधीन् सर्वान्संजहार स्वमायया॥' इति पाद्मे। यः प्रयाग आदिकवये ब्रह्मणे इतरत इतरेभ्योपि ब्रह्म अनेकपदार्थान् तेने। 'ब्रह्म सर्वपदार्थेपी'ति कोशादत्र ब्रह्मशब्दोऽनेकपदार्थपरः। 'इष्ट्वात्रैव महायज्ञैः सृष्टिकामः प्रजापतिः। अवाप सृष्टिसामर्थ्यं ततः सृष्टिं चकार सः॥ अत्र नारायणः स्नातः पत्नीकामः सितासिते। तदैव लब्धवांल्लक्ष्मीं भार्याममृतमंथने॥ उषित्वात्रैव षण्मासान्स्नात्वा वेण्यां यथेच्छया। त्रिपुरं घातयामास बाणेनैकेन शूलधृक्॥ अस्मिन् क्षेत्रे पुरा विप्र क्षेत्रेशस्यापरोक्षताम्। योगस्य फलभूमिं तु लेभिरे सनकादयः॥' इत्यादि पाद्मोत्तरखंडे प्रोक्तत्वात् यस्मिन्प्रयागे सूरयो नास्तिका मुह्यंति। 'सूरी श्रीधनपंडिताविं'ति हैमाद्रौ। किंभूतं स्वेन धाम्ना स्वतेजसा निरस्तं स्वसेविनां चित्रपिशाचप्रेतपंचकन्यादीनां कुहकं पिशाचत्वादिकारणीभूतं पापं येन तम्। पुनः सत्यं सर्वदा स्थितम्। 'आविर्भावतिरोभावौ क्षेत्रस्यास्य न संशयः। कल्पे कल्पे प्रजायेते सत्यं तेन द्विजोत्तम॥' इति पाद्मात्। परं सर्वोत्कृष्टं स्वर्गमोक्षहेतुत्वात्। तथा च श्रुतिः 'सितासिते सरिते यत्र संगते तत्राप्लुतासो दिवमुत्पतंति। ये वै तन्वा विसृजंति धीरास्ते जनासो अमृतत्वं भजंते॥' इति। स्मृतिरपि 'वातांबुपर्णाशनदेहशोषणैस्तपोभिरुग्रैश्चिरकालसंचितैः। योगैश्च संयांति नरा न तां गतिं स्नानात्प्रयागस्य हि यांति यां गतिम्॥' इति। 'माघे विशेषतः सेव्यः प्रयागस्स्वहितेप्सुभिः' इति प्रयागपक्षः॥ ५१॥

अथ कुरुक्षेत्रपक्षः। वयं तत्कुरुक्षेत्रं सदा हृदा धीमहि। तत् किं यत्र त्रयाणां जलस्थलांतरिक्षमृत्यूनां सर्गः मृषा एकफलत्वात्। 'भागीरथ्यां जले मुक्तिर्वाराणस्यां जले स्थले। कुरुक्षेत्रे त्रिधा मुक्तिरंतरिक्षे जले स्थले॥' इति तन्माहात्म्योक्तेः। यतो यस्यान्वयात्सेवनादर्थेषु धर्मार्थकाममोक्षेष्वाद्यस्य धर्मस्य जन्म भवति। तस्य धर्मक्षेत्रत्वात्। तस्य धर्मक्षेत्रत्वं तु 'धर्मक्षेत्रे कुरुक्षेत्रे' इति भारतोक्तेः। यद्यपि धर्मक्षेत्राणि बहूनि पुष्करप्रयागादीनि संति तथाप्यस्यैव 'तीर्थेष्वन्येषु यद्धर्मं सहस्रगुणितं हि तत्। कुरुक्षेत्रे कृतस्यैव धर्मस्य वृद्धिरादरात्॥ त्रयोदशदिनं यावत्त्रयोदशगुणा भवेत्। सहस्रगुणिता वृद्धिः पुण्याहे पुण्यकर्मणाम्॥ मन्वस्त्रदिनपर्यंतं भूपते स्यान्न संशयः॥ सूर्योपरागेऽनंता स्यात्कुरुक्षेत्रे न संशयः॥' इति तन्माहात्म्योक्तेः। प्राधान्येन धर्मक्षेत्रत्वमिति। किंच यतः यत्र स्वराट् ब्रह्मा जात इति शेषः। तत्र पृथूदके ब्रह्मयोनिनाम्ना तीर्थं प्रसिद्धम्। किंभूतोऽभिज्ञः सर्गनिर्माणे कुशलः। यः कुरुक्षेत्रदेश आदिकवये वशिष्ठाय इतरत इतरेभ्यः कपिलमार्कंडेयादिभ्यो ब्रह्म तपस्तेने। तेषां तपःस्थलानि कुरुक्षेत्रे प्रसिद्धानि। यस्मिन् कुरुक्षेत्रे सूरयः देशसामान्यभ्रांत्या मुह्यंति। कथं यथा तेजोवारिमृदां विनिमयः। किंभूतं मृषा स्वेन धाम्ना रजसा निरस्तं कुहकं दुर्गतिरूपं दुष्कृतानां येन तत्तथा। 'तेजो धाम गृहं धाम रजो वा धाम कीर्तितमि'त्यभिधानचितामणेः रजोपि धामार्थकम्। 'पांसवोपि कुरुक्षेत्राद्वायुना समुदीरिताः। अपि दुष्कृतकर्माणं नयंति परमां गतिम्॥' इति भारतात्। किंभूतं सत्यं सत्यरूपवेदविहितम्। 'कुरुक्षेत्रं देवयजनमि'ति शतपथश्रुतेः। पुनः परं सर्वोत्कृष्टं ब्रह्मसदनत्वात्। तथा च श्रुतिः। बृहस्पतिरुवाच याज्ञवल्क्यं यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वभूतानां ब्रह्मसदनमिति जाबालश्रुतिः॥ इति कुरुक्षेत्रपक्षः॥ ५२॥

अथ मायाक्षेत्रपक्षः। वयं तन्मायाक्षेत्रं हृदा धीमहि। तत्किं यत्र कनखलहरिद्वारकुब्जाम्रकक्षेत्राणां सर्गोऽमृषा। कथं यथाऽविनिमयोऽमृषा 'मायाक्षेत्रं समाख्यातं हरिद्वारे सुपुण्यदे।' इति, 'ब्रह्मणः स्थानतो यावद्योजनानि दशद्वयम्।' इति स्कांदे। 'इदं क्षेत्रं महापुण्यं यावद्वै यज्ञभूमिका। यत्र मायानिमित्तं हि जातं सर्वं प्रजापते। तस्मादिदं महाक्षेत्रं मायासंज्ञं भविष्यति॥' इति च। यत्र तेजो वारिमृदामाद्यस्य तेजस्सर्वदेवतेजोरूपस्य मायादेहस्य जन्म मायापरपर्यायदुर्गाया देहो यथा तेजोरूपं तथा प्रपंचितं मार्कंडेये 'ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः। निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च॥' इत्यारभ्य 'अन्येषां चैव देवानां संभवस्तेजसां शिवा' इत्यंतग्रंथेन। यस्यान्वयात्सेवनात्पुमान्स्वराट् कृतकृत्यो भवेत्। 'दर्शनादस्य तीर्थस्य कृतकृत्यो भवेन्नरः' इति स्कांदे। इतरत इतरोपि तथार्थेष्वभिज्ञः सर्वार्थदत्वादस्य सर्वार्थदमिदं क्षेत्रमिति स्कांदे। इतरेषां शंबूकप्रभृतिशूद्रादीनामपि तथात्वं प्रपंचितं चैतन्माहात्म्ये। यो देशो मायाक्षेत्ररूपः कवये विवेकिने विदुरायादि सनातनं ब्रह्म तेने। यद्यपि 'द्वारि द्युनद्या ऋषभः कुरूणां मैत्रेयमासीनमगाधबोधमि'त्यादिना मैत्रेयसंगतिं विदुरस्योक्त्वा मैत्रेयस्तस्मै श्रीभागवतरूपं ब्रह्म तेने 'सोहं क्षुल्लसुखाय दुःखं महद्गतानां विरमाय तस्य। प्रवर्त्तये भागवतं पुराणमि'त्यादिना तथा तत्र क्षेत्रे स्थितत्वात्तेनैव दत्तमिति बोध्यम्। यदस्मिन् क्षेत्रे सूरयो विद्वांसोपि पूर्वदुष्कृतवशान्मुह्यंति श्रद्धां न कुर्वंति। किंभूतं क्षेत्रं स्वेन धाम्ना प्रतापेन निरस्तं कुहकमस्माच्चित्तादीनां चौर्यादिलक्षणं येन तं एतद्वृत्तमेतन्माहात्म्ये प्रपंचितमिति। पुनः किंभूतं सदा सत्यं न कदाचिदप्यसत्फलदम्। पुनः परं सर्वोत्कृष्टमनेकेशलिंगतीर्थशिलादिभिरधिष्ठितत्वान्महाफलदमिति ईशलिंगानि श्रीभरतलक्ष्मणमूर्त्यादीनि। यद्वा दक्षेश्वरराजेश्वरतिलभांडेश्वरबिल्वकेश्वरनीलेश्वरभूतेश्वरादीनि तीर्थानि विष्णुतीर्थकुशावर्तादीनि शिलानारायणीशिलाद्या अत्र संति इति मायाक्षेत्रपक्षः॥ ५३॥

अथायोध्याक्षेत्रपक्षः॥ वयं तदयोध्याक्षेत्रं धीमहि। तत्किं यत्र त्रयाणां भक्तिज्ञानवैराग्याणां सर्गः स्थितिरमृषा यद्वा तिसृणां कौशल्याकैकयीसुमित्राणां सर्गोऽमृषा। तथा तेजोवारिमृदामविनिमयस्तात्त्विकं रूपममृषा। यतो यत्राद्यस्य श्रीरामस्य जन्माभूत्। इतरत इतरेषां भरतलक्ष्मणशत्रुघ्नानां च जन्माभूत्। च पुनः यतोऽन्वयात्सेवनात्पुमान्स्वराट् स्वर्गी भवति। 'यदि

स्वर्गो बहुमतस्तव राजन् हि वर्तते। मयि वासं कुरुष्वे'त्ययोध्यामाहात्म्ये कुशं प्रत्ययोध्योक्तेः। अभिज्ञश्च भवत्यर्थेषु धर्मादिषु। 'धर्मो अर्थाश्च कामाश्च मोक्षोप्यथ वरानने। अध्योध्यावासतः संती'ति रुद्रयामले। यत् क्षेत्रं कवयेऽतिविदुषे श्रीयमराजाय हृदा प्रीत्या ब्रह्म वरं तेने। ब्रह्मशब्दोत्र वरे 'वरं ब्रह्म बृहद्ब्रह्म ब्रह्म तीर्थं तपस्तथे' ति कोशात्। 'वरं ब्रूहि महाबुद्धे प्रीताहं ते न संशयः। यदर्थमागतोसि त्वं तन्ममाग्रे प्रकथ्यताम्॥' इति यमस्तुति प्रीतायोध्यायाः यमं प्रत्युक्तेः। यद्वा ब्रह्म कोर्थस्तीर्थं तेने। 'यमस्थलेति विख्यातं स्थानं ते सरयूतटे। ऊर्जे मासि सिते पक्षे द्वितीयायां तु ये यम॥ स्नास्यंति तत्र तीर्थे वै तेषां तव भयं न हि॥' इति तन्माहात्म्ये तदुक्तेः। यस्मिन् क्षेत्रे ये सूरयस्तेऽमुह्यंति मोहं न प्राप्नुवंति। हृदाऽये इति पदत्रयं छित्त्वा 'अमानोनाः प्रतिषेधे' इत्यव्ययेष्वकारोऽव्ययं नार्थे बोध्यम्। किंभूतं क्षेत्रं स्वेन धाम्ना प्रतापेन सदा निरस्ताः कुहका लुंपकशंकुलुंठकजंतुहृधर्मेद्द- प्रभृतयस्तैत्कारात्या येन तत्तथा। एतद्वृत्तमयोध्यामाहात्म्येऽतिविस्तृतम्। पुनः किंभूतं सत्यनामकम् 'विष्णोराद्या पुरी सत्या तस्या माहात्म्यमीदृशमि'ति चित्रगुप्तं प्रति यमोक्तेः। 'वैकुण्ठमध्ये यत्प्रोक्तमयोध्यानगरं शुभमि'त्यादिना वैकुण्ठस्थानादिह सत्यायोध्यानगरमेवमन्वर्थं ब्रह्मणा विष्णुं प्रार्थ्य भुव्यानीतमिति प्रसिद्धं तन्माहात्म्ये। पुनः परं सर्वोत्कृष्टम्। तदुक्तमयोध्यामा- हात्म्ये 'विष्णोः पादमवंतिकां गुणवतीं मध्ये च कांचीं पुरीं नाभिं द्वारवतीं पठंति हृदयं मायापुरीं योगिनः। ग्रीवामूलमुदा- हरंति मथुरां वाराणसीं नासिकामेतद् ब्रह्मपदं वदंति मुनयो योऽध्यापुरीं मस्तकम्॥' इति मस्तकस्थानीयायोध्यायाः सर्वोत्कृष्टतायां न संशयोऽस्तीति भावः। अथायोध्यापदार्थमाह। 'आकारो वासुदेवोस्ति यकारस्तु प्रजापतिः। उकारो रुद्ररूपस्तु ते ध्यायंति यतस्तु ताम्॥ ततोयोध्या समाख्याता मुनिभिरर्थवेदिभिः। सर्वोपपातकैर्युक्तैर्ब्रह्महत्यादिपातकैः॥ न योध्या सर्वतो यस्मात्तामयोध्यां ततो विदुः। विष्णोराद्या पुरी चेयं क्षितिं न स्पृशति प्रिये॥ विष्णोः सुदर्शने चक्रे स्थिता पुण्यांकुरा सदा। यत्र साक्षात्स्वयं देवो विष्णुर्वसति सर्वदा॥ सहस्रधारामारभ्य योजनं पूर्वतो दिशि। पश्चिमे च तथा देवि योजनं संमतोऽवधिः॥ दक्षिणोत्तरभागे तु सरयूतमसावधि। एतत्क्षेत्रस्य संस्थानं हरेरंतर्गृहं स्मृतम्॥ मत्स्याकृतिरियं भद्रे पुरी विष्णोरुदीरिता। पश्चिमे तस्य मूर्द्धा तु गोप्रताराश्रितः प्रिये॥ पूर्वतः पुच्छभागो हि दक्षिणोत्तरमध्यगः। एतत्क्षेत्रस्य संस्थानं मया सुंदरि वर्णितम्॥' इति सृष्ट्यादौ ब्रह्मणस्तपसा तोषितविष्णुनेत्राज्जलं पपात तच्च ब्रह्मणा कमंडलौ धृतं तज्जलन्यासार्थं पुनर्मनसा मानसं सरो रचयित्वा तज्जलं तत्र संस्थाप्य सृष्टिं चकार। तत् स्वनगरशोभार्थं नयर्थं इक्ष्वाकुप्रेषितवसिष्ठेन मानसात्तज्जलं नदीरूपेणाविर्भूतं सरयूसंज्ञमयोध्या- यामानी तमिति साकेतमाहात्म्ये स्थितम्॥ इत्ययोध्यापक्षः॥ ५४॥

अथ काशीक्षेत्रपक्षः॥ वयं तत्काशीक्षेत्रं सदा हृदा धीमहि। तत्किं यत्र तिसृणां गंगावाराणसीमनकर्णिकानामापगानां सर्गोऽमृषा तासां तत्र सत्त्वात्। यद्वा त्रयाणामुत्तममध्यमाधमानां सर्गो मृषा सर्वेषामेकगतिभाक्त्वात्। 'ये वा द्विजाद्याः श्वपचाश्च निंद्या ये चक्रवर्त्तिष्वपि धर्मरूपाः। ये वा दरिद्राः परमार्थभाजः समानरूपां गतिमाप्नुवंति॥' इति काशीं प्रस्तुत्योक्तेः ब्रह्मवैवर्त्ते। कथं यथा तेजोवारिमृदां विनिमयो मृषा। यतो यस्मान्वयात्सेवनाद् इतरत इतरोपि जंतुः सोप्यर्थेषु महावाक्यार्थ- ष्वभिज्ञः सन् ज्ञानी भूत्वा स्वराट् ब्रह्मैव भवति। 'अविमुक्तं वै देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनमत्र हि जंतोः प्राणे- पूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनामृतो भूत्वा मोक्षी भवती'ति जाबालश्रुतेः। 'सर्वान् जंतून्मोचयेदंतकाले विश्वेशोत्र श्रोत्रमंत्रोपदेशात्।' इति स्मृतेश्च। 'आब्रह्मस्तंबपर्यंतं यत्किंचिज्जीवसंज्ञितम्। चतुर्षु भूतग्रामेषु काश्यां तन्मुक्तिमाप्स्यति॥' इति काशीखंडाच्च। किंभूतस्य यतः जन्माद्यते नाश्यतेऽनेनेति जन्माद्यं तस्य जन्माद्यस्य। पुनः पुनर्जन्मनिवर्त्तकस्य। यः 'काश्यां मृतिमाप्नोति न पुनर्जायते स ना।' इति काशीमाहात्म्ये। यत् क्षेत्रं कं सुखं वीयते नश्यतेऽत्रेति कवयस्तस्मिन्कवये मरणावसरे 'शतवृश्चिकदंशस्य पीडा यादृक् प्रजायते। देहात्प्राणवियोगे तु तादृक्पीडा न संशयः॥' इत्युक्तेः। कोपपादाद्वीयतेरधिकरणेऽप्रत्ययः। आदि सनातनं ब्रह्म तेने। शिवद्वारा तारकं प्रकाशितवदित्यर्थः। तदुक्तं काशीखंडे 'ब्रह्मज्ञानेन मुच्यंते नान्यथा जंतवः क्वचित्। ब्रह्मज्ञानं तदेवाहं काशीसंस्थितिभागिनाम्॥ दिशामि तारकं प्रांते मुच्यंते ते तु तत्क्षणात्॥' इति। तारकं किमिति चेत्प्रणवमेव तदवेहि। तदुक्तं काशीखण्डे 'न वर्ण्यते कैः किल काशिकेयं जंतोः स्थितस्यात्र यतोंतकाले। पचेलिमैः प्राक्तनपुण्यभारैरोंकारमों- कारयतींदुमौलिः॥' इति। 'प्रणवं तारकं ब्रूते काश्यां देवो महेश्वरः।' इत्यन्यत्रापि। कश्चित्तु 'शिवशिवेत्युपदिशाम्यहं तदे'ति द्विरावृत्तशिवशब्दस्तारकतयोक्तः। पाद्मे तु 'श्रीरामरामरामेति एतत्तारकमुच्यते।' इति श्रीशब्दपूर्वकस्त्रिरावृत्तो रामशब्दस्तारक- तयोक्तः।'पेयं श्रवणपुटकैरामनामाभिधेयं ध्येयं ध्येयं मनसि सततं तारकब्रह्मरूपम्। जल्पं जल्पं प्रकृतिविकृतौ प्राणिनां कर्णमूले वीथ्यां वीथ्यामटति जटिलः कोपि काशीनिवासी॥' इत्यन्यत्रापि रामनाम्नैव तारकशब्देनोच्यते। तथाच प्रणवाधिकारिणां सर्वेषां प्रणवोपदेश एव तदनधिकारिणां शैवानां शिवमंत्रोपदेशः। वैष्णवानां तु राममंत्रोपदेशः। शिवमद्वैतं चतुर्थं मन्यंते इति श्रुतेः शिव इति शब्दस्य रमंते योगिनोस्मिन्निति निर्वचनेन रामशब्दस्यापि चाद्वितीयप्रत्यगभिन्नब्रह्मबोधकत्वान्न तारकोक्तौ मोक्षफलकत- द्बोधानुपपत्तिशंकापीत्यपि केचित्। अस्मिन्मते क्षुद्रजंतूनामधिकारोपपत्तिरीशाधीनैव। तेषां फलोन्मुखेन केनचिददृष्टेन कर्मणा क्षुद्रजन्मोपपत्तिस्तादिभवसंचितासंख्यपुण्यैः काश्यां मरणे मुक्तिरिति ध्येयम्। ननु प्रणवेन कथं ब्रह्मात्म्यैक्यबोध इति चेच्छृणु— अकारोकारमकारवाच्यान्विश्वतैजसप्राज्ञान्वैश्वानरतैजससूत्रात्मप्राज्ञेश्वरान् ज्ञात्वा प्रथमं विश्वं वैश्वानरत्वेनाहमेव वैश्वानरोस्मीति विभाव्य

ततस्तैजसं सूत्रात्मत्वेनाहमेव सूत्रात्मास्मीति विभाव्य पश्चात्प्राज्ञमीश्वरत्वेनाहमेवेश्वरोस्मीति विभाव्यानंतरं समष्टिव्यष्टिस्थूलसूक्ष्मकारणोपाधिकमोंकारवाच्यं परं ब्रह्माहमस्मीति सर्वात्मत्वेन विभाव्य पश्चान्मनस्येकाग्रतामापन्ने स्थूलसूक्ष्मादि सर्वं जगत्सोपानावरोहणन्यायोक्तक्रमेण निर्विशेषे ब्रह्मणि विलाप्यैकाग्रेण मनसा स्वस्य ब्रह्मत्वं साक्षात्करोतीति। यद्वा 'तद्योहं सोसौ योसौ सोहमि'त्यत्र सश्देन परमात्मोच्यते अहंशब्देन प्रत्यगात्मावगम्यते ततश्च समानाधिकरणयोः सोहमित्यनयोः परमात्माहमित्यर्थस्तथा प्रणवस्यापि सोहमित्यस्यैव प्रणवत्वेन निपातनात्। तथाहि सोहमित्यस्य पृषोदरादित्वेन निपातनात्सकारहकारलोपे कृते परिशिष्टयोरोमित्यनयोः 'एङः पदांतादति' इति पूर्वरूपैकादेशात्मकं संधिं कृत्वोच्चारणे ओमिति शब्दो निष्पन्नः। तदुक्तं 'सकारं च हकारं च लोपयित्वा प्रयोजयेत्। संधिं च पूर्वरूपाख्यं ततोसौ प्रणवो भवेत्॥' इति। एवं चोमित्यस्य परमात्माहमित्यर्थो निष्पन्न इति। यत्र यस्मिन्मरणावसरे सूरयोपि मुह्यंति तत्कालीनमहद्दुःखेन विस्मृतज्ञाना भवंति। अत एवोक्तमपि पांडवगीतायाम्—'कृष्ण त्वदीयपदपंकजपंजरांते अद्यैव मे विशतु मानसराजहंसः। प्राणप्रयाणसमये कफवातपित्तैः कण्ठावरोधनविधौ स्मरणं कुतस्ते॥' इति। किंभूतं स्वेन निजेन धाम्ना निरस्तानां देवानामपि कुहकं विस्मापकम्। यद्वा स्वसेविनां निरस्तं कुहकं पापलक्षणं येन तत्तथा। 'कालाद्भयं नास्ति यत्र यत्र पापभयं न हि। जन्मान्तरसहस्रेषु कृतं नश्यति दर्शनात्॥' इति काशीरहस्योक्तेः। पुनः किंभूतं सत्यं प्रलयेपि सत्त्वाद् ब्रह्मरूपत्वाद्वा। कदाचिद्वाराहकल्पे पृथिवीं मग्नां वीक्ष्य जलादूर्ध्वं छत्राकारं ज्योतिश्च वीक्ष्यर्षिभिर्जनस्तपोलोकादिवासिभिरर्थितो विष्णुराह 'वाराहं रूपमास्थाय पृथिवीमुद्धराम्यहम्। प्रतीक्षंतु कियत्कालं यावद्दैत्यसमागमः॥ दैत्यं हत्वा निमग्नां गामानयिष्ये जलोपरि। ततः प्रवर्त्ततां धर्मो वर्णाश्रमनिबंधनः॥ छत्राकारं परं ज्योतिर्दृश्यते गगने च यत्। तत्परं परमं ज्योतिः काशीति प्रथितं श्रुतौ॥ रत्नं सुवर्णे खचितं यथा भवेत्तथा पृथिव्यां खचिता हि काशिका। न काशिका भूमिमयी कदाचित्ततो न मज्जेन्मसतत्कृतिर्यतः॥ जडेषु सर्वेष्वपि मज्जमानेष्वियं चिदानंदमयी न मज्जते। स्वयं निमग्नः कथमुद्धरेत्परांल्लोकेपि वेदेपि विचार्यमेतत्॥' इति ब्रह्मवैवर्त्तोत्तरभागोक्तेः। पुनः किंभूतं परं सर्वतीर्थशुद्धिजनकत्वात्। तदुक्तं काशीरहस्ये 'तीर्थानि यानि लोकेस्मिन् जंतूनामघहान्यहो। तानि सर्वाणि शुद्ध्यर्थं काशीमायांति नित्यशः॥ यस्तु काश्यां वसेज्जंतुः सर्वपापारकृन्नरः। तस्यापि या गतिः प्रोक्ता सा न यज्ञैर्न चान्यतः॥ स्मरंति ये नराः काशीं यत्र कुत्रापि संस्थिताः। तेप्यघौघविनिर्मुक्ता भवंति ज्ञानभागिनः॥' इति काशीरहस्ये। काशीपदार्थमाह 'काशो ब्रह्मेति विख्यातं तद्विवर्तो जगद्भ्रमः। अविवर्तं तदेवाहुः काशीति ब्रह्मवादिनः॥' इत्यलं प्रपंचेन॥ इति काशीपक्षः॥ ५५॥

अथ द्वारिकाक्षेत्रपक्षः॥ वयं तत् द्वारिकाक्षेत्रं धीमहि। तत्किं यत्र त्रिसर्गः त्रयाणां रैवतगोपीचदंनगोमतीचक्रशिलानां सर्गोऽमृषा सत्यः। यथा यथावत् किंभूतः सर्गः तेजोवारिमृदां विनिमयः प्रशस्तरूपः तत्र तेजोविनिमयो गोमतीचक्रशिलारूपः वारिविनिमयो गोमतीरूपः मृदो विनिमयो गोपीचंदनरैवतरूपः। विनिमयोत्र प्रशस्तवाची। विगतो निमयो दौर्वर्ण्यं यस्मात्स तथा 'दौर्वर्ण्ये निमयो मते' इति निरुक्तिकारः। रैवतस्तु गौतमात्मजो मेधावी नामापूर्वमपातरतमावमानाच्छ्रीशैलपुत्रतां प्राप्तो नारदोपदेशतो रेवतनृपेण द्वारिकायामानीतस्तेन नाम्नैव ख्यातस्तदुक्तं द्वारकाखंडे 'सोभूद्रेवतनाम्नापि राजन् रैवतकाचलः। हरिभक्तः शैलमुख्यो द्वारकायां विराजते॥ तस्य दर्शनमात्रेण ब्रह्महत्या प्रमुच्यते॥' इति। गोपीचंदनाविर्भावोऽनुपदमेव वक्ष्यते, गोमती भगवन्नेत्रजलोद्भूता नदी। तदुक्तं 'एकदा रेवतं भक्तं प्रेमानंदसमाकुलम्। प्रेक्ष्य स्वं दर्शनं दत्त्वा हरिरश्रुमुखोभवत्॥ तन्नेत्रबिंदुसम्भूता गोमती सा महानदी। तस्या दर्शनमात्रेण मुच्यते ब्रह्महत्यया॥' इति। तत्रैव चक्रशिलाः संति। तदुक्तम् 'गोमत्यां चक्रतीर्थे तु पाषाणनिचयाश्च ये। ते सर्वे चक्रतां याताः पूजनीयाः प्रयत्नतः॥' इति चक्रतीर्थादिमाहात्म्यादि द्वारकाखण्डे श्रीनारदेन बहुलाश्वायोक्तं बहु। यतो यत्रादेरपत्यमाद्यस्तस्याद्यस्य श्रीप्रद्युम्नादेर्जन्माविर्भावोभूत्। एतच्चाग्रे श्रीदशमे स्फुटीभविष्यति। किंच यतो यस्य क्षेत्रस्यान्वयात्संबंधादितरतः पश्वादिरपि अर्थेषु धर्मादिष्वभिज्ञोर्थान्तरश्च स्वराट् विष्णुरूपो भवति। तदुक्तं नारदेन 'आप्रभासात्तीर्थमयी मर्यादीकृत्य यज्ञकम्। भूमिर्मोक्षप्रदा राजन्द्वारका योजनैः शतम्॥ द्वारकां नगरीं दृष्ट्वा नरो नारायणो भवेत्। द्वारकायां मृतः कोपि गर्दभोपि चतुर्भुजः॥ पश्यन्शृण्वन् कथां तस्या द्वारकेति वदन् क्वचित्। नरः पुण्यमवाप्नोति शतयज्ञाधिकं फलम्॥' इति। यद्ब्रह्म यस्य महत्त्वं कवये विवेकिने बहुलाश्वाय हृदा प्रीत्या अस्य वासुदेवस्यायं प्रिय आयो नारदः। अत्र ण्यप्रत्यये 'लोपाद्वृद्धिर्बलीयसी'ति न्यायाद् वृद्धिरेव न लोप इति ध्येयम्। किंभूतं ब्रह्म आदि सनातनं प्राक्तनैर्ब्रह्मादिभिर्वर्णितं यद्यस्मिन् ब्रह्मणि द्वारकाक्षेत्रमहत्त्वे सूरयो विद्वांसोऽपि वैष्णवा मुह्यंति। तन्न मन्यंत इति भावः। किंभूतं क्षेत्रं स्वेन निजेन धाम्नाश्रयेण श्रीसुदर्शनरूपेण सदा नित्यं सत्यम्। द्वारका हि शर्यातिपुत्रायानर्त्ताय पित्रा निष्कासिताय निजभक्ताय वैकुण्ठात्समुत्पाट्य शतयोजनमिता सुदर्शनचक्रे संस्थाप्य दत्ता समुद्रे स्थापिता च। सा च नित्या प्रलयेपि तस्या अनाशात्। 'द्वारका मत्पुरी नित्या सदा वैकुण्ठरूपिणी। नश्यति प्रलये नैव ह्युत्पत्तौ जायते नहि॥' इति सर्वं द्वारकामाहात्म्ये उक्तम्। तत्रत्यवाक्यनिचयस्तु विस्तरभियेह नोक्तः। पुनः निरस्ताः कुहकाः शाल्वप्रभृतयो मायिनो यत्र तन्निरस्तकुहकम्। एतच्चाग्रे स्फुटीभविष्यति। पुनः परं सर्वोत्कृष्टम्। तदुक्तं 'यथा तिथीनां हरिवासरं च यथा हि शेषः फणिनां फणींद्रः। यथा गरुत्मान् दिवि पक्षिणां च यथेतिहासेषु च भारतश्च॥ यथा हि देवेषु च देवदेवः श्रीवासुदेवो यदुदेवदेवः। तथा पुरी क्षेत्रसमस्तमध्ये द्वारावती

पुण्यवती प्रशस्ता ॥ यत्रैव साक्षात्पुरुषः परेश्वरो धृत्वा चतुर्व्यूहमलं विराजते। शृणोति ना तत्र कलौ जलध्वनिं कृष्णोक्तमित्थं सततं दिने दिने ॥ अवेदविद्यो यदि वा सविद्यो यो ब्राह्मणो वै सतु मामकी तनुः ॥' इति द्वारिकाक्षेत्रपक्षः ॥ ५६ ॥

अथ गोपीचंदनपक्षं प्रसंगादाह ॥ वयं तद्गोपीचंदनं सदा हृदा धीमहि। तत्किं यत्र त्रयाणां पापहानिपुण्योत्पत्तिभागवतत्वाप्तिलक्षणानां सर्गोऽमृषा। 'गोपीचंदनसंसर्गात्पापहानिर्भवेन्नृणाम्। तथा भागवतत्वाप्तिर्महापुण्यौघसंभवः ॥' इत्यादि द्वारकामाहात्म्ये ज्ञेयम्। कथं यथा तेजोवारिमृदामविनिमयोऽमृषा सत्यः। यतो यस्यान्वयात्सम्बंधात् जन्मन आद्यं कारणं जन्माद्यं तस्याभिज्ञो ज्ञाता भवेत्। पूर्वजन्मकृतकर्मज्ञानी स्यादित्यर्थः। एतच्च पाद्मीयश्रीमद्भागवतप्रतिस्कंधमाहात्म्येपु सप्तममाहात्म्ये स्फुटम्। तथाहि कश्चित्सौवीरेशः प्रतीपाख्यो नृपो वेश्योक्त्या स्वभार्याद्वयं हत्वा राज्यपदे वेश्यया सहास। तत्रातीवलोकैर्गर्हितो नृपो वेश्यया सह देशांतरं गत्वा मृतो मार्जारत्वमाप। वेश्यागृहे सा च किराती बभूव। कदाचित्पुण्ययोगतस्तस्या गोपीचंदनसंसर्गो जातस्तेन पूर्वकृतकर्मस्मृतिर्जाता। तदनु सा काशीं प्राप्य मार्जारेण सह मोक्षमापेति। च पुनः यतो यस्यान्वयादितरत इतरोपि स्वराट् मोक्षभाक् स्यात्। 'इतरः पापकर्त्तरी'ति कोशात् महापाप्यपि स्वराट्। 'ब्रह्मघ्नो वा कृतघ्नो वा गोघ्नश्च गुरुतल्पगः। गोपीचंदनसंसर्गान्मुक्तिभागी भवेन्नरः ॥' इति स्मृतेः। गोपिका नामसंरक्षणी लोकस्य नरकान्मृत्योर्भयाच्च संरक्षणी चंदनं तुष्टिकरणं च किं तुष्टिकरणं ब्रह्मानंदमृत्तिका 'यस्या धारणमात्रेण ब्रह्मलोके महीयते' इति। गोप्यो नाम विष्णुपत्न्यस्तासां चंदनमाह्लादनं कश्चाह्लाद एष ब्रह्मानंदरूपकः, विष्णुपत्न्यो गोप्यो नाम जगत्सृष्टिस्थित्यंतकारिण्यः प्रकृतिमहदहमाद्याः कश्च विष्णुः परब्रह्मैव विष्णुः कश्चाह्लादो गोपिचंदनं संसक्तमानुषाणां पापसंहारो यच्छुद्धांतःकरणानां ब्रह्मज्ञानप्राप्तिश्च गोपीत्यग्रे उच्यतां चन्दनन्तु ततः पश्चात् गोपीत्यक्षरद्वयं चंदनं तु त्र्यक्षरं तस्मादक्षरपंचकम्। एवं विद्वान् गोपीचंदनं धारयेदक्षय्यं पदमाप्नोति पश्चत्वं न स पश्यति ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इत्यादिश्रुतय आथर्वणे। किञ्च यतो यस्य ब्रह्म कोर्थः महत्त्वं स्वराट सर्वेश्वरो विष्णुरादिकवये नारदाय तेने प्रतस्तार। देहलीदीपकन्यायेन स्वराट्पदस्योभयत्रान्वयः। ब्रह्मपदं भावप्रधानम्। यद्वा 'यत्तत्पदमनुत्तममि'ति सहस्रनामसु यच्छब्दोपि भगवत्परो दृश्यतेऽतः हृदाय इत्यत्रोक्तयच्छब्दवाच्यो विष्णुरादिकवये इत्यनेन सम्बध्यते। ततो न्यायाश्रयोपि न कार्यः। तदाह श्रुतिः 'नमस्कृत्य भगवंतं नारदः सर्वेश्वरं वासुदेवं पप्रच्छ श्रीभगवन्नूर्ध्वपुंड्रकविधिं द्रव्यमंत्रस्थानादिसहितं मे ब्रूहीति तं होवाच भगवान्वासुदेवो वैकुण्ठस्थानोद्भवं मम प्रीतिकरं मद्भक्तैर्ब्रह्मादिभिधारितं विष्णुचंदनं वैकुण्ठस्थानादाहृत्य द्वारकायां मया प्रतिष्ठितं चन्दनकुंकुमादिसहितं विष्णुचन्दनं ममांगे प्रतिदिनमालिप्तं गोपीभिः प्रक्षालनाद्गोपीचन्दनमाख्यातं मदंगलेपनेन पुण्यं तीर्थांतःस्थितं चक्रसमायुक्तं पीतवर्णं मुक्तिसाधनं भवती'त्याद्या। यस्मिन् गोपीचन्दने सूरयोप्यापाततः शास्त्रज्ञा अपि मृत्सामान्यबुद्ध्या मुह्यंति जन्मान्तरीयकृतपापवशेन श्रुतिस्मृतिस्तुत्यमपि निंदन्तीति भावः। किंभूतं स्वेन धाम्ना स्थित्या निरस्ताः कुहकाः यमभटा येन। तथा 'गोपीचन्दनलिप्तांगं नरं दृष्ट्वा यमानुगाः। दूरादेव पलायंते नात्र कार्या विचारणा ॥' इति पाद्मे। पुनःसत्यं विष्णुरूपत्वात्तदुक्तम्। गोपीचंदनखंडं तु चक्राकारं सुलक्षणम्। विष्णुरूपमिदं सत्यं पावनं पीतवर्णकम् ॥' इति। पुनः परं सर्वोत्कृष्टतापादकम्। तदुक्तं श्रुतौ 'गोपीचंदनलिप्तांगं पुरुषं य उपासते। एवं ब्रह्मादयो देवाः संमुखास्तानुपासते ॥' इति गारुडेपि नारदेनोक्तम् 'यो मृत्तिकां द्वारवतीसमुद्भवां करे समादाय ललाटपट्टे। करोति नित्यं त्वथ चोर्ध्वपुंड्रं क्रियाफलं कोटिगुणं सदा भवेत् ॥ क्रियाविहीनं यदि मंत्रहीनं श्रद्धाविहीनं यदि कालवर्जितम्। कृत्वा ललाटे यदि गोपिचंदनं प्राप्नोति तत्कर्मफलं सदाक्षयम् ॥ गोपीचंदनसंभवं सुरुचिरं पुंड्रं ललाटे द्विजो नित्यं धारयते यदि प्रतिदिनं रात्रौ दिवा सर्वदा। यत्पुण्यं कुरुजांगले रविग्रहे माघप्रयागे तथा तत्प्राप्नोति खगेंद्र विष्णुसदने संतिष्ठते देववत् ॥ यस्मिन्गृहे तिष्ठति गोपिचंदनं भक्त्या ललाटे मनुजो बिभर्ति च। तस्मिन् गृहे तिष्ठति सर्वदा हरिः श्रियान्वितः कंसनिहा विहंगम ॥ यो धारयेद्विष्णुपुरीसमुद्भवं सदा पवित्रं कलिकल्मषापहम्। नित्यं ललाटे हरिमंत्रसंयुतं यमं न पश्येद्यदि पापसंवृतः ॥ यस्यांतकाले खग गोपिचंदनं बाह्वोर्ललाटे हृदि मस्तके च। प्रयाति लोके कमलालया प्रभोर्विमानयानो यदि ब्रह्महा स्यात् ॥ ग्रहा न पीडंति न रक्षसां गणा यक्षाः पिशाचोरगभूतदानवाः। ललाटपट्टे खग गोपिचंदनं संतिष्ठते यस्य हरेः प्रसादम्।' इति। 'अंबरीष महाघस्य क्षयार्थं कुरु वीक्षणम्। ललाटे यैः कृतं नित्यं गोपीचंदनपुंड्रकम् ॥' इति गौतमोक्तिः। पाद्मे 'धारयेद्विष्णुनिर्माल्यं धूपशेषं विलेपनम्। वैष्णवं कारयेत्पुण्ड्रं गोपीचंदनसंभवम् ॥' इति। शिवोक्तेः। 'ऊर्ध्वपुंड्रमृजु सौम्यं ललाटे यस्य दृश्यते। स चांडालोपि शुद्धात्मा पूज्य एव न संशयः ॥' इति वाक्येन श्रीगोपीचंदनधारणस्यावश्यकत्वं विहितं न तु चांडालस्य तद्धारणं विधीयते। 'सदाचारः शुभाकल्पो मिताहारो जितेंद्रियः। गोपीचन्दनलिप्तांगः साक्षाद् ब्रह्ममयो भवेत् ॥ गोपीचंदनलिप्तांगकृतं व्रतजपादिकम्। न्यूनं संपूर्णतां याति तद्दानं बहुपुण्यदम् ॥' इति वैष्णवाद्यौ। अथास्य धारणमाथर्वणोपनिषदि अथ गोपीचंदनं नमस्कृत्योद्धृत्य 'गोपीचंदन पापघ्न विष्णुदेहसमुद्भव। चक्रांकित नमस्तुभ्यं धारणान्मुक्तिदो भवे'ति प्रार्थना। 'इमं मे गंगे' इति जलमादाय 'विष्णोर्नुकमि'ति मर्दयेत्। 'अतो देवा अवंतु न' इत्येताभिर्ऋग्भिर्विष्णुगायत्र्या च त्रिवारमभिमंत्र्य 'शंखचक्रगदापाणे द्वारकानिलयाच्युत। गोविंद पुंडरीकाक्ष

रक्ष मां शरणागतमि'ति मां ध्यात्वा गृहस्थो ललाटादिद्वादशस्थलेष्वनामिकयांगुल्या विष्णुगायत्र्या केशवादिद्वादशनामभिर्वा धारयेत्। 'ललाटे केशवं ध्यायेन्नारायणमथोदरे। वक्षःस्थले माधवं तु गोविंदं कंठकूपके॥ विष्णुं च दक्षिणे कुक्षौ बाहौ च मधुसूदनम्। त्रिविक्रमं कंधरे तु वामनं वामपार्श्वके॥ श्रीधरं वामबाहौ तु हृषीकेशं तु कंधरे। पृष्ठे तु पद्मनाभं च कट्यां दामोदरं न्यसेत्।' इति भक्तिरसामृते। यतिस्तर्जन्या शिरोललाटहृदयेषु प्रणवेन धारयेत्। ब्रह्मादयस्त्रयो मूर्तीस्तिस्रो व्याहृतयस्त्रीणि छंदांसि त्रयो वेदास्त्रयः स्वरास्त्रयोग्नयो ज्योतिष्मंतस्तिस्रोवस्थास्त्रय आत्मनस्त्रय ऊर्ध्वा अकारोकारमकारा एते सर्वे प्रणवमयोर्ध्वपुंड्रत्रयात्मकास्तदोमित्येकं समभवत्। परमहंसो ललाटे प्रणवेनैकमूर्ध्वपुंड्रं वा धारयेत्तत्र दीपप्रकाशं स्वात्मानं ब्रह्मैवाहमस्मीति भावयन्योगी मत्सायुज्यमाप्नोति। अथान्यो हृदयस्योर्ध्वपुंड्रं मध्ये हृदयकमलमध्ये वा स्वमात्मानं भावयेदिति तद्धारणम्। इति गोपीचंदनपक्षः॥ ५७॥

अथोर्ध्वपुंड्रपक्षः॥ वयं सदा हृदा तदूर्ध्वपुंड्रं धीमहि। तत्किं यत्र त्रयाणां भगवत्प्रियत्वशुभत्वरक्षात्वानां सर्गोऽमृषा सत्यः। तदुक्तं हरिणा पाद्मे 'मत्प्रियार्थं शुभार्थं वा रक्षार्थं चतुरानन। मत्पूजाहोमकाले च सायं प्रातः समाहितः॥ मद्भक्तो धारयेन्नित्यमूर्ध्वपुंड्रं भयापहम्।' इति। यतो यस्मान्वयादितरत इतरजातिजोपि स्वराट् मल्लोकगः स्यात्। 'ऊर्ध्वपुंड्रधरो मर्त्यो म्रियते यदि कुत्रचित्। श्वपाकोपि विमानस्थो मम लोके महीयते॥' किंच यतो यस्मान्वयादर्थेषु धर्मादिष्वाद्यस्य धर्मस्य जन्म भवति तद्वते नेत्यर्थः। 'यज्ञो दानं तपो होमः स्वाध्यायः पितृतर्पणम्। व्यर्थं भवति तत्सर्वमूर्ध्वपुंड्रं विना कृतमि'ति हेमाद्रिः। 'ऊर्ध्वपुंड्रं शिखाबन्धमुपवीतं विना कृतम्। अपवित्रकृतं कर्म तत्सर्वं निष्फलं भवेत्॥' इति यमस्मृतेः॥ ऊर्ध्वपुंड्रस्वरूपमप्याथर्वणे उक्तम्। पुंड्रं हरिपदाकृतीतति ईशानलिंगवदिति भगवत्पूज्यपादाः। संहितायां तु 'नासाद्यौत्केशपर्यंतं सच्छिद्रं सोर्ध्वपुंड्रकमि'त्युक्तं, तदेव प्राक्तनमन्यानि तु कल्पितान्येवेति प्रतिभाति। 'तत्रोर्ध्वपुंड्रं कुर्वीत वंशपत्राकृतिं नरः' इति शैवेपि। यत्त्वाश्वलायनेनोक्तं 'प्राक् पिंडदानाद्र्ध्वार्यैर्नालं कुर्यात्स्वविग्रहमि'ति तत्तु गंधादिकैर्निषेधो न जलादिना। 'श्रौतं स्मार्तं च कुर्वीत कृत्वा तोयोर्ध्वपुंड्रकम्। यामैकमात्रतः पश्चाद् अन्यत्कुर्याद्यथोचितमि'ति कौशिकोक्तेः। भृगुरपि 'अभावे तूदकेनैव पुंड्री दैवतमर्चयेदि'ति। 'देवानां पितरो देवा' इति स्मृतेः पितॄणामपि दैवतत्वमस्त्येव। भृगुणा पुंड्रीत्युक्तं तेन त्रिपुंड्री कुर्यादिति न भ्रेयम्। 'ऊर्ध्वं च तिलकं कुर्यान्न कुर्याद्वै त्रिपुंड्रकम्। निराशाः पितरो यांति दृष्ट्वा विप्रं त्रिपुंड्रकमि'ति बृहत्पाराशरोक्तेः। केचित्तु विप्रमेव त्रिपुंड्रधारिणं भोजनार्थमागतं वर्ज्यमाहुरिति। किंच यतोऽभिज्ञः स्यात्। 'नित्योर्ध्वपुंड्रधारी तु ज्ञानवान् जायते ध्रुवमि'त्युक्तेः। य इति पदं लिंगव्यत्यासेन योज्यम्। यदूर्ध्वपुंड्रं आदिकवये नारदाय ब्रह्म ज्ञानं तेने। 'ऊर्ध्वपुंड्रं धरन् ब्रह्म प्राप्तवान्नारदो मुनिरि'ति विष्णुधर्मे। यस्मिन्नूर्ध्वपुंड्रे सूरयो विद्वांसोपि शैवशाक्तादयो मुह्यंति। 'तिर्यक्त्रिपुंड्रं मुक्त्वैकं पुरुषार्थैकभाजनम्। पुंड्रांतरं भ्रमाद्वापि वैदिको नैव धारयेदि'ति। 'पुंड्रांतरं कदाचिद्वाप्यश्रौतं धारयेद् द्विजः। वैदिको यदि मोहेन पतत्येव न संशयः॥' इत्यादिकल्पितवाक्यैर्निन्दां कुर्वंति न त्वेतदश्रौतं श्रुतिविहितत्वात्। तथा च श्रुतिः 'धृतोर्ध्वपुंड्रः परमेशितारं नारायणं सांख्ययोगाभिगम्यम्। ज्ञात्वा विमुच्येत नरः समस्तैः संसारपाशैरिह च समस्तैरि'ति महोपनिषदि। कठशाखायां च 'धृतोर्ध्वपुंड्रः श्रितचक्रधारी विष्णुं परं ध्यायति यो महात्मा। स्वरेण मंत्रेण सदा हृदिस्थितं परात्परं यो महतो महांतमि'ति। हरेः पादाकृतिमात्मनो हिताय मध्ये छिद्रमूर्ध्वपुंड्रं यो धारयति परस्य पुंसः प्रियो भवति स पुण्यवान्समुक्तिमान्भवतीत्याथर्वणे। किंभूतं स्वेन धाम्ना प्रकाशेन निरस्तः कुहकः सर्वपापलक्षणयो येन तत्तथा। 'ऊर्ध्वपुंड्रभृतेः सर्वपापहानिः प्रजायते' इति ब्रह्मांडे। पुनः सत्यं सत्यरूपहरेः प्रापकम्। 'यावज्जीवमिदं पुण्यमूर्ध्वपुंड्रं दधाति यः। जन्मन्यनंतरे मुक्तिं सद्यः प्राप्नोति दुर्लभामि'ति। पुनः परं देववंद्यत्वापादकम्। 'ऊर्ध्वपुंड्रधरो मर्त्यस्त्रिदशैरपि वंद्यते।' इत्यूर्ध्वपुंड्रपक्षः॥ ५८॥

अथ कांचीक्षेत्रमाह। प्रसंगागतगोपीचन्दनोर्ध्वपुंड्रपक्षौ निरूप्येति। वयं तत्कांचीक्षेत्रं सदा हृदा धीमहि। तत्किं यत्र त्रयाणां पातकोपपातकमहापातकानां सर्गः स्थितिर्मृषा। 'कांच्यां पुर्यां निवसतां नश्यंति त्रिविधान्यपि। पातकानि न संदेहः शिवविष्णवलोकनादि'ति तन्माहात्म्ये। कथं यथा तेजोवारिमृदां विनिमयोमृषा। यतो यस्मिन् क्षेत्रे स्वराट् विष्णुः आद्यस्य वेदस्य अर्थेषु सर्वपदवाच्येष्वभिज्ञश्शिवश्च जन्माविर्भावमन्वयात्। इतरतः इतरेपि देवाः जन्माविर्भावमन्वयुः। 'स्वराट्विष्णुर्महादेवः सर्वेशो यज्ञपूरुषः।' इति कोशांतरात्स्वराट् विष्णुः। 'शब्दजातमशेषं हि धत्ते मुग्धेंदुशेखरः।' इति मल्लिनाथोक्तेरर्थेष्वभिज्ञः शिव एवेति भावः। 'शिवो विष्णुश्च सततं पुर्यां कांच्यां वितिष्ठतः। अन्येऽखिला देवगणास्तत्र संति न संशयः॥' इति तन्माहात्म्योक्तेः। यः स्वराट् आदिकवये ब्रह्मणे ब्रह्म तेने यः शिव आदिकवये नारदायादि ब्रह्म तेने 'नारदाय प्रवोचंतं वृष्यां ब्रह्मसनातनमि'ति वक्ष्यमाणत्वात्। यस्मिन्ब्रह्मणो सूरयो विद्वांसोपि मुह्यंति। किंभूतं स्वेन धाम्नाश्रयेण शिवेन विष्णुना वा निरस्ताः कुहकाः पापसमूहा येन तत्तथा। 'तत्क्षेत्रस्याधिपौ देवौ दर्शनात्पापहौ नृणाम्। विष्णुपिनाकिनावीशौ कावेरीतटसंस्थितावि'त्यपि तन्माहात्म्ये। पुनः किंभूतं सत्यं मोक्षं पिपर्ति पालयति पूरयति ददाति स्वसेविनामिति सत्यंपरम्। पिपर्तेः खप्रत्ययः। 'शिवकांची विष्णुकांची मोक्षदात्री स्वसेविनामि'ति च। इति कांचीक्षेत्रपक्षः॥ ५९॥

अथावंतिकापक्षः॥ वयं तदवंतिकाक्षेत्रं सदा हृदा धीमहि। तत्किं यत्र त्रयाणां शिप्रागंधवतीमहाकालेश्वराणां सर्गः स्थितिरमृषा। 'शिप्रा सर्वाघहा गंगा तथा गंधवती सरित्। महाकालेश्वरो देवोवन्तिकायां सदास्थिताः॥ दर्शनस्पर्शनस्नानैर्नृणां भवविमो-

चकाः ॥' इति विशालामाहात्म्योक्तेः । कथं यथा तेजोवारिमृदामविनिमयः स्वरूपावस्थानममृषेति । किञ्च यतः सकाशादाद्यस्य वेदस्य जन्म स स्वराट् कृष्णः इतरो बलोपि यत्रान्वयात् जगाम । किं कर्तुं आदिकवये आदिकविं वेदमध्येतुम् । तुमोऽप्रयुक्तस्येति चतुर्थी । आदौ सृष्ट्यादौ कौति परभक्तिरूपं शब्दं करोति 'जयजयजह्यजामि'त्यादिलक्षणमित्यादिकविर्वेदस्तस्मै । किंभूतं स्वराट् इतरश्च अर्थेषु सर्वपदार्थेष्वभिज्ञः उभावेवार्थाभिज्ञौ लोकसंग्रहार्थमवन्तिकां गत्वा सांदीपिनेर्गुरोस्सकाशात्पेठतुः । तद्वक्ष्यति श्रीदशमे 'प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ । नान्यसिद्धामलं ज्ञानं गूहमानौ नरेहितैः ॥ अथो गुरुकुले वासमिच्छन्तावुपजग्मतुः । काश्यं सांदीपिनिं नाम ह्यवंतीपुरवासिनम् ॥ अथोपसाद्य तौ दांतौ गुरुवृत्तिमनिंदिताम् । ग्राहयन्तावुपेतौ स्म भक्त्या देवमिवादृतौ ॥' इति । यः सांदीपिनिः स्वराडितराभ्यां कृष्णबलदेवाभ्यां ब्रह्म तेने । 'तयोर्द्विजवरस्तुष्टश्शुद्धभावानुवृत्तिभिः । प्रोवाच वेदानिखिलान्सांगोपनिषदो गुरुः ॥ सरहस्यं धनुर्वेदं धर्मान्न्यायपथांस्तथा । तथा चान्वीक्षिकीं विद्यां राजनीतिञ्च षड्विधाम् ॥' यच्छब्देन सांदीपिनिबोधस्तु त्वदादीनां बुद्धिस्थपरामर्शकत्वमिति भाष्यात् । यस्मिन्ब्रह्मणि सूरयो विद्वांसो ब्रह्मादयोपि मुह्यन्ति । किंभूतं क्षेत्रं स्वेन धाम्नाश्रयेण महाकालेश्वरेण परं सर्वोत्कृष्टं सर्वपापहरम् । तदुक्तं स्कान्दे 'नभसि तारकालिङ्गं पाताले हाटकेश्वरम् । मर्त्यलोके महाकालं दृष्ट्वा पापैः प्रमुच्यते ॥' इति । पुनः किंभूतं सत्यं सत्यरूपमोक्षदत्वात् सप्तपुरीषु गणितत्वेन । तदुक्तम् 'अयोध्या मथुरा माया काशी कांची ह्यवन्तिका । द्वारावती पुरी ज्ञेयाः सप्तैता मोक्षदायिकाः ॥' इति ॥ इत्यवन्तिकापक्षः ॥ ६० ॥

अथ पुरुषोत्तमक्षेत्रपक्षः ॥ वयं तत्पुरुषोत्तमक्षेत्रं सदा हृदा धीमहि । तत्किं यत्र त्रयाणामुत्तममध्यमाधमानां सर्गो मृषा । एकत्र भोजित्वात् । 'ब्रह्मक्षत्रविशां चैव शूद्राणामितरस्य च । भोजनादौ न सम्भेदः सर्वे विप्रस्वरूपिणः ॥ पुरुषोत्तमक्षेत्रे तु नीलाद्रौ जागदीशके ॥' इति तन्माहात्म्ये । कथं यथा तेजोवारिमृदां विनिमयो मृषा । यतो यस्मिन् क्षेत्रे आद्यस्य जगदीशसंज्ञकस्य विष्णोर्जन्म शालिग्रामरूपेण जन्माविर्भावोभूत् । इतरत इतरयोः सुभद्राबलदेवयोश्च जन्माभूत् । तथा चर्ग्वेदीयोत्क्रमणप्रकरणे 'यत्र देवो जगन्नाथो दक्षिणस्य महोदधेः । बलभद्रः सुभद्रा च तत्र मामस्मृतं कृधी'त्युक्तमपि । तेन श्रौतमिदं क्षेत्रमेतत्पाद्मे स्पष्टम् । यदा इतरतः इतरोपि जनः यतो यत्राद्यस्यात्तुं योग्यस्य श्रीजगन्नाथनैवेद्यस्यान्वयादर्थेष्वभिज्ञश्च स्यात् । 'जगन्नाथान्नशेषं तु भक्त्वा ज्ञानी भवेद् ध्रुवमि'त्यादिमाहात्म्ये । यत्क्षेत्रं स्वराट् स्वेशकृतप्रकाशमिति भावः । यस्मिन् क्षेत्रे ये सूरयो भगवत्प्रमादमाहात्म्याभिज्ञास्ते न मुह्यन्ति । इ इति आश्चर्ये । किं कर्तुं आदिकवये आदिकविं श्रीजगन्नाथं द्रष्टुम् । किंभूतं स्वेन धाम्ना प्रभावेण परं परत्वापादकम् । परत्वं ब्राह्मणत्वम् । तदुक्तं 'जगन्नाथमुखं दृष्ट्वा पद्मनाभं जनार्दनम् । कोटिजन्मसु विप्रः स्याद्धनाढ्यो वेदपारगः ॥' इति जगन्नाथमाहात्म्ये । ब्राह्मणानां परत्वमाह 'ब्राह्मण्यं दुर्लभं लोके सुकृतैर्विविधैरपि । न यज्ञदानैर्न तपोभिरुग्रैर्न पुण्यसंघैरपरैरपीष्टैः । अस्मादृशो भूपतयोर्थवन्तो न ते लभन्तेऽवनिदैवतत्वम् ॥' इति । किञ्च 'निगमो धर्मशास्त्रं च यदाधारे प्रवर्त्तते । विप्रास्ते वैष्णवी मूर्तिः पावनी परमा मता ॥ सर्वं शुभं जगति धर्मतरावलभ्यं तस्य प्रमा निगमतो नृपधर्मशास्त्रात् । नूनं तयोरपि गतिर्भुवि भूमिदेवास्तैरर्चितैरिह जगत्पतिरर्चितः स्यात् ॥ न यज्ञयोगैर्न तपोभिरन्यैर्न योगयुक्त्या न समर्चनेन । तथा विभुस्तुष्यति देवदेवो यथा महीदैवततोषणेन ॥' इति पातालखण्डेम्बरीषोक्तेः । किञ्च नारदेनापि सत्यभामादत्तो विष्णुर्यदा मे जन्म तदा ब्राह्मणस्यैव नान्यस्येति कृष्णं प्रार्थ्य ततस्तदङ्गीकारमित्येवमुक्तोऽतोपि ज्ञायते ब्राह्मणमहत्त्वमिति हरिवंशे स्पष्टम् । पुनः सत्यं सत्यमूर्त्तेर्विष्णोरधिकरणत्वात् । पुनः ब्रह्म बृहत् । 'जगन्नाथपुरादन्यत्क्षेत्रं भूमौ बृहन्नहि । यत्र गत्वान्नमास्वाद्य वैकुण्ठस्य प्रियो भवेदि'ति । किञ्च 'क्षेत्रं महानसं सर्वपूतं वंद्यं सदामरैः । यत्र गत्वेतरो मर्त्यो विप्ररूपो भवेद् ध्रुवम् ॥ स्पृश्यास्पृश्यविचारस्तु तत्र कार्यो न वै क्वचित् ।' इत्यलम् । विशेषस्तु तन्माहात्म्ये द्रष्टव्यः । इति पुरुषोत्तमक्षेत्रपक्षः ॥ ६१ ॥

अथ प्रसङ्गागतं भगवन्नैवेद्यपक्षमाह । वयं तद्भगवन्नैवेद्यं सदा हृदा धीमहि । तत्किं यत्र त्रयाणां पितृदेवमनुष्याणां सर्गस्तदशनानिश्रयोऽमृषा । तथा च श्रुतिः 'एक एवाग्रे नारायण आसीन्न ब्रह्मा नेमे द्यावापृथिव्यौ सर्वे देवाः सर्वे पितरः सर्वे मनुष्या विष्णुनाशितमश्नन्ति विष्णुनाघ्रातं जिघ्रन्ति विष्णुना पीतं पिबन्ति तस्माद्विद्वांसो विष्णूपहृतं भक्षयेयुरि'ति । कथं यथा तेजोवारिमृदामविनिमयोऽमृषा । यतो यस्यान्वयात्पुमान् अर्थेषु वांछितेष्वभिज्ञो भवति तॉल्लभते इत्यर्थः । तदुक्तं 'तुलसीदललग्नं हि प्रसादान्नं हरेर्नरः । यो भक्षयति राजेन्द्र लभते चिन्तितं हि सः ॥' इति ब्रह्माण्डे । यन्नैवेद्यमितरत इतरदेवनैवेद्यभ्यः स्वराट् बहुफलम् । तदुक्तं 'भुक्त्वान्यदेवनैवेद्यं नरश्चांद्रायणं चरेत् । भुक्त्वा केशवनैवेद्यं कोटियज्ञफलं लभेदि'ति पाद्मे । किञ्च 'विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम् । पितृभ्यश्चापि तद्देयं तदानन्त्याय कल्पते ॥' इति स्कान्दे । 'भक्ष्यं भोज्यं च यत्किञ्चिदनिवेद्याग्रभोक्तरि । न देयं पितृदेवेभ्यः प्रायश्चित्ती यतो भवेत् ॥ सर्गादौ कल्पितो देवैरग्रभुग्भगवान् हरिः । यज्ञभागभुजो देवास्ततस्तेनैव कल्पिताः ॥ तेनानिवेदितं विष्णोर्न गृह्णन्ति दिवौकसः । व्यतिक्रमभयात्सर्वस्वामिनो जगदीशितुः ॥ स्वाद्यंयुश्च पितरो भृत्या इन्द्रादयः सुराः । अतस्तद्भुक्तशेषं तु हरेर्ब्रह्मादिमद्गुरोरि'ति विष्णुरहस्ये । नारदीये तु 'पितृशेषं तु यो दद्याद्धरये परमात्मने । रेतोधाः पितरस्तस्य भवन्ति क्लेशभागिनः ॥' इति । किंभूतस्य यत आद्यस्यात्तुं विधेयस्य । तदुक्तं

'पादोदकं पिबेन्नित्यं नैवेद्यं भक्षयेद्यतः। शेषं च मस्तके धार्यमिति वेदानुशासनम्॥' इति गारुडे। 'पत्रं पुष्पं फलं तोयं वान्नपानाद्यमौषधम्। अनिवेद्य न भुञ्जीत यदाहाराय कल्पितम्॥ अनिवेद्य तु भुञ्जानः प्रायश्चित्ती भवेन्नरः। तस्मात्सर्वं निवेद्यैव विष्णोर्भुंजीत नान्यथा॥' इति पाद्मे। यस्मिन्नैवेद्ये ये सूरयस्ते न मुह्यन्ति। इ इति वितर्के। अन्ये तु शाक्तादयो मुह्यंत्येव, तत्राभक्ष्यबुद्धिं कुर्वन्ति। 'विष्णोर्नाम न गृह्णीयान्न स्पृशेत्तुलसीदलम्। तन्नैवेद्यं न चाश्नीयान्न च पादोदकं पिबेदि'त्यादिवाक्यानि वदन्तीति भावः। 'महाप्रसादे गोविन्दे नाम ब्रह्मणि वैष्णवे। स्वल्पपुण्यवतां राजन्विश्वासो नैव जायते॥' इति विष्णुधर्मोक्तेश्च। किं कर्तुमादिकवये आदिकविं प्राप्तुम्। 'यो नैवेद्यं हरेर्भुंक्ते स विष्णुं लभते परमि'ति विष्णुधर्मे। किंभूतं स्वेन धाम्ना प्रभावेण निरस्तः कुहको भक्ष्याभक्ष्यविचारो यस्मिन्। ब्रह्मांडपुराणे उक्तमपि 'नैवेद्यं जगदीशस्य ह्यन्नपानादिकं च यत्। भक्ष्याभक्ष्यविचारस्तु नास्ति तद्भक्षणे द्विजाः॥' कौर्मेऽपि 'कुक्कुरस्य मुखाद् भ्रष्टं मदन्नं यदि लभ्यते। भागवतः कुत्रचिद्भक्ष्यमिन्द्रादीनां तु दुर्लभमि'ति। पुनः किंभूतं नैवेद्यं ब्रह्म ब्रह्मवत्। तदुक्तं 'ब्रह्मवन्निर्विकारं हि यथा विष्णुस्तथैव तत्। विचारं ये प्रकुर्वन्ति ते नश्यन्ति नराधमाः॥' इति वाराहे। नैवेद्यं प्रकृत्योक्तं ब्रह्मार्पणं ब्रह्महविरिति गीतोपनिषदि। पुनः किंभूतं सत्यं सद्रूपं विष्णुरूपत्वात्तदुक्तमेव। पुनः परं सर्वव्रतादिभ्य उत्कृष्टफलदम्। 'षड्भिर्मासोपवासैस्तु यत्फलं परिकीर्तितम्। विष्णोर्नैवेद्यसिक्थेन तत्फलं भुंजतां कलौ॥' किंच 'नैवेद्यमन्नं तुलसीविमिश्रं विशेषतः पादजलेन सिक्तम्। योऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यमि'ति स्कान्दे। 'मुकुन्दाशनशेषं तु यो भुंक्ते हि दिने दिने। सिक्थे सिक्थे भवेत्पुण्यं चान्द्रायणशताधिकम्॥' इत्यलं प्रपञ्चेन॥ इति भगवन्नैवेद्यपक्षः॥ ६२॥

अथ विष्णुचरणामृतपक्षमाह। वयं तद्धरिपादोदकं सदा हृदा धीमहि। तत्किं यत्र त्रयाणां भूतभाविवर्तमानपापानां सर्गो मृषा। 'भूतं भाव्यं वर्तमानं पापं नश्यति तत्क्षणात्। हरेः पादामृतं पीत्वा सत्यं सत्यं न संशयः॥' इति भक्तिचन्द्रोदये। कथं यथा तेजोवारिमृदां विनिमयः यतो यस्यान्वयात्सेवनादर्थेष्वाद्यस्य धर्मस्य जन्म। 'विष्णोः पादोदकं पीत्वा सर्वधर्मफलं लभेदि'ति। स्कांदाद्युक्तेः। किंच यतः इतरतः प्राकृतोपि जनः स्वराट् भवति। 'शालिग्रामशिलातोयं यः पिबेद्बिंदुना समम्। मातुः स्तन्यं पुनर्नैव स भवेन्मुक्तिभाङ् नर' इति पाद्मे। स्कांदे 'स्नानपादोदकं विष्णोः पिबन् शिरसि धारयन्। सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति॥' किंच 'छिन्नस्तेन महासेन गर्भवासो हि दारुणः। पीतं येन सकृद्भक्त्या श्रीकृष्णचरणोदकमि'ति। योऽभिज्ञः विवेकी अर्थाच्छिवस्तच्चरणोदकं आदिकवये कार्तिकेयाय ब्रह्म तद्रूपं तेने प्रकाशितवान्। 'गांगं पादोदकं विष्णोर्नार्मदं यामुनं तथा। तद् ब्रह्मरूपं सततं वारि नैवामृतं हि तत्॥ कार्तिकेय महाभाग तत्पानाद्गर्भवेद्धि सः॥' इति। 'सर्वागमप्रणेता च वांछितार्थप्रदायकः॥' इति प्रज्ञावर्द्धनस्तोत्रे कार्त्तिकेयस्य सर्वागमप्रणेतृत्वेन कवित्वं निश्चितमेव। यस्मिन्पादोदके सूरयो विद्वांसोपि नास्तिकाभासा मुह्यंति। किंभूतं स्वेन धाम्ना प्रतापेन निरस्तः कुहकोऽपावित्र्यलक्षणो येन तत्तथा। 'आशौचं नैव विद्येत सूतके मृतकेपि वा। येषां पादोदकं मूर्ध्नि श्रीकृष्णस्य पतेद्यदि॥ सुलभं किं न सेवेत हरेः पादोदकं शुभम्। यस्य संस्पर्शमात्रेण पूतो भवति मानवः॥' इति ब्रह्मांडे। पुनः सत्यं ब्रह्मरूपत्वात्। पुनः परमुत्कृष्टतरं सर्वपावनेभ्यः। तदुक्तं 'यानि कानि च तीर्थानि ब्रह्मांडांतर्गतानि च। विष्णुपादोदकस्यैव कलां नार्हंति षोडशीमि'ति गारुडे। प्रसंगात्पादोदकस्वरूपमाह 'चंदनं तुलसी विप्रः शंखो घंटांबुचक्रकम्। शिला ताम्रस्य पात्रं तु विष्णोः सूक्तं पदामृतमि'ति। पाद्मे अथान्यदाह 'बल्यादिभ्यो ह्यदत्वाथ करणे पिबते यदि। हरिपादोदकं नित्यं सुरां पिबति स ध्रुवमि'त्याचारार्के। बल्यादयस्तु 'बलिर्विभीषणो भीष्मः प्रह्लादो नारदोर्जुनः। षडेते वैष्णवा नित्यं गृह्णंतु चरणोदकमि'ति स्मृतिसंग्रहे। गारुडेपि 'विष्णुपादोदकं पीतं कोटिजन्माघनाशकम्। पात्रांतरेण तद्ग्राह्यं करेण सुरया समम्॥' इति 'विष्णोः पादोदकं पीतं महापातकनाशनम्। महापातकदं तद्धि भूमौ बिंदुनिपातनादि'ति स्कांदे। तद्ग्रहणमन्त्रश्च 'अकालमृत्युहरणं सर्वव्याधिविनाशनम्। विष्णुपादोदकं पीत्वा शिरसा धारयाम्यहमि'ति। 'विष्णुपादोदकं मूढो ह्यपीत्वा यस्तु मस्तके। प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते॥' इति। पाद्मेपि 'ये पिबंति नरा नित्यं शालिग्रामशिलाजलम्। पञ्चगव्यसहस्रैस्तु प्राशितैः किं प्रयोजनमि'ति। 'अयमेव परो धर्मस्त्विदमेव परं तपः। इदमेव परं तीर्थं विष्णुपादांबु संपिबेदि'ति। स्कांदे तु स्पष्टमेव परत्वं प्रतिपादितम्। इति विष्णुपादोदकपक्षः॥ ६३॥

अथ तुलसीतरुपक्षमाह॥ वयं तं तुलसीतरुं सदा हृदा धीमहि। तं कं यत्र यस्मिन् रोपिते त्रयाणां कायिकवाचिकमानसिकपापानामध्यात्मादितापत्रयाणां वा सर्ग उत्पत्तिर्मृषा। तदुक्तं 'आरोपिते तरौ तापं पापञ्च त्रिविधं तथा। तुलस्या नाशमायाति तदुत्पत्तिः पुनर्नही'ति तुलसीमाहात्म्ये। 'रोपणात्पालनात्सेकात्स्पर्शनाद्दर्शनान्नृणाम्। तुलसी दहते पापं वाङ्मनःकायसंचितम्॥' इति पाद्मेपि। यद्वा यत्र त्रयाणां पत्रपुष्पकाष्ठादीनां सर्गोऽमृषैव। ब्रह्मरूपत्वादस्य 'तुलसीतरुरूपेण साक्षाद्ब्रह्मैव वर्तते। प्रतीतिः पत्रपुष्पादेर्माययैव न चान्यथे'ति स्कांदपाद्मयोः। गौतमीतंत्रेपि तस्या ब्रह्मरूपत्वमुक्तं 'यज्ञोपवीतवद्धार्या तुलसीमालिका सदा। नाशौचं धारणे तस्या यतः सा ब्रह्मरूपिणी'ति। यद्वा त्रयाणां वेदानां देवानामग्नीनां वा तिसृणां सन्ध्यानां सर्गो यत्रामृषा सत्यः सर्गः। स्थितिस्तदुक्तं पाद्मे 'त्रयो वेदास्त्रयो देवास्तिस्रः सन्ध्यास्त्रयोऽग्नयः। तुलसीवृक्षमासाद्य सदा तिष्ठंति सत्तमे'ति। कथं यथा तेजोवारिमृदां विनिमयो अविनिमयो वा यतो यस्यास्तुलस्या आद्यस्य श्रीहरेरर्चनाय जन्माविर्भावः,

अर्चनायेति शेषः। 'विष्णोराराधनार्थाय वृंन्दे जातासि शोभने' इति वृन्दां प्रति गोपिकोक्तेः। च पुनः यो वृन्दातरुरितरत इतरवृक्षेभ्यः स्वराट् प्रशस्ततरो बहुलप्रदत्वात्। तदुक्तं पाद्मे 'आम्रारोपसहस्रेण पिप्पलानां शतेन च। यत्फलं हि तदेकेन तुलसीविटपेन त्वि'ति। यद्वा इतरपुष्पेभ्यः स्वराट् बहुफलम्। 'मणिकांचनपुष्पाणि तथा मुक्तामयानि च। तुलसीपत्रदानस्य कलां नार्हन्ति षोडशीमि'ति। वक्ष्यत्यपि 'मन्दारकुन्दकुरबोत्पलचम्पकार्णपुन्नागनागबकुलांबुजपारिजाताः। गन्धेऽर्चिते तुलसिकाभरणेन तस्या यस्मिंस्तपः सुमनसो बहु मानयन्ती'ति। किंच यतो यस्यान्वयाद्दर्शनादिसंबन्धात्पुमानर्थेष्वनेकेष्वभिज्ञो भवति। तदुक्तं 'या दृष्टा निखिलाघसंघशमनी स्पृष्टा वपुः पावनी रोगाणामभिवंदिता निरसनी सिक्तांतकत्रासिनी। प्रत्यासन्नविधायिनी भगवतः कृष्णस्य संरोपिता न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः॥'' इत्येकादशीमाहात्म्योक्तेः। यस्तुलसीतरुरादिकवये नारदाय ब्रह्म ज्ञानं तेने। 'प्राप्तो ज्ञानं परं वृंदासेवनान्नारदो मुनिरि'त्यादिपुराणात्। यद्यपि वृंदया देवतारूपेण नारदाय ज्ञानं दत्तं तथापि सैव देवता तरुरूपा बभूवेति न दोषः। यस्मिन् वृंदातरौ सूरयोपि यथाकथंचिद्वाममार्गगा 'न स्पृशेत्तुलसीदलमि'त्यादिमोहं प्राप्नुवंति। किंभूतं स्वेन तेजसा यद्वा धाम्नाश्रयेण हरिणा निरस्ताः कुहका यमकिंकरा येन तम्। तदुक्तम् 'तुलसीकाननं वैश्य गृहे यस्यावतिष्ठते। तद्गृहं तीर्थभूतं हि नो यांति यमकिंकराः॥' इति देवदूतविकुंडलसंवादोक्तेः। पुनः सत्यं सत्यरूपविष्णुरूपत्वात्। अमृतिजन्मवत्त्वात्। 'आविर्भावतिरभावौ तुलस्याः स्तो न संशयः।' इति तन्माहात्म्योक्तेः। पुनः परं सर्वसुगंधिद्रव्येभ्य उत्कृष्टम्। 'कर्पूरं रोचनं दिव्यपाटीरमलयोद्भवम्। मृगनाभिसमुद्भूतं यदन्यद्गंधवद्वसु॥ न तथा तैर्हरिर्विप्र मोदते वृन्दया यथे'ति। किञ्च 'तावद्गर्जन्ति पुष्पाणि मालत्यादीनि भूसुर। यावन्न प्राप्यते पुण्या तुलसी विष्णुवल्लभे'ति स्कांदोक्तेश्च। अथ प्रसंगादन्यदपि तन्महत्त्वमाह 'तुलसीदललग्नेन चंदनेन जनार्दनम्। विलेपयति यो नित्यं लभते चिंतितं फलमि'ति गारुडे। तत्रैव तच्चंदनमहत्त्वं नारदेनोक्तम् 'यो ददाति हरेर्नित्यं तुलसीकाष्ठचंदनम्। युगानि वसते स्वर्गे ह्यनंतानि नरोत्तमः॥ महाविष्णोः कलौ भक्त्या दत्त्वा तुलसिचंदनम्। योर्चयेन्मालतीपुष्पैर्न भूयः स्तनपो भवेत्॥ सर्वेषामेव देवानां तुलसीकाष्ठचंदनम्। पितृणां च विशेषेण सदाभीष्टं हरेर्यथा॥ मृत्युकाले तु संप्राप्ते तुलसीतरुचंदनम्। लिप्यते यस्य देहे स हरिर्भूत्वा हरिं व्रजेत्। तावन्मलयजं विष्णोर्भाति कृष्णागुरुर्नृप। यावन्न दृश्यते पुण्यं तुलसीकाष्ठचंदनम्॥ तावत्कस्तूरिकामोदं कर्पूरस्य सुगंधता। यावन्न दीयते विष्णोस्तुलसीकाष्ठचन्दनम्॥ कलौ यच्छंति ये विष्णोस्तुलसीकाष्ठचंदनम्। धुंधुमार न वै मर्त्याः पुनरायांति ते भुवम्॥ यो हि भागवतो भूत्वा कलौ तुलसिचंदनम्। नार्पयीत सदा विष्णोर्न स भागवतो नरः॥ हरेर्मलयजं श्रेष्ठं तदभावेऽमरदारुजमि'ति। प्रह्लादसंहितायांतु 'तुलसीकाष्ठमाहात्म्यं कथयामि बले शृणु। यच्छ्रुत्वा मुच्यते पापात् कृताज्जन्मशतैरपि॥ पत्रं पुष्पं फलं मूलं शाखा काष्ठादिकं च यत्। तुलसीसंभवं सर्वं पावनं मृत्तिकादिकम्॥ शरीरं दह्यते येषां तुलसीकाष्ठवह्निना। न तेषां पुनरावृत्तिर्विष्णुलोकात्कथंचन॥ ग्रस्तो यदि महापापैरगम्यागमनादिकैः। मृतः शुद्ध्यति दाहेन तुलसीकाष्ठवह्निना॥ दत्त्वा तु तुलसीकाष्ठं सर्वांगेषु मृतस्य च। पश्चाद्यः कुरुते दाहं सोपि पापात्प्रमुच्यते॥ तीर्थं यदि न संप्राप्तं कीर्त्तनं स्मरणं हरेः। तुलसीकाष्ठदग्धस्य न तस्य पुनरागतिः॥ यद्येकं तुलसीकाष्ठं मध्ये काष्ठशतस्य च। दाहकाले भवेन्मुक्तिः पापकोटियुतस्य च॥ गंगांभसाभिषेकेण यांति तोयानि पुण्यताम्। तुलसीकाष्ठमिश्राणि यांति दारूणि पुण्यताम्॥ तुलसीकाष्ठदग्धस्य पुनर्जन्म न विद्यते। कृष्णरूपवपुर्भूत्वा कल्पानि वसते दिवि॥ तुलसीकाष्ठसंमिश्रा मृतस्य ज्वलते चिता। दह्यंते तस्य पापानि कल्पकोटिकृतानि च॥ दह्यमानं नरं दृष्ट्वा तुलसीकाष्ठवह्निना। विमानस्थाः सुरगणाः क्षिपंति कुसुमांजलीन्॥ नृत्यंत्यप्सरसः प्रीता गीतं कुर्वंति गायकाः। कुरुते वीक्षणं विष्णुः संतुष्टः शम्भुना सह॥ गृहीत्वा तं करे सौरिः स्वपुरे तस्य चाग्रतः। मार्जते तस्य पापानि पश्यतां त्रिदिवौकसाम्॥ महोत्सवं कारयित्वा जयशब्दपुरःसरम्। ज्वलते तत्र दैत्येंद्र तुलसीकाष्ठसंभवम्॥ अग्न्यगारे श्मशाने च दह्यते पातकं नृणाम्। होमं कुर्वंति ये विप्रास्तुलसीकाष्ठवह्निना॥ शतक्रतुसमं पुण्यं गोशतं लभते फलम्। नैवेद्यं पचते यस्तु तुलसीकाष्ठवह्निना॥ मेरुतुल्यं भवेद्दत्तं तदन्नं केशवस्य हि। तुलसीपावके योऽपि दीपकं कुरुते हरेः॥ दीपलक्षसहस्राणां पुण्यं भवति दैत्यराट्। न तेन सदृशो लोके वैष्णवो भुवि दृश्यते॥ तुलसीदारुजातेन चंदनेन कलौ नरः। विलिप्य भक्तितो विष्णुं रमते सन्निधौ हरेः॥ तुलसीचंदनाद्यागः कुरुते विष्णुपूजनम्। पूजाशतं दिनैकेन लभते शतवार्षिकम्॥ विलेपनार्थं कृष्णस्य तुलसीकाष्ठचंदनम्। मंदिरे तिष्ठते यावत्तावत्पुण्यफलं शृणु॥ तिलप्रस्थाष्टकं दत्त्वा यत्पुण्यं चोत्तरायणे। तत्पुण्यं जायते पुंसां प्रसादाच्चक्रपाणिनः॥ यो ददाति पितॄणां च तुलसीकाष्ठचंदनम्। पितॄणां जायते तृप्तिः श्राद्धकाले शताधिका॥' नारदीयेपि 'यथा विष्णोः सदाभीष्टं नैवेद्यं शालिसंभवम्। शुकेनोक्तं पुराणं च तथा तुलसिचंदनम्॥' पाद्मे 'तावद्वर्षसहस्राणि यावद्बीजदलानि च। वसंति वैष्णवे लोके तुलसीं रोपयंति ये॥ तुलसीगन्धमाघ्राय पितरस्तुष्टमानसाः। प्रयांति गरुडारूढा स्तद्विष्णोः परमं पदम्॥ दर्शनं नर्मदायास्तु गङ्गास्नानं विशांवर। तुलसीदलसंस्पर्शः सममेतत्त्रयं स्मृतम्॥ पक्षे पक्षे तु संप्राप्ते तुलसीवनपूजनम्। ब्रह्मादयोपि कुर्वंति द्वादश्यां वैश्यसत्तम॥ यन्मूले सर्वतीर्थानि यन्मध्ये सर्वदेवताः। यदग्रे चतुरो वेदास्तुलसि ते

१. तत्सहवासात्पार्षदो भूत्वेत्यर्थः।

नमो नमः ॥ पुष्करादीनि तीर्थानि गंगाद्याः सरितस्तथा । वासुदेवादयो देवा वसंति तुलसीदले ॥ श्रवणं कीर्तनं ध्यानं स्मरणं जलसेचनम् । प्राशनं वीक्षणं पूजाष्टधा तुलसिसेवनम् ॥ तुलसीं प्राप्य यो नित्यं न करोति ममार्चनम् । तस्याहं प्रतिगृह्णामि न पूजां शतवार्षिकीम् ॥ गारुडे । 'कृतं येन महाभाग तुलसीवनरोपणम् । मुक्तिस्तेन भवेद्दत्ता प्राणिनां विनतासुत ॥' स्कांदे तु 'तुलसीवनजा छाया यत्र यत्र भवेद् द्विज । तत्र श्राद्धं प्रदातव्यं गयाश्राद्धफलाधिकम् ॥ न ददाति गयां गत्वा पिण्डं पुत्रो यदा मुने । तुलसीकानने श्राद्धं कृत्वा संतारयेत्पितॄन् ॥ पितृपिंडार्चनं श्राद्धं यत्कृतं तुलसीदलैः । तृप्यंति पितरोत्यर्थं यावच्चंद्रार्कमेदिनी ॥ तुलसीकानने जंतोर्यदि मृत्युर्भवेत्क्वचित् । सन्निधौ पद्मनाभस्य स यात्यत्र न संशयः ॥ रोपिता तुलसी यावत्कुरुते मूलविस्तरम् । तावद्युगसहस्राणि तनोति सुकृतं मुने ॥' स्कांदे 'तुलसीं विना या क्रियते न पूजास्नानं न यत्तत्तुलसीं विना कृतम् । भुक्तं न तद्यत्तुलसीविवर्जितं पीतं न तद्यत्तुलसीविवर्जितम् ॥ यः कृत्वा तुलसीपत्रं शिरसा विष्णुतत्परः । करोति धर्मकार्याणि फलमाप्नोति चाक्षयम् ॥ तुलसीं ये प्रयच्छंति पुराणाद्यर्चनाय च । रोपयंति शुचौ देशे तेषां लोकोक्षयः स्मृतः ॥ रोपितां तुलसीं दृष्ट्वा नरेण भुवि भूमिप । विवर्णवदनो भूत्वा तत्पापं मार्जयेद्यमः ॥ तुलसीतिच यो ब्रूयात्त्रिकालं वंदयेद्यदि । नित्यं स गोसहस्रस्य फलमाप्नोति मानवः ॥ नित्यं समर्चयेद्विष्णुं तुलस्या यस्तु भक्तितः । महापापानि नश्यंति किंपुनश्चोपपातकम् ॥ गृहं नरः सदा यस्तु तुलसीदलविप्रुषैः । त्रिसंध्यं प्रोक्षयेद्भक्त्या महापापात्प्रमुच्यते ॥ घटैर्यंत्रघटीभिश्च सिक्तं तुलसिकावनम् । जलधाराप्रवाहेण प्रीणितं भुवनत्रयम् ॥ त्यक्त्वापि मालतीपुष्पं पुष्पं चापि सरोरुहम् । गृह्णाति तुलसीं शुद्धामपि पर्युषितां हरिः ॥' व्यासः 'पक्वं हि तुलसीपत्रं शुष्कं पर्युषितं च यत् । आनीय तत्प्रयत्नेन पूजयेत्पुरुषोत्तमम् ॥ किंच 'तुलसीकाष्ठजं यस्तु चंदनं धारयेन्नरः । तद्देहं न स्पृशेत्पापं क्रियमाणमपीह यत् ॥ स्कांदे तु तन्मालाधारणमुक्तम् । 'न जह्यात्तुलसीमालां धात्रीमालां विशेषतः । महापातकसंहर्त्रीं धर्मकामार्थदायिनीम् ॥' विष्णुधर्मेपि विष्णुः 'तुलसीकाष्ठजां मालां कंठस्थां वहते तु यः । अप्यशौचोप्यनाचारो मामेवैति न संशयः ॥ तुलसीकाष्ठसम्भूतां यो मालां वहते नरः । प्रायश्चित्तं न तस्यास्ति नाशौचं तस्य विग्रहे ॥ स्कान्दे 'यस्य कण्ठो विरहितस्तुलसीकाष्ठमालया । तं विलोक्याथवा स्पृष्ट्वा सर्वासां जलमाविशेत् ॥ निवेद्य केशवे मालां तुलसीकाष्ठसम्भवाम् । वहते यो नरो भक्त्या तस्य नैवास्ति पातकम् ॥ शयने भोजने स्नाने मलमूत्रविसर्जने । न त्यजेत्तुलसीमालां कंठलग्नां कदाचन ॥ जपेद्यः पुरुषो नित्यं तुलसीकाष्ठमालया । मन्त्रान्निगमजान्ब्रह्मन्स चानंतफलं लभेत् ॥ तुलसीकाननं यत्र यत्र पद्माकराः शुभाः । वैष्णवा यत्र तिष्ठंति तत्र संनिहितो हरिः ॥ तुलसीदलगंधेन मालतीकुसुमेन च । कपिलाक्षीरदानेन सद्यस्तुष्यति केशवः ॥ गुह्यानि यानि पापानि ह्यनाख्येयानि मानवैः । नाशयेत्तुलसी तानि धृता माधवमूर्द्धनि ॥ उपोष्य द्वादशीं शुद्धां पारणे तुलसीदलम् । प्राशयेद्यस्तु विप्रेंद्र अश्वमेधाष्टकं लभेत् ॥ हंति पातकिनां पापं पुण्यवृद्धिं तथा श्रियम् । करोति पूजिता देवी तुलसी हरिवासरे ॥ द्वादश्यां ये करिष्यंति तुलसीवनपूजनम् । गृहारामे वने वापि शृणु तेषां तु यत्फलम् ॥ प्रयागे तपसि स्नाने काश्यां प्राणविमोक्षणे । यत्फलं विहितं देवैस्तुलसीपूजनेन तत् ॥ चतुरो वार्षिकान्मासांस्तुलस्या नियमेन हि । पूजयेद्यदि वैकुंठं गोसहस्रफलं लभेत् ॥ जगद्धातरि गोविंदे प्रसुप्ते वर्णिना कृते । नमंति तुलसीं नित्यां चांद्रायणशतं फलम् ॥ मासे प्रौष्ठपदे चैव द्वादश्यां बुधवासरे । केशवायतने यस्तु कारयेत्तुलसीवनम् ॥ लभते चाक्षयं स्थानं पितृभिः सह वैष्णवम् । देवालयेषु सर्वेषु पुण्यक्षेत्रेषु यो नरः ॥ वापयेत्तुलसीं पुण्यां तुष्ट्यर्थं चक्रपाणिनः ।' गारुडे नारदः 'तुलसीकानने यस्तु मुहूर्तमपि विश्रमेत् । जन्मकोटिकृतात्पापान्मुच्यते नात्र संशयः ॥ प्रदक्षिणं यः कुरुते पठन्नामसहस्रकम् । तुलसीकानने नित्यं यज्ञायुतफलं लभेत् ॥ अशकुनमरिष्टं च यो नरः पथि पश्यति । मनसा चिंत्य तुलसीं पुनर्गच्छेत तत्पथम् ॥ यदि न प्राप्यते स्वृक्षं शुभलग्नमथापि वा । बलं चंद्रस्य गमने प्रस्थाने तुलसीं स्मरेत् ॥ यः स्मृत्वा तुलसीं याति कार्यं प्रति नरोत्तमः । तस्य कार्यस्य संसिद्धिर्जायते नात्र संशयः ॥ हरेर्मूर्त्यवशेषं च तुलसीकाष्ठचंदनम् । स्वदेहे धारयेद्यस्तु तीर्थकोटिफलं लभेत् ॥ तीर्थाधिकं यज्ञशताच्च पावनं जलं सदा केशवदृष्टिसंस्थितम् । छिनत्ति पापं तुलसीविमिश्रितं विशेषतश्चक्रशिलातलच्युतम् ॥ मुखे तु तुलसीपत्रं दृष्ट्वा शिरसि कर्णयोः । कुरुते भास्करिस्तस्य दुष्कृतस्यापि मार्जनम् ॥ पुनः कृष्णो गरुडम् 'त्रिकालं विनतापुत्र प्राशयेत्तुलसीं तु यः । विशिष्यते कायशुद्धिश्चांद्रायणव्रतं विना ॥' किंच 'चांद्रायणसहस्रस्य पराकाणां शतस्य च । तुल्यं फलमवाप्नोति तुलसीपत्रभक्षणात् ॥ श्रीकृष्णमूर्ध्नि विन्यस्ता तुलसीपत्रमंजरी । सुवर्णपुष्पकोटीनां फलं यच्छेत चाधिकम् ॥ पूजितं तु महेशानं तुलसीदलमालया । यः संपश्यति भूपाल स गोकोटिफलं लभेत् ॥ होमकाले तु संप्राप्ते पूजयज्जातवेदसम् । ददाति वांछितान्कामांस्तुलसीदलपूजितः ॥ मृत्युकाले तु संप्राप्ते भक्षयेत्तुलसीदलम् । निर्वाणं याति पक्षींद्र पापकोटियुतोपि सन् ॥ कृष्णपादाब्जसंलग्नामहोरात्रोषितां शुभाम् । तुलसीं धारयेद्यस्तु तस्य पुण्यमनन्तकम् ॥ इत्युक्त्वा भगवान्विष्णुस्तत्रैवांतरधीयत । यो नरः पठते नित्यं माहात्म्यं तुलसीभवम् ॥ गृहे तिष्ठति राजेन्द्र तस्य श्रीः सर्वतोमुखी । एकादश्यां जागरणे यः पठेत्तुलसीस्तवम् ॥ द्वात्रिंशदपराधांश्च क्षमते तस्य कंसहा ॥' प्रसंगात्तदर्चनमाह 'कृष्णप्रिये प्रियावासे नित्यं श्रीधरसंस्तुते । भक्त्या दत्तं मया देवि अर्घ्यं गृह्ण नमोस्तु ते ॥' पूजामन्त्रः 'निर्मिता त्वं पुरा विप्रैरर्चिता त्वं पुरासुरैः । तुलसी हर मे पापं पूजां गृह्ण नमोस्तु ते ॥' अथ प्रार्थना । 'श्रियं देहि यशो देहि देहि सौख्यं तथा जयम् । बलं पुष्टिं तथा तुष्टिं तुलसि त्वं प्रयच्छ मे ॥' अथ तदवचयमन्त्रः 'तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया । केशवार्थं विचिन्वामि वरदा भव शोभने ॥' गारुडे 'मोक्षैकहेतो

धरणीप्रसूतेर्विष्णोः समस्तस्य गुरोः प्रियासि । आराधनार्थं सुदलैः सुपुष्पैर्लुनामि पत्रं तुलसि प्रसीद ॥' अवचये निषेधमाह 'भृगुभौमार्कवारेषु द्वादश्यां निशि पर्वणि । तुलसीं ये विचिन्वंति ते छिंदन्ति हरेः शिरः ॥' इति । वक्तव्यं चात्र बहुस्तीत्यलं प्रपञ्चेन । इति तुलसीपक्षः ॥ ६४ ॥

अथ शालिग्रामपक्षः ॥ वयं तं शालग्रामं तद्रूपं विष्णुं हृदा धीमहि । तं कं यत्र त्रयाणां लोकानां सर्गः स्थितिरमृषा । तदुक्तं स्कांदे 'शालग्रामशिलायां तु त्रैलोक्यं सचराचरम् । मया सह महासेन लीनं तिष्ठति सर्वदा ॥' कथं यथा तेजोवारिमृदामविनिमयोऽमृषा । किञ्च यतोपि यस्यान्वयात्सेवनादितरतः प्राकृतोपि स्वराट् विष्णुर्भवति । तदुक्तं स्कान्दे 'कामासक्तोपि यो नित्यं भक्तिभावविवर्जितः । शालग्रामशिलां पुत्र संपूज्यैवाच्युतो भवेदि'ति । किञ्च यतो यस्य शालिग्रामस्य ब्रह्म महत्त्वं योर्थेष्वभिज्ञः शिवः सोप्यादिकवये कार्तिकेयाय तेने । तच्च महत्त्वमनुपदमेव वक्ष्यामः । किञ्च यतो यत्राद्यस्य सर्वादिकारणस्य विष्णोः सदा जन्माविर्भावः । 'शालग्रामशिलाचक्रं द्वारिकायां समुद्भवम् । कलिकालेपि भो पार्थ न जहाति जनार्दनः ॥' इति जैमिनीये नारदोक्तेः । 'श्रीकृष्णस्य सदा विप्राः शालिग्रामेष्ववस्थितिः । आविर्भावो हरेस्तत्र सेवनाज्जायते भृशमि'ति पुराणांतराच्च । 'शालिग्रामार्चनेनैव ह्यावाहनविसर्जने । शालिग्रामे तु भगवानाविर्भूतः सदा हरिः ॥ न तथान्यत्र सूर्यादौ वैकुण्ठेपि च सर्वगः ॥' इति स्कान्दोक्तेश्च । यस्मिन् शालिग्रामे सूरयोपि मुह्यन्ति पाषाणसामान्यदृष्टया नास्तिकादयो मोहं प्राप्नुवन्ति चैतन्यरूपत्वाद्धरेर्न पाषाणे हरिरस्ति जडत्वादित्यादि तर्कयन्तीति भावः । किंभूतं स्वेन धाम्ना प्रतापेनार्चकानां निरस्ताः कुहकाः पापसमूहा येन स तथा तम् । 'नश्यन्त्याशु पापपुंजाः शालग्रामशिलार्चनादि' त्यादिपुराणात् । पुनः सत्यं सत्यस्वरूपहरेरधिष्ठानत्वात् । तदुक्तं पाद्मे 'शालिग्रामशिलाचक्रं वज्रकीटविनिर्मितम् । अधिष्ठानं हि तद्विष्णोः सर्वपापप्रणाशनमि'ति । भगवद्रूपत्वाद्वा सत्यम् । 'द्वे रूपे देवदेवस्य चरं चाचरमेव च । चरं संन्यासिनं प्राहुरचरं चक्रचिह्नितमि'ति जैमिनीयोक्तेः । पुनः परं सर्वाधिष्ठानेभ्य उत्कृष्टम् । 'पूजास्थानानि सर्वाणि सूर्यादीनि तथा नहि । प्रियाणि मम राजेन्द्र शालग्रामाभिधं यथे' त्यादिपुराणात् । प्रसंगात्तन्महत्त्वान्याह 'यः पूजयेद्धरिं चक्रे शालग्रामसमुद्भवे । राजसूयसहस्रेण तेनेष्टं प्रतिवासरम् ॥ महत्काष्ठस्थितो वह्निर्मथनेन प्रकाशते । यथा तथा हरिर्व्यापी शिलाग्रामे प्रकाशते ॥ अग्निहोत्रं हुतं तेन दत्ता पृथ्वी ससागरा । येनार्चितो हरिश्चक्रे शालग्रामसमुद्भवे ॥ शिला द्वादश भो वैश्य शालग्रामसमुद्भवाः । विधिवत्पूजिता येन तस्य पुण्यं वदामि ते ॥ कोटिद्वादशभिर्लिंगैः पूजितैः स्वर्णपङ्कजैः । यत्स्याद् द्वादश कल्पेषु दिनेनैकेन तद्भवेत् ॥ यः पुनः पूजयेद्भक्त्या शालग्रामशिलाशतम् । उषित्वा स हरेर्लोके चक्रवर्तीच्छया भवेत् ॥ कामैः क्रोधैर्मदैर्लोभैर्व्याप्तो यो हि नराधमः । सोपि याति हरेर्लोकं शालग्रामशिलार्चनात् ॥ यः पूजयति गोविन्दं शालग्रामे सदा नरः । आभूतसंप्लवं यावन्न दिवः प्रच्युतो भवेत् ॥ विना यज्ञैर्विना तीर्थैर्विना दानैर्विना मतिम् । मुक्तिं याति नरो वैश्य शालग्रामशिलार्चनात् ॥ नरकं गर्भवासं च तिर्यक्त्वं कृमियोनिताम् । न याति वैश्य पापोपि शालग्रामेच्युतार्चकः ॥ दीक्षाविधानमन्त्रज्ञश्चक्रे यो बलिमाहरेत् । स याति वैष्णवे लोके सत्यं सत्यं मयोदितम् ॥ नैवेद्यैर्विविधैः पुष्पैर्धूपैर्दीपैर्विलेपनैः । गीतवादित्रस्तोत्राद्यैः शालग्रामशिलार्चनम् ॥ कुरुते मानवो यस्तु कलौ भक्तिपरायणः । कल्पकोटिसहस्राणि रमते हरिसन्निधौ ॥ लिंगैस्तु कोटिभिर्दृष्टैर्यत्फलं पूजितैः स्तुतैः । शालिग्रामशिलायास्तु एकेनापीह तत्फलम् ॥ सकृदभ्यर्चिते लिंगे शालग्रामसमुद्भवे । मुक्तिं प्रयान्ति मनुजा नूनं सांख्येन वर्जिताः ॥ शालग्रामशिलारूपी यत्र तिष्ठति केशवः । तत्र देवासुरा यक्षा भुवनानि चतुर्दश ॥ शालग्रामशिलाग्रे तु यः श्राद्धं कुरुते नरः । पितरस्तस्य तुष्यन्ति तृप्ताः कल्पशतं दिवि ॥ शालग्रामशिला यत्र तत्तीर्थं योजनत्रयम् ॥ तत्र दानं तपो होमः सर्वं कोटिगुणं भवेत् ॥ शालग्रामसमीपे तु क्रोशमात्रं समंततः । कीटकोपि मृतो याति वैकुण्ठभवनं खलु ॥ शालग्रामशिलां यस्तु गले बध्वा विपद्यते । स कीकटेष्वपि मृतो याति वैकुण्ठमन्दिरम् ॥ शालग्रामशिलाचक्रं यो दद्याद्दानमुत्तमम् । भूचक्रं तेन दत्तं स्यात्सशैलवनकाननम् ॥ इति पाद्मे । यः कथां कुरुते विष्णोः शालग्रामशिलाग्रतः । वेदशास्त्रपुराणानां फलं प्राप्य हरिं व्रजेत् ॥ सकृत्करोति मनुजः शालग्रामशिलार्चनम् । पापानि तस्य नश्यन्ति तमः सूर्योदये यथा ॥ कामासक्तोथवा क्रुद्धः शालग्रामशिलार्चनम् । भक्त्या वा यदि वाभक्त्या कृत्वा मुक्तिमवाप्नुयात् ॥ शालग्रामोद्भवं देवं शैलं चक्रादिमण्डितम् । यत्र क नीयते पुत्र तत्क्षेत्रं योजनत्रयम् ॥ वाराणस्यास्तदधिकं जायते नात्र संशयः । मद्भक्तिबलदर्पिष्ठा मत्प्रभुं न नमन्ति ये ॥ वासुदेवं न ते ज्ञेया मद्भक्ताः पापिनो हि ते । पद्मकोटिसहस्रैस्तु पूजितैर्न्यत्र यत्फलम् ॥ तत्फलं कोटिगुणितं शालिग्रामशिलार्चनम् । शालिग्रामशिलायां तु यः करोति ममार्चनम् ॥ तेनार्चितः कार्तिकेय युगानामेकविंशतिः । किमर्चितैर्लिंगशतैर्विष्णुभक्तिविवर्जितैः ॥ शालग्रामशिलाबिम्बं नार्चितं यदि पुत्रक । अनर्हं मम नैवेद्यं पत्रं पुष्पं फलं जलम् ॥ शालग्रामशिलालग्नं सर्वं याति पवित्रताम् । मद्भक्तैर्मनुजैस्तस्मात्प्रीत्यर्थं मम पुत्रक ॥ कर्तव्यं सततं नूनं शालग्रामशिलार्चनम् । शालिग्रामे नमस्कारः शाठ्येनापीह यैः कृतः ॥ मां नत्वा किं करिष्यन्ति मद्भक्तास्ते नरा भुवि । शालग्रामशिला यत्र तत्राहं विष्णुना सह ॥ परं मूर्खा न जानन्ति कलौ मायाविमोहिताः । पुण्यबाह्यास्तु ते ज्ञेया ये द्विषन्ति जनार्दनम् ॥ पूजां तेषां न गृह्णामि ये न भक्ता महीधरे । धन्यास्ते पुरुषा लोके शालग्रामशिलां कलौ ॥ येर्चयन्ति महात्मानः षडानन तवाधिकाः । शालग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते ॥ महापूजां तु कृत्वादौ पूजयेत्तां तथा बुधः । स्निग्धा कृष्णा पांडुरा च पीता नीला तथैव च ॥ रक्ता सूक्ष्मा च वक्रा च

महास्थूला च लाञ्छिता। कपिला कर्बुरा लग्ना रूक्षा छिद्रा कुलाचया॥ रेखाकुला स्थिरा स्थूला बहुचक्रैकचक्रिका। बृहन्मुखी बृहच्चक्रा लग्नचक्राथ वा पुनः॥ वृद्धचक्राथवा या स्याद्भग्नचक्रा त्वधोमुखी। भग्ना सुरक्ता सा पूज्या भीषणा भग्नचक्रिका॥ पूजयेद्यः प्रमादेन दुःखमेव लभेत्सदा। स्निग्धा सिद्धिकरी ज्ञेया कृष्णा कीर्तिं ददाति च॥ पांडुरा पापदहनी पीता पुत्रफलप्रदा। नीला संदिशते लक्ष्मीं रक्ता रोगप्रदायिका॥ रूक्षोद्वेगकरा नित्यं वक्रा दारिद्र्यदा मता। स्थूलानि हन्ति चैवायुर्निष्फला स्यादलांछिता॥' इति। 'कामार्चने फलं चैतन्निष्कामस्याखिलाः शुभाः। खण्डितं स्फुटितं भग्नं पार्श्वभिन्नं विभेदितम्॥ शालग्रामसमुद्भूतं शैलं दोषावहं नहि।' वाराहेतु 'गृहे लिंगद्वयं नार्च्यं शालग्रामद्वयं तथा। द्वे चक्रे द्वारिकायास्तु नार्च्ये सूर्यद्वयं तथा॥ शक्तित्रयं तथा नार्च्यं गणेशत्रयमेव च। द्वौ शङ्खौ नार्चयेच्चैव भग्नां च प्रतिमां तथा॥ नार्चयेच्च तथा मत्स्य-कूर्मादिदशकं तथा। एतेषां पूजनान्नित्यमुद्वेगं प्राप्नुयाद् गृही॥ शालग्रामाः समाः पूज्या समेषु द्वितयं नहि। विषमा नैव पूज्यास्तु विषमेष्वेकपूजनम्॥' पाद्मेतु 'शालग्रामाः समाः पूज्या विषमा न कदाचन। समेषु न द्वयं पूज्यं विषमेषु त्रयं नही'त्युक्तम्। शालग्रामशिला भग्ना पूजनीया सचक्रका। दद्याद्भक्ताय यो देवि शालग्रामशिलां नरः॥ सुवर्णसहितां दिव्यां पृथ्वीदानफलं लभेत्। यः पुनः पूजयेद्भक्त्या शालग्रामशिलाशतम्॥ तत्फलं नैव शक्तोहं वक्तुं वर्षशतैरपि। शालग्रामशिलां योषिच्छूद्रो वा न स्पृशेत्कचित्॥ दूरादेवास्प्रशन्पूजां कारयेत्सुसमाहितः। म्लेच्छदेशेऽशुचौ वापि चक्रांको यत्र तिष्ठति॥ योजनानि तथा त्रीणि मम क्षेत्रं वसुन्धरे। क्रयक्रीता मध्यमा स्यादधमा याचिता मता॥ पारम्पर्यागता श्रेष्ठा गुरुदत्ता च तत्समा। चतस्रो यत्र दृश्यन्ते रेखाः पार्श्वे समीपगाः॥ द्वे चक्रे मध्यदेशे तु सा शिला स्याच्चतुर्मुखी। तत्राप्यामलकीतुल्या सूक्ष्मा चैव तु या भवेत्॥ तस्यामेव सदा ब्रह्मन् श्रिया सह वसाम्यहम्॥ यथा यथा शिला सूक्ष्मा तथा तस्या महत्फलम्। तस्मात्तां पूजयेन्नित्यं धर्मकामार्थ-सिद्धये।' जैमिनीये तु 'शालिग्रामशिलास्पर्शं ये कुर्वन्ति दिने दिने। तैर्दत्तं चाक्षयं भूरि पितृविप्रदिवौकसाम्॥ शालग्रामसमीपे तु यः श्राद्धं कुरुते नरः। नित्यं नैमित्तिकं चापि गयाश्राद्धसमं भवेत्॥ शालग्रामसमीपे तु भक्त्या पुस्तकवाचनम्। करोति हृष्टमनसा स पुनाति बहून् जनान्॥ शालग्रामशिला यस्य नित्यं तिष्ठति वेश्मनि। तत्र सर्वाणि तीर्थानि सन्ति नित्यं सुरा मखाः॥ नारायणसमो बन्धुर्न तिथिर्द्वादशीसमा। विष्णुपादोदकैस्तुल्यं न तीर्थं भुवनत्रये॥' पाद्मे 'शालिग्रामशिलायां यो मौल्यमुद्घाटयेन्नरः। विक्रेता चानुमन्ता च यः परीक्षां तु कारयेत्॥ सर्वे ते नरकं यांति यावदाभूतसंप्लवम्। अतः संवर्जये-द्विप्रस्तस्यास्तु क्रयविक्रयमि'ति। 'शालिग्रामशिला विप्र पूजनीया द्विजातिभिः। स्त्रीशूद्रकरसंस्पर्शे वज्रपातसमो हरेः॥ शालग्रामशिलास्पर्शाच्छूद्रश्चांडालतां व्रजेदि'त्यादिपुराणे। अथ शालिग्रामाविर्भावमाह। 'सर्वेषां चैव लोकानां हिताय तपतो हरेः। गण्डस्थलादंबुधारा ह्याविर्भूता तयाथ सः॥ प्रार्थितः सुंदराङ्गस्त्वं मे पुत्रो भवेति वै। एतदर्थं तपस्तप्तं तया वै जलधारया॥ ततः प्रसन्नो भगवानाह तां ते सुतोऽनघे। भवामि च शालग्रामपाषाणप्रतिरूपतः॥ गंडस्थलोद्भव-त्वाच्च त्वं जाता गण्डकी नदी। शालग्रामो गिरिस्तत्र तच्च्युता ये त्वथोपलाः॥ सर्वे ते विष्णुरूपा हि वज्रकीटविनिर्मिताः। ग्राहायोत्सृष्टचक्रेण लांछिताश्चक्रिणोऽभवन्॥ शालोपलक्षितो ग्रामः शालिनैवोपलक्षितः। यत्र कुंडसमीपेस्ति शालग्रामस्तदुद्भवः॥' इति वाराहे। अत्र बहु वक्तव्यमस्तीत्यलं प्रपंचेन। इति शालग्रामपक्षः॥ ६५॥

अथ बदरिकाक्षेत्रपक्षः॥ वयं तद्बदरीक्षेत्रं सदा धीमहि। तत्किं यत्र तिसृणां भागीरथ्यलकनंदामंदाकिनीनां सर्गोऽमृषा। कथं यथा तेजोवारिमृदामविनिमयोऽमृषा। "भागीरथ्यलकनंदा तथा मंदाकिनी सरित्। विलसंति सदा देव देशे केदारसंज्ञके॥ केदारक्षेत्रमेवाहुर्बदरीक्षेत्रमुज्ज्वलम्। यो ना तत्र समागच्छेत्स न भूयोभिजायते॥" इति तन्माहात्म्ये। यद्वा त्रिभ्यः कायिकादि-पापेभ्यः सर्गो निर्मोक्षो यत्रामृषा। 'कायस्थं मानसं गीर्जं पापं नश्यति सर्वथा। यद्दर्शनात्प्रणश्येत्तां बदरीं को न चाश्रयेत्॥' इत्यपि तत्रैव। किञ्च यतो यस्यान्वयात्सेवनात्पुमान्स्वराट् विष्णुरभिन्नः शिवश्च स्यात्। 'ज्ञानमिच्छेन्महेश्वरादि'ति स्मृतेश्शिव एवाभिन्नः। किञ्च यत्रास्य विष्णोरितरत इतरस्य मन्मथारेः शिवस्य च सदा जन्माविर्भावोस्ति। 'यत्र साक्षान्महादेवोवसत्ते च महामते। श्रीविष्णुश्च महाभाग नरनारायणस्तथा॥ सदान्यैर्दैवतैः सार्द्धमि'ति केदारखंडोक्तेः। यो देश आदिकवये नारदा-दिरूपाय ब्रह्म ज्ञानं तेने। केन स्वेन धाम्नाश्रयेण विष्णुना। 'एकदा नारदो लोकान्पर्यटन्भगवत्प्रियः। समातनमृषिं द्रष्टुं ययौ नारायणाश्रममि'त्यादिनाग्रे स्फुटीभविष्यति। अन्यत्रापि बहुश एतदुक्तम्। यस्मिन् क्षेत्रे ज्ञाने वा सूरयोपि नास्तिकाद्या मुह्यंति तन्महत्त्वं नाद्रियंते किंभूतं क्षेत्रं निरस्तं स्वसेविनां कुहकं सर्वपापं येन तत्तथा। 'इदमेव महास्थानं पुरा प्राह सदा शिवः। यस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते॥' इति नारदं प्रति स्कन्दोक्तेः। पुनः अर्थेषु धर्मादिषु सत्यं मोक्षप्रदत्वान्मोक्षरूपम्। 'तत्रापि मोक्ष एवार्थ आत्यंतिकतयेष्यते। त्रैवर्ग्योर्थो यतो नित्यं कृतांतभयसंयुतः॥' इति वक्ष्यमाणत्वात्। 'इदं क्षेत्रं तु यःप्रोक्तं केदाराख्यं सुपुण्यदम्। तच्छ्रुत्वा पितरो यांति शिवसायुज्यतां मुने॥ इमं देशं सकृद् दृष्ट्वा कृतकृत्यो भवेन्नरः।' इति केदारखण्डे। पुनः परं सर्वेभ्यः क्षेत्रेभ्यः परमुत्कृष्टम्। तदुक्तं 'यथा सर्वेषु देवेषु श्रीशिवः परिकीर्तितः। तथा सर्वेषु देशेषु हिमवद्देशकः स्मृतः॥ यथा सर्वेषु वेदेषु सामवेदः प्रकीर्तितः। तथायं सर्वदेशेषु देशराजो विधीयते॥ यथारण्येषु सर्वेषु नैमिषारण्यसंज्ञितः। यथा सर्वशिलानां हि शालग्रामशिला वरा॥ यथा नदीषु सर्वासु जाह्नवी समुदीरिता। यथा सर्वेषु भक्तेषु भक्तराजो हि नारदः॥ तथायं सर्व-

क्षेत्रेषु क्षेत्रः केदारसंज्ञितः। नन्दापर्वतमारभ्य यावत्काष्ठागिरिर्भवेत्॥ तावत्केदारकं क्षेत्रं शिवेन परिभाषितम्॥' किंचादौ केदारं गत्वा पश्चाद्बदरीं गच्छेत्। तदुक्तम्—'अकृत्वा दर्शनं वैश्य केदारस्याघनाशिनः। यो गच्छेद्बदरीं तस्य यात्रा निष्फलतां व्रजेत्॥ तस्मात्सर्वप्रयत्नेन पूर्वं केदारदर्शनम्। कार्यं पुण्येप्सुना श्रेष्ठिन्नभेदः शिवकृष्णयोरि'ति केदारखण्डेऽरुन्धतीवसिष्ठसंवादे चन्द्रगुप्तं प्रति धर्मदत्तः। इति केदाराभिन्नबदरीपक्षः॥ ६६॥

अथ सेतुपक्षः॥ वयं सेतुं हृदा धीमहि। तं कं यत्र त्रयाणामुच्चत्वदैर्घ्यायामानां सर्गोऽमृषा सत्यः कथं यथाऽविनिमयः। 'दशयोजनविस्तीर्णं शतयोजनमायतम्। बबंध सागरे सेतुं पर्वतोघं नलो हरिः॥' इति रामायणे। यतो यत्राद्यस्य सर्वादिकारणस्य शिवस्य जन्माविर्भावोस्ति। यस्याद्यस्यान्वयात्स्थापनार्चनादिरूपात्सेवनात्स्वराडसाधारणः प्रतापेन श्रीरामचंद्रोर्थेष्वाहवकरणीयार्थेष्वभिज्ञश्च आदि च तत्कं जलमादिकं तेन वेति व्याप्नोति भुवं परित इत्यादिकवयः समुद्रस्तस्मिंस्तथा। इह वेतेर्व्याप्त्यर्थादप्रत्यय औणादिकः। यं सेतुं तेने वितस्तार। यस्मिन्सेतौ सूरयोप्यहो कथं कृतोयमगाधसागरे वानरैरिति मुह्यंति। केन तेने तेजोवारिमृदां धाम्नाऽधिकरणेन पर्वतेन। इहैकत्वं सामान्याभिप्रायं पर्वतैरित्यर्थः। इह तेजःशब्दो धातुपरः, पर्वतेषु धातवो जलानि पाषाणरूपा अन्या मृदश्च संत्येवातस्तदधिकरणता तत्र न विरुद्धेति भावः। पुनः कैरितरतः ईन्कामांस्तरंत्यर्थिनो येस्ते इतरा वृक्षास्तैः, अत्र तृतीयार्थे तसिः। 'तरंति रोपकाः कामान्यैस्तेत्र तरवो मताः।' इत्यभियुक्तोक्तेः। 'बबंध सेतुं शतयोजनायतं सुविस्तरं पर्वतपादपैर्दृढामि'ति ब्रह्मांडोक्तेः। पुनः केन ब्रह्महृदा। 'ब्रह्म स्यात्कालदैवयोरि'ति कोशाद्ब्रह्मणो दैवस्य हृदानुकूल्येन। 'हृदानुकूल्ये स्तेने च स्वांते ज्ञाने च दर्शने' इति धरणिधरः। अत एव श्रीरामेण सेतुबंधावसरे लक्ष्मणं प्रत्युक्तम्। 'पश्य लक्ष्मण कालस्य प्रातिकूल्यानुकूल्यताम्। वनवासे पिता हेतुस्समुद्रतरणे शिला॥' इति दैवानुकूल्यत्वकथनं मानुष्यनाट्याभिप्रायकं बोध्यम्, अन्यथानीश्वरत्वप्रसक्तेरिति भावः। किंभूतं सेतुं स्वस्येनः स्वामी रामेश्वरः स सीदति तिष्ठत्यत्रेति स्वेनसत्तेन। क्विबत्राधिकरणे। निरस्तं स्वसेविनां कुहकं ब्रह्महत्यादिरूपं महापातकं येन तं तथा। तदुक्तं ब्रह्मांडे 'सेतुमारभमाणस्तु तत्र रामेश्वरं शिवम्। संस्थाप्य पूजयित्वाह रामो लोकहिताय च॥ प्रणमेत्सेतुबंधं यो दृष्ट्वा रामेश्वरं हरम्। ब्रह्महत्यादिपापेभ्यो मुच्यते मदनुग्रहात्॥ संकल्पनियतो भूत्वा गत्वा वाराणसीं नरः। आनीय गंगासलिलं रामेशमभिपूज्य च॥ समुद्रे क्षिप्तद्भारो ब्रह्म प्राप्नोत्यसंशयः॥' इति। बलरामेणापि तीर्थयात्रावसरे तत्र गतमिति वक्ष्यति। 'समुद्रसेतुमगमन्महापातकनाशनम्। तत्रायुतमदाद्धेनूर्ब्राह्मणेभ्यो हलायुधः॥' इति दशमे। पुनः सत्यं सत्यरूपहराधिष्ठानत्वात्। पुनः परं पारं पापहरणे प्रकृष्टम्। 'महापातकनाशार्थं न सेतोर्विद्यते परम्। सेतुं दृष्ट्वाथ स्पृष्ट्वा च मुच्यते पंचपातकात्॥' इति पुराणांतरात्। इति सेतुपक्षः॥ ६७॥

अथ प्रसंगात्समुद्रपक्षमाह॥ वयं तं समुद्रं सदा हृदा धीमहि। तं कं यत्र त्रयाणां गांभीर्योच्छ्रत्वदुर्लंघ्यत्वादीनां सर्गोऽमृषा। कथं यथा तेजोवारिमृदामविनिमयोऽमृषा। यतः समुद्रात् स्वराडिंद्रः आद्यस्यात्तु योग्यस्यामृतस्य इतरेषामैरावतकौस्तुभोच्चैःश्रवोलक्ष्म्यादीनाञ्च जन्मान्वयात्। यः समुद्रोऽर्थेषु कर्त्तव्यार्थेष्वभिज्ञो निपुणः। तन्नैपुण्यं युद्धकांडे हनुमतो लंकागमनावसरे तेन मैनाकं प्रति हनुमद्विश्रमार्थं प्रकटितं तत्तत्रत्यवाक्यानि विस्तरभिया नोक्तानि। यः समुद्रः आदिकवये श्रीरामाय श्रीराममुद्दिश्य ब्रह्म स्तुतिं तेने। तच्च नवमस्कंधे स्फुटम् 'यद्दोपविभ्रमविवृत्तकटाक्षपातसंभ्रांतनक्रमकरो भयगीर्णघोषः। सिंधुः शिरस्यर्हणं परिगृह्य रूपी पादारविंदमुपगम्य बभाष एतत्॥ न त्वा वयं जडधियो नु विदाम भूमन्नि' त्यादिना। वाल्मीकीये— 'ततो मध्यात्समुद्रस्य सागरः स्वयमुत्थितः। अब्रवीत्प्रांजलिर्वाक्यं राघवं शरपाणिनम्॥ पृथिवी वायुराकाशमापो ज्योतिश्च राघव। स्वभावे सौम्य तिष्ठंति शाश्वतं मार्गमाश्रिताः॥ तत्स्वभावो ममाप्येष यदगाधोहमप्लवः' इत्यादिना। ब्रह्मांडेपि 'एतस्मिन्नंतरे साक्षात्सागरो दिव्यरूपधृक्। दिव्याभरणसम्पन्नः स्वभासा भासयन्दिशः॥ स्वांतःस्थदिव्यरत्नानि कराभ्यां परिगृह्य सः। पदयोः पुरतः क्षिप्त्वा रामस्योपायनं बहु॥ दण्डवत्प्रणिपत्याह रामं रक्तांतलोचनम्। त्राहि त्राहि जगन्नाथे'त्यादिदशश्लोकैः स्फुटतरमिति। यस्मिन्समुद्रे सूरयोपि मुह्यंति कथमयमगाधो रत्नाकरश्च कथं न प्रसर्पति परित इत्यादिमोहं प्राप्नुवंति। यद्वा यस्मिन् रामे सूरयो नास्तिकाद्याः पण्डिता अपि मनुष्योयं राजायं न त्वीश्वरोयं सुग्रीवाद्याश्रयणादित्यादिरूपं मोहं प्राप्नुवंति। 'मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोरि'त्यादिना तस्येश्वरत्वमग्रे स्फुटयिष्यत्येव। किंभूतं स्वेन स्वरूपेण धाम्नाश्रयेण निरस्ताः स्वस्मिन् प्रक्षिप्ताः कुहकाः पञ्चजनजलंधरप्रभृतयो येन तम्। पुनः सत्यं सत्यस्वरूपहरेर्विभूतित्वात् 'सरसामस्मि सागर' इति गीतोक्तेः। पुनः परमनुपमं सागरं सागरोपमर्मिति वाल्मीकीयात्॥ इति समुद्रपक्षः॥ ६८॥

अथ काश्मीरमंडलपक्षः॥ वयं तत्काश्मीरमंडलं धीमहि। तत्किं यत्र त्रयाणां हिमशिलप्रशस्तोर्णानां सर्गोऽमृषा। कथं कथा तेजआदीनामविनिमयोऽमृषा। यत्रागस्त्यादिवराहस्य जन्माभूत्। यतो यस्य मंडलस्यान्वयात्सेवनात् इतो रतिर्यस्य स इतरतो मृतः स्वराट् विष्णुरूपो भवति। 'मृता विष्णुपुरं यांति क्षेत्रे वाराहसंज्ञके।' इति वाराहे। च पुनरर्थेष्वभिज्ञो भवति तत्र सरस्वतीवासात्। 'वाग्देवी वसते काश्यां किञ्चित्कालं वसुंधरे। काश्मीरमंडलं वाणी सर्वकालं न मुंचति॥ प्रज्ञां वर्द्धयती तिष्ठेद्वाराहक्षेत्रसेविनाम्॥' इत्यपि तत्रैव। किं कर्तुं आदिकवये आदिकर्त्रे विष्णुं प्राप्तुम्। तुमोऽप्रयुक्तस्येति चतुर्थी। किंभूताय

ब्रह्महृदाय ब्रह्म वेदो हृदि यस्य स ब्रह्महृदस्तस्मै । समासांतोऽत्राप्रत्ययः । वेदप्रवर्त्तकाय । किंभूतं स्वेन धाम्नाश्रयेण सदा निरस्तः कुहकः पापसमूहस्स्वसेविनां येन तत्तथा । 'काश्मीरमंडलावासात्सर्वपापक्षयो नृणामि'त्यपि तत्रैव । पुनः सत्यं भगवत्क्षेत्रत्वात् । 'सदा तिष्ठामि काश्मीरमंडलेऽहं वसुंधरे ।' इत्युक्तेः । पुनः परं सर्वोत्कृष्टफलम् । तदुक्तम् 'तीर्थानि निवसंतीह सप्तकोटिश्च सप्ततिः । वाराहक्षेत्रे कश्मीरे तथा सर्वाश्च देवताः ।। मृतास्तत्र पुरे यांति मनुजाश्चक्रधारिणः । तत्र श्राद्धेन तृप्तिः स्यात्पितॄणां बहुवार्षिकी ।। आनंदाश्रुसमुद्भूता वितस्ता श्रीहरेः सरित् ।। तत्र स्नानात्सर्वतीर्थस्नानस्य फलमाप्नुयात् । बहुना किमिहोक्तेन न काश्मीरात्परं भुवि ।।' इति वाराहे । 'काश्मीरमंडले देवि आदिवाराहसंभवः ।' इति शिवेनाप्युक्तम् । इति काश्मीरपक्षः ।। ६९ ।।

अथ भारतखंडपक्षः । वयं तद्भारतखंडं सदा हृदा धीमहि । तत्किं यत्र त्रयाणामुत्तमाधममध्यमानां सर्गो रचनाऽमृषा सत्यः । कथं यथेति दृष्टांतः पूर्ववत् । 'उत्तमाधममध्यानां सृष्टिर्भारतसंज्ञके । वर्षेऽखिला सोत्तमा स्याद्धरिसंश्रयणादिह ।।' इति कौशिकसंहितायाम् । यद्वा यत्र हरिकथाभागवतसंगयज्ञेशोत्सवानां सर्गोऽमृषा । 'वैकुंठस्य कथासंगो जनानां श्रीहरेरिह । श्रीविष्णोरुत्सवा वर्षे नान्यस्मिन्भारतं विना ।।' इति ब्रह्मसंहितायां चोक्तेः । यद्वा तिसृणां दिव्यमानुषनारकगतीनां सर्गोऽमृषा । वक्ष्यति तथा 'अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयन्त' इति । यत्र चाद्यस्य श्रीविष्णोरितरत इतरेषां श्रीरुद्रप्रभृतिदेवानाञ्च जन्माविर्भावोऽस्ति । तदुक्तं 'आविर्भावं लभंते स्म भारते त्वजनाभके । सर्वे देवाश्च रुद्राद्याः सशक्तय उशत्तम ।। श्रीविष्णुश्च तथानेकैः स्वरूपैरिह जायते । वेदावनाय दुष्टानां संहाराय युगे युगे ।।' इत्यादिपुराणे । यतो यस्याजनाभस्यान्वयात्सेवनात्पुमानर्थेष्वभिज्ञः धर्मार्थकाममोक्षेषु यथार्थज्ञानवान्भवति । 'चतुर्वर्गस्य संप्राप्तिर्नान्यथा भारतं विना । केवलं भोगभूमित्वादन्यवर्षाणि मानदः ।। सर्वाणि काममुख्यानि कर्मभूमिश्च भारतमि'ति विष्णुपुराणादौ । यद्भारतं स्वराट् असाधारणप्रभावः । अन्ये तु खण्डा भारतकृतपुण्यावशेषलभ्याः, न त्वयं तत्रत्यकर्मणा लभ्य इति भावः । किं कर्त्तुं आदिकवये आदिकविं विष्णुं सेवितुम् । तुमोप्रयुक्तस्येति चतुर्थी । यद्यपि विष्णुसेवान्यत्रापि खंडेष्वस्ति तथापि भारते सातिशीघ्रफलदा । तदुक्तं 'सेवनं तु महाविष्णोः सर्वत्रैव प्रवर्तते । अजनाभेविशेषेण विष्णुराशु प्रसीदति ।।' इत्यजनाभमाहात्म्ये । यः खंडो निजवासिनां ब्रह्मापवर्गं तेने । तदग्रे वक्ष्यति 'यथावर्णविधानमपवर्गश्चापि भवति योऽसौ भगवति सर्वभूतान्यनात्म्येनिरुक्ते निलयने परमात्मनि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ता-विद्याग्रंथिरंधनद्वारेण ददाति महापुरुषपुरुषप्रसंगं' इति । यस्मिन्नपवर्गे सूरयोऽपि मुह्यंति जन्मांतरीयदुष्कृतवशात्तन्ना[1]द्रियंत इति भावः । किंभूतं स्वेन निजेन धाम्ना प्रभावेण निरस्तोऽपाकृतः कुहकः पापाचरणमहत्त्वरूपो येन तत्तथा । अत्र पुण्यकर्मण एव महत्त्वं न तु पापकर्मणोऽपीति भावः । पुनः सत्यं सत्यरूपहरेः प्रापकत्वात् । पुनः परं सर्वभूमंडलोत्कृष्टम् । तदुक्तं वैष्णवे 'अत्रापि भारतं श्रेष्ठं जंबूद्वीपे महामते । यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः ।। अत्र जन्मसहस्राणां सहस्रैर्द्विजसत्तम । कदाचिल्लभते जंतुर्मानुष्यं पुण्यसंचयात् ।। गायंति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे । स्वर्गापवर्गस्य च हेतुभूते भवन्ति भूयः पुरुषाः सुरत्वात् ।। कर्माण्यसंकल्पिततत्फलानि संन्यस्य विष्णौ परमात्मभूते । अवाप्य तां कर्ममहीमनंते तस्मिँल्लयं ये त्वमलाः प्रयांति ।। जानीम नैतत्क्व वयं विलीनाः स्वर्गप्रदे कर्मणि देहबंधम् । प्राप्स्याम धन्याः खलु ते मनुष्या ये भारते नेंद्रियविप्रहीनाः ।।' इति । भारतेऽपि 'इहैव नरकव्याधिचिकित्सां न करोति यः । गत्वा निरौषधं देशं स रोगी किं करिष्यति ।।' इति । पंचमेपि वक्ष्यति 'तत्रापि भारतमेव वर्षं कर्मक्षेत्रमन्यान्यष्टवर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमानि स्वर्गपदानि व्यपदिशंति । किंच एतदेव हि देवा गायंति–अहो अमीषां किमकारि शोभनं प्रसन्न एषांस्विदुत स्वयं हरिः । यैर्जन्म लब्धं नृषु भारताजिरे मुकुंदसेवौपयिकं स्पृहा हि नः ।। किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना । न यत्र नारायणपादपंकजस्मृतिः प्रमुष्टातिशयेंद्रियोत्सवात् ।। कल्पायुषां स्थानजयात्पुनर्भवात् क्षणायुषां भारतभूजयो वरम् । क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयांत्यभयं पदं हरेः ।। न यत्र वैकुंठकथासुधापगा न साधवो भागवतास्तदाश्रयाः । न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोपि न वै स सेव्यताम् ।। प्राप्ता नृजातिं त्विह ये च जंतवो ज्ञानक्रियाद्रव्यकलापसंभृताम् । नवै यतेरन्नपुनर्भवाय ते भूयो वनौका इव यांति बंधनम् ।। यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य शोभनम् । तेनाजनाभे स्मृतिमज्जन्मनः स्याद्वर्षे हरिर्यद्भजतां शं तनोति ।।' इत्यलं वाग्जालेन । इति भारतखंडपक्षः ।। ७० ।।

अथ कालपक्षः ।। वयं तं कालं सदा हृदा धीमहि । तं कं यत्र त्रयाणां भूतत्वभविष्यत्त्ववर्तमानत्वानां सर्गो मृषा । कालस्यैकत्वेपि स्वतो भूतत्वाद्यभावेपि कालत्रयवर्तिनां राज्ञां भूतादिभेदभिन्नपालनादिक्रियाभेदाद्भूतादिव्यवहारः । तथाहि नलादिकाले पर्वतास्तस्थुरिदानीतनराजकाले तिष्ठन्ति कल्किकाले स्थास्यंतीति । यद्वा त्रयाणां शीतोष्णवर्षाणां सर्गोऽमृषा सत्यः । उभयत्र दृष्टांतो योऽयः पूर्ववत् । यतो यस्यान्वयात्संबंधादाद्यस्य बीजस्येतरत इतरेण रूपेणांकुरपत्रपुष्पादिरूपेण जन्माविर्भावः ।

---

१. मुह्यंति न कुर्वन्ति ।

'यः सृज्यशक्तिमुरुधोच्छ्वसयन्स्वशक्त्ये' त्यादिनाग्रे वक्ष्यमाणत्वात्। यः कालः स्वराट् अन्यानधीनः अन्ये तु तदधीनाः। तद्वक्ष्यति मातरं श्रीकपिलः 'भूतानां महदादीनां यतो भिन्नदृशां भयम्। योन्तः प्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः ॥ स विष्ण्वाख्योऽधियज्ञोऽसौ कालः कलयतां प्रभुः। न चास्य कश्चिद्दयितो न द्वेष्यो नच बांधवः ॥ आविशत्यप्रमत्तोसौ प्रमत्तं जनमंतकृत्। यद्भयाद्वाति वातोयं सूर्यस्तपति यद्भयात् ॥ यद्भयाद्वर्षते देवो भगणो भाति यद्भयात्। यद्वनस्पतयो भीता लताश्चौषधिभिः सह ॥ स्वे स्वे कालेभिगृह्णंति पुष्पाणि च फलानि च। स्रवंति सरितो भीता नोत्सर्पत्युदधिर्यतः ॥ अग्निरिंधे सगिरिभिर्भूर्न मज्जति यद्भयात् ॥ नभो ददाति श्वसतां पदं यन्नियमाददः ॥ लोकं स्वदेहं तनुते महान्सप्तभिरावृतम्। गुणाभिमानिनो देवाः सर्गादिस्तस्य यद्भयात् ॥ वर्ततेनुयुगं येषां वश एतच्चराचरम्। सोनंतोन्तकरः कालोऽनादिरादिकृदव्ययः ॥ जनं जनेन जनयन्मारयन्मृत्युनांतकमि'ति। कालाधीनं जगत्सर्वमिति भविष्येपि। यश्च पुनः अर्थेषु संयोगवियोगवयःपरिणत्यादिकरणरूपेष्वभिज्ञः। तद्वक्ष्यति 'स संयुनक्ति भूतानि स एव वियुनक्ति च' इति। 'बाल्ययौवनमध्यादिरूपां परिणतिं तनोः। कालो नृणां करोत्येष स्वयं तद्रहितः प्रभुरि'त्यन्यत्र। यः कालः कवये शास्त्राभ्यासं कुर्वते आदि प्राक्तनं ब्रह्म तेने 'शास्त्राभ्यासवते ज्ञानं तद्विहीनाय चेतरत्। तनुते भगवान्कालस्तत्तद्दैवसहायवानि'त्युक्तेः। अत एवार्जुनं प्रस्तुत्य वक्ष्यत्यपि 'गीतं भगवता ज्ञानं यत्तत्संग्राममूर्द्धनि। कालकर्मतमोरुद्धपुनरध्यागमद्विभुरि'ति। यस्मिन् काले प्रतिकूले सति सूरयोपि मुह्यंति कार्यविवेकच्युता भवंति। तदुक्तम् "रामो हेममृगं न वेत्ति नहुषो याने युनक्ति द्विजान् विप्रादेव सवत्सधेनुहरणे जाता मतिश्चार्जुने। द्यूते भ्रातृचतुष्टयं च महिषीं धर्मात्मजो दत्तवान् प्रायः सत्पुरुषोपि नाशसमये बुद्ध्या परित्यज्यते ॥" इत्यभियुक्तोक्तेः। किंभूतं स्वेन धाम्ना तेजसा निरस्तं कुहकमत्याश्चर्यरचनावत्त्वेन विस्मयजनकं जगद्येन तं तथा। काले सर्वं प्रणश्यतीत्युक्तेः। पुनः सत्यं सर्वथाऽबाध्यम्। 'कालो न यातो वयमेव याता' इति भर्तृहरिणोक्तेः। 'कालात्मनोश्च नित्यत्वात्साधयिष्ये तथात्मन' इति हिरण्यकशिपूक्तेरपि कालस्य नित्यत्वाच्च कालो नष्टो जातश्चेत्यप्रतीतेश्च। 'कालः कलयतामहमि'ति भगवद्विभूतित्वाच्च 'कालस्य तेऽव्यक्तगतेरि'ति भगवद्रूपताभिधानाद्वा। पुनः किंभूतं परं सर्वथा दुर्लंघ्यम्। 'बलेन सचिवैर्बुद्ध्या दुर्गैर्मंत्रौषधादिभिः। सामादिभिरुपायैश्च कालं नात्येति वै जनः ॥' इत्यष्टमे वक्ष्यति। यद्वा परं सर्वबलिष्ठम्। 'कालो बलीयान्बलिनां भगवानीश्वरोऽव्ययः। प्रजाः कालयते सर्वा' इति मुचुकुंदं प्रति देवोक्तेः ॥ इति कालपक्षः ॥ ७१ ॥

अथ मनःस्थैर्यपक्षः ॥ वयं तन्मनस्स्थैर्यं सदा हृदा धीमहि। तत्किं यत्र त्रयाणां कामक्रोधलोभानां गुणानां कर्मणां वा सर्गो मृषाऽसत्यः। कथं यथा तेजआदीनां विनिमयो मृषा 'कामक्रोधादयः सर्वेऽमतिरक्षाण्यहंकृतिः। गुणा त्रिविधकर्माणि विलीयंते मनःक्षयादि'ति शार्ङ्गधरोक्तेः। क्षयोत्र स्वकारणे ब्रह्मणि स्थितिरेवेत्यर्थः। यतो यस्य मनःस्थैर्यस्यान्वयाद्धर्मोऽवाग्रस्य धर्मस्य जन्म भवति। 'धर्मस्योत्पादने हेतुर्मनसः स्थितिरेव हि। असंयते च मनसि न हि धर्मः प्रवर्तते ॥' इति पुराणात्। 'सर्वधर्मसमुद्भावो मनसः श्रमनिग्रहादि'त्यन्यत्राप्युक्तेः। च पुनरितरत इतरेषामभयादीनां जन्म भवति। तदुक्तं गौडपादाचार्यैः 'मनसो निग्रहायत्तमभयं सर्वयोगिनाम्। दुःखक्षयः प्रबोधश्चाप्यक्षया शांतिरेव च ॥' इति। किंच यतोभिज्ञो ब्रह्मज्ञो भवति। 'तक्रयोगाद्यथा दुग्धं काठिन्यमुपगच्छति। तथा धीरो मनःस्थैर्यात्परं ब्रह्माधिगच्छति ॥' इति शार्ङ्गधरत्र्ययोक्तेः। यतः स्वराट् स्वतंत्रश्च स्यात्तद्वक्ष्यति 'मनोवशेन्ये ह्यभवन्स्म देवा मनश्च नान्यस्य वशं समेति। भीष्मो हि देवैः सहसः सहीयान्युंज्याद्वशे तं स हि देवदेवः ॥' इत्येकादशे। 'मनो जितं येन जितं हि सर्वमि'ति शुकगीतोक्तेश्च। किं कर्तुमादिकवये आदिकविं श्रीविष्णुं प्राप्तुम्। 'मत्प्राप्तिर्मनसि स्थिरे' इति भगवदुक्तेः। यो मनःस्थैर्यरूपो धर्मः ब्रह्म वेदं तेने। 'स्थिरे वेदार्थविज्ञानं मनसि स्फुटमुद्भवेत्। अस्थिरे तद्विनाशः स्यादि'ति वेदांतकदंबे। यस्मिन्मनःस्थैर्ये तन्निग्रहोपाये सूरयोपि मुह्यंति। तत्रासक्ताः संतः प्रायो नाद्रियंते। ये चोपाया जीवन्मुक्तविवेके उक्ताः श्रीविद्यारण्यस्वामिना 'सत्संगो वासनात्यागोऽध्यात्मविद्याविचारणम्। प्राणस्पंदनिरोधश्चेत्युपाया मनसो जये ॥' इति। किंभूतं तत् स्वेन निजेन धाम्ना प्रभावेण निरस्ताः कुहका मोक्षविघ्ना रागादयो येन तत्तथा। 'मोक्षविघ्ना विनश्यंति रागद्वेषादयोखिलाः। मनःस्थैर्ये द्विजश्रेष्ठ ततः सिद्धिमवाप्स्यसी'ति नारदेनोक्तं शौनकं प्रति स्वीयसंहितायाम्। पुनः सत्यमिंद्रियाणां मनश्चास्मीति भगवद्विभूतित्वात्। पुनः परं दुर्निग्रहत्वान्मनसोन्यनिग्रहापेक्षयोत्कृष्टम्। तदुक्तं गीतासु 'चंचलं हि मनः कृष्ण प्रमाथि बलवद् दृढम्। तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥' इति पार्थप्रश्नात् 'असंशयं महाबाहो मनो दुर्निग्रहं चलम्।' इति तत्रैव भगवदुक्तेश्चेति मनःस्थैर्यपक्षः ॥ ७२ ॥

अथ हिरण्यगर्भपक्षः ॥ वयं तं हिरण्यगर्भं सदा हृदा धीमहि। तं कं यत्र तिसृणां गुणकृतब्रह्मादिसंज्ञानां सर्गो मृषाऽसत्यः। 'यो विष्णुः सतु वै रुद्रो यो रुद्रः स पितामहः। एकमूर्तिस्त्रयो देवा रुद्रविष्णुपितामहाः ॥' इति हरिवंशात्। वक्ष्यत्यपि सप्तमे 'आत्मना त्रिवृता चेदं सृजत्यवति लुंपति। रजःसत्त्वतमोधाम्ने पराय महते नमः ॥' इति हिरण्यकशिपुः। यतः सकाशादाग्रस्य वेदस्य जन्म। 'अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥' इति स्मृतेः।

१ मनोविलासे। २ ब्रह्मणाम्।

वक्ष्यत्यपि तृतीये 'ऋग्यजुःसामाथर्वाख्यान्वेदादीन्मुखतोऽसृजदि'ति। किंच यतो ब्रह्मण इतरेषामुपवेदपुराणादीनामपि जन्म। 'आयुर्वेदं धनुर्वेदं गांधर्वं वेदमात्मनः। स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैरि'ति वक्ष्यमाणत्वात्। यश्चार्थेषु कर्त्तव्यसृष्टिविषयेष्वभिज्ञः। यश्च स्वराट् सर्वपतिः। 'हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीदि'ति श्रुतेः। यश्च कवये नारदादिरूपायादि सनातनं ब्रह्म श्रीभागवतं तेने। यश्च तेजोवारिमृदां विनिं रचनां यथा यथावदन्वयात् ज्ञातवान्। 'धाता यथापूर्वमकल्पयदि'ति श्रुतेः। यश्च अं वासुदेवं याति भूम्यादिभारनिवेदनार्थमित्ययः। 'ब्रह्मा तदुपधार्याथ सहदेवैस्तया सह। जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः॥' इत्यादिना श्रीदशमे वक्ष्यति। किंच यस्मिन्ब्रह्मणि सूरयो विद्वांसोपि तात्पर्यज्ञानं विना मुह्यंति। अहो अयं पुत्रीगामीत्यादिविकल्पभ्रांता भवंतीति भावः। 'सुरूपां सुतामपि लोका अनुगमिष्यंत्यतः सुरूपासंगोऽनर्थहेतुरि'ति बोधनायानुजगाम नतु कामार्त्त इति तथात्वे'न मे हृषीकाणि पतंत्यसत्पथे' इत्युक्तिविरोधः स्यादिति तात्पर्यम्। किंभूतं स्वेन धाम्ना निरस्तः कुहको गुरुस्त्रीहारिचन्द्रो येन तम्। तन्नवमे विशदीभविष्यति। वाक्यानि विस्तरभिया नोक्तानि। पुनः सत्यं सत्यलोकगम्। पुनः परं सर्वप्रजापतिभ्य उत्कृष्टं 'प्रजापतीनां स पतिश्चक्लृपे कान्प्रजापतिरि'ति वक्ष्यमाणत्वात्। इति हिरण्यगर्भपक्षः॥ ७३॥

अथ कार्त्तिकेयपक्षः॥ वयं तं कार्त्तिकेयं सदा हृदा धीमहि। तं कं यत्र त्रयाणां क्रौंचतारकधीमांद्यानां सर्गस्तद्भेदननिश्चयोऽमृषा सत्यः। कथं दृष्टांतः पूर्ववत्। 'धीमांद्यहारी क्रौंचघ्नस्तथा तारकभेदनः।' इति तत्स्तवोक्तेः। यतो यस्माद्यस्य शिवस्य सकाशाज्जन्म। 'स्वामी शंकरनन्दन' इत्युक्तेः। किंच यतो यस्यान्वयात्सेवनादितरत इतरोपि अर्थेषु शास्त्रार्थेषु अभिज्ञः स्यात्। 'सेवनात्कार्त्तिकेयस्य मूको वाचस्पतिर्भवेदि'ति स्कांदोक्तेः। यः कार्त्तिकेयः स्वराट् देवसेनानीत्वात्। स्वः स्वर्गे आ समन्तादटतीति स्वराट्। क्विवत्र कर्त्तरि। य आदिकवये नारदाय ब्रह्म वेदरूपं स्कांदार्थं तेने। तच्च स्कांदे स्फुटम् 'देव षण्मुख देवेश पार्वतीसुत नायके' त्यादिना नारदेन पृष्टः स्कन्दो 'धन्योसि त्वं महाप्राज्ञ धन्यानां प्रवरो मुनिरि'ति तं संश्लाघ्य 'सर्वस्य जगतो बीजं जन्मादिपरिवर्जितम्। ब्रह्मांडाः कोटयो यस्य रोम्णां च विवरेषु वै॥ मत्प्रवातप्रेरिताश्च विशंति प्रविशंति च। दिक्कालापरिणामानं जगदीशं जगन्मयम्॥ अनादिमध्यनिधनं नमस्कृत्य ब्रवीमि ते॥' इति। यस्मिन्ब्रह्मणि कार्त्तिकेये वा सूरयोपि मुह्यंति कार्तिकेयस्य बहुधोत्पत्तिं श्रुत्वा मुह्यंति। वेदे तात्पर्यानभिज्ञत्वान्मुह्यंतीति भावः। किंभूतं स्वेन धाम्ना तेजसा निरस्तः कुहकोऽतिमायावी महिषो वा दैत्यनिवहो वा तारको येन तम्। 'निरस्तस्तारको येन क्रौंचे रंध्रं विनिर्मितम्। मयूरो वाहनं यस्य स मे स्कंदः प्रसीदत्वि'ति तत्स्तवोक्तेः। पुनः सत्यं ब्रह्मत्वात् 'ब्रह्मैव स्कन्दरूपेण पार्वतीनन्दनोभवदि' त्यादिस्कांदोक्तेः। 'सेनानीनामहं स्कंद' इति गीतोपनिषदाचार्येण वासुदेवेन स्वांतेवासिनमर्जुनं प्रति निजविभूतित्वोक्तेश्च। पुनः परं ऐहिकामुष्मिकफलदं 'परः सत्ये परो दूरे भोगमोक्षप्रदे परः।' इत्यभिधानादर्शोक्तेः। अत एव भोगमोक्षप्रदः प्रभुरिति प्रज्ञावर्द्धनस्तोत्रेप्युक्तमिति तत्स्तोत्रमपि प्रज्ञानवर्द्धकत्वादत्राह 'योगीश्वरो महासेनः कार्त्तिकेयोग्निनंदनः। स्कंदः कुमारः सेनानीः स्वामी शंकरसंभवः॥ गांगेयस्ताम्रचूडी च ब्रह्मचारी शिखिध्वजः। तारकारिरुमापुत्रः क्रौंचारिश्च षडाननः॥ शब्दब्रह्मसमुद्रश्च सिद्धः सारस्वतो गुहः। सनत्कुमारो भगवान्भोगमोक्षप्रदः प्रभुः॥ शरजन्मा गणाधीशपूर्वजो मुक्तिमार्गकृत्। सर्वागमप्रणेता च वांछितार्थप्रदायकः॥ अष्टाविंशतिनामानि मदीयानीति यः पठेत्। प्रत्यूषे श्रद्धया युक्तो मूको वाचस्पतिर्भवेत्॥ महामंत्रमयानीह मम नाम्नां प्रकीर्त्तनात्। महाप्रज्ञामवाप्नोति नात्र कार्या विचारणा॥ पुष्यर्क्षात्पुष्यपर्यंतमश्वत्थांघ्रौ च योन्वहम्॥ दशावृत्त्या पठेत् स्तोत्रं सप्तविंशतिभिर्दिनैः। पुरश्चरणफलं प्राप्य महाप्रज्ञां लभेद् ध्रुवम्॥' इति प्रज्ञावर्द्धनं स्तोत्रम्। इति कार्त्तिकेयपक्षः॥ ७४॥

अथ जननीजनकपक्षः॥ वयं तं [1]जननीजनकं सदा हृदा धीमहि। तं कं [2]यत्र त्रयाणां त्वङ्मांसरुधिराणां सर्गः यद्वा मेदोमज्जास्थ्नां च सर्गोऽमृषा सत्यः। मातृतस्त्रीणि जायन्ते तथा त्रीणि तु पितृतः। 'मातुस्त्वङ्मांसरुधिराः पितुर्मज्जास्थिमेदसः।' इत्यादिपुराणात्। यद्वा त्रयाणां पालनलालनप्रीणनानां सर्गोऽमृषा सत्यः दृष्टांतः पूर्ववत्। यतो जन्म जनिरभूत्। कस्यार्थेषु आद्यस्य कारणस्य देहस्येति यावत्। नहि देहं विना धर्मादय उत्पद्यंत इति भावः। तद्वक्ष्यति श्रीकृष्णः 'सर्वार्थसम्भवो देहो जनितः पोषितो यतः। न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा॥' इति दशमे। यो जननीजनकः स्वराट् स्वं स्वकीयं पुत्रं राजयतीति स्वराट् पुत्रस्य पालनादिना प्रकाशकः। यो भिं भयं जनयति संपादयतीति भिज्ञः। 'भिर्भयेपि प्रकीर्त्तित' इति सौभर्युक्तेः। स्युपपदाज्जनेः कः। श्वगाहादिर्नभिज्ञो येन सोभिज्ञः पुत्रभयनिवर्त्तकः। यद्वा पुत्रपालनादिप्रकारज्ञः। कुतोऽन्वयात् परंपरातः। यथाहं मत्पित्रादिना पालितस्तथायमपि मया पाल्य इत्येवं ज्ञानादित्यर्थः। किं कर्तुं आदिकविं श्रीहरिं प्राप्तुं मातृपितृसेविनां दर्शनार्थं स्वयमेव हरिरायाति। एतच्च बहुधा पुराणेषु प्रसिद्धम्। दक्षिणदेशे पितृसेविदर्शनार्थमागतो विष्णुरद्यापि प्रसिद्धं [3]इष्टिकेश्वरनाम्नेति। जैमिनीये तु चंद्रहासेन साक्षादेव लक्ष्मीनारायणरूपौ तौ उक्तौ। 'पितृभक्तिं विना किञ्चिल्लभ्यते भुवि नो नरैः। लक्ष्मीनारायणावेतौ पितरौ चिंतयाम्यहमि'ति। यश्च ब्रह्म तेने तत्प्राप्तिसाधनं देहं तेने। पालनादिना प्रसारेन वर्लाविस्तृतिं चक्र। 'पुत्रो मत्सेवनेन ज्ञानं लब्ध्वाधिगच्छति। परं ब्रह्म न संदेहः पितरौ तौ सदा भजे' दित्यभियुक्तोक्तेः। यस्मिन जननी-

---

१. जननी जनको जनकस्य। २. जनन्यां जनके वा। ३. विठ्ठल।

जनके सूर्योपि मनुष्यबुद्धया मुह्यंति। नहि तौ मनुष्यौ पितरौ सर्वदेवता इति स्मृतेः। किंभूतं स्वेन धाम्ना गृहेण तत्समर्पणेन निरस्तोऽपास्तः कुहकः पुत्रक्लेशो येन तम्। पुनः सत्यं सेवया सत्यस्वरूपहरिप्रापकम्। 'विष्णोः स्थानमवाप्नोति पितृसेवापरो नरः।' इति पुराणात्। पुनः इतरत इतरेभ्यो दानयज्ञादिभ्यः परं सर्वोत्कृष्टमैहिकामुष्मिकफलदम्। तदुक्तं रामचन्द्रेण श्रीवाल्मीकीये'न सत्यं दानमानौ वा यज्ञो वाप्याप्तदक्षिणः। तथा बलकराः सीते यथा सेवा पितुर्मता॥ सर्गो धनं वा धान्यं वा विद्याः पुत्राः सुखानि च। गुरुवृत्त्यनुरोधेन न किंचिदपि दुर्लभम्॥ दैवगांधर्वलोकांश्च ब्रह्मलोकांस्तथा परान्। प्राप्नुवंति महात्मानो मातापितृपरायणाः॥' इति। किञ्च तीर्थरूपत्वादपि परम्। तदुक्तं शैवे 'अपहाय गृहे यो वै पितरौ तीर्थकं व्रजेत्। तस्य पापं तथा प्रोक्तं यत्तयोर्हनने भवेत्॥ पुत्रस्य च स्त्रियाश्चैव तीर्थं गेहे सुशोभनम्। पुत्रस्य पितरौ तीर्थं स्त्रिया भर्त्ता उदाहृतः॥' इति। 'पित्रोश्च पूजनं कृत्वा प्रक्रांतिं प्रकरोति यः। तस्य भूप्रक्रमोद्भूतं फलं भवति निश्चितम्॥' इति शैवेपि। भारतादावप्येतद्बहुश उक्तमतोऽलम्। इति जननीजनकपक्षः॥ ७५॥

अथ प्रद्युम्नपक्षः॥ वयं तं प्रद्युम्नं सदा हृदा धीमहि। तं कं यतो यस्माद्यस्य श्रीवासुदेवस्य सकाशाज्जन्माभूत्। 'स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः। प्रद्युम्न इति विख्यातः सर्वतोऽनवमः पितुरि'ति दशमे वक्ष्यति। यतो यस्यान्वयात्संबन्धादितरतः 'इतरः प्राकृतः कुरूपोपि पुमान् स्वराट्' स्वेनैव राजत इति निरुक्तेः शोभनदीप्तिर्भवेत्। पुमानित्युपलक्षणं स्त्रिया अपि। तदुक्तमभियुक्तैः 'शरीरे यस्य प्राकट्यात् कुरूपोपि सुरूपवान्। विरूपा जायते काम्या तस्मै कामाय ते नमः॥' इति। यश्चार्थेषु स्त्रीसंगतिकरणोपायेषु अभिज्ञः बोधजनकः। यश्च प्रद्युम्नः कवये कविभ्योर्थाद्यदुपुंगवेभ्यः आदि सतानं ब्रह्म ज्ञानं तेने। अत्र कवय इत्येकत्वमविवक्षितं 'गृहं संमार्ष्टी'तिवत्। एतद्वृत्तमुक्तं विश्वजित्खण्डे हिरण्याक्षसुतयुद्धप्रस्तावे 'तत्सैन्यं भीषणं दृष्ट्वा प्रद्युम्नो धन्विनां वरः। बली धैर्यकरः कार्ष्णिः प्राहेदं यदुपुंगवान्॥ प्रद्युम्न उवाच इदं शरीरं भुविपाञ्चभौतिकं फेनोपमं कर्मगुणादिनिर्मितम्। गतागतं कालवशं कदापि हि बुधा न शोचंति यथार्भकैः कृतमि'त्यारभ्य श्लोकत्रयोदशकैर्ज्ञानं तेन इति भावः। यस्मिञ्ज्ञाने सति त्रिसर्गो देहादिर्मृषेति प्रतीयते 'ज्ञाने त्रिसर्गो लीयेत शुक्तिकारजतादिवदि'त्युक्तेः। कथं यथा तेजआदीनां व्यत्यासः, तत्पाके वोवे मृषेति। किञ्च यस्मिन् सर्गे सूर्यो मुह्यति 'देहादींल्लालयेन्नैव तदावेशात्प्रमाद्यती'ति शिष्टगीतोक्तेः। किंभूतं स्वेन धाम्ना निरस्ताः शंबरप्रभृतयः कुहका मायाविदैत्या येन तम्। पुनः सत्यं श्रीकृष्णात्मजत्वात्। 'यः पिता स तु वै सुत' इति स्मृतेः। 'अंगादंगात्संभवति हृदयादभिजायते। आत्मा वै पुत्रनामासी'त्यादिश्रुतेश्च। अत एव परं दुर्द्धर्षकामावतारत्वात्। 'सर्वेषां बलिनां मध्ये कामो हि परमो बली।' इत्यलं प्रपञ्चेन॥ इति प्रद्युम्नपक्षः॥ ७६॥

अथानिरुद्धपक्षः॥ वयं तमनिरुद्धं परं चतुर्व्यूहांतर्गतत्वात्परमेशं सदा हृदा धीमहि। तं कं यतो यस्माद्यस्य श्रीकृष्णस्यान्वयात्पुत्रात्प्रद्युम्नाज्जन्माभूत्। यः स्वराट् स्वरेषु शब्देष्वटति कारणत्वेन व्याप्नोतीति व्युत्पत्तेः। शब्दकारणत्वं च तृतीये। 'अपि स्विदास्ते भगवान्सुखं वो यस्सात्वतां कामदुघोनिरुद्धः। यमामनंति स्म ह शब्दयोनिं मनोमयं सत्त्वतुरीयतत्त्वमि'ति। चित्ताहंकारबुद्धिमनसामंतःकरणभेदानां क्रमेण वासुदेवसंकर्षणप्रद्युम्नानिरुद्धा ह्यधिष्ठातारः, मनसश्च शब्दयोनित्वं प्रसिद्धम्। 'मनः पूर्वरूपं वागुत्तररूपमिति तथान्यांतर आत्मा मनोमयः' इति प्रस्तुत्य 'तस्य यजुरेव शिरः ऋग्दक्षिणः पक्षः सामोत्तरः पक्ष' इत्यादिश्रुतेः। तथाच शिक्षायां 'आत्मा बुद्ध्या समेत्यार्थान्मनो युंक्ते विवक्षया। मनः कायाग्निमाहत्य संप्रेरयति मारुतम्॥ मारुतस्तूरसि चरन्मंद्रं जनयति स्वरमि'त्यादि। यश्चार्थेषु सर्वार्थेषु अभिज्ञः ज्ञापयति सर्वानात्मानमित्यभिज्ञः 'आत्मानं ज्ञापयन्सर्वानखिलार्थेषु कामजः' इत्यादिपुराणात्। यद्वा भिं भयं जानातीति भिज्ञो न भिज्ञोऽभिज्ञः। अत एव वक्ष्यति 'स तं प्रविष्टं वृतमाततायिभिर्भटैरनेकैरवलोक्य माधवः। उद्यम्य मौर्वं परिघं व्यवस्थितो यथांतको दंडधरो जिघांसये'ति दशमे। यद्वाऽभया निर्भयया चित्रलेखया ज्ञायते इत्यभिज्ञः। 'चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी'ति वक्ष्यमाणत्वात्। योनिरुद्ध आदिकवये भीष्माय ब्रह्म कोर्थो ब्रह्मास्त्रं तेने युयोज। नामैकदेशेन सर्वनाम्नो ग्रहणमिति न्यायाद् ब्रह्मपदं ब्रह्मास्त्रपरं बोध्यम्। इतरत इतरोऽर्थादनिरुद्धेतरो भीष्मोपि यस्मै ब्रह्मास्त्रं तेने। तदुक्तं विश्वजित्खंडे 'भीष्मोन्यं धनुरादाय सज्यं कृत्वा तदात्मवान्। सर्वेषां पश्यतां तत्र ब्रह्मास्त्रं संदधे मृधे॥ ततः प्रादुष्कृतं तेजः प्रचंडं वीक्ष्य माधवः। स्वबलस्यापि रक्षार्थं ब्रह्मास्त्रं संदधे स्वयम्॥ द्वादशादित्यसंकाशं युयुधाते परस्परम्। त्रींल्लोकान्दहती द्वे येऽनिरुद्धस्ते जहारहे'त्यादिना नारदेन बहुलाश्वं प्रति। यस्मिन् ब्रह्मास्त्रे सूर्योऽर्जुनप्रभृतयोपि मुह्यन्ति किमिदं कुतो वेति न जानंति। अत एवोक्तम् 'किमिदं स्वित्कुतो वेति देवदेव न वेद्म्यहमि'त्यादिनोक्तमर्जुनेन। यत्रानिरुद्धे त्रिसर्गो देहित्वेन प्रतीतिर्मृषा। कथं यथा तेजोवारिमृदां विनिमयो मृषा। किंभूतं स्वेन धाम्ना तेजसा। 'दोःसहस्रं त्वया दत्तं परं भाराय मेऽभवत्। त्रिलोक्यां प्रतियोद्धारं न लभे त्वदृते समामि'ति तदुक्तेर्निर्गतोऽस्त्रः क्षेपको यस्य स निरस्तो बाणासुरस्तस्यापि कुहकः अहो! अयं मत्पुरागतोपि निर्भय' इति विस्मयजनकस्तम्। यद्वा निरस्तः कुहकस्सहस्रबाहुत्वेन विस्मयजनको बाणो येन तम्। पुनः सत्यं योगिध्येयम्। तद्वक्ष्यति 'यद्विदुर्ह्यनिरुद्धाख्यं संराध्यं योगिभिः शनैः। शारदेन्दीवरश्याममृषीकाणामभीश्वरम्॥' इत्यनिरुद्धपक्षः॥ ७७॥

अथार्जुनपक्षः ।। वयं तमर्जुनं सदा हृदा धीमहि । तं कं यत्र त्रयाणां बलवीर्यधैर्याणां सर्गो रचनाऽमृषा । कथं यथा तेजोवारिमृदामविनिमय इति । यतो यस्यार्जुनस्याद्यस्यादेः कश्यपस्यापत्यमाद्य इंद्रस्तस्यान्वयात्संबंधादर्थात्कुंत्यां जन्माभूत् । यश्च स्वराट् स्वर् स्वर्गमाटति देवशत्रुवधार्थमिति स्वराट् । 'तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता । जघान स्वर्गतो राजन्नेक इन्द्रप्रियंकरः ।।' इति षष्ठे वक्ष्यति । यद्वा स्वरान्भैरवमालकौशादिरागस्वरानटति जानातीति स्वराट् । 'स्वरकुशलतया रागकर्त्तार्जुनोभूदि'ति पाद्मीयसप्ताहमाहात्म्यषष्ठाध्यायोक्तेः । यश्चार्थेष्वभिज्ञः अर्थाः सत्या यमुद्दिश्य त्यक्तास्तद्भेदनशीलाश्च त इषवो बाणा अर्थेषवस्तानभितो जानातीत्यर्थेष्वभिज्ञः अमोघबाणविद्याकुशल इत्यर्थः । यश्च इते सर्वत्र गते कृष्णे रतिः प्रीतिर्यस्य स इतरतः । समासान्तोत्र डः । 'अमोघबाणो बीभत्सुः श्रीकृष्णे त्वनुरागवानि'ति भारतादौ । यश्च कवये विवेकवते सात्यकये आदि प्राक्तनं ब्रह्म धनुर्वेदं तेने । यस्मिन्सूरयोपि मुह्यन्ति अन्यशास्त्रे कृताभ्यासा अपि बाणसन्धानादिषु व्याकुला भवन्ति । किंभूतं स्वेन धाम्नाश्रयेण श्रीकृष्णेन निरस्तं कुहकमज्ञानं यस्य तं कुहका जयद्रथप्रभृतयो वा । सत्यं नापाण्डवमिदं जगदिति भारतोक्तेः । पांडवानां सदा विद्यमानत्वेन सत्यम् । पुनः परं परविभूतित्वात्तदुक्तं पांडवानां धनंजय इति गीतायाम् । यद्वा परं दैन्यपलायनरहितत्वादुत्कृष्टम् । यदुक्तमभियुक्तैः 'आयू रक्षति मर्माणि ह्यायुरन्नं प्रयच्छति । अर्जुनस्य प्रतिज्ञे द्वे न दैन्यं न पलायनमि'ति । यद्वा सत्यं पिपर्त्ति पालयतीति ;सत्यंपरस्तं सत्यप्रतिज्ञं तद्भारते स्फुटम् । यद्वा 'सत्यः सत्यपराक्रमः' इति सहस्रनामोक्तेः सत्येन श्रीकृष्णेन पूर्यते पाल्यत इति सत्यंपरस्तम् । महाभारते स्फुटमेतज्जैमिनीयेपि हंसध्वजोपाख्याने च । औणादिकः खः कर्मणि ।। ७८ ।।

अथोद्धवपक्षः ।। वयं तमुद्धवं सदा हृदा धीमहि । तं कं य उद्धवो जन्मनां जीवानामाद्यस्य हरेरन्वयात्सेवनात्स्वराट् ज्ञानी जातः । तद्वक्ष्यत्येकादशे स एव 'विद्राविता मोहमहान्धकारो य आश्रितो मे तव संनिधानादि'त्यादिना । यश्चार्थ इष्यते प्राप्यतेऽनेनेत्यर्थेषु नीतिशास्त्रे तत्राभिज्ञः यद्वा 'आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोरि'त्यमरोक्तेरर्थेषु दण्डनीतिप्रतिपादकशास्त्रार्थेष्वभिज्ञः । तत्रार्थशास्त्रे तिसृणां प्रभावोत्साहदण्डशक्तीनां सर्गोऽमृषा । यद्वा 'क्षयः स्थानश्च वृद्धिश्च त्रिवर्गो नीतिवेदिनामि' त्यमरोक्तेस्त्रयाणां क्षयादीनां सर्गः इतरत इतरेषां संध्यादीनां षण्णां भेदाद्युपायचतुष्टयस्य सर्गोऽमृषा । जन्म प्राकट्यम् । 'संधिर्ना विग्रहो यानमासनं द्वैधमाश्रयः । षड्गुणा' इत्यमरः । 'भेदो दण्डः साम दानमित्युपायचतुष्टयमि'ति च । किञ्च कोषदण्डबलं प्रभुशक्तिः बलमुत्साहशक्तिः मन्त्रशक्तिः पंचांगमन्त्रो मन्त्रशक्तिः अष्टवर्गस्यापचयः क्षयः उपचयो वृद्धिः अपचयोपचयाभावः स्थानं 'कृषिर्वणिक्पथो दुर्गं सेतुः कुंजरबन्धनम् । खन्याकरबलादानं शून्यानां च निवेशनमि'त्यष्टवर्ग इति । यतो यस्मै उद्धवाय तेजोवारिमृदां विनिमयो देहादिर्यत्र मृषा स कृष्ण आदि सनातनं ब्रह्म ज्ञानं तेने । अत्र यत इति चतुर्थ्यर्थे तसिः । कस्य सुखस्य वये विस्तारार्थं यस्मिन् ब्रह्मणि सूरयोपि मुह्यन्ति । किंभूतं स्वेन धाम्ना विद्याप्रतापेन निरस्तो व्यापादितः कुहकोऽनीतिवर्त्तिनामन्वयो येन तम् । 'अन्यायेषु प्रवृत्ता ये ते श्रुत्वोद्धवभाषितम् । सुन्यायवर्तिनो जाताः किं वक्ष्ये तस्य कौशलमि'त्युक्तं तपस्यवर्यैः । पुनः सत्यं सदा व्रजवल्ल्यादिषु स्थितत्वात्तदुक्तं स्कान्दे 'कालिन्द्या कृष्णपत्नीभ्यः । साधनभूमिर्बदरी व्रजता कृष्णेन मन्त्रिणे प्रोक्ता ।। तत्रास्ते स तु साक्षात्तद्वयुनं ग्राहयँल्लोकान् । फलभूमिर्व्रजभूमिर्दत्ता तस्मै पुरैव सरहस्या ।। फलमिह तिरोहितं सदा तदिहैव स उद्धवो लक्ष्यः । गोवर्द्धनगिरिनिकटे सखीस्थले पद्रजःकामः ।। तत्रत्यांकुरवल्लीरूपेणास्ते स उद्धवो नूनमि'त्युक्त्वा । 'ततः पश्यत्सु सर्वेषु तृणगुल्मलताचयात् । आजगामोद्धवः स्रग्वी श्यामः पीताम्बरावृतः ।। गुंजमालाधरो गायन्वल्लवीवल्लभं मुहुः ।।' इत्यादिनोद्धवस्थितिरुक्ता सदा व्रजे । पुनः परं सर्वोत्कृष्टम् । नोद्धवोण्वपि मन्न्यून इति श्रीकृष्णोक्तेः । इति उद्धवपक्षः ।। ७९ ।।

अथ हनुमत्पक्षः । वयं तं हनुमन्तं सदा हृदा धीमहि । तं कं यो हनुमानाद्यस्य श्रुतिविहिताद्युत्पत्तेराकाशस्यान्वयात्पुत्ररूपाद्वायोर्जन्म आये प्राप । यतो यस्मै कवये विदुषे स्वराट् श्रीराम आदि सनातनं ब्रह्म रामहृदयरूपं तेने । तदुक्तं ब्रह्माण्डे 'ततो रामः स्वयं प्राह हनूमन्तमुपस्थितम् । शृणु तत्त्वं प्रवक्ष्यामि ह्यात्मानात्मपरात्मनाम् ।। आकाशस्य यथा भेदस्त्रिविधो दृश्यते महानि'त्यारभ्येदं रहस्यमित्यन्तैर्नवभिः । यो हनुमानितरतः ई कामं तरति जयतीतीतरः, स एवेतरतः जितेन्द्रियः । अत्र प्रथमार्थे तसिः । अर्थेषु शब्दार्थेष्वभिज्ञः 'शब्दशास्त्रमशेषेण श्रुतं नूनमनेकधा । अनेन भाषितं कृत्स्नं न किंचिदपशब्दितमि'ति ब्रह्माण्डे तस्य शब्दकौशल्योक्तेः । अर्थकौशलस्य शब्दकौशले नांतरीयकतयार्थेष्वभिज्ञ इत्युक्तम् । यद्वा कार्याकार्येष्वभिज्ञः । श्रीरामदूतत्वात् । 'दूतः सर्वार्थकुशलः क्रियते राजसत्तमैरि'ति नीतिशास्त्रात् । 'मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् । वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामी'ति सर्वत्र पदेषु मानं बोध्यम् । यस्मिन्हनूमति सूरयोपीन्द्रादयस्तत्प्रभावानभिज्ञाः सन्तः प्राकृतं वानरं मत्वा वज्रप्रक्षेपादिरूपं मोहं प्राप्नुवन्ति । यत्र हनूमति त्रयाणां वीर्यधैर्यकौशलत्वानां सर्गोऽमृषा । 'वीर्यं धैर्यं कौशलत्वं यथा वीरे हनूमति । न तथान्यत्र दृश्यन्ते तेनायं प्रवलोभिनः ।।' इति जांबवदुक्तेः । दृष्टान्तः पूर्ववत् । किंभूतं स्वेन धाम्ना तेजसा निरस्ताः कुहका अक्षप्रभृतयो राक्षसा येन तम् । पुनः सत्यं सत्यरूपहरेर्विभूतित्वात् । किंपुरुषाणां हनुमानित्येकादशे श्रीमुखोक्तेः । परमत्युत्कृष्टं रामसेवकत्वाद्रामादप्युत्कृष्टतया प्रकाशितबलं रामः सेतुना

वारिधिमतरत्सच कूर्दनेनेत्युत्कर्षस्तदुक्तमभियुक्तैः 'प्रसिद्धमेतल्लोकेत्र स्वामिनः सेवकोधिकः। सेतुं कृत्वातरद्रामो वायुजोऽब्धिं च कूर्दनादि'ति। यद्वा रामो द्विर्नाभिभाषत इति प्राचेतसोक्तेः सत्यं पिपर्ति पालयतीति सत्यंपरो रामः। खोत्र प्रत्ययः, खित्त्वात्पूर्वपदस्य मुम्। स विद्यते उपास्यत्वेन यस्य स सत्यंपरस्तम्। मत्वर्थीयोत्राच्, श्रीरामोपासनपरम्॥ इति हनुमत्पक्षः॥ ८०॥

अथ गरुडपक्षः॥ वयं तं गरुडं सदा धीमहि। तं कं यतो यस्माद्यस्य ब्रह्मणोऽन्वयाद्वंशाज्जन्म ब्रह्मपुत्रो मरीचिर्मरीचेः कश्यपस्तस्माद्गरुड इति। यो गरुडः स्वर् स्वर्गमाटति प्राप्नोत्यमृतानयनार्थं मातृदासीभावापनोदायेति स्वराट्। अत्र चेत्थं भारतीयाख्यानमनुसंधेयम्—कद्रूर्विनता च कश्यपस्य भार्ये कश्यपाद्गर्भं स्वीकृत्यांडानि सुषुवाते। कद्रूस्तु प्रथममेवांडानि विभिद्यात्मजान् लालयामास। विनता च कश्यपेनोक्ता तव द्वे अण्डे भविष्यतस्ते च सहस्रवर्षादर्वाङ् न भेत्तव्ये पुत्रौ तेऽतीव प्रबलौ भविष्यतः। सा चैवं श्रुत्वा जानन्त्यपि कद्रूसुतान्सर्पान्वीक्ष्यैकमण्डं पञ्चशतवर्षान्ते बिभेद। तन्मध्यादनूरुरात्मजो जातः सन्मातरं 'यत्त्वयाऽपूर्णाङ्गस्य ममाण्डं विभिन्नमतस्त्वं दासी भविष्यसी'ति शशाप। द्वितीयं त्वयांडं न भेत्तव्यमिति चोवाच। ततोऽब्दसहस्रान्ते द्वितीयांडे गरुडो बभूव। स चातीव बलवत्तरः। एवं स्थिते कदाचित्कद्रूविनतयोः सूर्याश्वपुच्छाः कृष्णवर्णा हरिद्वर्णा वेति विवदमानयोर्विनतयोक्तं हरिद्वर्णाः कद्र्वा चोक्तं कृष्णवर्णा इति। विवादे कद्रूरुवाच यदि कृष्णवर्णाः सूर्याश्वपुच्छास्तर्हि त्वं मे दासी भविष्यसि हरिद्वर्णाश्चेत्तर्ह्यहं ते दासी भविष्यामीति ताभ्यामुक्तम्। तत्र गत्वा द्रष्टव्यास्ते। ततो गमनावसरे स्वात्मजान्नागान्प्रोवाच हे पुत्रा यूयं रोमरूपाणि कृत्वा श्यामीभूय सूर्याश्वपुच्छेषु लग्ना भविष्यथ। अन्यथाहं विनतादासी भविष्यामीत्युवाच। ते च तथैव चक्रुस्ततस्ते उड्डीय कृष्णवर्णानेव पुच्छान् ददृशाते। तदा विनता कद्रूदासी जाता। कदाचिद्गरुडः स्वमातरं कद्रूदास्ये प्रवृत्तां वीक्ष्य मातस्त्वं कथं दासी जातेति पप्रच्छ तया च सर्वं वृत्तं गरुडायोक्तम्। तत् श्रुत्वा गरुडो मातरं प्राह मातस्त्वमेनां पृच्छ कथं मे दासीत्वं निवर्त्तिष्यते। सा च तथैव पप्रच्छ, तयोक्तं यदि त्वदात्मजो गरुडः स्वर्गान्मदात्मजानाममृतत्वाप्तयेऽमृतमानयेत्तदा ते दास्यत्वं नंक्ष्यति। तया च तथैव गरुडायोक्तं, स च स्वर्गं गत्वेन्द्रादीन्निर्जित्यामृतकलशमानयामास। इन्द्रश्च गरुडं पप्रच्छ किमर्थममृतं नेष्यसि? तेनोक्तं नागार्थं तत इन्द्रः प्रोवाच ते तु स्वभावत एव क्रूरा अमृतं तेभ्यो न देयं, ततो गरुड उवाच—मया तत्र नेतव्यमेव न तेभ्यो दाने हठः, किंतु मातृदास्यत्वापनुत्तये एव हठोऽतस्त्वया ततः कथंचिदानेयमित्युक्त्वा कलशं गृहीत्वा कद्रूं वै प्रोवाचैतदमृतकलशमानीतं पश्याधुना मन्मातुर्दासीत्वं गतं, तया त्रिरुक्तं गतमिति। तत इन्द्रो नागान्पाने प्रवृत्तान् ब्राह्मणो भूत्वा प्रोवाच नेदमस्नात्वा पेयं, ते च स्नानार्थं गताः। इन्द्रः कलशमादाय स्वर्गं ययाविति भारते। यश्चार्थेषु कर्त्तव्याकर्तव्येष्वभिज्ञः छंदोमयत्वात्। छंदोमयत्वं तु तस्य 'छंदोमयेन गरुडेन समुह्यमानः' इत्यष्टमे। 'गरुडो भगवान् स्तोत्रस्तोमछंदोमयः प्रभुरि'ति षष्ठे च। 'आकीर्णयन्पत्ररथेंद्रपक्षैरुच्चारितं स्तोममुदीर्णसामे'ति तृतीये च वक्ष्यति। बृहद्रथंतरे पक्षाविति श्रुतेश्च। 'त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषमि'ति द्वादशेपि वक्ष्यति। यतश्चत्याकृष्य चतुर्थ्या विपरिणमय्य योज्यम्। ततश्च यतो यस्मै गरुडाय हृदयतेन्तर्यामिरूपेणेति हृदायो विष्णुरादि ब्रह्म गरुडपुराणरूपं तेने प्रकाशितवान्। किंभूताय कवयेऽतिविदुषे। ननु वेदरूपः स्वयं कथं विष्णोः पुराणमधीतवानिति चेच्छ्रीकृष्णादिवल्लोकसंग्रहार्थमेवेति बोध्यम्। किंच यस्मिन् गरुडे सूरयोपि नास्तिकाः कथं पक्षिणा पृष्टं कथं च तस्मै प्रोक्तमिति न संभवतीति मोहमाप्नुवंति। यत्र त्रयाणां समुद्रोच्छोषणमेरून्मूलनवासुक्यादिदमनानां सर्गः स्थितिरमृषा। दृष्टांतः पूर्ववत्। गरुडेन टिट्टिभार्थं कदाचित्समुद्रशोषणं पक्षवातेन मेरोरुन्मूलनमपि कृतं वासुक्यादिदमनं प्रसिद्धमेव तस्येति। किंभूतं स्वेन धाम्ना निरस्ताः समुद्रोपकंठगा निषादा येन तम्। प्रादुर्भूतो गरुडः क्षुन्निवृत्त्यर्थं पितरमुवाच क्षुधा मां बाधते तां वारय। तेनोक्ते समुद्रे एकमत्स्योऽतिविस्तृतोऽस्ति तं भक्षय। स तं गृहीत्वा भक्षितुकामो वालखिल्यवटस्कंधे निषसाद। तद्भारेण वटस्कंधो बिभेद, स च तं लंबमानर्षिसमूहं स्कंधे पद्भ्यां गृहीत्वा कस्मिंश्चित्पर्वते गत्वा तत्र संस्थाप्य मत्स्यं चखाद। तेनाप्यनिवृत्तक्षुधः पुनरागत्य पितरं मे क्षुधा मत्स्याशनेन न गतेति प्रोवाच। तदा पित्रोक्तं समुद्रोपकंठगान्निषादान्भक्षय ब्राह्मणं स्वकण्ठतापेन विज्ञाय त्यक्त्वेति विस्तृतं भारते। पुनः सत्यं 'सुपर्णोहं पतत्रिणामि'ति भगवद्रूपत्वोक्तेः। पुनः परं ब्राह्मतेजस उद्भूतत्वात्सर्वविषापहारिनामत्वाद्वा। ब्राह्मतेजस उद्भूतत्वं तु भारते समिदाहरणावसरे इंद्रेणापहसितैर्वालखिल्यैरिंद्रमदापनोदाय प्रकटितस्वकोपाग्निना लोकत्रयं तापितं तत्रत्यैरर्थितः कश्यपस्तत्तेजो धृत्वा विनतागर्भे निदधौ। तदेव गरुडो भूत्वेंद्रमदममृतानयनेऽपनुनोदेति प्रसिद्धम्। विषहारित्वं तु हरिवंशे 'गरुत्मान् विततैः पक्षैर्नखाग्रैः सलिलं महीम्। समासहस्रं संपूर्णं चूलाग्रेणावलंबिना॥ पर्णभारैश्च विकचैर्विस्तीर्णैर्वसुधातले। रराज वसुधा चैव पर्णैर्बहुविचित्रितैः। येन वृत्तेन जीवेयुः सर्वभूतानि भारत॥ इह लोके मनुष्येंद्र देवलोके च भारत। द्यौरिवाचितनक्षत्रा महीतलविसर्पिभिरि'ति। अस्यार्थस्तु गरुत्मान् सलिलं महीं च मम जीवनभूतं द्वंद्वं पात्विति शेषः। पक्षभारैः कृत्स्नां पृथिवीं व्याप्य स्थितमित्यर्थः। मां पातु इति शेषः। विततैः पक्षैर्नखाग्रैरवलंबिना चूलाग्रेण च कीदृशं मांसं पूर्णं बाह्याभ्यंतरज्योतिभिः सुवर्णरागादिभिः तत्प्रकाश्यं तद्व्याप्य स्थितमित्यर्थः। एतदेवाह यः वसु ब्रह्म धीयतेऽस्मिन्वसुधा शरीरं तस्य तले गर्भे विकचैर्विकाशिभिर्विशीर्णैः सर्वतो विप्रकीर्णैः पर्णभारैः पक्षैरिव पक्षैरिंद्रियैस्तेषां भारैः कार्यसमूहैः रराज राजते योगिदृष्ट्येति भावः। यस्य

च पर्णैस्तैरेव पक्षैर्बहुविचित्रितैर्विषयभेदात् वसुधा शरीरं च रराज। यतः शरीरे सर्वात्मरूपेण राजते शरीरञ्च येन राजते स इत्यर्थः। मंत्रजपफलमाह येन मंत्रेण वृत्तेनावर्त्तितेन सर्वभूतानि विपत्यागाज्जीवेयुः येन च मंत्रेण मही शरीरं निर्विषातलविसर्पिभिरिंद्रियाद्यैराचितनक्षत्रा द्यौरिव रराजेत्यनुषंगः। अथात्रैव मंत्रोद्धारमाह पूर्वश्लोके च ब्रह्मा विधाता ब्रह्म प्रणव अहिंसकमक्षरममृतबीजं वं बीजमित्यर्थः। विततैः दीर्घैः पक्षैः स्वरैर्युक्तेन वंबीजेनेत्यर्थः। नखाग्रैः पंचांगैर्न्यासैः। सलिलं वं बीजं महीं लं बीजं समासहस्रं समासह हस्रं हकारसकाररेफाणां कूटं ते वर्णाः संपूर्णं चरमः स्वरश्चूला शिखा तस्या अग्रं वषट्पदं तेन अवलंबनशीलेन पल्लवेन च मंत्रः। मंत्रस्तु ॐ वंलंहः वषट् इति षडक्षरात्मकः। ॐ अस्याहिंसकमंत्रस्य ब्रह्मा ऋषिर्गायत्री छंदः गरुत्मान्देवता वं बीजं हः शक्तिः लं कीलकं विषनाशने विनियोगः। ॐ वां गरुत्मान् हृदयाय नमः अंगुष्ठयोः, ॐ वीं गरुत्मान् शिरसे स्वाहा तर्जन्योः, ॐ वूं गरुत्मान् शिखायै वषट् मध्यमयोः, ॐ वैं गरुत्मान्कवचाय हुं अनामिकयोः, ॐ वौं गरुत्मान् नेत्रत्रयाय वौषट् कनिष्ठिकयोः, ॐ वः गरुत्मान् अस्त्राय फट् करतलकरपृष्ठयोरिति सवा गरुडोपनिषच्च विषहरणे मानम्॥ इति गरुडपक्षः॥ ८१॥

अथ सुदर्शनपक्षः॥ वयं तत्सुदर्शनं चक्रं सदा धीमहि। तत्किं यत्र त्रयाणां लोकानां सर्गः पालननिश्चयोऽमृषा। यद्वा त्रयाणां दैत्यदानवरक्षसां सर्गो नाशनिश्चयोऽमृषा। दृष्टांतः पूर्ववत्। 'सुदर्शनाय त्रैलोक्यपालकाय नमोऽस्तु ते। नाशकाय नमस्तुभ्यं दैत्यदानवरक्षसामि'ति नारदीयवैष्णवयोः। 'त्रैलोक्यगोपाय विशुद्धवर्चसे' इत्यंबरीषोपि वक्ष्यति। यतो यस्याद्यस्य विष्णोरन्वयाद्देहादेव जन्माविर्भावोऽभूत्। इतरत इतरेषां कंबुपद्मगदांबरभूषादीनामपि यतो जन्माभूत्। 'तमद्भुतं बालकमंबुजेक्षणमि'त्यत्र तत्साहित्येनावतारश्रवणाच्चैतन्यमयत्वेनात्यंतभेदाभावात्तादात्म्यमेव परिच्छदानां बोध्यम्। एतदभिप्रायेणैवोक्तं नारायणवर्मस्तोत्रांते 'यथैकात्म्यानुभावानां विकल्परहितः स्वयम्। भूषणायुधलिंगाख्या धत्ते शक्तीः स्वमायया॥ तेनैव सत्यमानेन सर्वज्ञो भगवान्हरिः। पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः॥' इति ऐकात्म्यानुभावानामात्मारामाणां तदंगप्रत्यंगभेदयाथार्थ्येऽपि स्वयंविकल्परहितस्तैश्चैतन्यमयत्वेनाभिन्न एवानुभूत इति तथैव स्वमायया स्वरूपशक्त्या भूषणाद्यभिधास्तद्वृत्तिरूपाः शक्तीश्च धत्ते ता अपि तैस्तथानुभूता इति तेनैव विद्वदनुभवरूपेण सत्यमानेन यदि तत्सत्यं पूर्वोक्तं तदा तैरेव भूषणादिलक्षणैः सर्वैः स्वरूपांशैर्नः पात्वित्यर्थः। अनेनास्त्राण्यपि तदंगान्येव सहजातत्वादत उक्तमन्वयाद्देहादित्यर्थः। यत्सुदर्शनं स्वराट् स्वेनैव राजते प्रधन इति स्वराट्। तद्वक्ष्यत्यंबरीषः 'यदा विसृष्टस्त्वमनंजनेन वै बलं प्रविष्टो जितदैत्यदानवम्। बाहूदरोर्वङ्घ्रिशिरोधराणि वृश्चन्नजस्रं प्रधने विराजसे॥' इति। यद्वा स्वान्निजान्राजयति स्वसंबंधेन वैकुण्ठं नीत्वा प्रकाशयतीति स्वराट्। अत एवोक्तं 'ये ये हताश्चक्रधरेण विष्णुना त्रैलोक्यनाथेन जनार्दनेन। ते ते गता विष्णुपुरीं नरेंद्राः क्रोधोपि देवस्य वरेण तुल्यः॥' इति पांडवगीतायाम्। चक्रधरेणेत्युक्तेश्चक्रहतानामेव विष्णुपदाप्तिः। किंभूतं अर्थान्निच्छंतीत्यर्थेष्यवो दैत्यास्तेष्वभि निर्भयं यच्चक्रं ज्ञः जानाति भक्तविरोधिनमिति ज्ञः। पुंस्त्वमार्षम्। ननु कथं जडरूपं चक्रं जानातीति चेन्न, जडं तत् चक्रादिभिर्मूर्त्तिधरैर्निजायुधैरिति वक्ष्यमाणत्वेन चैतन्यरूपमेव, अन्यथा मूर्त्तिधारणानुपपत्तेः। किंच साक्षाद्भगवता निमिषारिवरायुधेनाप्रमत्तेन तैस्तैर्भावैः परिरक्ष्यमाणानामिति भरताख्यानेन तस्याप्रमत्ततोक्तिर्विना चिद्रूपत्वं न संगच्छते। य आदिकवये प्राचीनविदुषे दुर्वाससे ब्रह्म निजमहत्त्वं तेने। अत्रापि पुंस्त्वं पूर्ववत्। यस्मिंश्चक्रे सूरयोऽपि शक्लदृष्ट्या मोहमनुभवंति नतु तदन्यशस्त्रवद्धार्यं तस्य तु भगवदवयवत्वेन कूर्मावयववदाविर्भावतिरोभावावेव स्तो भगवच्छरीरे कश्चित्तु सुनाभं चास्मरद्विभुरित्युक्तिः। सा तदाविर्भावपराऽत एव मोहिनीरूपेण राहुशिरःकृंतने स्वभुजात्तदैवाविर्भाव्य तच्छिरश्चकर्तेति संभाव्यते। पुनः किंभूतं स्वेन धाम्ना निरस्ताः कुहका दुर्वासःप्रभृतिकृत्याद्या येन तम्। तत्सर्वमग्रे स्फुटमेव। पुनः सत्यत्वं धर्मस्त्वमृतं सत्यमिति सत्यरूपतास्यांबरीषेणोक्ता। पुनः परं सहस्रारत्वाच्युतप्रियत्वसर्वास्त्रघातित्वात्तदुक्तं अंबरीषेण 'सुदर्शन नमस्तुभ्यं सहस्राराच्युतप्रिय। सर्वास्त्रघातिन् विप्राय स्वस्ति भूयादिडस्पते॥' इति नवमे। यद्वा त्वं तेजः पौरुषं परमिह साक्षादेव परतोऽर्कः॥ इति सुदर्शनपक्षः॥ ८२॥

अथ श्रीलक्ष्मीपक्षः॥ वयं तल्लक्ष्मीरूपं तेजः सदा हृदा धीमहि। तत्किं यत्र त्रयाणां दैन्यदौर्भाग्यानुत्साहानां सर्गो लोकोत्सादर्नानिश्चयो मृषा। 'दैन्यानुत्साहदौर्भाग्यपीडा नश्यति निश्चितम्। श्रीलक्ष्मीस्मरणादेव सत्यं सत्यं नराधिपे'ति पुराणात्। कथं यथा तेजआदीनां विनिमयो मृषेति। यद्वा यत्र त्रयाणां गुणानां सर्गः स्थितिरमृषेति। 'सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी।' इति प्रथमरहस्योक्तेः। यतो महालक्ष्म्यास्सकाशादाद्यस्य विष्णोरितरत इतरेषां च जन्माविर्भावस्तस्या एव मूलप्रकृतित्वात्। 'महालक्ष्मीस्त्वया लोके मूलप्रकृतिरेव सा। तत एव समुद्भूता ब्रह्मविष्णुमहेश्वराः॥ कश्चित्कल्पे ब्रह्मणस्ते कश्चिन्मत्तः कश्चिद्धरेः। कश्चित् स्कंदात् कश्चित्सूर्यात्कश्चिज्जाता गणेश्वरादित्यादि'स्कांदे शिवेनामां प्रत्युक्तेः। 'विष्णुः शरीरग्रहणमहमीशान एव च। कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान्भवेदि'ति मार्कंडेयेपि। तत एव विष्ण्वाद्याविर्भावः प्रतीयते। श्रीगीतास्वपि 'मम योनिर्महद्ब्रह्मे'ति ब्रह्मशब्देन लक्ष्म्यपरपर्यायप्रकृतिरेवाविर्भावस्थानं वर्णितेति। इतरत इह पञ्चम्यर्थे तसिः। किंच यस्या अन्वयात्संबंधात् स्वराडपि दरिद्रोऽप्यपर्वाभक्तो धनधान्यसमृद्धो भवेत्। तदुक्तं स्कांदे 'शूरः स एव स गुणी स बुधः स धन्यो मान्यः स एव कुलशीलकलाकलापैः। एकः शुचिः सहि पुमान्सकलेपि लोके यत्रापतेत्तव शुभे करुणाकटाक्षः॥' इत्यगस्तिना। 'दरिद्रोपि महापूज्यो

जायते यत्कृपावशात्। तां लक्ष्मीं कमलावासां वन्दे ब्रह्मादिभिस्स्तुताभि'ति लक्ष्मीस्तवोक्तेः। यल्लक्ष्मीरूपं तेज आदिकवये विष्णवे तमनुकूलयितुं ब्रह्म कोर्थस्स्तुतिं तेने। तद्वक्ष्यति पञ्चमे 'नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मन' इत्यारभ्य 'मत्प्राप्तयेजेशसुरासुरादयस्तप्यंत उग्रं तप ऐन्द्रिये धियः। ऋते भवत्पादपरायणान्न मां विंदंत्यहं त्वद्धृदया यतोजितः॥ स त्वं ममाप्यच्युत शीर्ष्णि वंदितं कराम्बुजं यत्तदधायि सात्वताम्। विभर्षि मालक्ष्मवरेण्य मायया क ईश्वरस्येहितमूहितं विभुरि'त्यंतैर्गद्यपद्यैरिति। यस्मिंस्तेजसि सति कवयोपि देवमनुजाद्या इन्द्रप्रभृतयो विद्वांसोपि मुह्यंति। 'को गृध्येत्पण्डितो लक्ष्मीं त्रिविष्टपपतेरपि। ययाहमासुरं भावं नीतोद्य विबुधेश्वरः॥' इति षष्ठ इंद्रोक्तेः। 'न ह्यन्यो जुषतो जोष्यान्बुद्धिभ्रंशो रजोगुणः। श्रीमदादाभिजात्यादिर्यत्र स्त्री द्यूतमासवः॥' इति दशमे नारदोक्तेश्च। 'राज्यैश्वर्यमदोन्नद्धो न श्रेयो विंदते नृपः। त्वन्मायामोहितो नित्यं मन्यते सम्पदोचलाः॥' इत्यादिजरासंधाख्यानोक्तेः। 'हैहयो नहुषो वेनो रावणो नरकोपरे। श्रीमदाद् भ्रंशिताः स्थानाद्देवदैत्यनरेश्वराः॥' इत्यपि तत्रैवोक्तेश्च। 'मा राज्यश्रीरभूत्पुंसः श्रेयस्कामस्य मानद। स्वजनानुत वा बंधून्न पश्यति ययांधदृक्॥' इति नंदं प्रति वसुदेवोक्तेश्च। अत एव सुदाम्नाप्युक्तं 'अधनोयं धनं प्राप्य माद्यन्नुच्चैर्न मां स्मरेत्। इति कारुणिको नूनं धनं मे भूरि नाददात्॥' इति। किंभूतं स्वेन निजेन धाम्ना निरस्तं कुहकं निजसेविनां दुःखं येन तत्तथा। 'लक्ष्मीं श्रियं कमलां कमलालयां च पद्मारमां नलिनयुग्मकरां च मां च। क्षीरोदजाममृतकुम्भकरेन्दिरां च विष्णुप्रियामिति सदा जपतां क दुःखमि'ति स्कांदेऽगस्त्युक्तेः। पुनः सत्यं सत्यरूपस्य विष्णोरनपायिनीत्वात्। तदुक्तं पराशरेण 'देवत्वे देवदेहेयं मानुषत्वे च मानुषी। विष्णुर्देहानुरूपां करोत्येषात्मनस्तनुमि'ति। वैष्णवेपि 'नित्यैव सा जगन्माता विष्णोः श्रीरनपायिनी। यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तमे'ति। किञ्चेयमेव रुक्मिण्यादिरूपेत्यपि ज्ञेयम्। 'एकधा बहुधा चैव शतधा च सहस्रधा। अनंतधा स्वसंकल्पादात्तकिंकरविग्रहा॥ वाराणस्यां विशालाक्षी विमला पुरुषोत्तमे। रुक्मिणी द्वारकायां तु राधा वृन्दावने वने॥' इत्यपि तत्रैव। 'वृन्दावनाधिपत्यं तु दत्तं तस्यै प्रतुष्यता। कृष्णेनान्यत्र देवीनां राधा वृंदावने वने॥' इति पाद्माच्चान्यत्र देवी विशालाक्ष्यादिकेत्यर्थः। बृहद्गौतमीये राधाया लक्ष्मीत्वं स्मर्यते 'देवस्य मूर्तिं लावण्यपीतवस्त्रादिभूषिताम्। देवस्याभेदरूपेण तप्तहेमसमप्रभाम्॥ रक्तवस्त्रपरीधानां रक्तालंकारभूषिताम्। श्रीराधां वामभागे तु पूजयेद्भक्तितत्परः॥ लक्ष्मीप्रणवमुच्चार्य्य राधिकायै नमो लिखेत्। राधिकामनुराख्यातश्चतुर्दशकलावहः॥ चतुर्मुखऋषिश्चास्य गायत्री छंद ईरितम्। देवी कृष्णमयी प्रोक्ता राधिका परदेवता॥ सुरूपा द्विभुजा चित्रवसनाभरणान्विता। सर्वलक्ष्मीमयी सर्वकांतिः संमोहिनी परे'त्यलं प्रसक्तानुप्रसक्तेन। पुनः परं परब्रह्मरूपत्वात्तच्च जगत्कारणत्वसर्वात्मकत्वमोचकत्वेन संगच्छत एवास्याः। 'नमस्ये सर्वभूतानां जननीमब्जसम्भवाम्। त्वं सिद्धिस्त्वं सुधा स्वाहा स्वधा त्वं लोकपावनी॥' इत्यादिना। शरीरारोग्यमैश्वर्यमरिपक्षक्षयः सुखम्। देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभम्॥' इत्यंतेन वैष्णवे उक्तम्। हरिवंशेपि 'आवासः सर्वभूतानां निष्ठा च परमा गतिः।' इति तस्याः सर्वाधिष्ठानत्वं मुक्तप्राप्यत्वं चोक्तम्। तत्रैव 'त्वया व्याप्तमिदं सर्वं जगत्स्थावरजंगममि'ति सर्वात्मता चोक्ता। भविष्येपि 'यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति। तस्याहं नित्यदेहस्था सच नित्यं मयि स्थितः॥ न पश्येत्सर्वभूतेषु नच सर्वं मयि स्थितम्। सतु पर्वतदुर्गेषु मार्गमाणो विनश्यति॥' इति मात्स्ये च 'सर्वगा सर्वभूतेषु द्रष्टव्या परमेश्वरी। सर्वलोकेषु यत्किंचिद्रहितं न तया विने'ति। मार्कंडेये तु 'तया विसृज्यते विश्वं जगदेतच्चराचरम्। सैषा प्रसन्ना वरदा नृणां भवति मुक्तये॥ संसारबंधहेतुश्च सैव सर्वेश्वरेश्वरी॥' इति। वस्तुतो महालक्ष्म्या ब्रह्मत्वेन स्त्रीत्वमपि तत्रावास्तवमेव। तदुक्तं पुरुषोत्तमतीर्थैः 'पुंस्त्वं नास्ति शम्भुविधिकृष्णे कलय यथा जलमधिमृगतृष्णे। स्त्रीत्वं नास्ति तथैव भवान्यां कमलायां च तथैव च वाण्यामि'ति विवेकानंदे। किं बहुना इति श्रीलक्ष्मीपक्षः॥ ८३॥

अथाष्टादशाक्षरश्रीगोपालमनुपक्षः॥ वयं तमष्टादशाक्षरं मंत्रराजं सदा हृदा धीमहि। तं कं यत्र त्रयाणां षट्कार्णानां सर्गोऽमृषा। कथं यथा तेजोवारिमृदामविनिमयोऽमृषा। अष्टादशार्णेषु षट्कत्रयाणां संभवादमृषेति योग्यमेव। पुनः यतोऽष्टादशाक्षरस्य अन्वयात् सेवनात्स्वराट् ब्रह्माऽर्थेषु सृष्ट्युत्पादकतत्त्वादिष्वभिज्ञोभूत्। तदुक्तं श्रीगोपालतापिन्यां 'तदुहोवाच ब्रह्मा सवनं चरतो मेध्यातः स्तुतः परार्धांते सोवबुध्यत गोपवेषो मे पुरुषः पुरस्तादाविर्बभूव ततः प्रणतो मयानुकूलेन हृदा मह्यमष्टादशार्णं स्वरूपं सृष्टये दत्वांतर्हितः। पुनः सिसृक्षता मे प्रादुरभूत् तेष्वक्षरेषु भविष्यं जगदुदयं प्रकाशयन तदिहकादापोलात्पृथिवी ईतोग्निर्विन्दोरिन्दुस्तत्संपातात्तदर्क इति क्लींकारादसृजत्कृष्णादाकाशं खाद्वायुरित्युत्तरात्सुरभिविद्याः प्रादुरकार्षं तदुत्तरात्स्त्रीपुमादि चेदं सकलमि'ति। हरति सर्वमिति हृन् रुद्रो यतश्चास्य सर्वादिकारणस्यात्मनो जगदीशस्य श्रीकृष्णस्य जन्माविर्भावं साक्षात्कारमिति यावत्, आप्य प्राप। 'एतस्यैव यजनेन चंद्रध्वजो गतमोहमात्मानं वेदे'ति तापनीयश्रुतेः। एतस्य पंचपदस्य यजनेन जपेन चंद्रध्वजश्चंद्रमौलिः गतमोहं क्रियाविशेषणमिति श्रुतिपदार्थः। किञ्च यतो यस्येतरत इतरोपीदानींतनोप्यधिकारी ब्रह्मजपं तेने। करोत्यर्थेत्र तनिः। आदिकवये श्रीकृष्णं प्राप्तुमिति चतुर्थी पूर्ववत्। 'ओंकारांतरालिकं मनुमावर्तयेत्संगरहितोभ्यानमत्तस्मादेनं नित्यमभ्यसेदि'ति तापनीयश्रुतिभ्याम्। प्रणवसंपुटितमष्टादशाक्षरं संगरहित एकांते शुचिर्भूत्वावर्त्तयेत्तेनाप्रत्यक्षमपि परमात्मानमभ्यानमत्साक्षात्करोति तस्मात्कृष्णप्राप्तिहेतुत्वादेनमष्टादशार्णं सदा जपेदिति श्रुतितात्पर्यम्। यस्मिन्ना-

त्मनि मंत्रे च नास्तिकवामादिमार्गानुयायिनो मुह्यंति सूरयोपि संतः। किंभूतं स्वेन धाम्ना निजेन तेजसा निरस्तं कुहकं स्वसेविनां संसारलक्षणं येन तं तथा। 'यो ना नित्यं जपेन्मंत्रमष्टादशकवर्णकम्। अनायासेन संसारं स तरेत्तस्य तेजसा॥' इति तंत्रांतरात्। पुनः सत्यं सर्वदाबाध्यम्। 'सत्यं श्रीकृष्णरूपत्वान्मंत्रमष्टादशार्णकम्। यो मंत्रमार्गमाश्रित्य श्रीगुरोरधिगच्छति॥ अष्टादशपुराणार्थो मंत्रेस्मिन्वर्णसंख्यया। तथाष्टादशस्मृत्यर्थो वेदसारोयमीरितः॥ पुराणस्मृतिवेदानां सोस्मात्फलमवाप्नुयात्॥ व्यासोऽप्यस्यैव व्याख्यानं श्रीभागवतसंज्ञया। प्रतिवर्णं सहस्रेण श्लोकानां संचकार हे' त्यूर्ध्वाम्नायादौ। पुनः परं श्रीकृष्णरूपम्। 'वायुर्यथैको भुवनं प्रविष्टो जन्ये जन्ये पंचरूपो बभूव। कृष्णस्तथैकोपि जगद्धितार्थं शब्देनासौ पञ्चपदो विभातो'ति तापनीयश्रुतेः। अष्टादशाक्षरो मन्त्रइति गोपालसहस्रनामसूक्तेश्च। भवदाहकत्वादपि परम्। तदुक्तं 'प्रातर्भजामि मनुमेतदनंगबीजं कृष्णाय गोंतमनुविंदपदं चकेन्तम्। गोपीपदादनुपदं जनवल्लभाय वह्नेर्वधूं मनुमिदं भवकाननाग्निरि'ति गौतमीसंमोहनागमयोरिति। 'अष्टादशाक्षरो मंत्रश्चतुर्वर्गफलप्रदः। सर्वेषामेव मंत्राणां मंत्रराजोयमीरितः॥' इति संमोहनोक्तेर्वा परम्॥ इत्यष्टादशाक्षरश्रीगोपालमनुपक्षः॥ ८४॥

अथ श्रीगीतापक्षः॥ वयं तं श्रीगीतानिबन्धं सदा हृदा धीमहि। तं कं यत्र त्रयाणां षट्कानां सर्गो रचनाऽमृषा। दृष्टान्तस्तु पुरोवत्। 'श्रीकृष्णेन पुरा गीता भारते भीष्मपर्वणि। षट्कत्रयेण संसृष्टाध्यायानामर्जुनाय च॥' इत्यादिपुराणात्। यतो यस्मान्वयाच्छ्रवणरूपसेवनात्स्वराडर्जुनोऽर्थेष्वाद्यस्यार्थातक्षत्रियधर्मस्य जन्म साक्षात्कारमाये प्राप। अभिज्ञश्च जातः। 'नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादाज्जनार्दन'इत्युक्तेः। किंभूतः इता गता रतिर्युद्धप्रीतिस्स्वजनादिदर्शनाद्यस्य तादृशोपीति भावः। तदुक्तं श्रीगीतायामेव 'न कांक्षे विजयं कृष्णे'त्यादिना। च पुनर्य आदिकवयेऽर्जुनाय ब्रह्म ज्ञानं तेने यत्र सूरयोपि मुह्यन्ति। किंभूतं स्वेन निजेन धाम्नानुभावेन निरस्तोऽपास्तः स्वसेविनां कुहकः संसारो येन तम्। तदुक्तम् 'श्लोकं वा श्लोकमर्द्धं वा पदं वाप्यक्षरं पठन्। नरो भगवद्गीताया मुक्तिभागी न संशयः॥' इति गीतामाहात्म्ये। पुनः किंभूतं परं सत्यम्। सत्यो वेदस्ततोपि परोयं निबन्धः 'वेदो निःश्वासरूपो हि सुप्तस्य परमात्मनः। गीता तु जाग्रतो वाक्यमतः किं तत्समं भुवि॥ गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः। या स्वयं[१] पद्मनाभस्य मुखपद्माद्विनिःसृता॥ सर्वशास्त्रमयी गीता सर्वदेवमयो हरिः। सर्वतीर्थमयी गंगे'त्याद्युक्तेर्माहात्म्यं तु गीतायाः परत्वबोधकं पाद्मेऽष्टादशाध्यायैरुक्तमतो विरम्यते॥ इति श्रीगीतापक्षः॥ ८५॥

अथ वेदपक्षः। वयं तं वेदं सदा धीमहि। तं कं यत्र वेदे त्रयाणामृग्यजुःसाम्नां सर्गोऽमृषा। दृष्टान्तस्तूक्तप्राय एव। यतो यस्माद्वेदात्स्वराट् ब्रह्मा आद्यस्य प्राक्कल्पीयस्य इः कामस्तद्धेतुभूतं कर्म वा तीर्य्यतेऽनेनेतीतरं ज्ञानम्। 'सर्वे कामाश्च कर्माणि ज्ञानं सत्यंतमाययुरि'त्यभियुक्तोक्तेः। तस्येतरतः। षष्ठ्यर्थे तसिः। जन्म साक्षात्कारमन्वयात्। अर्थेषु सृष्ट्युत्पत्त्युपयोगिष्वभिज्ञश्चाभूत् 'वेदं लब्ध्वा हरेर्ब्रह्मा चक्रे सृष्टिं यथोदिताम्। वेदात्सर्वार्थमाज्ञाय जातो विज्ञतरो विधिरि'त्यादिपुराणात्। 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।' इति श्रुतेर्धाता यथापूर्वमकल्पयदिति श्रुतेश्च। तमेवार्थं स्थूणानिखननन्यायेनाह। यो वेदः आदिकवये ब्रह्मणे ब्रह्म ज्ञानं तेने। त्रैकालिकं ज्ञानं ब्रह्मणो वेदाभ्यासादेव जातं तस्यैव तद्धेतुत्वात्तदुक्तं योगियाज्ञवल्क्येन 'वेद एव सदाभ्यस्यो वेदश्चक्षुः सनातनः। भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिध्यती'ति। यस्मिन्वेदे सूरयोपि तात्पर्यानभिज्ञतया मुह्यन्ति। वेदस्य चश्वरात्मत्वात्तत्र मुह्यन्ति सूरय इति वक्ष्यमाणत्वात्। किंभूतं स्वेन धाम्ना तेजसा निरस्तं स्वसेविनां कुहकं महापातकादिरूपं येन तम्। 'वेदाभ्यासरतं शान्तं महायज्ञक्रियापरम्। न स्पृशंतीह पापानि महापातकजान्यपी'ति याज्ञवल्क्योक्तेः। पुनः सत्यं कदापि नो नष्टम्। 'तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिर'इति श्रुतिस्त्वाविर्भावपरा। 'शिवाद्या ऋषिपर्यंताः स्मर्त्तारोस्य न कर्तृकाः' इति स्मृतेः। 'अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा। आदौ वेदमयी दिव्ये'ति स्मृतेश्च 'वाचा विरूपनित्यये'ति श्रुतेश्च। 'अस्य महतो भूतस्य निःश्वसितमेतैतद्यदृग्वेदो यजुर्वेदः सामवेद'इति श्रुतेर्निःश्वसितरूपत्वादपि कर्तृवर्जित एव वेदः। नहि पुरुषेण निश्श्वासः क्रियते, किन्तु स्वतः सिद्ध एव सम्भवति। एतेन यथा प्राणसम्बन्धशून्यो देहोऽकिञ्चित्करस्तथा वेदं विहायेश्वरोपीति सिद्धम्। पुनः परं पररूपत्वात्। तद्वक्ष्यति 'वेदो नारायणः साक्षात्स्वयंभूरिति शुश्रुम।' इति। इहापि स्वयंभूत्वोक्त्या कर्तृशून्यतोक्ता तस्य। ब्राह्मण्यापादकत्वाद्वा परम्। तथाच यमः 'न शूद्रो वृषलो नाम वेदो हि वृष उच्यते। यस्य विप्रस्य तेनालं स वै वृषल उच्यते॥ तस्माद्वृषलभीतेन ब्राह्मणेन प्रयत्नतः। एकदेशोप्यध्येतव्यो यदि सर्वो न शक्यते॥' इति। मनुरपि 'वेदमेव सदाभ्यस्येत्तपस्तप्स्यन् द्विजोत्तमः। वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते॥' याज्ञवल्क्योपि 'यज्ञानां तपसां चैव शुभानां चैव कर्मणाम्। वेद एव द्विजातीनां निःश्रेयसकरः परः॥' इति। किञ्च 'योधीत्य विधिवद्विप्रो वेदार्थं न विचारयेत्। स सान्वयः शूद्रसमः पात्रतां न प्रपद्यते॥' इति कौर्मोक्तेः। 'पाठमात्रवतो नित्यं द्विजातींश्चार्थवर्जितान्। पशूनिव च तान्प्राज्ञो वाङ्मात्रेणापि नार्चयेत्॥ वेदस्याध्ययनं सर्वं धर्मशास्त्रस्य वापि यत्। अजानतार्थं तत्सर्वं तुषाणां कण्डनं यथा॥ यथा पशुर्भारवाही न तस्य लभते फलम्। द्विजस्तथार्थानभिज्ञो निवेदफलमश्नुते॥' इति व्यासस्मृतेश्च सार्थ एव वेदो ध्येय इत्यलम्॥ इति वेदपक्षः॥ ८६॥

[१] स्वयं पद्मनाभस्येत्युक्तेः श्रीकृष्णाख्यावतारित्वं ज्ञायते, नत्ववतारत्वमिति।

अथ गायत्रीपक्षः ॥ वयं तं गायत्रीमंत्रं सदा हृदा धीमहि। तं कं यत्र यस्यां गायत्र्यां त्रयाणां वेदानामृगादीनां सर्गो रचनाऽमृषा। तस्या वेदमातृत्वात् 'गायत्री वेदजननी गायत्री लोकदायिनी'ति कूर्मोक्तेः। दृष्टांतः पूर्ववत्। यतो यस्या अन्वयात्संबंधात् स्वेनानन्यापेक्षत्वेन राजते इति स्वराट् ब्राह्मण आद्यस्य वेदस्य जन्म, लभते इति शेषः। गृहीतगायत्रीकस्यैव सर्वकर्मस्वधिकारात्। 'गायत्र्या ग्रहणेनैव द्विजत्वं जायते द्विजाः। गायत्रीग्रहणं कार्यमौपनायनरीतितः ॥ ततः कर्माधिकारी स्यादन्यथा शूद्रसंमतः ॥' इति स्मृतिरहस्योक्तेः। 'आषोडशाच्च द्वाविंशाच्चतुर्विंशाच्च वत्सरान्। ब्रह्मक्षत्रविशां काल औपनायनिकः स्मृतः ॥ अत ऊर्ध्वं पतंत्येत' इति याज्ञवल्क्येन तत्कालोपि विहितः। स च गौण एव मुख्यस्त्वाश्वलायनेनोक्तः 'गर्भाष्टमेष्टमेवाब्दे पंचमे सप्तमेपि वा। द्विजत्वं प्राप्नुयाद्विप्रो वर्षे त्वेकादशे नृपः ॥ मनुनापि 'ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे। राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोष्टमे ॥' इति। गौणकालातिक्रमे 'अग्रजा बाहुजा वैश्याः स्वावधेरूर्ध्वमब्दतः। अकृतोपनयाः सर्वे वृषला एव ते स्मृताः ॥' इति। 'शुद्धिर्नैव गुरोर्यस्य वर्षे प्राप्तेष्टमे यदि। तस्योपनयनं कार्यं चैत्रे मीनगते रवौ ॥ जन्मभादष्टमे सिंहे नीचे वा शत्रुभे गुरौ। मौंजीबंधः शुभः प्रोक्तश्चैत्रेमीनगते रवावि'ति बहुवक्तव्यमत्रास्त्यत उपरम्यते। 'विशिखो व्युपवीतश्च यत् करोति न तत्कृतमि'ति निर्णयसिन्ध्वाद्युक्तेरपि। दक्षेणापि 'संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु। यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेदि'त्युक्तम्। संध्यायामपि कृतोपनयनस्यैवाधिकार इति प्रसिद्धेः। 'शूद्रो वानुपनीतो वा पठेद्वा शृणुयाच्च यः। वेदवाक्यं स कांक्षेत यद्धुं स्वां मातरं हठात् ॥' किंच 'यस्तात्पर्यमविज्ञाय व्याख्यां कुर्यान्निजेच्छया। श्रुतेः स मात्रा यभति तं दृष्ट्वा स्नानमाचरेदि'ति संहितोक्तेश्च। गायत्रीं गृहीत्वैव विधिना कर्माधिकारी नान्यथेति भावः। पाराशर्यां तु 'गायत्रीं यो न जानाति ज्ञात्वोपास्ते न यो द्विजः। नामधारकमात्रोसौ न विप्रः शूद्र एव सः ॥' इति। प्रकृतमनुसरामः। इतरत इतरावपि क्षत्रियवैश्यावप्याद्यस्य जन्म लभेते इत्यर्थः। यो मन्त्रोऽर्थेष्वभिज्ञः सर्वार्थसम्पादकत्वात्। 'चतुर्वर्गप्रदा देवी गायत्री भक्तवत्सले'ति ब्राह्मणसर्वस्वात्। यश्च मंत्रः कवये विश्वामित्राय आदि ब्राह्मचरुजातत्वात्तस्य तत्प्राक्सिद्धमेव ब्रह्म ब्राह्मणत्वं तेने। ब्रह्मेति भावप्रधानो निर्देशः। गायत्र्यनुष्ठानादेव विश्वामित्रो वशिष्ठस्पर्द्धया ब्राह्मण्यमापेति प्रसिद्धं पुराणांतरे। वक्ष्यत्यपि 'गाधेरभून्महातेजास्समिद्ध इव पावकः। तपसा क्षात्रमुत्सृज्य यो लेभे ब्रह्मवर्चसम् ॥' इति। तपसा गायत्र्यनुष्ठानरूपेण तस्यैव ब्राह्मण्यापादकत्वात्। योगियाज्ञवल्क्येनोक्तमपि 'एषा हि त्रिपदा देवी शब्दब्रह्ममयी शुभा। तपसा महता दृष्टा विश्वामित्रेण धीमते'ति 'अज्ञात्वा चैव गायत्रीं ब्राह्मण्यादेव हीयते। ज्ञात्वा चैव तु गायत्रीं ब्राह्मण्यं प्रतिपद्यते ॥' इति च। 'गायत्र्या ब्राह्मणमसृजदि'ति श्रुतेश्च। यस्मिन्ब्रह्मणि ब्रह्मत्वे गायत्र्यां वा नरसामान्यबुद्ध्याऽक्षरसामान्यमत्या वा सूरयो नास्तिकप्रभृतयो मुह्यंति। ननु किं ब्राह्मणत्वं तत्राह ब्रह्ममंत्राभिमंत्रितचर्वादिजन्यत्वब्राह्मणोयमिति ब्राह्मणवाक्याप्यत्वस्वेच्छापुरःसरं ब्रह्मवीर्यादन्यक्षेत्रोत्पत्तिमत्त्वब्रह्मवीर्याद् ब्राह्मण्यामुत्पत्तिमत्त्वान्यतमत्वं ब्राह्मणत्वम्। ब्राह्मण्यां ब्रह्मवीर्यादुत्पत्तिमत्त्वस्य लक्षणत्वाभ्युपगमे ऋष्यशृंगव्यासादीनां ब्राह्मणत्वं न स्यात्। ऋष्यशृंगस्य मृग्यां विभांडकोद्भूतत्वात्, व्यासस्य दाशकन्यायां पराशरोद्भूतत्वाच्च। ब्रह्मवीर्योद्भूतत्वस्य लक्षणत्वे विश्वामित्रादेर्ब्राह्मणत्वं न स्यात्। धृतराष्ट्रादेस्तस्यादेव। विश्वामित्रादेर्गाध्यादिनृपोद्भूतत्वान् धृतराष्ट्रादेर्व्यासोद्भूतत्वाच्च। अत एवं लक्षणं कृतं व्यासर्ष्यशृङ्गयोः स्वेच्छयान्यक्षेत्रोद्भूतत्वाद् ब्राह्मणत्वं धृतराष्ट्रादेश्च परेच्छयान्यक्षेत्रोद्भूतत्वान्न ब्राह्मणत्वं विश्वामित्रादेर्ब्राह्ममन्त्राभिमन्त्रितचर्वादिजन्यत्वाद् ब्राह्मणत्वमपरेषां ब्राह्मण्यां ब्रह्मवीर्योद्भूतत्वाद् ब्राह्मणत्वं वीतहोत्रादीनां भृग्वादिवचनाप्यं ब्राह्मणत्वं, वस्तुतस्तु 'ब्रह्मक्षेत्रं ब्रह्मवीर्यं संस्कारा ब्रह्मसंभवाः। ब्राह्मणाचरणाद् ब्रह्मविद्याभिर्ब्राह्मणो भवेदि'ति स्मृतेः। पञ्चलक्षणलक्षितस्यैव मुख्यं ब्राह्मणत्वमिति ध्येयं मनीषिभिरिति भावः। किञ्च तद् ब्राह्मण्यं यत्नात्पालयेदित्युक्तं भारते शुकानुशासने। 'संपतन्मोहजालानि कदाचिच्चेह मानुषे। ब्राह्मण्यं लभते जन्तुस्तत्पुत्र परिपालय ॥ ब्राह्मणस्य च देहोयं क्षुद्रकामाय नेष्यते। इह क्लेशाय तपसे प्रेत्य त्वनुपमं सुखम् ॥ ब्राह्मण्यं बहुभिरवाप्यते तपोभिस्तल्लब्ध्वा नरतपरेण हेलितव्यम्। स्वाध्याये तपसि यमे च नित्ययुक्तः क्षेमार्थी कुशलपरः सदा यतस्वे'ति। ब्राह्मण्यनाशकानि वाममार्गप्रवृत्तितप्तमुद्राधृतियवनीसंगसुरापानादीनि बहूनि सन्ति, तानि च कौशिकसंहितीयभागवतमाहात्म्ये उक्तानि। तत्र वाममार्गतप्तमुद्राधारणे च शूद्रपरे एव। ब्राह्मणादीनां तत्र प्रवृत्तिस्तु जन्मांतरीयपापादेव। 'अश्रौते वांकने कामे प्रवृत्तिः पूर्वपापतः' इति वासिष्ठलैंगोक्तेः। 'शापाद्वा गौतमादीनां पापाद्वा महतो नराः। ये गता वेदबाह्यत्वं ये च संकीर्णयोनिजाः। तेऽधिक्रियन्ते तन्त्रेषु स्त्रीशूद्राद्या यथायथम्। अनुग्रहार्थमेतेषामागमा निर्मिताः पुरा ॥ तस्माद्वै वेदबाह्यानां रक्षणार्थं च पापिनाम्। विमोहनाय शास्त्राणि करिष्यामो वृषध्वज ॥ एवं संचोदितो रुद्रो माधवेन मुरारिणा। चकार मोहशास्त्राणि केशवोपि शिवेरितः ॥' इति लिंगार्चनचंद्रिकोक्तेर्गौतमशापाद्वा। तदुक्तं वाराहे शिवेन 'पुरा सर्वजनानां तु मोक्षमार्गे व्यवस्थितिम्। दृष्ट्वा स्वर्गादिवैफल्यं देवैरुक्तः स्वयं हरिः ॥ भगवन्सृष्टिनाशं त्वं शमयानुग्रहेण नः। तदाहं विष्णुना प्रोक्तो मोहशास्त्रमकल्पयम् ॥ वेदमार्गविरुद्धं यत्तद्रौद्रं मत्प्रवर्त्तितम्। मदट्टहासपतिता महा तोयस्य विंदवः ॥ असंख्यातास्तु ते रौद्रा भविष्यन्ति कलौ युगे। कल्पयिष्यन्ति शास्त्राणि सुरा मांसप्रिया नराः। मयापि कल्पिता त्रिणागाख्या संहिता पुरा ॥ निःश्वासाख्या वेदबाह्या वामाचारप्रवर्त्तिका। तत्र मल्लासनगता मदाचाराश्च ये द्विजाः ॥ तेषां

वासस्तु नरके भविष्यति न संशयः। शूद्रैस्तदधमैर्ग्राह्य आचारो वामसंज्ञितः ।। न द्विजैस्सर्वथा ग्राह्य इति सत्यं वचो मम। गौतमेन च ये शप्तास्ते द्विजा वाममार्गगाः ।। भविष्यन्ति श्रुतिभ्रष्टा ज्ञेयास्ते नरकौकसः।' इति। तप्तमुद्राधृतिस्तु कुंडगोलविप्रपरेत्यपि केचिद्वदन्ति। 'कुंडा गोलास्तु ये विप्रास्तेषां कार्यो ह्ययं विधिः। तप्तमुद्राधारणादिर्न शुद्धानां कदाचन ।। तांत्रिकत्वाद् भ्रष्टविप्रैर्गृह्यते पूर्वपापतः ।। यदस्य वैदिकत्वोक्तिस्तन्निर्मूला विचारतः। न विप्रास्तांत्रिकाः शुद्धा वैदिकास्ते सदैव हि ।। तांत्रिकेष्वधिकारस्तु भ्रष्टविप्रस्य जायते ।।' इति संहितोक्तेः। सूतसंहितायां तु 'विष्ण्वागमादितन्त्रेषु दीक्षितानां विधीयते। शंखचक्रगदापूर्वैरंकनं नान्यदेहिनाम् ।। दीक्षितानां तु तन्त्रेषु नराणामंकनं द्विजाः। उपकारकमेवोक्तं क्रमेण मुनिपुंगवाः ।। श्रुतिपथगलितानां मानुषाणां तु तन्त्रं गुरुगुरुरखिलेशः सर्वविस्राह शंभुः। श्रुतिपथनिरतानामस्ति नैवात्र किंचिद्धितकरमिह सर्वं पुष्कलं सत्यमुक्तम् ।। श्रुतिपथगलितानां मानुषाणां तु तन्त्रे हरिरपि मुनिमुख्याः प्राह धर्मं स्वकीये। विधिरपि मनुजानामाह वर्णाश्रमांश्च श्रुतिपथगलितानामेव तन्त्रे स्वकीये ।। श्रुतिपथगमितानां तेन संसेवनीयाः श्रुतिपथसममार्गो नैव सत्यं मयोक्तमि'ति। एतेन श्रौतमार्ग एव विप्रैः सेव्यो न तान्त्रिकादिः। क्षत्रियवैश्याभ्यां त्वन्योपीति सूचितम्। 'श्रौतार्चनं तु विप्राणां विशेषेण भवेत्सदा। श्रौतागमार्चनं क्षत्रे वैश्ये केवलमागममि'ति। मन्त्रराजानुष्टुब्विधाने। अत्र केवलपदं वैश्यस्य वैदिकत्वं निरस्यतीति चिंत्यम्। तस्यापि वैदिकत्वं श्रुतिनिर्मितत्वाद् 'गायत्र्या ब्राह्मणमसृजत्त्रिष्टुभा राजन्यं जगत्या वैश्यमि'ति श्रुतेः। किंभूतं स्वेन धाम्ना तेजसा निरस्तः कुहको गायतां प्रेतत्वादिलक्षणो येन तम्। एतेन ये गायत्रीं शप्तामाहुस्ते निरस्ताः। नहि शप्ता गायत्री प्रेतत्वं निवर्त्तयितुं ब्रह्म प्रापयितुं वा समर्था भवेत्। यच्च शापमोचनादि दृश्यते तत्सर्वमज्ञकल्पितमेवेति ध्येयं सुधिया। किञ्च प्रष्टव्याः किं गायत्रीति पदस्य, शापश्चतुर्विंशत्यक्षरात्मकतन्मन्त्रस्य वा, प्रतिवर्णं, वै तन्मन्त्राधिष्ठातुर्देवताविशेषस्य, वैतज्जपफलस्य वेति विचार्यमाणे शापो नोपलभ्यते। तथाहि नाद्यः, तदश्रुतेः। गायत्रीतिपदं शप्तमिति कुत्रापि न श्रूयते। इत्थमेव द्वितीयपक्षोऽपि निरसनीयः। तृतीये शापांगीकारे यत्रान्यमन्त्रेष्वपि ते वर्णा भवेयुस्तेपि गरसंसृष्टान्नैकदेशेपि सर्वमन्नं सविषमितिवच्छप्ताः स्युस्तेन सर्वेषां शापमोक्षाद्यन्वेषणीयं स्यादतस्तृतीयोऽपि न, सर्वमन्त्राणां शापमोक्षानुपलब्धेः। चतुर्थे त्वेतन्मन्त्राधिष्ठातृदेवं परब्रह्मैव, तस्यैवात्र प्रतिपादनान्नहि परब्रह्मणः शापादि श्रूयते कुत्रापि। पंचमोऽपि जपफलस्य प्रत्यक्षसिद्धत्वान्न संभवतीति। तथा च त एव शप्ता विज्ञेया ये गायत्रीं शप्तां वदंति। ये चास्य मुद्रान्यासादि करणं वदन्ति न ते वैदिकास्ते च वेदभ्रष्टास्तांत्रिका एव। न्यासादयः प्रायो वैदिकेषु न संतीत्यलं प्रपंचेन। ऋहादिपदाज्जननादिदशमन्त्रसंस्कारा अकडमादिविचारश्च ग्राह्यः। पुनः सत्यं परब्रह्मरूपत्वात्। गायत्री वा इदं सर्वमिति श्रुतेः। 'गायत्री परमं तत्त्वं गायत्री परमा गतिः। सर्वामरैरियं ध्याता सर्वं व्याप्तं तया जगद्'इति बृहत्पाराशरोक्तेश्च। पुनः परं श्रेष्ठं द्विजातेर्द्वितीयजन्महेतुत्वात्प्रातरादिसवनत्रयव्यापित्वाच्च। त्रिष्टुब्जगतीभ्यां सोमाहरणार्थं गताभ्यां सोमो न लब्धोऽक्षराणि च हारितानि जगत्या त्रीणि त्रिष्टुभैकमिति चत्वारि तैरक्षरैः सह सोमस्याहरणेन सर्वश्रेष्ठा गायत्री। तथाहि 'चतुरक्षराणि ह वा अग्रे छन्दांस्यासुस्ततो जगतीसोममच्छापतत् त्रीण्यक्षराणि हित्वा ततस्त्रिष्टुप्सोममच्छापतत्सैकमक्षरं हित्वा जगाम ततो गायत्री सोममच्छापतत्सा तानि चाक्षराण्याहरंत्यागच्छत्सोमं च ततोऽष्टाक्षरा गायत्री'त्युपक्रम्य 'तदाहुर्गायत्राणि वै सर्वाणि सवनानि गायत्री ह्येवैदुपसृजमानैरि'ति शतपथश्रुतेः। यद्वा सर्वजप्येभ्यूत्कृष्टतरम्। 'जप्यानामेव मन्त्राणां गायत्री परमो जपः। गायत्री च तथा वेदा ब्रह्मणा तोलिता पुरा। वेदेभ्यः सषडङ्गेभ्यो गायत्र्यतिगरीयसी ।।' इति। जपस्त्वस्याः 'प्रणवो भूर्भुवस्स्वश्च पुनः प्रणवसंयुताम्। अन्त्योङ्कारसमायुक्तां मन्यन्ते मुनयोऽपरे ।। प्रणवोन्ते तथाचादावाहुरन्ये जपक्रमम्। तदाद्यां च तदन्तां च कुर्यात्प्रणवसंपुटाम् ।। आद्यन्तरक्षितां कुर्यादिति पाराशरोऽब्रवीत् ।।' जपार्थं माला तु स्फटिकेन्द्राक्षरुद्राक्षपुत्रजीवसमुद्भवैः। अक्षमाला प्रकर्तव्या प्रशस्ता चोत्तरोत्तरा ।।' तत्संस्कारोपि 'गंगांभस्स्नापिता माला संस्कृता स्यान्न संशयः।' इति ब्रह्मवैवर्ते। जपसंख्या तु 'लक्षां कुशीदं सिंदूरं गोमयं च करीषजम्। विलोड्य गुटिकाः कृत्वा जपसंख्यां प्रकारयेत् ।।' इति। 'नाक्षतैर्हस्तपर्वैर्वा न पुष्पैर्न च धान्यकैः। जपसंख्यां प्रकुर्वीत कृता चेन्निःफला भवेदि'ति। किञ्च 'पर्वभिस्तु जपेद्देवीं माला काम्यजपे स्मृता। गायत्र्या वेदमूलत्वाद्वेदः पर्वसु गीयते ।।' इति। गायत्रीकल्पे 'तिस्रोङ्गुल्यस्त्रिपर्वाणो मध्यमा चैकपर्विका। पर्वद्वयं मध्यमाया मेरुत्वेन प्रकल्पयेत् ।। अनामामध्यमारभ्य कनिष्ठादित एव च। तर्जनीमूलपर्यन्तं दशपर्वसु संजपेत् ।। अंगुल्यग्रं च यज्जप्तं यज्जप्तं मेरुलंघने। पर्वसंधिषु यज्जप्तं तत्सर्वं निष्फलं भवेत् ।। गणनाविधिमुल्लंघ्य यो जपेत्तु जपं नरः। गृह्णन्ति राक्षसास्तेन गणयेत्सर्वदा बुधः ।।' इति गायत्रीजपो विहित एव। निषेधस्तु मालासंख्याविषय एवेति। वृद्धमनुना 'वस्त्रेणाच्छाद्य तु करं दक्षिणं यः सदा जपेत्। तस्य स्यात्सफलं जप्यं तद्धीनमफलं विदुरि'ति प्रोक्तम्। एतदेव गोमुखीयन्त्रे बीजम्। तन्मानमपि शिष्टैरुक्तम् 'हृदयान्नाभिपर्यन्तं लम्बमाना जपस्थली। शरचन्द्रांगुलैर्दीर्घा करावेशसमायता ।। कर्तव्या गोमुखाकारा विद्वद्भिरविकादिने'ति। ननु पूर्वं न्यासादि तांत्रिकमुक्तं कथं तर्हि पराशरादिभिर्वेदानुयायिभिस्तल्लिखितम्। तदपि गायत्रीदीक्षाव्रतामय। दीक्षात्र तांत्रिकविधिकृता नतूपनयनविधिना वैदिकी। सातु प्रपंचसारे एकोनत्रिंशपटले गायत्रीमन्त्रविधौ उक्ता। सब्रह्मविष्णुरुद्रैश्च सस्वरैः ससदाशिवैः। ससर्वात्माङ्गैः कुर्यादङ्गन्यासं समाहितः।' इत्यनेन न्यासानुक्त्वा 'एवं कृत्वा तु सिद्ध्यर्थं गायत्रीं दीक्षितो जपेदिति। 'व्याहृतित्रयसंयुक्तां गायत्रीं दीक्षितो जपेदि' ति शारदायामपि तथैव। तेन शुद्धवैदिकानां तन्न।

१. उपनयनं वा पापगायत्रीकाणाम्।

एपोङ्गन्यासः, एवमप्येके नेच्छंति सहि विधिरवैदिक इत्याश्वलायनगृह्यपरिशिष्टोक्तेः। वैदिकैस्तु छंदआद्येवमंत्रेपु वेदितव्यं न न्यासादि तथा च छंदोगब्राह्मणम्–'योह वाऽविदितार्षेयच्छंदोदैवतब्राह्मणेन मंत्रेण याजयति वाध्यापयति वा स्थाणुं गच्छति गर्त्तं वापद्यते प्रमीयते पापीयान्भवति 'यातयामान्यस्य छंदांसि भवंति अथ यो मंत्रे मंत्रे वेद सर्वमाप्नोति अयातयामान्यस्य छंदांसि भवंति तस्मान्मंत्रे मंत्रे विद्यादि'ति। तांत्रिक्यपि दीक्षा विष्णुमंत्रादीनां विहितादेव गुरोर्ग्राह्या न त्वविहितात्तदप्यत्र मंत्रप्रसंगादाह। 'अदीक्षितस्य वामोरु कृतं सर्वं निरर्थकम्। पशुयोनिमवाप्नोति दीक्षाविरहितो नरः॥ द्विजानामनुपेतानां स्वकर्माध्ययनादिपु। यथाधिकारो नास्तीह स्याच्चोपनयनादनु॥ तथात्र दीक्षितानां तु मंत्रतंत्रार्चनादिपु। नाधिकारोस्त्यतः कुर्यादात्मानं शिवसंस्तुतमि'-त्याद्युक्तेर्दीक्षापि ग्राह्यैव। साच गृहस्थेन गृहस्थादेव गुरोर्ग्राह्या। तदुक्तम् 'न गृहस्थैर्गृहीतव्यो ह्यगृहस्थाद् गुरोर्मनुः। विप्रादेव सदा ग्राह्यो गुरुर्नान्यो नृणामिह॥ तत्त्वज्ञो यंत्रमंत्राणां पुरश्चर्यारतः सदा। तपस्वी सत्यवादी च गृहस्थो गुरुरुच्यते॥' इत्यगस्त्यसंहितायाम्। पाद्मेपि 'महाभागवतश्रेष्ठो ब्राह्मणो वै गुरुर्नृणाम्। सर्वेषामेव लोकानामसौ पूज्यो यथा हरिः॥ आचार्यो वेदसंपन्नो विष्णुभक्तो विमत्सरः। ब्राह्मणो वीतरागश्च क्रोधलोभविवर्जितः॥' इति। वक्ष्यत्यपि तृतीये 'वर्णानामाश्रमाणां च मुख्योऽभूद्ब्राह्मणो गुरुरि'ति। वाराहेपि 'गर्भाधानादिकाः कृत्वा पश्चाद्दीक्षणमाचरेत्। तदर्थं ॐ नमो भगवते सर्वरूपिणे हुं फट् स्वाहा। अनेन षोडशार्णेन देवदेवस्य सन्निधौ। गर्भाधानादिकाः सर्वाः क्रियाः समवधारयेत्॥ त्रिभिराहुतिभिर्वह्नौ ततो दीक्षणमारभेत्। विप्राद् गृहस्थात्संग्राह्या दीक्षा नान्यनरात्प्रिये। गृहस्थेन विशेषेण देवताभावसिद्धये॥ आचार्यत्वं त्वाद्यवर्णे मया संस्थापितं पुरा॥' इति। किंच हरिभक्तिप्राप्त्यर्थं श्रीमधुसूदनस्वामिनापि भक्तिरसायनग्रन्थे स्फुटमेव श्रुतिरुक्ता 'ब्राह्मणं ब्रह्मिष्ठं गुरुमुपासीते'ति। तदर्थस्तु ब्राह्मणं ब्राह्मणत्वजातिविशिष्टं ब्रह्म वेदोस्त्यधीतत्वेनास्यास्मिन्वेति ब्रह्मी यद्वा ब्रह्म परमात्मास्त्युपास्यत्वेनास्येति ब्रह्मी, अतिशयेन ब्रह्मी ब्रह्मिष्ठः, इष्ठप्रत्यये मतुबादिलोपोस्तीति शाब्दिकाः।.तथाच श्रोत्रियत्वं ब्रह्मनिष्ठत्वं च ब्राह्मणविशेषणमेवातो नेतरो गुरुर्विधेयः। 'अगुरुर्मनुजोऽस्पृश्योऽसम्भाष्यो गुरुवर्जितः। यत्किंचित्कुरुते पुण्यं तद्याति वाष्कलेयकम्॥ गुरुं विना न संसारस्तीर्यते वहुसाधनैः। तस्माद्वेदविदं विप्रं ज्येष्ठाश्रमगतं नरः॥ गुरुं कुर्यात्प्रयत्नेन पूजयित्वा विधानतः॥' इति। ज्येष्ठाश्रमगतं गृहस्थमित्यर्थः। 'देवैश्चैव मनुष्यैश्च तिर्यग्भिश्चोपजीव्यते। गृहस्थः प्रत्यहं यस्मात्तस्माज्ज्येष्ठो गृहाश्रमी'ति दत्तस्मृतेः। श्रुतिरपि श्रोत्रियं ब्रह्मनिष्ठमित्याह। श्रोत्रियत्वमपि ब्राह्मणे एव पर्यवस्यति 'अन्योन्यं गुरवो विप्रा न ह्येषामपरो गुरुः। विप्रस्तु सर्ववर्णानामाश्रमाणां च वै गुरुः॥ सेव्य एव हि सर्वेषां विप्रो राजर्षिसत्तम। देवानां दानवानां च मनुष्याणां तु का कथा॥ आरोपयंति ये विप्रे सेवकत्वं नराधमाः। ज्ञेयास्ते सर्वथा पापा अंते निरयवासिनः॥' इति भविष्यादावपि। विपक्षे दोषमाह 'यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनाम्। विविक्ताश्रमिणां दीक्षा न सा कल्याणदायिके'ति गणेशविमर्शिन्याम्। ब्राह्मे 'ब्राह्मणः स्वेतरान्वर्णान्गुरून्मोहात्करोति यः। स याति नरकं घोरं विपन्नोपि भवेद् ध्रुवम्॥' स्कांदे 'ब्राह्मणो नीचवर्णेभ्यो मंत्रग्रहणमाचरन्। न मंत्रफलमाप्नोति श्वयोनिं चाधिगच्छति॥' वाराहे 'उत्तमायाधमो वर्णो मन्त्रं यस्तु प्रयच्छति। स याति पतितो भूत्वा श्वचांडालादियोनिपु॥ ब्राह्मणः क्षत्रियो वापि वैश्यो वा मोहमाश्रितः। न कुर्यान्नीचवर्णेभ्यो मंत्रादानं कदाचन॥' भविष्ये 'शृणु राजेन्द्र वक्ष्यामि मंत्रग्रहणमुत्तमम्। ब्राह्मणं श्रोत्रियं शुद्धं नारायणपरायणम्॥ प्रणम्य विधिवद्भक्त्या मंत्रं गृह्णीत संयतः। यो मोहादन्यवर्णेभ्यो मंत्रं गृह्णाति कर्हिचित्॥ वेषांतरमितेभ्योपि न स कल्याणभाग्भवेत्॥ अतः कार्यो गुरुर्विप्रो गृहस्थो गृहिभिः सदे'ति॥ 'वर्णोत्कृष्टो न लभते हीनवर्णस्य शिष्यताम्। हीनवर्णोपि न गुरुरुच्चवर्णस्य जायते॥ वर्णोत्कृष्टो हीनवर्णं गुरुं मोहाद्यदाचरेत्। प्रायश्चित्तं तदा कृत्वा गुरुमन्यं समाश्रयेत्॥ अन्यथा गुरुशिष्यौ तौ जायेते नरकौकसौ॥ अतो ज्ञात्वैव कर्त्तव्यो गुरुशिष्योपि धीमते'ति विश्वामित्रीयसंहितायामित्यलं पल्लवितेन। किं चोपनेतारोपि गार्ग्येणोक्ताः। 'पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः। उपनायेऽधिकारी स्यात्पूर्वाभावे परः परः॥' इति। उक्ताधिकार्यभावे व्यासः 'वेदैकनिष्ठं धर्मज्ञं कुलीनं श्रोत्रियं शुचिम्। स्वशाखीयमनालस्यं विप्रमाचार्यमाश्रयेदि'ति। किं बहुना॥ इति गायत्रीपक्षः॥ ८७॥

अथ गवां कुलस्य पक्षमाह॥ वयं तद्गवां कुलं सदा हृदा धीमहि। तत्किं यत्र त्रयाणां देवानां सर्गः स्थितिरमृषा। 'शृंगमूले स्थितो ब्रह्मा शृंगमध्ये तु केशवः। शृंगाग्रे शंकरं विद्यात्त्रयो देवाः प्रतिष्ठिताः॥' इति पराशरोक्तेरत्रावयवावयविनोरभेदोपचाराच्छृंगस्था गोस्था एव तात्स्थ्यात्ताच्छब्द्यमिति न्यायाद्वा। दृष्टांतस्तूक्तवत्। यतो यस्य सकाशादाद्यस्य धर्माधर्मयोरुभयोराद्यस्य धर्मस्य जन्म यद्वार्थेष्वाद्यस्य धर्मस्य जन्म 'धर्मो हि वृषरूपधृगि'ति वक्ष्यमाणत्वात्। वृषस्य जन्मेत्यर्थः। 'धर्मोयं भूतले साक्षाद्ब्रह्मणा ह्यवतारितः। त्रैलोक्यधारणायालमन्नानां च प्रसूतये॥' इति पराशरोपि प्राह। किंच यतो यस्यान्वयात्सेवनादितरतः इतराण्यवेदविहितानि परस्त्रीसंगमद्यपानादीनि तनोति विस्तारयतीतरः स एवेतरतः पापकर्मा स्वराट् भवति। स्वरशब्दोत्र गोलोकपरः स्वर्गोलोके राजत इति स्वराट्। 'गवां सेवनतो नित्यं महापापरतोपि यः। सोपि गोलोकमाप्नोति किमु पुण्यरतो नरः॥' इति गोमाहात्म्योक्तेः। यद्वा 'गां संस्मृत्य नमस्कृत्य कुर्यात्तां च प्रदक्षिणाम्। प्रदक्षिणीकृता तेन सप्तद्वीपा वसुंधरा॥

१. स्वामकृत इति व्याख्यातं भाष्यकृद्भिरिति।

तृणोदकादिसंयुक्तं यो ददाति गवाह्निकम्। सोऽश्वमेधसमं पुण्यं लभते नात्र संशयः॥ गवां कंडूयनं धूमं गोप्रदानसमं भवेदि'ति पराशरोक्तेरश्वमेधादिफलं स्वर्गं प्राप्नोतीति भावः। अभिज्ञोतिनिपुणो हि पराशरः कवये सुव्रतसंज्ञर्षये आदिदेवविहितं यतश्च यस्य ब्रह्म महत्त्वं तेने। तथाहि "पातकानि कुतस्तेषां येषां गृहमलंकृतम्। गोभिस्सबालवत्साभिः सदा स्त्रीभिरिव स्वयम्॥ ब्राह्मणानां गवां चैव कुलमेकं द्विधा कृतम्। तिष्ठंति यत्र मंत्राश्च यत्र संति हवींषि च॥ गोभिर्यज्ञाः प्रवर्त्तंते गोभिर्वेदाः प्रवर्द्धिताः। गोभिर्वेदाः समुद्गीर्णाः सषडंगपदक्रमाः॥" इत्यादि बह्वस्ति। यस्मिन् गोकुलमहत्त्वे सूरयो नास्तिका मुह्यंति अर्थवादबुद्धिं कुर्वंति। यद्वा यतो यस्य सकाशादाद्यस्य वेदस्य जन्माभूत्। इतरेषां तदङ्गानां च जन्माभूत्। 'गोभिर्वेदाः समुद्गीर्णाः सषडंगपदक्रमाः' इति पराशरोक्तेः। यत्कुलं स्वेनैव राजत इति स्वराट्। अन्येतु गोकृतसस्यादिनेति भावः। यतोऽन्वयादर्थेषु बहुविधद्रव्येष्वभिज्ञः कोर्थस्तदनुभविता स्यात्। किं कर्तुमादिकविं श्रीकृष्णं प्राप्तुम्। 'श्रीकृष्णः प्राप्यते विप्र नित्यं गोकुलसेवया' इत्यादिपुराणात्। यद्वा यस्मिन् गोकुले सूरयो ये ते न मुह्यंति अन्ये तु पामराः पशुसामान्यधिया मुह्यंत्येवेति। किंभूतं स्वेन धाम्नानुभावेन निरस्तं निजसेविनां कुहकं दरिद्रलक्षणं वा येन तत्तथा। तीर्थरूपत्वाल्लक्ष्मीरूपत्वाद्वा। सर्वतीर्थमया गाव इत्युक्तेः, 'या लक्ष्मीः सर्वदेवानां धेनुरूपेण संस्थिता' इति मंत्राच्च। 'पृथिव्यां यानि तीर्थानि आसमुद्रसरांसि च। गवां शृंगोदकस्यापि कलां नार्हंति षोडशीम्॥' इति स्मृतेः। 'स्पृष्टाश्च गावः शमयंति पापं संसेविताश्चोपनयंति वित्तम्। ता एव दत्तास्त्रिदिवं नयंति गोभिर्न तुल्यं धनमस्ति किंचिदि'ति स्मृतेश्च। पुनः सत्यं सत्याधारत्वात्। गोषु सत्यं प्रतिष्ठितमिति स्मृतेश्च। पुनः परं सर्वोत्कृष्टं सर्वदेवादिरूपत्वात्तदुक्तं वाराहे 'सर्वदेवमया गावः सर्ववेदमयास्तथा। अमृतं धारयंत्यश्च प्रचरंति महीतले॥ तीर्थानां परमं तीर्थमतस्तीर्थं न विद्यते। पवित्राणां पवित्रं च पुष्टीनां पुष्टिरेव च॥ दध्ना च त्रिदशाः सर्वे क्षीरेण च महेश्वरः। घृतेन पावको नित्यं पायसेन पितामहः॥ सकृद्दत्तेन प्रीयंते वर्षाणि च त्रयोदश॥ पञ्चगव्येन पीतेन सर्वपापं प्रणश्यती'ति। शैवेपि 'समुद्रांतां धरां चैव सुवर्णपरिपूरिताम्। ददाति पुरुषो यश्च गां चैवात्र ददाति यः॥ तयोः समफलं प्रोक्तं नात्र कार्या विचारणा॥ यस्या दुग्धं नरः पीत्वा गंगोदकफलं लभेत्॥ गोमये वसते लक्ष्मीर्गोमूत्रं तीर्थवारिवदि'ति परत्वमुक्तम्। 'सर्वे देवाः स्थिता देहे सर्वदेवमया हि गौरि'ति पाराशर्यां च। किञ्च 'अविद्वान् ब्राह्मणो यस्तु कुर्यात्तासां प्रतिग्रहम्। ततः प्रभृत्यमेध्यांतः पितरस्तस्य शेरते॥ विद्वानपि गृहीत्वा गां प्राजापत्यत्रयं चरेत्॥ दानागतां च यो धेनुं मौल्येन प्रददाति वै। पितरस्तस्य सततं तद्रोमसमसंख्यकम्॥ कुम्भीपाके प्रपच्यंते मातृविक्रय एव सः। सा विक्रीता विभक्ता च दहत्यासप्तमं कुलम्॥ मौल्योद्घाटनकर्त्तापि नरकं प्रतिपद्यते॥' इत्यपि वाराहे। गवां माहात्म्यं तु वक्तुं न शक्यतेऽतोऽलम्॥ इति गोकुलपक्षः॥ ८८॥

अथ रुद्राक्षपक्षः॥ वयं तं रुद्राक्षं सदा हृदा धीमहि। तं कं यत्र त्रयाणामुत्तमाधममध्यमभावानां सर्गोऽमृषा। तदुक्तं 'धात्रीफलप्रमाणं यच्छ्रेष्ठमेतदुदाहृतम्। बदरीफलमात्रं च मध्यमं प्रोच्यते बुधैः॥ अधमं चणकाकारं प्रक्रियैषा मयोच्यते' इति जाबाले। दृष्टांतः पुरोवत्। यतो यस्य रुद्राक्षस्याद्यस्य श्रीशंकरस्य सकाशात् जन्माभूत्। तदुक्तं बृहज्जाबाले 'अथ भुशुंडः कालाग्निरुद्रं पप्रच्छ कथं रुद्राक्षोत्पत्तिस्तद्धारणे किं फलमिति सहोवाच भगवान्कालाग्निरुद्रस्त्रिपुरवधार्थायाहमामीलिताक्षोऽभवं तेभ्यो जलबिंदवो भूमौ पतितास्ते रुद्राक्षा जाताः सर्वानुग्रहार्थाय तेषां नामोच्चारणमात्रेण दशगोदानफलं दर्शनस्पर्शनाभ्यां द्विगुणं फलमत ऊर्ध्वं वक्तुं न शक्नोमी'ति। यतो यस्य रुद्राक्षस्यान्वयात्संबंधादितरत इतरोपि शिवभक्तिरहितोपि पुमान् स्वराट् श्रीशिवो भवति। 'रुद्राक्षान्कंठदेशे दशन (३२) परिमितान्मस्तके विंशतिद्वे (४०) षट् (६) षट् (६) कर्णप्रदेशे करयुगलकृते द्वादश (१२) द्वादशैव (१२)। बाह्वोरिन्दोः कला (१६) भिर्नयनयुगकृते एक (१) मेकं (१) शिखायां वक्षस्यष्टाधिकं यः कलयति शतकं (१०८) नीलकंठः स्वयं सः॥' इति बोपदेवोक्तेः। किं कर्तुमादिकविं श्रीशंकरं प्राप्तुम्। चतुर्थी पूर्ववत्। 'नाविष्णुस्स्यादिह क्ष्मेशो नाशिवो वै कविर्भवेदि' त्यभियुक्तोक्तेः शिवांशाज्जातः कविश्चेत्तर्हि शिवस्यादिकवित्वं कैमुतिकन्यायसिद्धमेव। यस्मिन् रुद्राक्षे सूरयो विद्वांसोपि वैष्णवाभासा मुह्यंति। 'रुद्राक्षं धारयेन्नैव तथा भस्मत्रिपुंड्रकम्। धारणात्पुण्यहानिः स्याद् द्विजातीनां न संशयः' इत्यादिकल्पितवाक्यैर्निन्दां कुर्वंतीति भावः। 'शैवोथ वैष्णवो वापि सौरः शाक्तस्तथैव च। तथान्यदेवभक्तस्तु कृत्वा रुद्राक्षधारणम्॥ तत्तद्देवकृपां प्राप्य तत्तद्देवपुरं व्रजेत्। तुलस्या धारणं कृत्वा सौरो गाणपतस्तथा॥ शैवः शाक्तो वैष्णवो वा वैकुंठपुरमाव्रजेदि'ति कौशिकसंहितायां सर्वदेवोपासकानां तुलसीरुद्राक्षोभयधारणस्य प्रतिपादितत्वेन वृथा कलहकारिणस्तत्तद्देवोपासकाभासा एवेति सिद्धांतितम्। तत्रैव यो रुद्राक्षो ब्रह्म सांगं तेने। 'कृत्वा रुद्राक्षधारणम्। यः शिवं पूजयेद्भक्त्या स मोक्षमधिगच्छति। स सर्वाण्येनांसि तरति रुद्रो भूत्वा ह्यमृतत्वमेती'ति श्रुतेः। किंभूतं स्वेन धाम्ना प्रभावेण निरस्तोऽपास्तः कुहकः स्वसेविनां सर्वपापलक्षणो येन तम्। 'रुद्राक्षदर्शनेनापि नश्यत्यघकुलं क्षणादि'ति शिवरहस्योक्तेः। पुनः सत्यं कर्मसत्यत्वापादकम्। 'अरुद्राक्षधरो भूत्वा यत्किंचित्कर्म वैदिकम्। कुर्याद्विप्रस्तु यो मोहान्न ह्यवाप्नोति तत्फलमि'ति स्कांदोक्तेः। पुनः परं सर्वोत्कृष्टं मंत्रजपे मुख्यं जपसाद्गुण्यकरम्। तदुक्तं शिवपुराणे 'रुद्राक्षमालया नित्यं मंत्रं जपति यो नरः। तस्य नाम्नां शतैनैव सहस्रस्य फलं लभेत्॥ विष्णोरपि विशेषेण जपं कुर्यात्प्रयत्नतः॥ वस्तुतः सर्वदेवानां जप्ये मुख्याः प्रकीर्तिताः' इति। अथान्यदप्याह। 'रुद्राक्षाणां फलं यामं देहि सर्षपमात्रकम्। सर्षपादधिका माला आर्द्रधात्रीफलावधि॥ तदूर्ध्वं क्षत्रियैर्माला वैश्यैर्माला-

स्तदूर्ध्वकम् । तदूर्ध्वं शांकरैर्ग्राह्या एवं रुद्राक्षलक्षणम् ॥ ब्राह्मणो बिभृयाच्छ्वेतान् रक्तान् राजा तु धारयेत् । पीतान्वैश्यस्तु बिभृयात्कृष्णान् शूद्रस्तु धारयेत् ॥ स्वयमेव कृतद्वारं यत्तत्स्यादिति ह्युत्तमम् । यत्तु पौरुषयत्नेन कृतं तन्मध्यमं भवेत् ॥ समान् स्निग्धान्दृढान्स्थूलान्कंटकैः संयुतान् शुभान् । वृत्तान् क्षौमस्य सूत्रेण धारयेत्सर्वदा नरः ॥ निघर्षे हेमरेखाभा यस्य रेखा प्रदृश्यते । तदक्षमुत्तमं विद्यात्तद्धार्यं शिवपूजकैरि'ति रहस्यार्णवे । 'जिघ्रन्नपि तथा चाश्नन्प्रलपन्नपि संततम् । कुर्वन्नपि तथा गच्छन् विसृजन्नपि मानवः ॥ रुद्राक्षधारणादेव सर्वैः पापैः प्रमुच्यते ॥' इति सर्वदा धारणं विधीयते । 'नाशुचिर्धारयेन्मालामि'ति निषेधो जपमालादिविषयो बोध्यो न तु कंठस्थविषय इति । 'क्रिमिदष्टं छिन्नभिन्नं कंटकैर्हीनमेव च । व्रणयुक्तमवृत्तं यत् षड् रुद्राक्षाणि वर्जयेदि'ति स्कांदे । 'सहस्रं धारयेद्यस्तु रुद्राक्षान् वै प्रयत्नतः । तं नमंति सुराः सर्वे यथा रुद्रस्तथैव सः ॥' इति ब्रह्मोत्तरे । ओंकारमाहात्म्येपि 'रुद्राक्षाणां सहस्रं तु मुमुक्षुर्धारयेत्सदा । तदभावे शतं वापि दश चैकमथापि वे'ति शंकरसंहितायाम् । 'धर्तव्यमेव सूत्रेण सौवर्णेनाथवा द्विजाः । राजते न च ताम्रेण रुद्राक्षं तु गलादिषु ॥ यज्ञोपवीते चैकं तु भस्मवत्सर्वदा द्विजाः । रुद्रस्याक्षतया विप्रा रुद्राक्षमिति कीर्तितम् ॥ रुद्राक्षधारके शम्भुः परिपूर्णकटाक्षवान् । ज्ञात्वा ये शिवभूषणं परतमं स्वर्गापवर्गप्रदं रुद्राक्षं विधिनामुना निजतनौ सम्यक् सदा बिभ्रति । तेषां दग्धनिजैनसामिह फलं जानाति को वा सुधीस्त्यक्त्वा शङ्करमम्बिकां गणपतिं नन्दीं तथा षण्मुखमि'ति बृहज्जाबाले । धारणमन्त्राः 'सद्योजातेन शिरसि वामदेवेन कर्णयोः । अघोरेण गले धार्यं हृदि तत्पुरुषेण च ॥ ईशानाख्येन मन्त्रेण करयोर्धारयेत्सुधीः । ब्रह्मचारिगृहस्थानां वनस्थानां तथैव च । रुद्राक्षधारणे मन्त्राः प्रोक्ता वै विश्वयोनिना । प्रणवेनैव सन्धार्या यतिभिः सर्वसिद्धये ॥ द्विजानां मन्त्रतः प्रोक्तमन्येषां तद्विवर्जितम् ।' रुद्राक्षौ एकमुखपञ्चमुखौ धारणेऽतिश्रेष्ठौ । 'आरभ्यैकमुखं तावद्यावद्वक्त्राणि षोडश । एतेषां द्वावतिश्रेष्ठौ ज्ञेयौ धारयतां नृणाम् । ये धारयंत्येकमुखं रुद्राक्षं नित्यमेव हि ॥ जीवन्मुक्तास्तु विज्ञेया नरास्ते नात्र संशयः । एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति ॥ ये रुद्राक्षं पञ्चमुखं धारयन्त्यनिशं नराः । रुद्रलोके च रुद्रेण सदा तिष्ठन्ति मोदिताः ॥' इति केदारखण्डे । मालाप्रकारो रुद्रयामले 'त्रिंशदक्षैः कृता माला धनदा जपकर्मणि । सप्तविंशतिसंख्याकैरक्षैः पुष्टिप्रदा भवेत् ॥ पञ्चविंशतिसंख्याकैः कृता मुक्तिप्रदा भवेन् । अक्षैस्तु पंचदशभिरभिचारफलप्रदा ॥ अष्टोत्तरशतेनापि माला सर्वार्थसाधिका । रुद्राक्षमूलं तद्ब्रह्म तन्नालं विष्णुरुच्यते ॥ तन्मुखं रुद्र इत्याहुर्बिंदवः सर्वदेवताः ॥' इति । अत्रापि बहु वक्तव्यादुपरम्यते । इति रुद्राक्षपक्षः ॥ ८९ ॥

अथ पञ्चाक्षरपक्षः ॥ वयं तं पञ्चाक्षरमन्त्रं सदा हृदा धीमहि । तं कं यत्र त्रयाणां पातकोपपातकमहापातकानां सर्गो मृषाऽसत्यः, यथा तेजआदीनां विनिमयो मृषा 'जप्ते पञ्चाक्षरे मन्त्रे विनाशं यान्ति सर्वथा । पातकानि महापातकान्युपपातकानि चे'ति शिवरहस्योक्तेः । 'नमः शिवायेति सकृज्जपित्वा पापं महद् घोरमुपैति नाशम् । भूम्यंतरिक्षात्परिपूर्णकाष्ठं स्वल्पाग्निना दग्धमुपैति नाशम् ॥ रसने रचितोयमञ्जलिस्ते परनिन्दापरुषैरलं वचोभिः । नरकापहरं नमः शिवायेत्यमुमादिप्रणवं भजस्व मन्त्रमि'ति नाममाहात्म्ये । यतो यस्यान्वयात्सेवनादाद्यस्य शंकरस्य जन्माविर्भावो भवति । 'पंचाक्षरं तु जपत आविर्भूयान्महेश्वरः ।' इति शिवधर्मे । किंचेतरत इतरोपि शूद्रादिरपि यतो मन्त्रात्स्वराट् मुक्तिभाग् भवति । जाबालोपनिषदि 'यश्चांडाल इति वाचं वदेत्तेन सह न संवदेते'ति कथनात् । 'शूद्रो वाप्यथवान्यो वा कृत्वा पंचाक्षरीजपम् । मुक्तिभागी भवेत्सत्यं नान्यथा हरिणोदितमि'ति शिवभक्तिचन्द्रोदयादौ । किञ्च यतोर्थेष्वभिज्ञः स्यात् । 'पञ्चाक्षरजपान्नित्यं सर्वशास्त्रार्थविद्भवेत् । शंकरस्य प्रियो भूत्वा ह्यन्ते तत्पदमाप्नुयादि'ति स्कान्दाद्युक्तेः । यो मन्त्र आदिकवये ब्रह्मणे नारदादिरूपायान्यस्मै वा ब्रह्म ज्ञानं तेने । तदुक्तं 'शिवषडक्षरजपाद्ब्रह्मापसर्गचातुरीम् । नारदाद्यास्तु ऋषयो ज्ञानमापुः सनातनमि'ति शिवधर्मे । यस्मिन् मन्त्रे सूरयो वैष्णवाभासा अन्त्यजानुयायिनो[1] मुह्यन्ति । 'शिवार्चा शूद्रजातीनां न द्विजानां कदाचने'त्यादिकल्पितवाक्यैर्निन्दापरा भवन्ति । किंभूतं स्वेन निजेन धाम्ना निरस्तोऽपाकृतो निजोपासकानां कुहकोऽज्ञानलक्षणो येन तम् । एतच्च स्कन्दशिवपुराणयोर्बहुधाख्यानैः प्रपञ्चितं तत्तत्रैवान्वेष्यम् । यद्वा कुहको यमशासनक्लेशो बोध्यस्तदुक्तं नाममाहात्म्ये 'पञ्चाक्षरोक्तिश[2]तरुद्रियोक्तिमि'ति पूर्वान्वयिपदद्वयम् 'मन्नामरुद्राक्षविभूतिधारिणा ममाग्रतो यस्तु पुराणवक्ता । सर्वेषु पापेष्वपि तेषु सत्सु प्रशास्त्य[3]यं नैव ममाधिकारः ॥' इति यमोक्तेः । पुनः सत्यं पूजासत्यतापादकम् । तदुक्तं शिवरहस्ये 'कर्तव्यः शिवपूजांते पञ्चाक्षरजपो द्विजैरि'ति । स्कांदेपि 'नमस्कारो जपश्चैव सर्वाभीष्टप्रदावुभौ । पूजांते च सदा कार्यौ भोगमोक्षार्थिभिर्नरैः ॥ द्विषट्सहस्रं जप्तव्यः शैवः पञ्चाक्षरस्तदा । सहस्रमप्रमादेन शतमष्टोत्तरं तथा ॥ रुद्राक्षमालयैव हि जप्तव्यस्तु षडक्षरः । मोक्षप्रदो भवत्येव सत्यमेवोच्यते मया ॥ जपे यावत्फलं प्रोक्तं विद्रुमोत्तममालया । ततः सहस्रगुणितं मुक्तामालिकया फलम् । ततः कोटिगुणं प्राप्यं शुद्धस्फटिकमालया ॥ ततोनंतगुणं प्रोक्तं शुद्धरुद्राक्षमालये'ति । पुनः परं सर्वमंत्रशिरोमणिम् । तदुक्तं स्कांदे 'पंचाक्षरः परो मंत्रः सर्वमंत्रशिरोमणिः । स्त्रीभिरप्यन्वहं जप्यः सहस्रं विधिपूर्वकम् ॥ पंचाक्षरप्रभावस्तु न ज्ञातो मादृशैर्जनैः ॥ किंतु वेद महादेवस्तत्प्रभावं यथार्थतः ॥ जप्ते पंचाक्षरे मंत्रे नश्यत्यघकुलं क्षणात् । पंचाक्षरो महामंत्रः स शिवात्मक एव हि ॥ त्रिमासु

१. अन्त्यजगामी जो जकारः सत्यानि मान्त्यजस्तदनुयायिनः रामानुजानुयायिनः । २. रुद्रः । ३. यमः ।

श्रुतिरुत्कृष्टा रुद्रैकादशनी श्रुतौ। तत्र पंचाक्षरी तस्यां शिव इत्यक्षरद्वयम्॥' ब्रह्मोत्तरे। 'देवानां परमो देवो यथा वै त्रिपुरांतकः। मंत्राणां परमो मंत्रस्तथा चैव षडक्षरः॥ नमस्कारेण जीवत्वं शिवेति परमात्मनि। ऐक्यं गतमतो मंत्रः परब्रह्ममयो ह्यसौ॥ किमत्र बहुभिर्मंत्रैः किं तीर्थैः किं तपोवरैः। यस्योंनमःशिवायेति मंत्रो हृदयगोचरे॥ कैवल्यमार्गे दीपोयमविद्यासिंधुवाडवः। महापातकदावाग्निः सोयं मंत्रः षडक्षरः॥ पंचाक्षरः स्वतः सिद्धः सर्वदेवशिरोमणिः। पूजांते जपनीयोयं केवलस्तु षडक्षरः॥' वायवीयसंहितायाम्। 'पंचाक्षरस्तु शूद्राणां ब्राह्मणानां षडक्षरः।' ब्राह्मणपदं द्विजातेरुपलक्षकम्। 'पंचाक्षरेण कर्तव्यं स्त्रीभिः शूद्रैर्ममार्चनम्। षडक्षरेण कर्तव्यं ब्रह्मक्षत्रविशैस्तथा॥' तथा 'आदौ नमः प्रयोक्तव्यं ब्रह्मक्षत्रविशैस्तथा। शूद्रैरंते प्रयोक्तव्यं तद्वत्स्त्रीणां तथैव च॥' अयं नियमः पूजाजपयोर्न त्वातुरस्य। तदुक्तं विश्वेश्वरसंहितायां 'नारी वाथ नरो वाथ ब्राह्मणो वान्य एव वा। नमोन्तं वा नमः पूर्वमातुरः सर्वदा जपेत्॥' शिवरहस्ये विशेषः 'शिवपञ्चाक्षरः शुद्धो जपनीयो हि भक्तितः। अष्टोत्तरसहस्रं तु तांत्रिकैर्न्यासपूर्वकम्॥ वैदिकैर्न्यासरहितो जपनीयः प्रयत्नतः॥' इति। अनेनैवाभिप्रायेण गायत्र्याः षडंगेन न्यासमुक्त्वा एके नेच्छंति एष विधिरवैदिक इत्याश्वलायनेनोक्तम्। 'उपदेशोस्तु मा वास्तु शिवमंत्रस्य पार्वति। तथापि जपनीयोयं मंत्रश्चैव षडक्षरः॥' इति शिवरहस्योक्तेरत एव यथोक्तलक्षणसम्पन्नगुरोरभावात्। 'गुरोरभावे मन्त्राणां पुस्तकं गुरुमाचरेदि'ति पाद्मादौ। दक्षिणामूर्त्यादिभ्योपि दीक्षा प्राह्येत्युक्तम्। कलौ तूपदेशस्यैव प्राशस्त्यमुक्तम् 'उपदेशः कलौ युग'इति तंत्रसारोक्तेस्तत्स्वरूपमपि तत्रैव 'चन्द्रसूर्योपरागे च सिद्धक्षेत्रे सुरालये। मन्त्रमात्रप्रकथनमुपदेशः प्रकीर्त्तितः॥' इत्यलं प्रसक्तानुप्रसक्तेन। इति पंचाक्षरपक्षः॥ ९०॥

अथ शिवलिंगपक्षः॥ वयं तच्छिवलिंगं सदा हृदाये धीमहि। हृद्देवायः स्थानं तस्मिन्। तत्किं यत्र त्रयाणां सर्गोऽमृषा। कथं यथा तेजोवारिमृदामविनिमय इति 'सृष्ट्यादौ समभूल्लिंगं तस्मिंल्लोकास्त्रयः स्थिताः। ब्रह्मादिद्वारा निष्क्रांता लीयंते तत्र ते पुनरि'ति शिवलिंगपुराणयोरुक्तेः। किञ्च यतो लिंगादाद्यस्य विष्णोरितरत इतरेषां ब्रह्मादीनां सर्वेषां जन्म 'लिंगाद्विष्णुः समुद्भूतो ब्रह्माद्या इतरेखिलाः।' इत्यपि तत्रैव। किञ्च यतोन्वयात्सेवनात्पुमानर्थेषु धर्मादिष्वभिज्ञो भूत्वा स्वराट् जीवन्मुक्तः स्यात् 'लिंगार्चने कृते सर्वसिद्धी रुद्राच्च जायते। भुक्त्वा धर्मार्थकामांश्च तत्फलानि च सर्वशः॥ जीवन्मुक्तिफलं प्राप्य देहांते शिवमन्वयादि'ति लिंगादौ। यल्लिंगमादिकवये विष्णवेऽन्यस्मै वा ब्रह्म भुक्तिं मुक्तिं वा तेने। तदुक्तं ब्रह्मवैवर्ते द्वितीयविभागे 'उपमन्युर्हरिः श्वेतो नंदिबाणदशाननाः। लिंगाराधनतोऽन्येपि भुक्तिं मुक्तिं समागताः॥' इति 'ब्रह्म स्याद्भुक्तिमोक्षयोरि'त्यपि कोशांतरात्। यस्मिँल्लिंगे सूरयो यथा कथंचिद्विद्वांसोपि वैष्णवत्वेनाभासमाना नास्तिका मुह्यंति 'लिंगं नैव स्पृशेत्क्वचित्। शूद्रैरर्च्यं रुद्रलिंगं द्विजो नैवार्चयेत्क्वचिदि'त्यादिना निंदां कुर्वंति। किंभूतं स्वेन निजेन धाम्ना तेजसा निरस्तोऽपास्तः कुहको दुःखदो यमभृत्यादिर्येन तम्। तदुक्तं पाद्मे 'लिंगपूजापरं शैवं निरीक्ष्य यमकिंकराः। दूरादेव पलायंते स्मरंतो यमशासनम्॥' इति। पुनः सत्यं सदैव विद्यमानत्वात्। 'भक्तानामनुकंपार्थं सदा तिष्ठति शंकरः। लिंगाकारेण सर्वत्र पृथिव्यां मुनिसत्तम॥' इति शैवस्कांदयोः। पुनः परं सर्वोत्कृष्टं अवश्यपूज्यत्वात्। तदुक्तं शिवधर्मे 'गर्भधारणजः क्लेशस्तन्मातुः सफलः स्मृतः। यद्गर्भान्निर्गतः पुत्रो लिंगार्चनरतो भवेत्॥ लिंगस्यार्चनमेवैकं कलौ सारतरं सुराः। तदेव घोरसंसारमहासागरतारकम्॥ संसारानलतप्तानां शिवलिंगार्चनामृतम्। संसारतापपापं च सद्यो दूरीकरोति हि॥' इति। 'शिवे किं बहुनोक्तेन नित्यं यो लिंगपूजकः। स ममातिप्रियतमः सत्यं सत्यं न संशयः॥ कलौ तु मानुषं जन्म भवत्यत्यंतदुर्लभम्। तत्र चेन्मानुषं जन्म कर्तव्यं लिंगपूजनम्॥ मानुष्येष्वपि चेज्जन्म ब्राह्मण्यां ब्राह्मणो यदि। तदा त्ववश्यं कर्तव्यं शिवलिंगस्य पूजनम्॥ यत्फलं प्राप्यते राजन् शिवलिंगस्य पूजया। तत्फलं नैव संप्राप्यमश्वमेधार्बुदैरपी'ति सनत्कुमारसंहितायाम्। लिंगपदार्थस्तु महाकालतंत्रे 'लीयंते यत्र भूतानि निर्गच्छंति यतः पुनः। तेन लिंगं परं व्योम निष्कलः परमः शिवः॥ लिंग्यते चिंत्यते येन भावेन भगवान् शिवः। योगिभिस्तत्त्रिधा लिंगं व्यक्ताव्यक्तोभयात्मकम्॥ व्यक्तं तत्सकलं ज्ञेयमव्यक्तं निष्कलं मतम्। ज्ञानज्योतिर्मयं लिंगं व्यक्ताव्यक्तमिदं स्मृतम्॥' तथाच रामेश्वरब्रह्मेश्वरव्यासेश्वरबिल्वकेश्वरादीनि तैस्तैर्महापुरुषैः प्रतिष्ठितान्यर्चितानि तत्तन्नामपूर्वाणि दृश्यंते तद्विषयाणि शतश उपाख्यानान्यपि श्रूयंते। किंच नार्मदं लिंगं तु सर्वोत्तमम्। तदुक्तं 'सर्वेषामेव लिंगानां नार्मदं मे सदा प्रियम्। नातः परतरं लिंगं पूजने शस्यते नृणामि'ति। ननु नर्मदायां कथं लिंगाविर्भावस्तत्राह रेवया शिवो मे पुत्रो भवत्विति निश्चित्य महत्तपः कृतं तत्तपसा प्रसन्नेन शिवेनोक्तं नाहं कस्यापि पुत्रो भवामि सर्वेश्वरत्वात्परं तु तव भक्त्या पाषाणलिंगरूपेण तव गर्भगो भूत्वाहं तव पुत्रो भवामीत्युक्तमतस्तद्भवलिंगं शिवरूपमिति धरां प्रति वाराह वाराहेणोक्तम्। ततो लिंगाराधनमेव प्रतिमापेक्षया श्रेयस्करम्। तदुक्तं विश्वेश्वरसंहितायां 'लिंगं प्राधान्यतः पूज्यं तथा बेरं च गौणकम्। लिंगाभावे तु बेरं स्यात्पूजायां स्थापने मम॥' इति। 'रसलिंगं ब्राह्मणानां सर्वाभीष्टप्रदं भवेत्। बाणलिंगं क्षत्रियाणां महाराज्यप्रदं मतम्॥ स्वर्णलिंगं तु वैश्यानां महाधनपतिप्रदम्। शिलालिंगं तु शूद्राणां महाशुद्धिकरं शुभम्॥ स्फाटिकं बाणलिंगं च सर्वेषां सर्वकामदम्। स्वीयाभावेन्यदीयं तु पूजायां न निषिध्यते। स्त्रीणां तु पार्थिवं लिंगं सभर्तृणां विशेषतः॥ विधवानां निवृत्तानां रसलिंगं विशिष्यते। विधवानां प्रवृत्तानां स्फाटिकं परिकीर्त्तितम्॥' वायौ 'कलौ तु पार्थिवं लिंगं क्षिप्रं सिद्धिकरं स्मृतम्।

कृते मणिमयं लिंगं त्रेतायां हेमसंभवम्।। द्वापरे पारदं लिंगं पार्थिवं तु कलौ युगे। सर्ववर्णाश्रमाणां हि कलौ पार्थिवमेव ही' ति। एतद्विषयविशेषस्तु मत्कृतलिंगार्चनदीपिकायां द्रष्टव्यः। बृहज्जाबालोपनिषद्यपि 'अहरहः शिवलिंगमनभ्यर्च्य नाश्नीयात्फलमन्नमन्यद्वा यद्यश्नीयाद्रेतोभक्षो भवेन्नापः पिबेत्पूयपो भवेत्प्रमादेनानभ्यर्च्य भुक्त्वा भोजयित्वा केशान् वापयित्वा गव्यान्यपि पंच संगृह्योपोष्य जले रुद्रस्थाने वा जपेत्त्रिवारं शतरुद्रीयमादित्यं पश्यन्नभिध्यायन्त्र्यम्बकं कर्म ततो रौद्रैरेव मंत्रैर्मार्जनं कुर्यात्। ततो भोजयित्वा ब्राह्मणान्पूतो भवति अन्यथा परेतो यातनामश्नुते' इति लिंगपूजनं सर्वथा कार्यम्। इति शिवलिंगपक्षः ।। ९१ ।।

अथ विभूतिधारणपक्षः।। वयं तद्विभूतिधारणं सदा हृदा धीमहि। तत्किं यत्र त्रयाणामायुष्कामभूतिकाममोक्षकामानां सर्गोऽमृषा सत्यः 'आयुष्कामोथवा राजन् भूतिकामोथवा नरः। नित्यं वै धारयेद्भस्म मोक्षकामी च वै द्विज ।।' इति भारतोक्तेः। यद्वा त्रयाणां ब्रह्मविष्णुरुद्राणां सर्गो यत्रामृषा। दृष्टांतस्तूक्तप्रायः। विष्णुधर्मे नारदः 'भस्म वै परमं पुण्यं ब्रह्मविष्णुशिवात्मकम्। येन दृष्टेन पापानि नाशमायांति सर्वथे' ति। यतो विभूतेरन्वयात्सेवनादर्थेष्वाद्यस्य धर्मस्येतरत इतरेषामर्थादीनां जन्म। तदुक्तं 'धर्मार्थकामोक्षाणामुत्पत्तिर्भस्मधारणादि' ति लैंगे। यतः पुमान् स्वराट् शिवो भवति। तदुक्तं 'साक्षाच्छिवः स विज्ञेयो यो बिभर्त्ति सदा भसमि' ति स्कांदोक्तेः। अभिज्ञो जाबालिर्यद्यस्य ब्रह्म महत्त्वं तेने। किं कर्तुमादिकविं श्रीशंकरमाप्तुम्। तदुक्तं जाबाले 'ये भस्मधारणं त्यक्त्वा कर्म कुर्वंति मानवाः। तेषां नास्ति विनिर्मोक्षः संसाराज्जन्मकोटिभिः ।। महापातकयुक्तानां पूर्वजन्मसु सर्वतः ।।' इति। शिवरहस्ये 'संध्याशिवार्चनादीनि कर्माण्येतानि वस्तुतः। वैदिकानि ततस्तेषु कर्तव्यं भस्मधारणमि' ति। ये अस्मिन्मुह्यंति ते सूरयो न विद्वांसः किंतु मूर्खा एव। शास्त्रतात्पर्यानभिज्ञा इति यावत्। जन्मांतरीयदुष्कृतवशात्ते विभूतिं निन्दन्तीति भावः। तदुक्तं 'महापापवतां नृणां वेदसिद्धे महेश्वराः। त्रिपुंड्रोद्धूलनादौ च प्रद्वेषो हि प्रजायते ।।' इति पराशरीये। 'विप्राणां दाक्षिणात्यानां प्रायोपहतचेतसाम्। शिवे भस्मनि रुद्राक्षे किंचिच्छ्रद्धा न विद्यते ।।' इत्यादित्यपुराणेपि। सूतसंहितायामपि 'श्रुतौ चैव महादेवे त्रिपुंड्रभस्मगुंठने। श्रद्धां न कुरुते मर्त्यः पुण्यलेशविवर्जितः ।।' किंभूतं तत् स्वेन निजेनाधारणेन धाम्ना प्रभावेण निरस्तः कुहकः पापलक्षणो येन तत्तथा। 'सर्वेषां चैव पापानां प्रायश्चित्तमिदं स्मृतम्। भस्मनो धारणं यच्च स्मरणं शंकरस्य यदि' ति ब्रह्मोत्तरायुक्तेः पुनः सत्यं शिवार्चनसत्यतापादकम्। तद्विना तस्य निरर्थकत्वात्। तदुक्तं सनत्कुमारसंहितायां 'यथैव चांडालोच्छिष्टं श्राद्धार्थं नोपयुज्यते। पूतिपर्युषितं यच्च निर्भस्मैव शिवार्चनम्।। दायादहीनो न पुनर्मृतः पिंडमवाप्स्यति। तथा भस्मविहीनोपि शिवार्चनफलं नरः ।।' इति। पुनः परमत्युत्कृष्टमन्वर्थपञ्चनामवत्त्वात्तदुक्तं तत्रैव 'विभूतिर्भसितं भस्म क्षारं रक्षेति भस्मनः। भवंति पंच नामानि पंचभिर्हेतुभिर्भृशम्।। ऐश्वर्यकारणाद्भूतिर्भस्म सर्वाघभक्षणात्। भासनाद्भसितं प्रोक्तं क्षारणात् क्षारमापदाम्।। रक्षा रक्षोगणेभ्यश्च रक्षणात्परिकीर्तितम्। तत्पुनर्द्विविधं प्रोक्तं मुख्यं गौणं तथैव च ।। मुख्यं प्रोक्तं परं ब्रह्म गौणमाग्नेयमुच्यते। गौणं नानाविधं ब्रह्मन् विद्धि वेदविदां वर ।। अग्निहोत्राग्निजं तद्वद्विरजाहोमजं मुने। औपासनसमुद्भूतं समिदग्निसमुद्भवम्। पचनाग्निसमुद्भूतं दावानलसमुद्भवम्।' स्कांदे 'ब्रह्मक्षत्रियवैश्यैश्च ह्यग्निहोत्रसमुद्भवम्। शूद्राणां श्रोत्रियागार-पचनाग्निसमुद्भवम्।। अन्येषां मानवानां तु स्मृतं दावानलोद्भवम्। समिदग्निसमुद्भूतं धार्यं वै ब्रह्मचारिभिः ।। अग्निहोत्रसमुद्भूतं गृहस्थैर्वनवासिभिः। श्रौताग्निरहिता ये च तेषामौपासनोद्भवम्।।' पुलस्त्यः 'अग्निरित्यादिभिर्मंत्रैः शुद्धं भस्माभिमंत्रितम्। शिवमंत्रेण वा धार्यं मंत्रेणाष्टाक्षरेण वा ।। गायत्र्या वापि देवर्षे मंत्रेण प्रणवेन वा। करोति शिवमंत्रेण ललाटे यस्त्रिपुंड्रकम्।। विष्णोः पदमवाप्नोति नान्यथा श्रुतिनोदितम्। सौरं पदमवाप्नोति गायत्र्या मुनिसत्तम ।। प्राप्नोति ब्रह्मणो रूपं प्रणवेन न संशयः ।।' लैंगे तु 'त्र्यायुषेण मंत्रेण त्रिपुंड्रं ब्रह्मचारिणा। अग्निरित्यादिभिर्मंत्रैः पञ्चब्रह्ममयैस्तथा।। त्र्यंबकेन मंत्रेण तारेण च तथैव च। पञ्चाक्षरेण मंत्रेण प्रणवेनान्वितेन च। त्रिपुंड्रं धारयेन्नित्यं गृहस्थश्च वनाश्रमी ।। प्रणवेनैव संधार्यं संन्यासाश्रमवर्तिभिः। नमोंतेन शिवेनैव धार्यं स्त्रीभिश्च पादजैः ।। अन्येषामपि सर्वेषां विना मंत्रेण सुव्रत। भस्मनोद्धारणं प्रोक्तं नित्यं शैवागमेषु च ।।' केदारखंडे 'उद्धूलनं त्रिपुंड्रं' च नित्यं धार्यं प्रयत्नतः।' इत्युक्तेरुद्धूलनमाह जाबाले 'आदरेण समादाय भस्मपात्रे निधाय च। प्रक्षाल्य पादौ हस्तौ च द्विराचम्य समाहितः ।। गृहीत्वा भस्मनो मुष्टिं सद्यो जातादिभिर्गृही। प्राणायामत्रयं कृत्वा ध्यात्वा चैव सदाशिवम् ।। अग्निरित्यादिभिर्मंत्रैस्त्रिवारमभिमंत्र्य तत्। ईशानेन पंचधा भस्म विकिरेन्मूर्ध्नि यत्नतः ।। मुखे त्रिस्तत्पुरुषेणाथाघोरेणाष्टधा हृदि। वामेन गुह्यदेशे तु त्रिदशस्थानभेदतः ।। अष्टधा सद्योमंत्रेण पादावुद्धूल्य यत्नतः ।।' इति स्मृतिसंग्रहे। 'धार्यं भस्म त्रिसंध्यं तु गृहिणा जलसंयुतम्। सर्वकालं भवेत्स्त्रीणां यतीनां जलवर्जितम् ।। वनस्थयतिकन्यानां दीक्षाहीननृणां तथा ।। मध्याह्नात्प्राक् जलैर्युक्तं परतो जलवर्जितमि' ति। किं बहुनात्र वक्तव्यं बह्वस्ति तेनोपरम्यते। किंच शैवैरेव शिवार्चनसाफल्याय भस्म धार्यं तत्रापि दीक्षितैरिति सिद्धांतितम्। नागोजीभट्टेन सप्तशतीव्याख्याने होमांते तु वैदिकैर्धार्यमेव। तदुक्तं प्रयोगपारिजाते 'स्नात्वा पुंड्रं मृदा कुर्याद्धुत्वा चैव तु भस्मना। देवानभ्यर्च्य गंधेन जलमध्ये जलेन च ।। ऊर्ध्वं पुंड्रं मृदा कुर्याद्भस्मना तु त्रिपुंड्रकम्। चंदनेनाभयं कुर्यात्तोयेनाप्यूर्ध्वपुंड्रकमि' ति। वस्तुतस्तु शिवागमदीक्षितैरेव भस्म त्रिपुंड्रं धार्यमित्यलम्। इति विभूतिधारणपक्षः ।। ९२ ।।

अथ बिल्ववृक्षपक्षः ॥ वयं तं श्रीवृक्षं सदा हृदा धीमहि। श्रीवृक्षस्त्वादित्यपुराण उक्तः 'गोमयादुत्थितः श्रीमान्बिल्ववृक्षः शिवप्रियः। तत्रास्ते पद्महस्ता श्रीः श्रीवृक्षस्तेन चोच्यते ॥' तं कं यत्र सेविते शिवायार्पिते वेति शेषः, त्रयाणां धर्मार्थकामानां सर्गः इतरत इतरस्य मोक्षस्य सर्गो मृषासत्यः। दृष्टांतः पूर्ववत्। 'धर्मार्थकामसिद्ध्यर्थं श्रीवृक्षं सेवयेत्सदा। मोक्षार्थ्यपि नरो धीमाँल्लक्ष्मीवृक्षं सदाश्रयेदि'ति शैवे। इह समासांतर्गतः सर्गशब्द इतरत इत्यनेन संबध्यते। 'भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षितामि'त्यत्र यथा प्रमुखत इति पदं समासांतर्गतमपि 'महीक्षिता'मित्यनेन संबध्यते तद्वदत्रापि। वक्ष्यत्यपि 'तत्कथ्यतां महाभाग यदि कृष्णकथाश्रयम्। अथवास्य पदांभोजमकरंदलिहां सतामि'ह यथाश्रयमिति पदं समासे कृष्णपदसंबद्धमपि सतामिति पदेन संबध्यते तथेहापीति 'विप्रकीर्णजटाच्छन्नं रौरवेणाजिनेन चे'तिवद्वा। यतो यस्य बिल्वस्यान्वयात्संबंधात्स्वराट् दरिद्रो दुरुद्-हव्याधो मृगसंगतोर्थेष्वायस्य 'न धर्मोस्ति दयासम' इत्युक्तेर्दयारूपधर्मस्य जन्मोत्पत्तिमाये। अय गतावतो लिट् आर्पत्वान्नाम्। यद्वाऽस्य श्रीरामचंद्रस्य जन्म संगतिमाये। एतच्च शिवपुराणे शिवरात्रिमाहात्म्ये विस्तृतमस्ति। वाक्यानि तत्रत्यानि विस्तरभियेह नोक्तानि। तेन शिवरात्रिदिने किञ्चिदाहाराद्यप्राप्तवता रात्रौ बिल्वमारुह्य सरस्तटे मृगादिवधार्थं स्थितं तत्र समागतमृगवधार्थं बाणसंधानावसरे बिल्वपत्राणि त्रुटित्वा शिवोपरि सजलानि पतितानि। तैश्च मृगमृग्यादिभिस्तस्मै धर्मोद्घाटनपूर्वकं शपथं कृत्वागतं पुनरागतांस्तान् दृष्ट्वा स दयायुतोभूत्तत आविर्भूय शिवस्तं तव गृहे राम आगमिष्यति तत्संगतस्ते मुक्तिर्भविष्यतीत्युक्त्वांतर्दधे इति तत्रत्यवाक्यकदंबतात्पर्यम्। अभिज्ञः सूतः यतो यस्य च ब्रह्म महत्त्वमादि वेदबोधितं कवये शौनकाय तेने। स्कंदलिंगशिवपुराणेषु तदुद्ग्रन्थ्यम्। यद्वाऽभिज्ञः श्रीशंकर एव वा यतो बिल्वस्य महत्त्वमादिकवये नारदाय सौरपुराणे तेने। 'एकं बिल्वदलं रम्यं मद्भक्तेनार्पितं मयि। अनंताघहरं नूनं सत्यमेवोच्यते मया ॥ दर्शनाद्बिल्ववृक्षस्य स्पर्शनाद्वंदनादपि। अहोरात्रकृतं पापं नश्यते नात्र संशयः ॥' इति। यस्मिन् बिल्वे शंकरे वा सूरयोपि शास्त्राभिज्ञा अपि वृथा हठान्मुह्यंति निन्दां कुर्वंति। 'नाद्याद्बिल्वं तथा स्थाणुमर्चयेन्न कदाचने'त्यादिकल्पितवाक्यैः। किंभूतं स्वेन धाम्नाश्रयेण श्रीलक्ष्मीकररूपेण निरस्तं कुहकं दारिद्र्यलक्षणं येन तम्। 'बिल्वो लक्ष्म्याः करेऽभवदि'ति वामनपुराणात्। 'आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोथ बिल्वः। तस्य फलानि तपसा नुदंतु मायांतराश्च बाह्या अलक्ष्मीरि'ति श्रुतेश्च। सत्यं हरार्चनसत्यत्वकरं तद्विना तस्य वृथात्वात्। 'तत्सत्यं पूजनं शंभोर्बिल्वपत्रैस्तु यत्कृतम्। तद्वृथा पूजनं विद्धि बिल्वहीनं तु यत्कृतमि'ति शैवे। पुनः परं सर्वपत्रपुष्पादिभ्यो हरस्यातिप्रियत्वान्मोक्षहेतुत्वाच्च। 'अमृतोद्भवं श्रीवृक्षं शंकरस्य सदा प्रियमि'ति मंत्रलिंगात्। शिवरहस्ये 'शिवलिंगं बिल्वपत्रैः कोमलैरमलैरपि। यो नरः पूजयेन्नित्यं स धन्यः पुरुषर्षभः ॥ त्रिपत्राण्यतीव रम्याणि बिल्वपत्राणि सादरम्। येनार्पितानि मे लिंगे तेन मुक्तिरवाप्यते ॥ अभिषिच्य विधानेन यो मां बिल्वदलैर्मुदा। पूजयिष्यति पुण्यात्मा स मोक्षमधिगच्छति ॥ बिल्वपत्रैरखंडैस्तु सकृत्पूजयते शिवम्। सर्वपापविनिर्मुक्तो रुद्रलोके महीयते ॥' ब्रह्माण्डे 'नित्यमार्द्रैरनाविद्धैर्बिल्वपत्रैः सदाशिवम्। पूजयस्व महादेवं तस्मान्मा प्रमदो भवे'ति। 'पञ्चाक्षरेण मन्त्रेण बिल्वपत्रैः शिवार्चनम्। करोति श्रद्धया यस्तु स गच्छेदैश्वरं पदम् ॥' शिवरहस्ये तु 'शुष्कैः पर्युषितैः पत्रैरपि बिल्वस्य नारद। पूजयेद्गिरिजानाथमलाभे यत्नतो नरः ॥' नारदीये 'सर्वेभ्यश्चैव पत्रेभ्यो बिल्वपत्रं विशिष्यते। दिने दिने तु दातव्यं शोधयित्वा पुनः पुनः ॥ सप्तरात्रमतिक्रम्य निर्माल्यत्वं प्रपद्यते ॥' पाद्मे 'चूर्णीकृतान्यपि प्राह्णा बिल्वपत्राणि वैदिकाः। संपाद्य पूजयन्त्वीशं नवालाभे विचक्षणाः ॥' स्कान्दे तु 'अर्पितान्यपि बिल्वानि प्रक्षाल्य च पुनः पुनः। शङ्करायार्पणीयानि न नवानि यदि क्वचित् ॥ खण्डितं बिल्वपत्रं च यादृशं तादृशं शिवे। प्रत्यहं नियमेनेति प्राहुर्जाबालवादिनः ॥ अच्छिद्रैश्च नवैः शुद्धैः संवृतैः पुरतान्वितैः। वामपत्रे स्थितो ब्रह्मा पद्मनाभश्च दक्षिणे ॥ मध्यपत्रे स्थितो रुद्रः सांबः संसारमोचकः। पृष्ठभागे स्थिता यक्षा ह्यभक्तानां निषेधकाः ॥ इन्द्रादयो लोकपाला वृंताग्रे परिकीर्तिताः।' इति। लिंगे तु 'अमारिक्तासु चाष्टम्यां संक्रान्ताविन्दुवासरे। बिल्वपत्रं न छिन्द्याद्वै छिन्द्याच्चेन्नरकं व्रजेदि'ति। 'बिल्वपत्रं समाघ्राय पथि गच्छति यो नरः। तस्य सहायो विश्वेशः सस्कन्दोमागणेश्वरः ॥' इति सनत्कुमारसंहितायाम्। 'बिल्वकाष्ठसमुद्भूतं चन्दनं यः समर्पयेत्। शिवाय देवदेवाय गाणपत्यपदं लभेदि'ति। विष्णुरहस्ये तु 'सकृदभ्यर्च्य गोविन्दं बिल्वपत्रेण मानवः। मुक्तिभागी निरातंकः कृष्णस्यानुचरो भवेत् ॥ बिल्वमूले स्थितो ब्रह्मा बिल्वमध्ये हरः स्थितः। बिल्वपत्रे स्थितो विष्णुः कण्टकेषु गणेश्वरः ॥ त्वचायां देवताः सर्वाः पुष्पेषु हरिवल्लभे'ति स्कान्दे। 'बकपुष्पं बिल्वपत्रं कुशपुष्पं कुशेशयम्। वर्णपुष्पं कुसुम्भं च तथा कुंकुमकेशरम् ॥ लवंगं दमुनं चैव नलकोशोद्भवं तथा। सौवर्णं राजतं पुष्पं नैव पर्युषितं भवेत् ॥ तथैवामर्दकीपत्रं तुलसीपत्रमेव च। नैव पर्युषितं भूयादपि वर्षांतरे गते ॥ वर्ज्यं पर्युषितं तोयं पत्राणि कुसुमानि च। तुलस्यगस्तिबिल्वानि गंगावारि न दुष्यति ॥ तुलस्यां बिल्वपत्रे च जलजेषु च सर्वशः। न पर्युषितदोषोस्ति मालाकारगृहे तथे'ति 'बिल्वापामार्गजातीतुलसिशमिशताकेतकीभृङ्गदूर्वामन्दारांभोजदर्भामुनितगरतिलब्रह्मकह्लारमल्ली। चम्पाश्वारातिकुम्भादमनमरुचकाबिल्वतोहानित्रिंशत्रिंशत्र्येकार्यैरीशोदधिनिधिवसुभूभूयमाभूयपत्रम् ॥' अस्यार्थः बिल्वः त्रिंशत् ३० अपामार्गः ३० जाती ३ तुलसी १ शमी ६ शतवारी ११ केतकी ७ दूर्वा ८ मन्दारः १ अम्भोजम् १ दर्भ १ अगस्तिः ३० तगर ३० तिल ३ पलाश १ कह्लार ६ मल्ली ११ चम्पा ७ अश्वा ८ अरातिः ८ कुम्भ ११ दमनक २ मरुवक २ इति क्रमेण योज्यमत्र। वक्तव्यमन्यदप्यस्ति 'मणिमुक्ताप्रवालैस्तु रत्नैरप्यर्चनं कृतम्। न गृह्णाति बिना देवो बिल्वपत्रैर्वरानने ॥' इति लिंगे। किं बहुना। इति बिल्ववृक्षपक्षः ॥ ९३ ॥

अथ स्वयंपाकपक्षः ॥ 'आचारः परमो धर्मो नृणां श्रेयस्करो महान्। इह लोके परा कीर्तिः परत्र परमं सुखमि'ति स्मृतेः। 'आचाराल्लभते ह्यायुराचारादीप्सितप्रजाः। आचारादन्नमक्षय्यमाचारो हन्त्यलक्षणमि'ति स्मृतेश्च। 'आचारहीनं न पुनन्ति वेदा यद्यप्यधीताः सह षड्भिरंगैः। छन्दांस्येनं मृत्युकाले त्यजन्ति नीडं शकुन्ता इव जातपक्षाः ॥' इति याज्ञवल्क्याच्च। 'हरिभक्तिरतोपि स्याद्धरिध्यानरतोपि वा। भ्रष्टो यः स्वयमाचारात्पतितः सोऽभिधीयते ॥' इति नारदीयाच्च। 'आचारात्प्राप्यते श्रैष्ठ्यमाचारात्कर्म लभ्यते। कर्मणा जायते ज्ञानं ज्ञानान्मोक्षमवाप्यते ॥ यस्त्वाचारविहीनो हि विद्वान्वेदपरायणः। सर्वधर्माद्बहिः कार्यो यथा शूद्रस्तथैव सः ॥' इति स्मृत्यन्तराच्च। बृहत्पाराशरीयेऽपि 'आचारहीननरदेहगताश्च वेदाः शोचन्ति किन्तु कृतवन्त इति स्म चित्ते। यन्नोभवद्वपुषि पुण्यशुभप्रहीणे स्थानं तदत्र भगवान्विधिरेव शोच्यः ॥' इति। 'कर्तव्यं यत्नतः शौचं शौचमूला द्विजाः स्मृताः। शौचाचारविहीनानां सर्वाः स्युर्निष्फलाः क्रियाः ॥' इति च। 'आचारेषु च सर्वेषु स्वयंपाकः परो मतः। सर्वेषामेष धर्माणां करणं विदुषां मते ॥' इति स्मृतेर्वयं तं पाकं सदा हृदा धीमहि। तं कं यत्र त्रयाणां शुद्धिमनःस्वास्थ्ययशसां सर्गोऽमृषा सत्यः। दृष्टान्तस्तूक्तप्रायः। 'मनःस्वास्थ्यं यशःशुद्धिश्चैतज्जायेत सर्वथा। स्वयंपाकप्रवृत्तानां निजधर्मवतां नृणामि'त्याचारार्के। यतः स्वयंपाकस्यान्वयात्सेवनात्स्वराट् द्विजोत्तमः अर्थेष्वाद्यस्य धर्मस्य इतरत इतरेषामर्थकाममोक्षाणां जन्म, प्राकट्यं लभत इति शेषः, अभिज्ञश्च भवति। 'धर्मोर्थश्च तथा कामो ज्ञानं मोक्षस्तथैव च। स्वयंपाकं कृतवतः सन्त्येते ब्राह्मणस्य ही'ति स्मृतिप्रदीपादौ। यः स्वयंपाकः ब्रह्म ब्राह्मणत्वं तेने। ब्रह्मेत्युपलक्षणम्। तदुक्तं 'ब्राह्मं तेजस्तथा मन्त्राः आयुः शौचं तथा सुखम्। स्वयंपाकेन वर्द्धन्ते नश्यन्ति परपाकतः ॥' इति कौशिकसंहितायाम्। किं कर्तुमादिकवये सनातनकविं हरिं प्राप्तुम्। 'प्राप्तिः सुखेन जायेत स्वयंपाकार्पणाद्धरेरि'ति विष्णुरहस्ये। यस्मिन्स्वयंपाके सूरयो विशेषतः कृतशास्त्राभ्यासा अपि मुह्यन्ति तन्न कुर्वन्तीत्यर्थः। किञ्चित्सांकर्य्यवशादिति रहस्यमत्र। तदुक्तं 'वीर्यशुद्धः प्रवर्त्तेत पाकशुद्धौ न चेतरः।' इति निर्णयसुधाकरोक्तेः। किंभूतं स्वयंपाकं स्वेन धाम्ना निरस्तं कुहकमप्रायत्यलक्षणं निजसेविनां येन तम्। 'स्वयंपाकाशिनो विप्रा विप्रस्यास्ति न पातकमि'ति संहितोक्तेः। पुनः परं सत्यमतीव पावित्र्यापादकम्। 'यतस्ततः प्रतिग्राही स्वपाकनिरतो द्विजः। प्रायश्चित्तमकुर्वाणस्तथापि परमः शुचिरि'ति स्मृतिदीपकोक्तेः। 'स्वाध्यायहोमसंयुक्तः परपाकविवर्जितः। रत्नपूर्णामपि महीं प्रतिगृह्य न लिप्यते ॥' इति गरुडोक्तेश्च। यद्वा सत्यरूपब्रह्मप्रापकत्वात्सत्यम्। तच्च शान्तिपर्वटीकायां नीलकण्ठेन श्रुत्योक्तम् 'आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः। स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष' इति श्रुतेराहारशुद्ध्यादिक्रमेण ब्रह्मप्राप्तिरिति श्रुत्यर्थः। अथ प्रसङ्गात् स्वयंपाकप्रकारमाह। 'परपाकरतो विप्रः स्वयंपाकी तु यो यतिः। तावुभौ नरकं यातो यावदाभूतसंप्लवम् ॥ अतो विप्रैः स्वयंपाकः पक्तव्यो विधिपूर्वकम्। एकान्तेतिशुचौ देशे कार्यो महानसस्ततः'। श्वशूद्रकाकपतिता न पश्येयुर्यथा च तम् ॥ पाकं च पाचकं चैवमावृत्तिं तत्र कारयेत् ॥ म्लेच्छग्रामगृहे ग्राह्या गोशाला पाककर्मणि ॥ यतस्ततो विधातव्यः पाको विपदि सत्तमैः। गोमयगौरमृत्साद्यैर्लेपनं मण्डलाकृतिम् ॥ कृत्वा तत्र न्यसेत्सर्वपाकोपकरणं पुरः। मर्यादां भस्ममृत्काष्ठतृणरेखांबुभिः स्फुटाम् ॥ द्वारस्तंभाभ्यां च कुर्वीत तत्रान्यो न विशेत्पुनः। गत्वा महानसं विप्रः शुचिर्भूत्वा समाहितः ॥ पाककर्म प्रकुर्वीत विमृश्य च शनैः शनैः। पापकर्मप्रवृत्तो यो बहिरायाति तद्गृहात् ॥ पुनस्तथैव प्रविशेत्स पाकोऽशुचितामियात्। अतः पादादि प्रक्षाल्य पाकशालां पुनर्विशेत् ॥ अन्तस्थो न प्रगृह्णीत बहिष्ठाद्वस्तु किञ्चन। बहिष्ठोपि ततो नैव गृह्णीयात्किञ्चिदेव हि ॥ पाकस्थानाद्बहिर्यान्तं शुचिपात्रमथो पुनः। संशोध्य दूरतस्त्याज्यं पाकस्थाने द्विजातिभिः ॥ पाकावशिष्टमखिलं न गृह्णीत कदाचन। पाकशालागतं काष्ठं त्ववशिष्टं न दुष्यति ॥ उच्छिष्टस्पर्शरहितं घृतं सन्ताप्य फाणयेत्। गोधूमचूर्णं संशोध्य तोलयित्वा ददीत वै ॥ मरिचाद्योषधीजातं वायुना शोधितं शुचि। उच्छिष्टस्पर्शरहितं लवणं नैव दुष्यति ॥' अथ स्वयंपाकस्वरूपमाह 'स्वयं हि पाकः पचनीय एव दारैः स्वशिष्यैरथवा स्वपुत्रैः। स्वगोत्रजैर्वा स्वसमानजातैः कृतो हि पाकः स्वयमेव पाकः ॥' अस्यार्थः पाकः स्वयमेव कार्य इति मुख्यः पक्षः, दारैरपि समानजातीयैरेव स्वशिष्यैरपि तथाविधैः स्वपुत्रैरपि तादृशैरेव, न तु दासीजाद्यैरपि तदभावे स्वगोत्रजैस्तदभावे समानजातीयैरपि कृतः पाको ग्राह्यो न त्वसमानजातिकृतमण्डकौदनादिरूपः पाको विप्रैर्ग्राह्यस्तेन 'घृतपक्वं पयःपक्वं पक्वं केवलवह्निना। तदन्नं फलवद्ग्राह्यं न दोषो मनुरब्रवीदि'ति शूद्रमनुनोक्तं तु शूद्रेतरद्विजातिकृतं पक्वं ग्राह्यमेव। 'शूद्रस्य पितरः शूद्रा देवाश्चैव तदर्चिताः। ते तत्पाकं न गृह्णन्ति ह्युत्कृष्टानां तु का कथा ॥' तदुक्तं "शूद्रहस्तकृतं पाकं नाश्नन्ति पितृदेवताः। यतस्तं श्रुतयः प्राहुः श्मशानं पादसंयुतम् ॥ श्मशानवद्वर्जनीयः शूद्रः पाकादिकर्मणि। शूद्रस्यापीह पितरस्तत्पाकं नैव गृह्णते ॥ आमं शूद्रस्य शूद्रान्नं पक्वमुच्छिष्टमुच्यते। आमश्राद्धं सदा शूद्रैः कार्यं पाकेन न कर्चिदि'ति पराशरोक्तेः। यत्तु 'गोरसं चैव सक्तुं च तैलं पिण्याकमेव च। अपूपान्भक्षयेच्छूद्राद्यच्चान्यत्पयसा कृतमि'ति सुमन्तुनोक्तं तच्छूद्रकृतपरिवेषणमाह। न तु शूद्रकृतपाकं शूद्रादिति पक्वमोविधेः घृतपक्वमपि पाकानन्तरं जलादिस्पर्शहीनमेव ग्राह्यं न तु तत्स्पृष्टं माषवटकादिरूपमपि 'संशुद्धं घृतपक्वं तद्यत्तोयं न स्पृशेत्पुनरि'ति संहितोक्तेः। किञ्च 'विप्रजातिकृतः पाकः

१. निखातः।

स्यादाद्यः सर्वजातिभिः। अन्त्यजातिकृतः पाको विप्रैर्नाद्यः कदाचने'ति स्मृतेः। आद्यो भक्ष्यः। विप्रादीनामन्यपाकाशने प्रायश्चित्तमप्युक्तं संहितायाम् 'विप्रः कुर्यादहोरात्रव्रतं क्षत्रियपाकभुक्। गायत्र्यास्त्रिशतं जाप्यं वैश्यपाकाशने कृते॥ त्र्युपवासपरो भूत्वा गायत्र्यष्टसहस्रकम्। शूद्रपाकाशने विप्रो ब्रह्मकूर्चेन शुध्यति॥ प्रामादिके निष्कृतिश्च प्रोक्ताद्विध्ना विजानतः। क्षत्रियो वैश्यपाकाशीत्यहोरात्रव्रतं चरेत्॥ शूद्रपाके ब्राह्मणवन्निष्कृतिं समुपाचरेत्। वैश्यः शूद्रकृतं पाकमत्त्वा चान्द्रव्रतं चरेत्॥ लिङ्गिपाकाशने वृत्ते गङ्गां स्नात्वा द्विजः शुचिरि'ति। किञ्च 'स्वयं हि पाकः पचनीय एवे'त्यादिश्लोके वाशब्दान्मातृपुत्र्यादयोपि ग्राह्याः। तदुक्तं 'माता पुत्री स्वसा पितृष्वसा मातृष्वसा तथा। मातामही स्नुषा विप्राः पत्न्यभावे स्त्रियो मताः॥ पाककर्मणि विप्रेन्द्र तथैव च पितामही। यथोक्तशौचसंयुक्ता नार्यो ग्राह्या न चान्यथे'ति स्मृतिसमुच्चये। गोविन्दार्णवे तु 'आश्रम्यनाश्रमी वा स्यादपत्नीकोपि पुत्रवान्। स्नुषादुहितृपक्वान्नं दद्याद्याज्जुहोति चे'त्युक्तम्। किञ्च 'यो विप्रपाके दुष्टात्मा मत्सरी दोषधारकः। स चाण्डालैरपि त्याज्यो गृध्रमांससमः सदा॥ जलाग्न्यन्नसमायोगसिद्धान्नमिह चोच्यते। इक्षुपाकोपि संग्राह्यो ह्यसमानकृतो द्विजैः॥' केचित्तु 'आत्मना पच्यते यश्च पत्न्या वा यश्च पच्यते। पच्यते पुत्रशिष्याभ्यां स्वयंपाकः स उच्यते॥' इत्याहुस्तत्र पूर्वश्लोकोक्तस्वगोत्रजादयश्चात्र शब्देन ग्राह्या इति। 'पाचकोपि शुभाकारः सदाचारो द्विजोत्तमः। स्वजातितो न हीनो वा भक्तिमानभिलाषुकः॥ न व्रात्यलिङ्गिनग्नावधूताशुचिकृतं द्विजः॥ नैकवासःकृतं पाकं गृह्णीयात्पित्र्यदैविके।' अत्र व्रात्या गायत्रीपतिता अनुपनीता इति यावत्। लिङ्गिनोत्र राजमुद्राङ्किता देवमुद्राङ्किता भिक्षवः पाखण्डानुगाश्च। तदुक्तं निर्णयदीपके 'जटाभस्मदेवमुद्राराजमुद्राधृतो नराः। नास्तिकानुगता ये च तेन्येपि लिङ्गिनो मताः॥' इति। नग्नो वस्त्रहीनाद्यन्यतमो नरो नारी वा। नग्नपदार्थस्तु जावालिनोक्तः 'नग्नः स्यान्मलवद्वासा नग्नः कौपीनकेवलः। द्विकच्छोनुत्तरीयश्च ह्यकच्छोऽवस्त्र एव च॥ नग्नः काषायवासाः स्यान्नग्नश्चार्द्रपटस्तथा॥ नग्नस्तु स्निग्धवस्त्रः स्यान्नग्नः स्यूतपटस्तथे'ति। अवधूतस्त्यक्तसर्वो भस्मादिधारी वाऽशुचिर्यथोक्तशौचहीनः एकवासाः केवलधौतादिरूपैकवस्त्रवान्। 'न स्वाङ्गस्पृष्टवस्त्रेण पाकशोधनमाचरेत्। पाकवस्त्रं पृथक्कार्यं मुधा पाकोन्यथा भवेदि'ति। मुधापाको देवाद्यनर्हः। 'आयुरारोग्यमैश्वर्यं पाकशुद्ध्या सुसन्ततिः। देवताः पितरश्चैव पाकशुद्धिमभीप्सवः॥ गायत्र्या शोधयेत्पाकमभिमन्त्र्याम्बुना सुधीः। वैश्वदेवं विधायादौ देवेभ्यस्तत आनयेत्॥ प्रमादोद्भूतमाशौचमधोवातादिजं तथा। गायत्री प्रपुनात्येव पाचकस्य विशेषतः॥ मुखं पिधाय वस्त्रेण तद्वासो न पुनः स्पृशेत्। स्पृष्टे पुनः करौ क्षाल्य शुद्धतोयेन संविशेत्॥ पाकशुद्धिर्महद्धर्मः पाकशुद्धिर्महत्तपः। वीर्यशुद्धः प्रवर्त्तेत पाकशुद्धो द्विजोत्तमः॥ तैलपाकं दरिद्राणां नेतरेषां शुचिं विदुः। शाकं प्रक्षाल्य गृह्णीयात्तथा पत्रादिकं सुधीः॥ यस्मिन्देशे य आचारः सोपि मान्यः श्रुतानुगः। यस्मिन्देशे च ये विप्रा ये देवा या च मृत्तिका॥ यत्तोयं यच्च काष्ठं वैतद्ग्राह्यं तच्च नान्यथा। तडागोदकवद्ग्राह्यो विप्रपाकोखिलैर्नरैः॥ अन्यपाको न संग्राह्यस्तत्तद्घटगतांवुवत्। शुद्धमातापितृभ्यां यो जातो वीर्यशुचिर्भवेदि'ति। किंच 'देशग्रामयुगकुलजात्याचारं समाचरेत्। आम्नायानुगतं विद्वान्न विरुद्धं कदाचने'ति स्मृतेः। किंच 'चुल्ल्यामधिष्ठिते पात्रे मण्डकौदनपाकयोः। न मुखेन धमेदग्निं धमेच्च व्यजनादिना॥ मुखेन धमनात्पाकोऽशुचिः स्यात्सर्वकर्मसु। मुखेनैव धमेदग्निं मुखादग्निरजायत॥ इति वाक्यं वैदिकाग्नौ चरितार्थं न लौकिके।' मण्डकौदनपात्रग्रहणमुपलक्षणं पात्रांतराणाम्। व्यजनादिनेत्यादिनावस्त्रादिग्रहो न तु ससुषिरवेणुदलादिग्रहः। तस्यापि परंपरया मुखधमनत्वेनातिगर्हितत्वमेव। 'वंशाद्यं रंध्रसहितं धमने त्वतिगर्हितम्। सदोच्छिष्टं पाककार्ये दूरतो वर्जयेद् द्विजः॥' इति शिष्टपरिग्रहोक्तेः। 'विवाहे तीर्थयात्रायां दुर्भिक्षे देशसंप्लवे। रोगे कारागृहे चैव मार्गे शौचं न चिंतयेत्॥' वृन्दावनमाहात्म्येपि 'न चोद्वाहे समाचारो न शौचं न तपःक्रिया। मण्डपाह्व्यसूत्राधः सदा शुद्धिः श्रुतेर्वचः॥' इति। किंच 'साजात्यपंक्तौ भोक्तव्यं सर्वदा द्विजसत्तमैः। यो वैजात्यतो भुंक्ते स तत्साम्यमवाप्नुयात्॥ परिवेषणकाले तु दूरतोन्नं परित्यजेत्। स्पृष्टेन्नं संपरित्यज्योच्छिष्टे स्नानं समाचरेत्॥ कन्यापाकं चाददीत साजात्यानां न चान्यतः। स्वोत्कृष्टजातः पाकस्तु ग्राह्यग्राह्या न कन्यका॥ उच्छिष्टे न घृतं देयं धृतपात्रं विना बुधैः। पात्रे पात्रं न संस्थाप्य भोक्तव्यं कर्हिचिद्द्विजैरि'ति। 'कार्पासं श्वेतमेवेह ग्राह्यं वासो महानसे। रागयुक्तं त्वाविकादिकार्पासं न कदाचने'ति। अत्रापि बहु वक्तव्यमस्ति ग्रन्थविस्तरभियोपरम्यते॥ इति स्वयंपाकपक्षः॥ ९४॥

अथ नवग्रहपक्षः॥ वयं तं नवग्रहसमूहं सदा हृदा धीमहि। तं कं यत्र त्रयाणां शुभाशुभमध्यमफलानां सर्गोमृषा। दृष्टान्तस्तूक्तवत्। तदुक्तम्-'शुभः शुभफलः प्रोक्तोऽशुभोऽशुभफलप्रदः। मध्यमो मध्यफलदो विचार्यैव फलं वदेत्॥ शौक्लश्चन्द्रो बुधो जीवशुक्रौ स्वाभाविकाः शुभाः। एते दुष्टयुतः पापः शुभः स्यान्नैव संशयः॥ शनिभौमौ राहुकेतू ग्रहा एतेऽशुभा मताः। कृष्णश्चन्द्रस्तथा सूर्यो मध्यमौ परिकीर्तितौ॥ बलिनो हि शुभाः सर्वे निर्बलास्त्वशुभा मताः। बलाबलेन रहिता मध्यमाः स्युर्ग्रहा ध्रुवम्॥ उदितः स्वगृहस्थश्च मित्रगेहे स्थितोपि वा। मित्रवर्गेण दृष्टश्च स्ववर्गेपि ग्रहो बली॥ शत्रुगेहे शत्रुदृष्टोऽरिवर्गेऽशुभसंयुतः। नीचोऽस्तो निर्बलः खेटो मध्यमस्तूपवर्जितः॥' इति गणकमंडने। यद्वा यत्र त्रयाणां शत्रुमित्रसमानां सर्गोऽमृषा। तदुक्तं 'शत्रू मन्दसितौ समश्च शशिजो मित्राणि शेषा रवेस्तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः। जीवेन्दूष्णकराः कुजस्य सुहृदो ज्ञोरिः सितार्की समौ मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे॥ सूरेः सौम्यसितावरी रविसुतो मध्यो

परे त्वन्यथा सौम्यार्कौ सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी। शुक्रज्ञौ सुहृदौ समः सुरगुरुः सौरस्य चान्येरयः।' इति जातके। यतो नवग्रहस्यान्वयात् समूहादाद्यस्य प्राग्जन्मन इतरत इतरयोर्जन्मनोरर्थेषु शुभाशुभकर्मसु अभिज्ञो भवति। इह जन्मेति पदं लुप्तषष्ठीकं बोध्यम्। यद्वाऽर्थवशाल्लिंगविभक्तिवचनानां विपरिणाम इति व्याड्यनुशासनात्परिणमय्यं पञ्चम्यंतमिति। 'समूहेऽप्यन्वयः स्मृत' इति धरणिः। एतदभिप्रायेणोक्तं 'यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः प्राप्तिम्। व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव॥' इति लघुजातके। 'सूर्याद्यैः खेचरैः कर्म सूच्यते पूर्वसंचितम्। वर्तमानं तथा भावि तन्वादिभावमागतैः॥ शुभस्थानेषु तिष्ठन्ति प्राचीनशुभकर्मणा। ग्रहास्त एव पापेन कर्मणाऽशुभसद्मगाः॥' इति गणकमण्डने। यो ग्रहसमूहः स्वेन निजमहिम्ना राजते निजनिजमंडले इति स्वराट्। यद्वा स्वराट् सार्वभौम इव मुहुः पूजनीयोन्यथा विनाशकरः स्यादिति। 'ग्रहा गावो नरेन्द्राश्च ब्राह्मणश्च विशेषतः। पूजिताः प्रतिपूज्यन्ते निर्दहन्त्यपमानिताः॥' इति स्मृतेः। यो ग्रहसमूहः आदीयते क्षीयतेऽनेनेत्यादि दुःखम्। दीङ् क्षये इतः करणे किः। 'कं सुखं कं जलं मतमि'ति कोशात् कं सुखं, आदि च कं चादिके दुःखसुखे ते वीयेते प्राप्येते अत्रेत्यादिकवयो दशासमयस्तस्मिंस्तथा। वीगतावतः स्वराट् इत्यधिकरणेऽप्रत्ययः। ग्रह निजमहत्त्वं दशानुरूपं तेने नृणामिति। 'तन्वन्ति खेटा निजवैभवं नृणां दशाप्रपाके सुखदुःखरूपम्।' इति जातकदर्पणे। यत्र ग्रहसमूहे सूरयो लोकरंजनार्थमधीतशास्त्रा नास्तिकाः शुष्कवेदान्तिनश्च मुह्यन्ति। 'किं कुर्वन्ति ग्रहा नृणां नृभिर्दिष्टं हि भुज्यते' इत्यादिवाक्यैः। 'संकरस्य च कर्त्ता स्यां, न कुर्यां कर्म चेदहमि'त्याद्युक्तेर्भगवतापि कृतरक्षं लोकसंग्रहं ग्रहार्चनरूपं त्यजन्ति त्याजयन्ति चेति भावः। किंभूतं स्वेन धाम्ना तेजसा निरस्तं कुहकं देवाद्यनुयायिनां दुःखं येन तम्। तदुक्तं श्रीपतिना 'देवब्राह्मणवन्दनाद् गुरुवचःसम्पादनात्प्रत्यहं साधूनामभिभाषणाच्छ्रुतिवचःश्रेयस्कथाकर्णनात्। होमादध्वरदर्शनाच्छुचिमतो भावाज्जपाद्दानतो नो कुर्वन्ति कदाचिदेव पुरुषस्यैवं ग्रहाः पीडनमि'ति। पुनः किंभूतं सत्यं सत्यरूपवेदसर्वाङ्गप्रधानीभूतज्योतिःशास्त्रप्रतिपाद्यत्वात्। ननु ज्योतिःशास्त्रस्य कथं प्राधान्यमिति चेच्छृणु-'सिद्धान्तसंहिताहोरारूपस्कंधत्रयात्मकम्। वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमकल्मषम्॥ विनैतदखिलं श्रौतं स्मार्त्तं कर्म न सिध्यति॥ तस्माज्जगद्धितायेदं ब्रह्मणा निर्मितं पुरा। अत एव द्विजैरेतदध्येतव्यं प्रयत्नतः॥' अत्रैवकारस्य पाठक्रमेण योजने प्रयोजनं विनैव ज्योतिःशास्त्राध्ययनस्यावश्यकत्वं प्रतीयते। द्विजैरेवेति व्याख्यानाद् द्विजन्मव्यतिरिक्तैः शूद्रैर्नाध्येयमिति च प्रतीयते। व्याख्यानद्वयमपि युक्तमेव। ननु कथं श्रौतस्मार्त्तकर्मोपयोगि ज्यौतिषमिति चेन् उच्यते। 'अष्टवर्षं ब्राह्मणमुपनयीत, वसन्ते ब्राह्मणोग्नीनादधीत, दर्शपौर्णमासाभ्यां यजेते'त्यादिश्रुतयः सन्ति। तत्र वर्षादिज्ञानं वसन्ताद्यनुज्ञानं दर्शपौर्णमासयोर्ज्ञानं च ज्योतिषं विना सर्वथा न निर्वहतीत्यवश्यमध्येतव्यं ज्योतिःशास्त्रम्। तदुक्तं वेदांगज्योतिषे 'वेदा हि यज्ञार्थमिति प्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः। तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञान्॥ यथा शिखा मयूराणां नागानां मणयो यथा। तद्वद्वेदांगशास्त्राणां ज्यौतिषं मूर्द्धनि स्थितम्॥' तच्च सुपरीक्षितशिष्याय देयम्। तदुक्तं श्रुतौ—'विद्याह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेहमस्मि। असूयकायानृजवेयिताय न मा ब्रूया वीर्यवती तथा स्यामि'ति। अन्यच्च 'नैतद्देयं दुर्विनीताय जातु ज्ञानं गुप्तं तद्धि सम्यक्फलाय। अस्थाने वै स्थाप्यमानैव वाचां देवी कोपात्तं दहेन्नो चिराय॥ विनयावनताय दीयमाना प्रभवेत्कल्पलतेव सत्फलाय। उपकृत्यनुचितकानि शास्त्राण्युपकारस्य फलं हि साधुरेति॥' शूद्रस्य तु महान् दोषः, गर्गः 'स्नेहाल्लोभाच्च मोहाच्च यो विप्रो ज्ञानतोपि वा। शूद्राणामुपदेशं तु दद्यात्स नरकं व्रजेदि'ति। जोतिःशास्त्राध्ययने फलमाह माण्डव्यः 'एवंविधस्य श्रुतिनेत्रशास्त्रस्वरूपभर्त्तुः खलु दर्शनं वै। निहन्त्यशेषं कलुषं जनानां षडब्दजं धर्मसुखास्पदं स्यादि'ति। 'त्रिस्कंधपारंगम एव पूज्यः श्राद्धे सदा भूसुरवृन्दमध्ये। नक्षत्रसूची खलु पापरूपो हेयः सदा सर्वसुधर्मकृत्ये॥' इति वसिष्ठः। 'नासांवत्सरिके देशे वस्तव्यं भूतिमिच्छता। चक्षुर्भूतो हि यत्रैष पापं तत्र न विद्यते॥' इति वाराहः। 'ज्योतिश्चक्रे तु लोकस्य सर्वस्योक्तं शुभाशुभम्। ज्योतिश्शास्त्रं तु यो वेद स याति परमां गतिमि'ति गर्गः। 'दिव्यं चक्षुर्ग्रहर्क्षाणां दर्शितं ज्ञानमुत्तमम्। विज्ञायार्कादिलोकेषु स्थानं प्राप्नोति शाश्वतमि'ति सूर्यसिद्धान्ते। 'न सांवत्सरपाठी च नरके परिपच्यते। ब्रह्मलोके प्रतिष्ठां च लभते दैवचिन्तकः॥' इति गर्गः। किञ्च 'दशदिनकृतपापं हन्ति सिद्धान्तवेत्ता त्रिदिनजनितपापं तन्त्रविद्दृष्ट एव। करणभगणवेत्ता हन्त्यहोरात्रदोषं जनयति घनमंहस्तत्र नक्षत्रसूची॥' इति जीर्णैरभ्यधायि। नक्षत्रसूची वाराहसंहितायामुक्तः 'अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते। स पंक्तिदूषकः पापो ज्ञेयो नक्षत्रसूचकः॥ तिथ्युत्पत्तिं न जानन्ति ग्रहाणां नैव साधनम्। परवाक्येन वर्त्तंते ते वै नक्षत्रसूचकाः॥ गृहेषु गत्वा लोकानामपृष्टा ये वदन्ति हि। तिथिनक्षत्रयोगादींस्ते वै नक्षत्रसूचकाः॥ नक्षत्रजीविनं पापं भिषजं शुल्कजीविनम्। तादृक्पौराणिकादींश्च वाङ्मात्रेणापि नार्चयेत्॥ नक्षत्रसूचकोद्दिष्टमुपवासं करोति यः। स व्रजत्यन्धतामिस्रं सार्द्धमृक्षविडम्बिने'ति। 'यो विप्रो गणिताजीवी गणिताध्यापकश्च यः। तयोस्त्वध्यापकः पूज्यो द्वितीयः पंक्तिदूषकः॥' किंच 'प्रायश्चित्तं चिकित्सां च ज्यौतिषं मन्त्रनिर्णयम्। विना शास्त्रेण यो ब्रूयात्तमाहुर्ब्रह्मघातकमि'त्यलं प्रसक्तानुप्रसक्तेन। पुनः किंभूतं परम् उत्पत्त्यादिहेतुत्वादुत्कृष्टतरम्। तदुक्तं बृहत्पाराशर्यां 'ग्रहाधीनमिदं सर्वमुत्पत्तिप्रलयात्मकम्। जगत्यभावभावौ च तस्मात्पूज्यतमा ग्रहाः॥ सानुकूलैर्ग्रहैर्यानि कुर्यात्कर्माणि मानवः। सफलानि भवन्त्यस्य निष्फलानि स्युरन्यथा॥' इति नवग्रहपक्षः॥ ९५॥

अथैकादशीपक्षः ।। तिथिष्वेकादश्या एव मुख्यत्वेन तत्पक्ष एव योजनामाह वयं तमेकादशीतिथिं सदा हृदा धीमहि । 'तिथयो द्वयोरि'त्यमरात्तिथेः पुंस्त्वम् । तं कं यत्र त्रयाणां कायिकवाचिकमानसानां पापानां सर्गो मृषा । 'वाचा यच्च कृतं पापं यत्पापं मनसा कृतम् । देहेन यत्कृतं पापं तत्सर्वं नश्यति ध्रुवम् । एकादश्युपवासेन श्रद्धया विहितेन वै ।। न तत्पापं हि लोकेषु यन्न हंति हरेर्दिनमि'ति ब्रह्मसंहितोक्तेः । त्रिविधपापमाह 'परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनम् । वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम् ।। पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः । असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ।। अदत्तानामुपादानं हिंसा चैवाविधानतः । परदारोपसेवा च कायिकं त्रिविधं स्मृतमि'ति तिथिनिर्णये । कथं यथा तेजोवारिमृदां विनिमयोऽन्यथा प्रतीतिर्मृषेति । किंच यतो यस्यैकादशीतिथेराद्यस्य विष्णोः सकाशाज्जन्म । 'पुरा दैत्यस्य नाशार्थं मुरुनाम्नो हरेस्तनोः । तिथिरेकादशी जाता सर्वशक्तिसमन्विते'ति पुराणात् । यः एकादशीतिथिः स्वान्निजसेविनो जनान् राजयति वैकुंठे इति स्वराट् । 'एकादशीव्रतकरा नागारिकृतकेतनाः । यांति विष्णोः प्रियं लोकं वैकुंठं योगिदुर्लभमि'ति तन्माहात्म्योक्तेः । यस्तिथिरादिकवये विष्णवे ब्रह्म निजमहत्त्वं तेने । तदुक्तं हरिभक्तिचंद्रोदये एकादशीप्रस्तावे 'एकादशी ह्यहं विष्णो सर्वशत्रुनिकृंतिनी । हीयमानं प्रसन्नं च त्वां दृष्ट्वा भो जनार्दन ।। त्रिलोकीभयदो दैत्यो मयाऽयं निहतो मुरुः ।। क्रुद्धायां मयि देवेश नैकशो दैत्यदानवाः । विलयं यांति दुष्टास्ते देवानां च भयंकराः ।। निहतं दानवं चैकं दृष्ट्वा तेऽद्भुतमत्र किमि'ति । यस्मिन्नेकादशीव्रते सूरय आपाततो विद्वांसोपि मुह्यंति । भृगुमायामोहिता अविद्धव्रतं त्यक्त्वा विद्धमेव तत्कुर्वंति । तदुक्तं हरिभक्तिचंद्रोदये पद्मपुराणीयं विष्णुवाक्यं 'शुक्रेण मोहिता विप्रा दैत्यानां विजयाय वै । कुर्वंति दशमीविद्धं वासरं मम पद्मजे' ति । किञ्च 'मार्कंडेयमुने गच्छ भूलोकं त्वं ममाज्ञया । दशमीवेधविषये शुक्रमायां विनाशये' ति पुराणांतराच्च । किंभूतमेकादशीतिथिं स्वेन निजेन धाम्ना निरस्तः कुहकोऽतिदुष्टो मुरुदैत्यो यद्वा कुहकः पापसमूहो येन तम् । तच्चोक्तमेवात्र 'अभोज्यभोजनाज्जातमगम्यागमनाच्च यत् । अयाज्ययाजनाच्चैवाभक्ष्याणां च भक्षणात् ।। अस्पृश्यस्पर्शनाच्चैव परेषां निंदया च यत् । आत्मनो वञ्चनाच्चैव परदारकृताच्च यत् ।। विहिताकरणाच्चैव परवित्तापहारतः । ज्ञानाज्ञानकृतं यच्च पातकं चोपपातकम् ।। तत्सर्वं विलयं याति एकादश्यामुपोषणादि' ति स्कांदाच्च । पुनः सत्यं सत्यरूपविष्णोः शक्तित्वात् । 'शक्तिस्तेहं सदा विष्णो यतस्त्वत्तः समुद्भवे'ति तद्वाक्यात् । 'सत्यो धर्मो गुरुः सत्यः सत्यो विष्णुस्तथा शिवः । सत्यो वेदस्तथा गंगा सत्यमेकादशीव्रतमि' ति तत्रैवोक्तेः । पुनरितरत इतरतिथिषु परमुत्कृष्टम् । तदुक्तं हरिणा 'सर्वतिथिप्रधाना त्वं भविष्यसि मदाज्ञया । सर्वपापक्षयकरी सर्वविघ्नविनाशिनी ।। धर्मार्थकाममोक्षाणां दात्री शत्रुनिषूदिनी । सर्वसिद्धिकरी वित्तायुरारोग्यप्रदा नृणामि' ति । अथ प्रसंगागतमस्या निर्णयमप्याह वाल्मीकीयमतेन । तत्र नित्यकाम्यत्वेन द्विप्रकारं व्रतमस्या इति । गरुडे नित्यत्वं 'उपोष्यैकादशीं नित्यं पक्षयोरुभयोरपि । अष्टवर्षाधिको मर्त्यो ह्यपूर्णाशीतिवत्सरः ।। एकादश्यामुपवसेत्पक्षयोरुभयोरपि । विधवाया वनस्थस्य यतेश्चैकादशीद्वये ।। उपवासो गृहस्थस्य शुक्लायामेव पुत्रिणः ।।' इति । विष्णुरहस्येऽपि 'द्वादशी न प्रमोक्तव्या यावदायुः सुबुद्धिभिरि' ति । अकरणे प्रत्यवायमाह सनत्कुमारः 'न करोति हि यो मूढ एकादश्यामुपोषणम् । स नरो नरकं याति रौरवं तमसावृतम् ।। एकादश्यां मुनिश्रेष्ठ यो भुंक्ते मूढचेतनः । प्रतिग्रासं स वै भुंक्ते किल्बिषं श्वादिविट्समम् ।।' नारदीये 'यानि कानि च पापानि ब्रह्महत्यासमानि च । अन्नमाश्रित्य तिष्ठंति संप्राप्ते हरिवासरे ।।' स्कांदे तु 'वरं स्वमातृगमनं वरं गोमांसभक्षणम् । वरं हत्यासुरापानं नैकादश्यां तु भोजनमि' ति । नित्यत्वज्ञापकानि बहूनि वाक्यानि । अथ काम्यत्वविधायकवाक्यानि विष्णुरहस्ये 'यदीच्छेद्विष्णुसायुज्यं शुभां सम्पदमात्मनः । एकादश्यां न भुंजीत पक्षयोरुभयोरपि ।।' कात्यायनः 'ऐश्वर्यं संततिं स्वर्गं मुक्तिं वान्यद्यदिच्छति । एकादश्यां न भुंजीत पक्षयोरुभयोरपी' ति । न चैकस्य नित्यत्वं काम्यत्वं च संभवतीति शंक्यम्, कर्तृभेदेनोभयस्यैव शक्यत्वात् । तथा च 'पूर्वामुपवसेत्कामी निष्कामस्तूत्तरां वदे' ति । किंच इयमेकादशी सूतकादावपि न त्याज्या । तदाह विष्णुः 'बहुकालिकसंकल्पो गृहीतश्च पुरा यदि । सूतके मृतके चैव व्रतं तन्नैव दुष्यति ।। अनारब्धमपि कार्यं नित्यं विज्ञैरिति श्रुतम् ।।' कौर्मे तु 'दानार्चने विना कुर्याद् व्रतमात्रमशौचके ।' इति । 'भार्या पत्युर्व्रतं कुर्याद्भार्यायाश्च पतिर्व्रतमि' ति पैठीनसिः । स्कांदे तु 'पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा । एषामभावे वान्यञ्च ब्राह्मणं वा नियोजयेत् ।। जपश्च तीर्थसेवा च तपोहोमादिकञ्च यत् । विप्रैः संपादितं यस्य संपन्नं तस्य तत्फलमि' ति । किञ्च 'आत्मपुत्रः पुरोधाश्च भ्राता पत्नी सखापि वा । यात्रायां धर्मकार्येषु जायंते प्रतिहस्तकाः ।। एभिः कृतं महादेवि स्वयमेव कृतं भवेदि' ति । 'कन्यास्वीकरणादन्यत्सर्वं विप्रेण कारयेदि' ति प्रयोगपारिजाते । किं बहुना सर्वथेयं न त्याज्या । तदुक्तं मार्कंडेयेन 'एकभक्तेन नक्तेन तथा वायाचितेन च । उपवासेन दानेन न निर्द्वादशिको भवेदि' ति । 'मध्याह्नात्यदले त्रिभागदिवसे स्यादेकभक्तं मुने' इति स्कांदे एकभक्तलक्षणमुक्तम् । किञ्च 'एकादशी यदा युक्ता रविभौमार्किसंक्रमैः । तस्यास्तदा चोपवासं न कुर्यात्पुत्रवान्गृही ।।' इति माधवः । 'दशम्यैकादशी विद्धा द्वादशी च क्षयं गता । क्षीणा सा द्वादशी ज्ञेया नक्तं तु गृहिणः स्मृतमि'ति शातातपः । 'मुहूर्तोनं दिनं नक्तं प्रवदंति मनीषिणः । नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिप ।। नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः ।। यतिश्च विधवा चैव कुर्यात्तत्सदिवाकरम् । उदयस्था सदा ग्राह्या हरिनक्तव्रते तिथिरि'ति भविष्ये । 'हविष्यभोजनं स्नानं सत्यमाहारलाघवम् । अग्निकार्यमधःशय्यां नक्तभोजी षडाचरेदि' ति । गारुडे तन्नियमा उक्ताः-

'उपवासनिषेधे तु भक्ष्यं किञ्चित्प्रकल्पयेत्। न दुष्यत्युपवासः स उपवासफलं भवेत्॥' भक्ष्यं तु 'नक्तं हविष्यान्नमनोदनं वा फलं तिलाः क्षीरमथांबु वाज्यम्। तत्पंचगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरञ्चे' ति वायुपुराणे। 'उपवासासमर्थश्च विप्रमेकं तु भोजयेत्। तावद्धनानि दद्याद्वा यद्भुक्त्वा द्विगुणं भवेत्॥ सहस्रसंमितां देवीं जपेद्वा प्राणसंयमात्। कुर्याद्वादशसंख्याका आहुतीस्तद्व्रतं भवेदि'ति ब्रह्मवैवर्ते। हविष्यं तु सनत्कुमारसंहितायामुक्तम् 'हैमंतिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः। कलायकंगुनीवारवास्तूकहिलमोचिकाः॥ षष्टिका कालशाकं च मूलकं केमुकेतरत्। कंदः सैन्धवसामुद्रे गव्ये च दधिसर्पिषी॥ पयोऽनुद्धृतसारं च पनसाम्रे हरीतकी। पिप्पली जीरकं चैव नागरंगं च तिंतिणी॥ कदला लवली धात्री फलान्यगुडमैक्षवम्। अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते॥' इति भविष्ये। सितमस्विन्नमनूष्मपक्वं धान्यं तंडुलाः। प्राच्ये केमुंजा इति केमुकस्य नाम कलायः मठरीति। हेमाद्रौ तु 'हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः। माषकोद्रवगौरादीन् सर्वाभावे विवर्जयेत्॥' आग्नेये तु 'व्रीहिषाष्टिकमुद्गाश्च कलायाः सलिलं पयः। श्यामाकाश्चैव नीवारगोधूमाद्या व्रते हिताः॥ कूष्मांडालाबुवार्ताक-पालक्यज्योत्स्निकास्त्यजेदि' त्युक्तम्। अथान्यदाह 'इयमेकादशी शुद्धा विद्धा चेति द्विविधा, सा च द्वादशीन्यूनसमाधिक्यभेदैस्त्रेधा। एवं भेदद्वयसंख्यायोगेऽष्टादशभेदास्ते च यथा द्वादशीहानियुक्ता शुद्धहीना१ द्वादशीसाम्ययुक्ता शुद्धहीना२ द्वादश्याधिक्ययुक्ता शुद्धहीना ३ द्वादशीहानियुक्ता शुद्धसमा ४ द्वादशीसाम्ययुक्ता शुद्धसमा ५ द्वादश्याधिक्ययुक्ता शुद्धसमा ६ द्वादशीहानियुक्ता शुद्धाधिका ७ द्वादशीसाम्ययुक्ता शुद्धाधिका ८ द्वादश्याधिक्ययुक्ता शुद्धाधिका ९ द्वादशीहानियुक्ता विद्धहीना १० द्वादशीसाम्ययुक्ता विद्धहीना ११ द्वादश्याधिक्ययुक्ता विद्धहीना १२ द्वादशीहानियुक्ता विद्धसमा १३ द्वादशीसाम्ययुक्ता विद्धसमा १४ द्वादश्यधिक्ययुक्ता विद्धसमा १५ द्वादशीहानियुक्ता विद्धाधिका १६ द्वादशीसाम्ययुक्ता विद्धाधिका १७ द्वादश्याधिक्ययुक्ता विद्धाधिका १८। अत्र समत्वं नाम परसूर्योदयकालपर्यन्तवर्तमानत्वम्। परसूर्योदयकालान्न्यूनत्वे न्यूनत्वम्। आधिक्ये त्वाधिक्यमिति। अत्र विश्वरूपः 'शुद्धा विद्धा तथा त्रेधा भिन्ना न्यूनसमाधिकैः। त्रेधैकैका पुनर्भिन्ना द्वादश्यूनसमाधिकैः॥ आद्यासु षट्सु पूर्वैव व्यवस्थानन्तरद्वये। गृहमेधियतीनां तु नवम्यां स्यात्परेऽहनि। विद्धात्र ये तु पूर्वा स्याद्व्यवस्थानन्तरद्वये। अपरेहनि शेषाः स्युः सप्तमीतु व्यवस्थया॥' अत्र व्यवस्थीयते। अष्टादशसु भेदेषु प्रथमादिषु भेदेषु सर्वेषामाश्रमिणां पूर्वेत्रोपवासः। सप्तमाष्टमभेदयोरुत्तरां यतिः पूर्वां गृही उपवसेत्। नवमभेदे सर्वे परेह्न्युपवसेयुः। दशैकादशद्वादशभेदेषु पूर्वैव सर्वेषामाश्रमिणामुपवासार्हा। त्रयोदशचतुर्दश-भेदयोः सकामैः पूर्वा निष्कामैरपरोपोष्या। षोडशभेदे पूर्वां गृही अपरां मुमुक्षुरुपवसेत्। अंत्यभेदद्वये सर्वैरपरैवोपोष्येति। सप्ताष्टनवभेदेषु स्कन्दपुराणवचनम् 'सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा। उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद् गृही॥' दशादित्रिके स्मृतिः 'एकादशी न लभ्येत सकला द्वादशी भवेत्। उपोष्या दशमीविद्धा ऋषिरुद्दालकोऽब्रवीत्॥' त्रयोदशचतुर्दशयोः स्मृतिः 'दशमीमिश्रिता पूर्वा द्वादशी यदि लुप्यते। एकादश्यां तदा ब्रह्मन्नुपवासः कथं भवेदि'ति प्रश्ने 'शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकांक्षिभिः। सकामैर्गृहिभिः पूर्वा विद्धापीति विनिश्चयः॥' इति षोडशे विष्णुरहस्ये। 'निष्कामस्तु गृही कुर्यादुत्तरैकादशीं तथा। सकामस्तु सदा कुर्यात्पूर्वां बौधायनोऽब्रवीदि'ति। किञ्चात्राष्टादशभेदेषु दशमीविद्धाप्येकादशी कार्येति प्रोक्तम्। सा तु प्रायश्चित्तविधानाद् ग्रन्थेषु बहुशो निषेधश्रवणाच्च विवेकिभिर्न कार्येति प्रतीयते। नारदः 'नोपोष्या दशमीविद्धा सदैवैकादशी तिथिः। तामुपोष्य नरो जह्यात्पुण्यं वर्षशतोद्भवम्॥ दशम्या सङ्गता यत्र तिथिरेकादशी भवेत्। तस्यापत्यं विनष्टं स्यात्तस्मात्तां परिवर्जयेत्॥ दशमीशेषसंयुक्ता गांधार्या समुपोषिता। तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेदि'त्यादीनि बहूनि निषेधकवाक्यानि सन्ति। प्रायश्चित्तमपि हेमाद्रिराह 'अज्ञानाद्यदि वा ज्ञानात्कुर्वन्नेकादशीं नरः। दशमीशेषसंयुक्तां प्रायश्चित्तमिदं चरेत्॥ कृच्छ्रपादं सवत्सां गां त्रिंशद्विप्रांश्च भोजयेत्। कुर्याद्द्यात्तिलद्रोणं सुवर्णं च तथा ददेदि'ति। अथोपवासवैगुण्यकर्म-प्रायश्चित्तमाह 'स्तेनहिंसकयोः सख्यं कृत्वा स्तेन्यं च हिंसनम्। प्रायश्चित्तं व्रते कुर्याज्जपेन्नामशतत्रयम्॥ मिथ्यावादे दिवा स्वापे बहुशोंबुनिषेवणे॥ अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शुचिः। श्राद्धोपवासदिवसे खादित्वा दन्तधावनम्॥ गायत्री-शतसंपूतमंबु प्राश्य विशुध्यती'ति निर्णयसुधाकरे। उपवासस्वरूपं तु विष्णुधर्मोत्तरे 'उपावृत्तस्तु पापेभ्यो यस्तु वासो गुणैः सह। उपवासः स विज्ञेयः सर्वभोगविवर्जितः॥' गुणास्तु 'तज्जाप्यजपनं ध्यानं तत्कथाश्रवणादिकम्। तदर्चनं च तन्नामकीर्तन-श्रवणादयः॥ उपवासकृतामेते गुणाः प्रोक्ता मनीषिभिः।' किञ्च 'उपवासः प्रणश्येत दिवास्वप्नाच्च मैथुनैः। अत्यये चाम्बुपाने च नोपवासः प्रणश्यति॥ तांबूलभक्षणाद्वापि वितथस्य च भाषणात्॥' किञ्च द्वादशीविद्धायाः प्रशस्तत्वात्सा कार्यैवेति। तदुक्तं विष्णुधर्मे 'एकादश्यष्टमी चैव द्वितीया च चतुर्दशी। अमावास्या तृतीया च ह्युपोष्यापरसंयुते'ति। कौर्मेपि 'दिनक्षये तु संप्राप्ते ह्युपोष्या द्वादशी भवेत्। दशमीशेषसंयुक्ता न कर्तव्या कदाचन॥' मार्कंडेयस्तु 'बहुवाक्यविरोधेन सन्देहो जायते यदा। द्वादशी तु तदा ग्राह्या त्रयोदश्यां तु पारणमि'त्याह। पाद्मे तु भागीरथ्या त्रिस्पृशाऽऽसुरीसंज्ञका प्रोक्ता। तल्लक्षणं 'दशम्येकादशी-भद्रामिश्रीभूता यदा भवेत्। त्रिस्पृशा सा भवेदेव सा कर्तव्या न वा प्रभो॥ माधव उवाच—आसुरी त्रिस्पृशा देवि या त्वया परिकीर्तिता। वर्जनीया प्रयत्नेन वृषहीना यथा पतिः॥' इति। 'एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। त्रिस्पृशा सा तु विज्ञेया दशमीसङ्गता न हि॥' अत एवोक्तं ब्राह्मे 'द्वादश्येकादशी यत्र तत्र सन्निहितो हरिः। पुण्यं क्रतुशतस्योक्तं त्रयोदश्यां

तु पारणे ॥' भविष्येपि 'एकादशी कला ह्येका द्वादशी सकलं दिनम्। त्रयोदशी ह्युपःकाले वैष्णवं तद्दिनत्रयम् ॥ सर्वपापहरं प्रोक्तं तदुपोष्यमिति श्रुतिः ॥' नारदीयेपि 'दशम्यैकादशीविद्धा परतो द्वादशी न चेत्। द्वादशी तु तदोपोष्या त्रयोदश्यां तु पारणमि'ति। बहून्यत्र वाक्यानि सन्ति। अथ वेधनिर्णयो हरिभक्तिचन्द्रोदयान्नृसिंहारण्यस्वामिकृताद्वैष्णवविषयः। स्कान्दे रुद्रवाक्यम्। 'एकादशी यदा पुत्र चतुर्वेधविवर्जिता। कर्तव्या सा प्रयत्नेन चतुर्वर्गफलप्रदा ॥ स्पर्शः स्याद्बाणनिगमैः (४५) सङ्गः पञ्चाशता (५०) मतः। पञ्चपञ्चाशता (५५) शल्यो वेधः षष्ट्या (६०) सतां मतः ॥ स्पर्शस्य घटिकाः पञ्च पञ्च सङ्गस्य चैव हि। शल्यस्य पञ्चवेधस्य पञ्चैवं हि चतुर्विधः ॥ सस्पर्शा कुलनाशाय ससङ्गा धर्मनाशिनी। सशल्या चैव कामघ्नी सवेधा मोक्षहानिकृत् ॥' किञ्च 'मद्दिनं साधयिष्यन्ति विंशद्दोषविवर्जितम्। कलौ ये भगवद्भक्तास्ते यान्ति पदमव्ययम् ॥ प्रीणनाय मुकुन्दस्य वैष्णवानां हिताय च। तत्त्वं विलोक्य विद्वद्भिर्विंशद्दोषाः प्रकीर्तिताः ॥ व्यालमुखी (१) महाव्याला (२) भया (३) चैव महाभया (४)। वज्रा (५) विवज्रा (६) रौद्रा (७) च महारौद्रा (८) सुरी (९) तथा ॥ वन्ध्या (१०) चैव महावन्ध्या (११) छाया (१२) मत्ता (१३) तथैव च। वेध्या (१४) तिवेध्या (१५) विज्ञेया महावेध्या (१६) तथैव च ॥ प्रलया (१७) च महापूर्वा (१८) महाघोरा (१९) ततः परा। सम्पूर्णा (६०) राक्षसी (२०) ज्ञेया विंशद्दोषाः प्रकीर्तिताः ॥ एतैर्दोषैस्संयुता चेद्दशमी दृश्यते कलौ। तदा सा नैव कर्तव्या महाभागवतैर्नरैः ॥ चत्वारिंशन्नाडिकातोऽधिका चेद्दशमी तिथिः। तदैते विबुधैर्दोषा ज्ञातव्या नाडिकाक्रमात् ॥' फलान्यासां हरिभक्तिचन्द्रोदये द्रष्टव्यानि। निंबार्कानुयायिनस्तु कपालवेधं स्वीकुर्वन्ति। स च 'अर्द्धरात्रमतिक्रम्य दशमी दृश्यते यदि। कपालवेधं तं प्राहुराचार्या ये हरिप्रियाः ॥'

इति। अन्यैर्वैष्णवैर्माध्वैश्च अरुणोदयवेध एवेष्यते। तदुक्तं भविष्ये 'अरुणोदयकाले तु दशमी दृश्यते यदि। सा विद्धैकादशी तत्र पापमूलमुपोषणम् ॥' सौरधर्मेपि 'आदित्योदयवेलायां प्राङ् मुहूर्तद्वयान्वितः। सैकादशी तु सम्पूर्णा विद्धान्या परिकीर्तिता ॥' तदुक्तम् 'दशमीशेषसंयुक्तो यदि स्यादरुणोदयः। नैवोपोष्यो वैष्णवैस्तु तत्र चैकादशीव्रते ॥' इति। अरुणोदयस्तु स्कान्दे 'उदयात्प्राक् चतस्रस्तु नाडिका अरुणोदयः।' इति। वैष्णवोपि तत्रैवोक्तः 'परमापदमापन्नो हर्षे वा समुपस्थिते। नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी ॥ समात्मा सर्वजीवेषु निजाचारादविप्लुतः। विष्णवर्पिताखिलाचारः स हि वैष्णव उच्यते ॥' इति किञ्च विष्णुधर्मे तु 'दशमी द्विविधा प्रोक्ता सकामाकामभेदतः। सकामा चासुरी ज्ञेया विंशदोषैस्तु संयुता ॥ निष्कामा मोक्षदा ज्ञेया दैविकी दोषवर्जिते'ति। पाद्मादावष्टौ द्वादश्यः 'जया च विजया चैव जयन्ती पापनाशिनी। उन्मीलिनी वंजुली च त्रिस्पृशा पक्षवर्द्धिनी। न करिष्यन्ति ये लोके द्वादश्योष्टौ ममाज्ञया। तेषां यमपुरे वासो यावदाभूतसंप्लवम् ॥ जया स्यात्पुनर्वसुना विजयाश्रवणेन च। जयन्ती रोहिणीयुक्ता पुष्येण पापनाशिनी ॥ सम्पूर्णैकादशी भूत्वा द्वादश्यां वर्द्धते यदि। उन्मालिनी तु सा प्रोक्ता हत्याकोटिविनाशिनी ॥ सम्पूर्णा द्वादशी भूत्वा वर्द्धते चेत्परेऽहनि। त्रयोदश्यां नृपश्रेष्ठ वंजुली दुर्लभा कलौ ॥ आदौ नन्दा जया चान्ते मध्ये भद्रा प्रतिष्ठिता। त्रिस्पृशा सा तु विज्ञेया महापातकनाशिनी ॥ अमावास्या पूर्णिमा वा सम्पूर्णा जायते यदि। भूत्वा तु षष्टिघटिका दृश्यते प्रतिपद्दिने ॥ पक्षवृद्धिस्तदा ज्ञेया प्रोक्ता सा पक्षवर्द्धिनी। कर्तव्या सा प्रयत्नेन महापातकहानिदे'ति। अथ दशम्यादिनियमाः। 'कांस्यं मांसं मसूरांश्च चणकान्कोद्रवांस्तथा। शाकं मधुपरान्नं च पुनर्भोजनमैथुनम् ॥ वैष्णवो व्रतकर्ता च दशम्यां दश वर्जयेत्। असकृज्जलपानं च हिंसां वितथभाषणम् ॥ दन्तधावनताम्बूलं दिवा स्वापं च मैथुनम्। द्यूतक्रीडां निशानिद्रां भोजनं गमनं तथा ॥ अपूर्तिकरणं सर्वमेकादश्यां परित्यजेत्। दिवानिद्रां परान्नं च पुनर्भोजनमैथुने ॥ क्षौद्रकांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेदि'ति देवलः। 'यदा भवति चाल्पापि द्वादशी पारणा दिने। उषःकाले द्वयं कुर्यात्प्रातर्माध्याह्निकं तदे'ति। मात्स्ये 'नाडिकाः पट्पञ्चाशत्प्रातरेकाधिकोरुणः। उषःकालोष्टपञ्चाशच्छेषः सूर्योदयः स्मृतः ॥' इति। आमिषन्तु पाद्मे 'प्राण्यंगचूर्णं चर्माम्बु जंबीरं बीजपूरकम्। अयज्ञशिष्टमाषादि यद्विष्णोरनिवेदितम् ॥ दग्धमन्नं मसूरञ्च मांसं चेत्यष्टधामिषमि'ति। किञ्च 'गोछागीमहिषीदुग्धादन्यद् दुग्धन्तु चामिषम्। धान्ये मसूरिका प्रोक्तमन्नं पर्युषितं तथा ॥ द्विजक्रीतरसाः सर्वे लवणं भूमिजं तथा। ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितम् ॥ आत्मार्थपाचितं चान्नमामिषं तत्स्मृतं बुधैः। आमिषं शूद्रशेषान्नं प्रेतान्नं कन्यकाधनमि'ति च। 'संकटे समनुप्राप्ते द्वादश्यां पारयेत्कथम्। अद्भिस्तु पारणं कृत्वा पुनर्भुक्तं न दोषकृदि'ति देवलः। 'मातापित्रोः क्षये प्राप्ते भवेदेकादशी यदि। अभ्यर्च्य पितृदेवांश्च ह्याजिघ्रेत्पितृदैवतमि'ति कात्यायनः। पाद्मे तु 'एकादश्यां यदा राम श्राद्धं नैमित्तिकं भवेत्। तद्दिनं तु परित्यज्य द्वादश्यां श्राद्धमाचरेत् ॥' श्राद्धमयूखे तु 'पितॄणां प्रीतये श्राद्धं कुर्याच्छ्रद्धासमन्वितः। अन्नाश्रितानि पापानि क्षयाहेतरवासरे ॥' महालये तु 'शालिग्रामशिलाग्रे तु श्राद्धं कुर्यात्प्रयत्नतः। पित्र्यमन्नं समाघ्राय गवे दद्याद्विचक्षणः ॥' इति मत्स्यवचनं। अथात्रतद्धनान्याह ॥ 'अष्टैतान्यव्रतघ्नानि ह्यापो मूलं फलं पयः। हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधमि'ति भारते। अथ हरिवासरार्थः 'दशम्यामसुरा जाता एकादश्यां सुरास्तथा। यत्तु जन्मदिनं यस्य तत्तस्यैवानुवर्द्धनम् ॥ दशम्यामत्रैरात्रं स्यादसुरोत्पत्तिकारणम्। अतो जन्मदिनं तेषां विख्यातास्ते निशाचराः ॥ दिवोद्भूतामराः सर्वे सौम्याः सत्त्वगुणान्विताः। द्वादश्येकादशीयोगे विख्यातो हरिवासरः ॥ एकादश्यां तु पादेन द्वादश्यां सर्वथैव हि। हरिवासरशब्दस्तु वर्तते नात्र संशयः ॥

पदत्रयं त्वेकमर्थं वक्ष्येयेव शृणु सत्तम ॥ द्वादश्येकादशी चाथ तृतीयं हरिवासरः ।' इति विष्णुधर्मे । 'द्वादशी हरिवासरमि'ति ज्योतिःशास्त्रे निरूपितमिति । अत्र वक्तव्यस्यान्तो नास्तीत्युपरम्यते । इत्येकादशीपक्षः ॥ ९६ ॥

अथ तर्कशास्त्रपक्षः ॥ वयं तत्तर्कशास्त्रं सदा हृदा धीमहि । तत्किं यच्छास्त्रमभिज्ञोतिनिपुणो गौतमस्तेने । किं कर्तुमादिकविं वेदमवितुम् । चतुर्थ्यत्र तुमोप्रयुक्तस्येति बोध्या । 'प्रणिनाय श्रुते रक्षां कर्तुमावृतिरूपकम् । गौतमस्तर्कबहुलं शास्त्रं वादिभयावहमि'त्यभियुक्तोक्तेः । वेदस्यादिकवित्वं तु आदौ सृष्ट्यादौ कूयते उच्चार्यते सृज्यते वेत्यादिकविर्वेदः । 'आदौ वेदमयी दिव्या वागुत्सृष्टा स्वयंभुवे'ति स्मृतेः । यद्वादि ब्रह्म कौति प्रतिपादयतीत्यादिकविः । 'वेदैश्च सर्वैरहमेव वेद्य' इति स्मृतेः । 'सर्वे वेदा यत्पदमामनंती' ति श्रुतेश्च । यद्वा आदये लोकापेक्षया प्रथमाय ब्रह्मणे कूयते उच्चार्यत इत्यादिकविः । 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रुतेः । यतो यस्याभिज्ञस्य गौतमस्याद्यस्य ब्रह्मणोऽन्वयाद्वंशाज्जन्म । यश्च गौतमः पदार्थचिंतने निमीलितनेत्रः सन् गतौ स्वेनैवाक्षपादत्वाद्राजते न त्वन्यप्रबोधित इति स्वराट् । इतरत इतरेभ्यो जनेभ्यः सकाशादित्यर्थः । इतरे ह्यपक्षा जना निमीलनगतौ परबोधिता एव राजन्त इति भावः । च पुनर्यतः शास्त्रात्पुमानर्थेषु द्रव्यादिपदार्थेषु अयो ज्ञाता भवति । अयते जानातीत्ययः । अय गतौ । पदार्थोपि भावाभावभेदेन द्विधा । द्रव्यगुणकर्मसामान्यविशेषसमवायभेदाद्भावोपि षड्विधः । अभावस्तु संसर्गाभावान्योन्याभावभेदाद् द्विधा । तत्र पदार्थत्वं पदस्यार्थः पदार्थ इति व्युत्पत्त्याऽभिधेयत्वं पदार्थसामान्यलक्षणम् । अत्र 'ऋ गता' वित्यस्य धातोरभिधारूपोर्थस्ततो य उणादिस्थन्प्रत्ययस्तस्य विषयत्वरूपोर्थः, अभिधा शब्दशक्तिस्ततोऽभिधाविषयत्वमभिधेयत्वमिति । यद्वा ऋ गताविति धातोर्निष्पन्नस्यार्थशब्दस्य गत्यर्थकानां बुद्ध्यर्थकत्वाज्ज्ञानविषयत्वमर्थः । संबंधसामान्यवाचकषष्ठ्या जन्यत्वमर्थः । अतः पदजन्यप्रतीतिविषयत्वं पदार्थलक्षणमिति । अत्रापि पदजन्येति विशेषणस्य प्रयोजनाभावाज्ज्ञानविषयं लक्षणमित्येव युक्तम् । जीवाननुभूतेऽव्याप्तिवारणं त्वीश्वरप्रतीतिविषयत्वात्सर्वस्येति स्वत एव भविष्यति । अथ समवायैकार्थसमवायान्यतरसंबंधेन सत्तावत्त्वं भावत्वम् । तत्र द्रव्यादित्रयाणां समवायेन सत्तावत्त्वमन्येषामेकार्थसमवायेन सत्तावत्त्वम् । यथा घटे समवायेन घटत्वं सामान्यसत्ता चेति द्वयोरेकस्मिन्नर्थे समवायात्सामान्यस्य सत्तावत्त्वं तथैव नित्यद्रव्ये परमाण्वादौ समवायेन विशेषः सत्ता चास्तीति द्वयोरेकस्मिन्नर्थे समवायादत्रापि सत्तावत्त्वम् । यथा च घटे घटघटत्वयोः समवायस्स चाप्यस्तीत्यनयोरप्येकस्मिन्नर्थे समवायेन सत्तावत्त्वं चास्तीति समन्वयो लक्षणस्यात्रेति । भावभिन्नत्वमभावत्वं प्रतियोगिज्ञानाधीनज्ञानविषयत्वं वेति । तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसीति नवैव । द्रव्यत्वं च समवायिकारणत्वं समवायिकारणत्वं च यत्समवेतं कार्यमुत्पद्यते तत्त्वमिति यथा तंतवः पटस्य । कार्यं च कारणपश्चाद्भावि । कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात् । आद्यं तूक्तम् । द्वितीयमाह समवायिकारणे प्रत्यासन्नं कारणमसमवायि कारणम् । यथा तंतुसंयोगः पटस्य । तस्य पटस्य समवायिकारणेषु तंतुषु प्रत्यासन्नत्वात्कारणत्वाच्च । एवमुभयातिरिक्तं कारणं निमित्तकारणम् । यथा तुरीवेमादिकं पटस्य । कारणलक्षणं तु अनन्यथासिद्धकार्यनियतपूर्ववर्तित्वम् । अन्यथासिद्धिस्तु त्रिधा । येन सहैव यस्य यं प्रति पूर्वभावोऽवगम्यते तेन तस्य तं प्रति अन्यथासिद्धिराद्या । यथा घटं प्रति दंडरूपस्य दंडत्वस्य च दंडेन सहैव यस्य दंडरूपस्य दंडत्वस्य वा घटं प्रति पूर्वभावग्रहात् अन्यं प्रतिपूर्ववृत्तित्वे ज्ञात एव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तस्यान्यथासिद्धिर्द्वितीया । यथा घटं प्रत्याकाशस्य । कुलालं प्रति पूर्ववृत्तित्वे ज्ञात एव घटं प्रति पूर्ववृत्तित्वग्रहात् घटं प्रति कुलालपितान्यथासिद्धः । अन्यत्र क्लृप्तनियतपूर्ववृत्तिन एव कार्यसंभवे तत्सहभूतत्वमन्यथासिद्धिस्तृतीया । यथा घटविशेषं प्रति रासभस्य दैवादागतस्य घटविशेषादन्यत्र घटांतरे क्लृप्तनियतपूर्ववृत्तिदंडचक्रादेरेव घटविशेषस्यापि संभवे दंडचक्रादिसहभूतो रासभोऽन्यथासिद्धः । नियतपूर्ववृत्तित्वं चाव्यवहितपूर्वकालावच्छेदेन कार्यदेशसत्त्वमेव । अथ च गुणानाह—गुणास्तु रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्मशब्दाश्चतुर्विंशतिरेव । गुणलक्षणं तु द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुण इति । द्रव्यकर्मणोरतिव्याप्तिनिरासाय विशेषणम्, सामान्यादौ तद्वारणाय विशेष्यम् । कर्माणि तु उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पंचैव । कर्मत्वं तु संयोगभिन्नत्वे संयोगासमवायिकारणत्वम् । घटादावतिप्रसक्तिवारणाय परदलम् । संयोगजसंयोगेतिप्रसंगवारणाय सत्यन्तम् । सामान्यमाह परमपरञ्चेति सामान्यं द्विधा । परत्वं चाधिकदेशवृत्तित्वम् । तथाहि द्रव्यादित्रिकं सदिति निगद्यते । सतो भावः सत्तेति व्युत्पत्तेस्तत्र सत्ता नाम काचन जातिरस्ति । सा च द्रव्यत्वाधिकरणे द्रव्ये वर्तमाना सत्यधिकदेशे गुणादावप्यस्तीत्यतः परं सामान्यमित्युच्यते । अपरत्वं च न्यूनदेशवृत्तित्वं वर्तते च द्रव्यत्वे । गुणादिसाधारणसत्ताधिकरणगुणादेर्न्यूनदेशो द्रव्यं तद्वृत्तित्वम् । अथैवं सति द्रव्यत्वस्य पृथिवीत्वापेक्षया परत्वात्परं सत्तेति वक्तुं न शक्यते इति चेन्न, सकलजात्यपेक्षया परत्वाभिप्रायेण सत्तायाः परत्वमिति ध्येयं सुधिया । लक्षणं त्वस्य नित्यत्वे नेकसमवेतत्वं सामान्यमिति । नित्यत्वं सामान्यमित्युक्ते गगनादावतिव्याप्तिरतो विशेष्यदलम् । तावन्मात्रोक्तौ संयोगादावतिव्याप्तिरतो विशेषणम् । अनेकवृत्तित्वमित्युक्तेऽत्यंताभावेऽतिव्याप्तिरतः समवेतत्वमित्युक्तम् । समवेतत्वं च समवायेन वृत्तित्वं तच्चात्यंताभावे नास्ति । अवयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योर्विशेषनित्यद्रव्ययोरेव समवायात् । बाधकाभावे जातिग्रहो नान्यथा । तदर्थं बाधकसंग्रहो निरूप्यते 'व्यक्त-

रभेदस्तुल्यत्वं संकरोथानवस्थितिः । रूपहानिरसंबंधो जातिबाधकसंग्रहः ॥' इति । व्यक्तेरभेद एकव्यक्तिकत्वं तच्चाकाशत्वादेर्जातित्वे बाधकम् । तुल्यत्वं तुल्यव्यक्तिवृत्तित्वम् । घटत्वकलशत्वादीनां जातीनां भेदे बाधकम् । ननु तुल्यत्वं तुल्यव्यक्तिवृत्तित्वमित्युक्ते द्रव्यत्वादेरपि घटत्वाश्रययावदाश्रयवृत्तित्वात्तुल्यं व्यक्तिवृत्तित्वम् । तस्यापि जातित्वं न स्यादतस्तुल्यव्यक्तिवृत्तित्वं स्वभिन्नजातिसमनियतत्वं वाच्यम् । स्वं कलशत्वं तद्भिन्ना जातिर्घटत्वं तत्समनियतत्वं कलशत्वे त्वस्ति द्रव्यत्वादेस्तन्न सम्भवति । स्वं घटत्वं तद्भिन्ना जातिर्द्रव्यत्वं तत्समनियतत्वं घटे नास्ति । संकरश्च परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशो भूतत्वादेर्जातित्वे बाधकः । भूतत्वं विहाय मनसि वर्त्तमानस्य मूर्त्तत्वस्य मूर्त्तत्वं विहाय गगने वर्तमानस्य भूतत्वस्य च पृथिव्यादिचतुष्टये द्वयोः सत्त्वात् । अनवस्था तु जातेर्जातिमत्त्वे बाधिका । रूपहानिः विशेषस्य जातिमत्त्वे रूपस्य स्वतो व्यावर्तकत्वस्य हानिः । तत्र जातिस्वीकारे तयैव व्यावर्तकत्वं वाच्यम् । सामान्याश्रयस्य सामान्यरूपेण भेदसाधकत्वमिति नियमात् । असंबंधः समवायाभावयोर्जातिमत्त्वे प्रतियोगितानुयोगितान्यतरसंबंधेन समवायाभावः । तथाहि यस्य समवायः स प्रतियोगी, यस्मिन्समवायः सोनुयोगी । यथा नित्यद्रव्ये केवलमनुयोगेन समवायः, तत्र विशेषसामान्ययोः समवायात् । स च[1] कुत्रापि नास्ति । जन्यद्रव्यगुणकर्मसु प्रतियोगितानुयोगितान्यतरसंबंधेन समवायः । तानि द्रव्ये वर्त्तंते तेषु च समवायोप्यस्तीति भावः । सामान्यविशेषयोः प्रतियोगितासंबंधेन समवायस्तयोर्द्रव्यादिषु सत्त्वात् । समवायाभावयोर्न केनापि संबंधेन समवायः । एतयोर्न कोपि समवायेन तिष्ठति । एतावपि कुत्रचित्समवाये न तिष्ठत इति भावः । विशेषमाह स्वतो व्यावर्त्तकत्वं विशेषत्वम् । विशेषो द्रव्याद्भिन्नो विशेषादित्यत्र स्वयमेव व्यावर्त्तको भवति । समानजातीयरूपरसादिमत्परमाणूनां परस्परभेदकं विना भेदनिर्णयासम्भवाद्भेदकत्वेन विशेषा अनुमीयंते, अनित्यद्रव्येष्वाश्र[2]येणैव भेदसम्भवात्तत्र तेषु प्रमाणाभावान्नित्यद्रव्यमात्रवृत्तित्वं तेषां व्यावर्त्तकांतराभावे सत्यंते व्यावर्तकत्वेन स्वीक्रियमाणत्वादंत्यत्वम् । यथा प्रजारक्षकत्वेन महाराज आवश्यकः । स च स्वत एव स्वरक्षणसमर्थः । एवं विशेषाः स्वत एव व्यावृत्ता इति नानवस्थात एव नित्यद्रव्यवृत्तयोनन्ता विशेषा इति सिद्धम् । समवायमाह–नित्यः संबंधः समवायः । संयोगवारणाय नित्य इति । गगनादिवारणाय संबंध इति । अभावं विभजते संसर्गारोपजन्यप्रतीतिविषयाभावः संसर्गाभावः । भूतले घटो नेत्यारोप्यैव निषेधप्रतीतेः । स त्रिधा प्रागभावो ध्वंसोऽत्यंताभावश्च । भविष्यतीति प्रतीतिविषयो विनाश्यभावः प्रागभावः । स चेह कपाले घटो भविष्यतीति प्रत्ययसिद्धः । उत्पत्तिमानभावो ध्वंसः, घटध्वंस इह कपाले जात इति प्रतीतेः । उत्पत्तिविनाशशून्यः संसर्गाभावोऽत्यंताभावः । भूतले घटो नास्तीति प्रतीतेः भूतले घटापसरणोत्तरं घटानयनात्पूर्वञ्च प्रतीतस्य घटकाले सत्त्वेपि न प्रतीतिर्घटज्ञानेन प्रतिबंधादिति । पदार्थविशेषाणां सोदाहरणानि लक्षणानि तु ग्रंथांतरादवसेयानीह विस्तरभिया नोक्तानि । किंच गुणेषु बुद्धेर्बहुप्रपञ्चत्वात्तां संक्षिप्य सर्वानुपेक्ष्य तन्निरूपणस्य सर्वत्रोपयोगित्वान्निरूपयति । सर्वव्यवहारहेतुर्ज्ञानं बुद्धिः । सर्वे ये व्यवहारा आहारविहारादयस्तेषां हेतुर्बुद्धिरित्यर्थः । व्यवहारत्वावच्छिन्नकार्यतानिरूपितकारणत्वं बुद्धेर्लक्षणमिति सिद्धं ज्ञानमिति सांख्यमते । बुद्धेरंतःकरणत्वं तन्निरस्यति । सा द्विधा स्मृतिरनुभवश्च । संस्कारजन्यं ज्ञानं स्मृतिरित्युक्तेऽनुभवेऽतिव्याप्तिस्तद्वारणाय संस्कारजन्यमिति । संस्कारध्वंसे तद्वारणाय ज्ञानमिति, ध्वंसं प्रति प्रतियोगिनः कारणत्वात् । तद्भिन्नं ज्ञानमनुभव इति स्मृतिभिन्नत्वे सति ज्ञानत्वमनुभवत्वमिति लक्षणं संसिद्धम् । स्मृतावतिव्याप्तिवारणाय तद्भिन्नत्वे सतीति । घटादौ तद्वारणाय ज्ञानत्वमिति । स द्विधा यथार्थानुभवोऽयथार्थानुभवश्चेति । प्रथममयथार्थानुभवमाह । प्रमाणाभासजन्योऽयथार्थानुभवः । स द्विधा भ्रमसंशयभेदात् । विपरीतनिर्णयो भ्रमः । यथा पीतः शंखः लोहितः स्फटिकः । एकस्मिन्धर्मिणि विरुद्धनानाकोटिकज्ञानं संशयः । यथा दूरवर्त्तिनि उच्चैस्तरेऽयं स्थाणुर्वा पुरुषो वेति । यथार्थानुभवः प्रमा । फलवत्प्रवृत्तिजननयोग्यत्वं च यथार्थत्वम् । स्मृत्यनुभवसाधारणं प्रमाकरणं प्रमाणम् । व्यापारवत्कारणं करणम् । यथा छिदिक्रियां प्रति कुठारः । तज्जन्यत्वे सति तज्जन्यजनको व्यापारः । यथा कुठारदारुसंयोगः । तत्प्रमाणं चतुर्द्धा, तदुक्तं सूत्रकृता 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानी'ति । तत्र प्रत्यक्षप्रमाकरणं प्रत्यक्षम् । तच्चेंद्रियात्मकम् । इन्द्रियार्थसन्निकर्षजं ज्ञानं प्रत्यक्षम् । इंद्रियार्थसन्निकर्षध्वंसेऽतिव्याप्तिवारणाय ज्ञानमिति । अनुमित्यादौ तद्वारणाय इंद्रियार्थेत्यादि । तत्सविकल्पकनिर्विकल्पभेदाद्द्विधा । विशेषणविशेष्यसंबंधावगाहि प्रत्यक्षं सविकल्पकम् । तच्च घटघटत्वे इत्याकारकमतींद्रियम् । न चात्र मानाभावः । तदसत्त्वे सुप्तोत्थितस्यायं घट इति शिष्टज्ञानं न स्यात् । विशेषणीभूतघटत्वाज्ञानात् । विशेषणज्ञानं विना विशिष्टज्ञानानुदयेन तस्य तद्धेतुत्वात् । पुनस्तल्लौकिकालौकिकभेदाद् द्विधा । लौकिकप्रत्यक्षहेतुः सन्निकर्षः षोढा–संयोगसंयुक्तसमवायसंयुक्तसमवेतसमवायसमवायसमवेतविशेषणविशेष्यताभेदात् । तत्र संयोगेन द्रव्यग्रहः यथा घटोयमिति । संयुक्तसमवायेन गुणकर्मद्रव्यगतजातिग्रहः । इह घटे रूपं चलनं द्रव्यत्वादिकमस्ति, चक्षुरादिसंयुक्ते घटे रूपादीनां समवायात् । संयुक्तसमवेतसमवायेन गुणकर्मजातिग्रहः । घटगतरूपे रूपत्वादिकमस्ति घटगतचलने कर्मत्वादिकमस्ति चक्षुरादिसंयुक्ते घटे समवेतं रूपादि चलनं च । तत्र रूपत्वादेः कर्मत्वादेश्च समवायात् । समवायेन शब्दग्रहः इह वीणाशब्दोस्तीति । कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रं, तत्र शब्दस्य समवायात् । समवेतसमवायेन

१. समवायाभावयोः प्रतियोगितानुयोगितान्यतरसम्बन्धेन समवायः । २. आश्रयति द्रव्यादिकमित्याश्रयो जातिः ।

शब्दत्वादिग्रहः। इह शब्दे शब्दत्वं गुणत्वादिकं चास्तीति श्रोत्रसमवेते शब्दे शब्दत्वादेः समवायात्। विशेषणतया समवायाभाव-योर्ग्रहः। तथाहि विशेषणता द्विविधा इंद्रियविशेषणता इंद्रियसंबद्धविशेषणता च। तत्रेन्द्रियविशेषणतया शब्दसमवायस्य शब्दाभावस्य च ग्रहः। इह शब्दसमवायोस्ति इह शब्दो नास्तीति श्रोत्रेंद्रिये शब्दसमवायस्य शब्दाभावस्य च विशेषणत्वात्। इंद्रियसंबद्धविशेषणतया घटादिसमवायस्य घटस्य च ग्रहः। इह कपाले घटसमवायोस्ति, इह भूतले घटो नास्तीति चक्षुरादिसंयुक्ते कपाले घटसमवायस्य भूतले घटाभावस्य च विशेषणत्वात्। अलौकिकप्रत्यक्षहेतुः संनिकर्षस्त्रिधा। सामान्यलक्षणो ज्ञानलक्षणो योगजधर्मलक्षणश्चेति। तत्राद्यः इंद्रियसंबद्धविशेष्यकज्ञानप्रकारीभूतघटत्वादि। इंद्रियसंबद्धविशेष्यकेऽयं घट इति प्रत्यक्षे प्रकारः, तदनंतरं तेन संनिकर्षेण सर्वे घटा इत्यलौकिकप्रत्यक्षं जायते। ज्ञानलक्षणसन्निकर्षेण तु तद्विषयीभूततत्तत्पदार्थानां प्रत्यक्षं जन्यते। कथमन्यथा कवेः काव्यमूलभूततत्तत्पदार्थानां संसर्गज्ञानम्। योगजधर्मसन्निकर्षेण योगिनां वस्तुमात्रप्रत्यक्षं जन्यते। तच्च घ्राणरसनत्वक्चक्षुःश्रोत्रमनोभेदात् षोढा। गन्धप्रत्यक्षासाधारणं घ्राणम्। रसप्रत्यक्षासाधारणं कारणं रसनम्। रूपप्रत्यक्षासाधारणं कारणं चक्षुः। स्पर्शप्रत्यक्षासाधारणं कारणं त्वक्। शब्दप्रत्यक्षासाधारणं श्रोत्रम्। सुखादिप्रत्यक्षासाधारणं कारणं मनः। घ्राणादिलक्षणेऽसाधारणपदमात्मादिवारणाय। प्रत्यक्षकरणीभूतघ्राणादेर्व्यापारो घ्राणादिमनःसंयोगः मनसस्त्वात्मसंयोगः। आत्मा मनसा युज्यते मन इंद्रियेणेंद्रियमर्थेन ततः प्रत्यक्षमिति नियमात्। किंच येनेंद्रियेण यद् गृह्यते तेनैव तज्जातिस्तत्समवायस्त-दभावश्च गृह्यते इति नियमात्। इंद्रियत्वं च शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिति। शब्दादितरे ये विशेषगुणा घटनिष्ठरूपादयस्तदनाश्रयत्वं ज्ञानकारणीभूतो यो मनःसंयोगस्तदाश्रयत्वं च चक्षुरादावस्तीति लक्षणसंगतिः। आत्मवारणाय सत्यंतम्। कालवारणाय विशेष्यम्। श्रोत्रेऽव्याप्तिवारणाय शब्देतरेति। चक्षुरादौ तद्वारणायोद्भूतेति। इंद्रियार्थ-संयोगाश्रयत्वस्य चक्षुरादौ सत्त्वाद्विशेषगुणेति। स्वध्वंसकारणीभूतः कालमनःसंयोगस्तदाश्रयत्वं काल इति। ज्ञानपदं इंद्रियावयवार्थावयवयोः सन्निकर्षोपि ज्ञानकारणम्। तदाश्रयत्वमिंद्रियावयवे गतम्। यद्वा काले रूपं नास्तीति प्रत्यक्षं प्रति चक्षुःसंयुक्तविशेषणतायाः कारणत्वेन तद्घटकीभूतसंयोगाश्रयत्वं काले गतं ततो मनःपदम्। न चात्मवारणायात्मान्यत्वे सतीति वाच्यम्। त्वङ्मनोयोगस्य ज्ञानकारणतापक्षे त्वचि दोषादिति। प्रत्यक्षमुक्त्वा क्रमप्राप्तमनुमानमाह। अनुमिति-करणमनुमानम्। तच्च धूमो वह्निव्याप्य इति व्याप्तिज्ञानम्। वह्निव्याप्यधूमवानयमिति तृतीयलिंगपरामर्शो व्यापारः। तृतीयत्वमस्य कथमिति चेदाह। महानसादौ दृष्टांते वह्निधूमयोर्भूयः सहचारदर्शनाद्व्याप्यत्वेन धूमस्य ज्ञानं प्रथमं ततः पर्वतादौ धूमं दृष्ट्वा व्याप्यत्वेन तत्स्मरणं द्वितीयम्। ततस्तत्रैव व्याप्यत्वेन धूमस्य परामर्शो वह्निव्याप्यधूमवानयमित्येवंरूपो जायते इति तृतीयत्वं तस्येति बोध्यम्। लिंगज्ञानजन्यलिंगिज्ञानमनुमितिः। यथा पर्वतादौ धूमज्ञानानंतरं पर्वतो वह्निमानिति ज्ञानम्। व्याप्तिः पक्षधर्मतावल्लिंगम्। ननु का व्याप्तिः? अव्यभिचारितसाध्यसामानाधिकरण्यं व्याप्तिः। अस्ति चेदं पर्वतो वह्निमान्धूमादित्यादौ सद्धेतौ। यत्र यत्र धूमस्तत्र तत्र वह्निरिति नियमस्य महानसादौ सत्त्वात्। नास्ति चेदं धूमवान्वह्नेरित्याद्यसद्धेतौ। यत्र यत्र वह्निस्तत्र तत्र धूम इति नियमस्यासत्त्वात्। तप्तायःपिंडे वह्निसत्त्वेपि धूमासत्त्वात्। व्यभिचारज्ञानविरहसहकृतहेतुसाध्यसहचार-दर्शनं व्याप्तिग्राहकं कथमिति चेदित्थं हेतोः साध्याभाववद्वृत्तित्वं व्यभिचारस्तज्ज्ञाने सति व्याप्तिग्रहाभावात्। तदभावस्तत्र कारणं, हेतुसाध्यसहचारदर्शनं त्वन्वयव्यतिरेकाभ्यां तत्र कारणम्। यत्सत्त्वे यत्सत्त्वं सोन्वयः, यदभावे यदभावः स व्यतिरेकः। यथा हेतुसाध्यसहचारदर्शने सत्त्वे व्याप्तिग्रहसत्त्वमित्यन्वयः। हेतुसाध्यसहचारदर्शनाभावे व्याप्तिग्रहाभाव इति व्यतिरेकः। पक्षताश्रय-वृत्तित्वं पक्षधर्मता। पक्षता चानुमित्साविरहविशिष्टसाध्यनिश्चयाभावः। अस्ति चेदं पर्वतादौ पक्षे। अनुमित्साविरहविशिष्ट-साध्यनिश्चयस्य तत्राभावात्। पर्वतादौ साध्यनिश्चये सत्यपि सत्यां चानुमित्सायां पर्वतो वह्निमान्धूमादित्यनुमानसंभवात्। तत्र पक्षतासंपत्तयेऽनुमित्साविरहविशिष्टत्वं साध्यनिश्चयस्य विशेषणम्। तथा चानुमित्साविरहविशिष्टसाध्यनिश्चयस्य तत्राभावात्पक्षता। तच्चानुमानं केवलान्वयि केवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्त्रिधा। यत्रान्वयव्याप्तिरेवास्ति तत्केवलान्वयि। हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्तिः। यथा घटोऽभिधेयः प्रमेयत्वादिति। यत्र च प्रमेयत्वं तत्राभिधेयत्वम्। यथा पट इत्यन्वयव्याप्तिरेवास्ति। अभिधेयत्वस्य प्रमेयत्वस्य च सर्वत्र सत्त्वात्। साध्याभावादेरेवाप्रसिद्धत्वात्। यत्र व्यतिरेक-व्याप्तिरेवास्ति तत्केवलव्यतिरेकि। हेत्वभावसाध्याभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः। यथा जीवच्छरीरं सात्मकं प्राणादिमत्त्वात्। यत्र सात्मकत्वाभावस्तत्र प्राणादिमत्त्वाभावो यथा घटादाविति व्यतिरेकव्याप्तिरेवास्ति। न तु यत्र प्राणादिमत्त्वं तत्र सात्मकत्वमित्यन्वयव्याप्तिर्दृष्टांताभावात्। जीवच्छरीरमात्रस्य पक्षीकरणादन्यत्र च हेतुसाध्ययोरेवासत्त्वात्। यत्रान्वयव्याप्ति-र्व्यतिरेकव्याप्तिश्च स्यात्तदन्वयव्यतिरेकि। यथा पर्वतो वह्निमान् धूमादिति। यत्र धूमस्तत्र वह्निर्यथा महानसादावित्यन्वयव्याप्तिर्यत्र वह्न्यभावस्तत्र धूमाभावो यथा जलह्रदादाविति व्यतिरेकव्याप्तिश्चास्ति। 'अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते। साध्याभा-वोऽन्यथा व्याप्यो व्यापकः साधनात्ययः। व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम्॥ एवं परीक्षिता व्याप्तिः स्फुटीभवति तत्त्वतः॥' त्रयाणां मध्ये योन्वयव्यतिरेकी स पञ्चरूपोपपन्न एव साध्यं साधयति। तानि च पंचरूपाणि पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षाद्व्यावृत्तत्वमबाधितविषयत्वमसत्प्रतिपक्षत्वञ्चेति। पक्षताश्रयवृत्तित्वं पक्षधर्मत्वम्। निश्चितसाध्यवान् सपक्षः। तत्र विद्यमानत्वं

सपक्षे सत्त्वं, निश्चितसाध्याभाववान् विपक्षस्तत्राविद्यमानत्वं विपक्षाद्व्यावृत्तत्वम्। प्रमाणांतरेणाप्रमितसाध्याभावत्वमबाधितविषयत्वम्। साध्याभावसाधकहेत्वंतरशून्यत्वमसत्प्रतिपक्षत्वमेतानि पञ्चरूपाणि वह्निसाधकधूमेऽन्वयव्यतिरेकिणि विद्यन्ते। केवलान्वयिनि विपक्षाद्व्यावृत्तिर्नास्ति। विपक्षासिद्धेः। केवलव्यतिरेकिणि सपक्षसत्त्वं नास्ति। सपक्षासिद्धेः। त्रिविधमप्यनुमानं स्वार्थं परार्थं चेति द्विविधम्। स्वस्यैवानुमितिहेतुः स्वार्थम्। यत्स्वयं धूमादग्निमनुमाय परं बोधयितुं पञ्चावयवोपेतमनुमानवाक्यं प्रयुंक्ते तत्परार्थम्। पञ्चावयवास्तु प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि। तत्र पक्षे साध्यनिर्देशः प्रतिज्ञा। यथा पर्वतो वह्निमानिति प्रतिज्ञा। पञ्चम्यंतं हेतुप्रतिपादकं वाक्यं हेत्ववयवः। यथा धूमादिति व्याप्तिप्रतिपादकम्। वचनमुदाहरणम्। यथा यो यो धूमवान्स सोऽग्निमान्। यथा महानस इति। व्याप्तिविशिष्टस्य हेतोः पक्षधर्मताप्रतिपादकं वचनमुपनयः। यथा वह्निव्याप्यधूमवांश्चायमिति। अबाधितत्वासत्प्रतिपक्षत्वतात्पर्यकं वाक्यं निगमनम्। यथा तस्माद्वह्निमानिति। अथ हेत्वाभासाः। अनुमितितत्कारणान्यतरप्रतिबंधकज्ञानविषयधर्मो हेत्वाभासत्वोपाधिस्तद्वन्तो हेत्वाभासाः। ते चानैकांतिकविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पंच। तत्र सव्यभिचारोऽनैकांतिकः। स त्रिविधः साधारणोऽसाधारणोऽनुपसंहारी चेति। तत्र सपक्षविपक्षवृत्तिः साधारणः। यथा पर्वतो धूमवान् वह्नेः। वह्निः सपक्षे महानसे विपक्षे तप्तायःपिण्डे च वर्ततेऽतः साधारणः। एतद्ज्ञानं च विपक्षवृत्तित्वरूपव्यभिचारविषयकत्वाद् व्यभिचारज्ञानविधया व्याप्तिग्रहे प्रतिबंधकम्। व्यभिचारज्ञाने सति व्याप्तिग्रहानुदयस्य सुप्रसिद्धत्वात्। सपक्षविपक्षव्यावृत्तत्वे सति पक्षवृत्तिरसाधारणः। यथा शब्दो नित्यः शब्दत्वात्। शब्दत्वं हि सपक्षाद्गगनादेर्विपक्षाच्च घटादेर्व्यावृत्तम्। पक्षे च शब्दे वर्तते इत्यसाधारणम्। एतद्ज्ञानं साक्षादनुमितिप्रतिबंधकं कथमिति चेदित्थं शब्दत्वं हि नान्वयहेतुः, दृष्टांताभावात्। किन्तु व्यतिरेकी। तथा च यो यद्वतो व्यावृत्तः स स्वाश्रये तदभावं साधयति। यथा धूमो वह्न्यभाववतो जलह्रदादेर्व्यावृत्तः स्वाश्रये पर्वतादौ वह्न्यभावाभावं साधयति तथा शब्दत्वं नित्यत्ववतो गगनादेः सपक्षाद्व्यावृत्तमिति स्वाश्रये शब्दे नित्यत्वाभावमनित्यत्वमपि साधयेत्। एवं नित्यत्वाभाववतो घटादेर्विपक्षाद् व्यावृत्तमिति स्वाश्रये शब्दे नित्यत्वाभावाभावं नित्यत्वमपि साधयेत्। न चैकत्र शब्दे नित्यत्वानित्यत्वयोः संभवस्तयोर्विरोधात्। तस्माच्छब्दत्वेऽसाधारणत्वज्ञाने सति न साध्यानुमितिरिति। वस्तुमात्रपक्षकोऽनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्वस्यैव पक्षत्वात्प्रमेयत्वं हेतुरनुपसंहारी। एतज्ज्ञानमपि व्याप्तिग्रहे प्रतिबंधकम्। सर्वस्य पक्षत्वे व्याप्तिग्राहकसहचारदर्शनस्याभावेन सहचारनिश्चयाभावे सति व्याप्तेर्निश्चयात्। साध्याभावव्याप्तो हेतुर्विरुद्धः। यथा गौरश्वत्वादिति। अत्र हि यत्राश्वत्वं तत्र गोत्वाभाव इति साध्याभावव्याप्तेः सत्त्वादश्वत्वं हेतुर्विरुद्धः। एतज्ज्ञानं साक्षादनुमितिप्रतिबंधकम्। गोत्वाभावव्याप्याश्वत्ववानिति ज्ञाने सति गोत्वनिश्चयासंभवात्। साध्याभावसाधकं हेत्वंतरं सत्प्रतिपक्षस्तद्वान्सत्प्रतिपक्षः। यथा पर्वतो वह्निमान् धूमात् महानसवत्। स वह्न्यभाववान् पाषाणमयत्वात्कुड्यवत्। अत्र यद् द्वयोरपि हेत्वोः परस्परसाध्याभावसाधकत्वान्मिथः सत्प्रतिपक्षत्वम्। एतज्ज्ञानं साक्षादनुमितिप्रतिबंधकं वह्निव्याप्यधूमवान्वह्न्यभावव्याप्यपाषाणमयत्ववांश्च पर्वत इति द्विविधपरामर्शे सत्येकस्मादप्यनुमितेरभावः। परस्परं प्रतिबंधात्। परामर्शप्रतिबंधकज्ञानविषयधर्मोऽसिद्धिस्तद्वानसिद्धः। स त्रिधा। आश्रयासिद्धस्वरूपासिद्धव्याप्यत्वासिद्धभेदात्। तत्र पक्षतावच्छेदकाभाववत्पक्षक आश्रयासिद्धः। यथा गगनारविन्दं सुरभि अरविंदत्वात्सरोजारविंदवत्। अत्र चारविन्दे पक्षे गगनीयत्वं पक्षतावच्छेदकं नास्ति। यद्विशेषविशेषणविशिष्टं तस्य विशेषणमेवावच्छेदकमिति तन्न्यायाद्विशेषविशेषणस्य गगनीयत्वस्यात्रावच्छेदकत्वम्। यद्वा विशिष्टपदे विशेषणपदधर्मस्यैवावच्छेदकत्वमिति स्वीकाराच्चेत्यरविंदत्वहेतुराश्रयासिद्धः। एतज्ज्ञानं परामर्शप्रतिबंधकम्। अरविन्दे गगनीयत्वं नास्तीति ज्ञाने सुरभित्वव्याप्यारविंदत्ववद्गगनारविन्दमिति परामर्शासंभवात्। एतस्यारविंदे गगनीयत्वसंबंधावगाहित्वात्। पक्षनिष्ठाभावप्रतियोगी स्वरूपासिद्धः। यथा ह्रदो द्रव्यं धूमादिति। अत्र ह्रदे पक्षे धूमाभावोऽस्तीति धूमो हेतुः स्वरूपासिद्धः। एतज्ज्ञानमपि परामर्शप्रतिबंधकम्। ह्रदे धूमो नास्तीति ज्ञाने सति द्रव्यत्वव्याप्यधूमवान् ह्रद इति परामर्शासंभवात्। एतस्य ह्रदे धूमसंबंधावगाहित्वात्। व्याप्यतावच्छेदकाभाववान्हेतुर्व्याप्यत्वासिद्धः। यथा पर्वतो वह्निमान् काञ्चनमयधूमादिति। अत्र धूमे व्याप्यतावच्छेदकत्वेनाभिमतं काञ्चनमयत्वं नास्तीति धूमो हेतुर्व्याप्यत्वासिद्धः। एतज्ज्ञानमपि परामर्शप्रतिबंधकम्। धूमे काञ्चनमयत्वं नास्तीति ज्ञाने सति वह्निव्याप्यकांचनमयधूमवान्पर्वत इति परामर्शासंभवादेतस्य धूमे काञ्चनमयत्वसंबंधावगाहित्वात्। साध्याभाववत्पक्षको बाधितः। यथा वह्निरनुष्णः पदार्थत्वात् जलवदिति। अत्र वह्नौ पक्षेऽनुष्णत्वाभावस्योष्णत्वस्य त्वगिंद्रियेण निश्चयात्पदार्थत्वहेतुर्बाधितः। एतज्ज्ञानं साक्षादनुमितिप्रतिबंधकम्। वह्नावनुष्णत्वं नास्तीति ज्ञाने वह्निरनुष्ण इत्यनुमितेरसंभवात्। तदभावलौकिकनिर्णयस्य तद्वत्ताज्ञाने प्रतिबंधकत्वात्। प्रतिबंधकत्वञ्च सामग्रीकालीनकार्यानुत्पादप्रयोजकत्वमिति हेत्वाभासः। ननूपाधेरपि दोषत्वात्सोपाधिकोऽपि हेत्वाभासोऽस्तीति कथं पंचैवेति चेन्न। व्यभिचारादिज्ञानस्येवोपाधिज्ञानस्यानुमितितत्करणान्यतरप्रतिबंधकत्वाभावेनोपाधेर्हेत्वाभासत्वाभावात्। कथं तर्हि वादेऽनुमाने उपाधिरुपन्यस्यत इति चेन्न। व्यभिचारज्ञाने प्रयोजकत्वेन तदुपन्यासात्। अथ कोऽयमुपाधिरिति चेदुच्यते साध्यव्यापकत्वे सति साधनाव्यापक उपाधिः। केवलसाध्यव्यापकपक्षधर्मावच्छिन्नसाध्यव्यापकसाधनावच्छिन्नसाध्यव्यापकभेदात्स त्रिधा। आद्यमाह पर्वतो धूमवान्वह्नेरित्यत्रार्द्रेन्धनम्। तत्र साध्यस्य धूमस्य

व्यापकम्। यत्र धूमस्तत्रार्द्रेंधनमिति सत्त्वात्। साधनस्य वह्नेरव्यापकम्। यत्र वह्निस्तत्रार्द्रेंधनमित्यसत्त्वात्। तप्तायःपिंडे वह्निसत्त्वेप्यार्द्रेंधनाभावात्। द्वितीयो यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्रोद्भूतरूपवत्त्वमुपाधिः। तस्य यत्र प्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति न केवलसाध्यव्यापकत्वम्। रूपे व्यभिचारात्। किंतु द्रव्यत्वलक्षणो यः पक्षधर्मस्तदवच्छिन्नबहिःप्रत्यक्षत्वं यत्र तत्रोद्भूतरूपवत्त्वमिति पक्षधर्मावच्छिन्नसाध्यव्यापकत्वमेव। आत्मनि व्यभिचारवारणाय बहिःपदम्, यत्र प्रत्यक्षस्पर्शाश्रयत्वं तत्र नोद्भूतरूपवत्त्वमिति साधनाव्यापकत्वं च वायावुद्भूतरूपवत्त्वस्य विरहात्। तृतीयो यथा प्रागभावो विनाशी जन्यत्वादित्यत्र भावत्वमुपाधिः। तस्य यत्र विनाशित्वं तत्र भावत्वमिति न केवलसाध्यव्यापकत्वमस्ति। प्रागभावे भावत्वविरहात्। किंतु जन्यत्वरूपसाधनावच्छिन्नविनाशित्वं यत्र तत्र भावत्वमिति साधनावच्छिन्नसाध्यव्यापकत्वमेव। यत्र जन्यत्वं तत्र न भावत्वमिति। साधनाव्यापकत्वे च ध्वंसे भावत्वविरहात्। अथ वह्निमान् धूमादित्यत्र महानसभिन्नत्वलक्षणपक्षधर्मावच्छिन्नसाध्यव्यापकत्वादिति चेन्न। पक्षधर्मेत्यत्र पक्षदृष्टांतोभयसाधारणधर्मस्यैव विवक्षितत्वात्। अथ तर्हि गतमुपाधिलक्षणमिति चेन्न। निरवच्छिन्नसाध्यपक्षदृष्टांतोभयसाधारणधर्मसाधनान्यतरावच्छिन्नसाध्यान्यतरव्यापकत्वे साधनाव्यापक उपाधिरिति। निरवच्छिन्नसाध्यशब्देन शुद्धसाध्यमुदासीनधर्मावच्छिन्नसाध्यं वा तद्व्यापकत्वे सति वा पक्षदृष्टांतोभयसाधारणधर्मावच्छिन्नसाध्यव्यापकत्वे सति वा साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनव्यापक उपाधिरिति परिष्कारः। साध्यव्यापकत्वं च साध्यसमानाधिकरणात्यंताभावाप्रतियोगित्वम्। साध्यो धूमस्तत्समानाधिकरणोऽत्यंताभावो घटाद्यत्यंताभावस्तत्प्रतियोगी घटादिरप्रतियोगी आर्द्रेंधनसंयोग इत्युपाधित्वं तस्य। साधनाव्यापकत्वं च साधनवन्निष्ठात्यंताभावप्रतियोगित्वम्। साधनं वह्निस्तद्वांस्तप्तायोगोलकं तन्निष्ठोऽत्यंताभाव आर्द्रेन्धनसंयोगस्य तत्प्रतियोग्यर्द्रेंधनसंयोग इत्युपाधित्वमित्यनुमानम्॥

अथोपमानम्॥ उपमितिकरणमुपमानम्। तत् त्रिविधम्। सादृश्यविशिष्टपिंडज्ञानं वैधर्म्यपिंडज्ञानमसाधारणधर्मविशिष्टपिंडज्ञानञ्च। तद्यथा गवयादिशब्दाः कचिच्छाक्ता इति जानता कीदृग्गवय इत्यारण्यके पृष्टे गोसदृशो गवय इति तेनोत्तरिते कदाचिदरण्यं गतस्य तत्पिंडदर्शनाद्गोसदृशो गवय इत्याप्तोक्तं स्मरतोऽयं गवयशब्दवाच्य इत्युपमितिर्जायते। तत्र गोसदृशोयं पिंड इति सादृश्यविशिष्टपिंडज्ञानं करणम्। वाक्यार्थस्मरणमवांतरव्यापारः, उपमितिः फलम्। एवं कीदृशोश्व इति पृष्टे गवादिवद् द्विशफः स्वल्पपुच्छश्चेत्यन्याप्तेनोक्ते कदाचित्तत्पिंडदर्शनादयं द्विशफः स्वल्पपुच्छश्च नेति ज्ञानादाप्तवाक्यस्मरणोत्तरमयमश्वशब्दवाच्य इत्युपमितिर्जायते। तत्र वैधर्म्यविशिष्टपिंडज्ञानं करणं, वाक्यार्थस्मरणं व्यापारः, शक्तिज्ञानं फलम्। एवं कीदृश्यौषधी सर्पविषहंत्रीति प्रश्ने नकुलदंष्ट्राधृतेत्युत्तरिते कदाचिन्नकुलदंष्ट्रायामौषधीविशेषदर्शने सति एतादृशी सर्पविषहंत्रीति ज्ञानमुत्पद्यते। तत्रैतादृशी विषहंत्रीति ज्ञानं फलं, वाक्यार्थस्मरणं व्यापारः, नकुलदंष्ट्राधरणरूपसाधारणधर्मविशिष्टपिंडज्ञानं करणमित्युपमानम्। अथ शब्दमाह॥ शाब्दप्रमाकरणं शब्दः। यथा नदीतीरे पञ्च फलानि संतीत्यादि। वाक्यार्थप्रमागोचरपदार्थज्ञानं शाब्दप्रमा। अत्र पदज्ञानं करणं, पदजन्यपदार्थोपस्थितिर्व्यापारः। पदोपस्थितानां मिथः संसर्गो वाक्यार्थः। पदसमूहो वाक्यम्। अर्थवाचकं पदम्। तद् द्विधा मुख्यं गौणं च। यच्छक्तिवृत्त्या यमर्थमुपस्थापयति तत्तस्मिन्नर्थे मुख्यं यथा गोघटादिव्यक्त्युपस्थापकं गोघटादिपदम्। अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारकोऽनादिसंकेतः शक्तिः। यल्लक्षणावृत्त्या यमर्थमुपस्थापयति तत्तस्मिन्नर्थे गौणं लाक्षणिकमित्युच्यते। यथा गंगायां घोष इत्यत्र तीरोपस्थापकं गंगापदम्। शक्यसंबंधो लक्षणा। यथा गंगाशक्यप्रवाहस्य तीरे संयोगसंबंधो गंगापदलक्षणा। तस्य च शब्दस्याकांक्षायोग्यतासन्निधयः सहकारिणः। यस्य पदस्य येन पदेन विनान्वयानुभवजनकत्वं नास्ति तस्य पदस्य तेन पदेन समभिव्याहारात् आकांक्षा। घटमानयेत्यादौ कारकपदस्य क्रियापदेन विना घटकर्मकमानयनमित्यन्वयानुभवजनकत्वाभावात्कारकपदस्य क्रियापदेन सहाकांक्षा, एवं क्रियापदस्य कारकपदेनापि सह बोध्या। अत एव गौरश्वः पुरुषो हस्तीत्यादौ नान्वयबोधः। आकांक्षाविरहात्। एकपदार्थेऽपरपदार्थसंसर्गो योग्यता। यथा पयसा सिञ्चतीत्यादौ पयःपदार्थे संसर्गस्य कार्यकारणभावलक्षणस्य सत्त्वाद्योग्यता। अत एव वह्निना सिंचतीत्यादौ नान्वयबोधः, योग्यताविरहात्। पदानामव्यवधानं सन्निधिः, यथा गामानयेत्यादौ पदानामविलंबेनोच्चारणात्सन्निधिः। अत एवैकैकशः प्रहरे प्रहरेऽसहोच्चरिते गामानयेत्यादौ नान्वयबोधः। सन्निधेरभावात्। सोयं शब्दस्त्रिधा विधिनिषेधार्थवादभेदात्। तत्र प्रवृत्तिपरं वाक्यं विधिः। यथाग्निष्टोमेन स्वर्गकामो यजेत। ओदनकामस्तंडुलान्पचेदित्यादि। ज्योतिष्टोमनामको यागः स्वर्गरूपेष्टसाधनम्। तंडुलकर्मकः पाक ओदनरूपेष्टसाधनमित्युभयत्रवाक्यार्थः। यजेत्पचेदित्यादिविधिप्रत्ययेनेष्टसाधनत्वोपस्थापनात्। निवृत्तिपरं वाक्यं निषेधः। यथा कलंजं न भक्षयेदिति। कलंजाभक्षणेनेष्टविशेषसाधनमिति वाक्यार्थः। इष्टविशेषश्चात्र पापानुत्पत्तिरेव। तथैव वाक्यतात्पर्यात्। विधिनिषेधभिन्नः शब्दोर्थवादः। स तु भागवतपक्षे विशेषतो वर्णित एवेति। स चायं शब्दो लोके वेदे च समान एव। इयांस्तु विशेषः। लौकिकं तु यदाप्तोक्तं वाक्यं तदेव प्रमाणं वेदवाक्यं तु सर्वमेव प्रमाणं भगवत उद्भूतत्वात्। प्रसंगाद्वेदविभागमाह। ननु को वेदः कियत्प्रमाणः कतिधा चेति प्रश्ने उत्तरमाह। मंत्रब्राह्मणयोर्वेद इति लक्षणं लक्ष्यं तु चतुरो वेदा इति प्रमाणम्। चत्वारश्च ते इति ज्ञेयम्। ते च ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति। तत्र ऋग्वेदस्याष्टौ स्थानानीह चरण-

व्यूहवेदैकदेशः प्रमाणं तदेवाह । अथातश्चरणव्यूहं व्याख्यास्यामः । तत्र यदुक्तं चातुर्विध्यं चतुरो वेदा विज्ञातानि भवंति । ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति । तत्र ऋग्वेदस्याष्टौ स्थानानि भवंति । चर्चाश्रावकश्चर्चकः श्रवणीयपारः क्रमपारः क्रमचटः क्रमजडः क्रमदण्डश्चेति । चतुष्पारायणमेतेषां शाखाः पञ्चविधा भवंति । शाकला वाष्कला आश्वलायना: शांखायना मांडूकायनाश्चेति । तेषामध्ययनमध्यायाश्चतुष्षष्टिर्मंडलानि दशैव तु । 'एकर्चं एकवर्गश्च एकश्च नवकस्तथा । द्वौ वर्गौ च ऋचौ ज्ञेयौ त्रीणि त्र्यर्चेशतं स्मृतम् । चतुःषष्टिसमाख्यातं षट्सप्तत्युत्तरं शतम् ॥ पञ्च च द्वादशशतान्यष्टौ विंशोत्तराणि च । तत्र पंचपड्ऋचं च सप्तपञ्चाशदुत्तरम् ।' सप्तर्चमेकोनत्रिंशदुत्तरशतमेककम् ॥ अष्टर्चं पञ्चपञ्चाशत् 'वर्गाणां परिसंख्यातं द्वे सहस्रे षडुत्तरे । ऋचां दशसहस्राणि ऋचां पञ्चशतानि च ॥ ऋचामशीतिपादश्चैतत्पारायणमुच्यते ॥' यजुर्वेदस्य षडशीतिभेदा भवंति । तत्र चर्काणां द्वादश भेदाः भवन्ति । चर्काः ह्वर्काः कठाः प्राच्यकठाः कपिष्ठलकठाश्चारायणीया वार्तंतवीयाः श्वेता अश्वतराः औपमन्यवः पाताः ऐण्डिनेयाः मैत्रायणीयाश्चेति । तत्र कठानां तु यो योगाय तु विशेषः चतुश्चत्वारिंशत्युपग्रन्थाः । तत्र मैत्रायणीयानां षड्भेदा भवंति । मानवाः वाराहाः दुंदुभाः छागलेयाः हार्द्रवीयाः श्यामायनीयाश्चेति । तत्र हार्द्रवीयानां पंच भेदा भवंति । हार्द्रवीयासुरिर्गार्ग्यं शार्कराक्षमाग्रावत्यविमृचम् । तेषामध्ययनं 'द्वे सहस्रे शते न्यूने मंत्रे वाजसनेयके । ऋग्गणं परिसंख्यातं ततोऽन्यानि यजूंषि च ॥' अष्टौ चरणशतानि सहस्राणि चाष्टाविंशतिरन्याप्यधिकस्य पादमेतत्प्रमाणं यजुषां हि केवलं सवालखिल्यं सशुक्रियं ब्राह्मणश्चतुर्गुणम् । तत्र माध्यंदिनीनामध्ययने विशेषमाह–'ऋचां तु परिसंख्यातं शतान्येकोनविंशतिः । पञ्चसप्तत्यधिकं च सखिलं च शुक्रियम् ॥ ब्राह्मणं तु शतपथं कांडानि चतुर्दश । मंत्रः पदः क्रमश्चैव चतुर्थः स्याज्जटा तथा ॥ क्रममालाशिखा लेखा ध्वजो दण्डो रथो घनः । अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा मनीषिभिः ॥ पारस्करं गृह्यसूत्रं सूत्रं कात्यायनं स्मृतम् । षडंगैः सहितो वेदो यथोक्तफलदो भवेत् ॥ सर्वानुक्रमपद्ज्योतिर्यजुषां च विधानकम् । कर्मलीप्रदीपिका च स्वराणां व्यंजनं तथा । क्रतुशेषं च सावित्रं सूत्रमंत्रप्रकाशकम् ॥ मंत्रभ्रांतिहरश्चैव शिक्षाणां पंचकं तथा । मंत्रज्योतिश्च विज्ञेया मंत्राणां दीपिका तथा । शेषमध्ययनमुच्छिन्नं कल्पग्राह्येषु पठ्यते ॥' तत्र तैत्तिरीयकानां द्वौ भेदौ भवतः खेयाः खाण्डिकेयाश्चेति । तत्र खांडिकेयानां पंच भेदा भवंति । कलिता शाठ्यायनी हिरण्यकेशी भारद्वाज्यापस्तंबीयाश्चेति । तेषामष्टादशयजुःसहस्राण्यधीत्य शाखापारो भवति । तान्येव द्विगुणान्यधीत्य पदपारो भवति । तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति । षडंगान्यधीत्य षडंगविद्भवति । 'त्रिगुणं पठ्यते यत्र मंत्रब्राह्मणयोः सह । यजुर्वेदः स विज्ञेयः शेषाः शाखांतराः स्मृताः ॥' शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमिति षडंगानि । 'छंदः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमेव च ॥ शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयते ॥' तथा प्रतिपदमनुपदं छंदो भाषा धर्मो मीमांसा न्यायस्तर्क इत्युपांगानि । तत्र परिशिष्टानि भवंति यूपलक्षणं छागलक्षणं प्रतिज्ञानुवाकः परिसंख्याचरणव्यूहश्राद्धकल्पशुल्बकनिःपार्षदमृग्यजुषी इष्टकापूर्णं प्रवराध्यायोक्थशास्त्रं क्रतुसंख्यानिगमायज्ञपार्श्वोनहौत्रिकं पशवोत्थानं पूर्वलक्षणमित्यष्टादशपरिशिष्टानि भवंति । तत्र कठानां योगायेणविशेषस्तत्र प्राच्योदीच्यनिर्ऋत्याः । तत्र वाजसनेयानां पंचदश भेदा भवंति–जाबालाः बौधेयाः काण्वाः माध्यंदिनाः शापेयाः स्थापायनीयाः कपोलाः पौंडरवत्साः आवटिकाः परमावटिकाः पाराशरा वैणेया वैधेया वैनतेया वैजवापश्चेति । तेषामध्ययनं शौक्तिकं प्रवचनीयाश्चेति । 'मंत्रब्राह्मणकल्पानामंगानां यजुषामृचाम् । षण्णां यः प्रतिभागज्ञः सोऽध्वर्युः कृत्स्न उच्यते ॥' सामवेदस्य किलसहस्रभेदा आसन् । तेष्वनध्यायेष्वधीयानास्ते शतक्रतुवज्रेणाभिहता भवंति तान् व्याख्यास्यामः । तत्र राणायणीयानां सप्त भेदा भवंति । राणायणीयाः शाट्यमुग्राः कालेयाः महाकालेयाः लांगलाः शार्दूलाः कौथुमाश्चेति । तत्र कौथुमानां सप्त भेदा भवंति । आसुरायणाः वार्त्तायणीयाः प्रांजलिर्वैनभृतः प्राचीनयोग्या नैगेयाः कौथुमाश्चेति । तेषामध्ययनमशीतिशतमाग्नेयं यावमानं चतुःशतमैंद्रं तु षड्विंशपाकं निगायंति सामगास्तान्यधीत्य चण्डाः प्रयतरो भवति शिष्टान्यधीत्य शिष्टविंशतिको भवति । तत्र केचित्पुनरौच्छिष्टं पूतं साम तन्मंत्रा धातुलक्षणमिति विधीयते । तेषामध्ययनम्–अष्टौ सामसहस्राणि सामानि च चतुर्दश । अष्टौ शतानि नवतिर्दशसप्तसवालखिल्यः ससौपर्णाः सारण्यकानि सौर्याणि एतत्सामगणं स्मृतम् ॥ अथर्ववेदस्य नव भेदा भवंति । पिप्पलाः शौनकाः दामोदाः तोत्तायनाः जाबालाः ब्रह्मपलाः शाकुनार्खा देवदर्शी चारणविद्याश्चेति । तेषामध्ययनं द्वादशैव सहस्राणि ब्रह्मत्वं चाभिचारकम् । एतद्वेदरहस्यं स्यादथर्ववेदस्य विस्तरम् । तेषां पंच कल्पानि भवंति । कल्पे कल्पे पंचशतानि भवंति । नक्षत्रकल्पो विधानकल्पो वितानकल्पः संहिताविधिरभिचारकल्पः शांतिकल्पश्चेति । तत्र सर्वेषां वेदानामुपवेदा भवंति ऋग्वेदस्यायुर्वेद उपवेदः । यजुर्वेदस्य धनुर्वेद उपवेदः । सामवेदस्य गांधर्ववेद उपवेदः । अथर्ववेदस्य शिल्पिशास्त्राणि सार्थशास्त्रं चेत्याह भगवान कात्यायनः । स्कंदो वा य इमे वेदाश्चत्वारस्तेषामेकैकस्य कीदृशं रूपं वर्णविभागाः । अत्रोच्यते ऋग्वेदः पद्मपत्राक्षः सुविभक्तग्रीवः कुंचितकेशश्मश्रुः श्वेतवर्णः प्रमाणं पञ्चवितस्तिमितम् । यजुर्वेदः पिंगाक्षः कृशमध्यः स्थूलगलकपोलस्ताम्रवर्णः कृष्णवर्णो वा प्रादेशषड्दीर्घः । सामवेदो नित्यस्रग्वी सुप्रीतः शुचिः शुची वासी शमी दान्तो चर्मी बृहच्छरीर कांचननयनः आदित्यवर्णः नवरत्निमात्रः । अथर्ववेदस्तीक्ष्णप्रचंडः कामरूपी विश्वात्मा विश्वकर्ता क्षुद्रकर्मा स्वशाखाध्यायी प्रज्ञो महान नीलोत्पलवर्णः स्वदारसंतुष्टः दशरत्निमात्रः । ऋग्वेदस्यात्रेयगोत्रः सोमदेवता गायत्री छंदः । यजुर्वेदस्य काश्यपगोत्र इंद्रदेवता त्रिष्टुप्छंदः । सामवेदस्य भारद्वाजगोत्र इंद्रो देवता जगतीछंदः । अथर्ववेदस्य

वैखानसगोत्रः ब्रह्म देवता अनुष्टुप्छंदः। य इमे वेदानां नामरूपगोत्रप्रमाणच्छंदोदेवतावर्णादीनि वर्णयेत्स सर्वविद्यो भवति जातिस्मरो जायते जन्मजन्मनि वेदपारगो भवति अव्रती व्रती भवति अब्रह्मचारी ब्रह्मचारी भवति। य इदं चरणव्यूहं गर्भिणी शृणुयात्सा पुत्रान् लभते इदं श्राद्धकाले पठेत् स अक्षयं श्राद्धं पितॄणां समर्पयति य इदं पठेत्स पंक्तिपावनो भवति य इदं पर्वपर्वसु पठेत्स विधूतपाप्मा भवति ब्रह्मभूयाय गच्छति। इति धृतिशिवाशक्तिचत्वारो वेदपत्नीका भवंति। यज्ञकाले ईशानादिव्यवस्थिताः 'लक्षं तु चतुरो वेदा लक्षं भारतमेव च। लक्षंतु व्याकरणं प्रोक्तं चतुर्लक्षं तु ज्यौतिषमि'ति वेदविभागादि। किं बहुनेति शब्दनिरूपणम्।

अन्यान्यर्थापत्त्यादीन्यपि कैश्चित्प्रमाणानि स्वीकृतानि तेषामेष्वेवांतर्भावोस्ति। तत्प्रकारस्त्वन्यत्रानुसंधेयः। येषामत्र लक्षणं नोक्तं विस्तरभिया तेषां जातिघटितं पृथिवीत्वजातिमति पृथिवीत्यादिरूपं ध्येयं सुधीभिः। एवमेव षोडशपदार्थानामपि सप्तस्वेवांतर्भावो बोध्यः। इह च पदार्थानामुद्देशलक्षणे अनभिज्ञजनबोधाय संक्षेपेणोक्ते परीक्षा त्वनुपयोगान्न कृता। लक्ष्यतावच्छेदकमात्रेण लक्ष्यसंकीर्त्तनमुद्देशः। असाधारणधर्मो लक्षणम्। असाधारणत्वं च अव्याप्त्यादिदोषत्रयरहितत्वम्। तथाहि लक्ष्यतावच्छेदकावाच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यमतिव्याप्तिः। यद्धर्मावच्छिन्नं लक्ष्यं स धर्मो लक्ष्यतावच्छेदकः। सच यत्रास्ते स लक्ष्यतावच्छेदकावच्छिन्नः। यथा गोः शृंगित्वं लक्षणं कृतं चेत्तदतिव्याप्तिग्रस्तत्वान्न कार्यम्। कथं लक्ष्या गौर्लक्ष्यतावच्छेदकं गोत्वम्। तदवच्छिन्ना गौस्तत्प्रतियोगिताकभेदो महिष्यादौ तत्र सामानाधिकरण्यं शृंगित्वस्येति। लक्ष्यतावच्छेदकसामानाधिकरण्यात्यंताभावप्रतियोगित्वमव्याप्तिः। यथा गोर्नीलरूपवत्त्वं लक्षणम्। लक्ष्या गौः लक्ष्यतावच्छेदकं गोत्वं तत्सामानाधिकरण्यात्यंताभावः। श्वेतगवि नीलरूपवत्त्वस्य तत्प्रतियोगित्वं नीलरूपवत्त्वेस्तीति। लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वमसंभवः यथा गोरेकशफत्वं लक्षणम्। लक्ष्या गौर्लक्ष्यतावच्छेदकं गोत्वं तद्व्यापकीभूताभाव एकशफत्वाभावस्तत्प्रतियोगित्वमेकशफत्वेस्तीति। परीक्षा तु उद्देशलक्षणयोरुपपत्त्यनुपपत्त्यन्यतरफलको विचार इत्यलं प्रसक्तानुप्रसक्तेन।

किञ्च यस्मिंस्तर्कशास्त्रेऽन्यशास्त्रेऽन्यशास्त्राभ्यासेन सूरयो विद्वांसोपि सूक्ष्मरूपेण पदार्थविवेचने मुह्यंति। प्रतियोग्यनुयोगिसमवेतावच्छेदकादिशब्दाकर्णनेनैवाकुलीभवंतीति भावः। यत्र शास्त्रे त्रयाणां लक्ष्यलक्षणपरीक्षाणां सर्गोऽमृषा। तदुक्तमेवाधस्तात् दृष्टांतस्तूक्तप्राय एव। किंभूतं शास्त्रं ब्रह्म शुद्धम्। अनेन 'योधीते गौतमीविद्यां स शृगालत्वमाप्नुयादि'ति शापकलंकरहितमिति सूचितम्। शप्ता तु 'गौतमश्चार्कबंधुश्चे'त्यमरोक्तेर्नारितकविद्यैव नेयमिति भावः। पुनः स्वेन निजेन धाम्ना प्रभावेण पदार्थतत्त्वविवेचनरूपेण निरस्तोपास्तः कुहक एकविंशतिदुःखलक्षणः क्लेशो येन तत्तथा। अत एवात्यंतिकैकविंशतिदुःखध्वंसो मोक्ष इति तैर्मोक्षलक्षणं कृतमिति। एतेन पदार्थविवेचनस्य मोक्षफलकत्वमपि ध्वनितम्। आत्यंतिकत्वञ्च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वम्। इदानीं शुकदुःखध्वंसस्यास्मदीयदुःखप्रागभावासमानकालिकत्वात्स्वेत्यादि। इदानीमस्मदीयदुःखध्वंसस्य सुषुप्तिकाले दुःखासमानकालिकत्वसत्त्वात्प्रागभावेति। उपांत्यदुःखध्वंसस्य तत्प्रागभावासमानकालिकत्वाद्दुःखेति। तादृशश्च मोक्षस्तत्त्वज्ञानेनात्मनि जन्यते। तद्यथा तत्त्वज्ञानान्मिथ्याज्ञानवासनानिवृत्तौ रागद्वेषमोहानां निवृत्त्या कर्मांतरे प्रवृत्तिरेव न। पूर्वसंस्कारात्प्रवृत्त्या कर्मोत्पत्तावपि नादृष्टोत्पत्तिः। अदृष्टहेतुमिथ्याज्ञानस्य तत्त्वज्ञानप्रागभावस्य वाऽभावात्। तथा चोक्तं वाचस्पतिमिश्रैः 'मिथ्याज्ञानसलिलावसिक्तायामात्मभूमौ धर्माधर्मावंकुरं जनयत' इत्यादिना। प्राचीनादृष्टं च ज्ञानाग्निसहकृतयोगवशात्कायव्यूहेन युगपत्सर्वभोगान्नाशयति। तथाच पूर्वकर्मसमाप्तौ भोक्तव्यकर्मांतराभावाज्जन्माभावे सिद्धे वर्तमानशरीरभोग्यसर्वदुःखनाशसिद्धौ चात्यंतिकदुःखनिवृत्तिरिति। तथाच अक्षपादीयं सूत्रं 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनंतरापायादपवर्गः।' इति। एकविंशतिदुःखानि शरीरं षडिंद्रियाणि षड्विषयाः षड् बुद्धयः सुखं दुःखं चेति। दुःखानुषंगित्वाच्छरीरादौ गौणदुःखत्वम्। नन्वेकविंशतिदुःखांतर्गतयोर्मनःश्रवणयोर्नित्यत्वात्कथं तन्नाश इति चेन्न। यद्रूपविशिष्टस्य श्रवणस्य ज्ञानद्वारा दुःखहेतुतया दुःखत्वं तद्रूपस्य कर्णशष्कुल्या नाशेन तद्विशिष्टश्रवणेंद्रियरूपदुःखस्य नाशात्। एवमात्मसंयोगरूपव्यापारविशिष्टस्यैव मनसो ज्ञानद्वारा दुःखरूपतया व्यापारनाशेन तद्विशिष्टमनोरूपदुःखस्य नाशसंभवादिति विशेषणाभावे विशिष्टाभावादिति। पुनः किंभूतं सत्यंपरं सत्यं वेदं पिपर्ति पालयतीति सत्यंपरम्। खजत्र प्रत्ययः, खित्त्वान्मुम्। तथा चाक्षपादीयं सूत्रं कंटकवदावरकमिदं शास्त्रं तत्त्वं तु बादरायणात्सिद्धम्। इति तर्कशास्त्रपक्षः॥ ९७॥

अथ पुष्यनक्षत्रपक्षः। वयं तत्पुष्यनक्षत्रं सदा हृदा धीमहि। तत्किं यत्र त्रयाणां ग्रहवेधविरुद्धतारात्वविलोमगत्वरूपाणां सर्गो रचनो मृषा। यथा तेजोवारिमृदां त्रिनिमयो मृषा। तदुक्तं श्रीपतिना 'ग्रहेण विद्धोप्यशुभान्वितोपि विरुद्धतारोपि विलोमगोपि। करोत्यवश्यं सकलार्थसिद्धिं विहाय पाणिग्रहमेव तिष्यः॥' इति। यतो यस्मिन्पुष्येन्वयात्गमनादागस्य गमनकारणस्वाभिलषितस्य जन्माविर्भावोस्ति। 'पुष्यर्क्षे गमनं कार्यं पुष्यः सर्वार्थसाधकः।' इति होराशास्त्रात्। यः पुष्य इतरत इतरेभ्य ऋक्षग्रहलग्नादिभ्यः स्वराट् स्वतंत्रः। इतरे तु न स्वतंत्राः। तदुक्तं श्रीपतिना 'परकृतमखिलं निहंति पुष्यो न खलु निहंति परस्तु पुष्यकृत्यम्। ध्रुवममृतकरेष्टमेपि पुष्ये विहितमुपैति सदैव कर्मसिद्धिमि'ति। किञ्च यतो यस्य ब्रह्म महत्त्वमर्थेषु कार्येसिद्धित्वभिज्ञो ब्रह्मादिकत्वयं नारदाय तेने। 'पुष्यो विघ्नविनाशकारणमिह पुष्यो हि सर्वार्थकृत्पुष्यः सर्वविदिक्षु दिक्षु गमने शस्ता

मतः सर्वशः। पुष्यो योगिनिकालशूलकुतिथिप्रोक्तं हरेत्सर्वथा पुष्यो नारद सर्वतो हि बलवान् सिंहो मृगाणां यथे'ति संहितायाम्। यस्मिन्पुष्ये सूरयो विद्वांसस्तन्माहात्म्यज्ञा ये ते न मुह्यंति। किंतु तस्मिन्नेव सर्वकार्याणि कुर्वंतीति भावः। तेनेति पदद्वयं शेषः। ननु विवाहेस्य कथं न सामर्थ्यमिति चेदत्राह। विवाहे ब्रह्मशप्तत्वान्न सामर्थ्यम्। तदुक्तं केशवेन 'प्राचेतसः प्राह शुभं भगर्क्षं सीता तदूढा न सुखं सिषेवे। पुष्यस्तु पुष्यत्यभिकाममेव प्रजापतेराप स शापमस्मिन्॥' अस्मिन्विवाहे। किंभूतं पुष्यं स्वेन निजेन धाम्ना प्रभावेण निरस्तोऽपास्तो विष्टयादिकृतः कुहकोऽनर्थो येन तम्। तदुक्तम् 'सविष्टिभौमार्कशनैश्चरा वा ग्रहोपतप्तः कुतिथिस्थितो वा। विरामयुक्तोप्यविरामयुक्तस्तथापि पुष्यः सकलार्थपूज्यः॥' इति। पुनः परं सर्वर्क्षोत्कृष्टम्। तदुक्तम् 'सिंहो यथा सर्वचतुष्पदानां तथैव पुष्यो बलवानुडूनामि'ति। पुनः सत्यं स्वहितकार्यसत्यकरम्। 'सर्वं कार्यं भवेत्सत्यं पुष्ये यत्क्रियते नरैरि'ति। इति पुष्यनक्षत्रपक्षः॥ ९८॥

अथ कलियुगपक्षः॥ कलियुगस्य हरिनामतः सर्वसम्पादकत्वेन श्रैष्ठ्यं मन्वानः श्रीव्यासो दुर्जनं प्रथमं वन्देदिति न्यायेन वादौ कलियुगं ध्यायति। वयं तं कलियुगं सदा हृदा धीमहि। तं कं यत्र त्रयाणामसत्याशौचादयानां सर्गोऽमृषा सत्यः। कथं यथा तेजआदीनां वास्तवरूपममृषा 'सत्यं नास्ति दया नास्ति नास्ति शौचं कलौ युगे।' इति पुराणात्। यतो यस्य कलियुगस्याद्याद्ब्रह्मणः सकाशाज्जन्म। तदुक्तं ब्रह्मवैवर्तीयकाशीमाहात्म्ये 'वेदान्प्राप्य ततो वेधाः ससर्ज विविधाः प्रजाः। सत्यादीनि युगान्यादौ सृष्ट्वा धर्मान्विभक्तवानि'त्युक्त्वा। कलिस्वरूपमपि 'पिशाचवदनः क्रूरः कलिः कलहवल्लभः। वामेन शिश्नं दक्षेण जिह्वां धृत्वा ननर्त्त च॥ पाणिना पामरैस्तुल्यः पुण्यापुण्यविमिश्रकः। ब्रह्मणोग्रे हसन् खिद्यन्नुद्यन्मुह्यन्व्यवस्थितः॥' इत्यादिनोक्तम्। सनत्कुमारसंहितायां सूर्याद्युगानामुत्पत्तिरुक्ता। तथाहि 'भास्कर उवाच। शृण्वन्नूरोभवन्तोपि वालखिल्याश्च नारद। ब्रह्मविष्णुमहेशाद्यैरेकदा प्रार्थितस्त्वहम्॥ कथं तत्र गतिज्ञानं जायते तद्वदस्व मे। एवं तैः प्रार्थ्यमानो हि कृताः स्वांगांशसम्भवाः॥ चत्वार एव पुरुषा युगरूपा महोज्ज्वलाः।' इत्युक्त्वा सत्यादित्रयस्वरूपमुक्त्वा कलिस्वरूपमुक्त्वा 'चतुर्थो मदनोन्मत्तः कराभ्यां लिङ्गपीडकः। स्कन्धयोर्दत्तयुवतिर्हास्यघूर्णितलोचनः॥' इति। 'विरिंच्यंगसमुद्भूतः कलिः कालमलो युगः। रीतियन्त्रं स्तरीपानसाधनं निजनामकम्॥ वामे करे दधद्दक्षे शिश्नं स्कन्धे स्त्रियं तथा। समागतस्तं गृहिणः कुतो वृत्तं तवेदृशम्॥ स चाह शृणु भो ब्रह्मन्नहं कलियुगाह्वयः॥ मत्काले ये नरास्ते स्युः शिश्नजिह्वावशस्थिताः। मन्नामकमिदं यन्त्रं सर्वान्वर्णांस्तथाश्रमान्॥ एकीकरिष्यति ब्रह्मन्साक्षान्मद्रूपमेव तदि'ति कौशिकसंहितायाम्। यः कलिः स्वराट् स्वान्स्वसम्बन्धिनोऽधर्मानृतकामक्रोधादींत्राजयति प्रकाशयतीति स्वराट्। तदुक्तं सनत्कुमारसंहितायां कलिनैव 'सर्वधर्मविहीनोहं कलिः सत्यविवर्जितः। अयुतं च चतुर्लक्षं सहस्रद्वितयं तथा॥ मत्कालपरिमाणं तु प्रेरयामीदृशीं धियम्। परस्त्रीगमने द्यूते चौर्ये छद्मानि कूटके॥ पैशुन्ये वृत्तिलोपे च मद्यमांसादिभक्षणे। मयि स्वल्पायुषो लोका बहुधा विधवांगनाः॥ सर्वे लोका जारजाताः शिश्नोदरपरायणाः। वाममार्गरता मातृभगिनीभोगकारकाः॥ वार्द्धके बहुधा सर्वे निर्द्धना रोगसंयुताः। ब्राह्मणाः शूद्रकर्माणः शूद्रा ब्राह्मणवृत्तयः॥ युद्धकूटाः सर्वजनाः पतिं त्यक्ष्यन्ति सङ्करे। स्वल्पेन हेतुना नार्यो भर्तृत्यागविधायकाः॥ जातिवन्ध्या काकवन्ध्या मृतवत्सा भवन्ति हि। विद्यालक्ष्मीकलाद्याश्च नीचेष्वेव रमन्ति हि। दासीभोगरता लोकाः परित्यज्य कुलस्त्रियम्॥ एवं धर्मं करिष्यामि भ्रातृधर्मविनाशनः॥' इति। ग्रन्थान्तरे तु 'धूमपानरतास्सर्वे भविष्यन्ति द्विजाः कलौ। धूमपानं मद्यपानं समं यन्त्रेण सेवितम्॥ ब्राह्मण्यनाशकं विप्राः सर्वोच्छिष्टमिदं यतः। अधःशिरा ऊर्ध्वपादः कीलितः स्तम्भकद्वये॥ धूमपानरतो नित्यं तिष्ठत्याब्रह्मवत्सरम्। भागीरथाय संप्रोक्तमिदं हि समवर्तिने'ति। यतो यस्य कलेरन्वयात्सम्बन्धादर्थेष्वभिज्ञोतिविज्ञोपि इतरतः पामरो नीचो भवति। 'धर्मज्ञोप्यतिनिपुणः कलिसङ्गतो भवेन्नूनम्। नीचकर्मपरिसेवी वार्ता कान्यजनस्ये'त्यभियुक्तोक्तेः। यः कलिरादिकवये ब्रह्मणे ब्रह्म निजहृत्त्वं तेने। 'विनाश्यैवान्यधर्माणि निजधर्मं प्रवर्तये। मद्धर्मोल्लङ्घिनो मर्त्यान्पीडयाम्यहमत्रजे'ति संहितायां कल्युक्तेः। स चाह शृणु भो ब्रह्मन्नित्यादिना पूर्वमप्युक्तमेवेति। सर्वं चैतदग्रे वक्ष्यत्यपि 'यदा मायानृतं तन्द्रानिद्राहिंसाविषादनम्। शोको मोहो भयं दैन्यं स कलिस्तामसस्स्मृतः॥ यस्मात्क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः। कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः॥ दस्यूत्कृष्टा जनपदा वेदाः पाखंडदूषिताः। राजानश्च प्रजाभक्षाः शिश्नोदरपरायणाः॥ अव्रता बटवोशौचा भिक्षवश्च कुटुंबिनः। तपस्विनो ग्रामवासा न्यासिनो ह्यर्थलोलुपाः॥ ह्रस्वकाया भूर्यपत्या महाहारा गतह्रियः। शश्वत्कटुकभाषिण्यश्चौर्यमायोरुसाहसाः॥ पणयिष्यंति वै क्षुद्राः किराताः कूटकारिणः। अनापद्यपि मंस्यंति वार्तां साधुजुगुप्सिताम्॥ पतिं त्यक्ष्यंति निर्द्रव्यं भृत्या अप्यखिलोत्तमम्। भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः॥ पितृभ्रातृसुहृज्ज्ञातीन्हित्वा सौरतसौहृदाः। ननांदृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः॥ शूद्राः प्रतिग्रहीष्यंति तपोवेशोपजीविनः। धर्मं वक्ष्यंत्यधर्मज्ञा अधिरुह्योत्तमासनम्॥ नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्शिताः। निरन्ने भूतले राजन्ननावृष्टिभयातुराः॥ वासोन्नपानशयनव्यवायस्नानभूषणैः। हीनाः पिशाचसंदर्शा भविष्यंति कलौ जनाः॥ कलौ काकिणिकेप्यर्थे विगृह्य त्यक्तसौहृदाः। त्यक्ष्यंति च प्रियान् प्राणान्हनिष्यंति स्वकानपि॥ न रक्षिष्यंति मनुजाः स्थविरौ पितरावपि। पुत्रान्सर्वार्थकुशलान् क्षुद्राः शिश्नोदरंभराः॥' इति। यत्रास्मिन्कलियुगे सूरयोपि विद्वांसोपि मुह्यंति। श्रुतिस्मृत्युदितधर्मेषु कुतर्कान्संभाव्य पाखंडिनो भवंति। कलिजातकालवेयादिभक्ताभासप्रवर्तितमार्गेष्वासक्त-

चित्ता भवंतीति भावः। तदुक्तम् 'शाठकोपाः कालवीयास्तांतुवायाश्च तौलिकाः। एते चान्ये च बहवो भविष्यंति कलौ युगे ॥
वेदतद्धर्महंतारः स्वया कल्पितभाषया। भक्ताभासा न ते भक्ताः कलिवृद्धिकरा हि ते ॥' इति पाखण्डविवेके। वक्ष्यत्यपि 'कलौ
न राजन् जगतां परं गुरुं त्रैलोक्यनाथानतपादपंकजम्। प्रायेण मर्त्या भगवंतमच्युतं त्यक्ष्यंति पाखंडविभिन्नचेतसः ॥' इति।
किंभूतं स्वेनासाधारणेन धाम्ना प्रभावेण संकल्पमात्रेणापि पुण्यफलप्रदत्वरूपेण निरस्तानाममराणामपि कुहकं विस्मापकम्।
तद्वक्ष्यति 'नानुद्वेष्टि कलिं सम्राट् सारंग इव सारभुक्। कुशलान्याशु सिध्यंति नेतराणि कृतानि यदि'ति। 'एकदा विस्मिता
देवाः कलिमूचुः समागतम्। अहो ते वैभवं लोके कलेः पुण्यफलं यतः ॥ संकल्पादेव तनुपे पापं तु कृतमेव ही'ति पुराणांतराच्च।
पुनः सत्यं सत्यरूपपरकृष्णकीर्त्यैव तत्प्रापकम्। तदुक्तं 'कलावनंतदोषाढ्ये ह्यस्ति ह्येको महान्गुणः। कीर्तनादेव कृष्णस्य
मुक्तबंधः परं व्रजेदि'ति। पुनः परमुत्कृष्टमार्यसभाजितत्वात्। तद्वक्ष्यति 'कलिं सभाजयंत्यार्या गुणज्ञाः सारभागिनः। यत्र संकीर्तने-
नैव सर्वः स्वार्थोभिलभ्यते ॥ न ह्यतः परमो लाभो देहिनां भ्राम्यतामिह। यतो विंदेत परमां शांतिं नश्यति संसृतिम् ॥ कृतादिषु
प्रजा राजन्कलाविच्छन्ति संभवम्। कलौ खलु भविष्यंति नारायणपरायणाः। कचित्कचिन्महाराज द्राविडेषु च भूरिशः ॥ ताम्र-
पर्णी नदी यत्र कृतमाला पयस्विनी। कावेरी च महापुण्या प्रतीची च महानदी ॥ ये पिबंति जलं तासां मनुजा मनुजर्षभ ॥
प्रायो भक्ता भगवति वासुदेवेऽमलाशयाः ॥' इति कलिपक्षः ॥ ९९ ॥

अथ संन्यासाश्रमपक्षमाह। वयं तं संन्यासाश्रमं सदा हृदा धीमहि। तं कं यत्र त्रिसर्गस्तिसृणां पुत्रैषणावित्तैषणा-
लोकैषणानां सर्गो मृषा मिथ्या। कथं यथा तेजोवारिमृदां विनिमयो मृषा। यद्वा तिसृणां लोकवासनादेहवासनाशास्त्र-
वासनानां सर्गो मृषा। 'एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजा न कामयंते किंप्रजया करिष्यामो येषां नोऽयमात्मा लोक इति तेह स्म पुत्रै-
षणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरंती'ति श्रुतेः। 'वित्तैषणां यज्ञदानैर्गृहैर्दारसुतैषणाम्। आत्म-
लोकैषणां देवकालेन विसृजेत्पुनः ॥ ग्रामे त्यक्तैषणास्सर्वे ययुर्वीरास्तपोवनमि'ति वक्ष्यमाणस्मृतेश्च। पुत्रैषणा तु पुत्रा मे भवेयु-
स्ते च शीलश्रुताचारसम्पन्नाश्चिरजीविनो भवेयुरित्यादिरूपा। वित्तैषणा च वित्तं मे बहु भवेदल्पव्ययश्च मे स्यात् यथाकथंचिद्धनं
सम्पादयामीत्येवंरूपा। लोकैषणा तु इह लोके परलोके च मे सुखं स्यादित्यादिरूपेति विवेकः। अथ वासनाविवेकः—यथा सर्वे
मां न निंदेयुः किंतु स्तूयुस्तथाहमाचरिष्यामीत्यभिनिवेशो लोकवासना। सा च सम्पादयितुमशक्या। तदुक्तं 'विद्यते न खलु कश्चि-
दुपायः सर्वलोकपरितोषकरो यः। सर्वथा स्वहितमाचरणीयं किं करिष्यति जनो बहुजल्पः ॥' इति तत्राभिनिविष्टस्य तत्त्वज्ञानं न
भवतीति भावः। देहवासना द्विविधा आत्मवासना तत्संबंधिवासना चेति। मनुष्योहमित्यात्मवासना। इतरापि द्विधा शास्त्रीया
लौकिकी च। आद्या द्विधा गुणाधानप्रयुक्ता दोषापनयनप्रयुक्ता चेति। गंगास्नानशालिग्रामोदकादिनाद्या। शौचाचमनादिना
द्वितीया। लौकिक्यपि द्विधा। तैलपानमरिचभक्षणादिनाद्या। अभ्यंगस्नानादिना द्वितीयेति। देहवासनाया ज्ञानप्रतिबंधकत्वं
स्फुटमेव। शास्त्रवासना तु त्रिधा पाठव्यसनार्थव्यसनानुष्ठानव्यसनभेदात्। त्रिधैव दुःसम्पाद्यत्वं तैत्तिरीये 'भारद्वाजो ह वै
त्रिभिरायुभिर्ब्रह्मचर्यमुवास तं ह जीर्णं स्थविरं शयानमिंद्र उपव्रज्योवाच भरद्वाज यत्ते चतुर्थमायुर्दद्यां किमेतेन कुर्या इति ब्रह्मचर्य-
मेवैतेन चरेयमिति होवाच। तं ह त्रीन् गिरिरूपान् विज्ञानानि दर्शयांचकार तेषां हैकैकस्मान्मुष्टिनाददे स होवाच भरद्वाजेत्या-
मंत्र्य ह वेदा वा एते अनंता वै वेदा एतद्वा एतैस्त्रिभिरवोचथा अथ इतरदननूक्तमेव हीमं विद्धी'ति। पंचसप्ततिवार्षिकं
स्वाध्यायमधीयानं भरद्वाजं दृष्ट्वा चतुर्थमायुर्दास्यामीत्युक्तवांस्तच्छ्रुत्वा भरद्वाजोध्ययने न मतिं चकार। पश्चात्तद्दोषदर्शनेन
ततो निवार्य तस्मै ब्रह्मविद्यामुपदिदेशेत्युपाख्यानश्रुतेरर्थः। अत एवाहुः 'अनंतशास्त्रं बहु वेदितव्यमल्पश्च कालो बहवश्च विघ्नाः।
यत्सारभूतं तदुपासितव्यं हंसो यथा क्षीरमिवांबुमिश्रमि'ति। 'अधीत्य चतुरो वेदान्धर्मशास्त्राण्यनेकशः। यस्तु ब्रह्म न जानाति
दर्वी पाकरसं यथा ॥ बहुशास्त्रकथाकंथारोमंथेन वृथैव किम्। अन्वेष्टव्यं प्रयत्नेन तत्त्वज्ञैर्ज्योतिरांतरमि'ति तस्मादर्थव्यसन-
मपि दुःसंवादमेव। अनुष्ठानव्यसनं विष्णुपुराणे निदाघस्योपलभ्यते। ऋभुणा पुनः पुनर्बोध्यमानोपि निदाघोऽनुष्ठानव्यसनेन
तत्त्वं न बुबुधे तृतीयपर्यायेऽतिक्लेशेन सर्वपरित्यागेन तत्त्वं विज्ञातवान्। अतोनुष्ठानव्यसनमपि तत्त्वज्ञानप्रतिबंधकमेव।
एतदभिप्रेत्यैव 'न लोकचित्तग्रहणे रतस्य न भोजनाच्छादनतत्परस्य। न शब्दशास्त्राभिरतस्य मोक्षो न चातिरम्यावसथप्रियस्ये'ति।
यतो यस्य संन्यासस्याद्यस्य विष्णोर्जन्म। वक्ष्यति तत् 'गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम। वक्षःस्थलाद्वने वासो न्यासः शीर्षणि
संस्थितः ॥' इति। किंच यतो यस्यान्वयात्सेवनात् अभितो जानाति नियोजयति लोकाञ्छास्त्रोपदेशेन स्वस्वकर्मणीत्यभिज्ञो
ब्राह्मणः। 'सर्वेभ्यः सर्वधर्माणामुपदेष्टा द्विजोत्तमः' इति स्मृतेः। 'विप्रस्यैवाधिकारोस्ति धर्ममात्रोपदेशने' इति संहितोक्तेश्च। अथै-
ह्वैहिकामुष्मिकेषु भोग्येषु तदर्थककर्मसु च इता त्यक्ता रतिरभिलाषो यस्य स इतरतस्त्यक्तैहिकामुष्मिको भवेदित्यर्थः। एतद्वृत्तं
प्रैषमंत्रेषु स्फुटतरम्। एतेन विप्रस्यैव संन्यासेऽधिकार इति सूचितम्। वक्ष्यत्यपि 'विप्रस्यैवं संन्यसतो देवा दारादिरूपिणः।
विघ्नान् कुर्वंत्ययं ह्यस्मानाक्रम्य समियात्परमि'ति। 'गृहं वनं चोपविशेत्प्रव्रजेद्वा द्विजोत्तमः ॥' इति चैकादशे। श्रीमधुसूदन-
सरस्वतीभिरपि श्रीभगवद्गीताव्याख्याने 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इत्यत्रोक्तम्। ब्राह्मणाः पुत्रैषणायाश्च वित्तैष-
णायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यां चरंतीति संन्यासविधायके वाक्ये ब्राह्मणत्वस्य विवक्षितत्वात् 'स्वाराज्यकामो

राजसूयेन यजेते'त्यत्र क्षत्रियत्ववत् 'चत्वार आश्रमा ब्राह्मणस्य त्रयो राजन्यस्य द्वौ वैश्यस्ये'ति स्मृतेः 'मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम्। बाहुजातोरुजातानां नायं धर्मः प्रशस्यते ॥' इति देवलोक्तेश्च क्षत्रियवैश्ययोर्न संन्यासाधिकारोऽन्येषां तु दूरनिरस्तस्तदधिकारः। यच्चाग्रे वक्ष्यति 'प्राजापत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः।' इत्यादिना युधिष्ठिरं प्रस्तुत्य तत्त्यागाभिप्रायकं न तु दण्डादिग्रहपरमिति। किंच लौगाक्षिभास्करेणाप्यव्याप्त्युदाहरणे तर्ककौमुद्यां शिखासूत्रवान्ब्राह्मणा इत्युक्तेर्दंडिन्यव्याप्तिरित्युक्तम्। तेन ज्ञायते दण्डग्रहे विप्रस्यैवाधिकारः। विष्णुस्मृतावपि 'आश्रमास्तु त्रयः प्रोक्ता वैश्यराजन्ययोरपि। पारिव्रज्याश्रमप्राप्तिर्ब्राह्मणस्यैव चोदिते'ति। संवर्त्तेनापि 'उषित्वैवं वने विप्रो विधिज्ञः सर्वकर्मसु। चतुर्थमाश्रमं गच्छेदि'त्युक्तम्। किंच ये त्वेतत्कालीनास्संन्यास्याभासा अन्यजातिपरमपि संन्यासं वर्णयन्ति यथाकथंचित्ते स्वमौढ्यं प्रकटयन्ति ते शास्त्रानुयायिभिरुपेक्ष्या एवेत्यन्यत्र बहुधा प्राक्तनैर्निर्णीतमतोस्माभिरत्रोपरम्यते। यः स्वेनैव राजते इति स्वरः परमात्मा सोऽश्यते प्राप्यतेऽस्मिन्निति स्वराट्। क्विबत्राधिकरणे। 'संन्यासयोगयुक्तात्मा परं ब्रह्माधिगच्छती'ति स्मृतेः। तदेवाह यश्च ब्रह्मतदवाप्तिकरं ज्ञानं तेने। 'त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणामि'त्यादिना ब्रह्मावाप्तिकरं ज्ञानं संन्यासेन भवतीत्यन्यत्र प्रपञ्चितमत उपरम्यते। यदस्मिन्ब्रह्मणि तदवाप्तिकरे ज्ञाने सूरयोऽप्यन्ये शास्त्रिणो मुह्यन्ति। अन्यथा सदन्यथा वर्णयन्ति। तच्च भागवतपक्षे किंचिद्वर्णितमेव। कस्मै संन्यासाश्रमध्यानं क्रियते तत्राहादिकवये आदि सनातनं च यत्कं सुखं मोक्षरूपं तदादिकं तद्वाति प्राप्नोत्यनेनेत्यादिकविः।

क्विरत्रकरणे। तस्मै 'नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छती'ति श्रीमुखोक्तेः नैष्कर्म्यसिद्धिं जीवन्मुक्तिरूपामित्यर्थः। जीवन्मुक्तिस्तु तत्त्वज्ञानमनोनाशवासनाक्षयैरेककालीनैर्भवति नान्यथा। तदुक्तं योगवासिष्ठे 'तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च। जीवन्मुक्तिकराश्चैते समाभ्यस्ता हि राघव ॥ त्रय एते समं यावन्न स्वभ्यस्ता मुहुर्मुहुः। तावन्न पदसंप्राप्तिर्भवत्यपि समाशतैरि'ति। 'एकैकशो निषेव्यन्ते यद्येते चिरयत्नतः। तन्न सिद्धिं प्रयच्छन्ति मन्त्राः संकीलिता इवे'ति। यथा सन्ध्यावन्दनमार्जनेन सह नियुक्तानामापोहिष्ठेत्यादीनां तिसृणामृचां मध्ये प्रतिदिनमेकैकस्या ऋचः पाठे शास्त्रीयानुष्ठानं न सिध्यति। यथा वा लोके शाकसूपौदनादीनामेकैकेन भोजनासिद्धिस्तद्वत्। चिराभ्यासस्य प्रयोजनमाह 'त्रिभिरेतैश्चिराभ्यस्तैर्हृदयग्रन्थयो दृढाः। निःशङ्कमेव त्रुट्यन्ते बिसच्छेदे गुणा इव ॥' व्यतिरेकमाह 'जन्मान्तरशताभ्यस्ता राम संसारसंस्थितिः। सा चिराभ्यासयोगेन विना न क्षीयते क्वचिदि'ति। न केवलमेकैकाभ्यासे फलाभावः, किन्तु तत्स्वरूपमपि न सिध्यतीत्याह 'तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च। मिथः कारणतां गत्वा दुःसाध्यानि स्थितानि ही'ति। त्रयाणामेतेषां मध्ये द्वयोर्मेलनेन त्रीणि द्वंद्वानि भवन्ति। तत्र मनोनाशवासनाक्षयद्वन्द्वस्यान्योन्यकारणत्वं व्यतिरेकमुखेनाह 'यावद्विलीनं न मनो न तावद्वासनाक्षयः। न क्षीणा वासना यावत्तावच्चित्तं न शाम्यतीति। प्रदीपज्वालासन्तानवद्वृत्तिसन्तानरूपेण परिणममानमन्तःकरणद्रव्यं मननात्मकत्वान्मन इत्युच्यते। तस्य नाशो नाम वृत्तिरूपपरिणामं परित्यज्य निरुद्धाकारेण परिणामः। तथाच पतञ्जलिर्योगशास्त्रे सूत्रयामास 'व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः।' इति। व्युत्थानसंस्कारा अभिभूयन्ते निरोधसंस्काराः प्रादुर्भवन्ति निरोधयुक्तः क्षणश्चित्तेनान्वीय यदास्ते सोयं मनोनाश इत्यवगंतव्यम्। पूर्वापरपरामर्शमन्तरेण सहसोत्पद्यमानस्य क्रोधादिवृत्तिशेषस्य हेतुश्चित्तगतसंस्कारो वासना। पूर्वाभ्यासेन चित्ते वास्यमानत्वात्। तस्याश्च वासनायाः क्षयो नाम विवेकजन्यायां शांत्यादिवासनायां दृढायां सत्यपि बाह्यनिमित्ते क्रोधाद्यनुत्पत्तिः। तत्र मनोनाशाभावे वृत्तिषूत्पद्यमानासु कदाचिद्बाह्यनिमित्तेन क्रोधाद्युत्पत्तेर्नास्ति वासनाक्षयः। अक्षीणायां तु वासनायां तथैव वृत्त्युत्पादान्नास्ति मनोनाशः। तत्त्वज्ञानमनोनाशयोः परस्परकारणत्वं व्यतिरेकमुखेनाह 'यावन्न तत्त्वविज्ञानं तावच्चित्तशमः कुतः। यावन्न चित्तोपरमो न तावत्तत्त्ववेदनमि'ति। इदं सर्वमात्मैव प्रतीयमानं रूपरसादिकं जगन्मायैव न त्वेतद्वस्तुतोस्तीति निश्चयस्तत्त्वज्ञानम्। तस्यानुत्पत्तौ रूपरसादिविषयाणां सद्भावे सति तद्गोचराश्चित्तवृत्तयो न निवारयितुं शक्यन्ते। यथा प्रक्षिप्यमाणेष्विंधनादिषु वह्निज्वाला न निवार्यन्ते तद्वदसति चित्तोपरमे वृत्तिभिर्गृह्यमाणेषु रूपादिषु 'नेह नानास्ति किञ्चने'ति श्रुतेः 'यजमानः प्रस्तरः' इत्यादेरिव प्रत्यक्षविरोधशङ्कया ब्रह्माद्वितीयमित्येतादृशस्तत्त्वनिश्चयो नोदियात्। वासनाक्षयतत्त्वज्ञानयोः परस्परकारणत्वं व्यतिरेकमुखेनाह 'यावन्न वासनानाशस्तावत्तत्त्वागमः कुतः। यावन्न तत्त्वसंप्राप्तिर्न तावद्वासनाक्षयः ॥' इति क्रोधादिवासनास्वनष्टासु शमदमादिसाधनाभावान्न तत्त्वज्ञानमुदेति। अज्ञाते चाद्वितीयब्रह्मतत्त्वे क्रोधादिनिमित्तस्य सत्यत्वभ्रमस्यानपायान्न वासना क्षीयते। यथोक्तानां त्रयाणां द्वंद्वानामन्योन्यकारणत्वमन्वयमुखेन वयमुदाहरामः—'मनसि नष्टे सति संस्कारोद्बोधकस्य बाह्यनिमित्तस्याप्रतीतौ वासना क्षीयते। क्षीणायां वासनायां हेत्वभावे क्रोधादिवृत्त्यनुदयान्मनो नश्यति। तदिदं मनोनाशवासनाक्षयद्वंद्वम्। 'दृश्यते त्वग्र्यया बुद्ध्ये'ति श्रुतेरात्मैक्याभिमुखवृत्तेर्दर्शनहेतुत्वादितरकृत्स्नवृत्तिनाशस्य तत्त्वज्ञानहेतुत्वमवगम्यते। सति च तत्त्वज्ञाने मिथ्याभूते जगति नरविषाणादाविव धीवृत्त्यनुदयादात्मनश्च दृष्टत्वेन पुनर्वृत्त्यनुपयोगान्निरिंधनाग्निवन्मनो नश्यति। तदिदं मनोनाशतत्त्वज्ञानयोर्द्वंद्वम्। तत्त्वज्ञानस्य क्रोधादिवासनाक्षयहेतुत्वं वार्त्तिककार आह 'रिपौ बंधौ स्वदेहे च समैकात्म्यं प्रपश्यतः। विवेकिनः कुतः कोपः स्वदेहावयवेष्विवे'ति क्रोधादिवासनाक्षयरूपस्य शमादेर्ज्ञानहेतुत्वं प्रसिद्धम्। वसिष्ठोपि 'गुणाः शमाद्यो ज्ञानात् शमादिभ्यस्तथाज्ञता। परस्परं विवर्द्धेते द्वे पद्मसरसी इवे'ति वासनाक्षयतत्त्वज्ञानयोर्द्वंद्वम्। तत्त्वज्ञानादीनां त्रयाणां संपादने साधनमाह। 'तस्मात्राघव यत्नेन पौरुषेण विवेकिना।

भोगेच्छां दूरतस्त्यक्त्वा त्रयमेतत्समाश्रयेत् ॥' पौरुषो यत्नः केनाप्युपायेनावश्यं संपादयिष्यामीत्येवंविधोत्साहानुरूपो निबंधः।
विवेको नाम विभज्य निश्चयः। तत्त्वज्ञानस्य श्रवणादिकं साधनम्। मनोनाशस्य योगः। वासनाक्षयस्य प्रतिकूलवासनोत्पादः।
भोगेच्छायाः स्वल्पाया अप्यभ्युपगमे 'हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते' इति न्यायेनातिप्रसंगस्य दुर्वारत्वाद् दूरत इत्युक्तम्।
इह मनोनाशस्य योग उपाय उक्तः। स च चित्तवृत्तनिरोधरूपस्तस्य त्वष्टांगानि—'यमनियमासनप्राणायामप्रत्याहारधारणाध्यान-
समाधि'भेदात्। तत्रास्तेयकरुणार्जवशांतिशौचधृतिमिताहारसत्याहिंसाब्रह्मचर्यभेदाद्दश यमाः। आस्तिक्यहर्षतपःसुरार्चनदान-
लज्जासज्ज्ञानहोमसच्छ्रवणजपभेदात् दश नियमाः। पद्मकस्वस्तिकभद्रवीरासनादीनि करचरणादिसंस्थाविशेषलक्षणानि बहून्यासनानि
संति। प्राणायामस्तु पूरककुंभकरेचकभेदात्त्रिधा याज्ञवल्क्येनैषां स्वरूपमप्युक्तम् 'नासिकोत्कृष्ट उच्छ्वासो ध्मातः पूरक उच्यते।
कुंभको निश्चलश्वासो मुच्यमानस्तु रेचकः ॥' इति। इंद्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः। अद्वितीयवस्तुन्यंतरिंद्रिय-
धारणं धारणा। विच्छिद्य विच्छिद्य प्रत्ययावृत्तिर्ध्यानम्। सावधानेनाविच्छिद्याविच्छिद्य प्रत्ययावृत्तिरंगघटकसंप्रज्ञाताख्यसाधनं
समाधिः। निरवधानेनाविच्छिद्याविच्छिद्य प्रत्ययावृत्तिरंगिस्वरूपसंप्रज्ञाताख्यसाध्यसमाधिरिति। विशेषस्त्वत्र पातंजलशास्त्रा-
दवसेयः। ब्रह्मचर्यं तु 'दर्शनं स्पर्शनं केलिः कीर्त्तनं गुह्यभाषणम्। संकल्पोऽध्यवसायश्च क्रिया निर्वृतिरेव च ॥ एतन्मैथुनमष्टांगं
प्रवदंति मनीषिणः। विपरीतं ब्रह्मचर्यमनुष्ठेयं मनीषिभिरि'ति। रागपूर्वकं स्त्र्यादिविषयकं ज्ञानं दर्शनम्। तत्पूर्वकक्रियादिविशेष-
जन्यं ज्ञानं स्पर्शनम्। तथैव परिहासादिव्यवहारः केलिः। स्त्र्यादेरनुरागपूर्वकं सौंदर्यादिवर्णनं कीर्तनम्। अनुरागेण रहसि संभाषणं
गुह्यभाषणम्। स्त्र्यादिविषय इदं मेऽस्त्विति दृढेच्छाविशेषः संकल्पः। अनया रम इति निश्चयोऽध्यवसायः। रागपूर्वकं स्त्र्यादि-
विषयकानुभवविशेषः क्रियानिर्वृतिरिति विवेक इत्यलं प्रपंचेन। प्रकृतमनुसरामः। किंभूतं संन्यासाश्रमं स्वेन निजेन धाम्ना
प्रभावेण निरस्तः कुहकः संसृतिरूपो येन तम्। 'न विद्यया न प्रजया धनेन त्यागेनैकेऽमृतत्वमापुरि'ति श्रुतेः। पुनः किंभूतं
सत्यंपरं 'सत्यञ्च समदर्शनमि'ति श्रीमुखोक्तेः सत्येन समदर्शनेन पूर्यते पूर्णो भवतीति सत्यंपरस्तम्। पिपर्त्तेः खः खित्वान्मुम्।
समदर्शनं विना संन्यासपूर्त्तिर्न भवतीति भावः। अथ कदा संन्यासः कार्यः कीदृशः कतिधा चेति प्रश्ने उत्तरमाह। 'जायमानो
वै ब्राह्मणस्त्रिभिरृ'णवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी
वासीदि'ति श्रुतेः 'अनृणो ब्राह्मणः परिव्रजेदि'ति श्रुतेरनृणेन संन्यासो विधेयः। तदुक्तं मनुनापि 'दशलक्षणकं धर्ममनुतिष्ठ-
न्समाहितः। वेदांतं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः ॥' इति। दशधर्मा अपि तत्रैव 'धृतिः क्षमा दमोऽस्तेयं शौचमिंद्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधा दशकं धर्मलक्षणम् ॥ दश लक्षणानि धर्मस्य ये विप्राः समधीयते। अधीत्य चानुवर्त्तंते ते यांति परमां
गतिमि'ति। विप्रा इत्युक्तेर्गृहीतदशधर्मश्रुतवेदांतविप्रस्यैव संन्यासाधिकार इति स्फुटमेव। किंच 'ऋणानि त्रीण्यपाकृत्य
मनो मोक्षे निवेशयेत्। अनया कृतमोक्षं तु सेवमानो व्रजत्यधः ॥' इति। 'त्रिभिरृणैर्द्विजो जातो देवर्षिपितृणां प्रभो।
यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य व्रजत्यधः ॥' इति। 'प्रजावान्वा परिव्रजेदि'ति वक्ष्यत्यपि। प्रजावान्वेत्यत्र वाशब्देन यज्ञाध्ययनवत्त्वं
प्राह्यमिति। संन्यासलक्षणं तु भगवतैवोक्तम् 'काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुरि'ति। किंच 'अनाश्रितः कर्मफलं
कार्यं कर्म करोति यः। स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥' इति। 'ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षती'ति
च। 'यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव ही'ति। तद्विपरीतं चोक्तमथात्र निर्णयः। ननु कर्मणां न्यासो न न्याय्यः "यावज्जीव-
मग्निहोत्रं जुहोति यावज्जीवं दर्शपूर्णमासाभ्यां यजेत्। वीरहा वा एष देवानां योऽग्निमुद्वासयते। आचार्याय प्रियं धनमाहृत्य
प्रजातंतुं मा व्यवच्छेत्सीः। कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा' इत्यादिश्रुतिभिः "नियतस्य तु संन्यासः कर्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः। यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ॥ न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते"
इत्यादिस्मृतिभिश्च नित्यनैमित्तिककर्मत्यागस्य निषिद्धत्वात्। संन्यासशास्त्रं तु कर्मानधिकृतविधुरादिविषयं काम्यकर्मत्यागविषयं
सर्वकर्मफलत्यागविषयं वा। तथा चोक्तं भगवता 'काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः। सर्वकर्मफलत्यागं प्राहुस्त्यागं
विचक्षणाः ॥" इति। न च संन्यासमंतरेण श्रवणाद्यसम्भवात्तदावश्यकत्वं, गृहस्थादिभिरपि कर्मानवरुद्धकाले श्रवणादेः कर्त्तुं
शक्यत्वात्। प्रतर्दनादेर्गार्हस्थ्यदशायामेव श्रवणादेर्जनकयाज्ञवल्क्याजातशत्रुप्रभृतीनां गृहस्थानामेव ब्रह्मनिष्ठत्वस्य च श्रवणादिति
चेन्मैवम्। छांदोग्ये त्रयो धर्मस्कंधा इत्याश्रमत्रयं प्रस्तुत्य सर्वे एते पुण्यलोका भवंति ब्रह्मसंस्थोऽमृतत्वमेति गृहस्थाद्याश्रमत्रयस्य
पुण्यलोकावाप्तिरेव ब्रह्मसंस्थशब्दितसंन्यासिन एवामृतत्वमिति विस्पष्टमभिधानात्। न च ब्रह्मसंस्थशब्दो यौगिकः कथं संन्यासि-
नमेव विशिष्याभिदध्यादिति वाच्यम्। ब्रह्मसंस्थ इति हि ब्रह्मणि परिसमाप्तिरनन्यव्यापाररूपं तन्निष्ठत्वमभिधीयते। तच्च
त्रयाणामाश्रमिणां न संभवति, तेषां स्वाश्रमविहितकर्माननुष्ठाने प्रत्यवायश्रवणात्। परिव्राजकस्य तु विधिना सर्वकर्मत्यागात्
प्रत्यवायः। शमादिसहितं ब्रह्मनिष्ठत्वमेव तस्य स्वाश्रमानुरूपं कर्मेति। तथाहुः 'आसुप्तेरामृतेः कालं नयेद्वेदांतचिंतया।
दद्यान्नावसरं किञ्चित्कामादीनां मनागपी'ति। त्रयो धर्मस्कंधा इत्यादिना धर्ममात्राधिकृतत्वेन प्रस्तुतानां त्रयाणामाश्रमाणां सर्वे
एते पुण्यलोका भवंतीति निरवशेषं परामृश्य पुण्यलोकभाक्त्वेन विनियुक्तानां निराकांक्षाणां न पुनर्ब्रह्मसंस्थशब्देन परामर्शः
संभवतीति परिशेषादाकांक्षितत्वाच्च संन्यासिनः परामर्शः। एतेन गृहस्थानां श्रवणादिसंभवप्रत्याशा निरस्ता। आख्यायिकासु

प्रतर्दनप्रभृतिगृहस्थानां श्रवणादिदर्शनलिंगं तु प्राप्तिसापेक्षं न प्रापकशास्त्रविरुद्धम्। तेषां ज्ञानाधिकारं कल्पयितुं क्षमतेऽन्यथा 'गावो वै सत्रमासते'त्यादिलिंगाद्गवादीनामपि कर्माकारकल्पनाप्रसंगात्। तथा चोक्तं वार्तिके 'त्यक्ताशेषक्रियस्यैव संसारं प्रजिहासतः। जिज्ञासोरेव चैकात्म्यं त्रय्यंतेष्वधिकारिते'ति। अस्तु वा जन्मांतरे संन्यासपूर्वकं श्रवणाद्यनुष्ठितमेव प्रतिबंधकवशात्तु तदा ज्ञानं नाभूदिह जन्मनि तु तेषां प्रतिबंधकापगमाद्गार्हस्थ्येपि सकृच्छ्रवणमात्रेण ज्ञानमुत्पन्नमिति कल्पनम्। तथा च स्मृतिः 'पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः' इति। 'अनेकजन्मसंसिद्धस्ततो याति परां गति'मिति च। तस्मात्संन्यासादेरपह्नवः। तथा 'न्यास इति ब्रह्मा ब्रह्मा हि परः परोहि ब्रह्मा तानि वा एतान्यवराणि तपांसि न्यास एवात्परे च यत्।' 'वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः॥ एतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंति। त्यजतैव हि विज्ञेयं त्यक्तुः।' प्रत्यक्परं पदमित्यादयो विविदिषासंन्यासविधायिन्यः। 'एतद्धस्म वै तत्पूर्वे विद्वांस आहुर्ऋषयः कावषेयाः। किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे एतद्धस्म वै तत्पूर्वे विद्वांसोग्निहोत्रं न जुहवांचक्रिरे एतमेवैतमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंति। एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजे' त्यादयो विद्वत्संन्यासपराः। तत्रापि कश्चिद्ब्रह्मचर्यं समाप्य गृही भवेद् गृहाद्वनी भूत्वा प्रव्रजेदिति क्रमिकसंन्यासविधिपराः। अन्याश्च यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा वनाद्वा यदहरेव विरजेत्तदहरेव प्रव्रजेत् खलु वेदार्थं यो विद्वांसोपनयनादूर्ध्वं स तानि प्राग्वा त्यजेत्पितरं पुत्रमग्न्युपवीतं कर्म कलत्रं कुटीचको ब्रह्मचारी कुटुंबं विसृजेत् त्रिदंडकमंडलुं शिक्यं पात्रं जलपवित्रं शिखां यज्ञोपवीतं चेत्येतत्सर्वं भूः स्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेदि' त्याश्रमक्रमं विना स्मार्तसंन्यासोत्तरं चोत्कटवैराग्योदयोत्तरकालमेव पारमहंस्यविधिपराश्च श्रुतयो द्रष्टव्याः। न चासां 'तत्रैवं शक्यते वक्तुं येंधपंग्वादयो नराः। गृहस्थत्वं न शक्ष्यंति कर्तुं तेषामयं विधिः॥ नैष्ठिकं ब्रह्मचर्यं वा परिव्राजकतापि वा। तैरवश्यं गृहीतव्या तेनादावेतदुच्यते॥' इति भट्टोक्तेर्विधुरादिविषयत्वं न्याय्यम्। अथ पुनरव्रती वा व्रती वा स्नातको वा वा स्नातको वा उत्सन्नाग्निरनग्निको वेति तेषां पृथक्संन्यासविधानात्। भगवतापि 'नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छती' त्यादिना विविदिषासंन्यासः। 'योगारूढस्य तस्यैव शमः कारणमुच्यते। सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी। नैव तस्य कृतेनार्थो नाकृतेनेह कश्चने' त्यादिना विद्वत्संन्यासश्च दर्शित एव। बृहस्पतिरपि 'संसारमेव निस्सारं दृष्ट्वा सारदिदृक्षया। प्रव्रजंत्यकृतोद्वाहाः परं वैराग्यमाश्रिताः॥ अंगिराश्च प्रव्रजेद्ब्रह्मचर्येण प्रव्रजेद्वा गृहादपि। वनस्थः प्रव्रजेद्विद्वानातुरो वापि दुःखितः॥' मनुरपि 'प्राजापत्यां निरूप्येष्टिं सार्ववेदसदक्षिणाम्। आत्मन्यग्नीन्समारोप्य गृहस्थः प्रव्रजेद् गृहात्॥' व्यासः 'ब्रह्मचर्येण वा कालं कुर्यात्संकल्पपूर्वकम्। वानप्रस्थो वापि भवेत्परिव्राडथवेच्छये'ति। 'अनुष्ठेयं बादरायणः साम्यश्रुतेरि'ति सूत्रं च। 'पारिव्राज्यमनुष्ठेयं बादरायणो मन्यते त्रयो धर्मस्कंधा' इत्यत्र ब्रह्मसंस्थपदेनाश्रमत्रयतुल्यश्रुतेरिति तदर्थः। संन्यासं दर्शयति। तस्माद्बहुतरश्रुतिविरोधात्कुर्वन्नेवेहेति श्रुतिवचनं नियतस्य त्वित्यादि भगवद्वचनं चाविरक्तविषयं मंदविरक्तविषयं वेत्यवसीयते। अत एवाविरक्तस्य चित्तशुद्ध्यर्थफलत्यागसहितं कर्मानुष्ठानं काम्यानां कर्मणामित्यादिना भगवता प्रसिद्धसंन्याससाम्येन स्तूयते। 'दुःखमित्येव यत्कर्म' त्यादिनाप्ययमेवार्थः स्फुटीकृतः। 'त्रिभिर्ऋणवानि'ति श्रुतिस्तु पश्चवदानविधिशेषार्थवादांतर्गता न स्वतंत्रब्रह्मचर्यादिसंन्यासविधिविरुद्धमृणत्रयसद्भावं साधयितुं क्षमते इति सुरेश्वरवार्त्तिके प्रपञ्चितम्। अविरक्तस्य संन्यासस्तु भगवताप्येकादशस्कंधे निंदित एव। ''यस्त्वसंयतषड्वर्गः प्रचंडेन्द्रियसारथिः। ज्ञानवैराग्यरहितस्त्रिदंडमनुजीवति॥ सुरानात्मानमात्मस्थं निह्नुते मां स धर्महा। अविपक्वकषायोस्मादमुष्माच्च विहीयते॥' इति। विरक्तस्य तूक्त एव 'यदा कर्मविपाकेषु लोकेषु निरयात्मसु। विरागो जायते सम्यङ्न्यस्ताग्निः प्रव्रजेत्तदे'ति। किंच विविदिषासंन्यासे त्रिदंडादिग्रहणं न तु विद्वत्संन्यासे। तत्र त्वेकदंडमेव गृह्यते। 'यदा तु विदितं तत्स्यात्परं ब्रह्म सनातनम्। तदैकदंडं संगृह्य सोपवीतां शिखां त्यजेत्॥ ज्ञात्वा सम्यक्परं ब्रह्म सर्वं त्यक्त्वा परं व्रजेदि'ति विद्यारण्योक्तेः। यस्त्वग्रे चतुर्द्धा 'न्यासे कुटीचकः पूर्वं बह्वोदो हंसनिष्क्रियावि' त्यादिना वक्ष्यते सोप्यनयोरवांतर्भूत इति। एषां स्वरूपमाह। यस्तु यात्राद्यशक्त एकस्मिन्नेव तीर्थे वसन्प्रत्यहं द्वादशसहस्रं प्रणवं जपन्यथोक्तकाले भैक्ष्यमाहरन्कुट्यां पर्णशालायां चकास्ति ब्रह्मध्यानेन स कुटीचकः। यस्तु तीर्थयात्रासु शक्तो ग्रामे एकरात्रं नगरे त्रिरात्रं तीर्थे सप्तरात्रं वसंस्त्रिकालस्नायी माधुकरीं वृत्तिमाश्रितो निजाश्रमधर्मरतः प्रणवमनुस्मरन्दण्डादिकं परिगृह्य तीर्थात्तीर्थान्तरं व्रजति बहून्युदकानि तीर्थजलानि यस्य स बहूदकः। यस्तु यथाजातस्तथारूपधरो निर्द्वंद्वो निष्परिग्रहो ब्रह्मध्याननिमग्नश्चतुर्थभूमिकारूढो भवति स हंसः। यस्तु दण्डकौपीनविधिनिषेधहीनः सप्तभूमिकारूढो ध्यातृध्येयविभागरहितो ब्रह्मानंदे लीनवृत्तित्वाच्छरीरमपि नानुसंधत्ते स परमहंसो निष्क्रिय इति चोच्यते। आचारमयूखेपि 'चतुर्विधो भिक्षुकः स्यात्कुटीचकबहूदकौ। हंसः परमहंसश्च यो यः पश्चात्स उत्तमः॥' तत्राद्ययोर्द्वयोः शिखासूत्रधारणं पुत्रदत्तान्नभोजनं भवति। परंतु सर्वत्यागेन विद्याभ्यासविद्याभ्यासः। हंसस्तु पुत्रादीनां त्यागं कृत्वा वनादौ वसन्। शिखासूत्रे वैकल्पिके। परमहंसो मुण्डः सूत्ररहितश्च। सर्वेषां ब्रह्मविद्याभ्यासस्तुल्य एव। परमहंसस्यैक एव दण्डस्त्रिदण्डादिकं हंसादीनामिति। ज्ञानस्य सप्तभूमिकास्तु 'ज्ञानभूमिः शुभेच्छाख्या प्रथमा समुदाहृता। विचारणा द्वितीया स्यात्तृतीया तनुमानसा॥ सत्त्वापत्तिश्चतुर्थी

स्यात्ततोऽसंसक्तिनामिका। पदार्थाभाविनी षष्ठी सप्तमी तुर्यगा स्मृते'ति योगवासिष्ठे। भूमिका नाम चित्तस्यावस्थाविशेषः। अत्र भूमिकात्रितयं ब्रह्मविद्यासाधनमेव न तु ब्रह्मविद्याकोटावंतर्भवति। भेदसत्यत्वबुद्धेरनिवृत्तत्वात्। यस्तु चतुर्थभूमिकां प्राप्तः स ब्रह्मविदित्युच्यते। पञ्चमभूमौ निर्विकल्पात्तदा स्वयमेव व्युत्तिष्ठते सोयं योगी ब्रह्मविद्वरः। षष्ठभूमौ पार्श्वस्थबोधितो व्युत्तिष्ठति सोयं ब्रह्मविद्वरीयान्। तदेतद्भूमिद्वयं सुषुप्तिरिति वाभिधीयते। असंप्रज्ञातप्रतिपादिकानि वाक्यानि योगशास्त्राणि सप्तमभूमिकां प्राप्ते योगिन्येव पर्यवस्यंति। सोयमीदृशो योगी व्युत्थानरहितः निर्विकल्पकसमाधिस्थः परमहंसः सप्तमभूमौ ब्रह्मविद्वरिष्ठ इति चोच्यते। तत्र नित्यानित्यवस्तुविवेकादिपुरःसरा फलपर्यवसायिनी मोक्षेच्छा प्रथमा १। यतो गुरुतो वेदांतविचारः श्रवणमननात्मको द्वितीया २। ततो निदिध्यासनाभ्यासेन मनस एकाग्रतया सूक्ष्मवस्तुग्रहणयोग्यत्वं तृतीया ३। ततो वेदांतवाक्यान्निर्विकल्पको ब्रह्मात्मैक्यसाक्षात्काररूपश्चतुर्थी ४। सविकल्पकसमाध्यभ्यासेन निरुद्धे मनसि या निर्विकल्पकसमाध्यवस्थाऽसंसक्तिः ५। ततस्तदभ्यासपरिपाके तया चिरकालावस्थायिनी सा पदार्थाभाविनी गूढसुषुप्तिश्च ६। सर्वदान्यैः परिपोष्यमाणः सच्चिदानंदैकनिष्ठो यदा तिष्ठति तदा तुर्यगेति मधुसूदनः। संन्यासिनो धर्मास्त्वेकादशे कृष्णेन 'बिभृयाच्चेन्मुनिर्वासः कौपीनाच्छादनं परम्। त्यक्तं न दंडपात्राभ्यामन्यत्किंचिदनापदि॥ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलम्। सत्यपूतं वदेद्वाक्यं मनःपूतं समाचरेत्॥ मौनानीहानिलायामा दंडा वाग्देहचेतसाम्। न ह्येते यस्य संत्यंग वेणुभिर्न भवेद्यतिः॥ भिक्षां चतुर्षु वर्णेषु विगर्ह्यान्वर्जयंश्चरेत्। सप्तागारानसंक्लृप्तांस्तुष्येल्लुब्धो न तावते'त्यादिना यावदध्यायसमाप्ति। वक्ष्यंते। सप्तमेपि 'कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः। ग्रामैकरात्रविधिने'त्यादिना। वक्ष्यंते। मनुनापि 'एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवानि'त्यारभ्य यावदध्यायसमाप्ति षष्ठेऽध्याये उक्ताः। पराशरेणापि 'कमंडल्वक्षमाला च भिक्षापात्रमथापरम्। काषायवासाः कौपीनी'त्यादिना द्वादशाध्याये उक्ताः। इह तु विस्तरभिया तत्रत्यतत्रत्यवाक्यानि नोक्तानि। ननु 'अश्वालंभं गवालंभं संन्यासं पलपैतृकम्। देवराच्च सुतोत्पत्तिं कलौ पंच विवर्जयेदि'ति स्मृतेः संन्यासः कलौ न कार्य एव। किं तस्य धर्माधर्मविचारेणेति चेन्न। 'यावद्वर्णविभागोस्ति यावद् गङ्गा महीतले। अग्निहोत्रं च संन्यासं तावत्कुर्यात्कलौ युगे॥' इति देवलस्मृतेः। कलावपि किञ्चित्कालं कार्य एव स इति। स चातुरसंन्यस्तस्य पुनर्जीवनविषय एव 'संन्यस्यार्तो यदा जीवेत्तदा दंडग्रही भवेत्। अन्यथा तु कलौ नैव ग्राह्यो दंडो द्विजोत्तमैरि'ति संहितोक्तेः। पूर्वमुक्तमपि स्थूणानिखननन्यायेन पुनराह। ब्राह्मणेनैवायं कार्यो नान्यवर्णेन। 'परीक्ष्य लोकान् कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेने'ति श्रुतेः। 'तस्माद् ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेत्। बाल्यं च पांडित्यं निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्रह्मणा इति श्रुतेश्च। अस्यार्थस्तु अस्मात्पूर्वे ब्राह्मणा आत्मानं विदित्वा पुत्राद्येषणाभ्यो व्युत्थाय भिक्षाचर्यं चरंति तस्मादधुनातनोपि ब्राह्मणो ब्राह्मणत्वजातिविशिष्टः पंडाध्ययनजा या धीस्तद्वान्पंडितस्तस्य कृत्यं पांडित्यं श्रवणं तन्निर्विद्य निश्चयेन लब्ध्वा बाल्येन ज्ञानबलभावेन मननेन शुद्धांतःकरणेन वा स्थातुमिच्छेत्। तद्द्वयं लब्ध्वाऽथ श्रवणमनननानंतरं मुनिर्मननशीलो निदिध्यासनशीलो भवेत्। अमौनं श्रवणमनने। मौनं च निदिध्यासनं लब्ध्वा उक्तत्रयस्य ब्रह्मसाक्षात्कारहेतुत्वात् त्रयानंतरं ब्रह्मावगच्छतीति ब्राह्मणः साक्षात्कृतब्रह्मा भवतीत्यर्थः। 'द्विजोत्तमो यदा पश्येद्वलीपलितमात्मनः। उपरामं तथाक्षाणां क्षैण्यं कामस्य स द्विजः॥ समीक्ष्य पुत्रं पौत्रं वा दृष्ट्वा वा दुहितुः सुतम्। अधीत्य विधिवद्वेदान्कृत्वा यागान्विधानतः॥ निश्चयं मनसः कृत्वा चतुर्थाश्रममाविशेदि'ति बृहत्पराशरस्मृतेश्च। 'अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः। इष्ट्वा तु शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्॥ अनधीत्य द्विजो वेदाननुत्पाद्य तथात्मजान्। अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन्व्रजत्यधः॥ प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम्॥ आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद् गृहादि'ति मानवोक्तेश्च। 'शतं कुलानां पुरतो बभूव तथा पराणां त्रिशतं समग्रम्। एते भवंति सुकृतस्य लोके येषां कुले संन्यसतीह विप्रः॥' इत्याचारमयूखे स्मृत्यंतराच्च। 'नैष्ठिक्यं चैव गार्हस्थ्यं वानप्रस्थ्यं भैक्षवं तथा। चत्वार आश्रमा विप्रात्क्रमेणैकैकहीनता॥ चत्वारो मुखजे प्रोक्ता आश्रमा बाहुजे त्रयः। द्वावाश्रमावूरुद्भूते पादजे त्वेक एव हि॥ विप्रेतरः पतत्येव प्रव्रज्याश्रमसंग्रहात्। तस्माद्विप्रेण कर्तव्या प्रव्रज्या नान्यवर्णजैरि'ति कौशिकसंहितोक्तेश्च। तस्माद्ब्राह्मणस्यैव संन्यासाधिकारो नान्यवर्णस्येति। इहान्यवर्णस्य संन्यासे पातित्याभिधानात्तद्दर्शनसंगादिशुभेप्सुना न कार्यमिति राद्धांतः। किञ्चात्र विचारोस्ति। स च विस्तरभिया न कृत इति। वस्तुतस्तु प्रव्रज्याधर्माणामतिदुष्करत्वादपि कलौ वैराग्यासमर्थेन संन्यासो न कार्य एव केवलं देवलोक्तिमाश्रित्यैव संन्यासो न कार्यः। तदुक्तं 'कलौ यदि भवेद्विप्रः संन्यासी संततिं विना। वैराग्येण विना चापि स ज्ञेयश्चांत्यजाधमः॥ तं दृष्ट्वा कश्मलं तोये सवासाः प्रविशेत्पुमान्। रौरवादिषु घोरेषु नरकेषु वसेत्स वै॥ कलौ विधाय संन्यासं तदाचारस्य दुर्घटान्। कलौ कृत्वा तु संन्यासं प्रायश्चित्तेन शुध्यति॥' तच्च पुनरुपनयनादिरूपमेतत्सर्वं वरतांतविनोक्तं संहितायाम्। अत एवोक्तं ब्रह्मवैवर्ते 'कलौ भवेत्स संन्यासी विषस्तैन्यं करोति यः॥' इति मुनिकृतशपथे आतुरसंन्यासस्तु 'प्राणप्रयाणसमये कुर्यादनशनं खग। दद्यादातुरसंन्यासं विरक्तस्य द्विजन्मनः॥ संन्यस्तमिति यो ब्रूयात्प्राणैः कण्ठगतैरपि। मृतो विष्णुपुरीं याति न पुनर्जायते भुवी'ति भगवदुक्तः कार्य एव। स च ब्राह्मणत्रयात्पृथक्पृथक्प्रैषानुच्चारयित्वा दण्डधारणमंतरा कार्यः। दण्डधारणे तु दाहतिलोदकपिंडदानादि न स्याद्धि। संन्यस्तस्य तुर्याश्रमत्वादस्याहं ब्रह्मास्मीत्यंतः संन्यासमस्य तु सर्वं सांपरायिकं कार्यमेव द्विजन्मन इति वदता भगवता 'चाहृतानोद्भूतानां

त्रिदण्डं न विधीयते।' इति स्मृतेर्दंडधारणमंतरा त्रयाणां वेदमधीत्याश्रमाचरणमिति सूत्रकारवचनाच्च। क्षत्रियवैश्ययोः केवलं प्रैषोच्चारणमात्रेण संन्यासाधिकारः। परं सोपवीतयोरधीतवेदयोर्विरक्तयोरेव न त्वन्यथेति स्वीकृतः। यदि प्रारब्धवशाज्जीवेत्तदा दण्डं धृत्वा गृहात्प्रव्रजेत्। क्षत्रियवैश्यौ तूपशमादिसंन्यासधर्मान्स्वीकृत्य प्रव्रजेताम्। इति संन्यासपक्षः॥ १००॥

श्रीमद्भागवताद्यपद्यविषयं व्याख्याशतं श्रीगुरोर्विद्याबुद्धिप्रदस्य नित्यकृपया सर्वार्थबोधप्रदम्। श्रीवंशीधरशर्मणा कृतमिदं गौडान्वयेनाद्भुतं निष्कारामसुतेन खर्डनगरोद्भूतेन नाभ्यंबुजे॥ यशस्विसिंहनृपतेर्यशोदानंदनालये। यशोदानंदनप्रीत्यै यशोदासूनवनुग्रहात्॥ चातुर्यं ग्रंथसंदर्भे गुरूणामेव मे नहि। यदत्राचारुता तन्मे गुरूणां नैव सर्वथा॥ यदत्र स्खलितं तन्मे विद्वांसः पूरयंतु वै। मय्यल्पज्ञे कृपां कृत्वा स्वस्थासूयां विहाय च॥ गुणगणपरिपूर्णे वस्तुनि निर्विवेका निजहृदयस्वभावादोषमेवाकलंति। विविधरसफलाढ्यैः शाखिभिः पूरितेपि विपिन इव वराहा गूथमेवाश्रयंति॥ अल्पं गुणं परेषां प्रथितं कुर्वंति साधवो लोके। तेषामेष स्वभावस्तृप्ताः स्युः परोदयेनैते॥ ६॥

**धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।**
**श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥ २॥**

अथ द्वितीयश्लोकमपि व्याख्यास्यामः। श्रीव्यासदेवो निजशिष्येभ्यो वदति। पूर्वं ब्राह्मणपक्षे पूर्वश्लोकस्य व्याख्यातत्वादधुना द्वितीयमपि तत्रैव योजयति। भो शिष्याः अत्रेत्यनेन विप्रसंघः परामृश्यते। 'त्यदादीनां बुद्धिस्थपरामर्शकत्वमि'ति भाष्यात्। अत्र विप्रसंघे धरति नरके पतंतमिति धर्मोस्ति। किंभूतः प्रकर्षेणोज्झितं त्यक्तं कैतवं पाखण्डलक्षणं यस्मिन्स तथा वेदविहित इत्यर्थः। तत्र हेतुः पर उत्कृष्टो मा यस्मात्स परमः सर्वोत्कृष्टः श्रीकृष्णभक्तिलक्षणः। तं विना मोक्षासिद्धेः। तद्वक्ष्यति श्रीदशमे ब्रह्मा 'श्रेयःस्रुतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये केवलबोधलब्धये। तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनामि'ति। सतां सदाचारपराणां वास्तवं परमार्थभूतं वस्तु ब्रह्मात्रैव ब्रह्मकुलादेव वेद्यं ज्ञातुं योग्यम्। ब्रह्मकुलस्यैवाचार्यत्वात्। कचित्पक्षव्यर्थेपि त्रल स्यात्। 'आचार्यत्वमाद्यवर्णे मया संस्थापितं धरे।' इति वाराहोक्तेः, 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्श्रोत्रियं ब्रह्मनिष्ठमि'ति श्रुतेश्च श्रोत्रियत्वं ब्राह्मण एव पर्यवस्यति। 'जन्मना ब्राह्मणो ज्ञेयः संस्काराद् द्विज उच्यते। विद्यया याति विप्रत्वं त्रिभिः श्रोत्रियशब्दभागि'ति स्मृतेः। किंभूतानां सतां परोत्कर्षासहनं मत्सरस्तद्रहितानाम्। पाखण्डानुगा विप्रोत्कर्षं न सहंते। ते चेत्थं वदंति यथान्ये प्राणिनस्तथा विप्राः, न तेषु किंचिदाधिक्यं किमर्थं वयं तानाश्रयाम इति ये मत्सरिणस्तद्भिन्नानां शास्त्रमार्गानुयायिनामित्यर्थः। किंभूतं वस्तु शिवं परमानंदं ददातीति शिवदं मोक्षदमित्यर्थः। प्रकाशदत्ववच्छिवरूपरूपस्यापि ब्रह्मणश्शिवदत्वं न विरुद्धमिति। पुनः अध्यात्माधिदैवाधिभूतरूपतापत्रयाणामुन्मूलनमुत्पाटनकरम्। अध्यात्मतापाः कामादयः अधिभूतास्सर्पव्याघ्रादिजन्या आधिदैवास्तु वाय्वग्नितडित्पातादिजन्या इति विवेकः। किंभूतेऽत्र कोर्थः संघे श्रीमद्भागवते। 'ऋचः सामानि यजूंषि सा हि श्रीरमृता सतामि'ति श्रुतेर्वेदत्रयाम एव श्रीः सा विद्यतेऽस्यास्मिन्वेति श्रीमान्। 'ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीगने'ति स्मृतेर्भगः षड्विधैश्वर्यं सोस्यास्तीति भगवान्कृष्णस्तं भगवंतमुपास्त इति भागवतः। अत्र कारकादण्। श्रीमांश्चासौ भागवतश्चेति श्रीमद्भागवतस्तस्मिंस्तथा श्रोत्रिये ब्रह्मनिष्ठे चेत्यर्थः। पुनः मह्यते पूज्यते सर्वैरिति महान् मन्यते जानाति सर्वमिति मुनिः। महतेरत् मन्यतेरिश्च प्रत्ययः। महांश्चासौ मुनिर्महामुनिः 'महाबन्धो महामुनिरि'ति गोपालसहस्रनामसु पठितत्वान्महामुनिः कृष्णस्तेन कीर्त्यते स्तूयते इति महामुनिकृतस्तस्मिंस्तथा। कृत संशब्द इत्यतः कर्मणि क्तः धातोरुपधाया ह्रस्वश्च निपातनादुणादौ बोध्यः। 'ब्राह्मणेभ्यो नमस्यामो येस्मद्रूपं त्रयीमयम्। बिभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैरि'त्यादिवाक्यैर्हरिणा श्रीदशमे विप्राः स्तुता दृश्यंते। अन्यत्रापि 'इयं ब्राह्मणनौ राजन् विपरीता भवार्णवे। तरंत्यधो गता यस्यां मज्जंत्युपरिवर्त्तिनः॥' इत्यादिवाक्यैस्तथा दृश्यंते। ननु श्रीमद्भागवत इत्यत्र तु ब्राह्मणा विष्णोरुपासका उक्ताः, महामुनिकृत इत्यत्र विष्णुर्ब्राह्मणोपासक उक्तः, इतश्च विरोधः प्रतीयते। नहि स्तोतैव स्तुत्यः स्तुत्यश्च स्तोता लोके कुत्रचिद्दृश्यते इति चेच्छृणु—'ब्रह्मा विष्णुः शिवो विप्राः सर्वेदं वैश्च पूजिताः। परस्परं स्तुवंत्येते लीलया भेदभावनादि'ति पुराणांतरात्। किंच परैर्विप्रद्विड्भिः किमीश्वरो हृद्यवरुध्यते किन्तु न कदापि। अत्र विप्रसंघे शुश्रूषुभिः शुश्रूषां कुर्वद्भिस्तत्क्षणादेवावरुध्यते स्थिरीक्रियते। 'विप्रद्विषं नरं दृष्ट्वा दूराद्विष्णुः पलायते। विप्राणां सेवनादाशु हरिस्तिष्ठति मानसे॥' इति संहितोक्तेः। येनाद्धिना सह वर्तते इति मत्सः जलशायीत्यर्थः। तर्हि सर्वे विप्रानेव कथं न सेवंते इति चेत्तत्राह कृतिभिर्जन्मांतरे कृतपुण्यपुंजैः जन्मांतरीयपुण्यं विना तत्र विश्वासो न जायते। तदुक्तं 'तीर्थे देवे गुरौ विप्रे ईशनाम्नि च पार्थिव। स्वल्पपुण्यवतां लोके विश्वासो नैव जायते॥' इति युधिष्ठिरं प्रति कृष्णेन। इति ब्राह्मणपक्षः॥ १॥

एतच्छास्त्रस्य श्रीकृष्णभक्तिप्रतिपादकत्वाद्भक्तियोगेप्येनं श्लोकं योजयति। भो शिष्या इति संबोध्य व्यासो वदति। भागवते भगवतो विष्णोरयं भागवतो भक्तियोगस्तस्मिन धर्मोस्ति। तत्र श्रीविष्णुपूजनादिरूपधर्मस्य विद्यमानत्वात्। किंभूतो धर्मः न विद्यते त्रपा नामोच्चारणनर्तनप्रणत्यादिषु येषां तेऽत्रपा वैष्णवास्ते रमंते क्रीडंत्यत्रेत्यत्रपरमः। वैष्णवेतरास्तु नामोच्चारणादौ

लज्जन्ते। मृषाभाषणपरस्त्र्युपरिपतनादौ तु न लज्जंते। तदुक्तम् 'नामोच्चारेऽथ साष्टांगप्रणतौ श्रीहरेर्नृणाम्। अभक्तानां यथा लज्जा जायते न तथा ध्रुवम्॥ मृषोक्तौ व्यभिचारादौ भक्तानां त्वन्यथा ततः॥' इत्यादिना बहु प्रपञ्चितं श्रीहरिभक्तिप्रदीपे। इत्यभिप्रेत्यैव भगवंतं कुंती वक्ष्यति 'जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान्। नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरमि'ति। एकादशेऽपि वक्ष्यति भगवान् 'रजःसत्त्वतमोनिष्ठा रजःसत्त्वतमोजुषः। उपासत इंद्रमुख्यान्देवादीन्न तथैव माम्॥ इष्ट्वेह देवता यज्ञैर्गत्वा रंस्यामहे दिवि। तस्यांते इह भूयास्म महाशाला महाकुलाः॥ एवं पुष्पितया वाचा व्याक्षिप्तमनसां नृणाम्। मानिनां चातिस्तब्धानां मद्वार्त्तापि न रोचते॥' इति। पुनः प्रोज्झितं प्रकर्षेण त्यक्तं कैतवं फलाभिसंधिलक्षणं यत्र स तथा। 'फलेच्छा यत्र स सद्धर्मः सकैतवः। निष्कामो यो भवेद्धर्मः स शुद्धः परिकीर्तितः॥' इति स्मृतेः। यद्वा प्रकर्षेणोज्झितं कैतवं वैषम्यलक्षणं यत्रेति। तद्वक्ष्यति 'जितमजित तदा भगवता यदाह भागवतं धर्ममनवद्यम्। निष्किञ्चना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय॥ विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति यदन्यत्र। विषमधिया रचितो यतो ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः॥' इति। इत्यभिप्रायेणैव कर्मशुद्धिर्मदर्पणमिति वक्ष्यत्युद्धवं श्रीहरिः। सतां सदाचारतत्पराणां वास्तवं सत्यभूतवस्तु परमात्मात्र भगवद्भक्तियोगे एव वेद्यम्। 'भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः।' इति श्रीमुखोक्तेः 'सत्यं ज्ञानमनंतं ब्रह्मे'ति श्रुतेः परमात्मैव सत्यः। 'ज्ञानकारणसामग्र्यां भक्तिरेव गरीयसी'ति शिष्टोक्तेश्च। किंभूतं वस्तु निर्मत्सराणामनसूयूनां शिवदं मोक्षफलदं सासूयानां तु जातमपि तत्त्वज्ञानं न फलपर्यवसायि। 'नैःश्रेयसकरं ज्ञानं सुवृत्तानां प्रजायते। दुर्वृत्तानां कथमपि जातमप्यन्यथा भवेदि'ति पुराणात्। पुनः किंभूतं तापत्रयाणामुन्मूलनं तापयंति क्लेशयंतीति तापाः कामक्रोधलोभास्त एव त्रयस्तापत्रयास्तेषामुत्पाटनकरम्। 'तपंति त्रिविधास्तापा नैतान्मद्गतचेतसः।' इति वक्ष्यमाणत्वात्। पुनः श्रीमत् श्रीशब्दोदिता राधा तद्युतमित्यर्थः। एतेन श्रीराधाकृष्ण एव परमार्थं वस्तु तद्भिन्नं सर्वमवस्त्वेव। 'यस्मिन्सर्वं विलीयेत वस्तु तत् परमार्थकम्। एतादृशं परं ब्रह्म राधाकृष्णो न संशयः॥' इति जीवगोस्वामिवचनात्। किंभूते भागवते महामुनयः नारदादयस्तैः कृते प्रवर्तिते। यद्वा महामुनिर्विष्णुरेव तेन प्रवर्तिते उद्धवादिभ्य उपदिष्टे परैर्भक्तियोगेतरैः साधनैरीश्वरः किं सद्यो हृद्यवरुध्यते स्थाप्यते वेति विलंबेन, अत्र शुश्रूषुभिर्भक्तियोगं सेवद्भिस्तत्क्षणादेवावरुध्यते। 'न साधयति मां योगो न सांख्यं धर्म उद्धव। न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिते'ति वक्ष्यमाणत्वात्। यद्वा किंभूत ईश्वरः परमः ब्रह्मरुद्रादिसेव्यत्वेनोत्कृष्टतमः श्रीकृष्ण इति भावः। श्रीकृष्णस्य परमत्वं पूर्वाचार्यैर्भागवतामृते वर्णितम्। तद्यथा सर्वप्रधानानन्यापेक्षिमहैश्वर्यमाधुर्यैः श्रीकृष्ण एव स्वयंरूपः प्रायस्तस्य तुल्यशक्तिधारी यः तस्य विलासः यथा वैकुंठनाथः। न्यूनशक्तिधारी यः स स्वांशः यथा मत्स्यकूर्मादिः। तत्रैकशक्तिसंचारमात्रं स आवेशः यथा पृथुनारदादिः। पुरुषावतारगुणावतारलीलावतारास्त्रिधा। महत्स्रष्टा कारणोदशायी प्रकृत्यंतर्यामी संकर्षणांशः पुरुषः प्रथमः। गर्भोदशायी समष्टिविराडंतर्यामी प्रद्युम्नांशो द्वितीयः पुरुषः। क्षीरोदशायी व्यष्टिविराडंतर्याम्यनिरुद्धांशस्तृतीयः पुरुषः इति पुरुषावताराः। सत्त्वगुणेन विष्णुः पालनकर्ता क्षीरोदनाथ एव। रजोगुणेन ब्रह्मा सृष्टिकर्ता गर्भोदशायिनाभिपद्मोद्भवः। कचित्कल्पे तु तादृशपुण्यकारी जीव एव ब्रह्मा। तदा तत्रेश्वरस्य सृष्टिशक्तिसंचारेणावेशादावेशावतार एव रजोगुणयोगाद् गुणावतारत्वमपि। विष्णुना तस्य साम्यं तु कचित्कल्पे स्वयमेव ब्रह्मा भवति यथा यज्ञः स्वयमेवेंद्रो जात इति। पातालादिसत्यलोकांतः समष्टिविराट् स्थूलो ब्रह्मण एव विग्रहः प्राकृतः। सोपि ब्रह्मा शुद्धो जीवः हिरण्यगर्भस्तस्यांतर्यामी तु गर्भोदशायीश्वर एव। अथ तमोगुणेन शिवः संहारकर्त्ता क्वचित् स्वयं विष्णुरेव सदाशिवः। किंच सदाशिवः स्वयंरूपांगविशेषरूपो निर्गुण एव सगुणशिवश्चांशः ब्रह्मा तु शिवान्नाधिकः। सगुणत्वेऽप्यस्य विष्णुना साम्यमेवेति गुणावताराः। लीलावतारास्तु चतुःसननारदवराहमत्स्ययज्ञनरनारायणकपिलदत्तहयग्रीवहंसपृश्निगर्भर्षभपृथुसिंहकूर्मधन्वंतरिमोहिनीवामनपरशुरामरघुनाथव्यासबलभद्रकृष्णबुद्धकल्कीत्यादयः। एते प्रतिकल्पं प्रादुर्भवंति। मन्वंतरास्तु यज्ञविभुसत्यसेनहरिवैकुण्ठाजितवामनसार्वभौमर्षभविष्वक्सेनधर्मसेतुसुधामयोगेश्वरबृहद्भानवः। युगावतारास्तु शुक्लरक्तपीतकृष्णाः। एषां मध्ये केचिदावेशाः केचित्प्रभावाः केचिद्वैभवाः केचित्परावस्थाः। चतुःसननारदहरिविभुपृथुप्रभृतय आवेशाः। ततोधिकशक्तिमंतः प्रभावामोहिनीधन्वंतर्यृषभव्यासदत्तशुक्लादयः। ततोधिकशक्तिप्रकाशावैभवा मत्स्यकूर्मनरनारायणवराहहयग्रीवपृश्निगर्भबलदेवयज्ञादयः। ततोप्यधिकशक्तिमंतः परावस्थाः उत्तरोत्तरश्रेष्ठास्त्रयः नृसिंहरामकृष्णाश्च। तत्रापि श्रीकृष्ण एव स्वयं भगवान्न ततोधिकः कोप्यस्ति। तस्य वासस्थानानि पूर्वपूर्वमुख्यानि चत्वारि। व्रजमधुपुरद्वारावतीगोलोकाख्यानि सपरिवारो बलदेवसहितो व्रजे पूर्णतमः मथुरायां पूर्णतरः द्वारिकायां प्रद्युम्नानिरुद्धसहितः सपरिवारः पूर्णः गोलोके पूर्णकल्पोपि वृंदावनीयलीलत्वात्पूर्णतमसजातीयः। पूर्वपूर्वेषु माधुर्याधिक्यतारतम्यादैश्वर्याच्छादनतारतम्यम्। उत्तरोत्तरेषु माधुर्यह्रासतारतम्यादैश्वर्यप्रकाशतारतम्यम्। यस्या जलेऽनेककोटिब्रह्मांडानि महाविष्णुरोमकूपगतानि तस्या विरजाया महावैकुण्ठलोकपरिखीभूताया उपरि महावैकुण्ठलोकः तदूर्ध्वभागे गोलोकः तत्र गोलोकनाथः श्रीकृष्णो देवलीलः सपरिवारो वर्त्तते। तस्य विलासो महावैकुण्ठनाथः परव्योमनामा तस्य विलासो वासुदेवः तस्य विलासः परमात्मा। ब्रह्म च निर्विशेषरूपम्। गोलोकनाथस्य द्वितीयव्यूहो बलदेवस्तस्य विलासो महावैकुण्ठे संकर्षणः तस्यांशः कारणार्णवशायी तस्य विलासो गर्भोदशायी ब्रह्मांडांतर्यामित्वेन प्रद्युम्नांशः तस्य विलासः क्षीरोदशायी अनिरुद्धांशः तस्य विलासोन्तर्यामी। मत्स्याद्यवतारास्तु

गर्भोदशायिविलासाः द्वारकामथुरावृन्दावनाख्ये धामत्रये श्रीकृष्णस्य नरलीलत्वात् ऐश्वर्याधिक्यतारतम्यात्क्रमेण माधुर्याधिक्यतारतम्यम्। सा लीला द्विधा प्रकटाऽप्रकटा च। या बाल्यपौगण्डविलाससहस्रस्य सपरिकरस्य कृष्णस्यानंतप्रकाशेन नित्यमेवाप्रकटा लीला वर्तते ता एव एकेनैव प्रकाशेन सपरिकरेण कृष्णेन यदा प्रपञ्चे क्रमात्प्रकाश्यंते तदा प्रकटा इति। गमनागमने तु तत्तद्धामतः प्रकटलीलायामेवेति विशेषः। एकमेव वृंदावनमेकैव मथुरा एकैव द्वारावती ब्रह्मांडसमूहकोटिमध्यगतभारतभूमौ तत्तदंडवासिजनैर्दृश्यते। प्रकटलीला च जन्मादिमौशलांता प्रत्येकब्रह्मांडसमूहे तत्र तत्रस्थैर्दृश्या। यथा ज्योतिश्चक्रस्थ एव सूर्ये किरणावलीति। यथा ज्योतिश्चक्रस्थ एव सूर्य एकस्मिन्वर्षे पूर्वाह्णादिकं समाप्यान्यस्मिन् प्रकाशयति च एवमेव कृष्णः प्रकटप्रकाशो निजधामस्थ एव एकस्मिन्ब्रह्माण्डे बाल्यादिलीलाः समाप्यान्यस्मिन् किमपि न प्राकट्येत। बाल्यादिलीला नित्या एव सच्चिदानन्दरूपाः मौशलमहिषीहरणलीलास्तु कृत्रिमा एवेन्द्रजालवत्। लीलांतरस्य नित्यत्वसंगोपनार्थत्वमेतयोरुपासकाभावात्। किंच प्रकटलीलायामपि श्रीवृंदावनस्य मणिमयभूम्यादिकल्पवृक्षादिमत्त्वं तत्परिवारेण केनचिदपि न दृश्यते। दृश्यते च केनचित्तदिच्छावशात्। प्रकटलीलासमाप्त्यनन्तरं तु तत्रस्थजनेन भजनाधिक्येनात्युत्कंठायां जातायामेव दृश्यते। तत्रापि स्ववासनातदिच्छानुसराभ्यामिति विवेकः। एवञ्च सर्वरूपेभ्यो व्रजेन्द्रनन्दनस्य मुख्यत्वं सर्वधामतो गोकुलस्य मुख्यत्वम्। तत्रापि 'चतुर्द्धा माधुरी तस्य व्रज एव विराजते। ऐश्वर्यक्रीडयोर्वेणोस्तथा श्रीविग्रहस्य च॥' भागवतास्तु 'मार्कण्डेयोम्बरीषश्च वसुर्व्यासो विभीषणः। पुण्डरीको बलिः शम्भुः प्रह्लादो विदुरोद्धवौ॥ दाल्भ्यः पराशरो भीष्मो नारदाद्याश्च वैष्णवाः॥' एषु प्रह्लादः श्रेष्ठः ततोपि पांडवास्तेभ्योपि केचिद्यादवास्तेष्वप्युद्धवस्तस्मादपि व्रजदेव्यस्ताभ्योपि राधेति। तदुक्तं 'त्रैलोक्ये पृथिवी धन्या यत्र वृन्दावनं पुरम्। तत्र राधासखीवर्गस्तत्र राधा प्रिया ममे'ति कृष्णवाक्यमिति भागवतामृते बहुशः श्रीकृष्णस्य महत्त्वमुक्तम्। किंभूतैः कृतिभिर्जन्मान्तरे कृतपुण्यैः नहि पूर्वपुण्यं विना भगवद्भक्तियोगोस्ति। 'दुरापा ह्यल्पतपसः सेवा वैकुण्ठवर्त्मसु। यत्रोपगीयते नित्यं देवदेवो जनार्दनः॥' इति वक्ष्यमाणत्वात्। पञ्चमेपि भक्तियोगस्य दुर्लभत्वं सूक्तम्। 'राजन्पतिर्गुरुरलं भवतां यदूनां दैवं प्रियः कुलपतिः कच किंकरो वः। अस्त्वेवमंग भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगमि'ति भगवत्प्राप्तिहेतुत्वादपि भक्तियोग एव न्याय्यः। 'यमेवैष वृणुते तेन लभ्य' इति श्रुतेः भक्तियोगस्य महत्तिरित्येकादशोक्तेश्च 'त्वं भक्तियोगपरिभावितहृत्सरोज आस्से श्रुतेक्षितपथो ननु नाथ पुंसामि'ति वक्ष्यमाणत्वादपि नहि भक्तेः प्रभावो वर्णयितुं शक्यते, यतः पतितानपि पावयति भक्तिः। तदुक्तं 'भक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवादि'ति। 'मद्भक्तियुक्तो भुवनं पुनाती'ति बहुशस्तत्र तत्रोक्तत्वात्। न चैवं 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाये'ति श्रुतिविरोधः शंकनीयः। भक्त्यवान्तरव्यापारत्वाज्ज्ञानस्य। न हि काष्ठैः पचतीत्युक्ते ज्वालानामसाधनत्वमुक्तं भवति। किं बहुना भक्तियोगोप्यनन्तरूपः, स चापि सर्वशः कर्तुमशक्यस्तदपि यथा कथंचित्स्वल्पोपि सर्वार्थसाधक एव भक्तानामिति। 'यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्। तत्सर्वं भक्तियोगेन मद्भक्तो लभतेऽञ्जसे'ति श्रीमुखोक्तेरित्यलमतिप्रपञ्चेन॥ इति भगवद्भक्तियोगपक्षः॥ २॥

**निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्।**
**पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः॥**

अथ प्रसंगात्तृतीयश्लोकमपि श्रीकृष्णपक्षे योजयिष्यामः। भो भावुकाः भवन्तीत्येवंशीला भावुकाः भवनशीलाः पुमांसः यद्वा भो भावुका विद्वांसः भावयन्ति चिन्तयन्ति सद्वस्तुरूपमिति व्युत्पत्तेः। भू मिश्रीकरणचिंतनयोरत उकण्। यूयं भागवतं भगवतो मुकुन्दस्य श्रीनन्दनन्दनस्य रूपं वंशीविभूषितकरनवनीरदाभपीताम्बरारुणबिंबफलाधरोष्ठपूर्णेन्दुसुन्दरमुखादरविन्दलोचनं वल्लवीवृन्दवन्दितपदतामरसं मुहुः पौनःपुन्येन भजत श्रद्धातिशयेन सेवध्वम्। किंभूतं नितरां गमयति बोधयति पुरुषार्थचतुष्टयमिति निगमो वेदः स एव कल्पतरुस्सर्वार्थपूरणसमर्थद्रुमस्तस्य फलं फलवत्प्रकाश्यं वेदाध्ययनश्रवणादेः श्रीकृष्णरूपभजनमेव फलमन्यथा तद् वृथैवेति भावः। तदुक्तमपि 'वेदानां चेह सांगानामितिहासपुराणयोः। अध्यापनादिसाफल्यं श्रीकृष्णं भजतां भवेत्॥ अधीत्य चतुरो वेदान्यो न ध्यायेत केशवम्। वृथा श्रमो भवेत्तस्य पिष्टं पिष्टवतो यथे'त्यादिपुराणात्। द्वितीयेऽपि तदुक्तम्। 'भगवान्ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया। तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेदि'ति। दशमेपि दानव्रततपोहोमजपस्वाध्यायसंयमैः। श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते' इति। यद्वा नितरां गम्यते प्राप्यते बहुपुण्येनेति निगमो नृदेहः स चासौ कल्पतरुस्तस्य फलम्। मनुष्यदेहस्य हरिभक्तिरेव फलमित्यभिप्रायेण वक्ष्यति। 'दुर्लभो मानुषो देहो देहिनां क्षणभंगुरः। तत्रापि दुर्लभं मन्ये वैकुण्ठप्रियदर्शनमि'ति। वैकुण्ठप्रियदर्शनादेव हरिभक्तिः प्राप्यते इति भावः। किंच मर्त्यानामंगानां भगवत्परिचर्ययैव साफल्यमन्यथा वैफल्यमिति वक्ष्यति द्वितीये। 'बिले बतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्य। जिह्वासती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः॥ भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं

न नमेन्मुकुन्दमि'त्यादिभिः श्लोकैः। किंचाभियुक्तैरप्युक्तं 'शरीरं सुरूपं तथा वा कलत्रं धनं मेरुतुल्यं वचः काकुचित्रम्। हरेरंघ्रियुग्मे मनश्चेन्न दत्तं ततः किं ततः किं ततः किं ततः किमि'ति। ब्रह्माप्यग्रे वक्ष्यति 'येऽभ्यर्थितामपि च नो नृगतिं प्रपन्ना ज्ञानञ्च तत्वविषयं सहधर्म यत्र। नाराधनं भगवतो वितरन्त्यमुष्य संमोहिता विततया वत मायया ते॥' इति। कपिलोपि मात्रे वक्ष्यति 'एतावानेव लोकेस्मिन्पुंसां निःश्रेयसोदयः। तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरमि'ति। नारदोपि 'तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः। नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः॥' इति। पञ्चमेपि 'प्राप्ता नृजातिं त्विह ये च जन्तवो द्रव्यक्रियाज्ञानकलापसंभृताम्। न वै यतेरन्स पुनर्भवाय ते भूयो वनौका इव यान्ति बन्धनमि'ति। श्रीशेषेणापि 'लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसंभवाम्। आत्मानं यो न बुध्येत न क्वचित्क्षेममाप्नुयादि'ति। आत्मानं श्रीकृष्णं 'कृष्णमेनमवेहि त्वमात्मानमखिलात्मनामि'त्युक्तेः। प्रह्लादोपि 'एतावानेव लोकेस्मिन पुंसः स्वार्थः परः स्मृतः। एकान्तभक्तिर्गोविन्दे यत्सर्वत्र तदीक्षणमि'ति। किं बहुना हरिभक्तिरेव नृदेहफलम्। पुनः किं शुकमुखेन बादरायण्यास्येनाद्यत आस्वाद्यते वर्णनीयत्वेनेति शुकमुखात्। तच्चाग्रे विशेषतो ध्रुवचरितादौ प्रकटीभविष्यत्येव। यद्वा शुकः मुखं प्रेष्ठं यस्य सः शुकमुखो व्यासस्तेनाद्यत इति तथा। 'मुखमुपाये प्रारम्भे प्रेष्ठे निस्सरणास्ययोरि'ति विश्वः। 'शुको व्याससुते प्रोक्तो रावणस्य च मन्त्रिणी'ति च। यद्वा शुकः मुखमादिर्येषान्ते शुकमुखा नारदादयो मुनयस्तैरद्यते वर्णनविषयतया स्वाद्यते इति तथा। अत्रात्तिरास्वादनेऽनेकार्थत्वाद्धातूनामिति। क्विबत्र प्रत्ययः कर्मणि। पुनः किंभूतं अमृतद्रवेण नवनीतेन संयुतं हस्तधृतनवनीतपिण्डमिति भावः। 'अमृतं यज्ञशेषे स्यात्पीयूषे सलिले घृते। अयाचिते च मोक्षे च ना धन्वन्तरिदेवयोरि'ति हरिदीक्षितः। यद्वाऽमृतेन नवनीतेन हेतुना द्रवो धावनं तेन संयुतं नवनीतं हृत्वा धावमानमित्यर्थः। यद्वा 'न मे भक्तः प्रणश्यती'त्युक्तेरमृता भक्तास्तेषु द्रवोनुरागस्तेन संयुतं भक्तप्रियमित्यर्थः। 'द्रवो विद्रवणे प्रोक्तोऽनुरागे रसनर्मणोः। आसवे गमने ज्ञाने तोये प्राप्तौ विचारणे॥' इति नाममालायाम्। 'भक्तिमान्मे प्रियो नर' इति श्रीमुखोक्तेः। पुनः किंभूतं अहो अद्भुतं भुवि श्रीव्रजभूमौ गलितं प्राप्तम्। गल अदनगत्योरिति क्तः। किंभूता यूयं रसिकाः रसज्ञाः। पुनः किंभूतं रसं रसकदम्बमूर्तिम्। रसाश्च 'रौद्रोद्भुतश्च शृङ्गारो हास्यं वीरो दया तथा। भयानकश्च बीभत्सः शान्तः सप्रेमभक्तिकः॥' इति। रसमूर्तित्वं श्रीदशमे 'मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्त्तिमान् गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः। मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां वृष्णीनां परदेवतेति विदितो रंगं गतः साग्रजः॥' इति भगवद्भक्तास्तु भक्तिरसमेव मुख्यं मन्यन्ते। अथ भक्तिरसप्रपञ्चः। भक्तिर्द्विधा वैधी रागानुगा च। यदि शास्त्रशासनभयेन श्रवणकीर्तनादीनि क्रियन्ते तदा वैधी भक्तिः। निजाभिमतव्रजवासिजनानुसारिसेवाप्राप्तिलोभेन यदि श्रवणादीनि क्रियन्ते तदा रागानुगा भक्तिः। तदुक्तं 'सेवासाधकरूपेण सिद्धरूपेण चात्र हि। तद्भावलिप्सुना कार्या व्रजलोकानुसारतः॥ कृष्णं स्मरन् जनं चास्य प्रेष्ठं निजसमीहितम्। तत्तत्कथारतश्चासौ कुर्याद्वासं व्रजे सदे'ति। तत्र रागानुरागायां स्मरणस्य मुख्यत्वं तच्च स्मरणं निजभावोचितलीलावेषस्वभावस्य श्रीकृष्णस्य तत्प्रियजनस्य च तथैव श्रवणं तथैव कीर्त्तनादिकमिति। अर्चनादावपि मुद्रान्यासादिद्वारकाध्यानादिरुक्मिण्यादिपूजादिकमपि निजभावप्रातिकूल्यादागमादिशास्त्रविहितमपि न कार्यम्। भक्तिमार्गे किञ्चिदंगवैकल्येपि दोषाभावस्मरणात्। तद्वक्ष्यति 'न ह्यङ्गोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि।' इत्यादि। अंगिवैकल्ये त्वस्त्येव दोषः। तदुक्तं 'श्रुतिस्मृतिपुराणादिपञ्चरात्रविधिं विना। ऐकान्तिकी हरेर्भक्तिरुत्पातायैव कल्पते॥' इति। यदि चान्तरे रागो वर्त्ततेऽथ च सर्वमेव विधिदृष्ट्यैव करोति तदा द्वारकायां रुक्मिण्यादिमतं प्राप्नोति। अत्रायं विवेकः। व्रजलीलापरिकरस्थशृङ्गारादिभावमाधुर्ये श्रुते इदं ममापि भूयादिति लोभोत्पत्तिकाले शास्त्रयुक्त्यपेक्षा न स्यात्। सत्यां च तस्यां लोभत्वस्यैवासिद्धेः। न हि केनचिच्छास्त्रदृष्ट्या लोभः क्रियते, किंतु लोभ्ये वस्तुनि श्रुते दृष्टे वा स्वत एव लोभ उत्पद्यते। ततश्च तद्भावप्राप्त्युपायजिज्ञासायां शास्त्रापेक्षा भवेत्। शास्त्र एव तत्प्राप्त्युपायलिखनात् नान्यत्र। तच्च शास्त्रं भजनप्रतिपादकं भागवतमेव। तेषु तेष्वपि मध्ये कानिचित्तद्भावमयानि कानिचित्तद्भावानुकूलानि कानिचित्तद्भावाविरुद्धानि कानिचित्तद्भावप्रतिकूलानीति पञ्चविधानि साधनानि। तत्र दास्यसख्यादीनि भावमयान्येव ॥ १ ॥ गुरुपादाश्रयतो मंत्रजपादीनि तथा प्रेष्ठस्य श्रीकृष्णस्य निजसमीहितस्य तत्प्रियजनस्य समयोचितानां लीलागुणरूपनाम्नां श्रवणकीर्तनस्मरणानि विविधपरिचरणानि च भावसंबंधीनि ॥ २ ॥ तत्प्राप्त्युत्कंठायामेकादशीजन्माष्टमीकार्तिकव्रतभोगादित्यागादीनि तयो रूपाणि तथाऽश्वत्थतुलस्यादिसंमानादीनि तद्भावानुकूलान्येव ॥ ३ ॥ नामाक्षरमाल्यनिर्माल्यादिधारणप्रणत्यादीनि तद्भावाविरुद्धानि ॥ ४ ॥ उक्तान्येतानि सर्वाणि कर्तव्यानि न्यासमुद्राद्वारकादिध्यानादीनि तद्भावप्रतिकूलानि ॥ ५ ॥ एतानि रागानुगायां वर्जनीयानि। अथ साधनपरिपाकेन कृष्णकृपया भक्तकृपया वा भावभक्तिर्भवति यस्य चिह्नानि नव—'क्षांतिरव्यर्थकालत्वं विरक्तिर्मानशून्यता। आशाबंधः समुत्कंठा नामगाने सदा रुचिः॥ आसक्तिस्तद्गुणाख्याने प्रीतिस्तद्वसतिस्थले। इत्यादयोनुभावाः स्युर्जातभावांकुरे जने॥' तदा कृष्णसाक्षात्कारे योग्यता भवति भावभक्तिपरिपाक एव प्रेमा तस्य चिह्नं विघ्नादिसंभवेपि किञ्चिन्मात्रस्यापि न ह्रासः। ममतातिशयः प्रेम्ण एवोपरितनोऽवस्थाविशेषः स्नेहः। तस्य चिह्नं चित्तद्रवीभावो निबिडः। ततो रागः, तस्य लक्षणं कृष्णसंबंधेन महादुःखमपि सुखमेव

तत्संबंधं विना महासुखमपि दुःखमेव। ततः प्रणयस्तस्य लक्षणं गाढविश्वासः स्वस्वाम्यदृष्टया संभ्रमाभावेन सख्यं मुमुक्षुप्रभृतिषु यदि भावचिह्नं दृश्यते तदा भावप्रतिबिंब एव। ननु भावः अज्ञजनेषु भावच्छाया। अथ स्थायी–'श्रीकृष्णविषया रतिः स्थायीभावः। सविभावानुभावसात्त्विकसंचारिमिलनेन रसो भवति। यत्र विषये भावो भवति सविषयालंबनविभावः कृष्णः। यो भावयुक्तो भवति स आश्रयालंबनविभावो भक्तः। ये कृष्णं स्मारयंति भूषणवस्त्रालंकारादयः ते उद्दीपनविभावाः, ये भावं ज्ञापयंति तेऽनुभावा नृत्यगीतवाद्यादयः, तत्र ये चित्तं तनुं वा क्षोभयन्ति ते सात्त्विकाः अष्ट। 'स्तंभः स्वेदोथ रोमाञ्चो वेपथुः स्वरभेदकः। वैवर्ण्यमश्रुप्रलया इत्यष्टौ सात्त्विकाः स्मृताः॥' एते धूमायिता ज्वलिता दीप्ता उद्दीप्ताः सुदीप्ता इति पञ्चविधा यथोत्तरं मुख्याः स्युः। एते यदि स्थायिभावोत्पन्नास्तदा स्निग्धाः। जातरतिजने यदि व्यभिचारभावोत्पन्नास्तदा दिग्धाः। भावशून्यभक्तजने यदि जातास्तदा रूक्षाः। मुमुक्षुजने यदि जातास्तदा रत्याभासजाः। कर्मिजने विषयिणि च जने यदि जातास्तदा सत्त्वाभासजाः। पिच्छिलचित्तजने तदभ्यासपरे वा यदि जातास्तदा निःसत्त्वाः। भगवद्द्वेषिजने यदि जातास्तदा प्रतीपाः। अथ स्थायिभावपोषका ये ते व्यभिचारिणस्त्रयस्त्रिंशत्। 'निर्वेदोथ विषादोथ विषादो दैन्यग्लानिश्रमौ च मदगर्वौ। शंकात्रासोद्वेगा उन्मादापस्मृती तथा व्याधिः। मोहो मृतिरालस्यं जाड्यं व्रीडावहित्था च। स्मृतिरथ वितर्कचिंतामतिधृतयो हर्ष उत्सुकत्वञ्च। औग्र्यामर्षासूया चापल्यं चैव निद्रा च सुप्तिर्बोध इतीमे भावा व्यभिचारिणः समाख्याताः॥ ३२॥ अथैषां लक्षणानि। आत्मनिंदा निर्वेदः। अनुतापो विषादः। आत्मन्ययोग्यत्वबुद्धिर्दैन्यम्। ग्लानिः श्रमजन्यदौर्बल्यम्। श्रमः स्पष्ट एव। मदो मधुपानादिमत्तता। गर्वोहंकारः। अनिष्टाशंकनं शंका। अकस्मादेव भयं त्रासः। चित्तसंभ्रम उद्वेगः। उन्मत्तता उन्मादः। अपस्मारव्याधिरपस्मृतिः। ज्वरतापो व्याधिः। मूर्च्छैव मोहः। मरणं मृतिः। आलस्यं स्पष्टम्। जाड्यं जडता। लज्जैव व्रीडा। आकारगोपनमवहित्था। पूर्वानुभूतवस्तुस्मरणं स्मृतिः। अनुमानं वितर्कः। किं भविष्यतीति भावनैव चिंता। शास्त्रार्थनिर्द्धारणं मतिः। धृतिर्धैर्यम्। हर्ष आनन्दः। उत्कंठैवौत्सुक्यम्। तीक्ष्णस्वभावतौग्र्यम्। असहिष्णुतामर्षः। गुणेपि दोषारोपोऽसूया। स्थैर्येऽशक्तिश्चापल्यम्। सुषुप्तिरेव निद्रा। स्वप्नदर्शनं सुप्तिः जागरणं बोधः। अविद्याक्षयश्च। किञ्च भक्तानां चित्तानुसारेणैव भावानां प्राकट्यतारतम्यं भवति। समुद्रवद्गंभीरे चित्तेऽप्राकट्यमल्पप्राकट्यं वा। अल्पखातजलवत्तरले चित्तेऽतिशयप्राकट्यं कतिचिदगंभीरे चित्तेत्यतिप्राकट्यं भवतीति नायमात्यंतिको नियम इति न तत्प्रपञ्चो लिखितः। अथ स्थायिभावः। स च सामान्यरूपः स्वच्छरूपः शांत्यादिपञ्चविधरूपश्च। एकैकरसनिष्ठभक्तसङ्गरहितस्य जनस्य सामान्यभजनपरिपाकेन सामान्यरतिरूपः स्थायीभावः सामान्यरूपो भवति। शांतादिकपञ्चविधभक्तेष्वपि अविशेषेण कृतसंगस्य भक्तजनस्य तत्तद्भजनपरिपाकेन पञ्चविधैव रतिः तत्तद्भक्तसंगवशात्स्वच्छा रतिर्भवति। यत्र शांतदास्यसख्यवात्सल्यादिकमपि। तथा कदाचिच्छांतिः कदाचिद्दास्यं कदाचित्सख्यं कदाचिद्वात्सल्यं कदाचित्कांतभावश्च नत्वेकत्र नैष्ठिकत्वं तदा स्वच्छारतिरूपः। अथ पृथक्पृथक्रसैकनिष्ठेषु भक्तेषु शांत्यादित्रिविधमप्युदयते। अथ पञ्चविधरूपः। शांतभक्तानां शांतिः। दास्यभक्तानां रीतिः। सख्यभक्तानां सख्यम्। वात्सल्यभक्तानां वात्सल्यम्। उज्ज्वलभक्तानां प्रियता। एवमेते स्थायिभावाः विभावादिमिलनेन शांतदास्यसख्यवात्सल्योज्ज्वलाः पञ्चमुख्यरसा यथोत्तरश्रेष्ठाः। शांते श्रीकृष्णनिष्ठबुद्धिवृत्तिता। दास्ये सेवा। सख्ये निःसम्भ्रमता। वात्सल्ये स्नेहः। उज्ज्वले स्वांगसंगदानेन सुखोत्पादनम्। एवं पूर्वपूर्वगुण उत्तरोत्तरस्थाः स्युः। अथ शांतरसे नराकृतिपरब्रह्मचतुर्भुजः परमात्मा इत्यादिगुणः श्रीकृष्णो विषयालंबनः। सनकसनातनादयस्तपस्विनश्च ज्ञानिनो मुमुक्षां त्यक्त्वा कृष्णभक्तकृपया भक्तिवासनायुक्ता यदि स्युस्तदा ते आश्रयालम्बनाः। तत्त्वविचारवनशैलादिवासिजनसंगसिद्धक्षेत्राद्या उद्दीपनविभावाः। नासिकाग्रदृष्टिः अवधूतचेष्टा निर्ममता भगवद्द्वेषिजनेपि न द्वेषः तद्भक्तजनेपि नातिभक्तिः मौनं ज्ञानशास्त्रेऽभिनिवेश इत्यादयोऽनुभावाः। अश्रुपुलकरोमांचाद्याः प्रलयवर्जिताः सात्त्विकाः। निर्वेदमतिधृत्यादयः सञ्चारिणः। शांतिः स्थायी। इति शांतरसः। अथ दास्यरसः। ईश्वरः प्रभुः सर्वज्ञः शरणागतपालकः भक्तवत्सल इत्यादिगुणः श्रीकृष्णो विषयालम्बनः आश्रयालम्बना दासाश्चतुर्विधाः अधिकृतभक्ता आश्रितभक्ताः पार्षदा अनुगा इति। ब्रह्मशङ्करेन्द्रादयोऽधिकृतभक्ताः। आश्रितास्त्रिधा शरण्याज्ञानिचराः सेवानिष्ठाश्च। कालियमागधवृद्धराजादयः शरण्याः। प्रथमतो ज्ञानिनोपि मुमुक्षां त्यक्त्वा ये दास्ये प्रवृत्तास्ते शौनकादयो ज्ञानिचराः। ये प्रथमत एव भजने रतास्ते चन्द्रध्वजहरिहरबहुलाश्वादयः सेवानिष्ठाः। उद्धवदारुकश्रुतदेवादयः पार्षदाः। रक्तकपत्रकमधुकण्ठपयोदादयो व्रजेऽनुगाः। एषां मध्ये सपरिवारा एव श्रीकृष्णे यथोचितं भक्तिमन्तो ये ते धुर्यभक्ताः। ये कृष्णप्रेयसीवर्गे आदरयुक्तास्ते धीरभक्ताः। ये तु तत्कृपाप्राप्त्यवर्गेण कमपि न गणयन्ति ते वीरभक्ताः। एते सर्वे सम्भ्रमप्रीतियुक्ताः। गौरवप्रीतियुक्तास्तु प्रद्युम्नसांबगदादयः श्रीकृष्णस्य लाल्यास्ते सर्वे केचिन्नित्यसिद्धाः केचित्साधनसिद्धाः केचित्साधकाः श्रीकृष्णानुग्रहचरणधूलिमहाप्रसादादय उद्दीपनविभावाः श्रीकृष्णस्याज्ञाकरणादयोऽनुभावाः। स्तम्भादयोऽष्ट सात्त्विकाः। हर्षादयः संचारिणः। प्रभुताज्ञानेनात्मनश्चाति संभ्रमः। पितृत्वादिभावादादरश्च स्थायीभावः प्रेमा रागः स्नेहश्चात्र रसे भवति। अधिकृते आश्रिते च भक्ते प्रेमपर्यन्ता भवति स्थायी। पार्षदे स्नेहपर्यन्तः। परीक्षिति दारुके उद्धवे च रागः प्रकट एव। व्रजानुगे रक्तकादौ सर्व एव। प्रद्युम्नादावपि सर्व एव। यावत्पर्यंतं श्रीकृष्णदर्शनं प्रथमतो न भवति तावत्कालमयोगः। दर्शनानंतरं यदि विच्छेदस्तदा वियोगः

तत्र दश दशाः 'अंगेपु तापः कृशता जागर्या लंबशून्यता। अधृतिर्जडता व्याधिरुन्मादो मूर्च्छितं मृतिरि'ति। इति दास्यरसः। अथ सख्यरसः। विदग्धो बुद्धिमान् सुवेशः सुखीत्यादिगुणः श्रीकृष्णोत्र विषयालम्बनः। आश्रयालम्बनाः सखायश्चतुर्धा सुहृदः सखायः प्रियसखाः प्रियनर्मसखाश्च। ये कृष्णस्य वयसाधिकास्ते सुहृदः किंचिद्वात्सल्यवन्तः सुभद्रमंडलीभद्रवलभद्राद्याः। ये किंचिद्वयसा न्यूनास्ते किञ्चिद्दास्यमिश्रिताः सखायः विशालर्षभदेवप्रस्थादयः। ये वयसा तुल्यास्ते प्रियसखाः 'श्रीदामा च सुदामा च दामा च वसुदामक' इत्याद्याः। ये तु प्रेयसीरहस्यसहायाः शृंगारभावानुमोदकास्ते प्रियनर्मसखाः सुवलमधुमंगलोज्ज्वलार्जुनादयः। कृष्णस्य कौमारपौगंडकैशोराणि वयांसि शृंगवेणुदलवाद्यादयश्चोद्दीपनविभावाः। 'कौमारं पंचमाब्दांतं पौगंडं दशमावधि। कैशोरमापंचदशाद्यौवनं तु ततः परम्॥' अष्टमासाधिकदशवर्षपर्यंतं श्रीकृष्णस्य व्रजे प्रकटविहारः। अत एव कृष्णस्याल्पकालत एव वृद्धया मासचतुष्टयाधिकवत्सरत्रयपर्यन्तं कौमारम्। ततः परमष्टमासाधिकषड्वर्षपर्यंतं पौगण्डम्। ततः परं दशवर्षपर्यंतं कैशोरम्। ततः परमपि सर्वकालं व्याप्य दशवर्षं कैशोरं तत्रैव सदा स्थितिः। एवं च सप्तमे वर्षे वैशाखे मासि कैशोरारंभः। तत्र वैशाख्यां पूर्णिमायां प्रेयसीवृन्दमुख्यया प्राथमिकः संगमः। 'सोयं वसंतसमयः समियाय यस्मिन् पूर्णं तमीश्वरमुपोढनवानुरागम्। गूढग्रहारुचिरया सह राधयासौ रंगाय संगमयिता निशि पौर्णमासी'ति विग्धमाधवप्रसिद्धेः। अत एव प्रसिद्धपौगण्डमध्य एव प्रेयसीभिर्विहारस्तदपि तादृशसमयभूतत्वादिति प्रसंगाल्लिखितम्। बाहुयुद्धखेला एकत्र शयनादयोऽनुभावाः सर्व एवात्र सात्त्विकाः। हर्षगर्वाद्याः संचारिणः। साम्यदृष्ट्या निःसंभ्रमतामयविश्वासविशेषः सख्यरतिः। स्थायीभावः रतिः प्रणयः प्रेमा स्नेहा रागश्चेति पञ्चविधः। अर्जुनभीमसेनद्रौपदीश्रीदामविप्राद्या अन्यत्र सखायः। अत्रापि वियोगे दश दशाः पूर्ववत्। इति सख्यरसः। अथ वात्सल्यरसः। कोमलाङ्गो विनयी सर्वलक्षणयुक्त इत्यादिगुणः श्रीकृष्णो विषयालंबनः कृष्णे भाववंतो मातापित्रादयोऽत्र व्रजेश्वरीव्रजराजरोहिण्युपनन्दपत्न्यादयश्च। तथा देवकी कुन्ती वसुदेवादयश्चाश्रयालम्वनाः। स्मितजल्पितवाल्यचेष्टाद्या उद्दीपनाः। मस्तकघ्राणाशीर्वादलालनपालनादयोऽनुभावाः सात्त्विकाः सर्वे स्तनस्रवश्चेति नवसंख्याः। हर्षशंकाद्या व्यभिचारिणः। वात्सल्यं स्थायीभावः प्रेमस्नेहरागा अत्र भवंति। वियोगे दश दशाः पूर्ववदिति वात्सल्यरसः। अथ मधुररसः। रूपमाधुर्यवेणुमाधुर्यलीलामाधुर्यप्रेममाधुर्यसिंधुः श्रीकृष्णो विषयालम्वनः। मुरलीरववसंतकोकिलादय उद्दीपनाः। कटाक्षस्मितादयोऽनुभावाः सात्त्विकाःसर्वे सुदीप्तपर्यंताः निर्वेदाद्याः सर्वे आलस्यौग्र्यरहिता व्यभिचारिणः। प्रियतारतिस्थायीभावः प्रेमस्नेहरागाद्या उज्ज्वलनीलमण्युक्ताः सर्वे भवंति। इति मधुररसः। अथैषां वैरे मैत्रीस्थितिः। शांतस्य दास्यस्य च परस्परं मैत्री। सख्यवत्सलौ तटस्थौ। उज्ज्वलः शत्रुः। सख्यस्योज्ज्वलस्य च परस्परं मैत्री। उज्ज्वलस्य शांतवत्सलौ शत्रू। सख्यस्य तु उज्ज्वलशांतौ तटस्थौ। वत्सलस्य च न केनापि मैत्री। उज्ज्वलदासौ मित्रे इति वैरमैत्र्यादिः। अथ भावमिश्रणम्। वलदेवादीनां सख्यं वात्सल्यं दास्यञ्च। मुखराप्रभृतीनां वात्सल्यं सख्यं च। युधिष्ठिरस्य वात्सल्यं दास्यं सख्यञ्च। भीमस्य सख्यं दास्यं वात्सल्यञ्च। नकुलसहदेवयोर्दास्यं सख्यञ्च। उद्धवस्य दास्यं सख्यञ्च। अक्रूरोग्रसेनादीनां दास्यं वात्सल्यञ्च। अनिरुद्धादिनप्तॄणां दास्यं सख्यं चेति। एवं पञ्च मुख्यरसाः। अथ हास्याद्भुतवीरकरुणरौद्रभयानकवीभत्साः सप्त गौणभक्तिरसाः पञ्चविधभक्तेष्वेवोदयंते। त एवाश्रयालम्बना हास्यादीनां पण्णां कृष्णः। कृष्णसंवंधिनश्च विषयालम्बनाः वीभत्सस्य तु घृणास्पदा मेध्यमांसशोणितादयो विषयालंवनाः। रौद्रभयानकयोः श्रीकृष्णशत्रवोपि विषयाः। गंडविकासनेत्रविस्ताराद्यो यथासम्भवमनुभावाः। सात्त्विका अपि यथासंभवं द्वित्राः। हर्षविमर्शाद्या व्यभिचारिणः 'हासो विस्मय उत्साहः शोकक्रोधौ भयं तथा। जुगुप्सा चेत्ययं भावविशेषः सप्तधोदितः॥' एते स्थायिभावाः। किंच वीररसे युद्धदानदयाधर्मेषु उत्साहवशात् युद्धवीरदानवीरदयावीरधर्मवीरा इति चतुर्द्धा वीररसः। इति सप्त गौणरसाः। एवं मिलित्वा द्वादशरसा भवंति। अथैषां सप्तानां गौणानां पंचमुख्येष्वेवांतर्भावो यथा हास्ययुद्धवीरयोः सख्ये, अद्भुतस्य सर्वत्र, करुणादानवीरदयावीराणां वात्सल्ये। भयानकस्य वत्सले दास्ये च। वीभत्सस्य शांते। रौद्रस्य तु क्रोधवति वत्सले उज्ज्वलपरिवारेषु एकांशेनेत्यनेनैव परस्परमैत्री ज्ञेया। वैरं च युक्त्या ज्ञेयम्। वैररसस्य स्मरणे वा वाध्ये वा विषयाश्रयाभेदे वोपमायां वा रसांतरव्यवधाने वा वर्णने सति न रसाभासः। यदि परस्परमैत्रयोर्योगस्तदा सुरसता। मुख्यानां पञ्चानां तु विषयाश्रयभेदेपि वैरयोगे रसाभास एव। अधिरूढमहाभावे केवलं राधायास्तु वैरयोगेपि वर्णनपरिपाट्या न रसाभासः। किच कृष्णो यदि स्वयमेकदैव सर्वरसानां विषयो वा आश्रयो वा तदपि न रसाभासः। अथान्येपि रसाभासाः केचिदसह्यप्रायाः। कृष्णे यदि ब्रह्मतश्चमत्काराधिक्यं न भवति तदा शांतरसाभासः। कृष्णाग्रे यदि दासस्यातिधाष्टर्यं भवति तदा दास्यरसाभासः। पुत्रादीनां वलाधिक्यज्ञानदृष्ट्या लालनाद्यकरणं वात्सल्यरसाभासः। द्वयोर्मध्ये एकस्य रमणेच्छाऽन्यस्य नास्ति प्रकटमेव संभोगप्रार्थनं वा तदोज्ज्वलरसाभासः। कृष्णसम्वन्धवर्जिताश्चेद्धास्यादयस्तदा ते हास्यादिरसाभासाः। यदि कृष्णवैरिषु भवंति तदातिरसाभासः। अथोज्ज्वलरसमप्याह विशेषतो मुख्यत्वादिति। तत्र विषयालंवनोपि नायकचूडामणिः श्रीकृष्णः स गोकुलमथुराद्वारकासु क्रमेण पूर्णतमः पूर्णतरः पूर्ण इति त्रिविधः। पूर्णतमत्वादीनां लक्षणानि पूर्वमुक्तानि कृष्णपक्षव्याख्याने। स च धीरोदात्तो धीरललितो धीरोद्धतो धीरशांत इति प्रत्येकं चतुर्विध एवं कृत्वा द्वादशधा। तत्र रघुनाथवद्गांभीर्यविनयसर्वजनसन्मानकारित्वादिगुणवान धीरोदात्तः। कन्दर्पवत्सगर्भावशो निश्चिन्तो विदग्धो धीरललितः।

भीमसेनवदौद्धत्यात्मश्लाघारोषकैतवादियुक्तो धीरोद्धतः। युधिष्ठिरवद्धार्मिको जितेन्द्रियः शास्त्रदर्शी धीरशांतः। स च पत्युपपतिभेदात्पुनर्द्विधा। एवं कृत्वा चतुर्विंशतिधा स्यात्। पुनश्च सोऽप्यनुकूलदक्षिणधृष्टशठभेदाच्चतुर्द्धा। एवं कृत्वा षण्णवतिभेदवान्भवति। तत्रैकस्यामेव नायिकायामनुरागयनुकूलः। सर्वत्र समो दक्षिणः। साक्षात्प्रियं वक्ति परोक्षेऽप्रियं करोति यः स शठः। अन्यसंभोगादिचिह्नयुक्तो निर्भयो मिथ्यावादी यः स धृष्टः। अथाश्रयालम्बननायिकापि प्रथमं स्वकीया परकीयेति द्विधा। कात्यायनीव्रतकन्यानां मध्ये या गांधर्वेणाविवाहिताः प्रच्छन्नतया ताः स्वकीयाः, तदन्या धन्या धान्यादयः कन्याः परकीयाः। श्रीराधिकाद्यास्तु परोढाः परकीया एव। किंच गोकुले स्वकीया अपि पित्रादिशंकया परकीया एव। द्वारकायां रुक्मिण्याद्याः स्वकीया एव। ताश्च मुग्धा मध्या प्रगल्भा इति त्रिविधाः। मध्या तु मानसमये धीरमध्याऽधीरमध्या धीराधीरमध्येति त्रिधा। वक्रोक्तिपवित्रभर्त्सनकारिणी या सा धीरमध्या। निष्ठुरवाक्या या साऽधीरमध्या। मिश्रितवाक्या या सा धीराधीरमध्या। राधा प्रगल्भापि धीरप्रगल्भाऽधीरप्रगल्भा धीराधीरप्रगल्भेति त्रिधा। निजरोषगोपनपरा सुरतेष्वुदासीना या सा धीरप्रगल्भा। चंद्रावली भद्रा निष्ठुरतर्जनेन कर्णोत्पलेन च या कृष्णं ताडयेत्सा धीरप्रगल्भा। श्यामला रोषसंगोपनं भंग्या किंचित्तर्जनं च या करोति सा धीराधीरप्रगल्भा मंगला। मुग्धा तु रोषेण मौनमात्रपरैकविधैव। मध्या त्रिधा प्रगल्भा त्रिधा एवं कृत्वा सप्तविधास्ताश्च स्वकीयापरकीयाभेदेन चतुर्दशविधा कन्या च मुग्धैवेत्येकविधेति पञ्चदश नायिका भवन्ति। अथाष्टौ नायिकाः। अभिसारिकावासकसज्जाविरहोत्कंठिताविप्रलब्धाखंडिताकलहांतरितास्वाधीनभर्तृकाप्रोषितभर्तृकाभेदात्। तत्र या कृष्णमभिसारयति साभिसारिका। कुंजमन्दिरे सुरतशय्यादिकं या सज्जीकरोति रमणोत्सुका सा वासकसज्जा। या कृष्णविलंबे सति विरहेणोत्कंठिता सा विरहोत्कंठिता। यदा नायात्येव कृष्णस्तदा विप्रलब्धा। या प्रातरागतमन्यस्त्रीसंभोगांकयुतं कृष्णं रोषेण पश्येत्सा खण्डिता। मानांते या पश्चात्तापं करोति सा कलहांतरिता। सुरतांते वेषार्थं कृष्णं याज्ञापयति सा सास्वाधीनपतिका। कृष्णस्य मथुरागमने या दुःखिता सा प्रोषितभर्तृका। अथ पञ्चदशानामष्टगुणितत्वे विंशत्युत्तरं शतं भवति। पुनश्चोत्तममध्यमकनिष्ठत्वेन षष्ट्युत्तरशतत्रयभेदभिन्ना नायिकाः स्युः। तासु व्रजसुंदरीणां मध्ये काश्चिन्नित्यसिद्धाः श्रीराधाचंद्रावल्याद्याः काश्चित्साधनसिद्धाः काश्चिन्मुनिपूर्वाः काश्चिच्छ्रुतिपूर्वाः काश्चिद्दैव्य इति ज्ञेयाः। अथ तासां स्वभावाः—काश्चित्प्रखराः श्यामला मंगलाद्याः काश्चिन्मध्याः श्रीराधालीलाप्रभृतयः। काश्चिन्मृद्वीति ख्याताश्चंद्रावलीप्रभृतयः। अथ पक्षाः—स्वपक्षसुहृत्पक्षतटस्थपक्षप्रतिपक्षभेदाच्चतुर्द्धा। श्रीराधायाः स्वपक्षः। ललिताविशाखादीनां सुहृत्पक्षः। श्यामलायूथेश्वर्यादीनां तटस्थपक्षः। भद्रादीनां प्रतिपक्षः। चंद्रावली श्रीराधा च वामा मध्या नीलवस्त्रा रक्तवस्त्रा च। ललिता वामा प्रखरा शिखिपिच्छवसना। विशाखा वामा मध्या तारावलीवसना। चंपकलता वामा मध्या नीलवसना। चित्रा दक्षिणा मृद्वी नीलवसना। तुंगविद्या दक्षिणा प्रखरा शुक्लवस्त्रा चंदनगौरी च। इंदुलेखा वामा प्रखराऽरुणवस्त्रा। रंगदेवी सुदेवी च वामा मध्या रक्तवस्त्रा भद्रा दक्षिणा मृद्वी चित्रवसना। अस्याः सखी पद्मा दक्षिणा प्रखरा। शैव्या दक्षिणा मृद्वी। दूती द्विधा स्वयंदूत्या प्तदूती च। अंत्या त्रिधा-मितार्था निसृष्टार्था पत्रहारिणी च। वाक्यं विनेङ्गितेन या दौत्यं करोति सा मितार्था। याज्ञया समस्तकार्यभारं वहति सा निसृष्टार्था। या पत्रेण कार्यं साधयति सा पत्रहारिणी। ताश्च शिल्पकारिणी दैवज्ञा लिंगिनीपरिचारिका धात्रेयी वनदेवी चेत्याद्याः। व्रजे यातु स्वयमेव दौत्यं करोति सात्येति बोध्यम्। वीरा वृंदा वंशी चेति कृष्णस्य दूतीत्रयम्। प्रगल्भवचना वीरा प्रियवादिनी वृंदा, सर्वकार्यसाधिनी वंशी। अथ सखी पंचधा-सखी नित्यसखी प्राणसखी प्रियसखी परमेष्ठसखी च। एतासु काचित्समस्नेहा काचिदसमस्नेहा। या कृष्णे स्नेहाधिका सा सखी कुसुमिकाविंध्याधनिष्ठाद्या सा या राधायां स्नेहाधिका सा नित्यसखी कस्तूरिकामणिमञ्जर्याद्या। या तत्र मुख्या सा प्राणसखी शशिमुखीवासन्तीलासिकाद्या। द्वयोरेव या समस्नेहा सा प्रियसखी कुरङ्गाक्षीकन्दर्पसुन्दरीशशिकलाद्या। या तत्र मुख्या सा परमेष्ठसखी ललिता विशाखा चंपकलता चित्रा तुंगविद्येन्दुलेखा रङ्गदेवी सुदेवी च यद्यपि समस्नेहा, तथापि राधायाः पक्षपातं करोति। यौवनं[२] तु संभिन्नयौवननवयौवनव्यक्तयौवनपूर्णयौवनभेदाच्चतुर्द्धा। कलावत्याद्याः संभिन्नयौवनयौवनसन्धिस्थाः। धन्याद्या नवयौवनस्थाः। श्रीराधाद्या व्यक्तयौवनस्थाः। चन्द्रावल्याद्याः पूर्णयौवनस्था इत्यालम्बनविभावाः। अथोद्दीपनविभावाः। ते च गुणनामतांडववेणुवाद्यगोदोहनविभूषणगतिचरणचिह्नगन्धसौरभ्यनिर्माल्यबर्हगुञ्जावतंसकालमेघचन्द्रदर्शनादिभेदाद्बहुविधाः। अथानुभावाः—भावहावहेलाशोभाकान्तिदीप्तिमाधुर्यप्रगल्भतौदार्यधैर्यलीलाविलासविच्छित्तिविभ्रमकिलकिंचितमोट्टायितकुट्टमितबिब्बोकललितविहृता इति विंशतिरेव। तत्र चित्तस्य प्रथमविकारो नेत्रचापल्यसूच्यो भावः १। तिर्यग्ग्रीवाभ्रूनेत्रादिविकारसूच्यो हावः २। कुचस्फुरणपुलकनीवीस्खलनादिसूच्यो हेला ३। संभोगानंतरं गात्रभूषादीनां सालसत्वमस्तव्यस्तत्वं च शोभा ४। शोभैव यौवनोद्रेके कांतिः ५। कांतिरेव देशकालसंभोगवैशिष्ट्ये दीप्तिः ६। नृत्यादिश्रमजनितगात्रशैथिल्यं माधुर्यम् ७। संभोगवैपरीत्यं प्रगल्भता ८। रोषेऽपि विनयव्यंजनमौदार्यम् ९। दुःख-

१. पौरगणादिस्थाः।

२. द्वादशवार्षिका संभिन्नयौवना षोडशवार्षिका नवयौवना विंशतिवर्षा व्यक्तयौवना त्रिंशद्वर्षा पूर्णयौवनेति विवेकः। पुरुषस्तु षोडशाब्दपर्यन्तं संभिन्नयौवनः। ततः पञ्चविंशाब्दान्तं नवयौवनस्ततो द्वात्रिंशदब्दान्तं व्यक्तयौवनस्ततश्चत्वारिंशदब्दान्तः पूर्णयौवन इति शृङ्गारग्रन्थे।

संभावनायामपि प्रेम्णि निष्ठा धैर्यम् १०। कांतचेष्टानुकरणं लीला ११। प्रियसंगे रतिसुखादीनां तात्कालिकी प्रफुल्लता विलासः १२। अल्पमात्राभरणधारणेपि शोभा विच्छित्तिः १३। अभिसारादावतिसंभ्रमेण हारमाल्यादिस्थानविपर्ययो विभ्रमः १४। यत्मेरोधनादौ गर्वाभिलाषरुदितस्मितासूयाभयक्रुधां संकरीकरणं हर्षादुच्यते किल किंचितम् १५। कांतवार्त्ताश्रवणे पुलकादिभिरभिलाषस्य प्राकट्यं मोट्टायितम् १६। सुखे दुःखचेष्टा कुट्टमितम् १७। वांछितेपि वस्तुनि गर्वेणानादरो बिब्बोकः १८। भ्रूभंग्यांगभंग्याद्यसझणत्कारहरतेन भ्रमणाविद्रावणादिचेष्टितं ललितम् १९। लज्जादिभिर्यन्निजकार्यं नोच्यते किंतु चेष्टया व्यज्यते तद्विहृतम् २०। क्वचिद्द्वयमधिकम्—ज्ञातस्याप्यज्ञवत्प्रश्नो मौग्ध्यम्। प्रियस्याग्रे भ्रमरादिकं दृष्ट्वा भयं चकितम्। अथान्येऽनुभावाः। 'नीव्युत्तरीयधम्मिल्लस्रंसनं गात्रमोटनम्। जृम्भा घ्राणस्य फुल्लत्वं निश्वासाद्याश्च ते मताः॥' अथ सात्त्विकाः। स्तंभस्वेदादयोष्टौ धूमायितप्रज्वलितदीप्तौ दीप्तसुदीप्ताः। अथ व्यभिचारिणो निर्वेदाद्या भावास्त्रयस्त्रिंशत्ते च पूर्वमुक्ताः। तत्र भावोत्पत्तिर्भावसंधिर्भावशाबल्यं भावशांतिरिति दशाचतुष्टयम्। भावोत्पत्तिः स्पष्टार्था। भावद्वयस्य मिलनं भावसंधिः। पूर्वपूर्वभावस्य परपरभावेनोपमर्दो भावशाबल्यम्। भावस्यांतर्द्धानं भावशांतिः। अथ स्थायिभावाः। मधुरा रतिः, सा च त्रिधा साधारणी समंजसा समर्थेति भेदात्। कुब्जायां साधारणी मणिवत्। पट्टमहिषीषु समंजसा चिंतामणिवत्। व्रजदेवीषु समर्था कौस्तुभमणिवत्। सामान्यभावेन स्वसुखतात्पर्यवती साधारणी। कृष्णस्य निजस्य च सुखतात्पर्यवती पत्नीभावमयी समंजसा। केवलं कृष्णस्य सुखतात्पर्यवती परांगना भावमयी समर्था। ततः समर्था। प्रथमदशाया रतिर्बीजवत् १। ततः प्रेमेक्षुवत् २। ततः स्नेहो रसवत् ३। ततो मानो गुडवत् ४। ततः प्रणयः खण्डवत् ५। ततो रागः शर्करावत् ६। ततोनुरागः सितावत् ७। ततो महाभावः सितोपलवत् ८। अथैषां लक्षणानि। पूर्वसंस्कारतो बाललालनादिनिष्ठा स्वरूपाद्वा श्रवणदर्शनादिभ्यो वा कृष्णे प्रीत्या मनोलग्नता रतिः १। विघ्नसंभवेपि ह्रासाभावः प्रेमा २। चित्तस्य द्रवीभावनिदानं स्नेहः ३। तत्र चंद्रावल्यादौ तदीयताभावेन घृतस्नेह आदरमयो भावांतरमिश्रित एव। सुरसो यथा घृतम्। श्रीराधादौ मदीयताभावेन मधुस्नेह आदरशून्यः स्वत एवं सुरसो यथा मधु। अथ मानः। स्नेहाधिक्येन भद्राभद्रहेतुना वा रोषो हेतुना विनैव वाम्यं मानः। चंद्रावल्यादौ दाक्षिण्योदात्तः क्वचिद्वाम्यगंधोदात्तः किंचिदनादरसूचकमौदासीन्यम्। श्रीराधादौ कौटिल्यलालितम्। कुटिलभावोद्गारणं नर्मललितश्च वक्रोक्तिमधुरव्याहारमयः। अथ प्रणयः। मनोदेहेन्द्रियैरैक्यभावनामयो विस्रंभः प्रणयः। चंद्रावल्यादौ विनययुक्तं मैत्र्यं सुमैत्र्यं च। श्रीराधादौ स्ववशतामयं सख्यं सुसख्यञ्च। अथ रागः। श्रीकृष्णसंबंधेनाधिकं दुःखमपि सुखमेव तत्सम्बंधं विना सुखमपि दुःखमेवेति यतो भवति स रागः। तत्र चंद्रावल्यादौ नीलीरागः स्वलग्नभावावरणः। तथैव श्यामारागो भद्रादौ चिरसाध्यरूपः। श्रीराधादौ तु मंजिष्ठारागोऽनन्यापेक्षः। भावावरणशून्यः। तथैव श्यामलादौ कुसुंभरागः सुखसाध्यत्वात्किंचिदन्यापेक्षः। पात्रसाद्गुण्यात् स्थिरः। अथानुरागः। या कृष्णे सदानुमतेऽथ च नवनवोऽपूर्व इवेति बुद्धिर्यतो भवति सोनुरागः। अत्राप्राणिन्यपि जन्मलालसासप्रेमवैचित्त्यं विच्छेदेपि पूर्त्तिरित्यादिक्रिया। अथ महाभावः—अनुराग एव निःसीमवृद्धिं प्राप्तः सूर्ये इव रविकांते प्रियसंबंधिजन्ममात्र एव स्वभावसमर्पको यदि भवति तदा स महाभागः। सोपि रूढाधिरूढभेदाद् द्विधा। कृष्णस्य सुखेपि पीडाशंकया खेदः। निमेषस्याप्यसहिष्णुत्वादिकं यत्र स रूढो महाभावः। कोटिब्रह्मांडगतसमस्तसुखमपि यस्य सुखस्य लेशोपि न भवति समस्तवृश्चिकसर्पादिदंशकृतमपि दुःखमपि यस्य दुःखस्य लेशोपि न भवति कृष्णसंयोगवियोगत एते सुखदुःखे यतो भवतः सोधिरूढो महाभावः। सोधिरूढ एव मोदनमादनभेदाद् द्विधा। यस्योदये कृष्णतत्प्रेयसीनामन्यासामपि महाविक्षोभचमत्कारो भवेत् सुदीप्तसात्त्विकविकारदर्शनात् समोदनो राधिकायूथ एव भवति नान्यत्र। मोदनोऽयं प्रतिश्लेषे मोहनो भवेत्। यस्योदये सति पट्टमहिषीगणालिंगितस्यापि कृष्णस्य मूर्च्छा राधाविरहतापेन ब्रह्मांडक्षोभकारित्वं तिरश्चामपि रोदनम्। प्रायो वृन्दावनेश्वर्यां मोहनोयमुदंचति। मोहनस्य वृत्तिभेद एव दिव्योन्मादः, यत्र भ्रममयव्यवस्था यत्रोद्घूर्णाचित्रजल्पादयः संति। अथ मादनः। यत्रानंतभावोद्गमः अत्र वनमालायामपीर्ष्या पुलिंदीष्वपि श्लाघा कालस्पर्शिन्या माल्त्या अपि भाग्यवर्णनमेष मादनः सर्वश्रेष्ठो राधायामेव नान्यत्र। अथैषामाश्रयनिर्णयः। कुब्जाया साधारणी रतिः प्रेमपर्यंता। पट्टमहिषीणां समंजसा रतिरनुरागपर्यंता। तत्र सत्यभामाराधिकाभावानुसारिणी लक्ष्मणा च। रुक्मिणी तु चंद्रावलीभावानुसारिणी। अन्याश्च व्रजस्थप्रियनर्मसखीनां चानुरागपर्यंता। व्रजसुंदरीणां तु समर्था रतिर्महाभावपर्यंता सुबलादीनां च। तत्रापि मोदनो राधायूथ एव नान्यत्र। तत्रापि मोहनो राधायां ललिताविशाखयोश्च नान्यत्र। तद्यूथेपि। तत्रापि मादनो राधायामेव न तु ललिताविशाखयोरपीति स्थायिभावः। स एव विप्रलंभसंभोगभेदाद् द्विधा। तत्राद्यश्चतुर्द्धा पूर्वरागमानप्रेमवैचित्त्यप्रवासभेदात्। अज्ञसङ्गात्पूर्वमुत्कण्ठामयी रतिः स पूर्वरागः। अत्र दशा दश। 'लालसोद्वेगजागर्यास्तानवं जडिमात्रतु। वैयग्र्यं व्याधिरुन्मादो मोहो मृत्युर्दशा दशे'ति। मानो द्विधा सहेतुकनिर्हेतुकभेदात्। निर्हेतुकः स्वयमेव शाम्यति। सहेतुकस्य तु शांतिः 'सामभेदक्रियादाननत्युपेक्षा रसांतरैरि'ति। प्रियवाक्यं साम। निजैश्वर्यं श्रावयित्वा तस्या योग्यत्वज्ञापने भेदः। वयस्यादिद्वारा भयप्रदर्शनं त्वभेदः। दानं वस्त्रमाल्यादीनाम्। नतिर्नमस्कारः। औदासीन्यप्रकटनमुपेक्षामयकष्टादिप्रस्तावः। मानशांतिचिह्नानि। अश्रुस्मितादीनि। अथ प्रेमवैचित्त्यम्। सत्यपि कृष्णनैकट्येऽनुरागाधिक्याद्यत्र विरहो भवति तदेव तत्। अथ प्रवासः किंचिद्दूरनिष्ठसुदूरनिष्ठभेदाद् द्विधा। सः गोचारणा-

यनुरोधादायस्तु नित्यमेव । द्वितीयस्तु श्रीकृष्णे मथुरादिगते स्यात् । तत्र पूर्वोक्ता दशदशा अतिप्रबला भवंति । अथ संभोगः । स संक्षिप्तसंकीर्णसंपन्नसमृद्धिमद्भेदाच्चतुर्द्धा । पूर्वरागांते कुचाधरनखक्षतादीनामल्पाल्पत्वे संक्षिप्तः । मानान्तेऽसूयामात्सर्यरोपभाषणमिश्रितः संकीर्णः, किंचिद्दूरप्रवासांते संपन्नः स्पष्टः । सुदूरप्रवासांते समृद्धिमानतिस्पष्टः । संभोगप्रपंचस्तु दर्शनकथनवर्त्मरोधरासवनविहारजलकेलिवंशीचौर्यनौखेलादानलीलालुक्कायनलीलामधुपानादिरूपो बहुधेति प्रपंचितमुज्ज्वलनीलमणिग्रंथेऽतोऽस्माभिरुपरम्यत इति । पुनः किंभूतं आलयं आलीनां सखीनामर्थाद्राधाया ललिताप्रभृतीनां समूहं आलम् । समूहेऽपीत्यण्, तद्याति प्राप्नोतीत्यालयस्तं गोपीकदम्बमध्यगमित्यर्थः । यद्वाऽऽलीयते सर्वमत्रेत्यालयस्तम् । तच्च ब्रह्मस्तुतौ प्रकटीभविष्यति । श्रीगीताख्येकादशे विश्वरूपाध्यायेपि स्फुटम् । वाक्यानि विस्तरभिया नोक्तानि । श्रीमद्भागवतीयस्य कृष्णपक्षे सुशोभना । व्याख्या या तृतीयपद्यस्य कृता विद्वन्मुदे मया ॥ १ ॥ अत्रार्था बहवः संति यथा रत्नानि चार्णवे । सुबुद्धिभिः प्रलभ्यास्ते मंदैर्न च कदाचन ॥ २ ॥ गुरूणामनुकंपातः श्रीवंशीधरशर्मणा । व्याख्यां कृतां बुधजनास्स्वीकुर्वंत्वनुकंपया ॥ ३ ॥ तीर्थं शोभितमम्बुजैर्बहुविधैराद्योरत्ययोध्यापतेर्नाम्नाजस्य त्रियोजनं गिरिवराच्छ्रीमानसाया दिशि । वारुण्यां खलु पापतापहरणासंसेविनां यन्नृणां तत्तीरे च निवत्स्यति कलियुगे खर्डाह्वयं पत्तनम् ॥ ४ ॥ रघोः सूनुरजो राजा चकारात्र तपः क्वचित् । ब्रह्मा तत्तपसा तुष्ट आगत्यात्र ददौ वरम् ॥ ५ ॥ मन्नाम्ना ब्रह्मकासारस्त्वन्नाम्नाजसरोवरम् । तीर्थमेतन्महाराज भविष्यति न संशयः ॥ ६ ॥ स्नास्यंति चात्र ये मर्त्यास्त्रिसंध्यं श्रद्धयान्विताः । ते मत्पदं प्रयास्यंति नात्र कार्या विचारणा ॥ ७ ॥ स्नानं दानं जपं होमं स्वाध्यायं श्राद्धतर्पणे । येऽत्र कुर्वंति राजेंद्र तेषां फलमनंतकम् ॥ ८ ॥ स्मरणाद्दर्शनादस्य सर्वाः सिध्यंति सिद्धयः । आपदश्च लयं यांति सत्यमेतद् ब्रवीमि ते ॥ ९ ॥ आजं सरोवरं चैतत्सर्वतीर्थोत्तमं नृप । भविष्यति न संदेह इत्युक्त्वांतर्दधे विधिः ॥ १० ॥ ततो राजापि स ययावयोध्यां रघुनंदनः । इत्यैतिह्यादवगतं स्वपूर्वेभ्यः श्रुतं यथा ॥ ११ लिखितं न मया बुद्ध्या कल्पनेयं गिरो न मे । ततः प्रथां ययौ तीर्थमजनाम्नाथ तद्भुवि ॥ १२ ॥ तस्योपकंठे न्यवसद् द्विसहस्रशरान्मिते । गते कलियुगे खर्डनामकं पत्तनं शुभम् ॥ १३ ॥ तत्रोवास द्विजश्रेष्ठः सर्वधर्मविदां वरः । बलरामशर्मा तस्माच्च भूधरोभूद्विचक्षणः ॥ १४ ॥ गौरीप्रसादशर्मा तु तत्पुत्रः शैवधर्मयुक् । सुखदेवस्ततो जात उदारो हरिभक्तियुक् ॥ १५ ॥ गजराममस्ततो जातो निकारामस्ततोभवत् । ततो वंशीधरो जातस्तेनायं रचितः शुभः ॥ १६ ॥ निबन्ध आद्यपद्यानां श्रीमद्भागवतस्य च । त्रयाणां सुज्ञमोदाय प्रीतये राधिकापतेः ॥ १७ ॥ पुष्पवंशजने राज्ये हीरासिंहस्य भूपतेः । नाभिकंजपुरेनेन प्रीयतां राधिकापतिः ॥ १८ ॥ इयन्मात्रा न विज्ञेया व्याख्या सर्वापराणि च । स्कन्धानां द्वादशानां हि कृता सुज्ञप्रमोददा ॥ १९ ॥

श्रीधरस्वामिभावार्थदीपिकायाः प्रकाशिका ।
नन्दसूनोर्यदेच्छा स्यात्तस्या मुद्रापणं तदा ॥
भविष्यति न सन्देहः प्रभोर्भक्तार्थकारिणः ॥ २० ॥

इति श्रीमद्भागवताद्यपद्यत्रयीव्याख्या श्रीवंशीधरशर्मकृता श्रीकृष्णचन्द्रपदपंकजार्पिता श्रोतृवक्तृकर्तृसुखदास्तु सदा ॥

**समाप्तोऽयं ग्रन्थः**

२००३३
७-५-६०

Library IIAS, Shimla
S 294.182 1 Sh 24 B
00029933